उच्चतर माध्यमिक पाठ्यक्रम

संस्कृत साहित्य-348

पुस्तक-1

विद्याधनं सर्वधनप्रधानम्

राष्ट्रीय मुक्त विद्यालयी शिक्षा संस्थान

ए-24-25, संस्थागत क्षेत्र, सेक्टर–62,

नोएडा - 201 309 (उत्तर प्रदेश)

वेबसाइट : www.nios.ac.in, निर्मूल्य दूरभाष- 18001809393

NIOS SENIOR SECONDARY - SANSKRIT SAHITYA (348)

Complete Textbook (27 Lessons)

Table of Contents

1. Lesson 1 3
2. Lesson 2 19
3. Lesson 3 34
4. Lesson 4 54
5. Lesson 5 76
6. Lesson 6 101
7. Lesson 7 121
8. Lesson 8 146
9. Lesson 9 165
10. Lesson 10 186
11. Lesson 11 207
12. Lesson 12 230
13. Lesson 13 250
14. Lesson 14 272
15. Lesson 15 290
16. Lesson 16 307
17. Lesson 17 325
18. Lesson 18 344
19. Lesson 19 360
20. Lesson 20 377
21. Lesson 21 392
22. Lesson 22 408
23. Lesson 23 431
24. Lesson 24 448
25. Lesson 25 466
26. Lesson 26 482
27. Lesson 27 497

१

348sk01

कविपरिचयः - १

प्रस्तावना

संस्कृसाहित्यनभसि आर्षकवित्वेन व्यासवाल्मिक्योः महती प्रसिद्धिः दृश्यते। काव्यं कथं भवेत् इति निर्धारणाय मानदण्डत्वेन वाल्मीकिप्रणीतं रामायणम् एव गृह्यते कविभिः। अत एव वाल्मीकिः आदिकविः, रामायणं च आदिकाव्यम्। रामायणं न केवलं काव्यग्रन्थः अपि तु धर्मग्रन्थः अपि अस्ति। रामायणं हि मानवजीवनस्य सर्वस्वम् अस्ति। रामायणं हि श्रेयोमार्गप्रदर्शकं ज्योतिः विद्यते।

अस्ति महाभारतं हि रामायणम् इव अस्मद्राष्ट्रेतिहासः। नास्ति अस्य ग्रन्थस्य उद्देश्यम् एकमात्रं कौरवपाण्डवयोः युद्धवर्णनम्, अपि तु भारतीयधर्मस्य कात्स्न्र्येन सविस्तरं चित्रणम् अपि तदीयं लक्ष्यं विद्यते। महाभारतस्य अस्य प्रणेता हि व्यासदेवः।

संस्कृतसाहित्ये भासो हि सम्प्रतिविज्ञातनाटककृत्सु प्राचीनतमो भवति। संस्कृतसाहित्ये भासस्य बहवः ग्रन्थाः विद्यन्ते। कालिदासादयः महाकवयः अपि भासम् एव श्रेष्ठत्वेन मन्यन्ते। प्रायः त्रयोदश नाटकग्रन्थाः भासस्य नाम्नि विद्यन्ते। पाठे अस्मिन् वाल्मीकेः व्यासदेवस्य भासस्य च देशकालकृतिविषयिणी चर्चा प्रस्तूयते।

उद्देश्यानि

अमुं पाठं पठित्वा भवान्

- महाकवीनां विषये संक्षिप्तं परिचयं प्राप्स्यति।
- वाल्मीकेः व्यासदेवस्य भासस्य च देशकालकृतिविषये ज्ञास्यति।
- रामायणस्य महाभारतस्य कियत् माहात्म्यं वर्तते इति ज्ञातुं शक्नुयात्।
- रामायणस्य महाभारतस्य च विषयवस्तु ज्ञातुं शक्नुयात्।
- भासस्य कृतिं ज्ञातुं शक्तः भवेत्।

१.१) वाल्मीकिः - रामायणम्

संस्कृतसाहित्ये रामायणपदेन वाल्मीकिविरचितं रामायणम् एव प्रसिद्ध्यति। भारतीयैः रामायणम् आदिकाव्यं वाल्मीकिश्च तत्प्रणेतृतया आदिकविः अभिधीयते। रामायणात् प्राचीनः

संस्कृतनिबद्धः काव्यलक्षणोपपन्नः कोऽपि ग्रन्थः न दृश्यते। रामायणे न केवलं युद्धम् एव वर्णितम् अपि तु रूपकोपमाद्यलङ्कारयुतायां भाषायां प्रकृतेः अपि वर्णनं कृतम्। अतः रामायणं काव्यम् इति स्वीक्रियते न वीरगाथामात्रं न वा शुष्केतिहासमात्रम्। संसारे किम् अपि काव्यं लोकप्रियतायां रामायणस्य समतां कर्त्तुं न क्षमते। एतस्य महाकाव्यस्य प्रणेता वाल्मीकिः। एतादृशस्य आदिकवेः देशकालकृतिविषयिणी चिन्ता अत्यन्तं कष्टसाध्या अस्ति। तथापि अन्यान् ग्रन्थान् वीक्ष्य देशकालादिकम् अनुमीयते।

१.१.१) कालः-

वाल्मीकेः स्थितिकालविषये सम्प्रति अपि इदम् इत्थन्तया वक्तुं नैव पार्यते तथापि एतद् अनुमीयते यत् स महर्षेः व्यासात् अपि प्राचीनः आसीत्। अत्र प्रमाणम् - रामायणे महाभारतवर्णितस्य कस्यापि पात्रस्य नाम न उपलभ्यते, महाभारते तु रामकथा वर्णिता लभ्यते। महाभारतस्य सप्तमपर्वणि लङ्काकाण्डगतं पद्यद्वयं प्राप्यते।

बौद्धधर्मस्य उदयात् प्राक् एव वाल्मीकिः आसीत्। रामायणीया रामकथा कियता परिवर्तनेन दशरथजातकनाम्ना जातकग्रन्थस्य अङ्गभावं प्राप्ता। तत्र पालिभाषया अनूदितं पद्यम् अपि प्राप्यते।

मृगयायां दशरथः श्रवणकुमारं हतवान् इति रामायणकथा सामजातके वर्ण्यते। बौद्धसाहित्यस्य विशेषज्ञः सिल्वाँलेविमहोदयः स्पष्टम् अभिप्रैति यत् सद्धर्मस्मृत्युपस्थाननाम्नः बौद्धग्रन्थस्य मूलं रामायणम् अवश्यं भवति। सद्धर्मस्मृत्युपस्थाने वर्त्तमानं जम्बूद्वीपवर्णनं रामायणस्थितदिग्वर्णनम् अनुहरति।

एवञ्च याकोविमहोदयः भाषाविज्ञानद्वारा बौद्धकालपूर्वभवत्वं रामायणस्य प्राह।

एभिः प्रमाणैः रामायणस्य बुद्धपूर्वकालिकता सिद्ध्यति। अत एव ज्ञायते यत् बौद्धकालात् प्राक् अपि वाल्मीकिः आसीत्।

रामायणे कोसलराजधानी अयोध्या इति आख्यायते। बौद्धजनः यवनः पतञ्जलिः च कोसलराजधानी साकेत इति कथयति। अतः सिद्ध्यति यत् अयोध्यायाः अभ्युदये वर्तमाने साकेत इति नामकरणात् पूर्वम् एव रामायणं रचितवान्।

जैनकविः विमलसूरिः प्राकृतभाषानिबद्धे स्वीये "पउमचरिआ" इति नामके ग्रन्थे रामचरितं रचितवान्। "पउमचरिआ" ६२ ई. समये रचितवान्। अतः ज्ञायते यत् ततः प्राचीनं रामायणं भवति स्म।

पाटलिपुत्रस्य प्रतिष्ठापनम् अजातशत्रुणा ५०० ई. पू. समये कृतम्। अयम् एव राजा शत्रोः आक्रमणात् रक्षार्थं गङ्गाशोणयोः संगमस्थले दुर्गम् एकं निर्मितवान्। रामायणे गङ्गाशोणयोः संगमात् श्रीरामगमनं वर्णितम् अस्ति, किन्तु दुर्गस्य उल्लेखः नास्ति। तेन स्पष्टं प्रतीयते यत् रामायणं ५००ई. पू. समयतः पूर्वकालिकम्।

रामायणे विशिला मिथिला चेति द्वे राज्ये स्तः। बुद्धस्य समये इमे द्वे नगर्यौ वैशालीराज्यान्तर्गतौ एव वर्णिते। अनेन अपि ज्ञातुं शक्यते यत् रामायणं बुद्धात् प्राचीनम् आसीत्।

रामायणे भारतस्य नानानरपतिशासितानेकलघुराज्यविभक्तत्वं वर्ण्यते। इयं च भारतस्य दशा बुद्धपूर्वकाल एव आसीत्। अनेन अपि ज्ञातुं शक्यते यत् रामायणं बुद्धात् प्राचीनम् आसीत्।

एभिः सर्वैः प्रमाणैः प्रतीयते यत् रामायणं ख्रीष्टपूर्वपञ्चमशतकात् पूर्वमेव कदाचित् प्रणीतं न तु ततः अर्वाक्। अत एव वाल्मीकेरपि कालः ख्रीष्टपूर्वपञ्चमशतकात् पूर्वम् आसीत् इति।

१.१.२) कृतिः -

वाल्मीकिः रामायणं रचितवान्। वाल्मीकेः कवित्वज्ञानाय रामायणम् एव पर्याप्तम् अस्ति। वाल्मीकिना स्वकाव्यकलायाः प्रतिपादनाय यत्पात्रम् आधारीकृतं तस्य रामस्य चरितम् एव तादृशं यत्तद् आधारीकृत्य कोऽपि कविः साफल्यम् आसादयेत्। रामायणे चतुर्विंशतिः सहस्राणि श्लोकाः सन्ति। अतः चतुर्विंशतिसाहस्रीसंहितापदेन रामायणम् अभिधीयते। यावन्ति अक्षराणि गायत्रीमन्त्रे तावत्सहस्रपरिमाणं रामायणम् इति दृढम्। इदम् अपि प्रत्यक्षसिद्धं यत् प्रतिसहस्रतमश्लोकादौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते। रामायणे ५०० सर्गाः सन्ति। अत्र सप्त खण्डाः सन्ति। बहवः विद्वांसः उत्तरकाण्डं बालकाण्डस्य कियन्तम् अंशं च प्रक्षिप्तं कथयन्ति। बालकाण्डस्य प्रथमे तृतीये च सर्गे या विषयसूची वर्तते तत्रोत्तरकाण्डवर्णिता बालकाण्डगततदंशवर्णिताश्च विषयाः न आयान्ति इति च तेषां तादृशकथने हेतुः भवति। याकोविमहोदयस्तु अयोध्याकाण्डम् आरभ्य युद्धकाण्डान्तं काण्डपञ्चकम् एव बाल्मीकिकृतं मन्यते। लङ्काकाण्डस्य अन्ते ग्रन्थः समाप्त इव प्रतिभाति। रामायणे सप्त खण्डाः विद्यन्ते। तत्र च बालाख्ये काण्डे प्रथमे खण्डे रामस्य यौवनमुखं वर्णितम् अस्ति। तत्रापि विश्वामित्रेण मुनिवरेण सह तस्य आश्रमपदं प्रति गमनम्, तत्र यागविघातकानां राक्षसानां हननं जनकजापापाणिपीडनं च इति। अयोध्याकाण्डाभिधे द्वितीये काण्डे रामस्य यौवराज्यपदाभिषेकसमारोहोपक्रमः, तत्र कैकेयीकृतः प्रत्यूहः, रामस्य निर्वासनम्, रामविरहे दशरथस्य प्राणत्यागः इति एते विषयाः विद्यन्ते। अरण्यकाण्डनाम्नि तृतीये काण्डे रामस्य दण्डकारण्यगमनम्, दण्डकारण्ये वातापिनामकराक्षसहननम्,रावणकृतं मैथिलीहरणम् इत्यादयः विषयाः विराजन्ते। किष्किन्धाकाण्डनामके चतुर्थे काण्डे रामस्य सुग्रीवेण सौहार्दं वालिनः हननं च वानरादिभिः अनुगम्यमानस्य पवनसुतस्य सीतायाः अनुसन्धानं च इति एते विषयाः चर्चिताः सन्ति। सुन्दरकाण्डाभिधाने पञ्चमे काण्डे लङ्काद्वीपस्य मनोज्ञत्वं रावणप्रासादस्य बलवच्चेतःप्रसादकत्वं हनुमतः सीतायाः सान्त्वप्रदायकत्वम् इति एते विषयाः वर्णिताः सन्ति। युद्धकाण्डनाम्नि षष्ठे काण्डे रामस्य रावणमारणम्, लङ्काजयश्च इति एते विषयाः विद्यन्ते। उत्तरकाण्डाख्ये सप्तमे काण्डे पौरजानपदेषु लब्धप्रसरः सीतागोचरः, प्रजाभिः रामस्य निन्दाकथनम्, रामराजादिष्टः सीतावनवासः, सीताशोकः, वाल्मीकेः आश्रमपदे कुशलवयोः जननं ग्रन्थपरिसमाप्तिश्च इति विस्तरेण वर्ण्यन्ते। एवञ्च वाल्मीकिः रामायणनामके ग्रन्थे रामचरित्रोपस्थापनेन आदर्शमानवचरित्रस्य वर्णनम् अकरोत्। स एव रामायणग्रन्थः सनातनधर्मस्य प्राणभूतो भवति।

रामायणस्य कविताशैली -

सर्वप्रथमं रामायणं काव्यं वर्तते तदनन्तरम् एव धर्मग्रन्थः इतिहासग्रन्थो वा अन्यत् किञ्चित् भवति। रामायणं तावत् आद्यं संस्कृतकाव्यम्, तत्प्रणेता च वाल्मीकिः भवति। अत एव सरलं संस्कृतम्

उपलभ्यते। एवञ्च रामायणेन संस्कृतकाव्यस्य बाल्यरूपं निरूप्यते। प्रायः आदिकविः वाल्मीकिः अनुष्टुप् - छन्दसा पद्यानि रचितवान्। तथाहि आभाणकम्- "वाल्मीकेरुपज्ञा नूनमनुष्टुप्-छन्दः" इति। अथारभ्येतिपर्यन्तं सर्वत्र रामायणी भाषा विशुद्धा परिष्कृता च क्वचित् क्वचिच्च अलङ्कारमण्डितापि च विद्यते। रामायणे उपमारूपकाद्यलङ्काराणां वर्णनं विद्यते। कविः न कदापि वस्तुतत्त्वं जहाति। अत एव कविः सर्वत्र कवित्वं दर्शयितुम् इच्छति।

हेमन्तवर्णने काव्यच्छटा दृश्यताम्।

"सेवमाने दृढं सूर्ये दिशमन्तकसेविताम्।

विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते।।

प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम्।

यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः।।

रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः।

निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।।"इति

रावणेन बहुशः प्रार्थ्यमाना सीता यदाह तदतिरमणीयं काव्यम् इति निर्दिश्यते-

"नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा।

सिंहस्य खादतो मांसं मुखादादातुमिच्छसि।।

यो रामस्य प्रियां भार्यां बलात्त्वं हर्त्तुमिच्छसि।

त्वं क्षुरं जिह्वया लेक्षि सूच्या स्पृशसि लोचने।

यो रामस्य प्रियां भार्यां पापबुद्ध्या निरीक्षसे।।"इति

आदिकविः वाल्मीकिः अशोकवाटिकास्थायाः सीतायाः स्वरूपम् उपमादिभिः प्रकाशयति। यथा-

अभूतेनापवादेन कीर्त्तिं निपतितामिव।

आम्नायानामयोगेन विद्यां प्रशिथिलामिव।

सन्नामिव महाकीर्त्तिं श्रद्धामिव विमानिताम्।

पूजामिव परीक्षीणामाशां प्रतिहतामिव।। इति

कवितायाः उद्देश्यं लोकहितं स्यात् इति वाल्मीकिः न कदापि विस्मृतवान्। अत एव चरित्रसृष्टौ वर्णने वा सर्वत्र कविः उच्चम् आदर्शं विचारं च प्रदर्शयति स्म।

"कल्याणि बत गाथेयं लौकिकी प्रतिभाति मे।

एति जीवन्तमानन्दो नरं वर्षशतादपि।।" इति।

ईदृशाः उपदेशाः काव्यस्य माहात्म्यं वर्धयन्ति। एभिः एव साहित्यगुणैः वाल्मीकिः भारतीयकाव्यधारायाः हिमवान् मन्यते। तथाहि-

"कूजन्तं राम रामेति मधुरं मधुराक्षरम्।

आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्।।"इति।

रामायणे रसः-

काव्यानाम् आदर्शभूतं रामायणम्। कवीनाम् आदर्शभूतश्च वाल्मीकिः इति कथयन्ति विद्वांसः। यदि वाल्मीकिः न अभविष्यत् तदा कवयः कीदृशा भवन्ति इति निर्णयो दुष्करः भवेत्। कवयः क्रान्तदर्शिनो भवन्ति, ते यन्मनोरमं तत्त्वं पश्यन्ति, तदेव शब्दद्वारा लोकानुपदेष्टुं रञ्जयितुं च चित्रयन्ति। स्वानुभूतवस्तुजातस्य शब्दचित्रोपस्थापनम् एव काव्यम्। रामाणयात् पूर्वम् उपनिषदादौ यद्यपि पद्यानि आसन् परन्तु तेषु लौकिकं छन्दो नासीत्, वाल्मीकिः हि सर्वप्रथमं लौकिकं छन्दोऽवतारितवान्। यावत् पर्यन्तं कवेः समक्षे वर्णनीयं वस्तु किमपि नागतं तावदयं मौनः आसीत्। यदा एव क्रौञ्चवधं करुणरसं दृष्टवान्, तदा एव अकस्मात् एव अस्य मुखात् काव्यप्रवाहः निर्गतः आसीत्। तदस्य काव्ये करुणरस एव प्रधानत्वं भजते। रस एव काव्यस्यात्मा। स च वाल्मीकेः काव्ये करुण एव संभवति। रामायणे हि करुणो रसः स्वयम् आदिकविना वाल्मीकिना प्रोक्तः। तथाहि - "श्लोकत्वमागतः" इति। भवभूतिः अपि एको रसः करुणः एव इति वदन् काव्ये करुणरसस्य एव प्राधान्यं स्वीकरोति। वाल्मीकिः अपि स्वकाव्ये तथैव स्वीकृतवान् स्यात् इति न आश्चर्यजनकम् अस्ति।

रामचरितस्य आदर्शता - वाल्मीकिना स्वकाव्यकलायाः प्रदर्शनाय यत्पात्रम् आधारीकृतं तस्य रामस्य चरितम् एव तादृशं यत् तत् आधारीकृत्य कोऽपि कविः साफल्यम् आपद्येत। तथाहि श्रूयते-

"राम तुम्हारा चरित स्वयं ही काव्य है

कोइ कवि बन जाय सहज संभाव्य है।"इति।

रामचन्द्र आदर्शभ्राता, आदर्शपतिः, आदर्शपुत्रः, आदर्शशासकः, आदर्शमनुष्यश्च आसीत् इति सर्वजनविदितम् अस्ति। रामः वनं गत्वा अपि भरतस्य उपरि सन्देहं न कृतवान्, लक्ष्मणोपरि विपदुपनिपाते स्वप्राणान् तृणाय मेने इत्यादिना आदर्शभ्रातृता अवगम्यते। सीतां परित्यज्य अपि तदनुरागाग्नौ तिलशः स्वम् अजुहोत् इति रामस्य आदर्शपतित्वम्। पितुः आज्ञापरिपालनाय राज्यं त्यक्तवान् इति आदर्शपुत्रत्वम् अवगम्यते। रामराज्यपदम् अधुना अपि आदर्शराज्यपर्यायताम् आपन्नमिति रामस्य आदर्शशासकता अवगम्यते। व्यवहारेण रामः आदर्शमनुष्यः आसीत्। तादृशं चरित्रं स्वीये काव्ये सृष्टवान् आदिकविः वाल्मीकिः।

संसारे किम् अपि काव्यं लोकप्रियतायां रामायणस्य समतां कर्तुं न शक्नोति, अत एव अस्य प्रचारोऽपि पूर्णतया जातः। महाभारते तृतीये पर्वणि रामकथा रामायणाधारेण वर्णिता। अग्निविष्णुगरुडभागवतब्रह्माण्डपुराणेषु च रामायणानुसारेण रामस्य चरितं वर्णितम्। भासकालिदासादयः महाकवयः अपि रामायणम् आश्रित्य काव्यादिकं रचितवन्तः। बौद्धकवयः अपि स्वकाव्यानि रामायणम् आश्रित्य कृतवन्तः आसन्।

रामायणाश्रित्य काव्यादिकम्

१. रघुवंशमहाकाव्यम् कालिदासः।

२.	जानकीहरणम्	कुमारदासः।
३.	भट्टिकाव्यम्	महाकविभट्टिः।
४.	अभिषेकनाटकम्	भासः।
५.	उत्तररामचरितम्	भवभूतिः।
६.	बालरामायणम्	राजशेखरः।
७.	रामायणचम्पूः	भोजराजः।
८.	रामचरितमानसम्	तुलसीदासः।
९.	अनर्घराघवम्	मुरारिः।
१०.	प्रतिमानाटकम्	भासः।

पाठगतप्रश्नाः-१

अत्र केचित् पाठगताः प्रश्नाः प्रदीयन्ते -

१. आदिकविः कः अस्ति।

२. आदिकाव्यं किम् अस्ति।

३. वाल्मीकिमुनेः कालः कः।

४. कः रामायणं रचितवान्।

५. रामायणे कति काण्डाः सन्ति।

६. रामायणे कति श्लोकाः सन्ति।

७. रामायणे मुख्यरसः कः।

८. रामायणाश्रितस्य एकस्य नाटकस्य नाम लिखत।

९. रामायणाश्रितस्य एकस्य चम्पूकाव्यस्य नाम लिखत।

१०. रामायणे नायकः कः।

११. रामायणे कति सर्गाः सन्ति।

१.२) द्वैपायनः व्यासः- महाभारतम्

महाभारतं हि द्वितीयं भारतवर्षस्य राष्ट्रियमहाकाव्यम्। महाभारतस्य अस्य प्रणेता कृष्णद्वैपायनः व्यासः। संस्कृतसाहित्यजगति वाल्मीकेः परं व्यासदेवः अग्रगण्यः भवति। व्यासदेवः ऋषिः आसीत्। अत एव आर्षकविः इति अभिधीयते। पुरातनः अयं कविः स्वकीयग्रन्थे देशकालादिविषये न किमपि लिखति

स्म। अत एव एतादृशानां कवीनां देशकालादिविषये अनुसन्धानं यद्यपि क्लेशसाध्यं कर्म तथापि नैव अशक्यम्। अन्यत् पुस्तकं वीक्ष्य एतादृशानां प्राचीनकवीनां देशकालादिकम् अस्माभिः अनुमीयते।

१.२.१) कालः

सम्प्रति उपलभ्यमानं महाभारतं मूलमहाभारतात् परतो बहुषु शतकेषु व्यतीतेषु एव निर्मितं स्यात्। अतः मूलमहाभारतमन्तु जयाभिधानस्य वर्तमानमहाभारतात् पूर्वकालिकत्वं निश्चितम्। अत्र वर्तमानमहाभारतस्य रचनाकालो विचारणीयः अस्ति।

ख्रीष्टैकादशशतके जातः क्षेमेन्द्रः भारतमञ्जरीनामकं ग्रन्थं लिखितवान्। स क्षेमेन्द्रः वर्तमानमहाभारतम् उदाहरति। अत एव वर्तमानमहाभारतस्य एकादशशतकपूर्वकालिकत्वं सर्वथा सिद्धम्।

अष्टमशतकोत्तरार्धे जाता आद्यशङ्कराचार्या महाभारतं स्त्रीभिः धर्मज्ञानाय अध्येयत्वेन उपदिशन्ति, तेन महाभारतस्य ततः पूर्वकालिकत्वं सिद्धम्।

अष्टमशतकोत्पन्नः कुमारिलभट्टः महाभारतस्य बहूनि पर्वाणि स्मरति।

सप्तमशतकोत्पन्नाः बाणसुबन्धुप्रभृतयः कवयो महाभारतस्य अष्टादश अपि पर्वाणि हरिवंशं च स्मरन्ति।

कम्बोडियानामके भारतस्य प्राचीनोपनिवेशे षष्ठशतकसमीपे उत्कीर्णात् शिलालेखात् ज्ञायते यत् तत्रत्याय कस्मैचित् मन्दिराय रामायणमहाभारतग्रन्थौ भारतेन प्रहृतौ। तत्कथाप्रबन्धोऽपि भारतेन कृतः।

यववालिप्रभृतिषु द्वीपेषु षष्ठशतके महाभारतम् अवर्तत, ततोऽपि पूर्वं तिब्बतभाषायां महाभारतस्य अनुवादो जातः।

चतुर्थपञ्चमशतकलिखितेषु दानपत्रकेषु स्मृतिरूपेण महाभारतवचनानि निर्दिष्टानि आसन्।

४६२ ख्रीष्टोत्कीर्णे एकत्र शीलालेखे पाराशर्यव्यासस्य लक्षश्लोकात्मकमहाभारतप्रणेतृत्वम् उल्लिख्यते।

ड्योन क्राइसोस्तोम (Dion Chrysostom) महोदयस्य साक्ष्येण प्रतीयते यत् ५० ख्रीष्टाब्दे लक्षपद्यात्मकं महाभारतं दक्षिणपथे लब्धप्रचारम् आसीत्।

एभिः सर्वैः प्रमाणैः एतत् सिद्धं यत् ख्रीष्टशतकप्रारम्भे महाभारतम् अवश्यम् आसीत्। अपि च -

पाणिनिः महाभारतं जानाति स्म इति डल्हमैन-वर्यस्य साक्ष्येण प्रतीयते।

ख्रीष्टपूर्वपञ्चमशतकप्रणीते आश्वालयनगृह्यसूत्रे महाभारतस्य उल्लेखः विद्यते।

४०० ई. पू. समये निर्मिते बौधायनधर्मसूत्रे महाभारतस्य उल्लेखः अस्ति।

महाभारतीयशान्तिपर्वणि विष्णोर्दशावतारगणनाकाले बुद्धस्य नाम न आयाति।

मेगास्थनीजप्रणीते भारतवर्णने याः कथाः वर्ण्यन्ते। ताः कथाः महाभारतात् स्वीकृताः सन्ति।

ब्रह्मा सर्वदेवज्येष्ठतया महाभारते प्रतिपादितः। पालिभाषासाहित्येन ज्ञायते यत् ब्रह्मणो ज्येष्ठत्वं ख्रीष्टपूर्वपञ्चमशतकात् प्रागेव प्ररूढप्रचारम् आसीत्।

ज्यौतिषप्रमाणैः अपि कतिपये विद्वांसः कल्पयन्ति यत् वर्त्तमानं महाभारतम् ५०० ई. पू. समयात् प्रागेव निर्मितं न ततः परम्। अतः सर्वसमीक्षया महाभारतम् ५०० ई. पू. समयतः परतो न निर्मितं किन्तु कदाचित् पूर्वम् एव निर्मितम् इति प्रतीयते। न तावत् निखिलं महाभारतम् एककालकृतिः। अतः व्यासस्य अपि कालः ५०० ई. पू. समयतः पूर्वकालिकः आसीत्।

१.२.२) कृतिः

व्यासदेवस्य पुराणम्, महाभारतञ्च इति कृतिद्वयं श्रूयते। पुराणानां धार्मिकदृष्ट्या महत्त्वम् अधिकं विद्यते। वेदविहितधर्माणां सरलतया सुबोधभाषया च वर्णनाय एव पुराणानि विरचितानि व्यासदेवैः। यदा वेदोक्ता अर्थाः लोकानां बुद्धौ न आरोढुं प्रवृत्ताः तदा वेदोक्तार्थस्य ज्ञानं सुलभं कर्तुं पुराणानि आगतानि। समाजस्य तात्कालिकस्वरूपबोधनाय अपि पुराणानां महान् उपयोगः विद्यते। पुराणेषु प्राचीनभारतस्य इतिहासः निहितः अस्ति। इतिहासाः केवलं राजवृत्तान्तं बोधयन्ति। परन्तु पुराणानि राजवृत्तान्तेन सह ऋषीणाम् अपि वृत्तान्तं बोधयन्ति। पुराणानि भौगोलिकसामग्रीम् अपि प्रस्तुवन्ति। पुराणविषये काचित् कथा श्रूयते - "व्यासो हि वेदान् चतुर्धा विभज्य तानात्मनः चतुरः शिष्यान् उपदिष्टवान्। ततश्च अमूः कथाः आख्यायिकाः उपाख्यानानि, गीतानि, लोकवादांश्च संगृह्य पुराणं नाम ग्रन्थविशेषं ग्रथितवान्, इतिहासेन साकम् अमुं ग्रन्थं रोमहर्षणं नाम पञ्चमं स्वशिष्यं पाठयामास। तदनन्तरं च तेन महाभारतं खलु निबद्धम्" इति। व्यासदेवस्य अपरा सुप्रसिद्धा कृतिः महाभारतम्। रामायणस्य तुलनायां यद्यपि महाभारतस्य प्रचारः अल्पः, तथापि महत्त्वदृष्ट्या महाभारतं विश्वस्य कुतोऽपि ग्रन्थात् न हीयते। महाभारतं तदानीन्तनभारतीयं समाजनीतिराजनीतिप्रभृतिज्ञातव्यं बोधयति, महाभारतं तदानीन्तनीं भारतीयां सभ्यतां प्रकाशयति। प्रमाणग्रन्थतया महाभारतस्य पञ्चमवेदसंज्ञा जाता। इदं प्रायः सर्वे विद्वांसः मन्यन्ते यत् महाभारतं प्राग् जयनाम्ना ततो भारतनाम्ना ततः परतश्च महाभारतनाम्ना प्रसिद्धम्। तथा हि उक्तम्-

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।

देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥ इति

मौलिकं जयनाम्ना व्यवहृतञ्च महाभारतम् अल्पपरिमाणं स्वरूपतः ऐतिहासिककथाप्रधानम् आसीत्, न उपदेशप्रधानम्। जय इति नाम एव तस्य ग्रन्थस्य पाण्डवविजयमात्रबोधनाय निर्मितम् आसीत्। अमुम् एव जयनामानं ग्रन्थं व्यासः निजशिष्यं वैशम्पायनं पाठितवान् इति सा प्रथमावस्था महाभारतस्य। तस्य नाम जय इति आसीत्। वैशम्पायनश्च गुरोः व्यासात् अधीते जये स्वविरचितसंवादादिकं योजयित्वा नागयज्ञावसरे जनमेजयं श्रावितवान्। तदा चतुर्विंशतिसहस्रश्लोकपरिमितम् आसीत्। भारतम् इति संज्ञा आसीत्। सा इयं द्वितीयावस्था आसीत्। अथ अमुम् एव चतुर्विंशतिसाहस्रीपरिमाणात्मकं भारतग्रन्थं शौनकाय सौतिः श्रावितवान्। तत्र लक्षपरिमाणात्मकश्लोकः आसीत्। सा इयं तृतीया अवस्था एव महाभारतसंज्ञा प्राप्ता। सौतिना एव महाभारतसंज्ञा कृता आसीत्। इयमेव महाभारतस्य अन्तिमा अवस्था।

१.२.३) विषयः

महाभारतस्य शतसाहस्री इति अपरम् अभिधानं विद्यते। प्रकृतं महाभारतं पर्वसु अध्यायेषु च विभक्तम् आसीत् इति अनुमीयते। स एव विभागक्रमः वैशम्पायनेन अनुसृतः। तदीयं महाभारतम् उपशतपर्वसु विभाजितम् आसीत्। सौतिना सा संख्या सङ्कोच्य अष्टादशतां नीता। अथ अष्टादशपर्वव्यतिरिक्तं हरिवंशं नाम पर्व अस्ति। महाभारते प्रायः लक्षात्मकः श्लोकः विद्यते। तत्र मुख्येषु केषुचित् पर्वसु निम्नविषयाः वर्ण्यन्ते-

आदिपर्वणि तावद्- धार्तराष्ट्राणां पाण्डवानां च बाल्यकालवर्णना, द्रौपदीविवाहः, यादववीरशौरिणां पाण्डवानां संस्तवः।

सभापर्वणि- इन्द्रप्रस्थे पाण्डवानामृद्धिः, द्यूते च पाण्डवानां युधिष्ठिरेण द्रौपदीसहितस्य सर्वस्वस्य हारणम्, एकवर्षाज्ञातवासाय द्वादशवर्षवनवासाय च पाण्डवानां विवासनम्।

वनपर्वणि- काम्यकारण्ये पाण्डवानां द्वादशवर्षवनवासः।

विराट्पर्वणि- मत्स्यपतेः विराजः भृत्यत्वेन गुप्तात्मनां पाण्डवानाम् अज्ञातवासस्य त्रयोदशवर्षस्य अतिवाहनम् इति

उद्योतपर्वणि- धार्तराष्ट्रः पाण्डवानां न्याय्यं दायभागं प्रदातुं न इच्छति स्म। ततः रणोद्योतवर्णनम् अस्ति। इतः परं भाविषु पञ्चपर्वसु वासुदेव-पाण्डव-वर्जं सर्वक्षयकारणं भीषणं रणं विस्तरेण वर्णितम्।

एकादशे पर्वणि- मृतदाहसंस्कारं कृत्वा द्वादशे त्रयोदशे च युधिष्ठिरं प्रति भीष्मस्य राजधर्मस्य उपदेशः। चतुर्दशे युधिष्ठिरस्य राज्याभिषेकः अश्वमेधः नाम यागश्च, पञ्चदशे गान्धारीधृतराष्ट्रयोः तपोवनगमनम्, षोडशे यादवानाम् अन्योन्यविनाशनः कलहः कृष्णस्य च सहसा व्याधकृतो वधः, सप्तदशे अर्जुनपौत्रं परीक्षितं प्रजापालनकर्मणि नियुज्य निर्विण्णपाण्डवानां मेरुं प्रति प्रस्थानम्, अष्टादशे च पाण्डवानां स्वर्गारोहणं वर्ण्यते।

महाभारतीया कविताशैली -

व्यासस्य कृतिः इयं सर्वैः इतिहास इत्युच्यते यतोऽत्र वीराणां पुण्या गाथा वर्णिता। अयं ग्रन्थः धार्मिकग्रन्थः येन लोकः स्वकल्याणं गवेषयति। महाभारते अत्र एव गीतारत्नं विद्यते। यत् दुग्धम् इव पीयते। गीताग्रन्थस्य आदरः महाभारतस्य एव विशिष्टतां प्रमाणयति। अत्र शान्तरसः मुख्यरसः भवति। महाभारते सरलया संस्कृतगिरा पद्यानि सन्ति। यथा -

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।

तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।इति

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।

तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।। इति।

कतिपयाश्च कथाः प्राचीनगद्यसंयुक्ताः सन्ति। पद्यबहिर्भूतानि "कृष्ण उवाच" "भीष्म उवाच" इत्यादीनि वाक्यानि विद्यन्ते। व्यासस्य मते तु भारतीयसंस्कृतेः प्राणभूतः धर्मः भवति। अत एव प्राह -

न जातु कामान्न भयान्न लोभाद्

धर्मं जह्याज्जीवितस्यापि हेतोः।

धर्मो नित्यः सुखदुःखे त्वनित्ये

जीवो नित्यो हेतुरस्य त्वनित्यः। इति

मनुष्यः सर्वदा कर्मशीलः भवेत्। कर्मविमुखाः मानवाः न कदापि मानवपदवीं न अर्हन्ति। तथा हि प्रोक्तम्- "प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः"इति। आधुनिकाः समाजशास्त्रिणः कथयन्ति - मनुष्याः एव श्रेष्ठजीवाः। तेषाम् एव कल्याणाय सर्वे नियमव्यवहाराः प्रवर्त्यन्ते। इदं वस्तु व्यासेन प्रोक्तम् -

"गुह्यं ब्रह्म तदिदं ब्रवीमि

न हि मनुष्यात् श्रेष्ठतरं हि किञ्चित्"। इति

महाभारतस्य उपजीव्यम् -

महाभारते बहुलं नीतिवाक्यानि प्राप्यन्ते। यानि वाक्यानि अस्मिन् युगे अत्यन्तं प्रयोजनपूर्णानि भवन्ति। जनाः बहुधा दिग्भ्रान्ताः भवन्ति। मानवनां सन्मार्गेण गमनाय महाभारतम् अत्यन्तम् आवश्यकम्। महाभारतस्य अपि जनप्रियता अत्यन्तं वर्तते। बहवः महाकवयः महाभारतम् आश्रित्य बहून् ग्रन्थान् रचितवन्तः। महाभारताश्रितानां ग्रन्थानां नामानि अधः प्रदीयन्ते।

१.	शिशुपालवधम्	माघस्य (सभापर्वम्)।
२.	नैषधीयचरितम्	श्रीहर्षस्य (वनपर्वम्)।
३.	किरातार्जुनीयम्	भारवेः(वनपर्वम्)।
४.	कर्णभारम्	महाकविभासस्य।
५.	अभिज्ञानशाकुन्तलम्	महाकविकालिदासस्य।
६.	वेणीसंहारम्	भट्टनारायणस्य।
७.	नलचम्पूः	त्रिविक्रमभट्टस्य (वनपर्वम्)।
८.	भारतचम्पूः	अनन्तभट्टस्य।

पाठगतप्रश्नाः-२

अत्र केचित् पाठगताः प्रश्नाः प्रदीयन्ते -

१२. व्यासदेवस्य कालः कः।

१३. महाभारतं केन विरचितम्।

१४. महाभारतस्य अपरम् अभिधानं किम्।

१५. महाभारते कति पर्वाणि सन्ति।

१६. महाभारते कति श्लोकाः सन्ति।

१७. द्वितीयावस्थापन्नस्य महाभारतस्य नाम किम्।

१८. प्रथमावस्थापन्नस्य महाभारतस्य नाम किम्।

१९. महाभारते मुख्यरसः कः।

२०. व्यासस्य महाभारतव्यतिरिक्ता भिन्ना कृतिः का।

२१. महाभारतम् आश्रित्य किं नाटकं विद्यते।

२२. महाभारतम् आश्रित्य किं महाकाव्यं विद्यते।

२३. महाभारतम् आश्रित्य किं चम्पूकाव्यं विद्यते।

१.३) भासः

संस्कृतसाहित्यजगति नाट्यकारः भासः एकम् उज्ज्वलपूर्णं नक्षत्रम्। नाट्यकारः भासो हि सम्प्रति विज्ञातनाट्यकारेषु प्राचीनतमो भवति। कालिदासादयः महाकवयः भासम् एव श्रेष्ठत्वेन मन्यन्ते। कालिदासादिकृतेषु ग्रन्थेषु भासस्य नामोल्लेखः बहुधा दृश्यते। अयम् अत्यन्तं प्राचीनतमः आसीत्। एवञ्च स्वकृतिषु अपि कुत्रचित् स्वविषये न किमपि लिखितवान्। अत एव भासस्य कालादिनिरूपणे अन्यानि पुस्तकानि सहायकानि भवन्ति। सम्प्रति भासस्य देशकालादिकम् अनुमीयते।

१.३.१) कालः -

भासस्य काले निर्णीये प्राचां कवीनां लेखकानाञ्च लेखा अवलम्ब्यते।

कालिदासेन "प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्" इत्यादरवचनेन भासस्य प्रचुरा प्रसिद्धिः प्रोक्ता। एतेन भासस्य कालिदासपूर्ववर्तिता सिद्धा।

अभिनवगुप्तः स्वकृते अभिनवभारतीग्रन्थे भासं स्मरन् पद्यमिदं तन्नाटकात् उद्धृतवान्। महाकविना भासेनापि स्वप्रबन्धे उक्तम्-

"त्रैतायुगं तदिह हन्त न मैथिली सा

रामस्य रागपदवी मृदु चास्य चेतः।

लब्धा जनस्तु यदि रावणमस्य कायं

प्रीत्कृत्य तन्न तिलशो न वितृप्तिगामी।।"इति

बाणभट्टः स्वीये हर्षचरिते भासस्य विषये "सूत्रधारकृतारम्भैः"इत्याद्युक्तवान्।

दण्डिना अपि भासः "सुविभक्तमुखाद्यङ्कैः" इत्यादिना अवन्तिसुन्दरीकथायां स्मृतः।

प्रतिमानाटके बृहस्पतेरर्थशास्त्रं स्मृतं न चाणक्यस्य। एतेन चाणक्यात् प्राचीनता भासस्य आपतिता।

राजशेखरः स्वकविविमर्शे लिखितवान् -

"भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कविर्मेण्ठो भारविकालिदासतरलास्कन्धः सुबन्धुश्च यः।" इति। राजशेखरात् पूर्ववर्ती भवति महाकविः भासः।

भरतप्रवर्तितनाटकीयनियमानां समादरो भासेन स्वकृतौ न कदापि कृतः वर्तते। यथा स्थापनायां न कविनामनिर्देशः अवतरणस्य स्थापननाम्ना निर्देशः, न प्रस्तावनानाम्ना। नान्दीपाठात् परतः सूत्रधारप्रवेशः। विनापि भरतवाक्यं ग्रन्थसमाप्तिः, मृत्युनिद्रायुद्धानां रङ्गमञ्चे अवतारणा च। एतेन तस्य भरतप्राचीनता आयाता।

भासः स्वकृतौ पाणिनिव्याकरणानुसारेण न कदापि लिखति। कुत्रचित् पाणिनिमतविरुद्धम् अपि कार्यं भवति एव। एतेन अवगम्यते यत् भासकाले तु पाणिनिव्याकरणं नासीत्। एतेन प्रमाणं भवति यत् पाणिनेः प्राचीनः महाकविः भासः।

रसपरिपाकमहिम्ना भाषाप्रवाहसाम्येन भासस्य व्यासवाल्मीकिसमयवर्त्तित्वम् आतिष्ठन्ते केचित्।

एभिः सर्वैः कारणैः भासस्य प्राचीनता सिद्धा भवति। सा च प्राचीनता कालिदासात् अपि प्राचीनम् इमं साधयन्ती १०० ई. पूर्वमितं कालं भासस्य बोधयति।

१.३.२) कृतिः -

महाकविः भासः प्रायः त्रयोदश नाटकानि रचितवान्।

१.	प्रतियौगन्धरायणम्।	८.	दूतवाक्यम्।
२.	अविमारकम्।	९.	दूतघटोत्कचम्।
३.	स्वप्नवासवदत्तम्।	१०.	कर्णभारम्।
४.	प्रतिमानाटकम्।	११.	ऊरुभङ्गम्।
५.	अभिषेकनाटकम्।	१२.	बालचरितम्।
६.	मध्यमव्यायोगः।	१३.	दरिद्रचारुदत्तम्।
७.	पञ्चरात्रम्।		

केषाञ्चित् मते यज्ञफलम् इति नामकं रूपकम् एकं लिखितवान् आसीत् इति। अधः प्रत्येकं नाटकं स्वीकृत्य कश्चित् सामान्यपरिचयः प्रदीयते।

१. **प्रतिज्ञायौगन्धरायणम्** - प्रतिज्ञायौगन्धरायणं हि भासस्य प्रथमा कृतिः स्वप्नवासवदत्तस्य पूर्वपीठिका च। अत्र हि वत्सराजस्य उदयनस्य वासवदत्ताहरणवृत्तान्तं वर्णितम् अस्ति। इदं हि चतुर्षु अङ्केषु विभक्तम्। नायकः अस्य यौगन्धरायणः वृत्तफलस्वाम्युदयनः। शत्रुवशीभूतस्य उदयनस्य मोक्षाय यौगन्धरायणः प्रतिजानीते करोति च। स्वप्रतिज्ञां पूरयति इति ग्रन्थः अयम् अन्वर्थनामा।

२. **स्वप्नवासवदत्तम्** - षष्ठेषु अङ्केषु विभक्तम् इदम् रूपकं भासस्य सर्वोत्कृष्टा कृतिः। आरुणिः वत्सभूमिम् अपहृतवान्। वत्सभूमेः उद्धरणाय मन्त्री यौगन्धरायणः प्रतिज्ञां कृतवान्। वासवदत्ता दग्धा इति मिथ्या प्रचारेण सर्वान् वञ्चयित्वा उदयनो मगधराजपुत्र्या पद्मावत्या सह परिणयम् आचरति। ततश्च मगधेशसाहाय्येन रुमण्वान् आरुणिं निपात्य उदयनस्य राज्यं पुनः प्रत्यावर्तयति। काले वासवदत्ता च पुनरात्मानं प्रकटीकरोति। दग्धा इति मतां वासवदत्ताम् उदयनः स्वप्ने पश्यति इत्यस्य ग्रन्थस्य स्वप्नवासवदत्तम् इति नाम अन्वर्थम्। कथाम् इमां समाश्रित्य श्रीहर्षः रत्नावलीं नाटिकां विरचितवान्।

३. **अविमारकम्**- अविमारके रुपके षट् अङ्काः सन्ति। अत्र हि काशीयुवराजस्य सौवीरराजधर्मपुत्रस्य अविमारकस्य कुन्तीभोजराजकुमार्या कुरङ्ग्या सह प्रेमलीलोपवर्णिता अस्ति। अत्र हि न तथा रचनाचमत्कारः प्रतिभाति। सम्भवति यत् भासो हि स्वीयाम् एव व्यथाम् अत्र प्रकटीकरोति। कृतेः अस्याः भासप्रणीतत्वापत्तिः अपि न तथा युक्तिहीना।

४. **चारुदत्तम्** - चारुदत्तं हि नाटकं चतुर्षु अङ्केषु विस्तारितम् अस्ति। अत्र हि उज्जयिन्याः चारुदत्तस्य वसन्तसेनाख्यया वेश्यया सह प्रेमविनिमयः वर्णितः अस्ति। कृतिः इयं स्वजातौ प्रथमा। यतो हि राजेतरः कश्चित् विप्रः नायकत्वेन कल्पितः अस्ति। अपूर्णम् इदं नाटकं भासस्य कृतौ चरमा वर्तते। अत्र हि चारुदत्तेन सह वसन्तसेनायाः अभिसारनिमित्तव्यवस्थापर्यन्तं कथा अस्ति। तदनुवर्तिना शूद्रकेन मृच्छकटिकं प्रणीय कथा एषा प्रणीता।

५. **प्रतिमानाटकम्** - अस्मिन् नाटके सप्त अङ्काः सन्ति। अत्र नाटके रामवनगमनपर्यन्ता कथा संक्षेपेण उपवर्णिता अस्ति।

६. **अभिषेकनाटकम्** - नाटके अस्मिन् षट् अङ्काः सन्ति। षडङ्कात्मकं हि नाटकम् इदं प्रतिमानाटकस्य उत्तरार्द्धम्। अत्र हि रामायणे किष्किन्धा - सुन्दरयुद्धकाण्डाख्यगता कथा संक्षिप्य उपवर्णिता अस्ति। इदम् एव बालिवधसंज्ञया अपि व्यपदिश्यते।

७. **बालचरितम्** - बालचरितं हि भागवताश्रितं नाटकम् अस्ति। इदम् एव कंसवधसंज्ञया अपि व्यपदिश्यते। अत्र हि कृष्णस्य जन्मत आरभ्य कंसवधपर्यन्ता कथा उपवर्णिता अस्ति।

८. **ऊरुभङ्गम्** - रूपकम् इदम् एकाङ्कात्मकम् अस्ति। अत्र हि दुर्योधनस्य ऊरुभङ्गपर्यन्ता कथा उपवर्णिता अस्ति। सम्भवतः इदम् एव हि संस्कृतसाहित्ये प्रथमं दुःखान्तनाटकम्।

९. **दूतवाक्यम्** - अत्र नाटके एकः अङ्कः विद्यते। नाटकम् इदं श्रीकृष्णस्य पाण्डवदौत्यकथासम्बद्धम् अस्ति।

१०. **पञ्चमरात्रम्** - अत्र हि त्रयः अङ्काः सन्ति। अत्र हि यज्ञावसाने द्रोणः दक्षिणरूपेण पाण्डवेभ्यः अर्द्धराज्यं प्रार्थितवान्। दुर्योधनः अपि यजमानः पञ्चरात्राभ्यन्तरे पाण्डवागमने तथाकरणाय प्रतिजानीते। द्रोणस्य प्रयासेन पाण्डवास्तत्र उपतिष्ठन्ति। ततश्च प्रतिश्रुत्यनुसारेण हि अर्धराज्यं दुर्योधनः तेभ्यः प्रयच्छति। एषा कथा महाभारतकथां विरुणद्धि।

११. **दूतघटोत्कचम्** - अस्मिन् रूपके एकः अङ्कः विद्यते। रूपके अस्मिन् अभिमन्योः वधात् परं श्रीकृष्णः सन्धिप्रस्तावाय घटोत्कचं दूतत्वेन नियुक्तवान्। कौरव्यस्य सकाशं गत्वा शान्तिप्रस्तावं प्रदत्तवान्। किन्तु

१२. कौरव्येण घटोत्कचः अपमानितः अभवत्। क्रुद्धः सन् प्रतिशोधार्थं युद्धं कर्तुम् इष्टवान्।

१३. **कर्णभारम्** - अस्मिन् नाटके एकः अङ्कः विद्यते। कर्णस्य ब्राह्मणरूपधारिणे शक्राय कवचकुण्डलदानेन सह निबद्धा इयं कथा।

१४. **मध्यमव्यायोगः** - व्यायोगे अस्मिन् भीमेन घटोत्कचात् ब्राह्मणपुत्ररक्षणं भीमस्य हिडिम्बया सह पुनर्मिलनं च वर्णितम् अस्ति।

१५. एतदतिरिक्तम् अपि भासस्य कृतित्वेन सप्त अन्यानि नाटकानि स्मर्यन्ते। येषु वीणावासवदत्ता यज्ञफलञ्चापि। सम्प्रति एतानि पुस्तकानि नैव उपलभ्यन्ते।

१६. रामायणेषु प्रतिमानाटकम् अभिषेकश्च। महाभारतमूलेषु मध्यमव्यायोग-दूतघटोत्कच-कर्णभार-ऊरुभङ्ग-दूतवाक्यादीनि। भागवताश्रितं बालचरितम्। कल्पितेतिवृत्तं दरिद्रचारुदत्तम् अविमारकं च।

पाठगतप्रश्नाः-३

अत्र केचित् पाठगताः प्रश्नाः प्रदीयन्ते -

२४. भासस्य कालः कः।

२५. भासविरचितस्य एकस्य नाटकस्य नाम लिखत।

२६. भासस्य प्रायः कति नाटकानि सन्ति।

२७. भासस्य प्रथमा कृतिः का।

२८. स्वप्नवासवदत्ते कति अङ्काः सन्ति।

२९. प्रतिमानाटकं किम् आश्रित्य कृतवान्।

३०. अभिषेकनाटके कति अङ्काः सन्ति।

३१. भासः महाभारतं समाश्रित्य किं नाटकं लिखितवान्।

३२. कर्णभारे कति अङ्काः सन्ति।

३३. चारुदत्तं किम् आश्रित्य लिखितवान्।

३४. पञ्चमरात्रनाटके कति अङ्काः सन्ति।

३५. भासः बालचरितं नाटकं किम् आश्रित्य लिखितवान्।

पाठसारः

पाठे अस्मिन् आदिकवेः वाल्मीकेः व्यासदेवस्य भासस्य च विषये किञ्चित् समासेन आलोचितम्। वाल्मीकिः तु आदिकविः। यतो हि काव्यस्य दृष्टान्तत्वेन रामायणम् उपस्थापितवान्। इदं च रामायणं भारतसंस्कृतेः प्राणभूतम्। प्रायः ख्रीष्टपूर्वपञ्चमशतकात् पूर्वम् एव रामायणं रचितवान्। रामचरित्रम् आश्रित्य रामायणं रचितम्। अत्र सप्त काण्डाः, ५०० सर्गाः, चतुर्विंशतिसहस्रं श्लोकाः सन्ति। अपरञ्च महाभारतं हि अस्मद्राष्ट्रेतिहासः। ग्रन्थस्य अस्य प्रणेता व्यासदेवः। महाभारतग्रन्थः मानवजीवनस्य समस्यानां समाधानाय नयनपथम् अधिरोहति। तस्मात् अस्माकं भारतीयानां कृते ग्रन्थराज एव धर्मशास्त्रस्य अपि कार्यं साधयति। महाभारते हि अष्टादश सर्गाः, एकलक्षं श्लोकाः सन्ति। ग्रन्थे अस्मिन् भारतीयधर्मस्य सुविस्तृततया ज्ञानाय कौरवपाण्डवयोः युद्धवर्णनं कृतम्। ग्रन्थस्य अस्य निर्माणकालः ५०० ई. पू. समयात् प्राग् एव। प्राचीननाटककारेषु अत्यन्तं प्रसिद्धः महाकविः भासः। संस्कृतजगति प्रायः त्रयोदश रूपकानि विद्यन्ते। महाकवेः भासस्य स्थितिकालः १०० ई. पूर्वमितः कालः। महाकविः इदं रामायणम् आश्रित्य प्रतिमानाटकम्, महाभारतम् आश्रित्य मध्यमव्यायोगनाटकम्, भागवतम् आश्रित्य बालचरितम्, कल्पितेतिवृत्तम् आश्रित्य चारुदत्तम् इत्यादीनि रूपकानि विरचितवान्।

पाठान्तप्रश्नाः

१. वाल्मीकेः देशकालकृतिविषये लघुटिप्पणीं रचयत।

२. वाल्मीकेः कृतिविषये लघुटिप्पणीं लिखत।

३. रामायणम् आश्रित्य लघुटिप्पणीं रचयत।

४. रामायणस्य कविताशैलीविषये लघुटिप्पणीं लिखत।

५. रामायणस्य कालविषये लघुप्रबन्धं लिखत।

६. व्यासस्य देशकालकृतिविषये लघुटिप्पणीं रचयत।

७. महाभारतम् आश्रित्य लघुटिप्पणीं रचयत।

८. महाभारतस्य कविताशैलीविषये लघुटिप्पणीं लिखत।

९. महाभारतस्य कालविषये लघुप्रबन्धं लिखत।

१०. भासस्य देशकालकृतिविषये लघुटिप्पणीं रचयत।

११. भासस्य कृतिविषये लघुटिप्पणीं लिखत।

१२. भासस्य विषये लघुप्रबन्धं लिखत।

पाठगतप्रश्नानाम् उत्तराणि

अत्र पाठगतप्रश्नानाम् उत्तराणि प्रदीयन्ते-

उत्तराणि - १

१. वाल्मीकिः।
२. रामायणम्।
३. ख्रीष्टपूर्वपञ्चमशतकात् पूर्वम्।
४. वाल्मीकिः।
५. सप्त काण्डाः।
६. चतुर्विंशतिः श्लोकाः।
७. करुणः रसः।
८. प्रतिमानाटकम्।
९. रामायणचम्पूः।
१०. रामचन्द्रः।
११. ५०० सर्गाः।

उत्तराणि - २

१२. ५०० ई. पू. समयात् प्राग्।
१३. व्यासदेवेन।
१४. शतसाहस्री।
१५. अष्टादश पर्वाणि।
१६. एकलक्षं श्लोकाः।
१७. भारतम् इति नाम।
१८. जय इति नाम।
१९. शान्तरसः।
२०. पुराणानि।
२१. अभिज्ञानशाकुन्तलम्।
२२. नैषधीयचरितम्।
२३. नलचम्पूः।

उत्तराणि - ३

२४. १०० ई. पूर्वमितः कालः।
२५. स्वप्नवासवदत्तम्।
२६. प्रायः त्रयोदश।
२७. प्रतिज्ञायौगन्धरायणम्।
२८. षट् अङ्काः।
२९. रामायणम्।
३०. षट् अङ्काः।
३१. मध्यमव्यायोगम्।
३२. एकः अङ्कः।
३३. कल्पितेतिवृत्तम्।
३४. त्रयः अङ्काः।
३५. बालचरितम्।

॥ इति प्रथमः पाठः ॥



२

348sk02

कविपरिचयः - २

प्रस्तावना-

संस्कृतसाहित्ये ये महान्तः कवयः सन्ति तेषां परिचयः अत्यन्तावश्यकः। किञ्च तेषां देशकालविषये अपि अस्माभिः ज्ञेयम्। कविकृतीनाम् अपि ज्ञानम् आवश्यकम्। यतो हि काव्यं तु पठ्यते छात्रैः परन्तु काव्यकर्तृणां विषये तेषां ज्ञानं नैव भवति। प्राचीनाः कवयः अपि तेषां परिचयम् स्वग्रन्थे नैव लिखन्ति। अतः अल्पायासेन तेषां परिचयः न भवति। अतः द्वादशकक्षायाः कृते अयं पाठः व्यवस्थापितः। सरलया भाषया विषयः वर्णितः येन छात्राणां सुबोधः स्यात्।

उद्देश्यानि

पाठस्यास्याध्ययनेन भवान् -

- कवीनां देशकालादिविषयान् ज्ञास्यति।
- कवीनां ग्रन्थान् ज्ञास्यति।
- साहित्यकलाम् ज्ञास्यति।
- प्राचीनान् अर्वाचीनान् च कवीन् ज्ञास्यति।
- काव्यशैलीं ज्ञास्यति।
- कवीनां महत्त्वं ज्ञास्यति।

२.१) कालिदासः

संस्कृतसाहित्यस्य अन्यतमः अत्यन्तं प्रतिभावान् कविः कालिदासः। संस्कृतजगति तथा कोऽपि नास्ति येन प्रथितयससः अस्य कालिदासस्य नाम न श्रुतम्। कालिदासः इत्यनेन न केवलं व्यक्तिः द्योत्यते अपि तु प्राचीनभारतीयसंस्कृतेः सुवर्णयुगम् द्योत्यते। यस्य च संस्कृतयुगस्य मूर्तप्रतीकस्वरूपः महाकविः कालिदासः। परन्तु दुःखस्य विषयः यत् प्राचीनसाहित्यस्य विषये यावती स्पष्टता अस्ति तावती स्पष्टता कालिदासस्य देशकालकृतिविषये नास्ति। किञ्च, स्पष्टं प्रमाणम् अपि न लभ्यते। भारतवर्षस्य कस्यां नगर्यां कालिदासस्य जन्म अभवत् तद्विषये तु विवादस्य अन्तः एव नास्ति।

२.१.१) कालिदासस्य समयः

भारतीयकवीनां समयनिर्धारणम् अति कष्टसाध्यं कार्यम्। यतस्तैः स्वविषये प्रायः किमपि न लिखितम्। अस्यां स्थितौ अन्यकृतैरुल्लेखैः अनुमानेन च प्राचां कवीनां समयो व्यवस्थापनीयो भवति। अस्माद् एव हेतोः कालिदासस्य समयसम्बन्धे अपि मतभेदाः वर्तन्ते।

प्रथममतम्-

सर् विलियम् जोन्स महोदयः कालिदास्य समयः ई.पू. प्रथमशताब्दौ इति अङ्गीकरोति। यतो हि कालिदासः विक्रमसंवत्प्रर्वतकस्य विक्रमादित्यस्य राज्ञः सभापण्डितः आसीत् इति श्रूयते। अतः कालिदासस्य कालः प्रथमशताब्दी इति।

द्वितीयमतम्-

ड. वेबर लौसन्, योकोबि, मानियर् विलियम्, महानुभवानां मतानुसारं तुं कालिदासस्य कालः ईशवीयद्वितीयशतकयोः मध्ये एव भवति।

तृतीयमतम्-

डा. भाऊदाजी महाशयस्तु कवेः कालः षष्ठशतकम् इति स्वीकरोति। कारणं हि उज्जयिनीनरेशः हर्षविक्रमगुप्तः मातृगुप्तनामकं जनं काश्मीरं शासितुं प्रेषितवान्। अयं मातृगुप्तः एव कालिदासः इति मत्वा स कालिदासस्य कालः षष्ठशतकमिति मन्यते।

चतुर्थमतम्-

वत्सभट्टिमहोदयस्य एकः शिलालेखः प्राप्यते। यत्र ५२९ मालवसंवत्सरस्य उल्लेखो दृश्यते। स च ई. ४७६ तः संवदति। तस्य शिलालेखस्य भाषा कालिदासस्य भाषया साकम् अन्वेति। एतदाधारीकृत्य एव मैक्डोनलमहोदयः कालिदासस्य कालः पञ्चमशतकम् इति उक्तवान्।

पञ्चममतम्-

डा. हार्नले-प्रभृतयस्तु विद्वांसः कालिदासस्य काव्येषु गोप्ता-गोप्ते-कुमार-गुप्त-स्कन्ध-प्रभृतिशब्दैः कालिदासस्य कालः पञ्चमषष्ठयोः मध्ये इति स्वीकुर्वन्ति। यतो हि एतादृशैः शब्दैः गुप्तवंशीयनृपाणां स्मरणं भवति।

षष्ठमतम्-

ए. सी. चटर्जी तु कालिदासं मालवनरेशशोधधर्मस्य कालिकं मत्वा तस्य समयः षष्ठशतकम् इति चिन्तयति।

सप्तममतम्-

रामचन्द्रविनायकपटवर्धनस्तु आषाढस्य प्रथमदिवसे, प्रत्यासन्ने नभसि इत्यादि पद्याधारेण कालिदासस्य कालः१८००वर्षपूर्वकम् कथयति। किञ्च ज्यौतिषानुसारिणीं गणनां कृत्वा अपि १८००वर्षपूर्वकम् इत्येव निर्णीतम्।

अष्टममतम्-

आर्-कृष्णमाचारियर्-महाशयः दिङ्नागानां पथि परिहरन् इति श्लोकस्य आधारेण दिङ्नागसमकालिनं स्वीकरोति। अतः दिङ्नागस्य कालः आसीत् षष्ठशतकम्। तस्मात् कालिदासस्यापि कालः षष्ठशतकमेव।

नवममतम्-

म.म. रामावतारशर्मा कालिदासं द्वितीयचन्द्रगुप्तकालीनम् स्वीकृत्य तस्य कालम् ईशवीयं षष्ठशतकं कथयति। केचित् विचारकास्तु कालिदासः ईशवीयपूर्वप्रथमद्वितीयशतके आसीत् इति समर्थयन्ते।

२.१.२) कालिदासस्य देशः

कालिदासस्य जीवनवृत्तिविषये अनेकाः लोकविश्रुतयः अनेके वादाः च सन्ति। केचित् एनं विक्रमादित्यस्य सभायां कविः इति मन्यन्ते। केचित् गुप्तकालीननरेशानाम् आश्रयं प्राप्तवानिति कथयन्ति। धारानगरे भोजराजस्य सभायां कविरत्नपदभूषितः अभूत् इति कथाकोविदाः कथयन्ति। जनश्रुत्यनुसारं बाल्यकाले सः अतीव मूर्खः आसीत्। विद्याधर्या सह तस्य विवाहः अभवत्। मूर्खः पतिः इति ज्ञात्वा विद्याधरी तं कालीदेव्याः आलयं नीतवती। यावत् सा भवते विद्यां न उपदिशति तावत् भवता ततः बहिः न आगन्तव्यम् इति आदिशत्। ततः पत्न्याः कथनानुसारेण तथैव आचरितः कालिदासः कालीदेव्याः वरप्रसादेन विद्वान् अभवत् इति। इयं कथा कालिदासस्य प्रतिभया कविताचातुर्येण च जाता। तथा तु न विदुषां मतिः। इतोऽपि कालिदासस्य कविताचातुर्यं निर्दिश्यमानाः अनेकाः कथाः सन्ति।।

प्रथमम्-

उत्तररामचरितस्य कर्ता भवभूतिः स्वयं नाटकं विलिख्य कालिदासस्य अभिप्रायं प्रष्टुं गतः आसीत्। समग्रं नाटकं परिशील्य पठित्वा च कालिदासः नाटकस्य प्रथमाङ्के विद्यमाने –

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतेकैकदोष्णो-
रविदितगतयामा रात्रिरेवं व्यरंसीत्॥

श्लोकेऽस्मिन् 'रात्रिरेवम्' इत्यत्र रात्रिरेव इत्येव सूक्तमिति परिष्कारम् अकरोत्। भवभूतिना लिखिते श्लोके एवं रसमयार्थः यथा द्योत्येत तथा परिष्कारं कृतवान्। अत्र कालिदासस्य काव्यप्रतिभां

सहृदयाः श्लाघितवन्तः। परन्तु भवभूतिकालिदासौ समकालीनौ आस्ताम् इति ऐतिहासिकाः नाङ्गीकुर्वन्ति।

द्वितीयम्-

अपरा काचित् कथा एवं श्रूयते। कदाचित् सरस्वती देवी कालिदासभवभूत्योः कवितागुणतारतम्यं परीक्षितुं तुलायां द्वयोः स्थाल्योः उभौ अपि स्थापितवती इति। तदा भवभूतेः स्थाल्याः भारः न्यूनः अभवदिति सरस्वती स्वस्य कर्णे धृतं कल्हारमुकुलमकरन्दं तत्र योजितवती इति। तस्मात् द्वे स्थाल्यौ अपि समाने जाते इति श्रूयते। कालिदासस्य कविताचातुर्यं परिश्लाघ्यमानानि अनेकानि उपाख्यानानि 'भोजप्रबन्ध'इत्यस्यां कृतौ परिदृश्यते। परन्तु तानि सर्वाणि प्रमाणभूतानि इति वक्तुं न शक्यते।

तृतीयम्-

विक्रमसंवत्सरस्थापकस्य विक्रमादित्यस्य आस्थाने नवरत्नेषु अयमपि अन्यतमः इति परम्परागतः अपरः विश्वासः। तद्यथा-

धन्वन्तरि-क्षपणकामरसिंह-शङ्कुवैतालभट्ट-घटकर्परकालिदासाः।
ख्याती वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥

श्लोकेऽस्मिन् नवरत्नानां कवीनां नामानि निर्दिष्टानि। परन्तु एते सर्वेऽपि समकालीनाः न। कालिदासः विक्रमस्य आस्थाने आसीत् इत्यंशः अङ्गीकृतः चेदपि अस्य श्लोकस्य आधारेण तत्कालं प्रमाणीकर्तुं न साध्यम्। इत्थं प्रचलिताभिः किंवदन्तीभिः ऐतिहासिकव्यक्तीनाम् उल्लेखितकथाभिः वा कालिदासस्य चरित्रं वेत्तुं न शक्यते। याः रम्याः कथाः सन्ति, तासु एव कालिदासस्य जनप्रियता ज्ञातुं शक्यते। अथ महाकविरयं कदा कस्मिन् देशे जन्मग्रहणं कृतवान् इत्येतस्मिन् विषये समेषां गवेषकाणाम् एकः एव निष्कर्षः अस्ति। अद्यावधि समुपलभ्यते यत् पुरातनाः कवयः स्वनिर्वचनं नैव कुर्वन्ति स्म इति। अस्य जीवनविषये बह्व्यः दन्तकथाः, ऐतिहासिककथाः च सन्ति। मेघदूते अन्यासु कृतिषु सः पुनःपुनः उज्जयिन्याः सौन्दर्यं वर्णितवान् अतः सः तत्रैव बहुकालम् उषितवान् स्यात्। काश्मीरे प्रवर्धमानं केसरपुष्पं सः केवलं वर्णितवान् इत्यतः काश्मीरीयः स्यादिति केषाञ्चित् अभिप्रायः। तेन मेघदूते निर्दिष्टः रामगिरिः विदर्भे अस्ति। तत्रत्यानि असनवसनादिविषयान् सः वर्णयति इत्यतः विदर्भीयः स्यादिति, न समीचीनं निर्णयं लभ्यते। मालवं विस्तरेण वर्णितवान् इत्यतः सः मालवीयः अस्तीति पुनः केषाञ्चित् अभिप्रायः। रघुवंशमहाकाव्ये तेन वर्णितं रघोः दिग्विजयं सूक्ष्मतया परिशीलयामश्चेत् भारते तस्य अपरिचितः प्रदेशः नास्तीति स्पष्टं ज्ञायते। यथा असमप्रदेशम् अवर्णयत् तथैव मनोहरशैल्या केरलमपि अवर्णयत्। हिमालयमिव समुद्रतीरमपि सुन्दरम् अवर्णयत्। अतः सः राष्ट्रकविः, उज्जयिनी तस्य स्थिरस्थानम्, समग्रभारतं तस्य चरस्थानम्, अतः समग्रभारतमेव तस्य प्रदेशः इत्यपि वक्तुं शक्यते। एतदीयमातापित्रोः नामनी अद्यापि नोपलभ्येते न वा, अयमेव सम्यक्तया निर्णयो जातः यदयं कुत्रत्यः इति। अस्य काव्यनाटकेषु आसमुद्रं भूस्थानानि वर्णितानि सन्ति। अस्य देशः काश्मीर इति, बङ्गाल इति, गालव इति च विभिन्नाः वा वादाः मण्डिताः बुधैः। यद्यपि कालिदासत्रयीति समालोचकपरम्परया

अवबुध्यते तथापि संस्कृतसाहित्यपरिचितानां मनःसु सः अन्यतमः कालिदासः। कालिदासस्य काव्यत्रयं नाटकत्रयं च जगन्मोहयति। आवर्जयति च हठात् पाश्चात्त्यविदूषामपि मनांसि।

२.१.३) कालिदासस्य कृतयः

कालिदासस्य कृतयः कति सन्ति इत्यस्मिन् विषये अपि मतविरोधः अस्ति। तथापि बहूनां विदुषां मतानुसारेण कालिदासस्य सप्त कृतयः सन्ति। तद्यथा द्वे महाकाव्ये रघुवंशकुमारसंभवे। खण्डकाव्यद्वयं ऋतुसंहारं मेघदूतञ्च। नाटकत्रयं वर्तते। तद्यथा अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् चेति। एतान् ग्रन्थान् अतिरिच्य अपि पुष्पवाणविलासः, शृङ्गाररसाष्टकम्, नलोदयः प्रभृतिग्रन्थाः कालिदासस्य इति केचिद् आहुः। परन्तु विदुषां मतानुसारम् एतेषां ग्रन्थानां लेखकः तु कालिदासः नास्ति।

ऋतुसंहारम्-

ऋतुसंहारं कालिदासस्य खण्डकाव्येषु एकम् अन्यतमम्। ऋतुसंहारे षट् सर्गाः सन्ति। ग्रन्थेऽस्मिन् द्विपञ्चाशदुत्तरैकशतं(१५२) श्लोकाः सन्ति। ग्रीष्मतः वसन्तऋतुपर्यन्तानाम् ऋतूनां ग्रन्थे वर्णना प्राप्यते। कालस्य विवर्तनात् प्रकृतौ कथं परिवर्तनं भवति तस्य चित्रम् अत्र प्राप्यते। अत्र विशेषतः प्रकृत्याः परिवर्तनेन मनुष्यानां भोगोपकरणं वर्णितम्। अस्य च काव्यस्य चित्रधर्मिता-गीतिधर्मितारूपाणि वैशिष्ट्यानि दृश्यन्ते। परन्तु ऋतुसंहारः कालिदासस्य एव ग्रन्थः इति विषयेऽस्मिन् मतभेदः दृश्यते। ऋतुसंहारे विभिन्ने ऋतौ युवकयुवत्योः सम्भोगवर्णनं कृतं कविना। सरलरचनावशात् बहवः कालिदासस्य रचना एषा इति नैव कथयन्ति। केचित् कथयन्ति यद् कालिदासस्य युवकसमये रचना इयम्।

मेघदूतम्-

कालिदासस्य रचनासमूहानां मध्ये जनप्रियकाव्यम् भवति। मन्दाक्रान्ताच्छन्दसा एव लिखितः ग्रन्थोऽयम्। धीरललितः नायकः यक्षः। नायिका यक्षिणी विशालाक्षी। ग्रन्थेऽस्मिन् मेघद्वयं वर्तते। पुर्वमेघः उत्तरमेघः चेति। कर्तव्यतः च्यूतिकारणात् यक्षः कुबेरस्य आदेशात् पत्नीं त्यक्वा रामगिरौ निवसति। वर्षाकाले प्रियां विहाय स्थितस्य यक्षस्य अवस्था अत्र वर्णिता। किञ्च, मनुष्याः कथं कामपीडिताः भूत्वा आचरणं कुर्वन्ति तस्य वर्णना दृश्यते। अत्रैव प्रथमवारं जडपदार्थं स्वीकृत्य कोऽपि कविः दूतरूपेण तं प्रदर्शितवान्। अत्र प्रियाविहीनजनानाम् अवस्था वर्ण्यते कविना। अत्र श्लोकपठनेन एव प्रकृतेः चित्रं स्पष्टं प्रतिभाति।

रघुवंशमहाकाव्यम्-

रघुवंशम् १९ सर्गात्मकं महाकाव्यम्। अत्र रघोः वंशस्य कथा निबद्धा। रघुः अत्यन्तं पराक्रमी दानशूरः च आसीत्। तस्य वंशीयानां गुणवर्णनम् अस्मिन् काव्ये अस्तीति कविरयं रघुवंशम् इति नामधेयमकरोत्। प्रधानतया दिलीपः रघुः अजः दशरथः रामः लवः अतिथिः इत्यादीनां राजश्रेष्ठानां वर्णनमस्ति। दिलीपः सत्यसन्धः, रघुः पराक्रमी दानशीलश्च, अजः कोमलहृदयी प्रेममयश्च, श्रीरामः सर्वोत्तमः इत्थम् एते चत्वारः अपि धर्मार्थकाममोक्षाणां प्रतीकाः सन्ति। काव्येऽस्मिन् रघुदिग्विजयः,

अजविलापः, सीतापरित्यागः इत्यादयः भागाः चित्ताकर्षकाः सन्ति। दशसु सर्गेषु रामायणस्य सारसर्वस्वं न्यरूपयत् महाकविः। अजविलापसर्गं यावत् अवर्णयत्। प्रत्येकं सर्गेऽपि आकर्षकः कश्चन अंशः विद्यते। कथाभागः वर्णनं च परस्परं सम्मिल्य काव्यस्यास्य अन्यादृशं सौन्दर्यम् अवर्धयत्। रसानां परिपक्वता तन्मयत्वं जनयति। नवरत्नविराजितः मुक्ताहारः इव काव्यं सर्वविधसौन्दर्ययुक्तं सत् सहृदयानां प्रीतिपात्रताम् आवहति। कालिदासेन अन्यानि काव्यानि नाटकानि ग्रथितानि चेदपि संस्कृतग्रन्थकाराः तं रघुकविः इति प्राशंसन्। तस्मात् अस्य काव्यस्य उत्कृष्टता अवगम्यते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता। तदुत्तरं रामवंशीयानां तत्तन्नृपाणां चरितानि उपन्यस्तानि। अन्तिमः सर्गो गर्भान्धस्य अग्निवर्णस्य अभिषेकेण समाप्यते। कालिदासः अग्निवर्णपरवर्तिनां राज्ञामपि वर्णनं चिकीर्षति स्म। परमसौ कालेन कवलीकृतः। अन्ये पुनः कथयन्ति कालिदासेन परतोऽपि रघुवंशस्य सर्गाः लिखिताः परन्तु ते न प्राप्यन्ते इत्याहुः। बहवः तु कालिदास-अग्निवर्णसमकालिकतया ग्रन्थस्य तत्पर्यन्तां समर्थयन्ते। रघुवंशे येषां राज्ञां वर्णनानि सन्ति, तेषां रामायणवर्णितनृपैः सह भेदः आपतति, परन्तु वायुपुराणवर्णितरामवंशावल्या सह रघुवंशवर्णितरामवंशावली भूयसा सामञ्जस्यं धारयति। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं रामस्य कथा वर्णिता। तदुत्तरं रामवंशीयानां नृपाणां चरितानि उपन्यस्तानि। रामायणतः रामकथाम् आश्रित्य महाकविः कालिदासः रघुवंशमहाकाव्यं विरचितवान्। संस्कृतसाहित्यजगति रघुवंशमहाकाव्यम् अतीव जनप्रियम् च।

कुमारसम्भवमहाकाव्यम्-

कुमारसम्भवं किञ्चन महाकाव्यम्। शिवपार्वत्योः प्रेम्णः वर्णनपुरस्सरं देवसेनापतेः स्कन्धस्य कुमारस्य जननवर्णनयुक्तम् अपूर्वम् इदं महाकाव्यम्। इदमपि महाकाव्यं १७सर्गात्मकम्। परं पूर्वं २२ सर्गाः स्युः इति केषाञ्चित् विदुषाम् अभिप्रायः। सृष्टिकर्तुः ब्रह्मदेवस्य वरप्रसादेन तारकासुरः प्रबलो भूत्वा सकलान् अमरान् पीडयामास। तस्मात् ब्रह्मणः सूचनानुसारं शिवपार्वत्योः विवाहम् अकारयन् देवाः। तयोः पुत्रेण कुमारेण तारकासुरः निहतः। अयं कथाभागः अत्र कविना सुमधुरसरसशैल्या वर्णितः।

रामायणगतम् अधो लिखितं पद्यं पठित्वैव कालिदासेन स्वकाव्यस्य नाम कृतं स्यादिति विद्वांसः तर्कयन्ति।

एष ते राम गङ्गायाः विस्तारोऽभिहितो मया।

कुमारसम्भवश्चैव धन्यः पुण्यस्तथैव च ॥ (बालकाण्डे७/३२)

काव्यारम्भे कविः नगाधिराजः हिमालयः पृथिव्याः मानदण्ड इव स्थितः इति मनोहररूपेण अवर्णयत्। काव्येऽस्मिन् रतिविलासः, वसन्तवर्णनं, पार्वत्याः तपसः वर्णनञ्च अपूर्वमस्ति। महाकाव्येऽस्मिन् कवेः प्रतिभा परां काष्ठां प्राप्नोत्। काव्यस्यास्य भाषा, काव्यचारुत्वम्, उन्नतसंस्कृतेः परिसरं, सुन्दरोपमाननिदर्शनादयः काव्यस्य सौन्दर्यम् अवर्धयन्।

कुमारसम्भवकाव्ये तपसि तत्परा हिमनगसुता पार्वती ब्रह्मचारिवेषधारिणः शिवस्य सम्भाषणं श्रुत्वा ततः गन्तुम् इष्टवती। तदा अनल्पकल्पनामूर्तिः कविः कालिदासः सर्वथाऽभिनवां मर्मस्पर्शिनीं च उपमां प्रस्तौति-

शिलाधिराजतनया न ययौ न तस्थौ।

मार्गाचलव्यतिकराऽऽकुलितेव सिन्धुः।।इति।।

अत्र मार्गाचलव्यतिकरेण आकुलिता नदी इव शिलाधितनया अस्ति। एतस्याः शारीरिकी मानसिकी च समीचीना स्थितिः पद्यांशेन अनेन सम्यक् परिलक्ष्यते।

अभिज्ञानशाकुन्तलम्-

अभिज्ञानशाकुन्तलं नाटकं तु कालिदासस्य नाम संस्कृतजगति सर्वोपरि स्थापितवत्। संस्कृतसाहित्ये शाकुन्तलमिव नाटकं नास्ति एव। प्रायः भारतवर्षे सर्वासु भाषासु अस्य नाटकस्य अनुवादः जातः। सर्वत्रैव अस्य नाटकस्य प्रदर्शनं भवति। अपि लोकश्रुतिः अस्ति नाटकेषु रम्यं शाकुन्तलम्। शाकुन्तनाटके सप्त अङ्काः सन्ति। अपि च शाकुन्तलस्य चतुर्थोऽङ्कस्य एकान्तेन मनोज्ञेन पठनं क्रियते चेद् ज्ञायते सामाजिकगुरुत्वं कियत् वर्तते।

विक्रमोर्वशीयम्-

उर्वशीपुरुरवसोः प्रेमकथा अस्मिन् नाटके विद्यते। संस्कृतसाहित्ये एषा कथा अतिप्राचीना जनप्रिया च आसीत्। ऋग्वेदस्य संवादसूक्तात् एषा घटना प्राप्यते। तां घटनाम् आधारीकृत्य एव नाटकमिदं विरचितम् कविना। अभिशापवशात् उर्वशी स्वर्गतः मर्त्यं प्रति आगतवती। मर्त्ये आगमनात् परं राज्ञा पुरुरवसा साकं तस्याः मेलनम् अभवत्। ततः एव तयोः प्रणयः आरब्धः। परन्तु अभिशापान्ते उर्वशी पुनः स्वर्गं प्रति गतवती पुरुरवसं च त्यक्तवती। विरहवशात् पुरुरवाः उन्मत्तप्रायः अभवत्। इन्द्रः तयोः प्रेम दृष्ट्वा उर्वशीं पुनः पुरुरवसा साकं मेलनाय सम्मतिं दत्तवान्।

मालविकाग्निमित्रम्-

पञ्चाङ्कविशिष्टनाटकम् इदं विदिशानरेशाग्निमित्रमालविकाग्निमित्रयोः प्रेमकथाम् अवलम्ब्य लिखितम्। नाटकमिदम् अतीव रोमाञ्चकरम्।

२.१.४) कालिदासस्य भाषाशैली

रससिद्धस्य अस्य कवीश्वरस्य महिमा तदीयकाव्यैः एव ज्ञायते। तस्य काव्यस्य परिशीलनेन वेदशास्त्रपुराणेषु तस्य अगाधं पाण्डित्यम् आसीत् इति ज्ञायते। कल्पनाचातुर्यं, पदानां माधुर्यं, पात्रसंविधाननैपुण्यं, रसोल्लासः, ललितानि मनोहराणि वचनानि इत्यादिभिः सुगुणैः अस्य कवेः काव्यानि सर्वजनादरणीयानि। कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः कविरिति सुधीभिः पुरस्कृतः। अस्य रचनाः चतुर्वर्गपुरुषार्थानां प्रदानसाधनस्वरूपाः इत्यपि स्वीकृतं सरसान्तःकरणैः सहृदयैः। अयं महाकविः वैदर्भीरीतेः सम्राट्, प्रसादगुणपरिपूर्णः, उपमाप्रयोगगुरुः प्रकृतिचित्रणचित्रकारः, व्यञ्जनाप्रयोगशाली, अभिनवकल्पनाकुशलः, अन्यतमः काव्यशिल्पी विराजते। कविनां रविः इव विराजते महाकविः कालिदासः। कालिदासस्य भाषा सरला अदोषपूर्णा। किञ्च आयासराहित्येन एव कविः सरलया भाषया तत्त्वम् उपदिशति। अस्मात् कारणात् एव कालिदासस्य काव्यम् अतीवलोकप्रियतां गच्छति। अपि च कालिदासस्य रचना न केवलं विदुषां बालकानाम् अपि रुचिकरणं प्रतिभाति।

तद्यथा रघुवंशे दृश्यते-

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।

गुणागुणान्बन्धित्वात् तस्य सप्रसवा इव।।इति।।

कालिदासस्य काव्यमाधुरी तथा प्रसिद्धा यथा नार्हति प्रस्तावानाम्। आलोचकानां सम्मतौ कलापक्षापेक्षया हृदयपक्षस्य चमत्कार्युपन्यसनं यस्य काव्ये संभवति स कविः श्रेष्ठः। एतदनुकूलं हृदयपक्षस्य चमत्कारचित्रणं कालिदासस्य काव्येषु सर्वत्र दृश्यते। मानवजीवनस्य सर्वाङ्गसम्पूर्णं चित्रमुपस्थापयितुम् असौ रघुवंशं प्रणीतवान्। प्रेम्णः परं प्रकर्षं प्रकाशयितुं कुमारसम्भवं निर्ममे।

अलङ्कारप्रयोगः-

'उपमा कालिदासस्य' यद्यपि एषा उक्तिः संस्कृतजगति सर्वत्र प्रचलिता तथापि न केवलं उपमायाः प्रयोगे एव शूरः कालिदासः। सर्वेषाम् अलङ्काराणां प्रयोगः कालिदासेन कृतः। उपमालङ्कारस्य प्रयोगः भूयो भूयो दृश्यते। किञ्च, उपमालङ्कारस्य यथा प्रयोगः कृतः तथा प्रयोगः न केनापि कर्तुं शक्यः।

पाठगतप्रश्नाः-१

१. कालिदासस्य कति काव्यानि वर्तन्ते।

२. कालिदासस्य कालः कः।

३. कालिदासस्य कति नाटकानि वर्तन्ते।

४. कालिदासः कस्य अलङ्कारस्य वर्णने शूराः आसन्।

५. रघुवंशे कति सर्गाः वर्तन्ते।

६. रघुवंशे केषां नृपाणां वर्णनम् अस्ति।

७. कुमारसम्भवे कति सर्गाः सन्ति।

८. कुमारसम्भवे कुमारः कः।

९. कुमारसम्भवे नायकः कः।

१०. कालिदासस्य देशः कुत्र वर्तते।

२.२) अश्वघोषः

संस्कृतसाहित्यस्य अश्वघोषः सुप्रसिद्धः महाकविः। साकेतनगरम् अस्य जन्मस्थानम्। साकेतनगरम् अधुनातनम् अयोध्यानगरमेव। एष आर्यसुवर्णाक्ष्याः पुत्र आसीत्। अस्य काल ईशायाः प्रथमशताब्दीति स्वीक्रियते जिज्ञासुभिः। अयं सम्राजः कनिष्कस्य समकालिकः। अश्वघोषः

कनिष्करजस्य गुरुः आसीत्। जन्मना ब्राह्मणः स वेदादिशास्त्रेषु निष्णातः प्रतिवादिभयङ्करः महापण्डित आसीत्। पश्चात् अश्वघोषः बुद्धस्य उपदेशैः आकृष्टः महायानशाखाम् आसक्तो बुद्धसङ्घाध्यक्षात् वसुमित्रात् बौद्धदीक्षां प्राप्य बौद्धमतमङ्गीकृतवान्। अयम् सङ्गीतेऽपि परिणतः आसीत्। अस्य गायनसमये अश्वाः अपि गानमुग्धाः तत्समये तृणादीनि न सेवन्ते स्म। अत एव "अश्वघोष" इति अस्य नाम प्रथितम्।

अश्वघोषः सुवर्णाक्षीपुत्रः पार्श्वस्य शिष्यश्च कथ्यते। स हि मगधराजाश्रितः आसीत्। उत्तरभारतशासकः कनिष्को मगधाधीशम् आक्रमणेन नामयित्वा राज्यस्य विनिमयेन वस्तुद्वयं दातुमादिष्टवान् १) बुद्धस्य पात्रम् २) अश्वघोषञ्च। राजा मगधानां पात्रं दातुमुद्यतोऽपि कविम् अश्वघोषं दातुं नैच्छत्। मन्त्रिणस्तं तथाऽवलोक्य चिन्ताग्रस्ताः अजायन्त। राजा मन्त्रिणां बोधनाय उपायमेकं कृतवान्। स हि स्वाश्वशालास्थितेभ्यः अश्वेभ्यः दिनमेकं यावत् ग्रासप्रदानं न्यषेधयत्। दिनान्तरे सर्वेषां हयानामग्रे ग्रासं प्रदाय अश्वघोषम् स्वसङ्गीतकरणाय प्रोक्तवान्। तदा अश्वघोषस्य सङ्गीतमेव श्रोतुम् इच्छन्ति अश्वाः न तु ग्रासम्। तदा कवेः अश्वघोषस्य मूल्यम् अजानन्। एतावता एव असौ तन्नाम्ना प्रथते स्म। वास्तविकं च तन्नाम अलुप्यत्। अश्वघोषः कथञ्चित् कनिष्केण सह काश्मीरान् गतः। तेन बह्वादृतश्च। कनिष्कसमकालिकतयाऽश्वघोषस्य समयः ईशवीयपूर्वप्रथमशतकम् इति निर्णितम्। अश्वघोषस्य काव्यं चीनभाषायाम् ३८४-४१७ ई. समये अनूदिम्। इत्सिङ्गो नाम चीनी यात्री अश्वघोषं महोपदेशकं नागार्जुनात् पूर्ववर्त्तिनं च आह। अयं साकेतवासीति प्रसिद्धम्।

२.२.१) कालः

अश्वघोषः प्राक्कालिदासीयकविः इति श्रूयते। क्रिस्ताब्दप्रथमशतकस्य राज्ञः कणिष्कस्य समसामयिकः आसीत्। अतः कणिष्कस्य कालः एव अश्वघोषस्य कालः इति स्वीक्रियते। अतः अश्वघोषस्य कालः ई.पू. प्रथमशतकम् इति।

२.२.२) देशः

अश्वघोषः महाराजस्य कणिष्कस्य सभाकविः आसीत् इति ज्ञायते। अतः तस्य देशः आसीत् मगधः। अश्वघोषस्य जन्मस्थानं तु साकेतम्।

२.२.३) कृतयः

महाकविः अश्वघोषः दार्शनिकः पण्डितः धर्मप्रवक्तृरूपेण च प्रसिद्धः आसीत्। विभिन्नशास्त्रेषु तस्य पाण्डित्यम् आसीत्। महाकविना अश्वघोषेण बुद्धचरितम् सौन्दरनन्दम्, शारिपुत्रप्रकरणं, गण्डीस्तोत्रगाथा, वज्रसूची, सूत्रालङ्कारः च एते ग्रन्थाः लिखिताः।

बुद्धचरितम्

बुद्धचरितम् अश्वघोषस्य काव्यम् अस्ति। अस्मिन् महाकाव्ये सप्तदश सर्गाः उपलभ्यन्ते। अयं ग्रन्थः बहुशः त्रिसहस्रश्लोकपरिमितः आसीदिति चीनादेशीयस्य प्रो.तककुसुमहाशयस्य ग्रन्थात् ज्ञायते। किन्तु अधुना लभ्यमाने अस्मिन् काव्ये केवलम् १३६८ श्लोकाः सन्ति। किन्तु सप्तमेऽष्टमे वा शतके

चीनभाषया भाषान्तरिते, तिब्बतीयभाषया भाषान्तरिते बुद्धचरिते च २८ सर्गाः भवन्ति। एतेन ज्ञायते यत्, संस्कृतभाषायां बुद्धचरितस्य भागमात्रं लब्धम् इति। राजा शुद्धोदनः कपिलावस्तुनाम्नि नगरे राज्यभारं कुर्वन्नासीत्। तस्य पुत्रः सिद्धार्थः। सिद्धार्थः युवराजः आसीत्। एतस्य समृद्धम् राज्यम्, प्रवृद्धः अधिकारः, सौन्दर्यवती प्रिया च भार्या यशोधरा। स्वर्गसमानं सुखमयम् जीवनं सिद्धार्थस्य आसीत्। तथापि सः वैराग्यमापन्नः कथम्। इति "बुद्धचरिते" वर्णितं कविना। तत्र महात्मनः बुद्धस्य सम्पूर्णजीवनं निबद्धमस्ति। तद्यथा अभिनिष्क्रमणं, तपोवनगमनं, यशोधराविलापः, मगधयात्रावर्णनं, सिद्धार्थस्य बुद्धत्वप्रापणम्, धर्मप्रचारः, शिक्षाप्रसारः इत्यादयः विषयाः सरलया भावपरिपूर्णया च भाषया वर्णिताः। काव्ये बौद्धमतस्य पारिभाषिकाः शब्दाः बाहुल्येन विद्यन्ते। अश्वघोषः बौद्धमतस्य महायानपरम्परायाः प्रवर्तक आसीदिति बुद्धचरितादवगम्यते।

हृदयगतभावनाया उद्बोधिका भवति कविता। कविता मानवहृदयम् उत्तेजयति समाकर्षति च। अतः प्राचीनकालादेव मानवः धर्मस्य स्वोद्देश्यस्य च प्रचाराय कवितायाः आश्रयं गृह्णाति। महाकविः अश्वघोषोऽपि बौद्धधर्मप्रचाराय काव्यं विरचितवान्। सौन्दरनन्दस्यान्ते कविना स्वयमेवोक्तम् यत् यथा तिक्तौषधस्य पानाय मधुना सम्मेल्यते तथैव अहं धर्मप्रचाराय काव्यस्य आश्रयं गृहीतवान् अस्मि। अत एव अश्चघोषस्य काव्यकृतिः बौद्धधर्मस्य दार्शनिकविचाराणां प्रचारिका विद्यते। तथापि अश्चघोषः प्रकाण्डविद्वानासीत् नात्र संशयः। बौद्धदर्शनेषु बौद्धसिद्धान्तस्य अयं कविः आचार्यः एवासीत्। अस्यैते प्रामाणिका ग्रन्थाः सन्ति बुद्धचरितम्, सौन्दरनन्दम्, शारिपुत्रप्रकरणञ्चेति। अन्ये ग्रन्थाः अन्तर्बाह्यप्रमाणाभ्यामनेन रचिताः न प्रतीयन्ते। काव्ये कतिचिदंशाः सरसाः काव्यकलादृष्ट्या चोत्तमाः विद्यन्ते। परिशेषास्तु नीरसा एव।

सौन्दरनन्दम्-

अष्टादशसर्गात्मकं काव्यं सौन्दरनन्दम्। इक्ष्वाकुवंशस्य राज्ञः नन्दस्य धर्मपत्न्या सुन्दर्या साकं प्रणयः अत्र काव्ये वर्णितः। अत्र सुन्दर्याः विरहे यदा नन्दस्य मरणापन्नस्थितिः जाता तदा गौतमबुद्धः तं नन्दम् उपदिष्टवान्। स उपदेशः बहु तात्पर्यपूर्णः आसीत्। काव्योत्कर्षदृष्ट्या तु सौन्दरनन्दं बुद्धचरितम् अतिशेते। अत्र हि कविः निखिलम् एव कलाकौशलं काव्यवैभवञ्च प्रदर्शितवान्।

शारिपुत्रप्रकरणम्-

शारिपुत्रप्रकरणम् अश्वघोषस्य प्राच्यनाट्यम् इति कथ्यते। परन्तु विषये अस्मिन् मतभेदाः वर्तन्ते। बहूनां मते शारिपुत्रप्रकरणम् अश्वघोषस्य कृतिः नास्ति। परन्तु रचनाशैल्या केषाञ्चित् मतं इदं नाटकम् अश्वघोषस्य एव। नाटके अस्मिन् नवाङ्काः सन्ति। नायकश्च धीरोदात्तस्वभावः अस्ति।

सूत्रालङ्कारः -

बौद्धदर्शनशिक्षणपरस्य अस्य ग्रन्थस्य केवलं तिब्बतीभाषायाम् अनुवादः वर्तते। न तु मूलस्वरूपं किमपि लभ्यते। अत्र हि नैतिकविचारोन्नायिकाः कतिपयाः कथाः सङ्गृहीताः सन्ति।

वज्रसूची-

ग्रन्थोऽयं बौद्धधर्मव्याख्यानपरः वर्तते। वर्णव्यवस्थापद्धतिं च दूषयति। केचित् तु इदं काव्यं धर्मकीर्तेः वदन्ति न तु अश्वघोषस्य। अतः महान् भेदः वर्तते।

महायानश्रद्धोत्पादकशास्त्रम्-

शास्त्रमिदं शून्यवादविवेचकम् अस्ति। अस्यापि मौलिकं रूपं तु नैव उपलभ्यते। चीनभाषायां तस्य अनुवादः अस्ति।

२.२.४) अश्वघोषस्य पाण्डित्यम्

अश्वघोषस्य साहित्यिकं पाण्डित्यं बौद्धदर्शनज्ञानं च अतीव गम्भीरम् आसीत्। स हि दार्शनिकम् अपि तथ्यं सरससरलशैल्यां समुपस्थापयति। अश्वघोषः आदौ ब्राह्मणः आसीत् अतः ब्राह्मणसाहित्यस्यापि गाढं ज्ञानं तस्यासीत्। अपि च तस्य नीतिशास्त्रस्य अर्थशास्त्रस्य व्याकरणशास्त्रस्य च विषये सम्यक् ज्ञानम् आसीत्। असौ योगाचारमतस्य स्थापकः आसीत्।

पाठगतप्रश्नाः-२

११. अश्वघोषः कस्य राज्ञः निकटे आसीत्।
१२. अश्वघोषस्य कति काव्यानि वर्तन्ते।
१३. अश्वघोषविरचितम् एकं नाटकं किम्।
१४. अश्वघोषस्य कालः कः।
१५. बुद्धचरिते कति सर्गाः सन्ति।
१६. बुद्धचरिते नायकः कः।
१७. बुद्धस्य पिता कः आसीत्।
१८. सौन्दरनन्दं कस्य कृतिः।
१९. सौन्दरनन्दे कति सर्गाः विद्यन्ते।
२०. वज्रसूची कस्य कृतिः।
२१. शारिपुत्रप्रकरणं कस्य रचना।

२.३) भारविः

२.३.१) भूमिका-

भारविः शैवमतावलम्बी, प्रकाण्डपण्डितः, राजनीतिज्ञः, वीररसवर्णनकुशलः, अलङ्कृतशैल्याः प्रवर्तकः च आसीत्। भारविणा निजपरिवारस्य, निवासस्थानस्य, पितुः, पितामहस्य, गुरोर्वा विषये कोऽप्युल्लेखो न कृतः किरातार्जुनीये। दण्डिविरचितम् अवन्तिसुन्दरीकथानुसारेण कुशिकगोत्रीयः ब्राह्मणः आसीत् भारविः। ते आनन्दपुरे निवसन्ति स्म। ततः परं ते वरारप्रान्तम् अचलपुरम् एलिपुरम् आगत्य निवासम् अकुर्वन्। अस्मिन्नेव वंशे नारायणस्वामी जातः। तस्य पुत्रः एव दामोदरः आसीत्। अयमेव दामोदरः भारविः इति नाम्ना प्रख्यातः अभवत्। तत्र भारविविषयकः श्लोकः अयं प्राप्यते -

स मेधावी कविर्विद्वान् भारविं प्रभवां गिराम्।
अनुरुध्याकरोन्मैत्रीं नरेन्द्रे विष्णुवर्धने॥इति।।

इत्थं भारविः दण्डिनः प्रपितामहः आसीत्। तस्य स्थितिकालः ६०० ईशवीयसमीपे मन्यते। अस्य 'किरातार्जुनीयम्' नाम एकमेव महाकाव्यं प्राप्यते; यत् बृहत्त्रय्यां प्रथमस्थाने' परिगणितम्। संस्कृतविद्वत्समाजे 'भारवेरर्थगौरवम्', 'नारिकेलफलसम्मितं वचो भारवेः' 'स्पुटता न पदैरपाकृता' इति आभणकानि सुप्रसिद्धानि एव। महाकविभारविकृते किरातार्जुनीयमहाकाव्ये वर्णितभौगलिकवर्णनानुसारेण तस्य देशकालविषये ज्ञानं करणीयम्।

२.३.२) देशकालश्च-

भारवेः देशकालविषये विविधानि मतानि अधस्तात् उपन्यस्यन्ते -

प्रथमम् -

दक्षिणभारते एहोलग्रामे ६३४ ख्रिष्टीयजैनकविना रविकीर्तिना लिखिते शिलालेखे "स विजयतां रविकीर्तिः कविताश्रितकालिदास-भारविकीर्तिः" इत्यनेन ज्ञायते यत् सप्तमशताब्द्याः पूर्वार्धं यावत् भारविः सुविख्यातः कविः आसीत्।

द्वितीयम् -

काव्यकलायाः उत्तरोत्तरप्रभावदृष्ट्या कालिदासः भारवेः पूर्ववर्ती महाकविमाघश्च उत्तरवर्ती कविरासीत्। माघस्य स्थितिकालः ७०० ख्रिष्टीयाब्दः मन्यते। अतः भारवेः स्थितिकालः षष्ठशताब्द्याः उत्तरार्द्धे भवितुम् अर्हति।

तृतीयम्-

काशिकायां भारवेः (किरात ३/१४) इत्युदाहरणं प्राप्यते। अतः भारवेः कालः वामनजयादित्याभ्यां परं (सप्तमशताब्दी पूर्व) षष्ठशताब्द्याः उत्तरार्द्धे भवेत्।

चतुर्थम्-

अवन्तिसुन्दरीकथानुसारं दण्डिनः प्रपितामहः दामोदरः एव 'भारविः' यः विष्णुवर्धनस्य (६१५ ई.) सभापण्डितो आसीत्। अतः तस्य कालः षष्ठशताब्द्याः उत्तरार्धे भवितुम् अर्हति। निष्कर्षरूपेण एवं प्रतिभाति यत् भारवेः स्थितिकालः षष्ठशताब्द्याः उत्तरार्द्धे सप्तमशताब्द्याः पूर्वार्द्धे (५५०-६०० ई.) भवितुम् अर्हति।

२.३.३) कृतयः

किरातर्जुनीयम् कवेः भाषाशैली-

महाकविभारविना महाभारतकथाम् आश्रित्य अलंकृतकलापक्षप्रधानशैल्या विरचितं अष्टादशसर्गात्मकं वीररसप्रधानम् किरातार्जुनीयमहाकाव्यम्। अर्थगाम्भीर्ययुक्तं बृहत्त्रय्यां प्रथमपरिगणितं 'किरातार्जुनीयम्' नाम एकमेव महाकाव्यं समुपलभ्यते। अस्य ग्रन्थस्य शुभारम्भः 'श्री' शब्देन, सर्गान्तः 'लक्ष्मीशब्देन च भवति। अत्र अर्जुनस्य किरातवेशधारिणा शङ्करेण सह युद्धं वर्णितम्। अत एव ग्रन्थस्य नामकरणं कृतं 'किरातार्जुनीयम् इति। किराताश्च अर्जुनश्च किरातार्जुनौ (द्वन्द्वः) किरातार्जुनौ अधिकृत्य कृतं काव्यं किरातार्जुनीयम्। किरातार्जुन+छ ('ईय'आदेशः) अर्जुनाय दिव्यास्त्राणां प्राप्तिरेव महाकाव्यस्य फलम्। अतः ग्रन्थस्य अस्य नायकः अर्जुनः नायिका च द्रौपदी वर्तते। अर्थगौरवं, स्पष्टता, पुनरुक्तेरभावः अलंकृतशब्दयोजनाश्च अस्य महाकाव्यस्य वैशिष्ट्यम्। भारविना एकाक्षरद्वयक्षरश्लोकाः अपि रचिताः। तद्यथा "न नोनन्नुनो नाना नानानना ननु" (किरात. १५/१४)। ग्रन्थेऽस्मिन् ऋतुवर्णनं, हिमालयवर्णनं, सन्ध्यावर्णनं, चन्द्रवर्णनं, प्रभातमित्यादीनां रोचकं रमणीयञ्च चित्रणं विद्यते। एवमेव पञ्चदशे सर्गे चित्रकाव्यस्य वर्णनं दर्शनीयम्। प्रथमसर्गे द्रौपद्याः कथने या वचनचातुरी विद्यते, सा अन्यत्र दुर्लभा एव।

किरातार्जुनीयस्य कथानकस्य मूलाधारः महाभारतम् अस्ति। महाभारतस्य अष्टादशसर्गेषु वनपर्वणि किरातार्जुनीयस्य कथा अस्ति। अत्र किरातः तद्वेशधारी शिवः अस्ति। महाभारतात् संक्षिप्तकथानकं स्वीकृत्य भारविः स्वकल्पनाभिः काव्यप्रतिभया च कथानके मौलिकताम् उत्पादितवान्। महाभारतस्य शैली सरला अस्ति किन्तु किरातार्जुनीयस्य शैली क्लिष्टा अलङ्कृता च अस्ति। महाकाव्यलक्षणानुरोधेन भारविः बहुत्र ऋतु- पर्वत- नदी- वन- प्रातः-सन्ध्यादीनाम् अपि सुन्दरं वर्णनं कृतवान्। भारवेरर्थगौरवम् इति उक्त्यनुसारम् किरातर्जुनीयस्य अर्थगौरवम् अतीव प्रसिद्धम् अस्ति।

पाठगतप्रश्नाः-३

२२. भारवेः देशः कः।

२३. भारवेः काव्यस्य नाम किम्।

२४. भारवेः कालः कः।

२५. किरातः कः आसीत्।

२६. किरातार्जुनीये कति सर्गाः सन्ति।

पाठसारः-

पाठे अस्मिन् कालिदासाश्वघोषभारवीणां देशकालकृतिविषये वर्णना वर्तते। अपि च कालिदासादीनां गुरुत्वं वर्णितम्। कवीनां देशकालविषये मतभेदाः अपि प्रदर्शिताः। कवीनां पाण्डित्यभाषाशैलीविषये वर्णना पाठे वर्तते। अत्र अस्माभिः ज्ञातं यत् कालिदासस्य देशः उज्जयिनी वर्तते। कालिदासस्य कालः ई.पू.प्रथमद्वितीयशतकम् इति। कालिदास्य सप्त कृतयः सन्ति। अश्वघोषस्य देशः कनिष्कस्य राजधानी आसीत्। अश्वघोषस्य कालस्तु ई.पू.प्रथमशतकम्। अश्वघोषस्य विवादरहितं काव्यद्वयं वर्तते। बुद्धचरितं सौन्दरनन्दम् चेति। भारवेः कालः ईशवीयषष्ठसप्तमशतकम् इति। दक्षिणभारते भारविः आसीत् इत्येव ज्ञायते। भारवेः एकमेव महाकाव्यं वर्तते। तच्च किरातार्जुनीयम् इति।

पाठान्तप्रश्नाः

१. कालिदासस्य कृतीः परिचाययत।।
२. कालिदासस्य भाषाशैलीं लिखत।
३. किरातार्जुनीयम् इति आधृत्य निबन्धं लिखत।
४. अश्वघोषस्य देशकालविषये लिखत।
५. अश्वघोषस्य कृतीः परिचाययत।
६. भारवेः देशकालविषये लघुनिबन्धं लिखत।
७. भारवेः पाण्डित्यम् प्रस्तूयताम्।
८. कालिदासस्य भाषाशैलीविषये निबन्धं लिखत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरस्तबकः- १

१. कालिदासस्य द्वे काव्ये स्तः।
२. कालिदासस्य कालः ई.पू.प्रथमद्वितीयशतकम्।
३. कालिदासस्य त्रीणि नाटकानि वर्तन्ते।
४. कालिदासः उपमालङ्कारस्य प्रयोगे शूराः आसन्।
५. रघुवंशे १९ सर्गाः सन्ति।

६. रघुवंशे सूर्यवंशीयानां नृपाणां वर्णनम् अस्ति।

७. कुमारसम्भवे १७ सर्गाः सन्ति।

८. कुमारसम्भवे कुमारः कार्तिकः।

९. कुमारसम्भवे नायकः कार्तिकः।

१०. कालिदासस्य देश उज्जयिनी।

उत्तरस्तबकः- २

११. अश्वघोषः सम्राजः कनिष्कस्य सभायाम् आसीत्।

१२. अश्वघोषस्य द्वे काव्ये स्तः।

१३. अश्वघोषस्य एकं नाटकं शारिपुत्रप्रकरणम् इति।

१४. अश्वघोषस्य कालः इ. प्रथमशतकम्।

१५. बौद्धचरिते १७ सर्गाः सन्ति।

१६. बौद्धचरितस्य नायकः गौतमबुद्धः।

१७. बुद्धस्य पितुः नाम शुद्धोदनः।

१८. सौन्दरनन्दम् अश्वघोषस्य कृतिः।

१९. सौन्दरनन्दे १८ सर्गाः विद्यन्ते।

२०. वज्रसुची अश्वघोषस्य कृतिः।

२१. शारिपुत्रप्रकरणम् अश्वघोषस्य रचना।

उत्तरस्तबकः- ३

२२. भारवेः देशः काञ्चीपुरम्।

२३. भारवेः काव्यं किरातार्जुनीयम्।

२४. भारवेः कालः षष्ठशतकम् आसीत्।

२५. किरातः भगवान् शिवः।

२६. किरातार्जुनीये १८ सर्गाः सन्ति।

॥ इति द्वितीयः पाठः ॥

348sk03

३

कविपरिचयः-३

प्रस्तावना

संस्कृतसाहित्ये नैके कवयः तेषां कृतयश्च विराजन्ते। तेषां याः कृतयः ताः पुस्तकरूपेण अस्माकं पुरत आयान्ति। किन्तु तत्तत्कवीनां विषये अस्माकं ज्ञानस्य अवकाशः न भवति। अतः तेषां कवीनां देशस्य कालस्य च ज्ञानमनिवार्यं यतः कवीनां काव्यानि प्रायेण देशेन कालेन च प्रभावितानि भवन्ति। अत्र प्रकरणे माघस्य श्रीहर्षस्य क्षेमेन्द्रस्य कल्हणस्य तथा च भट्टिस्वामिनः विषये आलोचनं विहितम् वर्तते। तेषां चरितम् काव्यस्य विशिष्टगुणाः रीतिः इत्यादयः विषयाः अत्र सम्यक् संगृहीताः। तान् वयं ध्यानेन परिच्छेदेऽस्मिन् पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- माघः श्रीहर्षः क्षेमेन्द्रः कल्हणः भट्टस्वामी इति एतेषां कवीनां देशकालकृतीः जानीयात्।
- तेषां काव्यरचनाशैलीं ज्ञास्यति।
- तेषां काव्यानां वैशिष्ट्यानि ज्ञास्यन्ति।
- शिशुपालवधकाव्यविषये ज्ञास्यति।
- माघे सन्ति त्रयो गुणा इति भणित्याः तात्पर्यम् अवगमिष्यसि।

३.१) माघः

३.१.१) सामान्यपरिचयः

माघस्य कृतौ शिशुपालवधमहाकाव्ये अन्तिमे कविः स्वयमेव स्वस्य परिचयं प्रादात्। तत एव ज्ञायते यत् दत्तक इति कश्चन माघस्य पितृदेव आसीत्। तस्य पितामहः सुप्रभदेवः वर्मलाताख्यस्य राज्ञः अमात्यपदम् अलङ्कृतवान्।

३.१.२) माघस्य देशः

पुरा मीनमल्लाख्यम् एकं नगरम् अवर्तत। तद् विद्यायाः पीठम् इति प्रथितम् आसीत्। एवञ्च अतः

एव राजधानी अपि आसीत्। माघस्य जन्म प्रथिते मीनमल्लाख्यनगरे अभवत्। मेरुतुङ्गाचार्यस्य मतेन श्रीमालनगर आसीत् माघस्य निवासस्थलम्। इदानीन्तने काले गुर्जरप्रदेशे भिन्माल इति ग्राम एव कवेः स्थलमिति अनेके मन्यन्ते। भोजप्रबन्धे गुर्जरनिवासी अयं कविः इति वर्णितं दृश्यते।

३.१.३) माघस्य कालः

वामनकृते काव्यालंकारे आनन्दवर्धनकृते ध्वन्यालोके तथा मुकुलभट्टकृते अभिधावृत्तिमातृका इत्यादिषु ग्रन्थेषु माघस्य पद्यानाम् उद्धृतानि दृश्यन्ते। अतः तेभ्यः कविभ्यः पूर्वकालिकोऽयं कविः इति अनुमीयते। महामतीनां महतः अनुशीलनात् ज्ञातं यत् सप्तशतकस्य अन्तिमात् अष्टमशतकपर्यन्तम् माघस्य काल इति।

३.१.४) माघस्य कृतयः

शिशुपालवधकाव्यं माघस्य एका एव कृतिः प्राप्यते। तत्र काव्ये द्वाविंशतिः सर्गाः सन्ति। तत्र १६२५ श्लोकाः सन्ति। अत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः मुख्यतया वर्णितः। महाभारतोक्तां कथां माघो वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्। अत्र काव्ये नायकः भगवान् श्रीकृष्णः प्रतिनायकश्च शिशुपालः।

पाठगतप्रश्नाः-१

१. माघस्य पिता कः आसीत्।

२. माघस्य पितामहः कः आसीत्।

३. माघस्य पितामहः कस्य राज्ञः सभायाम् आसीत्।

४. माघस्य जन्म कस्मिन् नगरे बभूव।

५. माघः निवासस्थलं किं नगरमासीत्।

६. आनन्दवर्धनकृतस्य ग्रन्थस्य नाम किम्।

७. वामनकृतस्य ग्रन्थस्य नाम किम्।

८. माघः आनन्दवर्धनस्य पूर्वकालिक इति कथं ज्ञायते।

९. माघस्य कालः कः।

१०. माघस्य कति कृतयः, काः च ताः।

११. शिशुपालवधस्य मुख्यः विषयः कः।

१२. शिशुपालवधकाव्यस्य उपजीव्यः ग्रन्थः कः।

१३. शिशुपालवधस्य नायकः कः।

१४. शिशुपालवधस्य प्रतिनायकः कः।

३.२) शिशुपालवधकाव्यम्

अत्र महाभारतापेक्षया महाकाव्योपयोगिनः अनेके विषयाः वर्णिताः। तृतीयसर्गात् त्रयोदशसर्गं यावत् भगवतः श्रीकृष्णस्य ऐश्वर्य-प्रस्थ-वनविह-जलक्रीडा-रैवतकपर्वत-सन्ध्या-प्रातः-प्रकृत्यादिविषयाणां वर्णनानन्तरं महाराजस्य युधिष्ठिरस्य राजसूययज्ञे श्रीकृष्णस्य आगमनं वर्णितम्।

महाकविमाघेन प्रणीतं शिशुपालवधमहाकाव्यं विंशतिसर्गेषु पूर्णं जातम्। तस्य ऐतिहासिकं वृत्तमधोलिखितमस्ति-

पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य इन्द्रप्रस्थनगरीं समधिकृतवन्त आसन्। भगवतः श्रीकृष्णस्य कृपया अर्जुन-भीम- नकुल-सहदेवानाम्पराक्रमेण च धर्मराजेन युधिष्ठिरेण समग्रमपि जम्बूद्वीपं विजित्य विपुलं धनम् एकस्थीकृतम्। एवमतुलसाम्राज्यं विपुलं वैभवञ्च अवाप्य युधिष्ठिरो राजसूययज्ञं कर्तुम् ऐच्छत्। प्रायः समग्रस्य जम्बूद्वीपस्य (एशियायाः) भगवतः श्रीकृष्णस्य अनुयायिनो विरोधिनश्च राजानो यज्ञेऽस्मिन् आमन्त्रिता आसन्। यज्ञेऽस्मिन् भगवान् श्रीकृष्णः सर्वकर्मद्रष्टा आसीत्। सर्वेऽपि राजानो यज्ञकार्येषु योग्यतानुसारं भागं गृह्णन्ति स्म। अयं यज्ञ आसीत् ऐतिहासिकः। अतीवमहत्सज्जया यज्ञः सुसम्पन्नः। याज्ञिकाः ब्राह्मणाः दक्षिणादिना सत्कृताः।

ततः सदस्यपूजाया अवसरः समुपस्थितः। शास्त्रानुसारेण यज्ञसमाप्तौ गुणवतेऽर्घ्यप्रदानस्य नियमोऽस्ति। प्रतिष्ठेयं कस्मै प्रदेया इत्यस्मिन् विषये युधिष्ठिरो भीष्मम् पप्रच्छ। शास्त्रानुसारं षडङ्गवेदाध्ययनाध्यापनरतो ब्राह्मणस्नातकः, गुरुः बन्धुः, जामाता, राजा, ऋत्विग्, याज्ञिकश्चैते षट् सदस्याः पूजनार्हाः भवन्ति। यदि कश्चन सर्वगुणसम्पन्नः स्यात्तर्हि सोऽपि पूजनार्हो भवति। भीष्मोऽस्यै प्रतिष्ठायै भगवान् श्रीकृष्ण एव महत्तम इति उद्घोषितवान्। युधिष्ठिरश्च भगवन्तं श्रीकृष्णमेव पूजयामास।

शिशुपालो भगवतः श्रीकृष्णस्येदं सम्मानं द्रष्टुं नाशकत। स क्रोधाविष्टः रक्तीकृतनेत्रश्च सन् उच्चमुष्णञ्च श्वसितुमारेभे। धर्मराजं युधिष्ठिरं च निन्दित्वा भगवतः श्रीकृष्णस्योपरि नानाविधान् आक्षेपान् कर्तुं प्रवृत्तः। भगवान् श्रीकृष्णः मौनावलम्बितः सन् मनसैव शिशुपालस्य अपराधान् गणयति स्म। भीष्मः शिशुपालस्येदं धाष्ट्यं सोढुं नाशकत् तन्मुखाच्च भगवतः श्रीकृष्णस्य निन्दां श्रुत्वा सः क्षुब्धः सञ्जातः। तेनोक्तम् – "अद्य मया विहिता भगवतः श्रीकृष्णस्य पूजा न यस्मै रोचते सः धनुर्धारयेत्"। इत्युक्ते भीष्मे शिशुपालसमर्थकाः राजानो यज्ञमण्डपाद् बहिर्गन्तुमुद्यता बभूवुः। शिशुपालः पुनः कठोराणि वचांसि उवाच, तत्स्थानाच्च निःसृत्य भगवन्तं श्रीकृष्णं युद्धार्थम् आहूय चमूसज्जां कर्तुमारेभे। पाण्डवाः तत्पक्षिणश्च राजानः शान्ता आसन्। चमूसज्जां विधाय शिशुपालेन राजसभायां स्वकीयो दूतः प्रेषितः। स दूतः श्लिष्टशब्दैर्भगवन्तं श्रीकृष्णं निन्दयामास। भगवतः श्रीकृष्णस्य प्रेरणया सात्यकिः तस्य आक्षेपाणाम् उचितमुत्तरं प्रादात्, तथापि सोऽनेकानि निन्द्यानि वचांसि अकथयत्। अनेन भगवान् श्रीकृष्णः तत्समर्थकाः राजानश्च अत्यन्तं क्रुद्धाः सञ्जाताः। अन्ते च युद्धम् प्रारब्धम् एव। शिशुपालस्य सम्पूर्णाऽपि चमूः नष्टा। चम्वां विनष्टायां सः स्वयं श्रीकृष्णेन साकं योद्धुम् आरेभे। युद्ध्यमानः स श्रान्तो

भूत्वा कठोराणि वचांसि अवदत्। ततः शतसंख्याकेषु अपराधेषु पूर्णेषु, तद्वधेऽधिकं विलम्बम् अनुचितम् मत्वा भगवान् श्रीकृष्णः सुदर्शनचक्रेण शिशुपालस्य शिरः चिच्छेद। अस्मिन्नेव समये तस्य शरीराद् एकः तेजःसमूहो निःसृत्य भगवतः श्रीकृष्णस्य शरीरेऽन्तर्हितः। सर्वे चानया घटनया विस्मिताः बभूवुः।

पाठगतप्रश्नाः-२

१५. महाराजः युधिष्ठिरः कं यज्ञं सम्पादयामास।

१६. शिशुपालवधकाव्यं कति सर्गात्मकम्।

१७. पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य कस्मिन् नगरे वासं कृतवन्तः।

१८. राजसूययज्ञे के आहूताः आसन्।

१९. यज्ञेऽस्मिन् कः सर्वकर्मद्रष्टा आसीत्।

२०. शास्त्रानुसारेण यज्ञसमाप्तौ कस्मै अर्घ्यप्रदानस्य नियमोऽस्ति।

२१. शास्त्रानुसारं के पूजनार्हा भवन्ति।

२२. भगवान् श्रीकृष्ण एव महत्तम इति केन उद्घोषितम्।

२३. शिशुपालः कस्य निन्दां कृतवान्।

२४. "अद्य मया विहिता भगवतः श्रीकृष्णस्य पूजा न यस्मै रोचते सः धनुर्धारयेत्" इति केन उक्तम्।

२५. शिशुपालेन प्रेषितो दूतः कथं श्रीकृष्णं निन्दयामास।

२६. सात्यकिः किं कृतवान्।

२७. कदा भगवान् श्रीकृष्णः शिशुपालस्य शिरश्छेदं कृतवान्।

२८. भगवान् श्रीकृष्णः केन अस्त्रेण शिशुपालस्य शिरश्छेदं कृतवान्।

२९. शिशुपालस्य शरीरादेकस्तेजःसमूहो निःसृत्य कुत्र अन्तर्निहितः।

३०. शिशुपालवधकाव्ये शिशुपालस्य शिरश्छेदानन्तरं कया घटनया विस्मिताः बभूवुः।

३.३) माघकाव्यस्य गुणाः

बहुशास्त्रवित्कविः माघः। तस्य काव्ये वेदः, पुराणम्, दर्शनम्, अलंकारः, संगीतं, समरशास्त्रं, छन्दः, ज्यौतिषम् इति सर्वेषां शास्त्राणां स्पर्शो विद्यते। श्रमसाध्यमपीदं काव्यं चमत्कारपूर्णमिति कवेः शक्तिमत्ता स्फुटा। व्याकरणस्य नानाविधाः प्रयोगा अत्र प्रायशः दरीदृश्यन्ते। काव्येऽस्मिन् स्पष्टता, मधुरता, ऊर्जस्वलता च सर्वत्र प्रकटीभवन्ति। अधःस्थितं पद्यं पठित्वा ज्ञातुं शक्यते यत् चमत्कृतिः कथं अस्य काव्ये प्रकाशिता।

क्रूरारिकारी कोरेक कारकः कारिकाकरः।

कोरकाकारकरकः करीरः कर्करोहर्करुक्।।

(कृष्ण अजेयानां रिपूणां विनाशकः, जगदधिपतिः, दुष्टानां पीडकः, पद्ममुकुल इव चरणौ यस्य तस्य देहबलेन हस्तिन अपि पराजिता भवन्ति। शत्रूणां पुरतः भयङ्करः इति श्लोकस्य अर्थः।)

केचित् कथयन्ति यत् काव्यगौरवेण निष्णातं भारविविरचितं किरातार्जुनीयम् अवगाहयितुम् एव शिशुपालवधकाव्यं रचयितुमअ उद्युक्तोऽभवत् कविः। काव्येऽस्मिन् पर्वतानाम् ऋतूनां वनविहारस्य जलक्रीडायाः सन्ध्यायाः प्रभातस्य च महोहराणि वर्णनानि सन्ति। अलंकारप्रयोगनिपुणोऽयं कविः अस्ताचलगमनोन्मुखस्य सूर्यस्य तथा उदयाचलावरूढस्य चन्द्रस्य वर्णनं हस्तिनः कर्णयोः आबद्धया घण्टया सह निरुपम्य घण्टामाघ इति प्रसिद्धिं गतः।

सोऽयं श्लोकस्तावत्-

उदयति विततोर्ध्वरश्मिरज्जवहिमरूचौ हिमधाम्नि याति चास्तम्।

वहति गिरिरयं विलम्बितघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।।

(श्रीकृष्णस्य सारथिना दारुकेण उक्तं- रज्जुः इव किरणानि विकिरयन्त्याः सूर्यस्य उदयं तथा चन्द्रस्य अस्तगनसमये एककालं रैवकपर्वतः, कर्णयोः आबद्धघण्टस्य हस्तिन इव शोभते।)

उनविंशे सर्गे कविः शब्दालंकारस्य प्रयोगे महतीं कुशलतां प्रदर्शितवान्। तत्र चित्रबन्धस्य एकः सुन्दरः प्रयोगः दृश्यते। कुत्रापि एकेन वर्णेन कुत्रापि वा वर्णद्वयेन श्लोकं रचयामास। तस्य उदाहरणानि तावत्-

ददो दद्दुद्दादी दादादो दूददीददोः।

दुद्दादं ददे दुद्दे ददाददददोऽददः॥१९.११४ ॥

राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः।

रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः॥१९.१०२ ॥

शब्दस्य अर्थस्य च सार्थकः समन्वय एव कवेः सृष्टौ प्रमाणमिति कविना उक्तम्।

पाठगतप्रश्नाः-३

३१. बहुशास्त्रवित्कविः माघ इति कथं ज्ञायते।

३२. माघस्य काव्ये अन्येषां केषां शास्त्राणां स्पर्शो विद्यते।

३३. किरातार्जुनीयं केन विरचितम्।

३४. कं ग्रन्थमवगाहयितुं माघः शिशुपालवधकाव्यं रचयामास।

३५. शिशुपालवधकाव्ये केषां केषां वस्तूनां वर्णनं दृश्यते।

३६. माघः कथं घण्टामाघ इति प्रसिद्धिं गतः।

३७. माघकवेः सूर्यास्तपूर्वकचन्द्रोदयवर्णनपरकं श्लोकं लिखत।

३८. शिशुपालवधकाव्ये चित्रबन्धेन विहितः श्लोकः उदाह्रियताम्।

३.४) श्रीहर्षः

३.४.१) सामान्यपरिचयः

श्रीहर्षः नैषधीयचरितस्य तथा खण्डनखण्डखाद्यग्रन्थस्य च कर्तारूपेण प्रसिद्धो वर्तते। श्रीहर्षः द्वादशे शतके कान्यकुब्जनगरे आसीत्। पितरौ तस्य आस्ताम् यथाक्रमं श्रीहीरः मामल्लदेवी च। पिता श्रीहीरः वाराणस्यां राज्ञः जयन्तचन्द्रस्य सभायामासीत्। तत्रैव मिथिलायाः आगतात् नैयायिकात् उदयनाचार्यात् पराभवमनुभूय क्षुब्धो जातः। आसन्ने च मरणकाले स्वपुत्रं सुपुत्रं श्रीहर्षं तस्य तां मर्यादां पुनरुद्धारार्थं अनुरुरोध। श्रीहर्षः चिन्तामणिमन्त्रस्य जपं विधाय देव्याः त्रिपुरायाः अनुग्रहेण महतीं प्रतिभां सम्प्राप्य कान्यकुब्जराजस्य सभायां पुनराजगाम। तत्रैव तस्यानुग्रहेण नैषधीयचरितं रचयामास। तथैव खण्डनखण्डकाव्येन उदयनाचार्यं खण्डितवान्। सर्वतः प्रधानमस्य कवेर्विषये वक्तव्यमस्ति यत् देवभाषासाहित्यस्य अपकर्षणकाले अन्धकारयुगे प्रादुर्भूतोऽयं महाकविस्तादृशमालोकं दत्तवान् यत् सर्वा दिशा एव चाकचिक्यपूर्णा जाताः।

३.४.२) श्रीहर्षस्य देशः

कान्यकुब्जाधिपतेः सभायां सभापण्डित आसीत् इति कृत्वा श्रीहर्षः कान्यकुब्जाधिवासी आसीदिति ज्ञायते।

३.४.३) श्रीहर्षस्य कालः

कान्यकुब्जाधिपतेः जयन्तचन्द्रस्य सभायामासीत् इति कृत्वा जयन्तचन्द्रस्य कालानुसारं तस्य कवेः कालं निर्णेतुं शक्यते। राजा जयन्तचन्द्र ११६३ ईशवीयात् ११९४ ईशवाब्दं यावत् राज्यशासनं चकार। अतः तत्काल एव काल इति अनुमातुं शक्यते। तथा च ११६३तः ११७४ईशवीयाब्दाभ्यन्तरं कदाचित् नैषधीयचरितं रचयामास इति व्यूहलारस्य मतम्।

३.४.४) श्रीहर्षस्य कृतयः

श्रीहर्षस्य नव ग्रन्थाः प्राप्यन्ते। तन्मध्ये नैषधीयचरितं खण्डनखण्डकाव्यमेव प्रसिद्धम्। तत्र नैषधीयचरिते अन्तिमे सर्गे कविना श्रीहर्षेण स्वयमेव तस्य अन्यासां कृतीनां विषये उक्तम्। तस्य काव्यानि हि-

स्थैर्यविचारप्रकरणम् - नामतो दार्शनिकग्रन्थोऽयं प्रायः क्षणभङ्गवादखण्डनपरः।

विजयप्रशस्तिः - जयचन्द्रस्य पितुः विजयचन्द्रस्य प्रशंसापरकं काव्यम्।

खण्डनखण्डखाद्यम् - स्वनामख्यातोऽनिर्वचनीयतासर्वस्वभूतो वेदान्तग्रन्थः।

गौडोर्वीशकुलप्रशस्तिः - वङ्गीयस्य कस्यचिद्राज्ञः स्तुतिपरं काव्यम्।

अर्णववर्णनम् - स्वनामख्यातम्।

छिन्दप्रशस्तिः - अज्ञातपरिचयस्य कस्यापि राज्ञो वर्णनपरोऽयं ग्रन्थः स्यात्।

शिवशक्तिसिद्धिः - शिवशक्त्योरुपासनाग्रन्थोऽयं सम्भाव्यते।

नवसाहसाङ्कचरितचम्पूः(नाम्ना एव विषयः स्वरूपञ्च आख्यायेते।)

नैषधीयचरितम् - अत्र महाकाव्ये निषधशासकस्य नलस्य चरित्रं प्रस्तूयते। अस्मिन् ग्रन्थे द्वाविंशतिः सर्गाः २८३० श्लोकाश्च सन्ति। एतावतापि ग्रन्थेन नलचरितैकदेश एव वर्ण्यते। नलदमयन्त्योः परिणयावधिवृत्तान्तः सम्भोगचित्रं नलस्य च धर्मप्राणतायाः वर्णनमय्या पद्धत्या वर्णितोऽत्र ग्रन्थे। राजनि नले दमयन्तीरक्ते दमयन्तीचिन्तया दूयमाने स्वारामं पर्यटति सति तेन हंसो गृह्यते दयया मुच्यते च। स एव प्रत्युपकारभावनया नलस्य स्तुतिं दमयन्तीसमीपे करोति। दमयन्त्याः पूर्वरागः उदयते। दमयन्त्याः पिता विदर्भः स्वयंवरमारचयति। दमयन्तीकामुका देवा अपि तत्र आयान्ति, धृतनलस्वरूपाश्चत्वार इन्द्रयमवायुकुवेराः पञ्चमो नलश्चेति सर्वेषां समरूपतया दमयन्ती विचित्रां दशां प्रपद्यते। सभावर्णनाय समागता सरस्वत्यपि श्लेषवर्णनया दमयन्तीं व्यामोहयति। अवसाने दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीत्या देवाः स्वानि विशिष्टचिह्नानि प्रकटीकुर्वन्ति यैर्नलः परिचितः भवति। नलदमयन्त्योः सुखसङ्गमेन च ग्रन्थः समाप्यते।

पाठगतप्रश्नाः-४

३९. श्रीहर्षस्य द्वौ ग्रन्थौ उल्लिखत।

४०. श्रीहर्षः कस्मिन् नगरे बभूव।

४१. श्रीहर्षस्य पितुः नाम किम्।

४२. श्रीहर्षस्य मातुः नाम किम्।

४३. श्रीहर्षस्य पिता कस्य राज्ञः सभायामासीत्।

४४. श्रीहर्षस्य पिता श्रीहीरः कस्मात्पण्डितात् पराबभूव।

४५. श्रीहर्षः कस्य मन्त्रस्य जपं कृतवान्।

४६. श्रीहर्षः कस्याः देव्याः उपासनां कृतवान्।

४७. श्रीहर्षः केन काव्येन उदयनाचार्यं खण्डितवान्।

४८. श्रीहर्षस्य कालः कः।

४९. श्रीहर्षः कदा नैषधीयचरितं रचयामास।

३.५) श्रीहर्षस्य काव्यस्य वैशिष्ट्यानि

नैषधीयचरितस्य सरसा वर्णनपद्धतिः शृङ्गारप्रकर्षपूर्णकथा च सहृदयहृदयानि अवर्जयेताम्। यथैव श्रीहर्षस्य खण्डनखण्डकाव्यमद्वितीयं तथैव नैषधीयमपि स्वक्षेत्रेऽनुपमम्। श्रीहर्षः यथैव दार्शनिककविः तथैव योगी अपि आसीदिति यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवमिति पद्याज्ज्ञायते।

श्रीहर्षः स्वीयस्य शास्त्रज्ञानस्य परिचयं प्रतिसर्गं ददाति, परन्तु सप्तदशसर्गे तु तेन स्वीयं नास्तिकास्तिकसकलदर्शनप्रवीणत्वं व्याकरणनिष्णातत्वं च प्रकटीकृतम्।

वेदान्तिना श्रीहर्षेण नैयायिका वैशेषिकाश्च कवितायामप्युपहसिताः-

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्।

गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः।।

ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारुमतं मे।

औलुकमाहुः खलु दर्शनं तत् क्षमं तमस्तत्त्वनिरूपणाय।।

श्रीहर्षस्य कवितायां नारीरूपस्य वर्णनमतीव सजीवम्। चतुर्थसर्गे विप्रलम्भशृङ्गारस्य वर्णनमतीव रमणीयम्। तत्र एकः श्लोकः तावत् -

मयाङ्गं पृष्टः कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान्।

पुपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि।।

बहवः शास्त्रसम्मताः तर्का अत्र काव्ये यत्र यत्र कविना सप्रयासं समावेशिताः सहृदयानां मनांसि रञ्जयन्ति। उत्प्रेक्षाणामपि चमत्कारोऽस्य नितान्तं हृद्यः -

यदस्य यात्रासु बलोद्धतं रजः स्पुतप्रतापानलधूममञ्जिम।

तदेव गत्वा पतितं तधाति पङ्कीभवङ्कतां विधौ।।

यद्यपि नैषधकाव्यं सौमबद्धताया अभावात् कठिन्यादेकस्यैवनार्थस्य शब्दान्तरेणावर्तनाच्च माघकितार्जुनीयापेक्षया न्यूनमर्यादं मन्तव्यं भवति तथापि नैषधे स्तितं रसोल्वणत्वं सर्वमतिशय्य वर्त्तते। तस्मादाभाणकमिदम्-

उदिते नैषधे काव्ये क्व माघः क्व च भारविः।।

३.६) क्षेमेन्द्रः

३.६.१) सामान्यपरिचयः

क्षेमेन्द्रः एकादशशतकस्य ख्यातनामा कविः आसीत्। क्षेमेन्द्रः सिन्धोः पौत्रः प्रकाशेन्द्रस्य पुत्रश्च आसीत्। क्षेमेन्द्रस्य पिता प्रकाशेन्द्रः ब्राह्मणानां संरक्षक आसीत्। क्षेमेन्द्रः कश्मीरराजस्य अनन्तस्य सभापण्डित आसीत्। तस्य अनन्तस्य शासनकालः १०२७ ईशवीयाब्दतः १०६४ ईशवीयाब्दं यावत् आसीत्।

३.६.२) क्षेमेन्द्रस्य देशः

क्षेमेन्द्रः कश्मीरवासी आसीत्। तत्रत्यस्य राज्ञः अनन्तस्य सभापण्डित आसीत् क्षेमेन्द्रः। कश्मीरदेशो वरपुत्राणां देशः इति भणितिः प्रसिद्धा एव। तेन वरपुत्राणां देशे कश्मीरे जनिं लेभे क्षेमेन्द्रः।

३.६.३) क्षेमेन्द्रस्य कालः

पूर्वमेव उक्तमस्ति यत् क्षेमेन्द्रः कश्मीरराजस्य अनन्तस्य सभापण्डित आसीत्। तस्य अनन्तस्य शासनकालः १०२७ ईशवीयाब्दतः १०६४ ईशवीयाब्दं यावत् आसीत्। अतः क्षेमेन्द्रस्य समयः एकादशशतकमिति निश्चित्य वक्तुं शक्यते।

३.६.४) क्षेमेन्द्रस्य कृतयः

क्षेमेन्द्रस्य बह्व्यः कृतयः प्राप्यन्ते। ताश्च शशिवंशमहाकाव्यम् अमृतरङ्गकाव्यम् अवसरसारः मुक्तावली लावण्यवती देशोपदेशः पवनपञ्चाशिका पद्मकादम्बरी अवदानकल्पलता नीतिकल्पतरुः लोकप्रकाशकोशः सेव्यसेवकोपदेशः विनयवल्ली दर्पदलनम् कविकण्ठाभरणम् रामायणमञ्जरी भारतमञ्जरी बृहत्कथामञ्जरी समयमातृका दशावतारचरितम् इति।

३.६.५) क्षेमेन्द्रस्य काव्यस्य गुणाः

क्षेमेन्द्रस्य अवदानकल्पलता सार्धशतवर्षाभ्यन्तरे एव तिब्बतभाषानुवादावसरं लेभे इति क्षेमेन्द्रस्य धार्मिकोदारतायाः सुन्दरकाव्यशैल्याश्च प्रबलं प्रमाणम्।

दशावतारचरितन्नाम महाकाव्यं क्षेमेन्द्रस्यान्तिमा मधुरतमा च कृतिः। अस्मिन् स्वतन्त्रे महाप्रौढे च महाकाव्ये विष्णोर्दशावताराः रोचकशैल्या वर्णिताः। क्षेमेन्द्रस्य भाषा मधुरा, सरसा सुबोधा चासीत्। उदाहरणमेकं यथा -

दयितजनवियोगोद्वेगरोगातुराणां विभवविरहदैन्यम्लायमाननानानाम्।

शमयति शितशल्यं हन्त नैराश्यनश्यद्भवपरिभवतान्तिः शान्तिरन्ते वनान्ते।।

पाठगतप्रश्नाः-५

५०. क्षेमेन्द्रः कस्य राज्ञः सभापण्डित आसीत्।

५१. कस्मिन् देशे क्षेमेन्द्रः जनिं लेभे।

५२. क्षेमेन्द्रस्य कालः कः।

५३. क्षेमेन्द्रस्य काश्चन कृतीः लिखत।

५४. क्षेमेन्द्रस्य मधुरतमायाः कृतेः नाम किम्।

३.७) कल्हणः

३.७.१) सामान्यपरिचयः-

ऐतिहासिककविषु अन्यतमः कविः कल्हणः। संस्कृतभाषायाम् इतिहासलेखनाय यावन्तः विद्वांसः व्यवसितवन्तः तेषां मध्ये कल्हणः प्रमुख इति नितान्तसत्यं वस्तु। कल्हणः स्वयमेव स्वीयम् इतिवृत्तं निर्दिष्टवान्। कल्हणस्य पिता आसीत् चणपकः। चणपकः तात्कालीककाश्मीराधिपतेः हर्षस्य प्रधानामात्यः आसीत्। कल्हणस्य पितृव्यः कणकोऽपि राज्ञः हर्षस्य आश्रये आसीत्। हर्षे शत्रुभिः कपटेन हते सति चणपकः राजाश्रयहीनः सञ्जातः। परं कल्हणः अलकदत्तनाम्नः कस्यचित्सत्पुरुषस्य छत्रछायाम् आश्रितवान्। कल्हणः रामायणमहाभारतादिग्रन्थान् सम्यक् अधीतवान्। समं हि ज्यौतिषशास्त्रेऽपि तस्य पाण्डित्यम् आसीत्।

३.७.२) कल्हणस्य देशः-

कल्हणोऽयं काश्मीरदेशे आढ्यब्राह्मणवंशे अजायत। तस्य काश्मीरवासित्वे नास्ति कोऽपि सन्देहः।

३.७.३) कल्हणस्य कालः-

राज्ञः सुस्सलस्य पुत्रे जयसिंहे राजति कल्हणः राजतरङ्गिणीं निर्मितवान्। जयसिंहस्य शासनकालः आसीत् ११२७ तमेशवीयवर्षतः ११५९ तमेशवीयवर्षपर्यन्तम्। अतः कल्हणस्य कालः ईशवीयद्वादशशतकम् इति निश्चयेन वक्तुं शक्यते।

३.७.४) कल्हणस्य कृतिः-

ऐतिहासिककवेः अस्य राजतरङ्गिणी इति एकमेव ऐतिहासिककाव्यं प्राप्यते। सर्वमपि प्राक्तनम् इतिहासग्रन्थनिवहं निपुणं निरीक्ष्यैव राजतरङ्गिणीं प्रणीतवान्। कल्हणेन ११४८-तमेशवीयवर्षे प्रारब्धा

राजतरङ्गिणी ११५०-तमेशवीयवर्षे समापिता। अत्र काव्यतायाः यावानंशो वर्तते तावानंशः ऐतिहासिकतायाः अपि।

३.७.५) राजतरङ्गिणीग्रन्थः-

ग्रन्थोऽयं विशालकायः अष्टसु तरङ्गेषु विभक्तो विद्यते। अत्र कल्हणः प्राचीनकालादारभ्य तत्समयपर्यन्तस्य काश्मीरदेशस्य काश्मीरशासकानां च इतिहासं लेखितुं प्रयत्नं कृतवान्। अस्य ग्रन्थस्य इतिहासनिबद्धः विक्रमसंवत्सरप्रारम्भात् द्वादशशतकपूर्वभवस्य कस्यचन गोनन्दनामकस्य राज्ञः इतिहासात् प्रक्रमते। अस्मिन् ग्रन्थे प्रथमतरङ्गत्रये निर्दिष्टानां राज्ञामुल्लेखः कालनिर्देशरहितः एव कृतः। तत्र पौराणिककथां जनश्रुतिं च आधारीकृत्य इतिहासं निर्मितवान्। ततःपरं राज्ञाम् इतिहासवर्णने कालनिर्देशः प्राप्यते। सर्वतः प्रथमम् निर्दिश्यमाना तिथिः ८१३-८१४ ईशवीयवर्षम्। ततः अन्तःपर्यन्तं वर्णिताः घटनाः प्रामाणिकरूपेण वैज्ञानिकपद्धत्या निबद्धा विद्यते। अष्टमतरङ्गस्य घटनास्तु कविना भूयसांशेन साक्षात्कृत्य निबद्धा इति तासां सत्यता असन्दिग्धा।

३.७.६) कल्हणस्य काव्यस्य वैशिष्ट्यम्-

सामान्यतः प्रायः सर्वे एव ऐतिहासिकाः स्वदेशस्य प्रतिष्ठां वर्धयितुं स्वीयदेशे अवर्तमानानपि गुणान् वर्णयितुं न सङ्कुचन्ति। किन्तु कल्हणः तादृशः नासीत्। स हि नितान्तनिष्पक्षपातितया इतिहासं रचितवान्। स स्वयमेव लिखति-

"श्लाघ्यः स एव गुणवान् रागद्वेषविवर्जितः।

भूतार्थकथने यस्य स्थेयस्येव सरस्वती।।" इति।

राजतरङ्गिणीग्रन्थे तत्कालीनानां राज्ञां गुणदोषाः, राजसेवकानां च कृतघ्नतास्वामिभक्तिः सर्वं यथायथं वर्णितम्। अस्मिन् काव्ये निन्दा स्तुतिः उभयम् अपि निष्पक्षपाततया लिखितम्।

अस्मिन् ग्रन्थे इतिहासेन समं काव्यत्वमपि समानतया वर्तते। यथा-

"राज्याच्च्युतस्य बहूशः परिवाररामा

कोशादि तस्य रिपवो व्रजतोऽपजह्रुः।

उर्वीरूहोविगलितस्य नगेन्द्रशृङ्गा-

द्वल्लीफलादि रभसादिव गण्डशैलाः।।" इति।

पाठगतप्रश्नाः-६

५५. कल्हणः कस्मिन् देशे अजायत।

५६. कल्हणस्य कृतेः नाम किम्।

५७. राजतरङ्गिणी इति कीदृशं काव्यम्।

५८. राजतरङ्गिण्यां कति तरङ्गाः सन्ति।

५९. कल्हणस्य पितुः पितृव्यस्य च नाम लिखत।

३.८) भट्टिस्वामी

३.८.१) सामान्यपरिचयः-

भट्टिकाव्यस्य प्रणेतुः भट्टिस्वामिनः पिता आसीत् श्रीधरस्वामी। भट्टिस्वामिनः जीवनचरितविषये प्रामाणिकं किमपि मतं नास्ति। तस्य जीवनविषये काश्चित् कथाः श्रूयन्ते। भट्टिस्वामिनः जन्मनः परमेव तस्य मातृवियोगः सञ्जातः। तस्य पिता श्रीधरस्वामी अपि नवजातकं स्वपुत्रं परित्यज्य सन्यासं स्वीकृतवान्। तत्र श्रीधरसेननामा कश्चित् राजा आसीत्। सः भट्टिस्वामिनः पोषणं कृतवान्।

कवेरस्य व्याकरणशास्त्रे आसीत् प्रगाढं पाण्डित्यम्। तस्य काव्यमेव तत्र प्रमाणम्। समं हि अलङ्कारादिष्वपि शास्त्रेषु तस्य पाण्डित्यम् आसीत्।

३.८.२) भट्टिस्वामिनः देशः-

कविरयं सौराष्ट्रजनपदस्य अन्तर्गते वलभीनगरे जनिं लब्धवान् इति रूढिः।

३.८.३) भट्टिस्वामिनः कालः-

अयं कविः राज्ञः श्रीधरसेनस्य आश्रये आसीदिति सः स्वयमेव स्वीयकाव्ये लिखति। श्रीधरसेननामकाश्चत्वारो राजानः प्रसिद्धाः। ते च ५००-६५० ईशवीयाब्दपर्यन्तम् अजायन्त। तेषु कतमस्य श्रीधरसेनस्य समये आसीदिति न निश्चितम्। श्रीधरसेनद्वितीयस्य एकः शिलालेखः प्राप्यते यत्र भट्टिनाम्ने विदुषे राज्ञा कृतस्य भूमिदानस्य वार्ता मिलति। यदि अयं भट्टिः भट्टिकाव्यस्य प्रणेता भट्टिः स्यात् तर्हि तस्य समयः ६१० ईशवीयाब्दः इति मन्तुं शक्यते। भिन्नभट्टेः कल्पनायामपि भट्टिः सप्तमशतकादूर्ध्वं नानेतुं योग्यः। अतः भट्टिस्वामी ईशवीयसप्तमशतके आसीदिति वक्तुं शक्यते।

३.८.४) भट्टिस्वामिनः कृतिः-

भट्टिकाव्यम् इति तस्य कृतिः। शास्त्रकाव्येषु भट्टिकाव्यं प्रसिद्धतरम्। अस्य काव्यस्य निर्माणे उद्देश्यमासीत् मनेविनोदेन सह व्याकरणस्य ज्ञानम्। व्याकरणशास्त्रस्य प्रयोगः अस्मिन् काव्ये सम्यक्तया दृश्यते। स्वस्य काव्यविषये भट्टिस्वामी स्वयमेव लिखति-

"दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।

हस्तादर्श इवान्धानां भवेद्व्याकरणादृते" इति।

अर्थात् व्याकरणे व्युत्पन्नानां कृते काव्यमिदं प्रदीपतुल्यम्। किन्तु व्याकरणज्ञानरहितानां कृते अन्धस्य हस्ते दर्पणः इव। काव्यमिदं भट्टिस्वामिना प्रणीतम् इति हेतोः तन्नाम्नैव प्रसिद्धिः जाता। काव्यमिदं रावणवधनाम्नापि प्रथते।

इदं काव्यं वाल्मीकिमहर्षेः रामायणमाश्रित्य निर्मितम्। अत्र रामायणकथा एव वर्णिता। काव्येऽस्मिन् द्वादशसर्गाः सन्ति।

३.८.५) भट्टिस्वामिनः काव्यस्य वैशिष्ट्यम्-

काव्यस्यास्य प्रधानं वैशिष्ट्यं हि व्यवहारे व्याकरणस्य यानि रूपाणि प्राप्यन्ते तैः सह अप्रचलिताः व्याकरणस्य प्रायः सर्वे एव प्रयोगाः अत्र लभ्यन्ते। मल्लिनाथस्य मतानुसारं भट्टिकाव्यं हि "उदाहरणकाव्यम्"। अन्ये अपि टीकाकाराः वदन्ति यत् प्रयोगद्वारा व्याकरणस्य शिक्षादानाय कविना काव्यमिदं निर्मितम् इति। भट्टिकाव्यस्य मुख्यतया चत्वारः भेदाः। प्रकीर्णकाण्डः, अधिकारकाण्डः, प्रसन्नकाण्डः, तिङन्तकाण्डश्च। तेषु आदितः पञ्चमसर्गपर्यन्तं प्रकीर्णकाण्डः। तत्र व्याकरणस्य विविधाः नियमाः प्रयोगैः उदाहृताः। पञ्चमसर्गतः नवमसर्गपर्यन्तम् अधिकारकाण्डः। तत्र प्रत्ययानां व्यवहारः, आत्मनेपदपरस्मैपदविधानं, णत्वविधानं, षत्वविधानं च प्रयोगैः दर्शितम्। दशमसर्गतः त्रयोदशसर्गपर्यन्तं प्रसन्नकाण्डः। अस्मिन् अंशे अलङ्काराणां प्रयोगः दृश्यते। अष्टादशसर्गतः अन्तिमं यावत् तिङन्तकाण्डः। अत्र दशानां लकाराणां प्रयोगः प्राप्यते। न हि भट्टिकाव्यं केवलं व्याकरणलक्षणप्रयोगज्ञानाय निर्मितम् अपि तु अलङ्कारः, रसः, छन्दः, काव्यगुणाः, व्यञ्जना, चित्रम् इत्यादीनि अपि अत्र भूयशः प्राप्यन्ते। काव्यस्यास्य दशमे सर्गे शब्दार्थालङ्काराणां निवेशेन एकादशसर्गे माधुर्यगुणस्य समावेशेन च अस्य गौरवमेधते।

भट्टिकाव्ये यमकालङ्कारस्य एकम् उदाहरणं यथा-

"अवसितं हसितं प्रसितं मुदा विलसितं ह्रसितं स्मरभासितम्।
न समदाः प्रमदा हतस्मदाः पुरोहितं विहितं न समीहितम्।।" इति।

लुङ्लकारस्य प्रयोगः यथा-

"माज्ञासीस्त्वं सुखी रामो यदकार्षीत् स रक्षसाम्।
उदतारीदुदन्वन्तः पुरं न परितोऽरुधत्।।" इति.

अस्य काव्यस्य शरद्वर्णनं नितान्तहृद्यम्-

"तरङ्गसङ्गाचचपलैः पलाशैर्ज्वालाश्रियं सातिशयं दधन्ति।
सधुमदीप्ताग्निरुचीनि रोजुस्ताम्रोत्पलान्याकुलषट्पदानि।।" इति।

एवमेव सूर्योदयवर्णनमपि-

"दुरुत्तरे पङ्क इवान्धकारे मग्नं जगत्सन्ततरश्मिरज्जुः।
प्रणष्टमूर्तिप्रविभागमुद्यन् समुज्जहारेव ततो विवस्वान्।।" इति।

भट्टिकाव्यस्य निम्नलिखितश्लोकस्तु एकावलीनामकस्य अलङ्कालस्य प्रसिद्धमुदाहरणम्-

"न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्त जहार यन्मनः।।" इति।

काव्येऽस्मिन् महाकाव्यस्य वैशिष्ट्यमपि वर्तते इति हेतोः भट्टिकाव्यं महाकाव्यमेव।

पाठगतप्रश्नाः-७

६०. भट्टिस्वामिनः पितुः नाम किम्।
६१. भट्टिस्वामी कस्य राज्ञः आश्रये आसीत्।
६२. भट्टिस्वामी कस्मिन् देशे अजायत।
६३. भट्टिस्वामी कस्मिन् शतके जनिं लब्धवान्।
६४. भट्टिकाव्यं कीदृशं काव्यम्।
६५. भट्टिस्वामिनः कृतेः नाम किम्।
६६. दीपतुल्यः प्रबन्धोऽयम् इति कस्य विषये उक्तम्।
६७. भट्टिकाव्यं किमाश्रित्य निर्मितम्।
६८. एकावलीनामकस्य अलङ्कारस्य प्रसिद्धमुदाहरणं भट्टिकाव्यतः दीयताम्।

पाठसारः

माघः

अस्मिन् पाठे वयं कवेः माघस्य जीवनचरितं, तस्य देशः, तस्य कालः.तस्य कृतयः, तस्य काव्यस्य वैशिष्ट्यानि, शिशुपालवधकाव्यस्य वैशिष्ट्यानि इत्यादयः विषयाः पठिताः। माघस्य पिता दत्तकः विद्वान् दानप्रसिद्धश्चासीत्। मीनमल्लाख्यनगरे जन्मग्रहणमकरोत्। गुर्जरनिवासी अयं कविः श्रीमालनगरे वासं कृतवान्। सप्तशकस्य अन्तिमात् अष्टमशतकपर्यन्तम् माघस्य समयः इति विदुषां मतम्। शिशुपालवध इति एकेनैव काव्येन माघकविः प्रथितयशा बभूव।

महाभारतम् उपजीव्य विरचिते अस्मिन् ग्रन्थे युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः मुख्यतया वर्णितः। महाभारतोक्तां निष्प्राणामिमां कथां माघो वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्।

श्रीहर्षः

अस्मिन् पाठे श्रीहर्षस्य जीवनवृत्तान्तः देशः कालः कृतयश्च वर्णिताः। श्रीहर्षः कान्यकुब्जाधिवासी आसीत्। श्रीहीरः तस्य पिता माता च मामल्लदेवी आसीत्। उदयनाचार्यात् पराभवम् अनुभवितुः स्वपितुः श्रीहीरस्य सम्मानरक्षार्थं श्रीहर्षेण नैषधीयचरितं विरचितम्। देवभाषासाहित्यस्य अपकर्षणकाले अन्धकारयुगे प्रादुर्भूतोऽयं महाकविः भाषायां पुनरुद्धारं कृतवान्। राजा जयन्तचन्द्रस्य काल एव अस्य कवेः काल इति स्थिरीकृत्य अयं श्रीहर्षः द्वाविंशशतककाले आसीदिति अनुमातुं शक्यते। श्रीहर्षस्य नव ग्रन्थाः प्राप्यन्ते। तत्र नैषधीयचरितं तथा खण्डनखण्डकव्यमेव अधिकतया प्रथन्ते। तद्विहाय अन्ये ग्रन्थाः तावत् स्थैर्यविचारप्रकरणम्, विजयप्रशस्तिः, गौडोर्वीशकुलप्रशस्तिः, अर्णववर्णनम्, छिन्दप्रशस्तिः, शिवशक्तिसिद्धिः, नवसाहसाङ्कचरितचम्पूः इति।

तत्र नैषधीयचरिताख्ये ग्रन्थे द्वाविंशतिः सर्गाः २८३० श्लोकाश्च सन्ति। नलदमयन्त्योः परिणयावधिवृत्तान्तः सम्भोगचित्रं नलस्य च धर्मप्राणतायाः वर्णनमय्या पद्धत्या वर्णितोऽत्र ग्रन्थे। दमयन्तीचिन्तया राज्ञः नलस्य राजहंसपरित्यागवर्णनम् प्रसिद्धम्। नलस्य देवैः सह औपम्यम् इत्यादीनि वर्णनानि प्रसिद्धानि। नलदमयन्त्योः सुखसङ्गमेन च ग्रन्थः समाप्यते।

श्रीहर्षस्य काव्यवैशिष्ट्यानि अपि अत्र समुपवर्णितानि। वर्णनपद्धत्या अलंकारप्रयोगादिना निरूपमाः कृतयः कृताः।

क्षेमेन्द्रः

क्षेमेन्द्रः एकादशशताब्दौ जनिं लेभे। स कश्मीरदेशीयः। तस्य नैकाः कृतयः लोकप्रसिद्धाः काव्यगुणसम्पन्नाः च। सर्वासु कृतिषु दशकुमारचरितमिति काव्यम् तस्यैव काव्यान्तराणि अतिशेते।

कल्हणः

ऐतिहासिककविषु अन्यतमः कविः कल्हणः। ईशवीयद्वादशशतके काश्मीरदेशे सः जनिं लब्धवान्। तस्य पिता चणपकः आसीत् राज्ञः हर्षस्य प्रधानामात्यः। अलकदत्तनामा कश्चित्सत्पुरुषः कल्हणस्य पोषकः आसीत्। कल्हणस्य कृतेः नाम राजतरङ्गिणी। अत्र अष्टौ तरङ्गाः सन्ति। राजनि जयसिंहे राजति कल्हणः राजतरङ्गिणीं निर्मितवान्। अस्मिन् काव्ये गोनन्दनामकराज्ञः आरभ्य तत्कालपर्यन्तस्य काश्मीरदेशस्य राज्ञां च इतिहासः वर्णितः।

भट्टिस्वामी

भट्टिस्वामी सौराष्ट्रजनपदस्य अन्तर्गते वलभीनगरे सप्तमशतके अजायत। भट्टिस्वामिनः पिता आसीत् श्रीधरस्वामी। पितरि सन्न्यस्ते राजा श्रीधरसेनः तस्य पोषणं कृतवान्। तस्य कृतेः नाम भट्टिकाव्यम्। रावणवधमिति भट्टिकाव्यस्य अपरं नाम। शास्त्रकाव्येषु भट्टिकाव्यं प्रसिद्धतरम्। काव्यमिदं

वाल्मीकिमहर्षेः रामायणमाश्रित्य निर्मितम्। काव्येऽस्मिन् द्वादशसर्गाः सन्ति। अत्र व्याकरणशास्त्रस्य सम्यक् प्रयोगः अत्र दृश्यते।

पाठगतप्रश्नानामुत्तराणि

उत्तरस्तबकः-१

१. माघस्य पिता आसीत् दत्तकः।

२. माघस्य पितामहः आसीत् सुप्रभदेवः।

३. माघस्य पितामहः राज्ञः वर्मलातः सभायाम् आसीत्।

४. माघस्य जन्म मीनमल्लाख्ये नगरे बभूव।

५. माघः निवासस्थलं आसीत् श्रीमालनगरम्।

६. आनन्दवर्धनकृतस्य ग्रन्थस्य नाम हि ध्वन्यालोकः।

७. वामनकृतस्य ग्रन्थस्य नाम तावत् काव्यालंकारः।

८. आनन्दवर्धनकृते ध्वन्यालोके माघस्य पद्यानाम् उद्धृतत्वात् माघः आनन्दवर्धनस्य पूर्वकालिक इति ज्ञायते।

९. सप्तशकस्य अन्तिमात् अष्टमशतकपर्यन्तम् माघस्य कालः।

१०. माघस्य एका एव कृतिः प्राप्यते तच्च भवति शिशुपालवधकाव्यम्।

११. युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वध एव शशुपालवधकाव्यस्य मुख्यो विषयः।

१२. शिशुपालवधकाव्यस्य उपजीव्यः ग्रन्थः तावत् व्यासविरचितं महाभरतम्।

१३. शिशुपालवधस्य नायकः भगवान् श्रीकृष्णः।

१४. शिशुपालवधस्य प्रतिनायकः शिशुपालः।

उत्तरस्तबकः-२

१५. महाराजः युधिष्ठिरः राजसूययज्ञं सम्पादयामास।

१६. शिशुपालवधकाव्यं विंशतिसर्गात्मकम्।

१७. पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य इन्द्रप्रस्थनगरे वासं कृतवन्तः।

१८. राजसूययज्ञे जम्बूद्वीपस्य सर्वे राजानः आहूताः आसन्।

१९. यज्ञेऽस्मिन् भगवान् श्रीकृष्णः सर्वकर्मद्रष्टा आसीत्।

२०. शास्त्रानुसारेण यज्ञसमाप्तौ गुणवते अर्घ्यप्रदानस्य नियमोऽस्ति।

२१. शास्त्रानुसारं षडङ्गवेदाध्ययनाध्यापनरतो ब्राह्मणस्नातकः, गुरुः बन्धुः, जामाता, राजा, ऋत्विग्, याज्ञिकश्च एते षट् सदस्याः पूजनार्हा भवन्ति।

२२. भगवान् श्रीकृष्ण एव महत्तम इति भीष्मेण उद्घोषितम्।

२३. शिशुपालः कस्य श्रीकृष्णस्य निन्दां कृतवान्।

२४. " अद्य मया विहिता भगवतः श्रीकृष्णस्य पूजा न यस्मै रोचते सः धनुर्धारयेत्" इति भीष्मेण उक्तम्।

२५. शिशुपालेन प्रेषितो दूतः श्लिष्टशब्दैः भगवन्तं श्रीकृष्णं निन्दयामास।

२६. सात्यकिः शिशुपालस्य आक्षेपाणाम् उचितमुत्तरं प्रादात्।

२७. शतसंख्यकेषु अपराधेषु पूर्णेषु भगवान् श्रीकृष्णः शिशुपालस्य शिरश्छेदं कृतवान्।

२८. भगवान् श्रीकृष्णः सुदर्शनचक्रेण शिशुपालस्य शिरश्छेदं कृतवान्।

२९. शिशुपालस्य शरीरादेकस्तेजःसमूहो निःसृत्य भगवतः श्रीकृष्णस्य शरीरे अन्तर्हितः।

३०. शिशुपालवधकाव्ये शिशुपालस्य शिरश्छेदानन्तरं शिशुपालस्य शरीरोदकतेजःसमूहः निःसृत्य भगवतः श्रीकृष्णस्य शरीरे अन्तर्हितः अनया घटनया सर्वे विस्मिताः बभूवुः।

उत्तरस्तबकः-३

३१. माघस्य काव्ये वेदः, पुराणम्, दर्शनम्, अलंकारः, संगीतं, समरशास्त्रं, छन्दः, ज्यौतिषम् सर्वेषां शास्त्राणां स्पर्शो विद्यते अतः बहुशास्त्रवित्कविः माघ इति ज्ञायते।

३२. माघस्य काव्ये अन्येषां वेदः, पुराणम्, दर्शनम्, अलंकारः, संगीतं, समरशास्त्रं, छन्दः, ज्यौतिषम् इत्यादीनां शास्त्राणां स्पर्शो विद्यते।

३३. किरातार्जुनीयं भारविना विरचितम्।

३४. किरातार्जूनीयाख्यं ग्रन्थमवगाहयितुं माघः शिशुपालवधकाव्यं रचयामास।

३५. शिशुपालवधकाव्ये पर्वतानाम् ऋतूनां वनविहारस्य जलक्रीडायाः सन्ध्यायाः प्रभातस्य इत्यादीनां वस्तूनां वर्णनं दृश्यते।

३६. माघः अस्ताचलगमनोन्मुखस्य सूर्यस्य तथा उदयाचलोररूढस्य चन्द्रस्य वर्णनं हस्तिनः कर्णयोः आबद्धया घण्टया सह निरुपम्य घण्टामाघ इति प्रसिद्धिं गतः।

३७. माघकवेः सूर्यास्तपूर्वकचन्द्रोदयवर्णनपरकं श्लोको हि -

उदयति विततोर्ध्वरश्मिरज्जवहिमरूचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बितघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।। इति।

३८. शिशुपालवधकाव्ये चित्रबन्धेन विहितः श्लोको हि -

ददो दद्दुद्दादी दादादो दूददीददोः।
दुद्दादं दददे दुद्दे ददाददददोऽददः ॥ १९.११४ ॥ इति

उत्तरस्तबकः-४

३९. श्रीहर्षस्य द्वे ग्रन्थे नैषधीयचरितम्, खण्डनखण्डखाद्यं च।

४०. श्रीहर्षः कान्यकुब्जनगरे बभूव।

४१. श्रीहर्षस्य पितुः नाम श्रीहीरः।

४२. श्रीहर्षस्य मातुः नाम मामल्लदेवी।

४३. श्रीहर्षस्य पिता जयन्तचन्द्रस्य राज्ञः सभायामासीत्।

४४. श्रीहर्षस्य पिता श्रीहीरः उदयनाचार्यात् पराबभूव।

४५. श्रीहर्षः चिन्तामणिमन्त्रस्य जपं कृतवान्।

४६. श्रीहर्षः कस्याः त्रिपुरादेव्या उपासनां कृतवान्।

४७. श्रीहर्षः खण्डनखण्डखाद्यग्रन्थेन उदयनाचार्यं खण्डितवान्।

४८. श्रीहर्षस्य कालो भवति द्वादश ईशवीयाब्दः।

४९. श्रीहर्षः ११६३तः ११७४ ईशवीयाब्दाभ्यन्तरे नैषधीयचरितं रचयामास।

उत्तरस्तबकः-५

५०. क्षेमेन्द्रः राज्ञः अनन्तस्य सभापण्डित आसीत्।

५१. क्षेमेन्द्रः कश्मीरदेशे जनिं लेभे।

५२. क्षेमेन्द्रः एकादशतके आसीत्।

५३. क्षेमेन्द्रस्य कतिपयाः कृतयः शशिवंशमहाकाव्यम्, अमृतरङ्गकाव्यम्, अवसरसारः, मुक्तावली, लावण्यवती, देशोपदेशः, पवनपञ्चाशिका, दशावतारचरितम् इत्यादयः।

५४. क्षेमेन्द्रस्य मधुरतमायाः कृतेः दशावतारचरितम्।

उत्तरस्तबकः-६

५५. कल्हणः काश्मीरदेशे अजायत।

५६. कल्हणस्य कृतेः नाम राजतरङ्गिणी।

५७. राजतरङ्गणी इति एकम् ऐतिहासिककाव्यम्।

५८. राजतरङ्गिण्याम् अष्टौ तरङ्गाः सन्ति।

५९. कल्हणस्य पितुः नाम चणपकः इति पितृव्यस्य च नाम कणकः इति।

उत्तरस्तबकः-७

६०. भट्टिस्वामिनः पितुः नाम श्रीधरस्वामी।

६१. भट्टिस्वामी राज्ञः श्रीधरसेनस्य आश्रये आसीत्।

६२. भट्टिस्वामी सौराष्ट्रजनपदस्य अन्तर्गते वलभीनगरे अजायत।

६३. भट्टिस्वामी सप्तमशतके जनिं लब्धवान्।

६४. भट्टिकाव्यम् एकं शास्त्रकाव्यम्।

६५. भट्टिस्वामिनः कृतेः नाम भट्टिकाव्यम्।

६६. "दीपतुल्यः प्रबन्धोऽयम्" इति भट्टिकाव्यस्य विषये उक्तम्।

६७. भट्टिकाव्यं रामायणमाश्रित्य निर्मितम्।

६८. एकावलीनामकस्य अलङ्कारस्य प्रसिद्धमुदाहरणं हि - "न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्। न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्त जहार यन्मनः।।" इति।

॥ इति तृतीयः पाठः ॥

रघुवंशम्

भूमिका

भवन्तः सर्वे एव महाकवेः कालिदासस्य नाम श्रुतवन्तः। सः न केवलं भारतवर्षस्य अपि तु समग्रस्य विश्वस्य प्रसिद्धेषु कविषु अन्यतमः अस्ति। तेन सप्त काव्यरत्नानि लिखितानि इति अनेके स्वीकुर्वन्ति। रघुवंशं कुमारसम्भवम् इति द्वे महाकाव्ये, मेघदूतम् ऋतुसंहारम् इति द्वे खण्डकाव्ये, अभिज्ञानशाकुन्तलं विक्रमोर्वशीयं मालविकाग्निमित्रम् इति त्रीणि च नाटकानि। एतासु सर्वासु कृतिषु रघुवंशं प्रथमं स्थानम् आवहति। रघुवंशम् एकोनविंशतिसर्गात्मकम् एकं लालित्यपूर्णं महाकाव्यम् अस्ति। अत्र रघुवंशीयानां नृपाणां कथाः निबद्धाः सन्ति। भगवान् श्रीरामः एव महाकाव्यस्य नायकः वर्तते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं तस्य एव कथा वर्णिता अस्ति। महाकाव्यं च राज्ञः अग्निवर्णस्य राज्याभिषेकेण समापयति कविः। रघुवंशे ये राजानः वर्णिताः सन्ति तैः सह रामायणे वर्णितानां नृपाणां महान् भेदः अस्ति। किन्तु वायुपुराणे वर्णितैः नृपैः सह तेषां भूयशः समानता दृश्यते।

वयं तावत् रघुवंशस्य प्रथमं सर्गं पठामः। तस्मिन् सर्गे कविः रघुवंशीयस्य महाराजदिलीपस्य चरित्रवर्णनं करोति। ततः च स सन्तानाभावात् भार्यया सुदक्षिणया सह वसिष्ठाश्रमं प्रति गच्छति। कामधेनोः अवज्ञा एव सन्तानलाभस्य प्रतिबन्धिका इति कुलगुरोः वसिष्ठात् जानाति। ततः तौ कामधेनसुतायाः सुरभेः सेवायां तत्परौ भवतः इति प्रथमसर्गस्य सारः। अस्मिन् ग्रन्थे च वयं सुदक्षिणादिलीपयोः वसिष्ठाश्रमगमनम् इति यावत् एव पठामः।

348sk04

४

रघुवंशम् - रघुवंशीयनृपाणां गुणवर्णनम्

प्रस्तावना

अस्मिन् पाठे रघुवंशस्य आदितः दश श्लोकान् पठामः। अत्र काव्यस्य विषयवस्तुवर्णनं न आरभ्यते। अस्मिन् भागे प्रथमतः कविः महाकाव्यस्य मङ्गलाचरणं करोति। ततः ग्रन्थलेखने स्वस्य असामर्थ्यं प्रकटय्य विनयं प्रदर्शयति। असामर्थ्ये सति अपि रघुवंशलेखने स कथं प्रवृत्तः इति अपि स ज्ञापयति। ततः कालिदासः साधारणतया सर्वेषां रघुवंशीयानां नृपाणां वर्णनं करोति। अन्ते च रघुवंशकाव्यपठने कः अधिकारी इति कथयति।

उद्देश्यानि

अमुं पाठं पठित्वा भवान्-

- कालिदासस्य विनम्रतां जानीयात्।
- रघुवंशीयानां नृपाणां विषये ज्ञातुं पारयेत्।
- कालिदासस्य काव्यशैलीं ज्ञातुं शक्नुयात्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- उपमादीन् कांश्चन अलङ्कारान् बोद्धुं शक्नुयात्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।

४.१) मूलपाठः -

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।१।।
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।२।।
मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।३।।
अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः।

मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।।४।।

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।

आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।५।।

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।

यथापराधदण्डानां यथाकालप्रबोधिनाम्।।६।।

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।७।।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।८।।

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।

तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।।९।।

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।१०।।

४.२) इदानीं मूलपाठम् अवगच्छाम -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।१।।

अन्वयः - वागर्थाविव सम्पृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे।

अन्वयार्थः - वागर्थाविव शब्दार्थाविव सम्पृक्तौ सम्पर्कयुक्तौ जगतः विश्वस्य पितरौ मातापितरौ पार्वतीपरमेश्वरौ उमामहेश्वरौ वागर्थप्रतिपत्तये शब्दार्थपरिज्ञानाय वन्दे अभिवादये।

सरलार्थः - वागर्थौ इव नित्यं संयुक्तौ समग्रस्य लोकस्य मातापितरौ पार्वतीपरमेश्वरौ शब्दार्थराशेः सम्यक् परिज्ञानाय प्रणमामि।

तात्पर्यार्थः - अयं रघुवंशस्य मङ्गलश्लोकः वर्तते। प्रत्येकं कार्याणां निर्विघ्नेन समाप्तये कार्यारम्भात् प्राक् मङ्गलम् आचर्यते। तेन मङ्गलाचरणेन विघ्नानां नाशः भवति। अस्मिन् विषये समाप्तिकामो मङ्गलमाचरेत् इत्यादिश्रुतिः अपि वर्तते। एवमेव कस्यचित् काव्यस्य निर्विघ्नं परिसमाप्त्यर्थं तस्य काव्यस्य आदौ मङ्गलाचरणं कुर्वन्ति कविजनाः। अतः महाकविः कालिदासः अपि स्वस्य रघुवंशमहाकाव्यस्य मङ्गलम् अनेन श्लोकेन विदधाति। अस्मिन् श्लोके कविः पार्वतीपरमेश्वरयोः स्तुत्या काव्यस्य मङ्गलं सम्पादयति।

अत्र वन्द्यमानौ देवौ समस्तस्य लोकस्य मातापितरौ। अतः समग्रं विश्वमेव तयोः पुत्रसमानं भवति। यथा मातुः पितुः च प्रसादः सदा सन्तानेषु वर्तते तथा एव उमामहेश्वरयोः प्रसादः अपि पुत्रलक्षणे कवौ अस्ति इति वक्तुं शक्यते। अत्र पार्वतीपरमेश्वरौ वागर्थौ इव सम्पृक्तौ इति उपमानम् अपि प्रदत्तम्। सम्पृक्तौ इत्यस्य अर्थः भवति सम्पर्कयुक्तौ। अर्थात् शब्दार्थयोः सम्पर्कः यथा नित्यः अस्ति तथा उमामहेश्वरयोः दाम्पत्यबन्धः अपि नित्यः अस्ति। अत्र नित्यः शब्दार्थसम्बन्धः इति मीमांसकानां मतं प्रमाणं वर्तते। तादृशयोः सम्पर्कयुक्तयोः उमामहेश्वरयोः वन्दनायाः फलं वर्तते शब्दार्थयोः सुस्पष्टं ज्ञानम् इति। शब्दार्थौ उत्कृष्टौ चेत् काव्यमपि उत्कृष्टं भवति। काव्यस्य उत्कृष्टता एव कवेः साफल्यम्। अतः कविः पार्वतीपरमेश्वरयोः स्तुत्या रघुवंशकाव्यस्य साफल्यमेव प्रार्थयति। अतः कवेः प्रार्थना समुचिता अस्ति।

व्याकरणविमर्शः -

- वागर्थाविव - वाक् च अर्थः च वागर्थौ इति इतरेतरयोगद्वन्द्वसमासः। वागर्थौ इव इति वागर्थाविव।
- सम्पृक्तौ - (सम्+पृच्+क्त) सम्-इति उपसर्गपूर्वकात् पृच्-धातोः क्तप्रत्यये सम्पृक्त इति प्रातिपदिकं निष्पद्यते। तस्य प्रथमाद्विवचने सम्पृक्तौ इति रूपम्।
- वागर्थप्रतिपत्तये - वागर्थयोः प्रतिपत्तिः वागर्थप्रतिपत्तिः इति षष्ठीतत्पुरुषसमासः, तस्यै वागर्थप्रतिपत्तये। एतत् चतुर्थ्येकवचनस्य रूपम्।
- पितरौ - माता च पिता च पितरौ इति एकशेषः।
- पार्वतीपरमेश्वरौ - परमः च असौ ईश्वरः च इति परमेश्वर इति कर्मधारयसमासः। पार्वती च परमेश्वरः च पार्वतीपरमेश्वरौ इति इतरेतरयोगद्वन्द्वसमासः।
- **अव्ययपरिचयः** - अत्र इव इति अव्ययपदम् अस्ति। एतत् च सादृश्यवाचकम् अव्ययं वर्तते।
- **प्रयोगपरिवर्तनम्** - (मया) वागर्थौ इव सम्पृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्द्येते।

अलङ्कारालोचना - उपमा इति एकः अलङ्कारः वर्तते। उपमालङ्कारस्य प्रयोगे चत्वारः विषयाः आवश्यकाः- उपमेयः उपमानम् उपमावाचकशब्दः सदृशः धर्मः च। प्रस्तुते श्लोके उपमेयः भवति पार्वतीपरमेश्वरौ। उपमानं भवति वागर्थौ। अपि च उपमावाचकः शब्दः भवति इव इति। यथा वागर्थौ संयुक्तौ भवतः तथा पार्वतीपरमेश्वरौ अपि संयुक्तौ इति सादृश्यम्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -१

१. कविः किमर्थं पार्वतीपरमेश्वरौ वन्दते।

२. पार्वतीपरमेश्वरौ कौ इव सम्पृक्तौ।

३. पितरौ इत्यत्र विग्रहं समासनाम च लिखत।

४. प्रस्तुते श्लोके कः अलङ्कारः अस्ति।

५. एतेषु किं कालिदासेन न रचितम्-

१) कुमारसम्भवम् २) उत्तररामचरितम् ३) मालविकाग्निमित्रम् ४) ऋतुसंहारम्

६. अस्मिन् श्लोके कः अलङ्कारः अस्ति-

१) उत्प्रेक्षालङ्कारः २) रूपकालङ्कारः ३) उपमालङ्कारः ४) दृष्टान्तालङ्कारः

७. उपमालङ्कारे किं न आवश्यकम्

१) उपमेयम् २) उपमानम् ३) उपमेयविशेषणम् ३) सदृशधर्मः

८. रघुवंशे कति सर्गाः सन्ति-

१) १९ २) १८ ३) २० ४) १७

९. वागर्थौ इत्यत्र कः समासः

१) तत्पुरुषः २) अव्ययीभावः ३) बहुव्रीहिः ४) द्वन्द्वः

१०. रघुवंशस्य अन्तिमः राजा कः-

१) अग्निवर्णः २) अग्निवर्मा ३) अग्निशर्मा ४) अग्निवर्मणः

४.३) इदानीं मूलपाठम् अवगच्छाम -

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।२।।

अन्वयः - सूर्यप्रभवः वंशः क्व। अल्पविषया मतिश्च क्व। मोहाद् दुस्तरं सागरम् उडुपेन तितीर्षुः अस्मि।

अन्वयार्थः - सूर्यप्रभवः भास्करोत्पन्नः वंशः कुलं क्व कुत्र अल्पविषया अल्पज्ञानवती मतिश्च बुद्धिश्च क्व कुत्र मोहाद् लोभाद् दुस्तरं तरीतुम् अशक्यं सागरं समुद्रं तितीर्षुः तरीतुम् इच्छुः अस्मि भवामि।

सरलार्थः - महत् सूर्यकुलं कुत्र। अल्पज्ञानवती मम बुद्धिः कुत्र। अर्थात् क्षुद्रमतियुक्तेन मया सूर्यकुलस्य वर्णनं नैव शक्यते। तथापि तत् कर्तुम् उद्यतः अहं लघुनौकया भीषणं समुद्रं तरीतुमिच्छामि।

तात्पर्यार्थः - अस्मिन् श्लोके कविः रघुवंशकाव्यरचनायां स्वस्य असामर्थ्यं कथयित्वा विनयं प्रकटयति। लघुनौकया सुविशालस्य भयङ्करस्य समुद्रस्य तरणम् असम्भवं भवति। कविः वदति यत् तेन रघुवंशकाव्यरचना अपि तथैव दुष्करा अस्ति। मनुदिलीपरघुरामादयः महान्तः आसन्। अतः तेषां चरितस्य वर्णनं सामान्यमानवाः कर्तुं न शक्नुवन्ति। तेषां चरितवर्णनं कर्तुं प्राज्ञाः एव समर्थाः सन्ति। किन्तु कालिदासः आत्मानं प्राज्ञं न मन्यते। अतः स रघुवंशकाव्यनिर्माणे असमर्थः इति तस्य आशयः। लोके ये शिष्टा भवन्ति ते प्रथमतः कर्मणि तेषाम् असामर्थ्यमेव प्रकटयन्ति। ततश्च तत्तत्कर्म

सम्पादयन्ति। महाकविः कालिदासः अपि रघुवंशमहाकाव्यस्य रचनायाः प्राक् तथा एव आचरितवान्। अतः सः अपि शिष्टः अस्ति इति प्रकाशयति अयं श्लोकः।

व्याकरणविमर्शः -

- सूर्यप्रभवः - प्रभवति अस्मात् इति प्रभवः उत्पत्तिस्थानम्। सूर्यः प्रभवः यस्य सः सूर्यप्रभवः इति बहुव्रीहिसमासः।
- अल्पविषया - अल्पः विषयः यस्याः सा अल्पविषया इति बहुव्रीहिसमासः। एषः शब्दः मतिशब्दस्य विशेषणम्। अतः स्त्रीलिङ्गे वर्तते।
- तितीर्षुः - तरीतुम् इच्छुः इत्यर्थे तृधातोः सन्प्रत्यये उप्रत्यये च तितीर्षुः इति रूपम्।
- दुस्तरम् - दुःखेन तरीतुं शक्यमिति दुष्करम्।

सन्धिकार्यम् -

- सूर्यप्रभवो वंशः - सूर्यप्रभवः+वंशः
- चाल्पविषया - च+अल्पविषया
- तितीर्षुर्दुस्तरम् - तितीर्षुः+दुस्तरम्
- मोहादुडुपेनास्मि - मोहाद्+उडुपेन+अस्मि
- **अव्ययपरिचयः** - क्व इति एकम् अव्ययपदम्। कुत्र इति तस्य अर्थः।
- **प्रयोगपरिवर्तनम्** - सूर्यप्रभवेन वंशेन क्व (भूयते) अल्पविषया मत्या च क्व (भूयते)। (मया) मोहात् दुस्तरं सागरं उडुपेन तितीर्षुणा (भूयते)।

अलङ्कारालोचना - अत्र सूर्यवंशः दुस्तरसमुद्र इव स्वमतिः लघुनौका इव इति वारद्वयम् उपमालङ्कारस्य प्रयोगः कृतः। अतः अत्र सूर्यवंशः स्वमतिः च उपमेयवाचकं पदद्वयं भवति। दुस्तरसमुद्रः लघुनौका च उपमानवाचके द्वे पदे भवतः। लघुनौकया यथा दुस्तरसमुद्रस्य तरणम् असम्भवं तथा कवेः मत्या रघुवंशीयानां चरितवर्णनम् असम्भवम् इति सादृश्यम्। अतः अत्र उपमालङ्कारः वर्तते।

पाठगतप्रश्नाः -२

११. कविः स्वमतिं केन सह उपमाति। रघूणां चरितस्य उपमानं कविना किं प्रदत्तम्।

१२. मोहादुडुपेनास्मि इत्यत्र सन्धिविच्छेदं कुरुत।

१३. तितीर्षुः इत्यस्य कः अर्थः।

१४. प्रस्तुते श्लोके उपमालङ्कारं साधयत।

१५. प्रभवः नाम किम्-

१) विनाशस्थानम् २) प्राप्तिस्थानम् ३) उत्पत्तिस्थानम् ४) प्रथमस्थानम्

४.४) इदानीं मूलपाठम् अवगच्छाम -

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।

प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।३।।

अन्वयः - मन्दः कवियशःप्रार्थी (अहम्) प्रांशुलभ्ये फले लोभात् उद्बाहुः वामनः इव उपहास्यतां गमिष्यामि।

अन्वयार्थः - मन्दः मूढः कवियशःप्रार्थी कविकीर्त्यभिलाषी प्रांशुलभ्ये उन्नतेन प्राप्ये फले फलविषये लोभात् मोहात् उद्बाहुः उन्नतभुजः वामनः इव खर्व इव उपहास्यतां गमिष्यामि उपहास्यो भविष्यामि।

सरलार्थः - अहं मन्दः अपि महाकवियशः प्राप्तुमिच्छामि। अतः उन्नतजनेन लभ्यं फलं प्राप्तुं प्रवर्तमानः वामनः यथा उपहास्यः भवति तथा अहमपि उपहास्यः भविष्यामि।

तात्पर्यार्थः - महाकविः कालिदासः पूर्वस्मिन् श्लोके स्वस्य असामर्थ्यं प्रकटितवान्। किन्तु तेन तस्य तृप्तिः न जाता। अतः अस्मिन् श्लोके पुनः स्वीयम् असामर्थ्यं प्रकाश्य विनयं प्रकटयति। उपरि स्थितं यत् किमपि वस्तु उन्नतः जनः एव प्राप्तुं शक्नोति। कश्चन वामनः तत् फलं प्राप्तुम् इच्छति चेत् तेन स्वस्य बाहुद्वयम् उन्नतं कृत्वा तत् प्राप्तव्यं भवति। किन्तु एवं कुर्वाणः स सर्वैः उपहसितः भवति। कालिदासः अपि महाकविकीर्तिं प्राप्तुं काङ्क्षते। किन्तु सा कीर्तिः सामान्यमानवैः प्राप्तुं न शक्यते। विशिष्टैः प्राज्ञैः एव सा प्राप्यते। तथापि कालिदासः तां प्राप्तुं प्रयतते। किञ्च तस्य महाकवित्वेच्छा सामर्थ्यात् न उत्पन्ना अपि तु लोभात् उत्पन्ना इत्यपि स कथयति। अतः लोभात् प्रवर्तमानः स सर्वैः उपहसित एव भविष्यति इति तस्य आशयः। लोके ये महात्मानः भवन्ति ते स्वस्य असामर्थ्यस्य कथने न लज्जन्ते। महात्मनाम् इदं लक्षणं कालिदासे अपि अन्वेति। वस्तुतः अनेन श्लोकेन कालिदासस्य विनय एव प्रकटितः भवति।

व्याकरणविमर्शः -

- कवियशःप्रार्थी - कवेः यशः कवियशः इति षष्ठीतत्पुरुषसमासः। कवियशः प्रार्थयते इति अर्थे णिनिप्रत्यये कवियशःप्रार्थी इति रूपम्।
- प्रांशुलभ्ये - प्रांशुना लभ्यं प्रांशुलभ्यमिति तृतीयातत्पुरुषसमासः,तस्मिन् प्रांशुलभ्ये। एतत् रूपं सप्तम्येकवचने भवति।
- उद्बाहुः - उन्नतः बाहुः यस्य स उद्बाहुः इति बहुव्रीहिसमासः।
- उपहास्यताम् - उपहसितुं योग्य इत्यर्थे उपपूर्वकात् हस्धातोः ण्यत्प्रत्यये उपहास्य इति रूपम्। उपहास्यस्य भाव इत्यर्थे उपहास्यशब्दात् तल्प्रत्यये उपहास्यता, ताम् उपहास्यताम्। एतत् रूपं द्वितीयैकवचने भवति।

सन्धिकार्यम् -

- गमिष्याम्युपहास्यताम्- गमिष्यामि+उपहास्यताम्
- लोभादुद्बाहुरिव- लोभात्+उद्बाहुः+इव
- **प्रयोगपरिवर्तनम्** - मन्देन कवियशःप्रार्थिना (मया) प्रांशुलभ्ये फले लोभात् उद्बाहुना वामनेन इव उपहास्यता गमिष्यते।

अलङ्कारालोचना - अत्र कवियशः उन्नतजनेन लभ्यं फलमिव किञ्च कविः तत् फलं प्राप्तुम् इच्छुः वामनः इव इति कविः स्वयम् उपमाति। उभयत्र उपमावाचकः शब्दः इव इति अपि वर्तते। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -३

१६. कविः आत्मानं केन साकम् उपमाति।

१७. उपरि स्थितं फलं केन लब्धुं शक्यते।

१८. इव इति अव्ययपदस्य कः अर्थः।

१९. प्रांशुलभ्ये इत्यत्र विग्रहवाक्यं समासनाम च लिखत।

२०. उपरि स्थितं वस्तु कः प्राप्तुं न शक्नोति-

१) पीनः २) वामनः ३) उन्नतः ४) कृशः

४.५) इदानीं मूलपाठम् अवगच्छाम -

अथवा कृतवाग्द्वारे वंशेस्मिन् पूर्वसूरिभिः।

मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।।४।।

अन्वयः - अथवा पूर्वसूरिभिः कृतवाग्द्वारे अस्मिन् वंशे वज्रसमुत्कीर्णे मणौ सूत्रस्य इव मे गतिः अस्ति।

अन्वयार्थः - अथवा अन्यस्मिन् पक्षे पूर्वसूरिभिः प्राचीनकविभिः कृतवाग्द्वारे कृतकाव्यप्रवेशद्वारे अस्मिन् अत्र वंशे कुले वज्रसमुत्कीर्णे वज्रविद्धे मणौ रत्ने सूत्रस्य इव तन्तोः इव मे मम गतिः सञ्चारः अस्ति वर्तते।

सरलार्थः - वाल्मीक्यादिभिः प्राचीनाः कवयः काव्यमाध्यमेन अस्मिन् वंशे प्रविष्टवन्तः। अतः यथा वज्रविद्धे रत्ने सूत्रस्य गतिः प्रतिबन्धकविहीना भवति तथैव रघुवंशे मम प्रवेशः निर्बाधः अस्ति इति कवेः आशयः।

तात्पर्यार्थः - एतावता महाकविः कालिदासः रघुवंशकाव्यस्य लेखने स्वस्य असामर्थ्यं प्रकटितवान्। किन्तु असामर्थ्ये सत्त्वे अपि स काव्यलेखने कथं प्रवृत्तः- तत् अस्मिन् श्लोके वर्णयति। कविः वदति यत् रघुवंशकाव्यरचना तस्य कृते सरला एव वर्तते। यतः स एव रघुवंशस्य प्रथमः वर्णयिता इति नास्ति। पूर्वं वाल्मीक्यादयः महान्तः कवयः अपि रामायणादीन् ग्रन्थान् विरचितवान्। तत्र च ते रघुवंशीयानां जीवनं सम्यक् वर्णितवन्तः। तस्मात् कवेः कार्यं सुकरम् एव वर्तते। एतदर्थसमर्थनाय कविः दृष्टान्तमपि दर्शयति। वज्रेण मणिवेधकसूचीविशेषेण वा मणौ छिद्राणि क्रियन्ते। कृतैः तैः छिद्रैः रत्ने सूत्रस्य गतिः यथा सरला भवति तथा रघुवंशकाव्यरचनायां कवेः गतिः अपि बाधहीना वर्तते इति कवेः मतम्। यतो हि वाल्मीक्यादयः विद्वांसः स्वकाव्यद्वारा तत्र प्रवेशद्वारं निर्मीतवन्तः। एवं रघुवंशकाव्यनिर्माणे कविः स्वकीयां प्रतिभां निराकरोति। अपि च, व्यासवाल्मीक्यादिषु प्राचीनेषु कविषु तस्य कियती श्रद्धा आसीत् इत्यपि ज्ञापयति।

व्याकरणविमर्शः -

- पूर्वसूरिभिः - पूर्वं च ते सूरयः पूर्वसूरयः, तैः इति कर्मधारयसमासः।
- कृतवाग्द्वारे - कृतं वाक् एव द्वारं यस्य सः कृतवाग्द्वारः, तस्मिन् इति बहुव्रीहिसमासः।
- वज्रसमुत्कीर्णे - वज्रेण समुत्कीर्णः वज्रसमुत्कीर्णः इति तृतीयातत्पुरुषसमासः। वज्रं नाम मणिभेदकः सूचीविशेषः।

सन्धिकार्यम् -

- वंशेऽस्मिन् - वंशे+अस्मिन्
- सूत्रस्येवास्ति - सूत्रस्य+इव+अस्ति
- **अव्ययपरिचयः** - अथवा इति विकल्पार्थकम् एकम् अव्ययम्।
- **प्रयोगपरिवर्तनम्** - अथवा पूर्वसूरिभिः कृतवाग्द्वारे अस्मिन् वंशे वज्रसमुत्कीर्णे मणौ सूत्रस्य इव मे गत्या भूयते।

अलङ्कारालोचना - अस्मिन् श्लोके पूर्वकविभिः कृतवाग्द्वारः वंशः वज्रसमुत्कीर्णेन मणिना उपमितः। किञ्च, कवेः गतिः सूत्रस्य गतिः इव इत्यपि वर्णितम्। इव इति उपमानवाचकशब्दः अपि अत्र वर्तते। अतः अत्र उपमालङ्कारः वर्तते।

पाठगतप्रश्नाः -४

२१. वज्रबिद्धे रत्ने सूत्रस्य गतिः कथं भवति।

२२. वज्रं नाम किम्।

२३. सूत्रस्येवास्ति इति सन्धिविच्छेदं कुरुत।

२४. पूर्वसूरिणः के।

२५. अस्मिन् श्लोके कः उपमानवाचकः शब्दः

१) इव २) वंशः ३) मणिः ४) अन्यत् किमपि

४.६) इदानीं मूलपाठम् अवगच्छाम -

सोहमाजन्मशुद्धानामाफलोदयकर्मणाम्।

आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।५।।

अन्वयः - सः अहम् आजन्मशुद्धानाम् आफलोदयकर्मणाम् आसमुद्रक्षितीशानाम् आनाकरथवर्त्मनाम् (रघूणाम् अन्वयं वक्ष्ये)।

अन्वयार्थः - सः तादृशः अहं कालिदासः आजन्मशुद्धानां जन्मतः पवित्राणाम् आफलोदयकर्मणां फलप्राप्तिपर्यन्तं कर्म कुर्वाणानाम् आसमुद्रक्षितीशानां समुद्रपर्यन्तं पृथ्वीपालकानाम् आनाकरथवर्त्मनां स्वर्गपर्यन्तं रथमार्गः अस्ति येषां तेषां रघूणां रघुवंशोत्पन्नानां राज्ञाम् अन्वयं वंशं वक्ष्ये कथयिष्यामि।

सरलार्थः - जन्मतः पवित्राणां फललाभपर्यन्तं कर्म कुर्वाणानां सार्वभौमानां इन्द्रस्य सहचारिणां रघुवंशस्य नृपाणां वंशं महाकविः कालिदासः वर्णयति।

तात्पर्यार्थः - अस्मात् श्लोकात् चतुर्भिः श्लोकैः कविः रघुवंशीयानां नृपाणां चरितं वर्णयति। रघूणामन्वयं वक्ष्ये इति नवमश्लोकेन एतेषां श्लोकानाम् अन्वयः भवति। अत्र रघुवंशीयनृपाणां विशेषणचतुष्टयं प्रदत्तम्। तत्रादिमं विशेषणं भवति सोहमाजन्मशुद्धानाम् अर्थात् रघुवंशीयनृपाः जन्मतः एव शुद्धाः पवित्राः आसन्। द्वितीयम् आफलोदयकर्मणाम् अर्थात् ते फलप्राप्तिपर्यन्तं कर्म आचरन्ति स्म। कर्मसम्पादनकाले विघ्ने आगते अपि कर्म न त्यजन्ति स्म। अर्थात् ते निरन्तरं कर्म सम्पादयन्ति स्म इत्यर्थः। तृतीयं विशेषणं भवति आसमुद्रक्षितीशानाम् अर्थात् तेषां राज्यं समुद्रपर्यन्तम् आसीत्। तेषां राज्यस्य सीमा समुद्रः आसीत्। अतः पृथिव्याम् अन्यस्य कस्यापि राज्ञः राज्यं नासीत् इति ज्ञायते। समुद्रपर्यन्तं भूमीनां ते एव महीपतयः अभवन्। अन्तिमं विशेषणं प्रददाति आनाकरथवर्त्मनाम्। अस्यार्थः स्वर्गपर्यन्तं तेषां रथमार्ग आसीत्। अर्थात् स्वर्गं प्रत्यपि तेषां गमनागमनम् आसीत्। एवं ते इन्द्रस्य मित्राणि आसन् इति स्फुटं भवति। एतादृशानां महतां रघुवंशीयनृपाणां चरितं वर्णयितुं कालिदासः प्रवृत्त इति अस्य श्लोकस्य आशयः।

व्याकरणविमर्शः -

- आजन्मशुद्धानाम् - जन्मन आ इति आजन्म इति अव्ययीभावसमासः। आजन्म शुद्धाः आजन्मशुद्धाः इति सुप्सुपासमासः, तेषाम् आजन्मशुद्धानाम्। एतत् रूपं षष्ठीबहुवचने भवति।
- आफलोदयकर्मणाम् - फलोदयात् आ इति आफलोदयम् इति अव्ययीभावसमासः। आफलोदयं कर्म येषां ते आफलोदयकर्माणः इति बहुव्रीहिसमासः, तेषाम् आफलोदयकर्मणाम्। एतत् रूपं

षष्ठीबहुवचने भवति।

- आसमुद्रक्षितीशानाम् - समुद्रात् आ इति आसमुद्रम् इति अव्ययीभावसमासः। क्षितेः ईशाः क्षितीशाः इति तत्पुरुषसमासः। आसमुद्रं क्षितीशाः आसमुद्रक्षितीशाः इति सुप्सुपासमासः, तेषां आसमुद्रक्षितीशानाम्। एतत् रूपं षष्ठीबहुवचने भवति। क्षितिः नाम पृथिवी।
- आनाकरथवर्त्मनाम् - नाकात् आ आनाकम् इति अव्ययीभावसमासः। रथस्य वर्त्म रथवर्त्म इति षष्ठीतत्पुरुषसमासः। आनाकं रथवर्त्म येषां ते आनाकरथवर्त्मानः इति बहुव्रीहिसमासः, तेषाम् आनाकरथवर्त्मनाम्। एतत् रूपं षष्ठीबहुवचने भवति।

सन्धिकार्यम् -

- सोहमाजन्मशुद्धानामाफलोदयकर्मणाम्- - सः+अहम्+आजन्मशुद्धानाम्+आफलोदयकर्मणाम्
- आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् - आसमुद्रक्षितीशानाम्+आनाकरथवर्त्मनाम्
- **प्रयोगपरिवर्तनम्** - तेन मया आजन्मशुद्धानाम् आफलोदयकर्मणाम् आसमुद्रक्षितीशानाम् आनाकरथवर्त्मनाम् (रघूणाम् अन्वयः वक्ष्यते)।

पाठगतप्रश्नाः -५

२६. आनाकरथवर्त्मनाम् इत्यस्य अर्थं समासादिपुरःसरं परिष्कुरुत।

२७. रघुवंशीयनृपाणां राज्यस्य सीमा किम् आसीत्।

२८. सोहमाजन्मशुद्धानामाफलोदयकर्मणाम् इत्यत्र सन्धिविच्छेदं कुरुत।

२९. रघुवंशीयानां नृपाणां मार्गः कियत्पर्यन्तम् आसीत्-

१) स्वर्गपर्यन्तम् २) गगनपर्यन्तम् ३) पातालपर्यन्तम् ४) राज्यसीमपर्यन्तम्

३०. किं नाम क्षितिः-

१) जलम् २) पृथिवी ३) वायुः ४) आकाशः

४.७) इदानीं मूलपाठम् अवगच्छाम -

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।

यथापराधदण्डानां यथाकालप्रबोधिनाम्।।६।।

अन्वयः - (सः अहम्) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां यथापराधदण्डानां यथाकालप्रबोधिनाम् (रघूणाम् अन्वयं वक्ष्ये)।

अन्वयार्थः - सः अहम् कालिदासः यथाविधिहुताग्नीनां विधिपूर्वकं होमं कुर्वतां यथाकामार्चितार्थिनां यथाभिलाषं याचकानां सत्कारं कुर्वतां यथापराधदण्डानां अपराधानुसारेण दण्डं प्रदातृणाम् यथाकालप्रबोधिनां यथासमयं प्रबोधनशीलानां रघूणाम् अन्वयं वक्ष्ये।

सरलार्थः - अहं कालिदासः विधिपूर्वकं होमानुष्ठानं कुर्वतां अभिलाषानुसारेण याचकेभ्यः दानं कुर्वाणानाम् अपराधानुसारेण दण्डदायिनां यथासमयं प्रबुद्धानां रघुवंशीयनृपाणां वंशं वर्णयिष्यामि।

तात्पर्यार्थः - अस्मिन् श्लोके कालिदासः रघुवंशीयनृपाणां गुणविशेषवर्णनं करोति। रघुवंशीया नृपाः सर्वाणि कार्याणि यथार्थं सम्पादयन्ति स्म। एतत्प्रदर्शनाय तेषां विशेषणचतुष्टयम् अत्र उल्लिखितं वर्तते। यथाविधिहुताग्नीनाम् अर्थात् वेदादिशास्त्रेषु अग्निहोमादीनां विधानं यथा कृतम् अस्ति तथैव ते पालयन्ति स्म। अग्निः द्विविधः भवति- श्रौताग्निः स्मार्ताग्निः च। श्रौताग्नेः त्रयः भेदाः सन्ति- दक्षिणाग्निः आहवनीयाग्निः गार्हपत्याग्निः च। स्मार्ताग्नेः अपि द्वौ भेदौ- शम्याग्निः आवसथ्याग्निः च। ते राजानः एतेषां सर्वेषाम् अग्नीनामेव हवनं यथाविधि कुर्वन्ति स्म। शास्त्रानुसारेण यज्ञाचरणं करोति स्म अतः फलितार्थः अपि सम्यगासीदिति ज्ञायते। यथाकामार्चितार्थिनाम् अर्थात् याचकाः यद् यद् इच्छन्ति स्म तत् सर्वम् एव ते याचकेभ्यः प्रददति स्म। अभिलाषानुसारेण याचकेभ्यः इष्टानि वस्तूनि प्रदाय तान् याचकान् सन्तुष्टान् करोति स्म। एतेन तेषां दानातिशयः वर्ण्यते। यथापराधदण्डानाम् इत्यस्य अर्थः भवति यत् अपराधः कृतः चेत् तदपराधानुसारेण अपराधकारिभ्यः ते दण्डान् यच्छन्ति स्म। तेषां शासनकाले अपराधं कृत्वा कोपि निर्दण्डः न तिष्ठति स्म। तेन अधिकदण्ड्यानां न्यूनदण्डः न्यूनदण्ड्यानाम् अधिकदण्डः इति वैषम्यभावः नासीत्। यथाकालप्रबोधिनाम् अर्थात् ते यस्मिन समये यत् कार्यं कर्तव्यं तस्मिन् तस्मिन् समुचिते काले तत् तत् कार्यं कर्तुं प्रबुद्धाः भवन्ति स्म। यथा युद्धं कर्तव्यं चेत् तत्क्षणे एव ते युद्धाय प्रस्तुतिं कुर्वन्ति स्म। कुत्रापि गमनीयं चेत् तत्क्षणे एव ते गमनाय प्रस्तुताः भवन्ति स्म। एवमेव तेषां कार्यस्य कालिकप्रज्ञा स्फुटा अवर्तत इत्यर्थः। तादृशानां रघुवंशीयानां राज्ञां वर्णनं कविः कर्तुं प्रयतते।

व्याकरणविमर्शः -

- यथाविधिहुताग्नीनाम् - हुता अग्नयो यैः ते हुताग्नयः इति बहुव्रीहिसमासः। यथाविधि हुताग्नयः यथाविधिहुताग्नयः इति सुप्सुपासमासः, तेषां यथाविधिहुताग्नीनाम्। एतत् रूपं षष्ठीबहुवचने भवति।
- यथाकामार्चितार्थिनाम् - कामम् अनतिक्रम्य यथाकामम् इति अव्ययीभावसमासः। अर्चिताः अर्थिनः यैस्ते अर्चितार्थिनः इति बहुव्रीहिः। यथाकामम् अर्चितार्थिनः यथाकामार्चितार्थिनः इति सुप्सुपासमासः, तेषां यथाकामार्चितार्थिनाम्। षष्ठीबहुवचने एतत् रूपं भवति।
- यथापराधदण्डानाम् - अपराधम् अनतिक्रम्य यथापराधम् इति अव्ययीभावसमासः। यथापराधं दण्डः येषां ते यथापराधदण्डाः इति बहुव्रीहिसमासः,तेषां यथापराधदण्डानाम्। षष्ठीबहुवचनान्तम् एतत् रूपम्।
- यथाकालप्रबोधिनाम् - कालम् अनतिक्रम्य यथाकालम् इति अव्ययीभावसमासः। यथाकालं प्रबोधिनः यथाकालप्रबोधिनः इति सुप्सुपासमासः, तेषां यथाकालप्रबोधिनाम्। षष्ठीबहुवचने भवति एतत् रूपम्।
- **प्रयोगपरिवर्तनम्** - (तेन मया) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां यथापराधदण्डानां यथाकालप्रबोधिनाम् (रघूणाम् अन्वयः वक्ष्यते)।

पाठगतप्रश्नाः -६

३१. अग्नेः भेदान् उपभेदान् च लिखत।

३२. यथापराधदण्डानाम् इत्यस्य समासपुरःसरम् अर्थं लिखत।

३३. श्लोके उक्तानि चत्वारि विशेषणानि कं विशिंषन्ति।

३४. अग्नेः कति भेदाः

१) ५ २) ४ ३) ३ ४) २

३५. एतेषु कः न श्रौताग्निः-

१) दक्षिणाग्निः २) आवसथ्याग्निः ३) गार्हपत्याग्निः ४) आहवनीयग्निः

३६. अस्मिन् श्लोके रघुवंशीयनृपाणां कति विशेषणानि प्रदत्तानि-

१) त्रीणि २) चत्वारि ३) पञ्च ४) षट्

४.८) इदानीं मूलपाठम् अवगच्छाम -

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।७।।

अन्वयः - (सः अहम्) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणां यशसे विजिगीषूणां प्रजायै गृहमेधिनां (रघूणामन्वयं वक्ष्ये)।

अन्वयार्थः - सः अहं कविः त्यागाय दानाय सम्भृतार्थानां धनस्य संग्राहकाणां सत्याय सत्यरक्षायै मितभाषिणाम् अल्पभाषणशीलानां यशसे कीर्तये विजिगीषूणां विजयम् इच्छतां प्रजायै सन्तानाय गृहमेधिनां गृहस्थाश्रमं प्रविशतां रघूणाम् अन्वयं वक्ष्ये।

सरलार्थः - रघुवंशोत्पन्नाः राजानः दानाय धनानि संगृह्णन्ति स्म, सत्याय स्वल्पं भाषन्ते स्म, कीर्तये दिग्विजयं कुर्वन्ति स्म किञ्च सन्तानलाभाय विवाहम् अकुर्वन्।

तात्पर्यार्थः - अस्मिन् श्लोके उच्यते यत् ते नृपाः दानाद्यर्थं धनार्जनं कृतवन्तः। सामान्यतः लोके जनाः स्वभोगाय धनार्जनं कुर्वन्ति। परन्तु ते कदापि स्वार्थसिद्धये धनसंग्रहं न कृतवन्तः। एवं ते सम्पदः सम्यक् उपयोगम् अकुर्वन्। तेन च तेषाम् अभ्युदयः एव जातः। अपि च ते सत्याय स्वल्पं भाषन्ते स्म। वस्तुतः वृथा बहुभाषणं न शोभते। सत्यकथनाय यावती भाषा अपेक्षिता तावती भाषा एव प्रशस्या अस्ति। ये बहु भाषन्ते तेषां वाचि मिथ्या तिष्ठति एव। अतः रघुवंशीया नृपाः स्वल्पं भाषितवन्तः। ते दिग्विजयं कृतवन्तः कीर्तिलाभाय। सामान्यराजानः धनादिभोगार्थम् एव राज्यजयं कुर्वन्ति। परन्तु ते केवलं कीर्तिं लब्धुम् एव राज्यानि जितवन्तः। अपि च ते सन्तानलाभाय गृहस्थाश्रमं प्रविष्टवन्तः।

अज्ञानिनः भार्यादिभोगाय विवाहं कुर्वन्ति। किन्तु रघुवंशीयराज्ञां सन्तानप्राप्तिः एव विवाहस्य कारणम् आसीत्। एतादृशानां नृपाणां चरितं कविः वर्णयितुं प्रवृत्तः इति श्लोकस्य अर्थः।

व्याकरणविमर्शः -

- सम्भृतार्थानाम् - सम्भृतः सञ्चितः अर्थः यैः ते सम्भृतार्थाः इति बहुव्रीहिसमासः, तेषां सम्भृतार्थानाम्। षष्ठीबहुवचने एतत् रूपम् अस्ति।
- मितभाषिणाम् - मितं स्वल्पं भाषणं शीलं येषां ते मितभाषिणः, तेषां मितभाषिणाम्। षष्ठीबहुवचने एतत् रूपम् अस्ति।
- विजिगीषूणाम् - विजेतुम् इच्छवः विजिगीषवः, तेषां विजिगीषूणाम्। अत्र जिधातोः सन्प्रत्ययः उप्रत्ययः च विहितः।
- गृहमेधिनाम् - गृहैः दारैः मेधन्ते संगमं कुर्वन्ति इति गृहमेधिनः, तेषां गृहमेधिनाम्। एतत् रूपं षष्ठीबहुवचनान्तम्।
- **प्रयोगपरिवर्तनम्** - (तेन मया) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणां यशसे विजिगीषूणां प्रजायै गृहमेधिनां (रघूणाम् अन्वयः वक्ष्यते)।

पाठगतप्रश्नाः -७

३७. रघुवंशीयाः नृपाः कथं मितभाषिणः।

३८. मितभाषिणः इत्यस्य किं विग्रहवाक्यम्।

३९. प्रजायै गृहमेधिनाम् इति कथनेन कविः किं प्रकटयितुम् इच्छति।

४०. विजिगीषूणाम् इत्यत्र कः प्रत्ययः-

१) सन्प्रत्ययः २) यङ्प्रत्ययः ३) सुप्रत्ययः ४) यक्प्रत्ययः

४१. रघुवंशीयाः नृपाः कथं विवाहं कृतवन्तः -

१) कामभोगाय २) संसारपालनाय ३) सन्तानप्राप्तये ४) पित्रादेशपालनाय

४.९) इदानीं मूलपाठम् अवगच्छाम -

शैशवेभ्यस्तविद्यानां यौवनै विषयैषिणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।८।।

अन्वयः - (सः अहम्) शैशवे अभ्यस्तविद्यानां यौवने विषयैषिणां वार्धके मुनिवृत्तीनाम् अन्ते योगेन तनुत्यजाम् (रघूणाम् अन्वयं वक्ष्ये)।

अन्वयार्थः - सः अहं कालिदासः शैशवे बाल्ये अभ्यस्तविद्यानाम् अधीतशास्त्राणां यौवने तारूण्ये विषयैषिणां भोगस्य इच्छुकानां वार्धके वृद्धत्वे मुनिवृत्तीनां वानप्रस्थाश्रमिणां तथा च अन्ते शरीरत्यागसमये योगेन परमात्मनः ध्यानेन तनुत्यजाम् शरीरत्यागिनां रघूणाम् अन्वयं वक्ष्ये।

सरलार्थः - रघुवंशीया नृपाः बाल्यकाले विद्याभासं कृतवन्तः। यौवनकाले विषयसुखम् अनुभूतवन्तः। वार्धककाले मुनिजीवनमार्गं स्वीकृतवन्तः। जीवनस्य अन्ते योगमार्गेण देहत्यागं कृतवन्तः।

तात्पर्यार्थः - अस्मिन् श्लोके कविः रघुवंशीयानां नृपाणां पुरुषार्थमयं सम्पूर्णं जीवनं वर्णयति। ते नृपाः स्वजीवने चतुरः आश्रमान् एव साधु पालितवन्तः इति अनेन श्लोकेन ज्ञायते। शैशवे ते सम्यग् विद्याभासं कृतवन्तः। विद्यार्जनम् एव ब्रह्मचर्याश्रमस्य मूलम्। अतः ब्रह्मचर्याश्रमः तैः साधु परिपालितः इति अवगम्यते। ततः परं तेषां यौवनकालः आगतः। तस्मिन् समये गृहस्थाश्रमं प्रविश्य ते विषयसुखम् अपि अनुभूतवन्तः। धर्मः अर्थः कामः इति त्रयं त्रिवर्गः इति उच्यते। एताभ्यां द्वाभ्याम् आश्रमाभ्याम् एव ते नृपाः एतं त्रिवर्गं साधितवान्। तदनन्तरं वार्धके मुनयः यथा जीवनम् अतिवहन्ति तथा ते नृपाः अपि जीवनम् अतिवहन्ति स्म। एतेन वानप्रस्थाश्रमं सन्न्यासाश्रमं च ते सम्यक् पालितवन्तः इति ज्ञायते। जीवनान्ते ते योगमार्गेण देहत्यागं कुर्वन्ति स्म अर्थात् ते मोक्षं प्राप्तवन्तः इत्यर्थः। मृत्युना शरीरत्यागः भवति चेत् पुनः जन्म भवति। किन्तु योगेन देहत्यागः भवति चेत् मोक्ष एव भवति। एवं तेषां सर्वे एव आश्रमाः सार्थकाः आसन्। अपि च तैः जीवने पुरुषार्थाः अपि प्राप्ताः आसन्। अनेन श्लोकेन कविः सनातनधर्मस्य सारं लीलया दर्शयति।

व्याकरणविमर्शः -

- अभ्यस्तविद्यानाम् - अभ्यस्ता विद्या यैः ते अभ्यस्तविद्याः इति बहुव्रीहिसमासः, तेषाम् अभ्यस्तविद्यानाम्। षष्ठ्या बहुवचने एतत् रूपम्।
- विषयैषिणाम् - विषयान् इच्छन्ति इति विषयैषिणः, तेषां विषयैषिणाम्। षष्ठीबहुवचनान्तं रूपमेतत्।
- मुनिवृत्तीनाम् - मुनीनां वृत्तिः व्यापारः येषां ते मुनिवृत्तयः इति बहुव्रीहिसमासः, तेषां मुनिवृत्तीनाम्। मुनिवृत्तिशब्दस्य षष्ठीबहुवचने इदं रूपं भवति।
- तनुत्यजाम् - तनुं त्यजन्ति इति तनुत्यजः इति उपपदसमासः, तेषां तनुत्यजाम्। तनुत्यज्-शब्दस्य षष्ठीबहुवचने इदं रूपम्। तनुं त्यक्तवताम् इत्यर्थः।

सन्धिकार्यम् -

- शैशवेभ्यस्तविद्यानाम् - शैशवे+अभ्यस्तविद्यानाम्
- योगेनान्ते - योगेन+अन्ते
- **प्रयोगपरिवर्तनम्** - (तेन मया) शैशवे अभ्यस्तविद्यानां यौवने विषयैषिणां वार्धके मुनिवृत्तीनाम् अन्ते योगेन तनुत्यजाम् (रघूणाम् अन्वयः वक्ष्यते)।

पाठगतप्रश्नाः -८

४२. सूर्यवंशीयाः कथं देहं त्यजन्ति स्म।

४३. रघुवंशीयाः शैशवे किं कुर्वन्ति स्म।

४४. तनुत्यजाम् इत्यत्र विग्रहवाक्यं समासनाम च लिखत।

४५. कति आश्रमाः-

१) ३ २) ४ ३) ५ ४) ६

४६. अभ्यस्तविद्यानाम् इत्यत्र कः समासः-

१) बहुव्रीहिसमासः २) तत्पुरुषसमासः ३) द्वन्द्वसमासः

४) अव्ययीभावसमासः

४.१०) इदानीं मूलपाठम् अवगच्छाम -

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन्।

तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।।९।।

अन्वयः - (सः अहम्) तनुवाग्विभवः सन् अपि तद्गुणैः कर्णम् आगत्य चापलाय प्रचोदितः सन् (रघूणाम् अन्वयं वक्ष्ये)।

अन्वयार्थः - सः अहं कालिदासः तनुवाग्विभवः अल्पवाक्सम्पत्तिवान् सन् अपि भवन् अपि तद्गुणैः रघुवंशीयानां गुणैः कर्णम् श्रोत्रम् आगत्य प्राप्य चापलाय चाञ्चल्याय प्रचोदितः प्रेरितः सन् रघूणाम् अन्वयं वक्ष्ये।

सरलार्थः - अहं कालिदासः अल्पज्ञानी अस्मि। तथापि रघुवंशीयानां नृपाणां महद्भिः गुणैः प्रेरितः सन् रघुवंशकाव्यं रचितुं प्रवर्तितः अस्मि।

तात्पर्यार्थः - रघुवंशीयानां वर्णनं पूर्वं वाल्मीक्यादिभिः कविभिः कृतम्। अतः स रघुवंशे लब्धप्रवेशः वर्तते इति कालिदासः पूर्वम् एव वर्णितवान्। किञ्च इतः पूर्वं चतुर्भिः श्लोकैः स तेषां आजन्मशुद्ध्यादीनां गुणानां वर्णनमपि कृतवान्। तथापि अस्मिन् श्लोके सः पुनः स्वस्य असामर्थ्यं कथयति। स वदति यत् रघुवंशीयानां जीवनवर्णनाय यावत् ज्ञानम् अपेक्षितम् अस्ति तावत् ज्ञानं तस्य नास्ति। अर्थात् सः असमर्थः अस्ति इत्येव तस्य अभिप्रायः। तथापि तेषां नृपाणां गुणाः यदा कविः श्रुतवान् तदा तैः गुणैः स प्रचोदितः सञ्जातः। अर्थात् तेषां चरितवर्णनाय तस्य मनसि महती इच्छा समुत्पन्ना। अत एव स रघुवंशकाव्यं कर्तुं प्रवर्तते इति श्लोकस्य अस्य तात्पर्यम्।

व्याकरणविमर्शः -

- तनुवाग्विभवः - वाचां विभवः वाग्विभवः इति तत्पुरुषसमासः। तनुः वाग्विभवः यस्य सः तनुवाग्विभवः इति बहुव्रीहिसमासः।
- तद्गुणैः - तेषां गुणाः तद्गुणाः इति षष्ठीतत्पुरुषसमासः,तैः तद्गुणैः। तृतीयायाः बहुवचने एतत् रूपं भवति।
- चापलाय - चपलस्य भावः चापलं, तस्मै चापलाय। चतुर्थ्येकवचनान्तं रूपम्।
- वक्ष्ये - ब्रूधातोः लृटि उत्तमपुरुषैकवचने वक्ष्ये इति रूपम्।
- आगत्य- आपूर्वकात् गम्धातोः ल्यप्प्रत्यये आगत्य इति रूपं भवति। अस्य अव्ययपदवत् प्रयोगः भवति।

सन्धिकार्यम् -

- रघूणामन्वयम् - रघूणाम्+अन्वयम्
- तनुवाग्विभवोऽपि - तनुवाग्विभवः+अपि
- कर्णमागत्य - कर्णम्+आगत्य
- **प्रयोगपरिवर्तनम्** - (तेन मया) तनुवाग्विभवेन सता अपि तद्गुणैः कर्णम् आगत्य चापलाय प्रचोदितेन (रघूणाम् अन्वयः वक्ष्यते)।

विशेषालोचना - श्लोकानां कश्चन विभागः वर्तते। यदि एकेन एव श्लोकेन वाक्यस्य समाप्तिः भवति तर्हि तत् मुक्तकम् इति उच्यते। यदि द्वयोः श्लोकयोः मध्ये परस्परं सम्बन्धः वर्तते तर्हि तत् युग्मकम् इति कथ्यते। यदि त्रयाणां श्लोकानां मध्ये सम्बन्धः अस्ति तर्हि तत् सान्दानतिकम् इत्युच्यते। यदि चतुर्णां श्लोकानां मध्ये सम्बन्धः अस्ति तर्हि तत् विशेषकम् इत्युच्यते। ततः अधिकानां श्लोकानां मध्ये सम्बन्धः अस्ति चेत् तत् कुलकम् इत्युच्यते। अत्रापि सोहमाजन्म इत्यादिश्लोकात् रघूणामन्वयं वक्ष्ये इति श्लोकपर्यन्तं पञ्चानां श्लोकानां मध्ये सम्बन्धः अस्ति। अतः अत्र कुलकं वर्तते इति वक्तुं शक्यते।

पाठगतप्रश्नाः -९

४७. कविः कथं रघुवंशकाव्यलेखने प्रवृत्तः।

४८. तनुवाग्विभवः इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

४९. अत्र कुलकलक्षणं कथम् अन्वेति - दर्शयत।

५०. चत्वारः श्लोकाः परस्परं सम्बद्धाः चेत् किम् उच्यते

१) कुलकम् २) सान्दानातिकम् ३) मुक्तकम् ४) विशेषकम्

५१. वक्ष्ये इत्यत्र कः धातुः-

१) वद् २) वच् ३) ब्रू ४) व्रज्

४.११) इदानीं मूलपाठम् अवगच्छाम -

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।१०।।

अन्वयः - तं सदसद्व्यक्तिहेतवः सन्तः श्रोतुम् अर्हन्ति, हि हेम्नः विशुद्धः श्यामिका अपि वा अग्नौ संलक्ष्यते।

अन्वयार्थः - तं रघुवंशनामकं प्रबन्धं सदसद्व्यक्तिहेतवः गुणदोषविभागकर्तारः सन्तः विद्वांसः श्रोतुम् आकर्णयितुम् अर्हन्ति योग्या भवन्ति हि यतो हि हेम्नः सुवर्णस्य विशुद्धिः निर्दोषरूपं श्यामिकापि वा लोहान्तरसंसर्गात्मकः दोषः अपि वा अग्नौ वह्नौ संलक्ष्यते संदृश्यते।।

सरलार्थः - रघुवंशप्रबन्धं प्राज्ञाः एव श्रोतुम् अर्हन्ति। यतो हि ते एव काव्यस्य गुणं दोषं च सम्यक् अवगच्छन्ति। सुवर्णस्य विशुद्धिः दोषः वा अग्नौ एव सम्यक् परिलक्ष्यते।

तात्पर्यार्थः - अस्मिन् श्लोके कालिदासः रघुवंशकाव्यस्य अधिकारिविषये आलोचयति। सर्वे रघुवंशकाव्यं पठितुं नार्हन्ति। प्राज्ञाः अर्थात् सम्यक् गुणदोषविवेचकाः एव अस्य अधिकारिणः भवन्ति। ये गुणदोषयोः विवेचनां कर्तुं न जानन्ति ते दोषस्थाने गुणग्रहणं किञ्च गुणस्थाने दोषग्रहणं च कुर्वन्ति। तेन ते काव्यस्य यथायुक्तम् अर्थं प्राप्तुं न शक्नुवन्ति। किन्तु प्राज्ञाः गुणान् दोषान् च सम्यक् अवगम्य यथार्थं गृह्णन्ति। अत्र कविः एकं दृष्टान्तम् अपि प्रयच्छति। सुवर्णस्य विशुद्धिः दोषः वा सामान्यतया न अवगम्यते। किन्तु यदि तत् सुवर्णम् अग्नौ स्थाप्यते तदा तस्य गुणः दोषः वा परिलक्ष्यते। यथा अग्निः निष्पक्षपातेन सुवर्णस्य गुणं दोषं च प्रकाशयति तथा प्राज्ञाः अपि काव्यस्य गुणान् दोषान् च द्योतयन्ति। अस्मिन् श्लोके कविः स्वकाव्यस्य गुणदोषपरीक्षां प्राज्ञाः कर्तुं शक्नुवन्ति इति वदति। तेन स प्राज्ञैः उक्तस्य दोषस्य ग्रहणमपि करिष्यति इति ज्ञायते। एतेन कालिदासस्य एकः महागुणः सूचितः भवति।

व्याकरणविमर्शः -

- सदसद्व्यक्तिहेतवः - सच्च असच्च सदसती इति इतरेतरद्वन्द्वसमासः। सदसतोः व्यक्तिः सदसद्व्यक्तिः इति षष्ठीतत्पुरुषसमासः। सदसद्व्यक्तेः हेतवः सदसद्व्यक्तिहेतवः इति षष्ठीसमासः।
- श्रोतुम् - श्रुधातोः तुमुन्प्रत्यते श्रोतुम् इति रूपम्।
- अर्हन्ति - अर्ह्-धातोः लटि प्रथमपुरुषबहुवचने अर्हन्ति इति रूपम्।
- विशुद्धिः - विपूर्वकात् शुध्-धातोः क्तिन्प्रत्यये विशुद्धिशब्दः निष्पद्यते।
- संलक्ष्यते - सम्-पूर्वकात् लक्ष्-धातोः कर्मणि लटि प्रथमपुरुषैकवचने संलक्ष्यते इति रूपम्।

सन्धिकार्यम् -

- श्रोतुमर्हन्ति - श्रोतुम्+अर्हन्ति
- ह्यग्नौ - हि+अग्नौ
- श्यामिकापि - श्यामिका+अपि
- **अव्ययपरिचयः** - अस्मिन् श्लोके हि अपि वा इति त्रीणि अव्ययपदानि।
- **प्रयोगपरिवर्तनम्** - सदसद्व्यक्तिहेतुभिः सद्भिः स श्रोतुम् अर्ह्यते। हि हेम्नः विशुद्धिं श्यामिकाम् अपि वा अग्नौ संलक्षयन्ति।

अलंकारालोचना - यथा अग्निः सुवर्णस्य गुणं दोषं च सम्यक् प्रकाशयति तथैव प्राज्ञाः अपि काव्यस्य गुणं दोषं च प्रकाशयति। अत्र प्राज्ञाः अग्निना उपमिताः। उपमानवाचकशब्दः यथा। अतः अत्र उपमालंकारः अस्ति।

पाठगतप्रश्नाः -१०

५२. रघुवंशकाव्यपठने कः अधिकारी।

५३. अत्र प्राज्ञाः केन उपमिताः।

५४. सदसद्व्यक्तिहेतवः इत्यत्र समासनाम विग्रहवाक्यं च लिखत।

५५. श्लोके अग्निपदं किंवाचकम्-

१) उपमावाचकम् २) उपमानवाचकम् ३) उपमेयवाचकम् ४) सदृशधर्मवाचकम्

पाठसारः

कार्यस्य निर्विघ्नं परिसमाप्तये मङ्गलम् आचरन्ति शिष्टाः। अतः महाकविः कालिदासः अपि काव्यस्य आदौ मङ्गलाचरणं करोति। अत्र सः शब्दार्थयोः स्पष्टज्ञानाय वागर्थौ इव सम्पृक्तौ जगतः पितरौ पार्वतीं परमेश्वरं च वन्दते। मङ्गलं विधाय स रघुवंशकाव्यरचनायां स्वीयम् असामर्थ्यं प्रकटयति। स मन्दमतिः अस्ति। अतः यथा लघुनौकया दुस्तरसमुद्रतरणम् असम्भवं तथा मन्दमतिना तेन अपि रघुवंशकाव्यरचना दुष्करा भवति। यथा वामनः उपरि स्थितं फलं प्राप्तुं न शक्नोति तथा कविना अपि रघुवंशकाव्यं रचयितुं न शक्यते। किन्तु व्यासवाल्मीक्यादयः पूर्वं रघुवंशीयानां चरितं वर्णितवन्तः। तस्मात् कार्यं सुकरं सञ्जातम् इति कविः स्वीकृतवान्। ततः च रघुवंशीयानां नृपाणां सामान्यतया वर्णनं कृतवान् कालिदासः। जन्मनः शुद्धाः ते फलप्राप्तिपर्यन्तं निरन्तरं कर्म सम्पादयन्ति स्म। तेषां राज्यस्य सीमा समुद्रः आसीत्। अपि च स्वर्गं प्रति तेषां गमनागमनम् आसीत्। ते शास्त्रानुसारं धर्माचरणम् अकुर्वन्। याचकेभ्यः अभीष्टं वस्तु यथायथम् अयच्छन्। तेषां शासनकाले ये अपराधं कृतवन्तः ते दण्डं प्राप्तवन्तः। यदा प्रयोजनं तदा ते कार्याय प्रबुद्धाः अपि भवन्ति स्म। ते त्यागाय धनसंग्रहं सत्यरक्षणाय

मितभाषणं कीर्तये राज्यजयं सन्तानाय च परिणयं कृतवन्तः। शैशवे तैः विद्याभ्यासः कृतः। यदा ते यौवनं सम्प्राप्ताः तदा विषयसुखम् अनुभूतवन्तः। वार्धके ते मुनिवत् जीवनं यापितवन्तः। जीवनान्ते च योगमार्गेण देहं त्यक्तवन्तः अर्थात् मोक्षं प्राप्तवन्तः। अनेन तेषां जीवनं पुरुषार्थचतुष्टयसम्वलितम् आसीत् इति स्पष्टं ज्ञायते। एवंविधानाम् एतेषां महारितानां वर्णनं कर्तुम् असमर्थः सन् अपि कविः तेषां गुणैः प्रेरितः सन् रघुवंशकाव्यं रचयति इति कविः स्वविनम्रताम् अपि प्रकटितवान्। एतत् रघुवंशकाव्यं प्राज्ञाः एव पठितुं शक्नुवन्ति। यतो हि ते एव काव्यस्य दोषं गुणं च सम्यक् गृह्णन्ति। यथा सुवर्णस्य गुणः दोषः वा अग्नौ सम्यक् परिलक्षितः भवति।

पाठान्तप्रश्नाः -

१. रघुवंशस्य मङ्गलश्लोकं व्याख्यात।

२. कालिदासः स्वस्य असामर्थ्यं कथं प्रकटितवान्।

३. रघुवंशीयनृपाणां पुरुषार्थचतुष्टयपूर्णं जीवनं वर्णयत।

४. उपमालङ्कारविषये लघुटिप्पणीं रचयत।

५. श्लोकाः कतिविधाः भवन्ति। तेषां भेदान् वर्णयत।

६. रघुवंशीयानां कानिचन चत्वारि विशेषणानि वर्णयत।

७. रघुवंशीयाः जीवने चतुर्वर्गं कथं साधितवन्तः - विचारयत।

८. तं सन्तः इत्यादिश्लोके उपमालङ्कारस्य समन्वयं दर्शयत।

९. स्तम्भयोः लिखितान् परस्परसम्बद्धान् मेलयत।

स्तम्भः-क	**स्तम्भः-ख**
१. पार्वतीपरमेश्वरौ	१. कालिदासः
२. रघुवंशम्	२. शैशवे
३. उडुपम्	३. वागर्थौ
४. आनाकरथवर्त्मनः	४. वार्धके
५. वज्रम्	५. सन्तः
६. विद्याभ्यासः	६. लघुनौका
७. मुनिवृत्तिः	७. सूचीविशेषः
८. अधिकारी	८. रघुवंशीयाः नृपाः

उत्तरम् - १-३, २-१, ३-६, ४-८, ५-७, ६-२, ७-४, ८-५

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. कविः वागर्थप्रतिप्रत्तये पार्वतीपरमेश्वरौ वन्दते।

२. पार्वतीपरमेश्वरौ वागर्थौ इव सम्पृक्तौ।

३. माता च पिता च पितरौ इति एकशेषः।

४. प्रस्तुते श्लोके उपमालङ्कारः अस्ति।

५. २

६. ३

७. ३

८. १

९. ४

१०. १

उत्तराणि-२

११. कविः स्वमतिं लघुनौकया उपमाति। रघूणां चरितस्य उपमानं कविना सागरः इति प्रदत्तम्।

१२. मोहाद्+उडुपेन+अस्मि

१३. तरीतुम् इच्छुः इत्यर्थः।

१४. प्रस्तुते श्लोके सूर्यवंशः दुस्तरसमुद्र इव स्वमतिः लघुनौका इव इति कविः प्रयोगं कृतवान्। अतः अत्र सूर्यवंशः स्वमतिः च उपमेयवाचकं पदद्वयं भवति। दुस्तरसमुद्रः लघुनौका च उपमानवाचके द्वे पदे भवतः। लघुनौकया यथा दुस्तरसमुद्रस्य तरणम् असम्भवं तथा कवेः मत्या रघुवंशीयानां चरितवर्णनम् असम्भवम् इति सादृश्यम्। अतः अत्र उपमालङ्कारः वर्तते।

१५. ३

उत्तराणि-३

१६. कविः आत्मानं वामनेन उपमाति।

१७. उपरि स्थितं फलं प्रांशुना लब्धुं शक्यते।

१८. इव इति अव्ययपदं सादृश्यार्थकम्।

१९. प्रांशुना लभ्यं प्रांशुलभ्यमिति तृतीयातत्पुरुषसमासः,तस्मिन् प्रांशुलभ्ये।

२०. २

उत्तराणि-४

२१. वज्रबिद्धे रत्ने सूत्रस्य गतिः प्रतिबन्धकविहीना भवति।

२२. वज्रं नाम मणिभेदकः सूचीविशेषः।

२३. सूत्रस्य+इव+अस्ति।

२४. व्यासवाल्मीक्यादयः पूर्वसूरिणः।

२५. ३

उत्तराणि-५

२६. नाकात् आ आनाकम् इति अव्ययीभावसमासः। रथस्य वर्त्म रथवर्त्म इति षष्ठीतत्पुरुषसमासः। आनाकं रथवर्त्म येषां ते आनाकरथवर्त्मानः इति बहुव्रीहिसमासः, तेषाम् आनाकरथवर्त्मनाम्। अस्यार्थः स्वर्गपर्यन्तं रघुवंशीयानां नृपाणां रथमार्गः आसीत् इति। अर्थात् स्वर्गं प्रत्यपि तेषां गमनागमनम् आसीत्। एवं ते इन्द्रस्य मित्राणि आसन् इति स्फुटं भवति।

२७. रघुवंशीयनृपाणां राज्यस्य सीमा समुद्रः आसीत्।

२८. सः+अहम्+आजन्मशुद्धानाम्+आफलोदयकर्मणाम्

२९. १

३०. २

उत्तराणि-६

३१. अग्निः द्विविधः भवति- श्रौताग्निः स्मार्ताग्निः च। श्रौताग्नेः त्रयः भेदाः सन्ति- दक्षिणाग्निः आहवनीयाग्निः गार्हपत्याग्निः च। स्मार्ताग्नेः अपि द्वौ भेदौ- शम्याग्निः आवसथ्याग्निः च।

३२. अपराधम् अनतिक्रम्य यथापराधम् इति अव्ययीभावसमासः। यथापराधं दण्डः येषां ते यथापराधदण्डाः इति बहुव्रीहिसमासः,तेषां यथापराधदण्डानाम्। अस्य पदस्य अर्थः भवति - अपराधः कृतः चेत् तदपराधानुसारेण अपराधकारिभ्यः ते दण्डान् यच्छन्ति स्म। तेषां शासनकाले अपराधं कृत्वा कोपि निर्दण्डः न तिष्ठति स्म। तेन अधिकदण्ड्यानां न्यूनदण्डः न्यूनदण्ड्यानाम् अधिकदण्डः इति वैषम्यभावः नासीत्।

३३. एतानि चत्वारि विशेषणानि रघुवंशीयान् नृपान् विशिंषन्ति।

३४. ४

३५. २

३६. २

उत्तराणि-७

३७. रघुवंशीयाः नृपाः सत्याय मितभाषिणः।

३८. मितं स्वल्पं भाषणं शीलं येषां ते मितभाषिणः, तेषां मितभाषिणाम्।

३९. रघुवंशीयाः नृपाः सन्तानलाभाय गृहस्थाश्रमं प्रविष्टवन्तः। अज्ञानिनः भार्यादिभोगाय विवाहं कुर्वन्ति। किन्तु रघुवंशीयराज्ञां सन्तानप्राप्तिः एव विवाहस्य कारणम् आसीत्।

४०. १

४१. ३

उत्तराणि-८

४२. सूर्यवंशीयाः योगेन देहं त्यजन्ति स्म।

४३. रघुवंशीयाः शैशवे विद्याभासं कृतवन्तः।

४४. तनुं त्यजन्ति इति तनुत्यजः इति उपपदसमासः, तेषां तनुत्यजाम्।

४५. २

४६. १

उत्तराणि-९

४७. कविः रघुवंशीयानां गुणैः प्रचोदितः रघुवंशकाव्यलेखने प्रवृत्तः।

४८. वाचां विभवः वाग्विभवः इति तत्पुरुषसमासः। तनुः वाग्विभवः यस्य सः तनुवाग्विभवः इति बहुव्रीहिसमासः।

४९. यत्र चतुर्भ्यः अधिकानां श्लोकानां मध्ये सम्बन्धः अस्ति चेत् तत् कुलकम् इत्युच्यते। अत्रापि सोहमाजन्म इत्यादिश्लोकात् रघूणामन्वयं वक्ष्ये इति श्लोकपर्यन्तं पञ्चानां श्लोकानां मध्ये सम्बन्धः अस्ति। अतः अत्र कुलकं वर्तते इति वक्तुं शक्यते।

५०. ४

५१. ३

उत्तराणि-९

५२. सन्तः रघुवंशकाव्यपठने अधिकारिणः।

५३. अत्र प्राज्ञाः अग्निना उपमिताः।

५४. सच्च असच्च सदसती इति इतरेतरद्वन्द्वसमासः। सदसतोः व्यक्तिः सदसद्व्यक्तिः इति षष्ठीतत्पुरुषसमासः। सदसद्व्यक्तेः हेतवः सदसद्व्यक्तिहेतवः इति षष्ठीसमासः।

५५. २

॥ इति चतुर्थः पाठः ॥

348sk05

५

रघुवंशम्- राज्ञो दिलीपस्य गुणवर्णनम् - १

प्रस्तावना

अस्मिन् पाठे वयं तदनन्तरं त्रयोदश श्लोकान् पठामः। अत्र कविः विषयकथनम् आरभते। सूर्यात् रघुवंशस्य उत्पत्तिः सञ्जाता। सूर्यवंशस्य आदिमः राजा आसीत् मनुः। तस्मिन् एव वंशे कालक्रमेण दिलीपः उत्पन्नः। दिलीपः एव रघुवंशस्य प्रथमसर्गस्य नायकः वर्तते। अस्मिन् पाठे प्रधानतया महाराजस्य दिलीपस्य देहादिवैशिष्ट्यं वर्णयति कविः।

उद्देश्यानि -

अमुं पाठं पठित्वा भवान्-

- रघुवंशस्य उत्पत्तिं जानीयात्।
- महाराजस्य दिलीपस्य गुणावलीम् अवगच्छेत्।
- कालिदासस्य काव्यशैल्या विषये ज्ञातुं शक्नुयात्।
- अलङ्काराणां समन्वयं कर्तुं समर्थः भवेत्।
- समासं सन्धिं च बोद्धुं शक्नुयात्।
- श्लोकानाम् अन्वयादिकं कर्तुं समर्थः स्यात्।

५.१) मूलपाठः -

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।।११।।
तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव।।१२।।
व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः।।१३।।

सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना।।१४।।
आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः।।१५।।
भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः।।१६।।
रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः।।१७।।
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।१८।।
सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता।।१९।।
तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।२०।।
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्।।२१।।
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।२२।।
अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना।।२३।।

५.२) इदानीं मूलपाठम् अवगच्छाम -

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।।११।।

अन्वयः - मनीषिणां माननीयः छन्दसां प्रणवः इव महीक्षिताम् आद्यः वैवस्वतः नाम मनुः आसीत्।

अन्वयार्थः - मनीषिणां विदुषां माननीयः पूजनीयः छन्दसां वेदानां प्रणव इव ओङ्कार इव महीक्षितां राज्ञाम् आद्यः प्रथमः वैवस्वतो नाम वैवस्वत इति नाम्ना प्रसिद्धः मनुः प्रजापतिः आसीत् अभवत्।

सरलार्थः - विद्वत्पूज्यः महीपतीनाम् आदिमः वैवस्वतः नाम मनुः आसीत्। स च वेदमन्त्रेषु ओङ्कारः इव आसीत्।

तात्पर्यार्थः - अत्र कविः रघुवंशस्य वर्णनप्रसङ्गे सूर्यवंशस्य उत्पत्तिं वर्णयति। पुराणानुसारेण स्वयम्भुवादयः चतुर्दश मनवः आसन्। तेषु सूर्यपुत्रः वैवस्वतः मनुः सप्तमः वर्तते। तस्मात् एव सूर्यवंशस्य उत्पत्तिः सञ्जाता। श्लोकेस्मिन् तस्य एव पूजनीयतां वर्णयति कविः। वैवस्वतमनुः तथा पूजनीयः आसीत् यत् दिव्यदृष्टिसम्पन्नाः मनीषिणः अपि तं श्रद्दधति स्म। अपि च, स पृथिव्याः सर्वेषां राज्ञां मध्ये प्रथमः अपि आसीत्। अर्थात् स एव धरण्याः प्रथमः राजा। अस्य प्रतिपादनाय कविः उपमालङ्कारम् अपि समाश्रितवान् - छन्दसां प्रणवः इव। यथा ओङ्कारः वेदमन्त्रेषु आदिमः अस्ति तथैव वैवस्वतमनुः अपि महीपतीषु प्रथमः आसीत्। यथा ओङ्कारः सर्वेषां पूजनीयः अस्ति तथा सः अपि सर्वेषां माननीयः आसीत् इति अस्य श्लोकस्य आशयः।

व्याकरणविमर्शः -

- माननीयः - मानितुं योग्यः इत्यर्थे मानधातोः अनीयर्-प्रत्यये माननीयः इति रूपम्।
- मनीषिणाम् - मनस ईषिणः मनीषिणः।मनीषिन्-शब्दस्य षष्ठीबहुवचने मनीषिणाम् इति रूपम्।
- आसीत् - अस्-धातोः लङि प्रथमपुरुषैकवचने आसीत् इति रूपम्।
- महीक्षिताम् - महीं क्षियन्ति इति महीक्षितः, तेषां महीक्षिताम्। एतत् षष्ठीबहुवचनान्तं रूपम्।
- वैवस्वतः - विवस्वतः अपत्यं वैवस्वतः। विवस्वान् नाम सूर्यः। तस्य पुत्रः वैवस्वतः।

सन्धिकार्यम् -

- वैवस्वतो मनुर्नाम – वैवस्वतः+मनुः+नाम
- माननीयो मनीषिणाम् - माननीयः+मनीषिणाम्
- आसीन्महीक्षितामाद्यः - आसीत्+महीक्षिताम्+आद्यः
- प्रणवश्छन्दसामिव- प्रणवः+छन्दसाम्+इव
- **प्रयोगपरिवर्तनम्** - मनीषिणां माननीयेन छन्दसां प्रणवेन इव महीक्षिताम् आद्येन वैवस्वतेन नाम मनुना अभूयत।

अलङ्कारालोचना - अस्मिन् श्लोके उपमालङ्कारः विद्यते। अत्र महीक्षितां वैवस्वतः इति पदद्वयम् उपमेयवाचकम्। छन्दसां प्रणवः इति पदद्वयम् उपमानवाचकम्। इव इति उपमावाचकः शब्दः। अत्र महीक्षितः छन्दोभिः उपमीयते। अपि च वैवस्वतः प्रणवेन उपमीयते। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -१

१. मनुः केन उपमितः। महीक्षितः केन उपमिताः।

२. लोके राज्ञाम् आदिमः कः।

३. वैवस्वतः इत्यस्य अर्थः कः।

४. कति मनवः आसन्-

१) द्वादश २) त्रयोदश ३) चतुर्दश ४) पञ्चदश

५. वैवस्वतः कतमः मनुः-

१) षष्ठः २) सप्तमः ३) दशमः ४) चतुर्थः

६. रघुवंशः कस्मात् उत्पन्नः

१) सूर्यात् २) चन्द्रात् ३) बुधात् ४) कुरोः

५.३) इदानीं मूलपाठम् अवगच्छाम -

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।

दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव।।१२।।

अन्वयः - शुद्धिमति तदन्वये शुद्धिमत्तरः दिलीप इति राजेन्दुः क्षीरनिधौ इन्दुः इव प्रसूतः।

अन्वयार्थः - शुद्धिमति पवित्रतासम्पन्ने तदन्वये मनुवंशे शुद्धिमत्तरः पवित्रतरः दिलीप इति दिलीपनाम्ना प्रसिद्धः राजेन्दुः भूपचन्द्रः क्षीरनिधौ क्षीरसमुद्रे इन्दुः इव चन्द्र इव प्रसूतः जातः।

सरलार्थः - क्षीरसमुद्रे चन्द्रः यथा जन्म लब्धवान् तथा मनोः पवित्रे वंशे दिलीपनामकः पवित्रतरः राजचन्द्रः जन्म लब्धवान्।

तात्पर्यार्थः - अस्मिन् श्लोके कविः रघुवंशस्य वर्णनप्रसङ्गे रघुमहाराजस्य पितुः विषये कथयति। तस्य नाम आसीत् दिलीपः। अत्र स इन्दुना उपमितः। इन्दुः नाम चन्द्रः। यथा समुद्रमन्थनकाले क्षीरसागरे इन्दुः उत्पन्नः तथैव पवित्रे मनुवंशे पवित्रतरः दिलीपः उत्पन्नः इति अभिप्रायः। किञ्च चन्द्रः यथा जनानां मनसि आह्लादं जनयति तथा दिलीपः अपि प्रजानां सुखदायकः आसीत्। तस्मात् दिलीपः राजेन्दुः अर्थात् राजश्रेष्ठः इत्यपि कथितं कविना। मनुवंशः नाम सूर्यवंशः। स तु प्रकृत्या एव पुनानः वर्तते। अपि च पुत्रोत्पादनात् पूर्वं परं च शास्त्रेण उक्ताः गर्भाधानादिसंस्काराः तैः सम्यक् परिपालिताः। अतः एव तेषां पवित्रे वंशे पवित्रतरः दिलीपः जन्म लब्धवान् इति कवेः आकूतम्।

व्याकरणविमर्शः -

- तदन्वये – तस्य अन्वयः तदन्वयः इति षष्ठीतत्पुरुषसमासः, तस्मिन् तदन्वये। एतत्

सप्तम्येकवचनान्तं पदम्।

- शुद्धिमति - प्रशस्ता शुद्धिः अस्मिन् स शुद्धिमान्, तस्मिन् शुद्धिमति। एतदपि सप्तम्येकवचनान्तं पदम्।
- प्रसूतः - प्रपूर्वकात् सूधातोः क्तप्रत्यये प्रसूत इति रूपं सिध्यति।
- शुद्धिमत्तरः - अतिशयेन शुद्धिमान् शुद्धिमत्तरः भवति। अत्र शुद्धिमत्-शब्दात् तरप्प्रत्ययः अस्ति।
- राजेन्दुः - राजा इन्दुः इव इति विग्रहे राजेन्दुः इति भवति। अत्र उपमेयपदपूर्वककर्मधारयसमासः अस्ति।
- क्षीरनिधौ - क्षीराणां निधिः क्षीरनिधिः इति षष्ठीतत्पुरुषसमासः, तस्मिन् क्षीरनिधौ।

सन्धिकार्यम् -

- दिलीप इति - दिलीपः+इति
- राजेन्दुरिन्दुः - राजेन्दुः+इन्दुः
- क्षीरनिधाविव - क्षीरनिधौ+इव
- **प्रयोगपरिवर्तनम्** - शुद्धिमति तदन्वये शुद्धिमत्तरेण दिलीपेन इति राजेन्दुना क्षीरनिधौ इन्दुना इव प्रसूतम्।

अलङ्कारालोचना - अस्मिन् श्लोके तदन्वये अर्थात् मनुवंशे अपि च दिलीपः इति पदद्वयम् उपमेयवाचकम्। क्षीरनिधौ इन्दुः इति च द्वे पदे उपमानवाचके। इव इति उपमावाचकः शब्दः। अत्र तदन्वयः क्षीरनिधिना उपमीयते। दिलीपः च क्षीरनिधौ उत्पन्नेन इन्दुना उपमीयते। यथा क्षीरनिधौ चन्द्रः उत्पन्नः तथा मनुवंशे दिलीपः उत्पन्नः इति सादृश्यम्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -२

७. अस्मिन् श्लोके दिलीपः केन उपमितः। मनुवंशः च केन उपमितः।

८. अत्र उपमालङ्कारं साधयत।

९. राजेन्दुः इति समासनाम विग्रहवाक्यं च लिखत।

१०. दिलीपः किम् इव प्रसूतः-

१) सूर्यः २) चन्द्रः ३) क्षीरनिधिः ४) बुधः

११. चन्द्रः कुत्र प्रसूतः-

१) वीरनिधौ २) तीरनिधौ ३) क्षीरनिधौ४) नीरनिधौ

५.४) इदानीं मूलपाठम् अवगच्छाम -

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।

आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः।।१३।।

अन्वयः - व्यूढोरस्कः वृषस्कन्धः शालप्रांशुः महाभुजः आत्मकर्मक्षमं देहम् आश्रितः क्षात्रः धर्मः इव (स्थितः)।

अन्वयार्थः - व्यूढोरस्कः विपुलवक्षाः वृषस्कन्धः वृषभांसः शालप्रांशुः वृक्षोन्नतः महाभुजः दीर्घबाहुः आत्मकर्मक्षमं स्वकार्यसमर्थं देहं शरीरम् आश्रितः प्राप्तः क्षात्रः क्षत्रियसम्बन्धी धर्मः गुणः इव स्थितः।

सरलार्थः - दिलीपस्य विशालं वक्षःस्थलं, वृषभस्कन्ध इव स्कन्धः दीर्घौ बाहू च आसन्। अपि च, स शालवृक्षः इव उन्नतः आसीत्। एवं स्वकार्यकरणे समर्थं देहं प्राप्तः स क्षात्रधर्म इव आसीत्।

तात्पर्यार्थः - अस्मिन् श्लोके कालिदासः रघुपितरं दिलीपं वर्णयति। दिलीपस्य वक्षःस्थलं विशालाकारम् आसीत्। वृषस्य स्कन्धवत् बलीयान् स्कन्धः तस्य आसीत्। वृक्षेषु शालवृक्षः अतीव उन्नतः भवति। दिलीपः अपि तथा उन्नतः आसीत्। तस्य भुजद्वयम् अपि दीर्घम् आसीत्। एवं तस्य शरीरं बहु बलिष्ठम् आसीत् इति ज्ञायते। दिलीपम् अवलोक्य मन्यते स्म, यत् क्षात्रः धर्मः स्वकार्यं सम्पादयितुम् एकं समर्थं देहं समाश्रितवान्। अत्र स्वकार्यं नाम विपन्नजनानां त्राणादिकं भवति। क्षात्रः इति एकः वीरोचितः क्षत्रियसम्बन्धी धर्मः। स एव शरीरं गृहीत्वा दिलीपरूपेण स्थितः इति कवेः अभिप्रायः। अर्थात् पराक्रमः एव मूर्तिमान् भूत्वा स्थितः इति अर्थः। अस्मिन् श्लोके कविः क्षात्रः धर्मः आत्मकर्मक्षमं दिलीपदेहम् आश्रितवान् इति उत्प्रेक्षते। अतः अस्मिन् श्लोके उत्प्रेक्षालङ्कारः विद्यते।

व्याकरणविमर्शः -

- व्यूढोरस्कः - व्यूढम् उरः यस्य स व्यूढोरस्कः इति बहुव्रीहिसमासः।
- वृषस्कन्धः - वृषस्य इव स्कन्धः वृषस्कन्धः इति व्यधिकरणबहुव्रीहिसमासः।
- शालप्रांशुः - शाल इव प्रांशुः शालप्रांशुः इति उपमानपदपूर्वककर्मधारयसमासः।
- महाभुजः - महान्तौ भुजौ यस्य सः महाभुजः इति बहुव्रीहिसमासः।
- आत्मकर्मक्षमम् - आत्मनः कर्म आत्मकर्म इति षष्ठीतत्पुरुषसमासः। आत्मकर्मणि क्षमः आत्मकर्मक्षमः इति सप्तमीतत्पुरुषसमासः, तम् आत्मकर्मक्षमम्। एतत् द्वितीयैकवचनान्तं पदम्।
- आश्रितः - आङ्पूर्वकात् श्रिधातोः क्तप्रत्यये कृते आश्रितः इति रूपं सिध्यति।

सन्धिकार्यम् -

- व्यूढोरस्को वृषस्कन्धः - व्यूढोरस्कः+वृषस्कन्धः
- शालप्रांशुर्महाभुजः - शालप्रांशुः+महाभुजः
- क्षात्रो धर्म इवाश्रितः - क्षात्रः+धर्मः+इव+आश्रितः

- **प्रयोगपरिवर्तनम्** - व्यूढोरस्केन वृषस्कन्धेन शालप्रांशुना महाभुजेन आत्मकर्मक्षमं देहम् आश्रितेन क्षात्रेण धर्मेण इव (स्थितम्)।

अलङ्कारालोचना - अस्मिन् श्लोके उत्प्रेक्षालङ्कारः विद्यते। अत्र महाराजं दिलीपं मूर्तिमान् क्षात्रधर्मरूपेण उत्प्रेक्षितवान् कविः। यतो हि महाराजः दिलीपः स्वगुणैः क्षात्रः धर्मः इव प्रतीयते स्म। अत्र उत्प्रेक्षालङ्कारः अस्ति।

पाठगतप्रश्नाः -३

१२. दिलीपस्य स्कन्ध कस्य स्कन्धवत् आसीत्।

१३. शालप्रांशुः इत्यत्र कः समासः। विग्रहवाक्यं च किम्।

५.५) इदानीं मूलपाठम् अवगच्छाम -

सर्वातिरिक्तसारेण सर्वतेजोभिभाविना।

स्थितः सर्वोन्नोतेनोर्वीं क्रान्त्वा मेरुरिवात्मना।।१४।।

अन्वयः - सर्वातिरिक्तसारेण सर्वतेजोभिभाविना सर्वोन्नतेन आत्मना मेरुः इव उर्वीं क्रान्त्वा स्थितः।

अन्वयार्थः - सर्वातिरिक्तसारेण सकलभूतेभ्यः अधिकबलेन सर्वतेजोभिभाविना सर्वभूतानि तेजसा तिरस्कारिणा सर्वोन्नतेन सर्वेभ्य उन्नतेन आत्मना शरीरेण मेरुः इव सुमेरुपर्वतः इव उर्वीं पृथ्वीं क्रान्त्वा आक्रम्य स्थितः अविद्यत।

सरलार्थः - दिलीपः सर्वापेक्षया अधिकबलशाली आसीत्। स सर्वभूतानि स्वतेजसा तिरस्कृतवान्। तस्य शरीरम् अपि बहु उन्नतम् आसीत्। अतः स सम्पूर्णां पृथिवीम् अतिक्रान्तवान्। यथा सुमेरुपर्वतः पृथिवीम् अतिक्रान्तवान् इति अस्य श्लोकस्य सरलार्थः।

तात्पर्यार्थः - अस्मिन् श्लोके कविः महाराजं दिलीपं सुमेरुनामकेन पर्वतेन सह उपमितवान्। अत्र सर्वातिरिक्तसारत्वं सर्वतेजोऽभिभावित्वं सर्वोन्नतत्वम् इत्यादयः दिलीपस्य ये गुणाः उक्ताः ते गुणाः सुमेरुपर्वतस्य अपि सन्ति। यथा सुमेरुपर्वतः स्तम्भवत् समग्रां पृथिवीं रक्षति तथा दिलीपः अपि आत्मबलेन समग्रां पृथिवीं रक्षति। सुमेरुपर्वतः अतीव उन्नतः इति पुराणादिषु अपि प्रसिद्धम् अस्ति। महाराजः दिलीपः अपि तथा उन्नतः आसीत्। स उन्नतचरित्रशाली आसीत् इति आशयः। अपि च, स महान् तेजस्वी आसीत्। अतः स आत्मतेजसा अन्यान् सर्वान् अपि नृपान् पराजितवान्। एवं सकलेभ्यः

अधिकबलशाली सर्वभूतानि तेजसा तिरस्कारी सर्वोन्नतः स पृथिवीम् अतिक्रम्य स्थितवान्। यथा सुमेरुपर्वतः पृथिवीम् आक्रम्य तिष्ठति।

व्याकरणविमर्शः -

- सर्वातिरिक्तसारेण - अतिरिक्तः सारः यस्य सः अतिरिक्तसारः इति बहुव्रीहिसमासः। सर्वेभ्यः अतिरिक्तसारः सर्वातिरिक्तसारः इति पञ्चमीतत्पुरुषसमासः, तेन सर्वातिरिक्तसारेण। इदं तृतीयैकवचनान्तं पदम्।
- सर्वतेजोऽभिभाविना - तेजसा अभिभवति इति तेजोभिभावी। सर्वेषां तेजोऽभिभावी सर्वतेजोऽभिभावी इति षष्ठीतत्पुरुषसमासः, तेन सर्वतेजोऽभिभाविना। तृतीयैकवचनान्तम् एतत् पदम्।
- सर्वोन्नतेन - सर्वेभ्यः उन्नतः सर्वोन्नतः इति पञ्चमीतत्पुरुषसमासः, तेन सर्वोन्नतेन।
- क्रान्त्वा - क्रम्-धातोः क्त्वाप्रत्यये क्रान्त्वा इति रूपं निष्पद्यते। अस्य अव्ययपदवत् प्रयोगः भवति।

सन्धिकार्यम् -

- सर्वोन्नतेनोर्वीम् - सर्वोन्नतेन+उर्वीम्
- मेरुरिवात्मना - मेरुः+इव+आत्मना
- **अव्ययपरिचयः** - अत्र इव इति अव्ययपदं वर्तते।
- **प्रयोगपरिवर्तनम्** - सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना सर्वोन्नतेन आत्मना मेरुणा इव उर्वीं क्रान्त्वा स्थितम्।

अलङ्कारालोचना - अत्र महाराजः दिलीपः सुमेरुपर्वतेन उपमीयते। अतः दिलीपः उपमेयः मेरुः च उपमानम्। इव इति उपमावाचकः शब्दः। अत्र ये गुणाः प्रोक्ताः ते गुणाः दिलीपे अपि आसन् सुमेरुपर्वते अपि आसन् इति सादृश्यम्। अतः अस्मिन् श्लोके उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -४

१४. अत्र दिलीपं केन पर्वतेन सह उपमितवान् कविः।

१५. सर्वातिरिक्तसारः इत्यत्र समासनाम विग्रहवाक्यं च लिखत।

१६. सुमेरुपर्वतः किम् आक्रम्य स्थितः।

५.६) इदानीं मूलपाठम् अवगच्छाम -

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।

आगमैः सदृशारम्भ आरम्भसदृशोदयः।।१५।।

अन्वयः - आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारम्भः आरम्भसदृशोदयः (आसीत्)।

अन्वयार्थः - (सः) आकारसदृशप्रज्ञः मुर्तितुल्यबुद्धिः प्रज्ञया बुद्ध्या सदृशागमः समानशास्त्रपरिश्रमः आगमैः शास्त्रैः सदृशारम्भः तुल्यकर्मा आरम्भसदृशोदयः कर्मसदृशफलसिद्धिश्च (आसीत्)।

सरलार्थः - दिलीपस्य प्रज्ञा तस्य देहाकृतिसदृशी आसीत्। तस्य शास्त्रज्ञानं प्रज्ञानुरूपम् आसीत्। शास्त्राज्ञानानुसारम् एव स कर्मानुष्ठानम् अकरोत्। किञ्च, स यथा कर्माणि अनुष्ठितवान् तथा एव फलं लब्धवान्।

तात्पर्यार्थः - लोके देहवैशिष्ट्यम् अवलोक्य मनुष्याणां गुणाः प्रायः अनुमीयन्ते। दिलीपस्य शरीरं कथम् आसीत् इति प्राक्तनैः श्लोकैः वर्णितवान् कविः। तस्य शरीरं यथा सुन्दरम् आसीत् तथा तस्य प्रज्ञा अपि अपरिमेया आसीत्। एतादृशप्रज्ञाकारणात् स वेदादिशास्त्राणि सम्यक् अधीतवान् गृहीतवान् च। किन्तु केवलं शास्त्रपठनेन सर्वं न सिध्यति। अपि तु शास्त्रोक्तविधयः जीवने आचरणीया भवन्ति। अतः दिलीपः शास्त्राविहितानि कर्माणि स्वजीवने यथार्थम् आचरितवान्। यथा कर्माणि आचरितवान् तथा कर्मफलम् अपि लब्धवान्। एवं दिलीपः न केवलं शास्त्राणि अपठत्। अपि च शास्त्रं पठित्वा तानि शास्त्रोक्तवचनानि जीवने यथायथं प्रयुज्य तत्सदृशं फलम् अपि प्राप्तवान् इति अस्य श्लोकस्य आशयः।

व्याकरणविमर्शः -

- आकारसदृशप्रज्ञः - सदृशी प्रज्ञा यस्य सः सदृशप्रज्ञः इति बहुव्रीहिसमासः। आकारेण सदृशप्रज्ञः आकारसदृशप्रज्ञः इति तृतीयातत्पुरुषसमासः।
- सदृशागमः - सदृशः आगमः यस्य सः सदृशागमः इति बहुव्रीहिसमासः।
- सदृशारम्भः - सदृशः आरम्भः यस्य सः सदृशारम्भः इति बहुव्रीहिसमासः।
- आरम्भसदृशोदयः - सदृशः उदयः यस्य सः सदृशोदयः इति बहुव्रीहिसमासः। आरम्भेण सदृशोदयः आरम्भसदृशोदयः इति तृतीयातत्पुरुषसमासः।
- **प्रयोगपरिवर्तनम्** - (तेन) आकारसदृशप्रज्ञेन प्रज्ञया सदृशागमेन आगमैः सदृशारम्भेण आरम्भसदृशोदयेन (अभूयत)।

पाठगतप्रश्नाः -५

१७. आगमशब्दस्य आरम्भशब्दस्य च कः अर्थः।

१८. दिलीपस्य प्रज्ञा कीदृशी आसीत्।

१९. आकारसदृशप्रज्ञः इत्यत्र समासनाम विग्रहवाक्यं च लिखत।

२०. सदृशारम्भः इत्यस्य किं विग्रहवाक्यम्-

१) सदृशस्य आरम्भ २) सदृशः आरम्भः ३) सदृशः आरम्भः यस्य ४) सदृशः च आरम्भः च

५.७) इदानीं मूलपाठम् अवगच्छाम -

भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।

अधृष्यश्चाधिगम्यश्च यादोरत्नैरिवार्णवः।।१६।।

अन्वयः - भीमकान्तैः नृपगुणैः स उपजीविनाम् यादोरत्नैः अर्णव इव अधृष्यः अभिगम्यश्च बभूव।

अन्वयार्थः - भीमकान्तैः भयङ्करमनोहरैः नृपगुणैः राजगुणैः स दिलीपः उपजीविनाम् आश्रितानां यादोरत्नैः जलजीवमणिभिः अर्णव इव समुद्र इव अधृष्यः अनभिगम्यः अभिगम्यः आश्रयणीयः च बभूव भवति स्म।

सरलार्थः - दिलीपस्य शौर्यादयः भयङ्करगुणाः आसन्। अतः स आश्रितानाम् सचिवभृत्यादीनाम् अनभिगम्यः आसीत्। किञ्च, औदार्यं प्रजावात्सल्यम् इत्यादयः मनोज्ञगुणाः अपि तस्य आसन्। अतः स उपजीविभिः सेवनीयः अपि आसीत्। यथा समुद्रः गम्भीरतरङ्गमकरादिभिः भीषणः अस्ति। किन्तु रत्नैः सेवनीयः अपि अस्ति।

तात्पर्यार्थः - दिलीपस्य प्रतापादयः तीक्ष्णगुणाः आसन्। अतः उपजीविनः तस्मात् बिभ्यन्ति स्म। किन्तु स औदार्यादिभिः मनोहरैः गुणैः अपि युक्तः आसीत्। अतः आश्रयिणः तं सेवन्ते स्म। वस्तुतः प्रभुणा एवमेव भवितव्यम्। प्रभुः प्रतापादितीक्ष्णगुणरहितः चेत् प्रजाः तस्य आदेशं न पालयन्ति। तेन राज्यस्य हानिः सम्भवति। किञ्च राजनि एकः अपि मनोज्ञगुणः न तिष्ठति, यदि राजा सम्पूर्णतया भीषणः भवति तर्हि प्रजाः क्रुद्धाः भवन्ति। क्रमेण गूढतया राज्ञः हानिम् एव जनयति। एवम् उभयत्र राज्ञः तथा राज्यस्य हानिः एव सम्भवति। अतः प्रभौ भीषणगुणाः मनोज्ञगुणाः इति उभयविधाः एव गुणाः अपेक्षिताः वर्तन्ते। दिलीपे तु उभौ एव गुणौ आस्ताम्। तेन तस्य सचिवादयः उपजीविनः भीत्या कर्तव्यं निर्वहन्ति स्म। अपि च प्रीत्या अभीष्टम् अर्थं प्राप्नुवन्ति स्म। अत्र एकः दृष्टान्तः अपि प्रदत्तः। यथा समुद्रः तस्य भीषणतरङ्गैः मकरादिभिः पशुभिः च भयङ्करः दृश्यते। पुनः समुद्रे रत्नानि अपि प्राप्नुवन्ति जनाः। तैः च रत्नैः स जनानां मनःसु आह्लादम् अपि जनयति। एवं यथा समुद्रः भयङ्करः मनोहरः इति उभयथा प्रतीयते तथा दिलीपे भयङ्करगुणानां मनोज्ञगुणानां च मिश्रणम् आसीत् इति वक्तुं शक्यते।

व्याकरणविमर्शः -

- भीमकान्तैः - भीमाः च कान्ताः भीमकान्ताः इति कर्मधारयसमासः, तैः भीमकान्तैः। तृतीयाबहुवचनान्तं पदम् इदम्।

- नृपगुणैः - नृपस्य गुणाः नृपगुणाः इति षष्ठीतत्पुरुषसमासः, तैः नृपगुणैः।
- उपजीविनाम् - उपजीवन्ति इति उपजीविनः, तेषाम् उपजीविनाम्। षष्ठीबहुवचनान्तं रूपम् इदम्।
- अधृष्यः - न धृष्यः अधृष्यः इति नञ्तत्पुरुषसमासः।
- अभिगम्यः - अभिपूर्वकात् गम्-धातोः यत्प्रत्यये कृते अभिगम्यः इति रूपम्। अभिगन्तुं योग्यः इत्यर्थः।
- यादोरत्नैः - यादांसि च रत्नानि च यादोरत्नानि इति इतरेतरद्वन्द्वसमासः, तैः यादोरत्नैः।
- बभूव - भूधातोः लिट्-लकारे प्रथमपुरुषैकवचने बभूव इति रूपम्।

सन्धिकार्यम् -

- भीमकान्तैर्नृपगुणैः - भीमकान्तैः+नृपगुणैः
- बभूवोपजीविनाम् - बभूव+उपजीविनाम्
- अधृष्यश्चाधिगम्यश्च - अधृष्यः+च+अधिगम्यः+च
- यादोरत्नैरिवार्णवः - यादोरत्नैः+इव+अर्णवः
- **प्रयोगपरिवर्तनम्** - भीमकान्तैः नृपगुणैः तेन उपजीविनां यादोरत्नैः अर्णवेन इव अधृष्येण अभिगम्येन बभूवे।

अलङ्कारालोचना - अत्र दिलीपस्य वर्णनाय समुद्रदृष्टान्तः प्रदत्तः कविना। यथा समुद्रः मकरादिभिः भीषणः रत्नैः च मनोरमः आसीत् तथा दिलीपः अपि शौर्यादिभिः तीक्ष्णगुणैः भीषणः प्रजावात्सल्यादिभिः मनोहरैः गुणैः मनोरमः आसीत्। अत्र दृष्टान्तालङ्कारः अस्ति।

पाठगतप्रश्नाः -६

२१. दिलीपः कथम् उपजीविनाम् अधृष्यः अभिगम्यः च बभूव।

२२. प्रकृते श्लोके कः अलङ्कारः अस्ति।

२३. अधृष्यश्चाधिगम्यश्च इत्यत्र सन्धिविच्छेदं कुरुत।

५.८) इदानीं मूलपाठम् अवगच्छाम -

रेखामात्रमपि क्षुण्णादमनोर्वत्मनः परम्।

न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः।।१७।।

अन्वयः - नियन्तुः तस्य नेमिवृत्तयः प्रजाः आमनोः क्षुण्णात् वर्त्मनः परं रेखामात्रम् अपि न व्यतीयुः।

अन्वयार्थः - नियन्तुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य नेमिवृत्तयः चक्रधाराव्यापाराः प्रजाः जनाः आमनोः मनुम् आरभ्य क्षुण्णात् अभ्यस्तात् प्रचलितात् च वर्त्मनः आचारपद्धतेः मार्गात् च परम् अधिकं रेखामात्रम् अपि रेखाप्रमाणम् अपि न व्यतीयुः न अतिक्रान्तवत्यः।

सरलार्थः - निपुणः सारथिः यं रथं चालयति तस्य रथस्य चक्रं पूर्ववर्तिना चक्रेण कृतां रेखां न अतिक्रामति। एवं दिलीपस्य प्रजाः अपि मनोः कालात् आरब्धान् आचारान् न उल्लङ्घितवन्तः।

तात्पर्यार्थः - अस्मिन् पद्ये कविः राज्यपरिचालनायां दिलीपस्य निपुणत्वं कथयति। दिलीपः वैवस्वतमनोः वंशे जातः। अतः स मनोः वचनं श्रद्धया पालितवान्। किञ्च तदनुसारेण एव राज्यशासनं कृतवान्। मनुः सत्ययुगे मनुस्मृतिम् अलिखत्। दिलीपः तु त्रेतायाम् आसीत्। एवम् उभयोः कालयोः मध्ये महान् भेदः आसीत्। तथापि राजा दिलीपः तथा तस्य प्रजाः मनुना दर्शितं मार्गम् यथायथम् अनुसृत्य एव अजीवन्। सर्वे एव सारथिनः रथं चालयन्ति। किन्तु निपुणः सारथिः रथं चालयति चेत् रथस्य पूर्वेण चक्रेण कृतां रेखाम् अन्तिमं चक्रम् अनुकरोति। कञ्चित् अपि व्यतिक्रमं न करोति। सर्वे सारथयः तथा कर्तुं न पारयन्ति। दिलीपः अपि राज्यशासने निपुणः आसीत्। अतः स स्वस्य राज्यं सम्यक् शासितवान्। तेन तस्य प्रजाः मनुवचनं किञ्चिदपि न उल्लङ्घितवन्तः।

व्याकरणविमर्शः -

- रेखामात्रम् - रेखा प्रमाणम् यस्य इति अर्थे रेखामात्रम् इति रूपं भवति।
- क्षुण्णात् - क्षुद्-धातोः क्तप्रत्यये क्षुण्णः इति रूपं, तस्मात् क्षुण्णात्। एतत् पञ्चम्येकवचनान्तं पदम्।
- आमनोः - आङ्पूर्वकात् मनुशब्दात् पञ्चमीविभक्तौ आमनोः इति रूपं सिध्यति। मनुम् आरभ्य इत्यर्थः।
- वर्त्मनः - वर्त्मन्-शब्दस्य पञ्चमीविभक्त्यैकवचने वर्त्मनः इति रूपम्। वर्त्म नाम मार्गः।
- व्यतीयुः - वि-पूर्वकात् अति-पूर्वकात् इण्-धातोः लिटि व्यतीयुः इति रूपम्।
- नियन्तुः - नियच्छति इति नियन्ता, तस्य नियन्तुः।
- नेमिवृत्तयः - नेमीनाम् इव वृत्तिः यासां ता नेमिवृत्तयः इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- रेखामात्रमपि - रेखामात्रम्+अपि
- क्षुण्णादमनोर्वर्त्मनः - क्षुण्णात्+आमनोः+वर्त्मनः
- प्रजास्तस्य - प्रजाः+तस्य
- नियन्तुर्नेमिवृत्तयः - नियन्तुः+नेमिवृत्तयः
- **प्रयोगपरिवर्तनम्** - नियन्तुः तस्य नेमिवृत्तिभिः प्रजाभिः आमनोः क्षुण्णात् वर्त्मनः परः रेखामात्रः अपि न व्यतीये।

अलङ्कारालोचना- अस्मिन् श्लोके दिलीपः निपुणेन सारथिना उपमितः। तस्य प्रजाः नेमिभिः उपमिताः। अतः दिलीपः तस्य प्रजाः च अत्र उपमेयाः। निपुणः सारथिः तस्य रथस्य नेमयः च अत्र

उपमानानि। यथा रथस्य चक्रं पूर्ववर्तिना रथेन कृतां रेखां न अतिक्रामति तथा दिलीपस्य प्रजाः अपि मनुवचनं न उल्लङ्घितवन्तः इति सादृश्यम्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः - ७

२४. रथस्य चक्रं किं न अतिक्रामति।

२५. क्षुण्णादामनोर्वत्मनः इत्यत्र सन्धिविच्छेदं कुरुत।

२६. प्रस्तुतश्लोकस्य अन्वयं लिखत।

५.९) इदानीं मूलपाठम् अवगच्छाम -

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।१८।।

अन्वयः - सः प्रजानां भूत्यर्थम् एव ताभ्यो बलिम् अग्रहीत्। हि रविः सहस्रगुणम् उत्स्रष्टुं रसम् आदत्ते।

अन्वयार्थः - स दिलीपः प्रजानां जनानां भूत्यर्थं वृद्ध्यर्थं ताभ्यः प्रजाभ्यः बलिं करम् अग्रहीत् गृहीतवान्। हि तथा हि रविः सूर्यः सहस्रगुणं सहस्रधा उत्स्रष्टुं दातुं रसं जलम् आदत्ते गृह्णाति।

सरलार्थः - प्रजानां कल्याणाय एव दिलीपः ताभ्यः करं गृहीतवान्। न तु आत्मनः भोगाय गृहीतवान्। यथा सूर्यः सहस्रगुणं जलं प्रत्यर्पयितुं पृथिव्याः जलं संगृह्णाति।

तात्पर्यार्थः - महाराजः दिलीपः राज्यवासिनां प्रजानां कल्याणाय ताभ्यः करम् अग्रहीत्। एकः जनः यद् उत्पादयति तस्य यदि षट् भागाः क्रियन्ते तर्हि तेषु एकं भागं राजा करत्वेन गृह्णाति। एतं बलिं राजा स्वभोगाय न प्रयुङ्क्ते। कररूपेण गृहीतम् अर्थं स राजकोषे संगृह्णाति। सा प्रजानाम् एव सम्पत्। प्रयोजने सति राजा तद् एव धनं प्रजाकल्याणाय प्रयच्छति। दिलीपस्य करसंग्रहणं कथम् आसीत् इति विषये उपमा अपि प्रदत्ता कविना। सूर्यः सम्पूर्णं वर्षं व्याप्य पृथिव्याः जलं शुष्यति। ग्रीष्मकाले पृथिवी जलाभावेन शुष्का भवति। तदा सूर्यः सहस्रगुणं जलं वर्षणरूपेण प्रददाति। एवं सूर्यः जलशोषणं स्वभोगाय न करोति। अपि तु अधिकं जलं प्रत्यर्पयितुम् एव स पृथिव्याः जलं स्वीकरोति। एवं दिलीपः अपि प्रजाकल्याणाय करं गृहीतवान्।

व्याकरणविमर्शः -

- भूत्यर्थम् - भूत्यै इदम् इति विग्रहे भूत्यर्थम् इति रूपम्। अत्र नित्यसमासः वर्तते।
- अग्रहीत् - ग्रह्-धातोः लुङि प्रथमपुरुषैकवचने अग्रहीत् इति रूपम्।

- सहस्रगुणम् - सहस्रं गुणा यस्मिन् तत् यथा तथा इति विग्रहे सहस्रगुणम् इति रूपम्। अत्र बहुव्रीहिसमासः अस्ति।
- उत्स्रष्टुम् - उत्-पूर्वकात् सृज्धातोः तुमुन्-प्रत्यये उत्स्रष्टुम् इति रूपम्। उत्सर्जनाय इत्यर्थः।
- आदत्ते - आङ्-पूर्वकात् दाधातोः लटि प्रथमपुरुषैकवचने आदत्ते इति रूपम्।

सन्धिकार्यम् -

- प्रजानामेव - प्रजानाम्+एव
- स ताभ्यो बलिमग्रहीत् - सः+ताभ्यः+बलिम्+अग्रहीत्
- सहस्रगुणमुत्स्रष्टुमादत्ते - सहस्रगुणम्+उत्स्रष्टुम्+आदत्ते
- **प्रयोगपरिवर्तनम्** - तेन प्रजानां भूत्यर्थम् एव ताभ्यः बलिः अगृह्यत। हि रविणा सहस्रगुणम् उत्स्रष्टुं रसः आदीयते।

अलङ्कारालोचना - अत्र दिलीपं सूर्येण उपमितवान् कविः। यथा सूर्यः जलं गृहीत्वा सहस्रगुणं जलं प्रत्यर्पयति तथा दिलीपः अपि प्रजाभ्यः करं संगृह्णाति। ततः च कररूपेण संगृहीतं धनं प्रजाकल्याणाय प्रयुङ्क्ते इति सादृश्यम्। अत्र दिलीपः उपमेयः। सूर्यः उपमानम्। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -८

२७. दिलीपः कथं बलिम् अग्रहीत्।

२८. प्रस्तुते श्लोके कः अलङ्कारः वर्तते।

२९. दिलीपस्य करग्रहणविषये कविः किम् उक्तवान्।

५.१०) इदानीं मूलपाठम् अवगच्छाम -

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम्।

शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता।।१९।।

अन्वयः - तस्य सेना परिच्छदः (बभूव)। शास्त्रेषु अकुण्ठिता बुद्धिः, धनुषि आतता मौर्वी च द्वयम् एव अर्थसाधनं(बभूव)।

अन्वयार्थः - तस्य दिलीपस्य सेना सैन्यं परिच्छदः उपकरणं बभूव। शास्त्रेषु राजशास्त्रेषु अकुण्ठिता अव्याहता बुद्धिः मतिः धनुषि चापे आतता आरोपिता मौर्वी च ज्या च द्वयम् एव बभूव द्वे एव अर्थसाधनं प्रयोजनकरणम् अभवत्।

सरलार्थः - दिलीपस्य सैन्यबलं तु केवलम् उपकरणम् आसीत्। तेन स किमपि प्रयोजनं न साधयति स्म। शास्त्रेषु अपरिमितं ज्ञानं धनुषि आरोपिता ज्या च दिलीपस्य प्रयोजनम् असाधयताम्।

तात्पर्यार्थः - राजनीतिशास्त्रे प्रोक्तम् अस्ति- 'असन्तुष्टा द्विजा नष्टाः सन्तुष्टाः पार्थिवाः' इति। राजा आत्मसम्पत्त्या सन्तुष्टः चेत् तस्य नाशः एव सम्भवति। अतः राज्ञा राज्यजयादिकं कर्तव्यम् अस्ति। तस्मात् दिलीपः अपि अपरराज्यं जेतुं निर्गच्छति स्म। युद्धाय तस्य महत् सैन्यबलम् अपि आसीत्। किन्तु राजा युद्धसमये तद् न प्रयुङ्क्ते स्म। छत्रचामरादीनि यथा तस्य उपकरणानि आसन् तथा सैन्यबलम् अपि तस्य उपकरणमात्रम् आसीत्। शास्त्रेषु अपरिमिता बुद्धिः धनुषि आरोपिता ज्या च तस्य प्रयोजनसाधनम् आसीत्। नानाविधेषु शास्त्रेषु दिलीपः महापण्डितः आसीत्। अतः स नीतिशास्त्रविशारदः आसीत्। अपि च तस्य धनुषि आरोपिता ज्या अप्रतिरोध्या आसीत्। अतः शास्त्रपाण्डित्यं धनुषि आरोपिता ज्या च तस्य प्रयोजनं साधयतः स्म।

व्याकरणविमर्शः -

- अर्थसाधनम् - अर्थस्य साधनम् अर्थसाधनम् इति षष्ठीतत्पुरुषसमासः।
- अकुण्ठिता - न कुण्ठिता अकुण्ठिता इति नञ्तत्पुरुषसमासः।
- धनुषि - धनुष्-शब्दस्य सप्तम्येकवचने धनुषि इति रूपम्।
- आतता - आङ्- पूर्वकात् तन्-धातोः क्तप्रत्यये स्त्रियां टापि आतता इति रूपम्।

सन्धिकार्यम् -

- परिच्छदस्तस्य - परिच्छदः+तस्य
- द्वयमेवार्थसाधनम् - द्वयम्+एव+अर्थसाधनम्
- शास्त्रेष्वकुण्ठिता - शास्त्रेषु+अकुण्ठिता
- बुद्धिर्मौर्वी - बुद्धिः+मौर्वी
- चातता - च+आतता
- **प्रयोगपरिवर्तनम्** - सेनया परिच्छदेन बभूवे। अर्थसाधनं शास्त्रेषु अकुण्ठितया बुद्ध्या, धनुषि आततया मौर्व्या च द्वयेन एव बभूवे।

पाठगतप्रश्नाः ९

३०. दिलीपस्य अर्थसाधनद्वयं किम् आसीत्।

३१. दिलीपस्य सेना किं जातम्।

३२. शास्त्रेषु+अकुण्ठिता इत्यत्र सन्धिं कुरुत।

५.११) इदानीं मूलपाठम् अवगच्छाम -

तस्य संवृतमन्त्रस्य गुढाकारेङ्गितस्य च।

फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।२०।।

अन्वयः - संवृतमन्त्रस्य गूढाकारेङ्गितस्य च तस्य प्रारम्भाः प्राक्तनाः संस्कारा इव फलानुमेयाः (आसन्)।

अन्वयार्थः - संवृतमन्त्रस्य गुप्तविचारस्य गूढाकारेङ्गितस्य गुप्ते आकारेङ्गिते यस्य च तस्य दिलीपस्य प्रारम्भाः कर्माणि प्राक्तनाः प्राचीनाः संस्काराः इव पूर्वकर्मवासनाः इव फलानुमेयाः कार्येण अनुमातुं योग्याः आसन्।

सरलार्थः - दिलीपः अत्यन्तं गूढतया मन्त्रणाम् अकरोत्। आकारेण इङ्गितेन वा तस्य मनोभावः न ज्ञायते स्म। यथा मनुष्यस्य प्रवृत्तिं दृष्ट्वा पूर्वजन्मनः संस्काराः ज्ञायन्ते। तथा एव फलं दृष्ट्वा दिलीपस्य मनोभावः क आसीत् इति अवगम्यते स्म।

तात्पर्यार्थः - मन्त्रणा गूढतया एव करणीया इति राजनीतेः नियमः वर्तते। यदि केनापि कारणेन मन्त्रणा प्रकाशिता भवति तर्हि समग्रस्य राज्यस्य हानिः सम्भवति। अतः दिलीपः अतीव गोपनतया मन्त्रिभिः सह मन्त्रणाम् अकरोत्। इङ्गितादिकम् अवलोक्य अपि जनाः तस्य सामदामादीन् उपायान् अवगन्तुं समर्थाः न आसन्। यदा कार्यसिद्धिः भवति स्म तदा एव सर्वे दिलीपस्य मनोगतां मन्त्रणां जानन्ति स्म। एतदर्थसमर्थनाय कविना उपमानम् अपि प्रदत्तम्। पूर्वजन्मनि अस्माभिः पुण्यपापादिकं अनेकं कर्म कृतम्। तानि च कर्माणि अस्मिन् जन्मनि संस्काररूपेण तिष्ठन्ति। किन्तु साधारणतया ते संस्काराः न अवगम्यन्ते। यदा वयं जनानां प्रवृत्तिं पश्यामः तदा एव ते संस्काराः अनुमीयन्ते। यतो हि पुण्यकर्म कुर्वाणाः एव सत्कर्मसु प्रवर्तन्ते। पापकर्म कुर्वाणानां च असत्कर्मसु प्रवृत्तिः भवति। एवं कार्यसिद्धिम् अवलोक्य दिलीपस्य मन्त्रणाः अनुमीयन्ते स्म।

व्याकरणविमर्शः-

- संवृतमन्त्रस्य - संवृतः मन्त्रः यस्य स संवृतमन्त्रः इति बहुव्रीहिसमासः, तस्य संवृतमन्त्रस्य।
- गूढाकारेङ्गितस्य - आकारः च इङ्गितं च आकारेङ्गिते इति इतरेतरद्वन्द्वसमासः। गूढे आकारेङ्गिते यस्य स गूढाकारेङ्गितः इति बहुव्रीहिसमासः, तस्य गूढाकारेङ्गितस्य।
- फलानुमेयाः - फलेन अनुमेयाः फलानुमेयाः इति तृतीयातत्पुरुषसमासः।

सन्धिकार्यम् -

- प्राक्तना इव - प्राक्तनाः+इव
- **प्रयोगपरिवर्तनम्** - संवृतमन्त्रस्य गूढाकारेङ्गितस्य च तस्य प्रारम्भैः प्राक्तनैः संस्कारैः इव फलानुमेयैः (अभूयत)।

अलङ्कारालोचना - अत्र दिलीपस्य सामादामादयः उपायाः प्राक्तनैः संस्कारैः उपमीयन्ते। अतः सामदामदयः उपायाः उपमेयाः। प्राक्तनाः संस्काराः च उपमानवाचकाः। इव इति उपमावाचकः शब्दः। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -१०

३३. दिलीपस्य प्रारम्भाः कैः उपमिताः।

३४. गूढाकारेङ्गितस्य इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

५.१२) इदानीं मूलपाठम् अवगच्छाम -

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।

अगृध्नुराददे सोर्थमसक्तः सुखमन्वभूत्।।२१।।

अन्वयः - सः अत्रस्तः आत्मानं जुगोप, अनातुरो धर्मं भेजे, अगृध्नुः अर्थम् आददे, असक्तः सुखम् अन्वभूत्।

अन्वयार्थः - सः दिलीपः अत्रस्तः भीतरहितः आत्मानं शरीरं जुगोप रक्षितवान्। अनातुरः अरुग्णः सन् धर्मं सुकृतं भेजे सेवितवान्। अगृध्नुः लोभरहितः सन् अर्थं धनम् आददे स्वीकृतवान्, असक्तः आसक्तिरहितः सन् सुखं विषयानन्दम् अन्वभूत् अनुभूतवान्।

सरलार्थः - दिलीपः भयशून्यः अपि स्वदेहम् अरक्षत्। रोगरहितः सन् धर्मम् असेवत। लोभशून्यः अपि धनं गृहीतवान्। निरासक्तः अपि विषयसुखम् अनुभूतवान्।

तात्पर्यार्थः - अत्र सामान्यजनैः साकं दिलीपस्य भेदं प्रदर्शयति कविः। धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां शरीरम् एव प्रधानं साधनम्। शरीरं विना किमपि धर्माचरणं कर्तुं न शक्यते। लोके तु सर्वे कस्या अपि आपदः भीताः भूत्वा शरीरं रक्षन्ति। किन्तु दिलीपः पुरुषार्थसिद्धये आत्मानम् अर्थात् शरीरं रक्षितवान्। प्रायः जनाः यदा रोगेण क्लिष्टाः भवन्ति अथवा वृद्धाः भवन्ति तदा एव धर्मं सेवन्ते। किन्तु दिलीपः रोगरहितः अपि धर्माचरणं कृतवान्। लोके जनानां धनलाभाय एव भूयशः प्रवृत्तिः दृश्यते। ते सर्वे एव धनलोलुपाः भवन्ति। लोभवशात् एव ते धनलाभाय प्रवर्तन्ते। किन्तु दिलीपः न लोभवशात् अपि तु प्रजानां कल्याणाय धनम् अर्जितवान्। दिलीपः विषयसुखेषु निरासक्तः आसीत्। तथा आसक्तिरहितः अपि स सुखम् अनुभूतवान्। आसक्तस्य एव सुखदुःखे भवतः। किन्तु दिलीपः अनासक्तः आसीत्। अतः तस्य सुखदुःखाभ्यां दूरे स्थितिः आसीत्।

व्याकरणविमर्शः -

- जुगोप - गुप्-धातोः लिट्लकारे जुगोप इति रूपम्। रक्षितवान् इत्यर्थः।
- अत्रस्तः - न त्रस्तः अत्रस्तः इति नञ्तत्पुरुषसमासः।
- भेजे - भज्-धातोः लिट्लकारे प्रथमपुरुषस्य एकवचने भेजे इति रूपम्। सेवितवान् इत्यर्थः।
- अनातुरः - न आतुरः अनातुरः इति नञ्तत्पुरुषसमासः।
- अगृध्नुः - न गृध्नुः अगृध्नुः इति नञ्तत्पुरुषसमासः।
- आददे - आङ्पूर्वकात् दाधातोः लिट्लकारे आददे इति रूपम्।
- असक्तः - न सक्तः इति असक्तः इति नञ्तत्पुरुषसमासः।
- अन्वभूत् - अनुपूर्वकात् भूधातोः लुङ्लकारे प्रथमपुरुषस्य एकवचने अन्वभूत् इति रूपम्।

सन्धिकार्यम् -

- जुगोपात्मानमत्रस्तो भेजे - जुगोप+आत्मानम्+अत्रस्तः+भेजे
- धर्ममनातुरः - धर्मम्+अनातुरः
- अगृध्नुराददे - अगृध्नुः+आददे
- सोर्थमसक्तः - सः+अर्थम्+असक्तः
- सुखमन्वभूत् -सुखम्+अन्वभूत्
- **प्रयोगपरिवर्तनम्** - तेन अत्रस्तेन आत्मा जुगुपे, अनातुरेण धर्मः भेजे, अगृध्नुना अर्थः आददे, असक्तेन सुखम् अन्वभूयत।

पाठगतप्रश्नाः -११

३५. दिलीपः कथं धर्मं अर्थं कामं च सेवितवान्।

३६. पुरुषार्थानां प्रधानं साधनं किम्।

३७. जुगोपात्मानमत्रस्तो भेजे इत्यत्र सन्धिविच्छेदं कुरुत।

३८. दिलीपः शरीरं कथं रक्षितवान्

१) स शत्रुभ्यः भीतः आसीत्

२) स मृत्योःभीतः आसीत्

३) स पुरुषार्थान् साधयितुम् इष्टवान्।

४) स जराग्रस्तः आसीत्

५.१३) इदानीं मूलपाठम् अवगच्छाम -

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।

गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।२२।।

अन्वयः - ज्ञाने मौनं, शक्तौ क्षमा, त्यागे श्लाघाविपर्ययः,(इत्थम्) तस्य गुणाः गुणानुबन्धित्वात् सप्रसवा इव (अभूवन्)।

अन्वयार्थः - ज्ञाने (सति अपि) परवृत्तान्तं ज्ञात्वा अपि मौनं मुनिभावः शक्तौ सामर्थ्ये क्षमा तितिक्षा त्यागे वितरणे श्लाघाविपर्ययः प्रशंसाभावः (इत्थम् अनेन प्रकारेण) तस्य दिलीपस्य गुणाः ज्ञानादयः गुणानुबन्धित्वात् विरुद्धगुणानां मौनादीनां सहचारात् सप्रसवाः इव सहोदराः इव अभूवन्।

सरलार्थः - दिलीपस्य ज्ञानेन साकं मौनम् आसीत्। शक्त्या सह क्षमाभावः आसीत्। त्यागेन तु आत्मप्रशंसाराहित्यम् आसीत्। इत्थं तस्य ज्ञानादयः गुणाः मौनादिभिः विरुद्धैः गुणैः सह सहोदरा इव अभवन्।

तात्पर्यार्थः - अत्रापि दिलीपस्य लोकोत्तरत्वं वर्णयति कविः। लोके प्रायः कश्चित् जनः ज्ञानी भवति चेत् स मुनिभावं न समाश्रयति। किन्तु दिलीपः परवृत्तान्तं ज्ञात्वा अपि मुनिवत् तिष्ठति स्म। वस्तुतः इदम् एव प्रकृतराज्ञः लक्षणम्। राजा यदि पण्डितः भूत्वा अपि मौनेन न तिष्ठति तर्हि तस्य हानिः एव जायते। तस्मात् शास्त्रादिषु मुखरः राजा बहुधा निन्दितः वर्तते। दिलीपः सामर्थ्यवान् अपि क्षमाशीलः आसीत्। सामर्थ्ये सति एव क्षमा प्रशंसनीया भवति। अतः दुर्बलः यदि क्षमां कुर्वन्ति तर्हि स न प्रशंसार्हः। तस्मात् मनुस्मृतौ उच्यते- 'शक्तानां भूषणं क्षमा' इति। लोके जनाः त्यागं कृत्वा समुद्घोषयन्ति। किन्तु दिलीपः दानादिकर्म कृत्वा अपि कीर्तनं न करोति स्म। एवं तस्य प्रशंसा अभीष्टा न आसीत्। वस्तुतः ज्ञानादयः गुणाः मौनादयः गुणाः च परस्परं विरुद्धाः वर्तन्ते। किन्तु दिलीपस्य एते सर्वे एव गुणाः आसन्। अतः दिलीपे इमे विरुद्धाः गुणाः सहोदराः इव आसन् इति कवेः आकूतम्।

व्याकरणविमर्शः -

- मौनम् - मुनेः भावः मौनं भवति।
- श्लाघाविपर्ययः - श्लाघायाः विपर्ययः श्लाघाविपर्ययः इति षष्ठीतत्पुरुषसमासः।
- गुणानुबन्धित्वात् - गुणैः अनुबन्धित्वं गुणानुबन्धित्वम् इति तृतीयातत्पुरुषसमासः, तस्मात् गुणानुबन्धित्वात्। एतत् पञ्चम्येकवचनान्तं पदम्।
- सप्रसवाः - सह प्रसवः येषां ते सप्रसवाः इति बहुव्रीहिसमासः। प्रसवः नाम जन्म।

सन्धिकार्यम् -

- गुणा गुणानुबन्धित्वात्तस्य - गुणाः+गुणानुबन्धित्वाद्+तस्य
- सप्रसवा इव - सप्रसवाः+इव
- **प्रयोगपरिवर्तनम्** - ज्ञाने मौनेन शक्तौ क्षमया त्यागे श्लाघाविपर्ययेण तस्य गुणैः गुणानुबन्धित्वात् सप्रसवैः इव अभूयत।

पाठगतप्रश्नाः - १२

३९. दिलीपस्य ज्ञानेन साकं कः गुणः आसीत्।

४०. ज्ञानादयः गुणाः कैः गुणैः सह सहोदराः इव आसन्।

४१. केषां क्षमा प्रशंसार्हा-

१) बुद्धिमताम् २) बलवताम् ३) धनवताम् ४) दुर्वलानाम्

५.१४) इदानीं मूलपाठम् अवगच्छाम -

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।

तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना।।२३।।

अन्वयः - विषयैः अनाकृष्टस्य विद्यानां पारदृश्वनः धर्मरतेः तस्य जरसा विना वृद्धत्वम् आसीत्।

अन्वयार्थः - विषयैः रूपादिभिः अनाकृष्टस्य अवशीभूतस्य विद्यानां पारदृश्वनः वेदादीन् सम्पूर्णतया पठितवतः धर्मरतेः पुण्यानुरागस्य तस्य दिलीपस्य जरसा विना वृद्धत्वं विना वृद्धत्वं वार्धकम् आसीत् अभवत्।

सरलार्थः - दिलीपः रूपादिभिः विषयैः आकृष्टः न आसीत्। स वेदादिषु सर्वेषु एव शास्त्रेषु पारदर्शी आसीत्। धर्मे अपि तस्य प्रगाढः अनुरागः आसीत्। अतः स जरसा विना वृद्धः अभवत्। दिलीपः ज्ञानवृद्धः आसीत् इति आशयः।

तात्पर्यार्थः - अस्मिन् श्लोके दिलीपस्य ज्ञानवृद्धत्वं वर्णयति कविः। रूपरसगन्धस्पर्शशब्दाः पञ्च विषया दिलीपं न आकर्षन्ति स्म। अर्थात् दिलीपः तैः वशीभूतः न भवति स्म। एतेन स इन्दियसंयमी आसीत् इति अवगम्यते। स वेदवेदाङ्गादीनि सर्वाणि शास्त्राणि आमूलम् अधीतवान्। एतेन तस्य विद्वत्ता सूच्यते। एवं दिलीपे विषयवैराग्यं शास्त्रेषु पाण्डित्यम् इत्यनयोः महान् समन्वयः आसीत्। अपि च स सर्वदा धर्मासक्तः आसीत्। धर्मवशात् च तस्मिन् वैराग्यं सम्यक् फलितम्। किञ्च इन्द्रियसंयमेन सह स विद्याम् अर्जितवान्। अतः तस्य विद्यार्जनम् अपि सम्यक् एव सञ्जातम्। एवं यद्यपि महाराजः दिलीपः वयसा वृद्धः नासीत्। तथापि ज्ञानकारणात् वैराग्यकारणात् च स ज्ञानवृद्धः आसीत् इति तस्मिन् वृद्धत्वम् आरोपयति कविः।

व्याकरणविमर्शः -

- अनाकृष्टस्य - न आकृष्टः अनाकृष्टः इति नञ्तत्पुरुषसमासः, तस्य अनाकृष्टस्य।
- पारदृश्वनः - पारं दृष्टवान् इति पारदृश्वा, तस्य पारदृश्वनः। पारद्रष्टुः इत्यर्थः।

- धर्मरतेः - धर्मे रतिः यस्य स धर्मरतिः इति बहुव्रीहिसमासः, तस्य धर्मरतेः।

सन्धिकार्यम् -

- विषयैर्विद्यानाम् - विषयैः+विद्यानाम्
- धर्मरतेरासीद् - धर्मरतेः+आसीद्
- **प्रयोगपरिवर्तनम्** - विषयैः अनाकृष्टस्य विद्यानां पारदृश्वनः धर्मरतेः तस्य जरसा विना वृद्धत्वेन अभूयत।

पाठगतप्रश्नाः -१३

४२. दिलीपस्य वृद्धत्वं ज्ञानेन उत जरसा।

४३. अस्मिन् श्लोके उक्तानां दिलीपस्य विशेषणानाम् उल्लेखं कुरुत।

पाठसारः

भगवतः भास्करात् रघुवंशस्य उत्पत्तिः। पुरा स्वयम्भूवादयः चतुर्दश मनवः आसन्। तेषु सप्तमः मनुः सूर्यवंशस्य प्रथमः राजा आसीत्। स विद्वद्भिः अपि पूज्यः आसीत्। यथा समुद्रमन्थनकाले समुद्रे चन्द्रः जन्म लब्धवान् तथा मनोः वंशे काले शुद्धात्मा दिलीपः जन्म लब्धवान्। तस्य दिलीपस्य वक्षःस्थलं विशालम् आसीत्। तस्य स्कन्धः वृषस्कन्धः इव आसीत्। स शालवृक्षः इव उन्नतः दीर्घबाहुशाली च आसीत्। तस्य पराक्रमम् अवलोक्य स्वयं क्षात्रः धर्मः एव तस्य देहम् आश्रितवान् इति प्रतीयते स्म। सः अधिकबलशाली आत्मतेजसा सकलभूतानां तिरस्कारी सर्वोन्नतः च अभवत्। अतः स सुमेरुपर्वतः इव उर्वीम् आक्रम्य स्थितवान्। तस्य प्रज्ञा तस्य देहाकारसदृशी अपरिमिता आसीत्। स प्रज्ञानुसारं शास्त्राध्ययनं शास्त्रानुसारं च धर्माचरणं करोति स्म। तदनुरूपं फलम् अपि लभते स्म। तस्मिन् यथा भयङ्करगुणाः आसन् तथा मनोहरगुणाः अपि आसन्। भयङ्करगुणवशात् उपजीविनः तस्मात् विभ्यन्ति स्म। मनोहरगुणात् च तं सेवन्ते स्म। यथा समुद्रः मकरादिभिः भीषणः रत्नैः च अभीष्टपूरकः भवति। यथा निपुणस्य सारथेः रथचक्रं पूर्वचक्रेण कृतां रेखां न अतिक्रामति तथा दिलीपस्य प्रजाः अपि मनुवचनं किञ्चिदपि न उल्लङ्घितवन्तः। अनेन दिलीपस्य राज्यशासने निपुणता अवगम्यते। स प्रजानां हिताय ताभ्यः बलिं गृहीतवान्। स्वार्थसिद्धये न गृहीतवान्। यथा सूर्यः सहस्रगुणं जलं प्रदातुं पृथिव्याः जलं स्वीकरोति। स्वप्रयोजनसिद्धये न गृह्णाति। तस्य सेना उपकरणमात्रम् आसीत्। शास्त्रपाण्डित्येन धनुषि आरोपिता अप्रतिरोध्यया मौर्व्या च स प्रयोजनं साधयति स्म। स मन्त्रणां गूढतया करोति स्म। आकारेण इङ्गितेन वा तस्य मनोगतः भावः न ज्ञायते स्म। यथा अस्मिन् जन्मनि प्रवृत्तिं दृष्ट्वा जनानां

संस्काराः अनुमीयन्ते तथा कार्यसिद्धिम् अवलोक्य दिलीपस्य मनोभावाः अनुमीयन्ते स्म। स भीतरहितः अपि पुरुषार्थसिद्धये शरीरम् अरक्षत्। स रोगरहितः सन् धर्मं लोभरहितः सन् अर्थं आसक्तिरहितः सन् कामं सेवितवान्। दिलीपस्य ज्ञानेन साकं मौनम् आसीत्, शक्त्या सह क्षमा आसीत्, त्यागेन च प्रशंसाराहित्यम् आसीत्। एवम् इमे गुणाः परस्परं विरुद्धाः अपि सहोदराः इव आसन्। स इन्द्रियसंयमी आसीत्। यतो हि स रूपादिभिः अनाकृष्टः आसीत्। स बहूनि शास्त्राणि अधीतवान्। धर्मे च तस्य यथार्था प्रीतिः आसीत्। एवं यद्यपि स वयसा वृद्धः नासीत् तथापि स ज्ञानवृद्धः आसीत् इति वर्णयति कविः।

पाठान्तप्रश्नाः

१. दिलीपस्य देहवैशिष्ट्यानि विस्तारेण वर्णयत।

२. दिलीपस्य ज्ञानवृद्धत्वं कथं प्रतिपादयति कविः।

३. ज्ञाने मौनम् इत्यादिश्लोकं पूरयित्वा व्याख्यायत।

४. दृष्टान्तालङ्कारस्य एकम् उदाहरणं गृहीत्वा समन्वयं कुरुत।

५. उत्प्रेक्षालङ्कारस्य एकम् उदाहरणं गृहीत्वा समन्वयं कुरुत।

६. पाठसारं समासेन लिखत।

७. पाठे पठितान् श्लोकान् आश्रित्य दिलीपस्य चरितवर्णनं कुरुत।

८. स्तम्भयोः लिखितान् परस्परसम्बद्धान् मेलयत।

स्तम्भः-क	**स्तम्भः-ख**
१. वैवस्वतः	१. मोक्षः
२. श्लाघा	२. नृपगुणाः
३. दिलीपः	३. ज्ञानम्
४. प्रांशुः	४. दिलीपः
५.समुद्रः	५. ओङ्कारः
६. भीमकान्ताः	६. शालवृक्षः
७. मौनम्	७. राजेन्दुः
८. पुरुषार्थः	८. प्रशंसा

उत्तरम् - १-५, २-८, ३-७, ४-६, ५-४, ६-२, ७-३, ८-१

पाठगतप्रश्नानाम् उत्तराणि-

उत्तराणि-१

१. मनुः सूर्येण उपमितः। महीक्षितः छन्दोभिः उपमिताः।

२. लोके राज्ञाम् आदिमः मनुः।

३. विवस्वतः अपत्यं वैवस्वतः। विवस्वान् नाम सूर्यः।

४. ३

५. २

६. १

उत्तराणि-२

७. अस्मिन् श्लोके दिलीपः चन्द्रेण उपमितः। मनुवंशः च क्षीरनिधिना उपमितः।

८. अस्मिन् श्लोके तदन्वये अर्थात् मनुवंशे अपि च दिलीपः इति पदद्वयम् उपमेयवाचकम्। क्षीरनिधौ इन्दुः इति च द्वे पदे उपमानवाचके। इव इति उपमावाचकः शब्दः। अत्र तदन्वयः क्षीरनिधिना उपमीयते। दिलीपः च क्षीरनिधौ उत्पन्नेन इन्दुना उपमीयते। यथा क्षीरनिधौ चन्द्रः उत्पन्नः तथा मनुवंशे दिलीपः उत्पन्नः इति सादृश्यम्। अतः अत्र उपमालङ्कारः अस्ति।

९. राजा इन्दुः इव इति विग्रहे राजेन्दुः इति भवति। अत्र उपमेयपदपूर्वककर्मधारयसमासः अस्ति।

१०. २

११. ३

उत्तराणि-३

१२. दिलीपस्य स्कन्धः वृषभस्य स्कन्धवत् आसीत्।

१३. शाल इव प्रांशुः शालप्रांशुः इति उपमानपदपूर्वककर्मधारयसमासः।

उत्तराणि-४

१४. अत्र दिलीपं सुमेरुपर्वतेन सह उपमितवान् कविः।

१५. अतिरिक्तः सारः यस्य सः अतिरिक्तसारः इति बहुव्रीहिसमासः। सर्वेभ्यः अतिरिक्तसारः सर्वातिरिक्तसारः इति पञ्चमीतत्पुरुषसमासः, तेन सर्वातिरिक्तसारेण।

१६. सुमेरुपर्वतः पृथिवीम् आक्रम्य स्थितः।

उत्तराणि-५

१७. आगमशब्दस्य अर्थः शास्त्रम्। आरम्भशब्दस्य अर्थः कार्यम्।

१८. दिलीपस्य प्रज्ञा तस्य देहसदृशी आसीत्।

१९. सदृशी प्रज्ञा यस्य सः सदृशप्रज्ञः इति बहुव्रीहिसमासः। आकारेण सदृशप्रज्ञः आकारसदृशप्रज्ञः

इति तृतीयातत्पुरुषसमासः।

२०. ३

उत्तराणि-६

२१. दिलीपः भयङ्करैः नृपगुणैः उपजीविनाम् अधृष्यः कान्तैः च नृपगुणैः तेषाम् अभिगम्यः आसीत्।

२२. प्रस्तुते श्लोके दृष्टान्तालङ्कारः अस्ति।

२३. अधृष्यः+च+अधिगम्यः+च

उत्तराणि-७

२४. रथस्य चक्रं पूर्ववर्तिना चक्रेण कृतां रेखां न अतिक्रामति।

२५. क्षुण्णात्+आमनोः+वर्त्मनः

२६. नियन्तुः तस्य नेमिवृत्तयः प्रजाः आमनोः क्षुण्णात् वर्त्मनः परं रेखामात्रम् अपि न व्यतीयुः।

उत्तराणि-८

२७. दिलीपः प्रजानां भूत्यर्थं बलिम् अग्रहीत्।

२८. प्रस्तुते श्लोके दृष्टान्तालङ्कारः अस्ति।

२९. दिलीपस्य करग्रहणं सूर्यस्य रसग्रहणम् इव आसीत्। सूर्यः सम्पूर्णं वर्षं व्याप्य पृथिव्याः जलं शुष्यति। ग्रीष्मकाले पृथिवी जलाभावेन शुष्का भवति। तदा सूर्यः सहस्रगुणं जलं वर्षणरूपेण प्रददाति। एवं सूर्यः जलशोषणं स्वभोगाय न करोति। अपि तु अधिकं जलं प्रत्यर्पयितुम् एव स पृथिव्याः जलं स्वीकरोति। एवं दिलीपः अपि प्रजाकल्याणाय करं गृहीतवान्।

उत्तराणि–९

३०. शास्त्रेषु अकुण्ठिता बुद्धिः धनुषि आरोपिता ज्या च दिलीपस्य अर्थसाधनद्वयम् आसीत्।

३१. दिलीपस्य सेना परिच्छदः आसीत्।

३२. शास्त्रेष्वकुण्ठिता

उत्तराणि-१०

३३. दिलीपस्य प्रारम्भाः प्राक्तनैः संस्कारैः उपमिताः।

३४. आकारः च इङ्गितं च आकारेङ्गिते इति इतरेतरद्वन्द्वसमासः। गूढे आकारेङ्गिते यस्य स गूढाकारेङ्गितः इति बहुव्रीहिसमासः, तस्य गूढाकारेङ्गितस्य।

उत्तराणि-११

३५. दिलीपः अनातुरः सन् धर्मं लोभरहितः सन् अर्थं अनासक्तः सन् कामं च सेवितवान्।

३६. पुरुषार्थानां प्रधानं साधनं शरीरम्।

३७. जुगोप+आत्मानम्+अत्रस्तः+भेजे

३८. ३

उत्तराणि-१२

३९. दिलीपस्य ज्ञानेन साकं मौनम् आसीत्।

४०. ज्ञानादयः गुणाः मौनादिभिः गुणैः सह सहोदराः इव आसन्।

४१. २

उत्तराणि-१३

४२. दिलीपस्य वृद्धत्वं ज्ञानेन आसीत्।

४३. विषयैः अनाकृष्टत्वं ,विद्यानां पारदृश्वत्वं, धर्मरतित्वम्- एतानि त्रीणि अस्मिन् श्लोके उल्लिखितानि विशेषणानि।

॥ इति पञ्चमः पाठः ॥

६

348sk06

रघुवंशम्- राज्ञो दिलीपस्य गुणवर्णनम् - २

प्रस्तावना

अस्मिन् पाठे वयं तदनन्तरम् एकादश श्लोकान् पठामः। अत्र कविः प्रथमतः सूर्यवंशीयस्य महाराजदिलीपस्य प्रजावात्सल्यं वर्णयति। ततः च एकैकशः दिलीपे ये राजोचिताः गुणाः आसन् तान् गुणान् वर्णयति। ततः दिलीपस्य पत्न्याः नामोल्लेखं कृत्वा तस्याः गुणवर्णनं करोति। तयोः दिलीपसुदक्षिणयोः विवाहात् परं बहूनि वर्षाणि व्यतीतानि। तथापि दिलीपस्य सन्तानप्राप्तिः न अभवत्। अतः सन्तानाभावात् दिलीपः अतीव दुःखितः आसीत्। एवं सन्तानलाभाय शास्त्रविहितम् अनुष्ठानादिकं करणीयम् इति चिन्तयित्वा स समग्रस्य राज्यस्य भारं मन्त्रिभ्यः प्रदत्तवान्।

उद्देश्यानि

अमुं पाठं पठित्वा भवान्-

- दिलीपस्य प्रजावात्सल्यं जानीयात्।
- तस्य अपरान् च लोकोत्तरगुणान् अवगच्छेत्।
- दिलीपः कथं राज्यभारं मन्त्रिभ्यः प्रदत्तवान् इति बोद्धुं शक्नुयात्।
- दिलीपस्य पत्नीविषये ज्ञातुं पारयेत्।
- प्रत्येकं श्लोकानाम् अन्वयादिकं जानीयात्।
- समासादीन् व्याकरणविषयान् अपि बोद्धुं शक्नुयात्।

६.१) मूलपाठः -

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।

स पिता पितरस्तासां केवलं जन्महेतवः।।२४।।

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये।

अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।।२५।।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।

संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।२६।।

न किलानुययुस्तस्य राजानो रक्षितुर्यशः।

व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता।।२७।।

द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।

त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।।२८।।

तं वेधा विदधे नूनं महाभूतसमाधिना।

तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः।।२९।।

स वेलावप्रवलयां परिखीकृतसागराम्।

अनन्यशासनामूर्वीं शशासैकपुरीमिव।।३०।।

तस्य दाक्षिण्यरुढेन नाम्ना मगधवंशजा।

पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।३१।।

कलत्रवन्तमात्मानमवरोधे महत्यपि।

तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः।।३२।।

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।

विलम्बितफलैः कालं स निनाय मनोरथैः।।३३।।

सन्तानार्थाय विधये स्वभुजादवतारिता।

तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे।।३४।।

६.२) इदानीं मूलपाठम् अवगच्छाम -

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।

स पिता पितरस्तासां केवलं जन्महेतवः।।२४।।

अन्वयः - प्रजानां विनयाधानात् रक्षणात् भरणात् अपि स पिता (आसीत्)। तासां पितरस्तु केवलं जन्महेतवः।

अन्वयार्थः - प्रजानां जनानां विनयाधानात् शिक्षाकारणात् रक्षणात् पालनात् भरणात् अपि पोषणात् अपि सः दिलीपः पिता पितृस्थानीयः आसीत्। तासां पितरः तु जनकाः तु जन्महेतवः जननकारणानि केवलम् एव।

सरलार्थः - प्रजाभ्यः शिक्षाप्रदानं तासां रक्षणभरणादिकं सर्वं दिलीपः एव करोति स्म। अतः पितृकार्यकरणात् स प्रजानां पिता सञ्जातः। तासां प्रकृताः जनकाः केवलं जन्मकारणानि आसन्।

तात्पर्यार्थः - यः पालयति स पिता भवति। स एव पुत्राय उपयुक्तां शिक्षां प्रदाय तं सन्मार्गे प्रवर्तयति। जनकः पुत्रस्य रक्षणं भरणं पोषणं च करोति। दिलीपस्य राज्ये जनानां जन्म प्रति एव तेषां

पितरः हेतवः आसन्। प्रकृतं पितृकार्यं तु दिलीपः करोति स्म। यतः स एव प्रजानां शिक्षाव्यवस्थां पश्यति स्म। जनाः विपद्ग्रस्ताः चेत् स एव तान् रक्षति स्म। अन्नपानादिभिः विषयैः स एव तान् यथार्थं पालयति स्म। वस्तुतः यः प्रकृतः राजा भवति स इत्थम् एव स्वराज्यं चालयति। अनेन दिलीपः यथार्थः प्रजापालकः राजा आसीत् इति सुष्ठु अवगम्यते। अतः दिलीपस्य राज्ये पितरः जननकारणमात्राणि आसन्। तेषां प्रकृतः जनकः तु स्वयं राजा दिलीपः एव आसीत्।

व्याकरणविमर्शः -

- विनयाधानात् - विनयस्य आधानं विनयाधानम् इति षष्ठीतत्पुरुषसमासः, तस्मात् विनयाधानात्।
- जन्महेतवः - जन्मनः हेतवः जन्महेतवः इति षष्ठीतत्पुरुषसमासः।

सन्धिकार्याणि -

- विनयाधानाद्रक्षणाद्भरणादपि - विनयाधानात्+रक्षणात्+भरणात्+अपि
- पितरस्तासाम् -पितरः+तासाम्
- **प्रयोगपरिवर्तनम्** - प्रजानां विनयाधानात् रक्षणात् भरणात् अपि तेन पित्रा अभूयत। तासां पितृभिः तु केवलं जन्महेतुभिः अभूयत।

पाठगतप्रश्नाः -१

१. दिलीपः कथं प्रजानां पिता।

२. जनानां पितरः के आसन्.।

३. विनयाधानात् इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

४. प्रजानां पितरः के आसन् -

१) मृत्युहेतवः २) वृद्धिहेतवः ३) जन्महेतवः ४) दोषहेतवः

६.३) इदानीं मूलपाठम् अवगच्छाम -

स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये।

अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।।२५।।

अन्वयः - दण्ड्यान् स्थित्यै दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामौ अपि धर्म एव आस्ताम्।

अन्वयार्थः - दण्ड्यान् दण्डनीयान् स्थित्यै लोकमर्यादायै दण्डयतः तेभ्यः दण्डं यच्छतः प्रसूतये सन्तानाय परिणेतुः विवाहं कुर्वतः तस्य दिलीपस्य अर्थकामौ एतन्नामकौ द्वौ पुरुषार्थौ अपि धर्म एव धर्मनामकपुरुषार्थ एव आस्ताम् अभवताम्।

सरलार्थः - लोककल्याणाय दिलीपः दण्डयोग्यान् अदण्डयत्। पुत्रोत्पादनाय स विवाहम् अकरोत्। एवं तस्य अर्थः कामः इति द्वौ पुरुषार्थौ धर्मस्वरूपौ एव आस्ताम्।

तात्पर्यार्थः - महाराजः दिलीपः जगतः हिताय दण्ड्यान् दण्डयति स्म। तत्र धनसंग्रहः तस्य उद्देश्यं न आसीत्। लोके प्रायः दण्डं धनसंग्रहाय प्रयुञ्जते जनाः। किन्तु दिलीपः तेन एव दण्डेन लोककल्याणरूपं धर्मं साधितवान्। अतः तस्य अर्थसाधनं धर्मम् एव साधयति इति प्राप्तम्। जगति प्रायः जनाः कामेन वशीभूताः भवन्ति। तस्य कामस्य शान्तये एव ते विवाहं कुर्वन्ति। किन्तु दिलीपः भोगाय विवाहं न कृतवान्। अपि तु सन्तानम् उत्पादयितुं परिणीतवान्। अनेन स पितृणम् अपि पूरितवान्। लोके भोगाय एव विवहन्ति जनाः। किन्तु अत्र तु परिणयेन पितृणपूरणरूपः धर्मः एव साधितः भवति। अतः दिलीपस्य कामसाधनम् अपि धर्मम् एव साधयति स्म। एवं दिलीपस्य अर्थकामौ अपि धर्मपरतां प्राप्तवन्तौ। अनेन तस्य सर्वं कार्यं धर्मपरकम् एव आसीत् इति वर्णयति कविः।

व्याकरणविमर्शः -

- दण्डयतः - दण्ड्धातोः णिचि निष्पन्नात् दण्डिधातोः शतृप्रत्यये दण्डयत् इति प्रातिपदिकं भवति। तस्य षष्ठ्येकवचनविवक्षायां दण्डयतः इति रूपम्।
- दण्ड्यान् - दण्डम् अर्हन्ति इति दण्ड्याः, तान् दण्ड्यान्। द्वितीयाबहुवचनान्तम् इदं पदम्।
- अर्थकामौ - अर्थः च कामः च अर्थकामौ इति इतरेतरयोगद्वन्द्वसमासः।

सन्धिकार्यम् -

- दण्डयतो दण्ड्यान् - दण्डयतः+दण्ड्यान्
- अप्यर्थकामौ - अपि+अर्थकामौ
- तस्यास्ताम् - तस्याः+ताम्
- धर्म एव - धर्मः+एव
- **प्रयोगपरिवर्तनम्** - दण्ड्यान् स्थित्यै दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामाभ्यां अपि धर्मेण एव अभूयत।

पाठगतप्रश्नाः -२

५. दिलीपः दण्ड्यान् कथं दण्डितवान्।

६. दिलीपस्य अर्थकामौ कः आसीत्।

७. दण्डयतः इति कस्य प्रातिपदिकस्य रूपम्। तत् कस्याः विभक्तेः कस्मिन् वचने भवति।

८. दिलीपस्य अर्थकामौ किम् आसीत् –

१) धर्मः २) अर्थः ३) कामः ४) मोक्षः

६.४) इदानीं मूलपाठम् अवगच्छाम -

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।

सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।२६।।

अन्वयः- स यज्ञाय गां दुदोह, मघवा सस्याय दिवं दुदोह। (एवम्) उभौ सम्पद्विनिमयेन भुवनद्वयं दधतुः।

अन्वयार्थः - स राजा दिलीपः यज्ञाय यज्ञं कर्तुं गां पृथिवीं दुदोह दुग्धवान्। मघवा देवराजः इन्द्रः सस्याय धान्याय दिवं स्वर्गं दुदोह दुग्धवान्। उभौ दिलीपदेवेन्द्रौ सम्पद्विनिमयेन परस्परं सम्पत्त्याः विनिमयेन भुवनद्वयं लोकद्वयं दधतुः पोषितवन्तौ।

सरलार्थः - दिलीपः यज्ञेन स्वर्गस्थान् देवान् प्रसादयितुं प्रजाभ्यः करं स्वीकृतवान्। देवराजः इन्द्रः च स्वर्गलोकात् पृथिवीलोके वर्षणं कृतवान्। एवं परस्परं सम्पद्विनिमयेन उभौ लोकद्वयं पोषितवन्तौ।

तात्पर्यार्थः - दिलीपेन सह देवराजस्य इन्द्रस्य सख्यता आसीत्। अतः तयोः मध्ये सम्पद्विनिमयः अभवत्। दिलीपः देवानां प्रसादाय यज्ञादिकम् अकरोत्। तदर्थं स प्रजाभ्यः करं गृह्णाति स्म। कररूपेण यद् धनं संगृह्णाति स्म तेन एव देवयज्ञं करोति स्म। अतः दिलीपः यज्ञाय गां दुदोह इति वर्णयति कविः। तेन च यज्ञेन सन्तुष्टः भूत्वा इन्द्रः पृथिव्यां वर्षणम् अकरोत्। तेन धरणी सस्यायिता भवति स्म। तेभ्यः एव सस्येभ्यः जनाः धनार्जनं कृत्वा करं ददति स्म। एवं दिलीपः यज्ञादिना स्वर्गं पोषितवान्। देवराजः इन्द्रः वर्षणेन पृथिवीं पोषितवान्। एवम् उभौ परस्परं परिपोषकौ भूत्वा पृथिवीं स्वर्गं च पालितवन्तौ।

व्याकरणविमर्शः -

- दुदोह - दुह्-धातोः लिट्लकारे प्रथमपुरुषैकवचने दुदोह इति रूपम्। दुग्धवान् इत्यर्थः।
- सम्पद्विनिमयेन - सम्पदः विनिमयः सम्पद्विनिमयः इति षष्ठीतत्पुरुषसमासः, तेन सम्पद्विनिमयेन।
- दधतुः - धा-धातोः लिट्लकारे प्रथमपुरुषद्विवचने दधतुः इति रुपम्। पोषितवन्तौ इत्यर्थः।
- भुवनद्वयम् - भुवनयोः द्वयं भुवनद्वयम् इति षष्ठीतत्पुरुषसमासः।

सन्धिकार्यम् -

- सम्पद्विनिमयेनोभौ - सम्पद्विनिमयेन+उभौ
- दधतुर्भुवनद्वयम् - दधतुः+भुवनद्वयम्
- **प्रयोगपरिवर्तनम्** - तेन यज्ञाय गौः मघोना सस्याय द्यौः दुदुहे। (एवम्) उभाभ्यां सम्पद्विनिमयेन

भुवनद्वयं दधे।

पाठगतप्रश्नाः -३

९. दिलीपः कथं पृथिवीं दुग्धवान्।

१०. भुवनद्वयं नाम किम्।

११. दुदोह इति रूपं कस्य धातोः कस्मिन् लकारे भवति।

१२. दिलीपः केन साकं सम्पद्विनिमयं कृतवान् –

१) बलिना २) वरुणेन ३) सूर्येण ४) इन्द्रेण

६.५) इदानीं मूलपाठम् अवगच्छाम -

न किलानुययुस्तस्य राजानो रक्षितुर्यशः।

व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता।।२७।।

अन्वयः - राजानः रक्षितुः तस्य यशो न अनुययुः किल। यत् तस्करता परस्वेभ्यो व्यावृत्ता (सती) श्रुतौ स्थिता।

अन्वयार्थः - राजानः अन्ये नृपाः रक्षितुः रक्षकस्य तस्य दिलीपस्य यशः कीर्तिः न अनुययुः न अनुकृतवन्तः किल खलु। यत् यतः तस्करता चौर्यं परस्वेभ्यः अन्यद्रव्येभ्यः व्यावृत्ता निवृत्ता सती श्रुतौ शब्दे स्थिता आसीत्।

सरलार्थः - दिलीपस्य राज्ये कोपि तस्करः नासीत्। तस्करता केवलं शब्दरूपेण श्रूयते स्म। वास्तविकतया तस्करता तत्र नासीत्। अतः अन्ये राजानः दिलीपस्य यशः न अनुकृतवान्।

तात्पर्यार्थः - जगति अन्येषु नृपेषु दिलीपः विलक्षणः आसीत्। शासनकाले स प्रजानां मानसिकीं प्रवृत्तिम् एव परिवर्तितवान्। तस्मात् कारणात् दिलीपस्य राज्ये कोपि जनः चौरः नासीत्। न केवलम् एतत्, अपि तु तस्करता एव समाजे नासीत्। पूर्वकाले या तस्करता परधनेषु आसीत् इदानीं सा तत्र नास्ति। जनाः केवलं तस्करताशब्दं श्रुतवन्तः किन्तु कथं भवति सा इति कदापि न अनुभूतवन्तः। शशशृङ्गम् इव तत् अलीकम् आसीत्। अतः तस्करताशब्दमात्रं दिलीपस्य राज्ये आसीत् इति वर्णयति कविः। अतः एव पार्श्ववर्तिनः अन्ये नृपाः ईर्ष्यान्विताः भवन्ति स्म। ते तस्य यशः अनुकर्तुं प्रचेष्टाम् अपि कृतवन्तः। किन्तु दिलीपस्य तादृशीं कीर्तिम् अनुकर्तुं ते समर्थाः न अभवन्।

व्याकरणविमर्शः -

- अनुययुः - अनु-पूर्वकात् याधातोः लिटि प्रथमपुरुषबहुवचनविवक्षायां अनुययुः इति रुपम्।

अनुकृतवन्तः इत्यर्थः।

- व्यावृत्ता - विपूर्वकात् आङ्पूर्वकात् वृत्-धातोः क्तप्रत्यये व्यावृत्त इति रूपम्। ततः स्त्रियां टाप्प्रत्यये व्यावृत्ता इति रूपम्।
- परस्वेभ्यः - परेषां स्वानि परस्वानि इति षष्ठीतत्पुरुषसमासः, तेभ्यः परस्वेभ्यः।
- तस्करता - तस्करस्य भावः तस्करता। अत्र तस्करशब्दात् तल्प्रत्ययः कृतः।

सन्धिकार्यम्-

- किलानुययुस्तस्य - किल+अनुययुः+तस्य
- राजानो रक्षितुर्यशः - राजानः+रक्षितुः+यशः
- **प्रयोगपरिवर्तनम्** - राजभिः रक्षितुः तस्य यशः न अनुयये किल। यत् तस्करतया परस्वेभ्यः व्यावृत्तया (सत्या) श्रुतौ स्थितम्।

पाठगतप्रश्नाः -४

१३. दिलीपस्य राज्ये तस्करता कुत्र आसीत्।

१४. अनुययुः इति कस्य धातोः कस्मिन् लकारे भवति। कः च तस्य अर्थः।

१५. किलानुययुस्तस्य इत्यत्र सन्धिविच्छेदं कुरुत।

६.६) इदानीं मूलपाठम् अवगच्छाम -

द्वेष्योपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।

त्याज्यो दुष्टः प्रियोप्यासीदङ्गुलीवोरगक्षता।।२८।।

अन्वयः - शिष्टः द्वेष्यः अपि आर्त्तस्य औषधं यथा तस्य सम्मतः (आसीत्)। दुष्टः प्रियः अपि उरगक्षता अङ्गुली इव तस्य त्याज्यः आसीत्।

अन्वयार्थः - शिष्टः सज्जनः द्वेष्यः अपि शत्रुः अपि आर्त्तस्य रोगिणः औषधं यथा भेषजम् इव तस्य दिलीपस्य सम्मतः अनुमतः आसीत्। दुष्टः दुर्जनः प्रियः अपि आत्मीयः अपि उरगक्षता सर्पेण दष्टा अङ्गुली इव अङ्गुलीवत् तस्य दिलीपस्य त्याज्यः त्यागयोग्यः आसीत् अभवत्।

सरलार्थः - सच्चरित्रशाली जनः शत्रुः अपि दिलीपेन ग्रहणीयः आसीत् यथा रोगिणा औषधं ग्रहणीयं भवति। दुर्जनः आत्मीयः अपि दिलीपेन त्याज्यः आसीत् यथा सर्पेण दष्टा अङ्गुली त्यक्तव्या भवति।

तात्पर्यार्थः - जगति स्थितानां सर्वेषाम् एव जनानां केचन शत्रवः भवन्ति, केचन च बन्धवः भवन्ति। जनाः कारणं विना एव शत्रुभिः साकं कलहायन्ते। किन्तु सुहृदः दुष्टम् आचरन्ति चेत् अपि तैः साकं मित्रत्वं स्थापयन्ति। किन्तु दिलीपस्य स्वभावः तथा नासीत्। औषधं सदा एव रुचिरहितं भवति। तथापि रोगिणा तत् ग्राह्यं भवति। अन्यथा रोगोपशमः न सम्भवति। एवं शत्रुः अपि सत्कार्यम् आचरति चेत् स दिलीपेन आद्रियते स्म। शत्रुत्वम् आश्रित्य दिलीपः तं न त्यजति स्म। सर्पेण दष्टा अङ्गुली प्रिया भवति। तथापि सा त्यक्तव्या भवति। अन्यथा जनस्य मरणम् एव सम्भवति। एवम् आत्मीयः अपि दुष्टाचरणम् अकरोत् चेत् दिलीपः तेन सह सम्बन्धं नाशयति स्म। एवं सच्चरित्रशाली एव दिलीपस्य मित्रम् आसीत्। दुश्चरित्रशाली च दिलीपस्य शत्रुः आसीत् इति आगच्छति। कारणान्तरेण जातस्य शत्रुत्वस्य कारणान्तरेण जातस्य मित्रत्वस्य च नासीत् किञ्चिद् अपि स्थानम्।

व्याकरणविमर्शः -

- द्वेष्यः - द्वेष्टुं योग्यः इत्यर्थे द्विष्-धातोः ण्यत्प्रत्यये द्वेष्यः इति रूपम्। द्वेषयोग्यः इत्यर्थः।
- सम्मतः - सम्पूर्वकात् मन्-धातोः क्तप्रत्यये सम्मतः इति रूपम्।
- त्याज्यः - त्यक्तुं योग्यः इत्यर्थे त्यज्-धातोः ण्यत्प्रत्यये त्याज्यः इति रूपम्।
- उरगक्षता - उरगेण क्षता उरगक्षता इति तृतीयातत्पुरुषसमासः। उरगः नाम सर्पः।

सन्धिकार्यम् -

- द्वेष्योपि - द्वेष्यः+अपि
- शिष्टस्तस्यार्त्तस्य – शिष्टः+तस्य+आर्त्तस्य
- यथौषधम् - यथा+औषधम्
- त्याज्यो दुष्टः - त्याज्यः+दुष्टः
- प्रियोप्यासीदङ्गुलीवोरगक्षता - प्रियः+अपि+आसीत्+अङ्गुली+इव+उरगक्षता
- **प्रयोगपरिवर्तनम्** - शिष्टेन द्वेष्येण अपि आर्त्तस्य औषधेन यथा तस्य सम्मतेन अभूयत। दुष्टेन प्रियेण अपि उरगक्षतया अङ्गुल्या इव तस्य त्याज्येन अभूयत।

अलङ्कारालोचना - अस्मिन् श्लोके शिष्टः शत्रुः औषधेन उपमितः। दुष्टः प्रियः च उरगक्षतया अङ्गुल्या उपमितः। अतः अत्र शिष्टः शत्रुः दुष्टः प्रियः च उपमेयवाचकौ। औषधः सर्पदष्टा अङ्गुली च उपमानवाचकौ। इव इति उपमावाचकः शब्दः च वर्तते। यथा औषधं ग्रहणीयं तथा शिष्टः शत्रुः ग्राह्यः। यथा सर्पदष्टा अङ्गुली त्याज्या तथा दुष्टः प्रियः अपि त्याज्यः इति सादृश्यम्। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -५

१६. दिलीपस्य शत्रुः अपि शिष्टः चेत् कथम् आसीत्।

१७. दिलीपस्य आत्मीयः अपि दुष्टः चेत् कथम् आसीत्।

१८. प्रियोप्यासीदङ्गुलीवोरगक्षता इत्यत्र सन्धिविच्छेदं कुरुत।

१९. उरगः नाम किम् -

१) पक्षी २) सर्पः ३) मार्जारः ४) इन्दुरः

६.७) इदानीं मूलपाठम् अवगच्छाम -

तं वेधा विदधे नूनं महाभूतसमाधिना।

तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः।।२९।।

अन्वयः - वेधाः तं महाभूतसमाधिना विदधे नूनम्। तथा हि तस्य सर्वे गुणाः परार्थैकफला आसन्।

अन्वयार्थः - वेधाः ब्रह्मा तं दिलीपं महाभूतसमाधिना पृथिव्यादिभिः महाभूतकारणसामग्रीभिः विदधे सृष्टवान् नूनम् अवश्यम्। तथा हि तस्य दिलीपस्य सर्वे सकलाः गुणाः परार्थैकफलाः अन्यस्य प्रयोजनं साधयन्तः आसन् अभवन्।

सरलार्थः - ब्रह्मा पञ्च महाभूतानि यैः उपकरणैः सृष्टवान् तैः एव उपकरणैः दिलीपम् अपि सृष्टवान्। अतः यथा पञ्च महाभूतानि परार्थं सन्ति तथा दिलीपस्य सर्वे गुणाः परार्थमेव आसन्।

तात्पर्यार्थः - अस्मिन् श्लोके कविः दिलीपस्य परोपकारितां वर्णयति। पृथिवी जलं तेजः वायुः आकाशम् इति पञ्च महाभूतानि भवन्ति। एतैः एव विधाता जगत् सृष्टवान्। एतेषां पञ्चमहाभूतानां यथाक्रमं गन्धः रसः रूपं स्पर्शः शब्दः एते पञ्च गुणाः सन्ति। गन्धः स्वयं गन्धं न स्वीकरोति। किन्तु गन्धेन अन्ये आनन्दिताः भवन्ति। रसः स्वयं रसं न गृह्णाति। किन्तु अन्ये रसं गृहीत्वा मोदिताः भवन्ति। एवम् एते गुणाः अन्येषां प्रयोजनम् एव साधयन्ति। एताभिः महाभूतानां सामग्रीभिः दिलीपम् अपि सृष्टवान् भगवान्। अतः यथा महाभूतानां कारणानि गन्धादीनि परार्थं साधयन्ति तथा दिलीपस्य प्रत्येकं कार्यं परार्थम् आसीत्। स सम्पूर्णम् अपि जीवनं परप्रयोजनसिद्धये एव नियुक्तवान्। तेन स यथार्थः परोपकारी सञ्जातः। तस्मादेव तस्य सर्वे गुणाः परार्थैकफला इति वर्णयति कविः।

व्याकरणविमर्शः -

- विदधे - विपूर्वकात् धाधातोः लिटि प्रथमपुरुषैकवचने विदधे इति रूपम्। विहितवान् इत्यर्थः।
- महाभूतसमाधिना - महान्ति च तानि भूतानि महाभूतानि इति कर्मधारयसमासः। महाभूतानां समाधिः महाभूतसमाधिः इति षष्ठीतत्पुरुषसमासः, तेन महाभूतसमाधिना। इदं तृतीयैकवचनान्तं रूपम्।
- परार्थैकफलाः - परस्य अर्थः परार्थः इति षष्ठीतत्पुरुषसमासः। परार्थ एव एकं फलं येषां ते परार्थैकफलाः इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- तस्यासन् - तस्य+आसन्
- परार्थैकफला गुणाः - परार्थैकफलाः+गुणाः
- **प्रयोगपरिवर्तनम्** - वेधसा स महाभूतसमाधिना विदधे नूनम्। तथा हि तस्य सर्वैः गुणैः परार्थैकफलैः अभूयत।

पाठगतप्रश्नाः -६

२०. दिलीपस्य सर्वे गुणाः कथं परार्थैकफलाः।

२१. विदधे इति रूपं कस्य धातोः कस्मिन् लकारे भवति।

२२. महाभूतसमाधिना इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

६.८) इदानीं मूलपाठम् अवगच्छाम -

स वेलावप्रवलयां परिखीकृतसागराम्।

अनन्यशासनामुर्वीं शशासैकपुरीमिव।।३०।।

अन्वयः - स वेलावप्रवलयां परिखीकृतसागराम् अनन्यशासनाम् उर्वीम् एकपुरीम् इव शशास।

अन्वयार्थः - स राजा दिलीपः वेलावप्रवलयां समुद्रतटरूपेण प्राकारेण वेष्टितां परिखीकृतसागराम् खेयीकृतः सागरः यया ताम् अनन्यशासनाम् अपरनृपशासनरहिताम् उर्वीं पृथिवीम् एकपुरीम् इव एकनगरीम् इव शशास शासितवान्।

सरलार्थः - समुद्रतटं दिलीपस्य राज्यस्य प्राकारतुल्यम् आसीत्। समुद्रः च तस्य राज्यस्य परिखा आसीत्। पृथिव्याम् अन्यस्य कस्यापि शासनं नासीत्। एवं समग्रां पृथिवीं दिलीपः एकपूरीम् इव शासितवान्।

तात्पर्यार्थः - प्रत्येकराज्यस्य राजानः राज्यस्य रक्षणाय कांश्चन उपायान् करोति। यथा राज्यस्य सीमान्ते प्राकारं निर्मान्ति। प्राकारस्य बहिः परिखाः खनन्ति। किन्तु दिलीपः निजराज्यस्य रक्षणाय कमपि प्राकारं न निर्मीतवान्। सागरतटः स्वतः एव तस्य राज्यस्य प्राकारः सञ्जातः। एवमेव तेन परिखाः अपि न खनिताः। समुद्रः एव तस्य सुविशालस्य राज्यस्य परिखास्वरूपः आसीत्। एतेन एव अवगम्यते यद् दिलीपस्य राज्यम् समुद्रपर्यन्तम् आसीत्। अर्थात् सम्पूर्णा एव धरणी तस्य राज्ये अन्तर्भवति स्म। अतः दिलीपं विना अन्यस्य कस्य अपि नृपस्य शासनं पृथिव्यां नासीत् इति सुष्ठु

अवगम्यते। यथा एकः नृपः एकं नगरं शास्ति तथा दिलीपः सम्पूर्णाम् अपि पृथ्वीम् एकनगरीम् इव शासितवान्।

व्याकरणविमर्शः -

- वेलावप्रवलयाम् - वप्राणां वलयाः वप्रवलयाः इति षष्ठीतत्पुरुषसमासः। वेला एव वप्रवलयाः यस्याः सा वेलावप्रवलया इति बहुव्रीहिसमासः,तां वेलावप्रवलयाम्।
- परिखीकृतसागराम् - अपरिखाः परिखाः यथा सम्पद्यन्ते तथा कृताः इति विग्रहे च्विप्रत्यये परिखीकृताः इति रुपम्। परिखीकृताः सागराः यस्याः सा परिखीकृतसागराः इति बहुव्रीहिसमासः, तां परिखीकृतसागरम्।
- अनन्यशासनाम् - अन्यस्य शासनम् अन्यशासनम् इति षष्ठीतत्पुरुषसमासः। अविद्यमानम् अन्यशासनं यस्या सा अनन्यशासना इति नञ्बहुव्रीहिसमासः, ताम् अनन्यशासनाम्।
- शशास - शास्-धातोः लिटि प्रथमपुरुषैकवचने शशास इति रूपम्।
- एकपुरीम् - एका च असौ पुरी च एकपुरी इति कर्मधारयसमासः, ताम् एकपुरीम्।

सन्धिकार्यम् -

- अनन्यशासनामुर्वीम् - अनन्यशासनाम्+उर्वीम्
- शशासैकपुरीमिव - शशास+एकपुरीम्+इव
- **प्रयोगपरिवर्तनम्** - तेन वेलावप्रवलया परिखीकृतसागरा अनन्यशासना उर्वी एकपुरी इव शशासे।

अलङ्कारालोचना - अस्मिन् श्लोके दिलीपस्य राज्यम् अर्थात् समग्रा पृथिवी एकपुर्या उपमितम्। दिलीपराज्यम् अत्र उपमेयम् अस्ति। एकपुरी इति उपमानवाचकं पदम्। इव इति उपमावाचकः शब्दः। यथा नृपाः एकं नगरं शासति तथा दिलीपः सम्पूर्णां धरणीं शासितवान्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -७

२३. दिलीपः उर्वीं काम् इव शासितवान्।

२४. प्रस्तुते श्लोके उपमालङ्कारं साधयत।

२५. परिखीकृतसागराम् इति रूपं साधयत।

६.९) इदानीं मूलपाठम् अवगच्छाम -

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।

पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।३१।।

अन्वयः - तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना अध्वरस्य दक्षिणा इव सुदक्षिणा इति पत्नी आसीत्।

अन्वयार्थः - तस्य राज्ञः दिलीपस्य मगधवंशजा मगधकुले उत्पन्नाः दाक्षिण्यरूढेन औदार्यप्रसिद्धेन नाम्ना अभिधानेन अध्वरस्य यज्ञस्य दक्षिणा दक्षिणानामधेया इव सुदक्षिणा इति सुदक्षिणा इति नाम्ना प्रसिद्धा पत्नी भार्या आसीत्।

सरलार्थः - दिलीपस्य पत्नी सुदक्षिणा मगधवंशे उत्पन्ना आसीत्। सा औदार्यकारणात् यज्ञस्य पत्नी दक्षिणा यथा सुलक्षणा अस्ति तथा आसीत् इति भावः।

तात्पर्यार्थः - अस्मिन् श्लोके दिलीपस्य पत्न्याः सुदक्षिणायाः वर्णनं करोति कालिदासः। अध्वरस्य अर्थात् यज्ञस्य पत्न्याः नाम भवति दक्षिणा। यज्ञस्य अन्ते दक्षिणा प्रदीयते। ताम् अपि यज्ञस्य अङ्गत्वेन कल्पयन्ति जनाः। तेन एव यज्ञः सम्पूर्णः भवति इति अपि अस्ति प्रसिद्धिः। एवं यज्ञस्य सम्पूर्णत्वं साधयति दक्षिणा। मगधवंशे उत्पन्ना सुदक्षिणा दिलीपस्य पत्नी आसीत्। सा च दाक्षिण्यकारणात् अत्यन्तं प्रसिद्धा आसीत्। यथा दक्षिणा यज्ञस्य सम्पूर्णतां साधयति तथा सुदक्षिणा अपि रघुकुलस्य सम्पूर्णतां साधितवती। यतः दिलीपः सुदक्षिणया एव पुत्रलाभं कृतवान्। तेन च पुत्रेण रघुकूलं सम्पूर्णतां प्राप्तवत्। अतः सुदक्षिणां यज्ञस्य सहधर्मिण्या सुदक्षिणया सह उपमाति कविः।

व्याकरणविमर्शः-

- दाक्षिण्यरूढेन - दक्षिणस्य भावः कर्म वा दाक्षिण्यं भवति। रुह्-धातोः क्तप्रत्यये रूढम् इति रूपं सिध्यति। दाक्षिण्येन रूढम् दाक्षिण्यरूढम् इति तृतीयातत्पुरुषसमासः।
- मगधवंशजा - मगधस्य वंशः मगधवंशः इति षष्ठीतत्पुरुषसमासः। मगधवंशे जाता इति अर्थे जन्धातोः डप्रत्यये मगधवंशज इति शब्दः निष्पद्यते। तस्मात् स्त्रीलिङ्गे टापि मगधवंशजा इति रूपम्।
- अध्वरस्य - अविद्यमानः ध्वरः यस्मिन् सः अध्वरः इति नञ्बहुव्रीहिसमासः, तस्य अध्वरस्य। यज्ञस्य इत्यर्थः।

सन्धिकार्यम् -

- सुदक्षिणेत्यासीदध्वरस्येव - सुदक्षिणा+इति+आसीत्+अध्वरस्य+इव
- **प्रयोगपरिवर्तनम्** - तस्य मगधवंशजया दाक्षिण्यरूढेन नाम्ना अध्वरस्य दक्षिणया इव सुदक्षिणया इति पत्न्या अभूयत।

अलङ्कारालोचना - अस्मिन् श्लोके तस्य इति सर्वनामवाचकं पदं दिलीपं बोधयति। स च दिलीपः अध्वरेण अर्थात् यज्ञेन उपमितः। दिलीपस्य पत्नी सुदक्षिणा च यज्ञस्य पत्न्या दक्षिणया उपमिता। इव इति उपमावाचकम् अव्ययं च अत्र वर्तते। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -८

२६. दिलीपपत्नी कस्मिन् वंशे अजायत।

२७. सुदक्षिणा अत्र केन उपमिता।

२८. अध्वरस्य इत्यस्य विग्रहवाक्यं समासनाम च लिखत। कः च अस्य अर्थः।

२९. सुदक्षिणा कस्मिन् देशे उत्पन्ना –

१) मालवे २) मगधे ३) अयोध्यायाम् ४) नन्दीग्रामे

६.१०) इदानीं मूलपाठम् अवगच्छाम -

कलत्रवन्तमात्मानमवरोधे महत्यपि।

तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः।।३२।।

अन्वयः - वसुधाधिपः अवरोधे महति अपि मनस्विन्या तया लक्ष्म्या च आत्मानं कलत्रवन्तं मेने।

अन्वयार्थः - वसुधाधिपः पृथिव्याः ईश्वरः दिलीपः अवरोधे अन्तःपुरवर्गे महति अपि अधिके अपि मनस्विन्या दृढचित्तया तया सुदक्षिणया लक्ष्म्या च राजश्रिया च आत्मानं स्वं कलत्रवन्तं सभार्यं मेने ज्ञातवान्।

सरलार्थः - दिलीपस्य अन्तःपुरवर्गः महान् आसीत्। तथापि स्वपत्न्या सुदक्षिणया राजलक्ष्म्या च दिलीपः आत्मानं भार्यावन्तं ज्ञातवान्।

तात्पर्यार्थः - प्राचीनकाले प्रायः नृपाणाम् अन्तःपुरवर्गः विशालः भवति स्म। तस्मिन् च अन्तःपुरवर्गे बह्व्यः नार्यः अपि तिष्ठन्ति स्म। तासु च नारीषु काश्चन भार्याः भवन्ति स्म। काश्चन दास्यः अपि भवन्ति स्म। अर्थात् दास्यः अपि नृपस्य भोगवस्तुतुल्याः आसन्। दिलीपः सम्पूर्णस्य जगतः स्वामी आसीत्। अतः स बह्वीः नारीः निजान्तःपुरे स्थापयितुं समर्थः आसीत्। किन्तु धर्मभार्यां विहाय अन्यया नार्या सह सङ्गमः न धर्मसम्मतः। अतः दिलीपः सुदक्षिणा एव मम पत्नी इति चिन्तितवान्। एवं राजलक्ष्म्या सुदक्षिणया च दिलीपः कलत्रवान् आसीत् इति सूच्यते। अनेन तस्य भोगपराङ्मुखत्वं प्रकटीभवति।

व्याकरणविमर्शः -

- कलत्रवन्तम् - कलत्रम् अस्ति यस्य स कलत्रवान्, तं कलत्रवन्तम्। इदं द्वितीयैकवचनान्तं रूपम्।
- मेने - मन्-धातोः लिटि प्रथमपुरुषैकवचने मेने इति रूपं भवति।
- मनस्विन्या - प्रशस्तं मनः अस्ति यस्याः सा मनस्विनी, तया मनस्विन्या।

- वसुधाधिपः - अधिपाति इति अधिपः भवति। वसुधायाः अधिपः वसुधाधिपः इति षष्ठीतत्पुरुषसमासः।

सन्धिकार्यम् -

- कलत्रवन्तमात्मानमवरोधे - कलत्रवन्तम्+आत्मानम्+अवरोधे
- महत्यपि - महति+अपि
- **प्रयोगपरिवर्तनम्** - वसुधाधिपेन अवरोधे महति अपि मनस्विन्या तया लक्ष्म्या च आत्मा कलत्रवान् मेने।

पाठगतप्रश्नाः -९

३०. दिलीपः काभ्यां कलत्रवान् आसीत्।

३१. अनेन श्लोकेन दिलीपस्य कः गुणः सूचितः भवति।

३२. कलत्रवन्तमात्मामवरोधे- इत्यत्र सन्धिविच्छेदं कुरुत।

६.११) इदानीं मूलपाठम् अवगच्छाम -

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।

विलम्बितफलैः कालं स निनाय मनोरथैः।।३३।।

अन्वयः - स आत्मानुरूपायां तस्याम् आत्मजन्मसमुत्सुकः विलम्बितफलैः मनोरथैः कालं निनाय।

अन्वयार्थः - स राजा दिलीपः आत्मानुरूपायां आत्मसदृश्यां तस्यां सुदक्षिणायाम् आत्मजन्मसमुत्सुकः पुत्रप्राप्तये उत्कण्ठितः विलम्बितफलैः सविलम्बपरिणामैः मनोरथैः अभिलाषैः कालं समयं निनाय यापयामास।

सरलार्थः - दिलीपः आत्मसदृश्यां दक्षिणायां पुत्रलाभः भवतु इति इष्टवान्। किन्तु बहुकाले व्यतीते अपि तस्य पुत्रलाभः न भवति स्म इति विलम्बकारणात् स दुःखितः आसीत्।

तात्पर्यार्थः - सुदक्षिणा दिलीप इव क्षत्रियकुले उत्पन्ना आसीत्। दिलीप इव तस्याः बहवः गुणाः अपि आसन्। अतः यदि सुदक्षिणायाः गर्भे पुत्रोत्पत्तिः भवति तर्हि स पुत्रः यथार्थः रघुवंशीयः भविष्यति। तस्मिन् च तनये राजोचिताः गुणाः अवश्यं भविष्यन्ति। अतः सुदक्षिणायाम् पुत्रजन्म भवतु इति दिलीपस्य इच्छा आसीत्। किन्तु विवाहात् परं बहूनि वर्षाणि व्यतीतानि। तथापि दिलीपस्य पुत्रलाभः न

अभवत्। पुत्रः न जायते चेत् पितृणं न पूर्यते। तेन पापम् एव सम्भविष्यति। अतः दिलीपः अतीव चिन्ताकुलः आसीत्। एवं पुत्रस्य अभावेन दिलीपः दुःखाक्रान्तः भूत्वा कालयापनम् अकरोत्।

व्याकरणविमर्शः -

- आत्मानुरूपायाम् - आत्मनः अनुरूपा आत्मानुरूपा इति षष्ठीतत्पुरुषसमासः, तस्याम् आत्मानुरूपायाम्।
- आत्मजन्मसमुत्सुकः - आत्मनो जन्म यस्य स आत्मजन्मा इति व्यधिकरणबहुव्रीहिसमासः। अथवा आत्मनः जन्म आत्मजन्मा इति षष्ठीतत्पुरुषसमासः। आत्मजन्मनि समुत्सुकः आत्मजन्मसमुत्सुकः इति सप्तमीतत्पुरुषसमासः।
- विलम्बितफलैः - विलम्बः सञ्जातः अस्य इत्यर्थे विलम्बितम् इति भवति। विलम्बितं फलं येषां ते विलम्बितफलाः इति बहुव्रीहिसमासः, तैः विलम्बितफलैः।
- निनाय - प्रापणार्थकस्य नीधातोः लिटि प्रथमपुरुषैकवचने निनाय इति रूपम्।

सन्धिकार्यम् -

- तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः - तस्याम्+आत्मानुरूपायाम्+आत्मजन्मसमुत्सुकः
- **प्रयोगपरिवर्तनम्** - तेन आत्मानुरूपायां तस्याम् आत्मजन्मसमुत्सुकेन विलम्बितफलैः मनोरथैः कालः निन्ये।

पाठगतप्रश्नाः -१०

३३. दिलीपः कथं कालं यापितवान्।

३४. दिलीपः कस्याम् आत्मजन्मसमुत्सुकः आसीत्।

३५. आत्मजन्मसमुत्सुकः इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

६.१२) इदानीं मूलपाठम् अवगच्छाम -

सन्तानार्थाय विधये स्वभुजादवतारिता।

तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे।।३४।।

अन्वयः - तेन सन्तानार्थाय विधये स्वभुजात् अवतारिता जगतो गुर्वी धूः सचिवेषु निचिक्षिपे।

अन्वयार्थः - तेन दिलीपेन सन्तानार्थाय सन्तानप्रयोजनाय विधये अनुष्ठानाय स्वभुजाद् निजहस्तात् अवतारिता अर्पिता जगतः लोकस्य गुर्वी दुर्वहा धूः भारः सचिवेषु मन्त्रिषु निचिक्षिपे निक्षिप्ता।

सरलार्थः - पुत्रप्राप्तये दिलीपः शास्त्रविहितम् अनुष्ठानादिकं कर्तुम् इष्टवान्। अतः स समग्रस्य जगतः भारं मन्त्रिभ्यः समर्पितवान्।

तात्पर्यार्थः - विवाहात् परं बहुवर्षाणि व्यतीतानि आसन्। तथापि दिलीपः सन्तानरहितः आसीत्। तस्मात् दैवम् एव आश्रयणीयम् इति विचिन्त्य शास्त्रविहितम् अनुष्ठानादिकं कर्तुम् इष्टवान्। किन्तु अनुष्ठानं क्रियते चेत् राज्यचालनं न भविष्यति। यतो हि अनुष्ठानादिकं विधातुं बहुकालः अपेक्षितः भवति। अतः दिलीपः समग्रस्य जगतः भारं मन्त्रिभ्यः अर्पितवान्। कारणं सम्पूर्णम् एव जगत् दिलीपस्य शासनाधीनम् आसीत्। यद्यपि प्रजापालनम् एव नृपस्य प्रमुखं कर्तव्यं भवति। तथापि दिलीपः सन्तानलाभाय तत् कर्तव्यं परित्यक्तवान्। यतो हि सन्तानेन एव पितृणं पूरयितुं शक्यते। एवं राज्यपरिचालनां परित्यज्य पुत्रलाभाकाङ्क्षी दिलीपः धर्माचरणं कर्तुम् उद्यतः आसीत्।

व्याकरणविमर्शः -

- सन्तानार्थाय - सन्तानः अर्थः यस्य स सन्तानार्थः इति बहुव्रीहिसमासः, तस्मै सन्तानार्थाय। अथवा सन्तानाय अयम् सन्तानार्थः इति चतुर्थीतत्पुरुषसमासः, तस्मै सन्तानार्थाय।
- विधये - विधीयते इति विधिः भवति। अनुष्ठानम् इत्यर्थः।
- स्वभुजाद् - स्वस्य भुजः स्वभुजः इति षष्ठीतत्पुरुषसमासः, तस्मात् स्वभुजात्।
- अवतारिता - अवपूर्वकात् तृधातोः णिचि क्तप्रत्यये स्त्रियां टापि च अवतारिता इति रूपम्।
- गुर्वी - गुरुशब्दस्य स्त्रियां ङीपि गुर्वी इति रूपम्।
- निचिक्षिपे - निपूर्वकस्य क्षिप्-धातोः लिटि कर्मणि प्रथमपुरुषैकवचने निचिक्षिपे इति रूपम्। निक्षिप्तवान् इति अर्थः।

सन्धिकार्यम् -

- स्वभुजादवतारिता - स्वभुजात्+अवतारिता
- धूर्जगतो गुर्वी - धूः+जगतः+गुर्वी
- **प्रयोगपरिवर्तनम्** - स सन्तानार्थाय विधये स्वभुजात् अवतारितां जगतः गुर्वीं धूं सचिवेषु निचिक्षेप।

पाठगतप्रश्नाः -११

३६. जगतः धूः कथम् आसीत्।

३७. सन्तानार्थाय इत्यत्र अर्थशब्दस्य कः अर्थः।

३८. निचिक्षिपे इति रूपं कस्य धातोः कस्मिन् च लकारे।

पाठसारः

महाराजः दिलीपः प्रजावत्सलः आसीत्। यतो हि प्रजानां शिक्षाव्यवस्थां रक्षणं पोषणम् इत्यादिकं सर्वं स पश्यति स्म। एवं पितृकार्यकरणात् दिलीपः एव प्रजानां पिता आसीत् इति कविः वर्णितवान्। तासां प्रकृतपितरः तु जन्मकारणानि एव आसन्। लोकहिताय स दण्डनीयान् दण्डयति स्म न तु धनसंग्रहाय। एवं सन्तानलाभाय स विवाहं कृतवान् न तु भोगाय। एवं तस्य अर्थकामसाधनं धर्ममेव असाधयत्। देवराजेन इन्द्रेण सह तस्य मित्रता आसीत्। दिलीपः पृथिव्याः करं संगृह्य यज्ञादिकं सम्पादितवान्। इन्द्रः च वर्षणेन धरणीं सस्यायितां कृतवान्। एवम् उभौ सम्पद्विनिमयेन भुवनद्वयं पोषितवन्तौ। अन्ये नृपाः महायशस्विनः तस्य कीर्तिम् न अनुकृतवन्तः। यतो हि दिलीपस्य राज्ये तस्करताशब्दः श्रुतौ एव आसीत्। तस्य शत्रुः अपि सच्चरित्रशाली चेत् तेन ग्राह्यः आसीत् यथा रोगिणा रुचिरहितम् अपि औषधं ग्राह्यं भवति। आत्मीयः अपि दुष्टः भवति चेत् तेन त्याज्यः आसीत् यथा सर्पदष्टा अङ्गुली अभीष्टा अपि त्यक्तव्या भवति। ब्रह्मा तं महाभूतकारणसामग्रीभिः निर्मीतवान्। अतः तस्य सर्वे गुणाः परार्थैकफलाः आसन्। समग्रा पृथिवी एव तस्य शासनाधीना आसीत्। अतः एव तस्य राज्यस्य परिखा समुद्रः आसीत्। समुद्रतटः च राज्यस्य प्राकारतुल्यः आसीत्। एवं स समग्रां पृथिवीम् एकनगरीम् इव शासितवान्। तस्य पत्नी आसीत् मगधकुले उत्पन्ना सुलक्षणा सुदक्षिणा। सा यज्ञस्य पत्नी दक्षिणा इव औदार्यकारणात् प्रसिद्धा आसीत्। स सम्पूर्णायाः पृथिव्याः स्वामी आसीत्। तथापि स धर्मभार्यया सुदक्षिणया राजलक्ष्म्या च आत्मानं कलत्रवन्तं ज्ञातवान्। तस्यां निजसदृश्यां सुदक्षिणायां पुत्रजन्म भवतु इति तस्य इच्छा आसीत्। यतो हि सुदक्षिणा अपि क्षत्रियोकुलोत्पन्ना आसीत्। अतः तस्याम् उत्पन्नः पुत्रः अवश्यं राजगुणोचितः भविष्यति इति स चिन्तितवान्। किन्तु विवाहात् परं बहुवर्षाणि व्यतीतानि। तथापि तयोः सन्तानलाभः न अभवत्। अतः दिलीपः दुःखाक्रान्तः आसीत्। तस्मात् सन्तानलाभाय शास्त्रनिर्दिष्टम् अनुष्ठानं विधातुं स राज्यभारं मन्त्रिभ्यः समर्पितवान्।

पाठान्तप्रश्नाः

१. दिलीपस्य अर्थसाधनं कामसाधनं च धर्मम् एव साधयति - विचारयत।

२. द्वेष्योपि सम्मतः इत्यादिश्लोके उपमालङ्कारं साधयत।

३. कथं दिलीपः प्रजानां पिता अभवत्।

४. दिलीपदेवेन्द्रौ कथं लोकद्वयं पोषितवन्तौ।

५. दिलीपस्य सर्वे गुणाः कथं परार्थैकफलाः।

६. कलत्रवन्तम् इत्यादिश्लोकम् आश्रित्य दिलीपस्य भोगपराङ्मुखत्वं विचारयत।

७. दिलीपः कथं राज्यभारं मन्त्रिभ्यः समर्पितवान्।

८. समासेन पाठसारं लिखत।

१. स्तम्भयोः लिखितान् परस्परसम्बद्धान् मेलयत।

स्तम्भः-क	स्तम्भः-ख
१. दुदोह	१. अनुकृतवन्तः
२. दधतुः	२. पृथिवी
३. अनुययुः	३. स्वर्गलोकम्
४. तस्कर	४. उरगक्षता अङ्गुली
५. दिलीपः	५. दुग्धवान्
६. इन्द्रः	६. औषधम्
७. दुष्टः प्रि	७. मगधवंशजा
८. शिष्टः शत्रुः	८. पुपुषतुः
९. सुदक्षिणा	९. चौर्यवृत्तिः

उत्तरम् - १-५, २-८, ३-१, ४-९,५-२, ६-३, ७-६, ८-४, ९-७.

पाठगतप्रश्नानाम् उत्तराणि-

उत्तराणि-१

१. दिलीपः शिक्षाकारणात् रक्षणात् भरणात् च दिलीपः प्रजानां पिता।

२. जनानां पितरः जन्मकारणानि आसन्।

३. विनयस्य आधानं विनयाधानम् इति षष्ठीतत्पुरुषसमासः, तस्मात् विनयाधानात्।

४. ३

५. दिलीपः दण्ड्यान् स्थित्यै दण्डितवान्।

६. दिलीपस्य अर्थकामौ धर्म एव आसीत्।

उत्तराणि-२

७. दण्डयत् इति अत्र प्रातिपदिकम्। इदं रूपं षष्ठीविभक्तेः एकवचने भवति।

८. १

उत्तराणि-३

९. दिलीपः यज्ञाय पृथिवीं दुग्धवान्।

१०. भुवनद्वयं नाम स्वर्गलोकः पृथिवीलोकः च।

११. दुदोह इति रूपं दुह्-धातोः लिट्लकारे भवति।

१२. ४

उत्तराणि-४

१३. दिलीपस्य राज्ये तस्करता श्रुतौ आसीत्।

१४. अनु-पूर्वकात् याधातोः लिटि प्रथमपुरुषबहुवचनविवक्षायां अनुययुः इति रुपम्। अनुकृतवन्तः इत्यर्थः।

१५. किल+अनुययुः+तस्य

उत्तराणि-५

१६. दिलीपस्य शत्रुः अपि शिष्टः चेत् औषधवत् ग्राह्यम् आसीत्।

१७. दिलीपस्य आत्मीयः अपि दुष्टः चेत् उरगक्षता अङ्गुली इव त्याज्यः आसीत्।

१८. प्रियः+अपि+आसीत्+अङ्गुली+इव+उरगक्षता

१९. २

उत्तराणि-६

२०. ब्रह्मा दिलीपं पञ्चमहाभूतसामग्रीभिः सृष्टवान्। अतः दिलीपस्य सर्वे गुणाः परार्थैकफलाः।

२१. विपूर्वकात् धाधातोः लिटि प्रथमपुरुषैकवचने विदधे इति रूपम्।

२२. महान्ति च तानि भूतानि महाभूतानि इति कर्मधारयसमासः। महाभूतानां समाधिः महाभूतसमाधिः इति षष्ठीतत्पुरुषसमासः, तेन महाभूतसमाधिना।

उत्तराणि-७

२३. दिलीपः उर्वीम् एकपूरीम् इव शासितवान्।

२४. अस्मिन् श्लोके दिलीपस्य राज्यम् अर्थात् समग्रा पृथिवी एकपुर्या उपमितम्। दिलीपराज्यम् अत्र उपमेयम् अस्ति। एकपुरी इति उपमानवाचकं पदम्। इव इति उपमावाचकः शब्दः। यथा नृपाः एकं नगरं शासति तथा दिलीपः सम्पूर्णां धरणीं शासितवान्। अतः अत्र उपमालङ्कारः अस्ति।

२५. अपरिखाः परिखाः यथा सम्पद्यन्ते तथा कृताः इति विग्रहे च्विप्रत्यये परिखीकृताः इति रुपम्। परिखीकृताः सागराः यस्याः सा परिखीकृतसागराः इति बहुव्रीहिसमासः, तां परिखीकृतसागराम्।

उत्तराणि-८

२६. दिलीपपत्नी मगधवंशे अजायत।

२७. सुदक्षिणा अत्र दक्षिणया उपमिता।

२८. अविद्यमानः ध्वरः यस्मिन् सः अध्वरः इति नञ्बहुव्रीहिसमासः, तस्य अध्वरस्य। यज्ञस्य इत्यर्थः।

२९. २

उत्तराणि-९

३०. दिलीपः सुदक्षिणाराजलक्ष्मीभ्यां कलत्रवान् आसीत्।

३१. अनेन श्लोकेन दिलीपस्य भोगपराङ्मुखत्वं सूच्यते।

३२. कलत्रवन्तम्+आत्मानम्+अवरोधे

उत्तराणि-१०

३३. दिलीपः विलम्बितफलैः मनोरथैः कालं यापितवान्।

३४. दिलीपः आत्मानुरूपायां सुदक्षिणायाम् आत्मजन्मसमुत्सुकः आसीत्।

३५. आत्मनो जन्म यस्य स आत्मजन्मा इति व्यधिकरणबहुव्रीहिसमासः। अथवा आत्मनः जन्म आत्मजन्मा इति षष्ठीतत्पुरुषसमासः। आत्मजन्मनि समुत्सुकः आत्मजन्मसमुत्सुकः इति सप्तमीतत्पुरुषसमासः।

उत्तराणि-११

३६. जगतः धूः गुर्वी आसीत्।

३७. सन्तानार्थाय इत्यत्र अर्थशब्दस्य अर्थः प्रयोजनम्।

३८. निपूर्वकस्य क्षिप्-धातोः लिटि कर्मणि प्रथमपुरुषैकवचने निचिक्षिपे इति रूपम्।

॥ इति षष्ठः पाठः ॥



७

348sk07

रघुवंशम् - वशिष्ठाश्रमे गमनम्

प्रस्तावना

अस्मिन् पाठे वयं तदनन्तरं चतुर्दश श्लोकान् पठामः। दिलीपः सन्तानं प्राप्तुकामः आसीत्। तदर्थं स शास्त्रविहितम् अनुष्ठानं कर्तुम् उद्यतः आसीत्। अतः स राज्यभारं मन्त्रिभ्यः प्रदत्तवान् इति वयं पूर्वस्मिन् पाठे पठितवन्तः। ततः च दिलीपः सुदक्षिणया सह एकस्मिन् रथे आरूढः भूत्वा सन्तानकाम्यया वसिष्ठाश्रमं प्रति गतवान्। वसिष्ठः आसीत् रघुवंशस्य कुलगुरुः। यदा एव रघुवंशीयाः नृपाः विपदि आपतन्ति स्म तदा महामुनिः वसिष्ठः तान् उपदिशति स्म। उपदेशपालनेन ते विपन्मुक्ताः अपि भवन्ति स्म। अतः दिलीपः अपि सन्तानकाम्यया वसिष्ठाश्रमं प्रति गतवान्। तयोः गमनकाले अतीव रमणीयतया मार्गपार्श्वस्थं प्रकृतिसौन्दर्यं रथारूढौ तौ दम्पती च वर्णयति कविः। अन्ते च तौ सायंकाले वसिष्ठतपोवनं प्राप्तवन्तौ।

उद्देश्यानि -

अमुं पाठं पठित्वा भवान्-

- सुदक्षिणादिलीपयोः वसिष्ठाश्रमं प्रति गमनहेतुं जानीयात्।
- कालिदासस्य वर्णनशैलीं जानीयात्।
- श्लोकानाम् अन्वयः कथं भवति इति बोद्धुं शक्नुयात्।
- समासः सन्धिः इत्यादीन् व्याकरणविषयान् अवगच्छेत्।
- अलङ्काराणां समन्वयः कथं करणीयः इति ज्ञातुं पारयेत्।
- कठिनशब्दानाम् अर्थं ज्ञातुं समर्थो भवेत्।

७.१) मूलपाठः -

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम्।।३५।।
स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव।।३६।।

मा भूदाश्रमपीडेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिवृताविव।।३७।।
सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः।।३८।।
मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः।।३९।।
परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु।।४०।।
श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम्।
सारसैः कलनिह्रदैः क्वचिदुन्नमिताननौ।।४१।।
पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।।४२।।
सरसीष्वरविन्दानां वीचिविक्षोभशीतलं।
आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम्।।४३।।
ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम्।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः।।४४।
हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।४५।।
काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।४६।।
तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः।।४७।।
स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः।।४८।।

७.२) इदानीं मूलपाठम् अवगच्छाम-

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम्।।३५।।

अन्वयः - अथ पुत्रकाम्यया तौ दम्पती प्रयतौ (सन्तौ) विधातारम् अभ्यर्च्य गुरोः वसिष्ठस्य आश्रमं जग्मतुः।

अन्वयार्थः - अथ अनन्तरं पुत्रकाम्यया पुत्रस्य इच्छया तौ सुदक्षिणादिलीपौ दम्पती जायापती प्रयतौ पवित्रौ सन्तौ विधातारं ब्रह्माणम् अभ्यर्च्य पूजयित्वा गुरोः कुलगुरोः वसिष्ठस्य महर्षेः आश्रमं तपोवनं जग्मतुः गतौ।

सरलार्थः - तदनन्तरं पुत्रप्राप्तेः इच्छा सुदक्षिणां दिलीपं च प्रेरितवती। अतः तौ जगत्स्रष्टारं ब्रह्माणं पूजयित्वा कुलगुरोः वसिष्ठस्य आश्रमं गतवन्तौ।

तात्पर्यार्थः - अनन्तरं दिलीपः ब्रह्मणः पूजां विहितवान्। ततः स स्वभार्यया सुदक्षिणया सह कुलगुरोः वसिष्ठस्य आश्रमं प्रति निर्गतवान्। वसिष्ठः रघुवंशस्य कुलगुरुः वर्तते। प्रकृतः गुरुः स एव भवति यः शिष्यस्य विपदि तं यथोचितं मार्गं प्रदर्शयति। दिलीपस्य स्वगुरौ वसिष्ठे अपरिसीमः विश्वासः आसीत्। अतः सन्तानप्राप्तिं प्रति यानि प्रतिबन्धकानि सन्ति तानि निराकर्तुं स वसिष्ठसमीपं गतवान्। यतो हि स विश्वसिति स्म यद् वसिष्ठः तस्मै अवश्यं कञ्चित् उपदेशं दास्यति। तेन च उपदेशेन तस्य सन्तानलाभः निर्बाधः भविष्यति। अतः दिलीपः सन्तानप्राप्तिकामनया वसिष्ठाश्रमं प्रति निर्गतवान्।

व्याकरणविमर्शः -

- अभ्यर्च्य - अभिपूर्वकात् अर्च्-धातोः ल्यप्प्रत्यये अभ्यर्च्य इति रूपम्।
- विधातारम् - विदधाति इति विधाता भवति। विधातृशब्दस्य प्रथमाद्विवचने विधातारम् इति रूपं भवति।
- पुत्रकाम्यया - आत्मनः पुत्रेच्छा पुत्रकाम्या, तया पुत्रकाम्यया। अत्र काम्यच्प्रत्ययः विहितः अस्ति।
- दम्पती - जाया च पतिः च इति विग्रहे समासे कृते दम्पती इति रूपम्। अत्र एकशेषसमासः भवति। इदं नित्यद्विवचनान्तम्।
- जग्मतुः - गमनार्थकस्य गम्-धातोः लिटि प्रथमपुरुषद्विवचने जग्मतुः इति रूपम्। गतवन्तौ इत्यर्थः।

सन्धिकार्यम् -

- अथाभ्यर्च्य - अथ+अभ्यर्च्य
- गुरोर्जग्मतुराश्रमम् - गुरोः+जग्मतुः+आश्रमम्
- **प्रयोगपरिवर्तनम्** - अथ पुत्रकाम्यया ताभ्यां दम्पतिभ्यां प्रयताभ्यां विधातारम् अभ्यर्च्य गुरोः वसिष्ठस्य आश्रमः जग्मे।

पाठगतप्रश्नाः -१

१. सुदक्षिणादिलीपौ कथं वसिष्ठाश्रमं गतवन्तौ।

२. दम्पतीशब्दं साधयत।

३. वसिष्ठः दिलीपस्य कः आसीत्।

४. तौ दम्पती कम् अभ्यर्च्य वसिष्ठाश्रमं गतवन्तौ-

१) विष्णुम् २) शिवम् ३) सूर्यम् ४) ब्रह्माणम्

५. तौ दम्पती कस्य मुनेः आश्रमं गतवन्तौ-

१) वसिष्ठस्य २) विश्वामित्रस्य ३) दुर्वाससः४) कण्वस्य

७.३) इदानीं मूलपाठम् अवगच्छाम -

स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।

प्रावृषेण्यं पयोवाहं विद्युदैरावताविव।।३६।।

अन्वयः- स्निग्धगम्भीरनिर्घोषम् एकं स्यन्दनं प्रावृषेण्यं पयोवाहं विद्युदैरावतौ इव आस्थितौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - स्निग्धगम्भीरनिर्घोषं मधुरगम्भीरशब्दम् एकं स्यन्दनम् एकं रथं प्रावृषेण्यं वर्षाकालजातं पयोवाहं मेघं विद्युदैरावतौ तडिदैरावतौ इव आस्थितौ आरूढौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - मधुरगम्भीरशब्दयुक्तं रथम् आरुह्य सुदक्षिणादिलीपौ गतवन्तौ। यथा वर्षाकाले विद्युत् ऐरावतः च मेघम् आश्रित्य तिष्ठतः।

तात्पर्यार्थः - दिलीपः भार्यया सुदक्षिणया सह रथेन वसिष्ठाश्रमम् अगच्छत्। येन रथेन तौ गतवन्तौ स रथः मधुरः तथा गम्भीरः- इति उभयविधशब्दयुक्तः आसीत्। वर्षाकाले इन्द्रस्य हस्ती ऐरावतः विद्युत् च मेघम् आश्रित्य तिष्ठतः। तेन ऐरावतस्य मेघारोहणं सम्भवति। अपि च विद्युत् अपि मेघे एव वर्तते। अतः ऐरावतस्य विद्युत्साहचर्यं सुष्ठु अवगम्यते। अत्र दिलीपः ऐरावतः इति कविः उपमाति। सुदक्षिणा च विद्युता उपमीयते। तौ च एकस्मिन् एव रथे समारूढौ स्तः। एवं यथा ऐरावतः मेघारूढः भूत्वा विद्युत्साहचर्यं लभते तथा दिलीपः अपि एकं रथम् आरुह्य सुदक्षिणासाहचर्यं लभते। यतो हि तौ एकस्मिन् एव रथे आरूढवन्तौ। अनेन तयोः दम्पत्योः समानमनस्कता सूच्यते येन च तेषां सन्तानलाभः भविता इति अपि स्पष्टं भवति।

व्याकरणविमर्शः -

- स्निग्धगम्भीरनिर्घोषम् - स्निग्धः गम्भीरः निर्घोषः यस्य स स्निग्धगम्भीरनिर्घोषः इति बहुव्रीहिसमासः, तं स्निग्धगम्भीरनिर्घोषम्।
- आस्थितौ - आङ्पूर्वकात् स्थाधातोः क्तप्रत्यये प्रथमाद्विचने आस्थितौ इति रूपम्।
- प्रावृषेण्यम् - प्रावृषि भवः प्रावृषेण्यः, तं प्रावृषेण्यम्। वर्षर्तौ जातम् इत्यर्थः।

- विद्युदैरावतौ - विद्युत् च ऐरावतः च विद्युदैरावतौ इति इतरेतरयोगद्वन्द्वसमासः।

सन्धिकार्यम् -

- स्निग्धगम्भीरनिर्घोषमेकम् - स्निग्धगम्भीरनिर्घोषम्+एकम्
- स्यन्दनमास्थितौ - स्यन्दनम्+आस्थितौ
- विद्युदैरावताविव - विद्युदैरावतौ+इव
- **प्रयोगपरिवर्तनम्** - स्निग्धगम्भीरनिर्घोषम् एकं स्यन्दनं प्रावृषेण्यं पयोवाहं विद्युदैरावताभ्याम् इव आस्थिताभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

अलङ्कारोलोचना - अत्र रथः मेघेन उपमीयते। दिलीपः इन्द्रगजेन ऐरावतेन सुदक्षिणा च विद्युता उपमीयते। एवम् अत्र त्रयः उपमेयवाचकाः शब्दाः वर्तन्ते, त्रयः च उपमानवाचकाः शब्दाः वर्तन्ते। इव इति उपमावाचकः शब्दः अपि अस्ति। यथा ऐरावतः मेघम् आरूढः विद्युत्साहचर्यं लभते तथा दिलीपः रथम् आरूढः सुदक्षिणासाहचर्यं लभते इति सादृश्यम्। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -२

६. दिलीपस्य रथं कीदृशम् आसीत्।

७. सुदक्षिणादिलीपौ काभ्याम् उपमितौ।

८. प्रावृषेण्यशब्दं साधयत।

९. प्रावृट् नाम कः ऋतुः-

१) ग्रीष्मर्तुः २) वर्षर्तुः ३) वसन्तर्तुः ४) शरदृतुः

७.४) इदानीं मूलपाठम् अवगच्छाम -

मा भूदाश्रमपीडेति परिमेयपुरःसरौ।

अनुभावविशेषात्तु सेनापरिवृताविव।।३७।।

अन्वयः - आश्रमपीडा मा भूत् इति परिमेयपुरःसरौ अनुभावविशेषात् तु सेनापरिवृतौ इव (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - आश्रमपीडा तपोवनक्लेशः मा भूत् न अस्तु इति अतः परिमेयपुरःसरौ अल्पपरिचारकसहितौ अनुभावविशेषात् तेजोविशेषात् तु सेनापरिवृतौ इव अनीकपरिवेष्टितौ इव (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - तपोवनस्य क्लेशादिकं मास्तु इति चिन्तयित्वा तौ दम्पती परिमितं परिचारकवर्गं स्वीकृत्य आश्रमं गतवन्तौ। किन्तु तयोः तेजःप्रभावात् तौ सेनापरिवृतौ इव प्रतीयेते स्म।

तात्पर्यार्थः - समग्रस्य धरातलस्य पतिः आसीत् दिलीपः। तस्मात् स कुत्रापि गच्छति चेत् सेनाभिः वेष्टितः भूत्वा एव गच्छति स्म। किन्तु यदा स पुत्रलाभाय स्वभार्यया सुदक्षिणया सह वसिष्ठाश्रमं गतवान् तदा अल्पसेनापरिवृतः एव गतवान्। यतो हि मुनीनाम् आश्रमः शान्तः कोलाहलशून्यः भवति। तत्र यदि दिलीपः अधिकं सैन्यं स्वीकृत्य गच्छति तर्हि शान्तिभङ्गः भवेत्। एतत् सर्वं विचिन्त्य दिलीपः अधिकसेनाः न नीतवान्। किन्तु तयोः मध्ये असामान्यं तेजः आसीत्। यदा तौ गतवन्तौ तदा ताभ्यां साकं अल्पाः एव सैनिकाः आसन्। किन्तु तेजःकारणात् तौ बहुसेनाभिः परिवृतौ आस्ताम् इति प्रतीयते स्म। एवं प्रस्तुतेन श्लोकेन सुदक्षिणायाः दिलीपस्य च तेजःप्रभावं वर्णयति कविः।

व्याकरणविमर्शः -

- आश्रमपीडा - आश्रमस्य पीडा आश्रमपीडा इति षष्ठीतत्पुरुषसमासः।
- परिमेयपुरःसरौ - परिमेयाः पुरःसराः ययोः तौ परिमेयपुरःसरौ इति बहुव्रीहिसमासः।
- अनुभावविशेषात् - अनुभावस्य विशेषः अनुभावविशेषः इति षष्ठीतत्पुरुषसमासः, तस्मात् अनुभावविशेषात्।
- सेनापरिवृतौ - सेनया परिवृतौ सेनापरिवृतौ इति तृतीयातत्पुरुषसमासः।
- मा भूत् - मा भूत् इत्यस्य मा अभूत् इत्येव प्रकृतं स्वरूपम्। अत्र माङ्योगात् न माङ्योगे इति सूत्रेणअडागमः न भवति। मा अस्तु इत्यर्थः।

सन्धिकार्यम् -

- भूदाश्रमपीडेति - भूत्+आश्रमपीडा+इति
- अनुभावविशेषात्तु - अनुभावविशेषाद्+तु
- सेनापरिवृताविव - सेनापरिवृतौ+इव
- **प्रयोगपरिवर्तनम्** - आश्रमपीडया मा भूयत इति परिमेयपुरःसराभ्याम् अनुभावविशेषात् तु सेनापरिवृताभ्याम् इव (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -३

१०. सुदक्षिणादिलीपौ कुतः सेनापरिवृतौ इव।

११. मा भूत् इति प्रयोगः कथं सिध्यति।

१२. तौ कथं परिमेयपुरःसरौः।

७.५) इदानीं मूलपाठम् अवगच्छाम -

सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।

पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः।।३८।।

अन्वयः - सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः वातैः सेव्यमानौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - सुखस्पर्शैः आनन्दजनकस्पर्शैः शालनिर्यासगन्धिभिः शालवृक्षजन्यगन्धयुक्तैः पुष्परेणूत्किरैः पुष्परेणुविक्षेपकैः आधूतवनराजिभिः वातैः पवनैः सेव्यमानौ परिचर्यमाणौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - दिलीपः सुदक्षिणा च यदा रथेन वसिष्ठाश्रमं प्रति गच्छतः स्म तदा मार्गे वायुः तौ सेवते स्म। स च शालवृक्षजन्यगन्धयुक्तः पुष्परेणुविक्षेपकः वायुः विपिनस्थवृक्षान् कम्पयति स्म।

तात्पर्यार्थः - दिलीपः पुत्रप्राप्त्युत्कण्ठितः आसीत्। अतः स पुत्रलाभाय वसिष्ठाश्रमं प्रति रथेन गतवान्। यदा स पत्न्या सह तपोवनं प्रति गच्छति स्म तदा मार्गस्थं वायुं वर्णयति कविः। शालवृक्षस्य रसात् एकः विशिष्टः गन्धः निष्पद्यते। पवनः तद्गन्धयुक्तः आसीत्। पुष्पेषु रेणवः तिष्ठन्ति। स वायुः तान् रेणून् इतस्ततः विक्षिपति स्म। अपि च स वायुः अतीव तीव्रवेगेन प्रवहति स्म। अतः तेन वायुना वने स्थिताः वृक्षाः अपि कम्पन्ते स्म। एतादृशेन मनोरमेन पवनेन तौ दम्पती सेव्यमानौ आस्ताम्। मन्यते यत् स्वयम् अरण्यपतिः एव तेन वायुना वनमार्गेन गच्छतोः सुदक्षिणादिलीपयोः सेवाम् अकरोत्।

व्याकरणविमर्शः -

- सेव्यमानौ - सेव्-धातोः कर्मणि शानच्प्रत्यये प्रथमाद्विवचने सेव्यमानौ इति रूपम्।
- सुखस्पर्शैः - सुखः स्पर्शः येषां ते सुखस्पर्शाः इति बहुव्रीहिसमासः, तैः सुखस्पर्शैः। इदं तृतीयाबहुवचनान्तं पदम्।
- शालनिर्यासगन्धिभिः - शालस्य निर्यासः शालनिर्यासः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासस्य गन्धः शालनिर्यासगन्धः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासगन्धः अस्ति येषां ते शालनिर्यासगन्धिनः, तैः शालनिर्यासगन्धिभिः।
- पुष्परेणूत्किरैः - पुष्पाणां रेणवः पुष्परेणवः इति षष्ठीतत्पुरुषसमासः। उत्किरन्ति इति उत्कीराः। पुष्परेणूनाम् उत्किराः पुष्परेणूत्किराः इति षष्ठीतत्पुरुषसमासः, तैः पुष्परेणूत्किरैः।
- आधूतवनराजिभिः - ईषत् धूता इत्यर्थे आधूता इति रूपं भवति। आधूता वनराजिः यैः ते आधूतवनराजयः इति बहुव्रीहिसमासः,तैः आधूतवनराजिभिः।

सन्धिकार्यम् -

- पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः - पुष्परेणूत्किरैः+वातैः+आधूतवनराजिभिः
- **प्रयोगपरिवर्तनम्** - सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः वातैः

सेव्यमानाभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -४

१३. कीदृशैः पवनैः तौ सेव्यमानौ आस्ताम्।

१४. शालनिर्यासगन्धिभिः इति पदं साधयत।

१५. पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः इत्यत्र सन्धिविच्छेदं कुरुत।

१६. एतेषु किं वायोः विशेषणं नास्ति-

१) सुखस्पर्शैः २) शालनिर्यासगन्धिभिः ३) वृक्षरेणूत्किरैः ४) आधूतारण्यराजिभिः

१७. सेव्यमानौ इत्यत्र सेव्-धातोः कः प्रत्ययः-

१) शानच्प्रत्ययः २) कानच्प्रत्ययः ३) चानश्प्रत्ययः ४) अन्यः कोपि

७.६) इदानीं मूलपाठम् अवगच्छाम -

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः।

षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः।।३९।।

अन्वयः - रथनेमिस्वनोन्मुखैः शिखण्डिभिः द्विधाः भिन्नाः षड्जसंवादिनीः मनोभिरामाः केकाः शृण्वन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - रथनेमिस्वनोन्मुखैः स्यन्दनजन्यशब्देन ऊर्ध्वमुखैः शिखण्डिभिः मयूरैः द्विधाः द्विविधाः भिन्नाः भेदयुक्ताः षड्जसंवादिनीः षड्जस्वरेण संवदतीः मनोभिरामाः चित्तप्रियाः केकाः मयूरवाणीः शृण्वन्तौ आकर्णयन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - यदा सुदक्षिणादिलीपौ रथेन वनमध्ये गतवन्तौ तदा रथचक्रजन्यशब्दं श्रुत्वा मयूराः मुखम् उन्नमितवन्तः। किञ्च ते षड्जस्वरेण केकारवम् अपि कृतवन्तः। एतत् सर्वं श्रावं श्रावं तौ दम्पती वसिष्ठाश्रमं गतवन्तौ।

तात्पर्यार्थः - वनमार्गेण सुदक्षिणादिलीपयोः रथः गच्छति स्म। अतः तयोः रथात् गम्भीरः ध्वनिः निर्गच्छति स्म। तस्मिन् काले मार्गपार्श्वे केचन मयूराः आसन्। ते च अयं ध्वनिः मेघध्वनिः अस्ति इति चिन्तितवन्तः। मेघः ध्वनिं करोति चेत् अवश्यं वृष्टिः भविष्यति इति चिन्तयित्वा वर्षाकाले मयूराः नृत्यन्ति गायन्ति च। अत्रापि वन्याः मयूराः मेघध्वनिम् आकर्ण्य नृत्यगीतादिकम् आरब्धवन्तः। अस्मिन् श्लोके ते मयूराः षड्जस्वरेण संवतन्ते स्म इति वर्णयति कालिदासः। षड्जध्वनिः शुद्धविकृतभेदेन द्विविधः भवति। अत्र मयूराणां ध्वनिः अपि शुद्धः विकृतः इति द्विविधः आसीत्। स च केकारवः तयोः मनांसि आह्लादयति स्म। एवं मनोरमाः केकाः श्रावं श्रावं तौ सुदक्षिणादिलीपौ वसिष्ठाश्रमं गतवन्तौ।

व्याकरणविमर्शः -

- मनोभिरामाः - मनसः अभिरामाः मनोभिरामाः इति षष्ठीतत्पुरुषसमासः। इदं द्वितीयाबहुवचनान्तं रूपम्।
- शृण्वन्तौ - श्रुधातोः शतृप्रत्यये प्रथमाद्विवचने शृण्वन्तौ इति रूपम्।
- रथनेमिस्वनोन्मुखैः - रथस्य नेमयः रथनेमयः इति षष्ठीतत्पुरुषसमासः। रथनेमीनां स्वनाः रथनेमिस्वनाः इति षष्ठीतत्पुरुषसमासः। ऊर्ध्वं मुखं येषां ते उन्मुखाः इति बहुव्रीहिसमासः। रथनेमिस्वनैः उन्मुखाः रथनेमिस्वनोन्मुखाः इति तृतीयातत्पुरुषसमासः, तैः रथनेमिस्वनोन्मुखैः।
- षड्जसंवादिनीः - षड्भ्यः जायते इति षड्जः। षड्जेन संवदन्ति इति षड्जसंवादिन्यः, ताः षड्जसंवादिनीः। इदं द्वितीयाबहुवचनान्तं पदम्।
- **प्रयोगपरिवर्तनम्** - रथनेमिस्वनोन्मुखैः शिखण्डिभिः द्विधाः भिन्नाः षड्जसंवादिनीः मनोभिरामाः केकाः शृण्वद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -५

१८. मयूराः केन स्वरेण संवदन्ते स्म।

१९. ते कथम् मुखम् उन्नमितवन्तः।

२०. रथनेमिस्वनोन्मुखैः इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

२१. मयूराः केन स्वरेण केकारवं कुर्वन्ति

१) षड्जस्वरेण २) मध्यमस्वरेण ३) पञ्चमस्वरेण ४) सप्तमस्वरेण

२२. धनिः कतिविधः भवति-

१) त्रिविधः २) चतुर्विधः ३) पञ्चविधः ४) द्विविधः

७.७) इदानीं मूलपाठम् अवगच्छाम -

परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।

मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु।।४०।।

अन्वयः - अदूरोज्झितवर्त्मसु स्यन्दनाबद्धदृष्टिषु मृगद्वन्द्वेषु परस्पराक्षिसादृश्यं पश्यन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - अदूरोज्झितवर्त्मसु समीपात् त्यक्तमार्गेषु स्यन्दनाबद्धदृष्टिषु रथे आबद्धदृष्टिषु मृगद्वन्द्वेषु हरिणयुगलेषु परस्पराक्षिसादृश्यम् परस्परनयनसमानतां पश्यन्तौ अवलोकयन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - यदा वनमार्गे सुदक्षिणादिलीपयोः रथः गच्छति स्म तदा मार्गस्थाः मृगाः तमेव रथं पश्यन्ति स्म। रथः यदा समीपम् उपागतः तदा एव ते मार्गं त्यजन्ति स्म। तेषु च मृगद्वन्द्वेषु तौ परस्परं नेत्रसादृश्यं दृष्टवन्तौ।

तात्पर्यार्थः - सुदक्षिणादिलीपौ पुत्रलाभाय वनमार्गेण वसिष्ठस्य आश्रमं गतवन्तौ। वनमार्गे प्रायः मृगाः विहरन्ति। यदा तयोः रथः आगतः तदापि मृगाः मार्गमध्ये एव आसन्। किन्तु रथं दृष्ट्वा अपि ते मृगाः मार्गं न त्यक्तवन्तः। यदा रथः तेषां समीपम् आगतः तदा एव ते मार्गं त्यक्तवन्तः। एतेन ज्ञायते यत् तेषां हरिणानां मनुष्येषु विश्वासः आसीत्। यतो हि तपस्विभिः सह एव निवसन्ति स्म। किञ्च ते रथमेव पश्यन्ति स्म। यतो हि वनमार्गे रथाः प्रायः न आगच्छन्ति। अतः रथागमः विशेषः - इति कारणात् ते रथं पश्यन्ति स्म। तादृशेषु मृगयुगलेषु तौ राजराज्ञौ परस्परं नेत्रसादृश्यं दृष्टवन्तौ। अर्थात् दिलीपः मृगेषु सुदक्षिणायाः नेत्रसादृश्यं दृष्टवान्। सुदक्षिणा च मृगेषु दिलीपस्य नेत्रसादृश्यं दृष्टवान्।

व्याकरणविमर्शः -

- परस्पराक्षिसादृश्यम् - अक्ष्णोः सादृश्यम् अक्षिसादृश्यम् इति षष्ठीतत्पुरुषसमासः। परस्परम् च तत् अक्षिसादृश्यम् परस्पराक्षिसादृश्यम् इति कर्मधारयसमासः। इदं द्वितीयैकवचनान्तं रूपम्।
- अदूरोज्झितवर्त्मसु - न दूरम् अदूरम् इति नञ्तत्पुरुषसमासः। उज्झितं वर्त्म यैः तानि उज्झितवर्त्मानि इति बहुव्रीहिसमासः। अदूरं यथा तथा उज्झितवर्त्मानि अदूरोज्झितवर्त्मानि इति सुप्सुपासमासः, तेषु अदूरोज्झितवर्त्मसु।
- मृगद्वन्द्वेषु - मृगाणां द्वन्द्वानि मृगद्वन्द्वानि इति षष्ठीतत्पुरुषसमासः, तेषु मृगद्वन्द्वेषु।
- पश्यन्तौ - दृश्-धातोः शतृप्रत्यये प्रथमाद्विवचने पश्यन्तौ इति रूपम्।
- स्यन्दनाबद्धदृष्टिषु - आबद्धा दृष्टिः यैः तानि आबद्धदृष्टीनि इति बहुव्रीहिसमासः। स्यन्दने आबद्धदृष्टीनि स्यन्दनाबद्धदृष्टीनि इति सप्तमीतत्पुरुषसमासः, तेषु स्यन्दनाबद्धदृष्टिषु।

सन्धिकार्यम् -

- परस्पराक्षसादृश्यमदूरोज्झितवर्त्मसु - परस्पराक्षिसादृश्यम्+अदूरोज्झितवर्त्मसु
- **प्रयोगपरिवर्तनम्** - अदूरोज्झितवर्त्मसु स्यन्दनाबद्धदृष्टिषु मृगद्वन्द्वेषु परस्पराक्षिसादृश्यं पश्यद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -६

२३. मृगाः कथं मार्गं त्यजन्ति स्म।

२४. तौ परस्परलोचनसादृश्यं कुत्र अवलोकितवन्तौ।

२५. अदूरोज्झितवर्त्मसु इत्यत्र समासनाम विग्रहवाक्यं च लिखत।

२६. सुदक्षिणादिलीपौ मृगद्वन्द्वेषु किम् अवलोकितवन्तौ-

१) प्रेमप्राचुर्यम् २) मित्रता ३) नेत्रसादृश्यम् ४) मुखसादृश्यम्

७.८) इदानीं मूलपाठम् अवगच्छाम -

श्रेणीबन्धाद् वितन्वद्भिरस्तम्भां तोरणस्रजम्।

सारसैः कलनिह्रदैः क्वचिदुन्नमिताननौ।।४१।।

अन्वयः - श्रेणीबन्धात् अस्तम्भां तोरणस्रजं वितन्वद्भिः कलनिर्ह्रादैः सारसैः क्वचित् उन्नमिताननौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - श्रेणीबन्धात् पङ्क्तिबन्धात् अस्तम्भां स्तम्भरहितां तोरणस्रजं बहिर्द्वरि स्थितां पुष्पमालां वितन्वद्भिः कुर्वद्भिः कलनिर्ह्रादैः मधुरध्वनिना सारसैः तन्नामकैः पक्षिभिः क्वचित् कुत्रचित् उन्नमिताननौ ऊर्ध्वीकृतमुखौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - यदा दिलीपसुदक्षिणे वनमार्गेण गच्छतः स्म तदा आकाशे मधुरध्वनिं कुर्वद्भिः सारसैः स्तम्भरहिता तोरणमाला गगने निर्मिता। तां मालां दर्शं दर्शं ऊर्ध्वीकृतमुखौ तौ दम्पती वसिष्ठतपोवनं गतवन्तौ।

तात्पर्यार्थः - कोपि माननीयः जनः गृहं प्रति आगच्छति चेत् गृहस्य बहिर्द्वरि पुष्पमालां स्थापयन्ति गृहस्थाः। अनेन आगतस्य जनस्य अभ्यर्थनं क्रियते। दिलीपः सुदक्षिणा च पुत्रप्राप्तिकामनया तपोवनं प्राप्तवन्तौ। अतः आगतयोः तयोः दम्पत्योः कृते आकाशे सारसपक्षिणः तोरणमालां निर्मीतवन्तः। किन्तु एषा माला सामान्या न भवति। यतः हि सामान्यमाला कमपि स्तम्भम् आधाय तिष्ठति। सारसैः गगने या माला कृता तस्याः कोपि स्तम्भः नासीत्। अतः एव अस्तम्भा तोरणस्रक् इति वर्णयति कविः। तेषां सारसानां ध्वनिः अपि सुमधुरः आसीत्। एतं सुमधुरं ध्वनिं श्रावं श्रावं गगने च सारसपक्षिणां मनोरमां मालां दर्शं दर्शं दिलीपः सुदक्षिणा च तपोवनं गतवन्तौ।

व्याकरणविमर्शः -

- श्रेणीबन्धात् - श्रेण्याः बन्धः श्रेणीबन्धः इति षष्ठीतत्पुरुषसमासः, तस्मात् श्रेणीबन्धात्।
- वितन्वद्भिः - विपूर्वकात् तन्-धातोः शतृप्रत्यये वितन्वत् इति प्रातिपदिकं निष्पद्यते। तस्य तृतीयाबहुवचने वितन्वद्भिः इति रूपम्।
- अस्तम्भाम् - अविद्यमानः स्तम्भः यस्याः सा अस्तम्भा इति नञ्बहुव्रीहिसमासः, ताम् अस्तम्भाम्।
- तोरणस्रजम् - तोरणे स्रक् तोरणस्रक् इति सप्तमीतत्पुरुषसमासः, तां तोरणस्रजम्। तोरणं नाम बहिर्द्वारम्।
- कलनिर्ह्रादैः - कलः निर्ह्रादः येषां ते कलनिर्ह्रादाः इति बहुव्रीहिसमासः,तैः कलनिर्ह्रादैः।
- उन्नमिताननौ - उत्पूर्वकात् नम्-धातोः णिचि क्तप्रत्यये उन्नमितम् इति रूपम्। उन्नमितम् आननं ययोः तौ उन्नमिताननौ इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- वितन्वद्भिरस्तम्भाम् - वितन्वद्भिः+अस्तम्भाम्
- क्वचिदुन्नमिताननौ - क्वचित्+उन्नमिताननौ
- **प्रयोगपरिवर्तनम्** - श्रेणीबन्धात् अस्तभां तोरणस्रजं वितन्वद्भिः कलनिर्ह्रदैः सारसैः क्वचित् उन्नमिताननाभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -७

२७. सारसैः कथं तोरणस्रक् कृता।

२८. तोरणस्रक् कीदृशी आसीत्।

२९. उन्नमिताननौ इति साधयत।

७.९) इदानीं मूलपाठम् अवगच्छाम -

पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः।

रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।।४२।।

अन्वयः - प्रार्थनासिद्धिशंसिनः पवनस्य अनुकूलत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकवेष्टनौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - प्रार्थनासिद्धिशंसिनः मनोरथसाफल्यसूचकस्य पवनस्य वायोः अनुकूलत्वात् आनुकूल्यात् तुरगोत्कीर्णैः अश्वखुरेण उक्षिप्तैः रजोभिः धूलिभिः अस्पृष्टालकवेष्टनौ अस्पृष्टौ केशोष्णीषौ ययोः (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - सुदक्षिणादिलीपयोः गमनकाले मनोवासनासिद्धेः सूचकः वायुः अनुकूलतया प्रवहति स्म। अतः एव अश्वखुरैः उक्षिप्ताः धूलयः दिलीपस्य उष्णीषं सुदक्षिणायाः अलकं च न स्पृष्टवन्तः।

तात्पर्यार्थः - महाराजः दिलीपः भार्यया सुदक्षिणया सह महर्षेः वसिष्ठस्य तपोवनं गच्छति स्म। महर्षेः उपदेशेन पुत्रलाभः भविष्यति इति आसीत् तस्य मनोवासना। यदा तौ रथेन गतवन्तौ तदा मार्गस्थः वायुः अनुकूलेन प्रवहति स्म। अर्थात् रथः यस्यां दिशि गच्छति स्म तस्याम् एव दिशि वायुः अपि प्रवहति स्म। एवम् अनुकूलवायुप्रवाहः तयोः मनोरथसिद्धिज्ञापकः आसीत् इति कवेः आशयः। अपि च रथवाहकानाम् अश्वानां खुरैः धूलिकणाः उक्षिप्ताः भवन्ति स्म। किन्तु ताः धूलिकणाः दिलीपस्य

उष्णीषं सुदक्षिणायाः अलकं च न स्पृष्टवन्तः। एवं अनुकूलपवनस्य सहायतया तौ निर्मलौ सन्तौ वसिष्ठाश्रमं प्रति गतवन्तौ।

व्याकरणविमर्शः -

- अनुकूलत्वात् - अनुकूलस्य भावः अनुकूलत्वम्, तस्मात् अनुकूलत्वात्।
- प्रार्थनासिद्धिशंसिनः - प्रार्थनायाः सिद्धिः प्रार्थनासिद्धिः इति षष्ठीतत्पुरुषसमासः। प्रार्थनासिद्धिं शंसति इति प्रार्थनासिद्धिशंसी, तस्य प्रार्थनासिद्धिशंसिनः।
- तुरगोत्कीर्णैः - तुरगैः उत्कीर्णानि तुरगोत्कीर्णानि इति तृतीयातत्पुरुषसमासः, तैः तुरगोत्कीर्णैः। इदं तृतीयाबहुवचनान्तं रूपम्।
- अस्पृष्टालकवेष्टनौ - न स्पृष्टानि अस्पृष्टानि इति नञ्तत्पुरुषसमासः। अलकाः च वेष्टनं च अलकवेष्टनानि इति इतरेतरद्वन्द्वसमासः। अस्पृष्टानि अलकवेष्टनानि ययोः तौ अस्पृष्टालकवेष्टनौ इति बहुव्रीहिसमासः।

सन्धिकार्याणि -

- पवनस्यानुकूलत्वात् - पवनस्य+अनुकूलत्वात्
- रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ - रजोभिः+तुरगोत्कीर्णैः+अस्पृष्टालकवेष्टनौ
- **प्रयोगपरिवर्तनम्** - प्रार्थनासिद्धिशंसिनः पवनस्य अनुकूलत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकवेष्टनाभ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -८

३०. पवनः कीदृशः आसीत्।

३१. पवनेन कीदृशं कार्यद्वयं कृतम्।

३२. रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ इत्यत्र सन्धिविच्छेदं कुरुत।

७.१०) इदानीं मूलपाठम् अवगच्छाम -

सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।

आमोदमुपजिघ्रन्तौ स्वनिःश्वासानुकारिणम्।।४३।।

अन्वयः - सरसीषु वीचिविक्षोभशीतलं स्वनिःश्वासानुकारिणम् अरविन्दानाम् आमोदम् उपजिघ्रन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - सरसीषु सरोवरेषु वीचिविक्षोभशीतलं तरङ्गसङ्गलेन शीतलीभूतं स्वनिःश्वासानुकारिणं निजनिःश्वासस्य अनुकरणं कुर्वन्तम् अरविन्दानां पद्मानां आमोदं सौरभम् उपजिघ्रन्तौ घ्राणेन गृह्णन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - सरोवरेषु तरङ्गसम्पर्कात् पद्मानां सौरभं शीतलम् आसीत्। सुदक्षिणादिलीपौ निजनिःश्वासम् अनुकुर्वन्तं तमेव सौरभं घ्राणेन गृह्णन्तौ सन्तौ वसिष्ठाश्रमं प्रति गतवन्तौ।

तात्पर्यार्थः - येन वनमार्गेण सुदक्षिणादिलीपौ वसिष्ठाश्रमं गतवन्तौ तस्य मार्गस्य पार्श्वे सरोवराः आसन्। तेषां सरोवराणां तरङ्गाः शीतलाः आसन्। तेषु च सरोवरेषु प्रसूनानि प्रस्फुटितानि आसन्। यदा वायुः सरोवरस्य उपरि प्रवहति स्म तदा पद्मसौरभयुक्तः भवति स्म। किञ्च शीतलतरङ्गसम्पर्कात् वायुः शीतलः अपि भवति स्म। गमनवेलायाम् एतादृशं शीतलं सुरभिं च पवनं तौ घ्रातवन्तौ। स च वायुः तयोः अर्थात् दिलीपस्य सुदक्षिणायाः च निःश्वासम् अनुकरोति स्म। एतेन तयोः निश्वासः अरविन्दात् अपि परिमलभरित आसीत् इति अवगम्यते। एवं प्रस्तुतेन श्लोकेन तयोः निःश्वासं वर्णयति कविः।

व्याकरणविमर्शः -

- वीचिविक्षोभशीतलम् - वीचीनां विक्षोभः वीचिविक्षोभः इति षष्ठीतत्पुरुषसमासः। वीचिविक्षोभेण शीतलं वीचिविक्षोभशीतलम् इति तृतीयातत्पुरुषसमासः।
- उपजिघ्रन्तौ - उपपूर्वकात् घ्राधातोः शतृप्रत्यये प्रथमाद्विवचने उपजिघ्रन्तौ इति रूपम्।
- स्वनिःश्वासानुकारिणम् - स्वस्य निःश्वासः स्वनिःश्वासः इति षष्ठीतत्पुरुषसमासः। स्वनिःश्वासम् अनुकरोति इत्यर्थे स्वनिःश्वासानुकारी इति रूपम्, तं स्वनिःश्वासानुकारिणम्।

सन्धिकार्यम् -

- सरसीष्वरविन्दानाम् - सरसीषु+अरविन्दानाम्
- आमोदमुपजिघ्रन्तौ - आमोदम्+उपजिघ्रन्तौ
- **प्रयोगपरिवर्तनम्** - सरसीषु अरविन्दानां वीचिविक्षोभशीतलं स्वनिःश्वासानुकारिणम् अरविन्दानाम् आमोदः उपजिघ्रद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -९

३३. अरविन्दानां परिमलः कथं शीतलः जातः।

३४. आमोदः कम् अनुकृतवान्।

३५. दम्पत्योः निःश्वासः कीदृशः इति सिध्यति।

७.११) इदानीं मूलपाठम् अवगच्छाम -

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम्।

अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः।।४४।।

अन्वयः - आत्मविसृष्टेषु यूपचिह्नेषु ग्रामेषु यज्वनाम् अर्घ्यानुपदम् अमोघा आशिषः प्रतिगृह्णन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - आत्मविसृष्टेषु स्वदत्तेषु यूपचिह्नेषु यूपचिह्नयुक्तेषु ग्रामेषु यज्वनां यज्ञं कुर्वतां याज्ञिकानाम् अर्घ्यानुपदम् अर्घ्यग्रहणानन्तरं अमोघाः सफला आशिषः आशीर्वादान् प्रतिगृह्णन्तौ स्वीकुर्वन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - गमनकाले ग्रामेषु याज्ञिकानाम् सफलान् आशीर्वादान् तौ स्वीकृतवन्तौ। ते च ग्रामाः दिलीपेन एव प्रदत्ताः अपि तु यूपचिह्नयुक्ताः आसन्।

तात्पर्यार्थः - दिलीपः महान् दाता आसीत्। अतः यज्ञसम्पादनात् परं स याज्ञिकेभ्यः सम्पूर्णं ग्रामम् अपि ददाति स्म। यतो हि सम्पूर्णा अपि धरणी तदधीना आसीत्। तेषु ग्रामेषु यज्ञसमये पशुबलिः भवति। बलेः पूर्वं पशवः यस्मिन् दारुणि बद्धीकृत्य संस्थाप्यन्ते तद् दारु यूपदारु इति प्रसिद्धम्। तेषु ग्रामेषु च प्रायः यज्ञादिकं भवति स्म। अतः बहुत्र यूपदारूणि दृश्यन्ते स्म। तेषु च ग्रामेषु याज्ञिकाः निवसन्ति स्म। दिलीपः गच्छति इति ज्ञात्वा ते मार्गपार्श्वम् आगताः। ते पण्डिताः दम्पतिभ्यां आशीर्वादान् अपि प्रदत्तवन्तः। ते च आशीर्वादाः दिलीपसुदक्षिणयोः अभीष्टसाधकाः आसन्। अतः तौ तान् आशीर्वादान् गृहीत्वा वसिष्ठाश्रमं प्रति गतवन्तौ।

व्याकरणविमर्शः -

- आत्मविसृष्टेषु - आत्मना विसृष्टाः आत्मविसृष्टाः इति तृतीयातत्पुरुषसमासः, तेषु आत्मविसृष्टेषु।
- यूपचिह्नेषु - यूपाः एव चिह्नानि येषां ते यूपचिह्नाः इति बहुव्रीहिसमासः, तेषु यूपचिह्नेषु।
- यज्वनाम् - अयजन्त इति यज्वानः, तेषां यज्वनाम्। इदं षष्ठीबहुवचनान्तं रूपम्।
- अमोघाः - न मोघाः अमोघाः इति नञ्तत्पुरुषसमासः। इदं द्वितीयैकवचनान्तं पदम्।
- प्रतिगृह्णन्तौ - प्रतिपूर्वकात् ग्रह्-धातोः शतृप्रत्यये प्रथमाद्विवचने प्रतिगृह्णन्तौ इति रूपम्।
- अर्घ्यानुपदम् - अर्घाय इदम् इति अर्थे यत्प्रत्यये अर्घ्यशब्दः निष्पद्यते। पदस्य पश्चात् अनुपदम् इति अव्ययीभावसमासः। अर्घ्यस्य अनुपदम् अर्घ्यानुपदम् इति षष्ठीतत्पुरुषसमासः।
- आशिषः - आशिष्-शब्दस्य द्वितीयाबहुवचने आशिषः इति रूपम्।

सन्धिकार्यम् -

- ग्रामेष्वात्मविसृष्टेषु - ग्रामेषु+आत्मविसृष्टेषु
- प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः - प्रतिगृह्णन्तौ+अर्घ्यानुपदम्+आशिषः
- **प्रयोगपरिवर्तनम्** - आत्मविसृष्टेषु यूपचिह्नेषु ग्रामेषु यज्वनाम् अर्घ्यानुपदम् अमोघाः आशिषः

प्रतिगृह्णद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -१०

३६. ग्रामाः केन केभ्यः दत्ताः।

३७. यज्वनाम् आशिषः कीदृश्यः आसन्।

३८. प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः इत्यस्य सन्धिविच्छेदं कुरुत।

७.१२) इदानीं मूलपाठम् अवगच्छाम -

हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्।

नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्।।४५।।

अन्वयः - हैयङ्गवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छन्तौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

अन्वयार्थः - हैयङ्गवीनं ह्यस्तनेन गोदोहनेन उत्पन्नं घृतम् आदाय गृहीत्वा उपस्थितान् समीपस्थितान् घोषवृद्धान् आभीरपल्लीवृद्धजनान् वन्यानाम् अरण्ये जातानां मार्गशाखिनां मार्गस्थवृक्षाणां नामधेयानि नामानि पृच्छन्तौ जिज्ञासमानौ (तौ दम्पती गुरोः वसिष्ठस्य आश्रमं जग्मतुः)।

सरलार्थः - दिलीपः सुदक्षिणा च मार्गे बहून् वृक्षान् दृष्टवान् येषां नामानि तैः न ज्ञायते। यदा घोषवृद्धाः सद्योजातं घृतं स्वीकृत्य दिलीपस्य समीपम् आगतवन्तः तदा दिलीपःतेषां वृक्षाणां नामानि तान् पृष्टवान्।

तात्पर्यार्थः - राजा वृद्धानां सेवकः भवेत् इति मनुः उक्तवान्। अतः दिलीपः अपि आभीरपल्ल्यां वसतः वृद्धान् प्रति अत्यन्तं श्रद्धाशीलः आसीत्। राजा वनम् अतिक्रम्य घोषपल्लीं प्रविष्टवान्। महाराजः क्षितीश्वरः दिलीपः आगतः इति अवलोक्य घोषपल्लीस्थाः वृक्षाः हैयङ्गवीनं स्वीकृत्य समुपस्थिताः आसन्। ह्यः गोदोहनेन यद् दुग्धम् उत्पन्नम् तेन दुग्धेन निर्मितं घृतं हैयङ्गवीनम् इति कथ्यते। दिलीपः समुपस्थितान् तान् अवलोक्य अतीव प्रसन्नः जातः। मार्गे स कांश्चन वृक्षान् दृष्टवान् येषां नामानि स न जानन्ति। घोषवृद्धाः अस्मिन् विषये अधिकज्ञानसम्पन्नः आसीत् इति दिलीपः ज्ञातवान्। अतः दिलीपः वृक्षनामानि तेभ्यः ज्ञात्वा वसिष्ठाश्रमं प्रति निर्गतवान् इति तात्पर्यम्।

व्याकरणविमर्शः -

- आदाय - आङ्पूर्वकात् दाधातोः ल्यप्प्रत्यये आदाय इति रूपम्।
- घोषवृद्धान् - घोषे वृद्धाः घोषवृद्धाः इति सप्तमीतत्पुरुषसमासः, तान् घोषवृद्धान्।
- उपस्थितान् - उपपूर्वकात् स्थाधातोः क्तप्रत्यये उपस्थित इति प्रातिपदिकं निष्पद्यते। तस्य

द्वितीयाबहुवचने उपस्थितान् इति रूपम्।

- नामधेयानि - नामानि एव तानि इति अर्थे नामशब्दात् धेयप्रत्यये नामधेयानि इति रूपम्। इदं द्वितीयाबहुवचनान्तं पदम्।
- पृच्छन्तौ - प्रच्छ्-धातोः शतृप्रत्यये प्रथमाद्विवचने पृच्छन्तौ इति रूपम्।
- वन्यानाम् - वने भवाः वन्याः, तेषां वन्यानाम्।
- मार्गशाखिनाम् - मार्गे शाखिनः मार्गशाखिनः इति सप्तमीतत्पुरुषसमासः, तेषां मार्गशाखिनाम्।

सन्धिकार्याणि -

- हैयङ्गवीनमादाय - हैयङ्गवीनम्+आदाय
- घोषवृद्धानुपस्थितान् - घोषवृद्धान्+उपस्थितान्
- **प्रयोगपरिवर्तनम्** - हैयङ्गवीनम् आदाय उपस्थितान् घोषवृद्धान् वन्यानां मार्गशाखिनां नामधेयानि पृच्छद्भ्यां (ताभ्यां दम्पतीभ्यां गुरोः वसिष्ठस्य आश्रमः जग्मे)।

पाठगतप्रश्नाः -११

३९. किं नाम हैयङ्गवीनम्।

४०. तौ मार्गवृक्षाणां नामानि के उक्तवन्तः।

४१. घोषवृद्धाः किम् आदाय समुपस्थिताः आसन्।

४२. सुदक्षिणादिलीपौ कुत्र आगतवन्तौ-

१) ब्राह्मणग्रामम् २) जलाशयम् ३) यज्ञस्थानम् ४) आभीरग्रामम्

७.१३) इदानीं मूलपाठम् अवगच्छाम -

काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः।

हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव।।४६।।

अन्वयः - व्रजतोः शुद्धवेषयोः तयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसोः इव योगे (सति) कापि अभिख्या आसीत्।

अन्वयार्थः - व्रजतोः गच्छतोः शुद्धवेषयोः पवित्रवस्त्रयोः तयोः सुदक्षिणादिलीपयोः हिमनिर्मुक्तयोः तुषाररहितयोः चित्राचन्द्रमसोः इव चित्रानामकनक्षत्रचन्द्रयोः इव योगे संयोगे सति कापि काचित् अभिख्या शोभा आसीत् अभवत्।

सरलार्थः - वसिष्ठाश्रमं गच्छन्तौ पवित्रवस्त्रधारिणौ सुदक्षिणादिलीपौ शोभायुक्तौ आस्ताम्। यथा संयोगे सति चित्रानक्षत्रचन्द्रौ च शोभायुक्तौ भवतः।

तात्पर्यार्थः - दिलीपः सुदक्षिणा च पवित्रवस्त्रं धृत्वा वसिष्ठाश्रमं प्रति गतवन्तौ। अत्र गच्छतोः तयोः वर्णनाय कविः एकम् उपमानम् अपि प्रदत्तवान्। चैत्रमासस्य पूर्णिमायां चित्रानक्षत्रं चन्द्रेण सह मिलति। यदा चित्राचन्द्रौ मिलतः तदा तौ अपूर्वशोभायुक्तौ दृश्येते। अत्र सुदक्षिणां चित्रानक्षत्रेण दिलीपं च चन्द्रेण सह उपमाति कविः। सुदक्षिणा दिलीपः च एकं रथम् आरुह्य तपोवनं प्रति गतवन्तौ। अतः तयोः योगे अपि अपूर्वा शोभा आसीत्। यथा चित्राचन्द्रमसोः योगे शोभा तिष्ठति। एवं संयुक्तयोः तयोः वर्णनेन सन्तानलाभे तयोः अनुकूलता एव प्रदर्शिता कविना। अर्थात् येन कारणेन ते तपोवनं गतवन्तौ तत् अवश्यं सिद्धं भविष्यति इति अभिप्रायः। अनेन श्लोकेन कालिदासस्य ज्योतिश्शास्त्रज्ञानं सम्यक् आसीत् इति स्पष्टं भवति।

व्याकरणविमर्शः -

व्रजतोः - व्रज्-धातोः शतृप्रत्यये व्रजत् इति प्रातिपदिकं निष्पद्यते। तस्य षष्ठीद्विवचने व्रजतोः इति रूपम्। इदं षष्ठीद्विवचनान्तं पदम्।

शुद्धवेषयोः - शुद्धः वेषः ययोः तौ शुद्धवेषौ इति बहुव्रीहिसमासः, तयोः शुद्धवेषयोः।

हिमनिर्मुक्तयोः - हिमात् निर्मुक्तौ हिमनिर्मुक्तौ इति पञ्चमीतत्पुरुषसमासः, तयोः हिमनिर्मुक्तयोः।

चित्राचन्द्रमसोः - चित्रा च चन्द्रमाः च चित्राचन्द्रमसौ इति इतरेतरद्वन्द्वसमासः, तयोः चित्राचन्द्रमसोः।

सन्धिकार्यम् -

- काप्यभिख्या - कापि+अभिख्या
- तयोरासीद् - तयोः+आसीद्
- हिमनिर्मुक्तयोर्योगे - हिमनिर्मुक्तयोः+योगे
- चित्राचन्द्रमसोरिव - चित्राचन्द्रमसोः+इव
- **प्रयोगपरिवर्तनम्** - व्रजतोः शुद्धवेषयोः तयोः हिमनिर्मुक्तयोः चित्राचन्द्रमसोः इव योगे (सति) कया अपि अभिख्यया अभूयत।

अलङ्कारालोचना- अत्र दिलीपः चन्द्रेण उपमितः। राज्ञी सुदक्षिणा चित्रानक्षत्रेण उपमिता। इव इति उपमावाचकः शब्दः वर्तते। यथा चित्राचन्द्रमसोः योगे अपूर्वा शोभा तिष्ठति तथा शोभा सुदक्षिणादिलीपयोः योगे अपि आसीत् इति सादृश्यम्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -१२

४३. चित्राचन्द्रमसोः योगः कदा भवति।

४४. अभिख्या नाम किम्।

४५. अत्र सुदक्षिणादिलीपौ काभ्याम् उपमितौ।

४६. अत्र दिलीपः केन उपमितः-

१) चन्द्रेण २) चित्रानक्षत्रेण ३) नक्षत्रेण ४) सूर्येण

४७. हिमनिर्मुक्तयोः इत्यत्र कः समासः-

१) तृतीयातत्पुरुषः २) चतुर्थीतत्पुरुषः ३) पञ्चमीतत्पुरुषः ४) सप्तमीतत्पुरुषः

७.१४) इदानीं मूलपाठम् अवगच्छाम -

तत्तद् भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः।

अपि लङ्घितमध्वानं बुबुधे न बुधोपमः।।४७।।

अन्वयः - प्रियदर्शनः बुधोपमो भूमिपतिः पत्न्यै तत्तद् दर्शयन् लङ्घितम् अपि अध्वानं न बुबुधे।

अन्वयार्थः - प्रियदर्शनः अभीष्टदर्शनः बुधोपमः पण्डितसदृशः भूमिपतिः राजा दिलीपः पत्न्यै भार्यायै सुदक्षिणायै तत्तद् अद्भूतं वस्तु दर्शयन् अवलोकयन् लङ्घितम् अपि अतिवाहितम् अपि अध्वानं मार्गं न बुबुधे न ज्ञातवान्।

सरलार्थः - प्रियदर्शनः बुधसदृशः राजा दिलीपः यदा वसिष्ठाश्रमं प्रति गच्छति स्म तदा राज्यस्य कुत्र किम् अस्ति इत्यादिकं सर्वं भार्यां सुदक्षिणां दर्शितवान्। तेन सः अतिक्रान्तं मार्गम् अपि न ज्ञातवान्।

तात्पर्यार्थः - दिलीपः सुदर्शनः पुरुषः आसीत्। अतः सर्वे एव तं द्रष्टुम् इच्छन्ति स्म। अतः स प्रियदर्शनः इति कविः वर्णयति। चन्द्रस्य पुत्रः भवति बुधः। राजा दिलीपः बुधग्रहसदृशः आसीत्। अथवा बुधः इत्यस्य अर्थः पण्डितः भवति। तेन दिलीपः पण्डितः आसीत् इति सूच्यते। दिलीपः स्वराज्यस्य विषये सर्वं जानाति स्म। अत एव स यदा वसिष्ठाश्रमं गतवान् तदा राज्ये किं कुत्र अस्ति इत्येतत् सर्वं सुदक्षिणायाः सविधे वर्णितवान्। एवं वर्णयन् स बहुमार्गम् अतिक्रान्तवान्। किन्तु स एतावदेकाग्रतया वर्णयति स्म यत् कियान् मार्गः अतिक्रान्तः इति न ज्ञातवान्। एतेन दिलीपः समीचीनः वक्ता आसीत् इति अपि ज्ञायते।

व्याकरणविमर्शः -

- भूमिपतिः - भूमेः पतिः भूमिपतिः इति षष्ठीतत्पुरुषसमासः।
- दर्शयन् - दृश्धातोः णिच्प्रत्यये दृशिधातुः निष्पद्यते। ततः शतृप्रत्यये प्रथमैकवचने दर्शयन् इति रूपम्।
- प्रियदर्शनः - प्रियं दर्शनं यस्य सः प्रियदर्शनः इति बहुव्रीहिसमासः।
- अध्वानम् - अध्वन्-शब्दस्य द्वितीयैकवचने अध्वानम् इति रूपम्।
- बुबुधे - बुध्-धातोः लिटि प्रथमपुरुषैकवचने बुबुधे इति रूपम्।
- बुधोपमः - बुधः उपमा यस्य स बुधोपमः इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- लङ्घितमध्वानम् - लङ्घितम्+अध्वानम्
- **प्रयोगपरिवर्तनम्** - प्रियदर्शनेन बुधोपमेन भूमिपतिना पत्न्यै तत्तद् दर्शयता लङ्घितः अपि अध्वा न बुबुधे।

पाठगतप्रश्नाः -१३

४८. दिलीपः अतिक्रान्तं मार्गं कथं न ज्ञातवान्।

४९. बुबुधे इति रूपं कस्य धातोः कस्मिन् लकारे भवति।

५०. बुधः कस्य पुत्रः-

१) सूर्यस्य २) भूमेः ३) चन्द्रस्य ४) शुक्रस्य

७.१५) इदानीं मूलपाठम् अवगच्छाम -

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः।

सायं संयमिनस्तस्य महर्षेर्महिषीसखः।।४८।।

अन्वयः - दुष्प्रापयशाः श्रान्तवाहनः महिषीसखः स सायं संयमिनः तस्य महर्षेः आश्रमं प्रापत्।

अन्वयार्थः - दुष्प्रापयशाः दुर्लभकीर्तिमान् श्रान्तवाहनः क्लान्ततुरङ्गः महिषीसखः सुदक्षिणासहचरः सः दिलीपः सायं सन्ध्याकाले संयमिनः नियमं पालयतः तस्य महर्षेः वसिष्ठस्य आश्रमं तपोवनं प्रापत् प्राप्तवान्।

सरलार्थः - दुर्लभयशसः अधिकारी राजा दिलीपः पुत्रप्राप्तिकाम्यया वसिष्ठाश्रमं प्रति निर्गतवान्। अन्तिमे च स यदा सन्ध्याकाले संयमिमहर्षेः वसिष्ठस्य आश्रमं प्राप्तवान् तदा तस्य रथवाहकाः अश्वाः अपि श्रान्ताः आसन्।

तात्पर्यार्थः - इतः पूर्वं कविः सन्तानप्राप्तये दिलीपस्य वसिष्ठाश्रमं प्रति आगमनं मार्गे ताभ्यां दृष्टं प्रकृतिसौन्दर्यम् इत्यादिकं सर्वं वर्णितवान्। एवं बहुकालात् परं यदा तौ वसिष्ठाश्रमं प्राप्तवन्तौ तदा सन्ध्याकालः आसीत्। मार्गश्रमकारणात् स्यन्दनवाहकाः अश्वाः अपि अतीव क्लान्ताः आसन्। वसिष्ठः संयमी आसीत्। संयमिनः एव ध्यानयोगेन कालत्रयं द्रष्टुं समर्थाः भवन्ति। अतः एव दिलीपः पुत्रलाभाय तस्य तपोवनम् आगतवान्। यतो हि दिलीपः जानाति स्म यत् कुलगुरुः वसिष्ठः ध्यानयोगेन सन्तानप्राप्तिप्रतिबन्धकं ज्ञास्यति। किञ्च तत् निराकर्तुं अवश्यं कञ्चित् उपायं वदिष्यति। अतः एव दिलीपस्य भार्यया सुदक्षिणया सह वसिष्ठतपोवनं प्रति आगमनम्।

व्याकरणविमर्शः -

- दुष्प्रापयशाः - दुष्प्रापं यशः यस्य स दुष्प्रापयशाः इति बहुव्रीहिसमासः।
- प्रापत् - प्रपूर्वकात् आप्-धातोः लुङि प्रथमपुरुषैकवचने प्रापत् इति रूपम्।
- श्रान्तवाहनः - श्रान्तानि वाहनानि यस्य सः श्रान्तवाहनः इति बहुव्रीहिसमासः।
- संयमिनः - संयमः अस्ति यस्य स संयमी, तस्य संयमिनः।
- महिषीसखः - महिष्याः सखा महिषीसखः इति षष्ठीतत्पुरुषसमासः।
- महर्षेः- महान् चासौ ऋषिः च महर्षिः इति कर्मधारयसमासः, तस्य महर्षेः। इदं षष्ठ्येकवचनान्तं रूपम्।

सन्धिकार्यम् -

- प्रापदाश्रमम् - प्रापत्+आश्रमम्
- संयमिनस्तस्य - संयमिनः+तस्य
- महर्षेर्महिषीसखः - महर्षेः+महिषीसखः
- **प्रयोगपरिवर्तनम्** - दुष्प्रापयशसा श्रान्तवाहनेन महिषीसखेन तेन सायं संयमिनः तस्य महर्षेः आश्रमः प्रापि।

पाठगतप्रश्नाः -१४

५१. दिलीपः कदा वसिष्ठाश्रमं प्राप्तवान्।

५२. महिषीसखः इत्यस्य किं विग्रहवाक्यं समासनाम च किम्।

पाठसारः

तदनन्तरं दिलीपः ब्रह्माणं पूजयित्वा कुलगुरोः वसिष्ठस्य आश्रमं रथेन गतवान्। यथा वर्षाकाले मेघारूढः ऐरावतः विद्युत्साहचर्यं लभते तथा रथारूढः दिलीपः सुदक्षिणासाहचर्यं लब्धवान्। आश्रमपरिसरः शान्तः भवति। यदि तत्र अधिकाः जनाः गच्छन्ति तर्हि आश्रमे शान्तिभङ्गः स्यात्। अतः तौ अल्पसेनापरिवृतौ एव गतवन्तौ। यदा तौ वनमार्गेण गतवन्तौ तदा वायुः तौ सेवते स्म। स वायुः शालवृक्षरसजन्येन गन्धेन युक्तः पुष्परेणूनां विक्षेपकः विपिनस्थवृक्षान् कम्पयति स्म। मयूराः रथध्वनिं श्रुत्वा मुखम् उन्नमितवन्तः। रथध्वनिं मेघध्वनिं मत्वा ते षड्जस्वरेण केकारवम् अकुर्वन्। ताः केकाः श्रावं श्रावं तौ दम्पती वसिष्ठाश्रमं गतवन्तौ। यदा रथः वनमार्गेण गच्छति स्म तदा मार्गस्थमृगाः समीपात् मार्गं त्यजन्ति स्म। तेषु मृगद्वन्द्वेषु तौ दम्पती परस्परं नेत्रसादृश्यं दृष्टवन्तौ। गगने सारसाः पङ्क्तिबद्धाः सन्तः स्तम्भरहितां तोरणमालां निर्मीतवन्तः। तां तोरणमालां तौ दम्पती दृष्टवन्तौ। यस्यां दिशि रथः गच्छति स्म तस्याम् एव दिशि वायुः प्रवहति स्म। एवम् अनुकूलः पवनः तयोः मनोरथः अवश्यं सफलः भविष्यति

इति सूचयति स्म। रथवाहकानाम् अश्वानां खुरैः उक्षिप्ताः धूलिकणाः तौ न स्पृष्टवन्तौ। सरोवरेषु उत्पन्नानाम् अरविन्दानां परिमलः तरङ्गसञ्चलेन शीतलः आसीत्। तादृशः आमोदः सुदक्षिणादिलीपयोः निःश्वासम् अनुकृतवान्। तेन तयोः निःश्वासः अरविन्दाद् अपि परिमलभरितः आसीत् इति सूच्यते। ततः दिलीपदत्तेषु यूपचिह्नयुक्तेषु ग्रामेषु प्रविष्टवन्तौ। तत्र च यज्वनां सफलान् आशीर्वादान् तौ गृहीतवन्तौ। आभीरपल्लीषु घोषवृद्धाः हैयङ्गवीनम् आदाय समुपस्थिताः आसन्। तेभ्यः च वन्यानां मार्गवृक्षाणां नामानि ज्ञातवान् दिलीपः। चैत्रमासस्य पूर्णिमायां चित्रानक्षत्रचन्द्रौ च संयुक्तौ भवतः। तदा तयोः योगे यथा शोभा तिष्ठति तथा शोभा सुदक्षिणादिलीपयोः योगे अपि आसीत्। गमनकाले दिलीपः मार्गदृश्यानि पत्नीं सुदक्षिणां दर्शितवान्। एवं कुर्वन् सः अतिवाहितम् अपि मार्गं न ज्ञातवान्। अन्ते च सायंकाले तौ दम्पती सुदक्षिणादिलीपौ यदा महर्षेः वसिष्ठस्य आश्रमं प्राप्तवन्तौ तदा रथवाहकाः अश्वाः अपि श्रान्ताः आसन्।

पाठान्तप्रश्नाः -

१. समासेन पाठसारं वर्णयत।

२. एकं रथं समारूढौ सुदक्षिणादिलीपौ कथं वर्णितौ कविना।

३. प्रकृतिवर्णने पवनं कथं वर्णितवान् कविः।

४. मयूराणां विषये कविः किम् उक्तवान्।

५. परस्पराक्षसादृश्यम् इत्यादिश्लोकं वर्णयत।

६. आमोदः तयोः निश्वासम् अनुकृतवान् इति कथनेन कविः किं प्रतिपादयितुम् इच्छति।

७. दिलीपेन दत्ताः ग्रामाः कीदृशाः आसन्- सविस्तारं वर्णयत।

८. सुदक्षिणादिलीपयोः वसिष्ठाश्रमगमनं वर्णयत।

९. स्तम्भयोः लिखितान् परस्परसम्बद्धान् मेलयत।

स्तम्भः-क	**स्तम्भः-ख**
१. बुबुधे	१. सुदक्षिणादिलीपौ
२. सुखस्पर्शैः	२. केकाः
३. मार्गशाखिनाम्	३. मृगद्वन्द्वम्
४. षड्जसंवादिनीः	४. पवनैः
५. शोभा	५. अवगतवान्
६. महर्षिः	६. वन्यानाम्
७. परस्पराक्षिसादृश्यम्	७. अभिख्या
८. चित्राचन्द्रमसौ	८. वसिष्ठः

उत्तरम् - १-५,२-४,३-६,४-२,५-७,६-८,७-३,८-१.

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. सुदक्षिणादिलीपौ पुत्रकाम्यया वसिष्ठाश्रमं गतवन्तौ।

२. जाया च पतिः च इति विग्रहे समासे कृते दम्पती इति रूपम्। अत्र एकशेषसमासः भवति। इदं नित्यद्विवचनान्तम्।

३. वसिष्ठः दिलीपस्य कुलगुरुः आसीत्।

४. ४

५. १

उत्तराणि-२

६. दिलीपस्य रथः स्निग्धगम्भीरनिर्घोषः आसीत्।

७. सुदक्षिणादिलीपौ विद्युदैरावताभ्याम् उपमितौ।

८. प्रावृषि भवः प्रावृषेण्यः, तं प्रावृषेण्यम्। इदं द्वितीयैकवचनान्तं रूपम्। वर्षर्तौ जातम् इत्यर्थः।

९. २

उत्तराणि-३

१०. सुदक्षिणादिलीपौ अनुभावविशेषात् सेनापरिवृतौ इव।

११. मा भूत् इत्यस्य मा अभूत् इत्येव प्रकृतं स्वरूपम्। अत्र माङ्योगात् न माङ्योगे इति सूत्रेण अडागमः न भवति। मा अस्तु इत्यर्थः।

१२. आश्रमपीडा मा भूत् इति तौ परिमेयपुरःसरौ।

उत्तराणि-४

१३. सुखस्पर्शैः शालनिर्यासगन्धिभिः पुष्परेणूत्किरैः आधूतवनराजिभिः पवनैः तौ सेव्यमानौ आस्ताम्।

१४. शालस्य निर्यासः शालनिर्यासः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासस्य गन्धः शालनिर्यासगन्धः इति षष्ठीतत्पुरुषसमासः। शालनिर्यासगन्धः अस्ति येषां ते शालनिर्यासगन्धिनः, तैः शालनिर्यासगन्धिभिः।

१५. पुष्परेणूत्किरैः+वातैः+आधूतवनराजिभिः

१६. ३

१७. १

उत्तराणि-५

१८. मयूराः षड्जस्वरेण संवदन्ते स्म।

१९. ते रथचक्रजन्यशब्दं श्रुत्वा मुखम् उन्नमितवन्तः।

२०. रथस्य नेमयः रथनेमयः इति षष्ठीतत्पुरुषसमासः। रथनेमीनां स्वनाः रथनेमिस्वनाः इति षष्ठीतत्पुरुषसमासः। ऊर्ध्वं मुखं येषां ते उन्मुखाः इति बहुव्रीहिसमासः। रथनेमिस्वनैः उन्मुखाः रथनेमिस्वनोन्मुखाः इति तृतीयातत्पुरुषसमासः, तैः रथनेमिस्वनोन्मुखैः।

२१. १

२२. २

उत्तराणि-६

२३. मृगाः रथे समीपम् आगते सति मार्गं त्यजन्ति स्म।

२४. तौ परस्परलोचनसादृश्यं मृगद्वन्द्वेषु अवलोकितवन्तौ।

२५. न दूरम् अदूरम् इति नञ्तत्पुरुषसमासः। उज्झितं वर्त्म यैः तानि उज्झितवर्त्मानि इति बहुव्रीहिसमासः। अदूरं यथा तथा उज्झितवर्त्मानि अदूरोज्झितवर्त्मानि इति सुप्सुपासमासः, तेषु अदूरोज्झितवर्त्मसु।

२६. ३

उत्तराणि-७

२७. सारसैः पङ्क्तिबन्धात् तोरणस्रक् कृता।

२८. तोरणस्रक् स्तम्भरहिता आसीत्।

२९. उत्पूर्वकात् नम्-धातोः णिचि क्तप्रत्यये उन्नमितम् इति रूपम्। उन्नमितम् आननं ययोः तौ उन्नमिताननौ इति बहुव्रीहिसमासः।

उत्तराणि-८

३०. पवनः अनुकूलः आसीत्।

३१. पवनेन मनोरथसाफल्यस्य सूचनं तुरगोत्कीर्णानां धूलीनाम् अपसारणं च इति कार्यद्वयं कृतम्।

३२. रजोभिः+तुरगोत्कीर्णैः+अस्पृष्टालकवेष्टनौ

उत्तराणि-९

३३. अरविन्दानां परिमलः तरङ्गसञ्चलेन शीतलः जातः।

३४. आमोदः सुदक्षिणादिलीपयोः निःश्वासम् अनुकृतवान्।

३५. दम्पत्योः निःश्वासः अरविन्दाद् अपि परिमलभरितः इति सिध्यति।

उत्तराणि-१०

३६. ग्रामाः दिलीपेन याज्ञिकब्राह्मणेभ्यः दत्ताः।

३७. यज्वनाम् आशिषः अमोघाः आसन्।

३८. प्रतिगृह्णन्तौ+अर्घ्यानुपदम्+आशिषः

उत्तराणि-११

३९. ह्यः गोदोहनेन यद् दुग्धम् उत्पन्नम् तेन दुग्धेन निर्मितं घृतं हैयङ्गवीनम् इति कथ्यते।

४०. तौ मार्गवृक्षाणां नामानि घोषवृद्धाः उक्तवन्तः।

४१. घोषवृद्धाः हैयङ्गवीनम् आदाय समुपस्थिताः आसन्।

४२. ४

उत्तराणि-१२

४३. चित्राचन्द्रमसोः योगे चैत्रमासस्य पूर्णिमायां भवति।

४४. अभिख्या नाम शोभा।

४५. अत्र सुदक्षिणादिलीपौ चित्राचन्द्राभ्याम् उपमितौ।

४६. १

४७. ३

उत्तराणि-१३

४८. दिलीपः पत्न्यै सुदक्षिणायै मार्गदृश्यानि दर्शयन् अतिक्रान्तं मार्गं न ज्ञातवान्।

४९. बुध्-धातोः लिटि प्रथमपुरुषैकवचने बुबुधे इति रूपम्।

५०. ३

उत्तराणि-१४

५१. दिलीपः सायंकाले वसिष्ठाश्रमं प्राप्तवान्।

५२. महिष्याः सखा महिषीसखः इति षष्ठीतत्पुरुषसमासः।

सन्दर्भग्रन्थसूचिः -

- कालिदासः। रघुवंशम्(चन्द्रकलाख्यया व्याख्यया हिन्द्यनुवादेन च विभूषितम्)। रेग्मी-आचार्यशेषराजशर्मा(व्याख्याकारः)। २००९। चौखम्बा-सुरभारती-प्रकाशन। वाराणसी।
- कालिदासः। रघुवंशम्। वन्द्योपाध्याय-उदयचन्द्रः, वन्द्योपाध्याय-अनिता(व्याख्याकर्तारौ)। २००३। संस्कृत-बुक-डिपो। कलिकाता।

॥ इति सप्तमः पाठः ॥

348sk08

८

मोहमुद्गरः रामगुणकीर्तनं च

प्रस्तावना

सर्वेषु दर्शनेषु अत्यन्तं प्रसिद्धम् उत्कृष्टतमं च अद्वैतदर्शनम्। दर्शनं नाम किमिति प्रश्नस्य उत्तरं तावद् दृश्यते अनेन इति दर्शनम् इति। दृश्यते साक्षात्क्रियते अनुभूयते मूलतत्त्वम् अनेन इति दर्शनमिति दृश्-धातोः करणार्थे ल्युट्प्रत्यये दर्शनशब्दो निष्पन्नः। अद्वैतदर्शनस्य मूलं तत्त्वं भवति "सर्वं खल्विदं ब्रह्म" इति। अर्थाद् यत्किञ्चित्सर्वमेव ब्रह्म। इदं हि जगत् ब्रह्मणः विवर्तभूतं यथा रज्ज्वां सर्पभ्रमे सर्पः रज्जोः विवर्तभूतः भवति। वस्तुतः तत्र रज्जुरेवास्ति किन्तु सर्पः दृश्यते, एवमेव वस्तुतः सर्वं ब्रह्मैव। जीवस्तु अज्ञानोपहितं ब्रह्म। जीवब्रह्मणोरैक्यस्य अपरोक्षानुभूतिः एवास्य अद्वैतदर्शनस्य मूलम्। अद्वैतदर्शनस्य आचार्येषु मूर्धन्यतां भजन्ते परमपूज्यचरणाः श्रीशङ्कराचार्याः। ते भाष्यग्रन्थानां प्रणयनेन अद्वैतसिद्धान्तान् प्रतिष्ठापितवन्तः। तद्विरचितम् उपनिषद्भाष्यं ब्रह्मसूत्रभाष्यं गीताभाष्यं च अद्वैतवेदान्तस्य स्तम्भरूपम्। ते न केवलं भाष्यविरचनेन अपि तु स्तोत्रमाध्यमेन अपि अद्वैतवेदान्तम् उपदिष्टवन्तः। तद्विरचितेषु स्तोत्रेषु अन्यतमं भवति द्वादशपञ्जरिकास्तोत्रम्। तस्यैव मोहमुद्गरः इत्यभिधानम्। अत्र आचार्याणां श्लोकसंरचने अतीव सुललिता सरला च शैली दृश्यते। एतादृश्या सरलया सुललितया शैल्या एव ते अद्वैतसिद्धान्तान् स्त्रोत्रे अस्मिन् प्रतिपादितवन्तः। अस्य स्तोत्रस्य श्लोकानाम् सरलवाक्यैः अन्वयार्थज्ञानम् अस्मिन् पाठे भविष्यति।

यस्य जनस्य कृत्याकृत्यविवकः अस्ति स एव संसारे परां प्रतिष्ठां प्राप्नोति। कृत्याकृत्यविवेकवत्सु सदाचारपरायणेषु सत्यनिष्ठेषु जनेषु मूर्धन्यतां भजते पुरुषोत्तमः श्रीरामचन्द्रः। तस्य जीवनं यद्यपि विपन्मुक्तं नासीत् परन्तु स कदापि सत्यवादितां न त्यक्तवान्। कथं जीवने स्थेयम् इत्यस्मिन् विषये तस्य आचरणमेव प्रमाणम्। तस्मात् तस्य अमरं चरितम् आश्रित्य महाकविः बाल्मीकिः रामायणम् इति महाकाव्यं विरचितवान्। आदिकविः बाल्मीकिः, अतः रामायणम् आदिकाव्यम् इति प्रसिद्धम्। रामायणस्य सप्त काण्डानि भवन्ति - बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम् उत्तरकाण्डं चेति। तेषु काण्डेषु अरण्यकाण्डे श्रीरामचन्द्रस्य गुणवर्णना बाल्मीकिना विहिताः। येषु श्लोकेषु श्रीरामचन्द्रगुणवर्णना संवृत्ता तेषु केचन चिताः श्लोकाः अस्मिन् पाठे स्वीकृताः। तेषे श्लोकेषु वर्णितां श्रीरामचन्द्रगुणवर्णनाम् अस्मिन् पाठे पश्यामः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- स्तोत्रसाहित्यं जानीयात्।
- मोहमुद्गरः इति स्त्रोत्रमाध्यमेन अद्वैतवेदान्ततत्त्वानि जानीयात्।
- श्रीरामगुणवर्णना इत्यंशस्य अध्ययनेन रामचन्द्रस्य गुणान् जानीयात्।
- श्लोकानाम् अन्वयार्थः समासं च ज्ञातुं शक्नुयात्।
- विविधान् नूतनान् शब्दान् जानीयात्।
- विविधशब्दानाम् प्रयोगस्थलानि ज्ञात्वा स्वयं भाषाव्यवहारे तेषां शब्दानाम् उचितं प्रयोगं कर्तुं शक्नुयात्।

मोहमुद्गरस्तोत्रम्

८.१) सम्पूर्णः मूलपाठः - मोहमुद्गरस्तोत्रम्

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे।। १।।
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोत्पात्तं वित्तं तेन विनोदय चित्तम्।। २।।
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः।। ३।।
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं कः कुतः आयातस्तत्त्वं चिन्तय यदिदं भ्रातः।। ४।।
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम्।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा।। ५।।
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः।। ६।।
सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः।। ७।।
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम्।। ८।।

त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदज्ञानम्।। ९।।
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम्।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम्।। १०।।
नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम्।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम्।। ११।।
का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम्।। १२।।
गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद् भव मुक्तः।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम्।। १३।।
द्वादशपञ्जरिकामय एष शिष्याणां कथितो ह्युपदेशः।
येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम्।। १४।।

८.२) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - १

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे।। १।।
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोत्पात्तं वित्तं तेन विनोदय चित्तम्।। २।।
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः।। ३।।
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः।
कस्य त्वं कः कुतः आयातस्तत्त्वं चिन्तय यदिदं भ्रातः।। ४।।

अन्वयार्थः -

सन्निहिते समीपे मरणे मृत्यौ सम्प्राप्ते प्राप्तौ अपि नहि नहि नैव केनापि प्रकारेण डुकृञ् करणे व्याकरणादिशास्त्रज्ञानं रक्षति परमपदं प्रापयति। तस्मात् हे मूढमते मूढा मतिर्यस्य स मूढमतिः, तस्य सम्बोधने मूढमते विवेकविहीने गोविन्दं परमेश्वरं भज आराधय, गोविन्दं परमेश्वरं भज आराधय, गोविन्दं परमेश्वरं भज आराधय।१।

मूढ हे विवेकहीन, धनागमतृष्णां धनस्य अर्थस्य आगमरूपां तृष्णाम् आशां जहीहि परित्यज। सद्बुद्धिं सच्चिन्तनं कुरु सम्पादय, मनसि मानसे वितृष्णां विषयेभ्यः वैराग्यं कुरु सम्पादय। यत् यथावत् निजकर्मोत्पात्तं निजकर्मणा स्वबलेन उपात्तम् उपार्जितं वित्तं धनं लभसे प्राप्नोषि तेन तावता एव चित्तं मनः विनोदय आनन्दय।२।

अर्थं वित्तम् अनर्थं विपदः कारणम् इति नित्यं सर्वदा भावय चिन्तय। यतो यस्मात् कारणात् ततः तस्माद् वित्तात् सुखलेशः अपि सुखस्य आभासः अपि नास्ति न भवति इति सत्यं यथार्थमेव। तत्र कारणं कथयति - पुत्राद् अपि आत्मजाद् अपि धनभाजां धनिकानां भीतिः "अयं पुत्रः मे मम सर्वस्वम् अपहरेत्" इत्यादिभयं भवति। सर्वत्र सर्वस्मिन् स्थले एषा नीतिः अयम् आचारः विहिता आचारः ज्ञायते। ३।

ते तव का कान्ता भार्या का। ते तव कः पुत्रः सुतः। अयं संसारः दृश्यमानः क्षणस्थायी प्रपञ्चः अतीव अत्यन्तं विचित्रः अद्भूतः। त्वं कस्य कः। कुतः कस्मात् स्थानात् आयातः आगतवान् (इति ज्ञातुं शक्नोषि) यद् इदं तत्त्वं यथार्थभूतं तद् भ्रातः हे सखे चिन्तय विचारय।४।

व्याख्यानम् -

अस्मिन् स्तोत्रे प्रथमः श्लोकः ध्रुवपदम्। अर्थात् प्रत्येकात् श्लोकात् परम् अस्य श्लोकस्यावृत्तिः भवति। अत्र शङ्करभगवत्पादाः कथयन्ति यत् - यदा मरणं समीपम् आगच्छति तदा न्यायव्याकरणादीनां संसारिकतत्त्वपूर्णशास्त्रानां ज्ञानेन मुक्तिः नैव भवति। यतो हि एतेषां ज्ञानेन केवलं कुतर्काय मतिः भवति। एतेन परमप्रियः मोक्षः नैव जायते। एतादृशशास्त्रेषु अनित्यपदार्थानां विषये एव चर्चा विहिता। तस्मात् हे अज्ञानिमनुष्य, यदि त्वं संसारिकदुःखात् मुक्तिं प्राप्तुम् इच्छसि तर्हि गोविन्दस्य परमेश्वरस्य भजनं कीर्तनं वा कुरु।१।

धनं कामं च न हि उपभोगेन समाप्तिं गच्छति, परन्तु उत्तरोत्तरं वर्धते एव। अत एव महाभारते प्रसिद्धोक्तिः -

"न जातु कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते।।" इति।

तस्मात् धनागमस्य तृष्णा परित्यज्या। यतो हि धनस्य तृष्णा विषयेभ्यः मनः परमात्मनि स्थापयितुम् अवकाशं न ददाति। सच्चिन्तनेन मनसः मालिन्यं क्षीयते। तस्मात् सद्बुद्धिः करणीया। किञ्च मनसि विषयेषु वैराग्यं सम्पादनीयम्। यतो हि विषयवैराग्यं विना मुक्तिः न भवति। वस्तुतः अत्र शमस्य प्रतिपादनं विहितम्। शमः नाम ज्ञानसाधनानि यानि श्रवणमननिदिध्यासनानि तेभ्यः भिन्नविषयेभ्यः अन्तरिन्द्रियस्य मनसः निग्रहः।

अपि च स्वयं सत्कर्मणा यत् प्राप्नोति तेनैव धनेन यावत् चित्तविनोदनं नाम स्वकीयाभिलाषपूरणं करणीयम्। अपरस्य धनं दृष्ट्वा ईर्ष्या न करणीया। अथवा अपरस्य धनम् ऋणरूपेण स्वीकृत्य भोगादिकं नैव कर्तव्यम् इति तात्पर्यम्। अतः गोविन्दं भज इति।२।

अर्थः सर्वदा अनिष्टमेव सम्पादयति। अत एवोच्यते सुभाषितम् -

"अर्थस्यार्जने दुःखमर्जितानां च रक्षणे।

आये दुःखं व्यये दुःखं कथमर्थः सुखावहः।।" इति।

अर्थात् सुखं न भवति। यतो हि अर्थस्य प्राचुर्यं यदा भवति तदा मनसि शान्तिः न भवति। लोके एवं दृश्यते यत् यः अधिकधनवान् तस्य स्वस्य पुत्रे भार्यायां वा विश्वासं न करोति। स बिभेति यत् तस्य पुत्रः भार्या वा सर्वस्वम् अपहरेत् इति। तस्मात् अर्थेन सुखं नास्त्येव। अतः गोविन्दं भज इति।३।

जगति विद्यमानः सम्बन्धः क्षणिक एव। इयं मे कान्ता अयं मे पुत्रः इत्यादिकं सर्वविधं सम्बन्धज्ञानं मिथ्याभूतम् एव। अयं दृश्यमानः संसारः अतीव विचित्रः भवति। यतो हि इयं मे कान्ता पुत्र इत्यादिकं ज्ञानं यद्यपि मिथ्याभूतं तथापि अयं संसारः सत्यत्वेन एतत्सर्वम् अस्माकं पुरतः समुपस्थापयति। अतः अहं कः अस्मि, अहं कस्माद् आगतः एतत्सर्वं यदि ज्ञातव्यं तर्हि गोविन्दं भज इति।४।

पाठगतप्रश्नाः-१

१. सन्निहिते मरणे किं न रक्षति।

२. मूढेन किं त्यक्तव्यम्।

३. कथमर्थः अनर्थः भवति।

४. केन चित्तं विनोदनीयम्।

५. सर्वत्र का नीतिःविहिता।

६. संसारः विचित्रः कथम्।

८.३) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - २

मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम्।

मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा।। ५।।

कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।

आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः।। ६।।

सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः।

सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः।। ७।।

शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ।

भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम्।। ८।।

अन्वयार्थः -

धनजनयौवनगर्वं धनेषु मनुष्येषु स्वस्य यौवनावस्थायाम् अपि गर्वम् अहङ्कारं मा नैव कुरु विधेहि। यतो हि कालः महाकालः निमेषात् हठात् एव सर्वं समस्तं हरति अपहरति विनाशयति वा। त्वं सखे इदं व्यापृतम् अखिलं समस्तं मायामयं जगत् हित्वा त्यक्त्वा विदित्वा आत्मज्ञानं प्राप्य "अहं ब्रह्मास्मि" इति अनुभूय ब्रह्मपदं ब्रह्मस्वरूपं प्रविश मोक्षाख्यं परमपुरुषार्थं प्राप्य मुक्तः भव। तत्साधनाय त्वं गोविन्दं भज इति।५।

कामं वासनां क्रोधं द्वेषं लोभम् अभिलाषां मोहं प्रीतिं त्यक्त्वा वर्जयित्वा अहं कः इति आत्मानं स्वं भावय चिन्तय। ये आत्मज्ञानविहीनाः आत्मनः ज्ञानं येषां न वर्तते ते मूढाः अविवेकिनः नरकनिगूढाः नरके बद्धाः सन्तः पच्यन्ते अहरहः दुःखं प्राप्नुवन्ति इति। अतः दुःखात् मुक्तये गोविन्दं भज।६।

सुरमन्दिरतरुमूलनिवासः सुरमन्दिरे देवालये वा तरुमूले वृक्षस्य अधः वा निवासः अवस्थानम्, भूतलं पृथिवी शय्या शयनस्थानम्, अजिनं मृगचर्म वासः वस्त्रम्। सर्वपरिग्रहभोगत्यागः सर्वेषां परिग्रहाणां विषयाणां भोगस्य त्यागः। तेषु विरागः वैराग्यं कस्य मनुष्यस्य सुखम् आनन्दम् न करोति, सर्वस्यैव मनुष्यस्य सुखं करोति एव इत्यर्थः।७।

यदि अचिराद् शीघ्रमेव विष्णुत्वं सर्वव्यापित्वं ब्रह्मस्वरूपं वाञ्छसि प्राप्तुम् इच्छसि तर्हि शत्रौ अरौ, मित्रे सुहृदि, पुत्रे सुते बन्धौ स्वजने च विग्रहसन्धौ युद्धमेलने च यत्नं प्रयत्नं मा नैव कुरु विधेहि। सर्वत्र त्वं समचित्तः समानमनस्कः भव तथाभूतः भूत्वा तिष्ठ इति।८।

व्याख्यानम् -

धनम् अनुचराः स्वस्य यौवनावस्था च पद्मपत्रे स्थितं पयः इव क्षणस्थायि। तस्मात् एषु विषयेषु कदापि गर्वः नाम आत्मत्वबुद्धिः दम्भश्च न करणीयः। यतो हि सर्वं कालस्य अधीने एव वर्तते। कालः स्वेच्छया एकस्मिन् क्षणे सृजति परस्मिन् क्षणे एव नाशयति च। तस्मात् सखे, मिथ्यामायावृतम् इदम् अखिलं जगत् त्यक्त्वा ब्रह्मानन्दं प्राप्तुम् आत्मज्ञानं लभस्व। तत्प्राप्त्यर्थं त्वं गोविन्दं भज इत्यर्थः।५।

सम्पूर्णः अयं संसारः कामक्रोधादिपरिपूर्णः। कामो नाम स्त्रीधनादीनाम् उपभोगेच्छा, विद्वेषः अभिलाषः, लोभः मोहः इत्येतत्सर्वम् अनित्यम् एव। तस्मात् एतत् सर्वं त्यक्त्वा सर्वदा विचारणीयं यत् अहं कः नाम मम स्वरूपं किम् इति। यतो हि ये आत्मानं न जानन्ति ते प्रत्यहं नरके यथा दुःखं भवति तथा दुःखं प्राप्नुवन्ति। तस्मात् दुःखात् परित्राणं प्राप्तुं गोविन्दं भज इत्यर्थः।६।

भोगवासनादिकं त्यक्त्वा धनादौ लोभं च परित्यज्य मन्दिरे वृक्षस्य अधः वा शयने भूमौ अवस्थाने किञ्च मृगचर्मणः परिधाने वित्तलोभादीनां कष्टं नैव सोढव्यं भवति। एवमेव यः किमपि न स्वीकरोति भोगादिकं त्यजति किञ्च तस्य भोगविषयेषु वैराग्यं भवति स एव वस्तुतः सुखी। तस्मात् सुखं प्राप्तुं गोविन्दं भज इत्यर्थः।७।

शत्रुमित्रादयः मिथ्याभूताः एव। शत्रुणा सह युद्धेन, मित्रेण सह सख्येन, पुत्रे वात्सल्येन, तथा बन्धुना सह आलापेन समयः नष्टः भवति। तस्मात् तत्र यत्नः समयव्ययः न करणीयः। सर्वत्र सुखे दुःखे

द्वन्द्वे अनुरागे यः समानरूपेण तिष्ठति स एव विष्णुत्वम् अर्थात् मोक्षं प्राप्नोति। एतस्मिन्नेव प्रसङ्गे गीतायां भगवता कृष्णेन स्थितधीलक्षणं प्रोक्तम् -

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।

वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।। इति।

स्थितधिया एव मोक्षः प्राप्यते। तादृशस्य मोक्षस्य लाभाय परमेश्वराराधनं कार्यम् इत्यर्थः।८।

पाठगतप्रश्नाः-२

७. कस्य गर्वः कथं नैव करणीयः।

८. किं किं त्यक्त्वा आत्मनः चिन्ता कर्तव्या।

९. कथं तिष्ठति चेत् जनः विरागसुखं लभते।

१०. किं सर्वस्य सुखं करोति।

११. कुत्र यत्नः न करणीयः।

१२. विष्णुत्वप्राप्तये किं कार्यम्।

८.४) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - ३

त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः।

सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदज्ञानम्।। ९।।

प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम्।

जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम्।। १०।।

नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम्।

विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम्।। ११।।

अन्वयार्थः -

हे सखे त्वयि तव अन्तः, मयि मम अन्तश्च अन्यत्र सर्वत्रैव एकः विष्णुः एकं ब्रह्म वर्तते। ततः व्यर्थम् अकारणं त्वम् असहिष्णुः असहमानः सन् मयि कुप्यसि मयि कोपं करोषि। सर्वस्मिन् अपि सर्वलोकेषु इतरजन्तुषु अपि आत्मानं स्वकीयं ब्रह्मस्वरूपं पश्य अवलोकय। सर्वत्र सर्वविधसंसारव्यवहारेषु भेदज्ञानम् इदं मम इदं तव इत्यादिभेदबुद्धिम् उत्सृज परित्यज।९।

प्राणायामम् अनुलोमविलोमादिव्यापारं प्रत्याहारम् चक्षुः-श्रोत्र-त्वग्-जिह्वा-घ्राणेन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं नित्यानित्यविवेकविचारं ब्रह्म एव नित्यं वस्तु ततः अन्यद् अखिलम् अनित्यम् इति विचारं जाप्यसमेतसमाधिविधानम् जाप्येन श्रीभगवन्नामस्मरणादिना सह ध्यानादिकम् अवधानं निश्चयज्ञानं महदवधानं महता यत्नेन कुरु सम्पादय।१०।

यथा नलिनीदलगतसलिलं नलिनीदले पद्मपत्रे गतं स्थितं सलिलं जलं तरलं क्षणस्थायि भवति तद्वत् तथैव जीवितं जीवनम् अतिशयचपलम् अत्यन्तं चञ्चलम्। व्याध्यभिमानग्रस्तं व्याधिना कफवित्तादिरोगेण अभिमानेन स्वयशसा च ग्रस्तम् आच्छन्नं शोकगतं दुःखभरितं समस्तम् अखिलं लोकं विश्वं विद्धि जानीहि।११।

व्याख्यानम् -

सर्वं खलु इदं ब्रह्म। सर्वस्मिन् शरीरिणि एकं ब्रह्मैव वर्तते। तेन कस्यचिद् उपरि क्रोधः नाम स्वस्य उपरि एव क्रोधः। क्रोधेन पुनः आत्मज्ञानं भवति विस्मृतम्। तथाह्युच्यते भगवता श्रीकृष्णेन गीतायां-

काम एष क्रोध एष रजोगुणसमुद्भवः।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।। इति।

क्रोधादयः अनर्थकाः। किञ्च सर्वत्र आत्मनः अर्थाद् ब्रह्मत्वेन दर्शनं कार्यम्। ब्रह्मज्ञानेन भेदज्ञानम् इदं मम कृते, इयं मम, इयं तव इत्यादिकं नश्यति। सर्वत्र आत्मोपलब्धये गोविन्दं भज इत्यर्थः। ९।

प्राणायामप्रत्याहारादीनाम् अभ्यासः करणीयः। अर्थात् अद्वैतवेदान्तानाम् अष्टाङ्गानां विधिवद् अभ्यासः अपेक्षितः। किञ्च चित्तशुद्ध्यादिकरणाय जपः करणीयः। तेन सह श्रीभगवतः नामस्मरणादिकम् अपि करणीयम्। तेन भगवतः गुणकीर्तनेन मनसि शान्तिः आगच्छति। एतेन महान् यः ब्रह्मप्राप्तिरूपः निश्चयः सः सुतरां भवति। एतादृशं महदवधानं कुरु। अस्य उपलब्धये गोविन्दं भज इति।१०।

पद्मपत्रे जलं क्षणिकं यावत् न तिष्ठति। एवमेव मनुष्याणां जीवनम् अपि अत्यन्तं चञ्चलं नाम अधुना अस्ति परन्तु श्वः नापि स्थातुम् अर्हति। समस्तः अयं संसारः रोगादिना व्यस्तः किञ्च अभिमानप्रीतिद्वेषादिव्याप्तः। अपि च अयं शोकेन परिपूर्णः। अत्र संसारे दुःखमेव सर्वदा लभ्यते, यत्किञ्चित् सुखं प्राप्यते तदपि परं दुःखमेव दास्यति। तस्मात् एतत् सर्वं जानीहि। किञ्च अस्मात् मुक्तिं चिरसुखं प्राप्तुं च त्वं गोविन्दं भज इत्यर्थः।११।

पाठगतप्रश्नाः-३

१३. विष्णुः कुत्र कुत्र अस्ति।

१४. सर्वत्र किम् उत्सृज।

१५. किं किम् अवधानं कार्यम्।

१६. जीवनं कीदृशं भवति।

१७. समस्तः लोकः कीदृशः।

८.५) साम्प्रतं मूलपाठमवगच्छाम (मोहमुद्गरः) - ४

का तेऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता।

यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम्।। १२

गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद् भव मुक्तः।

सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम्।। १३।।

द्वादशपञ्जरिकामय एष शिष्याणां कथितो ह्युपदेशः।

येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम्।। १४।।

अन्वयार्थः -

वातुल उन्मत्त जीव, ते तव अष्टादशदेशे बहुषु विषयेषु का कीदृशी चिन्ता व्याकुलता। तव ते नियन्ता प्रभुः किं नास्ति न वर्तते। यः हस्ते पाणिद्वये सुदृढनिबद्धं सम्यक्तया बद्धं त्वां प्रभवादिविरुद्धं प्रभवादिभ्यः जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वं बोधयति ज्ञापयिष्यति इति तात्पर्यम्। १२।

गुरुचरणाम्बुजनिर्भरभक्तः गुरुचरणाम्बुजयोः निर्भरः यः भक्तः अर्थाद् गुरुपादपद्मयोः आश्रितः भक्तिमान् यः जनः। अथवा गुरुचरणाम्बुजयोः निर्भरभक्तः निर्भरभक्तियुक्तः परिपूर्णभक्तियुक्तः यः सः अचिरात् शीघ्रमेव संसारात् मायावृतात् मुक्तः पाशरहितः भव। एवं क्रमेण सेन्द्रियमानसनियमात् इन्द्रियैः सह सेन्द्रियस्य मनसः नियमात् संयमात् निजहृदयस्थं स्वस्मिन् अवस्थितम् देवं परमेश्वरं ब्रह्मस्वरूपं द्रक्ष्यसि साक्षात्कर्तुं शक्नोषि।१३।

एषः श्लोकबद्धः द्वादशपञ्जरिकामयः द्वादशपञ्जरिकास्तोत्ररूपः हि निश्चयेन, शिष्याणाम् अन्तेवासिनां कृते कथितः उक्तः उपदेशः कृत्याकृत्यविवेकबोधः। येषां नराणां चित्ते मनसि विवेकः सदसद्विचारः नास्ति नैव कदाचित् भवति ते मूढाः नरकम् अत्यन्तदुःखमूलम् अनेकं बहुवारं पच्यन्ते संसारं प्रविशन्ति।१४।

व्याख्यानम् -

वातुल उन्मत्त जीव, ते तव अष्टादशदेशे बहुषु विषयेषु का कीदृशी चिन्ता व्याकुलता। तव ते नियन्ता प्रभुः किं नास्ति न वर्तते। यः हस्ते पाणिद्वये सुदृढनिबद्धं सम्यक्तया बद्धं त्वां प्रभवादिविरुद्धं प्रभवादिभ्यः जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वं बोधयति ज्ञापयिष्यति इति तात्पर्यम्। १२।

वस्तुतस्तु बहुषु विषयेषु चिन्ता व्यर्था एव। अतः अविवेकिनं प्रति इयमुक्तिः- हे मूढ, तव नियन्ता किं नास्ति। यः त्वां हस्तयोः सुदृढं गृहीत्वा जननमरणादिभ्यः विकारेभ्यः पृथग्भूतं भवति ब्रह्मज्ञानं तदेव आत्यन्तिकदुःखनाशकम् इति बोधयिष्यति। तादृशं ब्रह्मज्ञानं प्राप्तव्यं चेद् गोविन्दभजनं कार्यम्।

"गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं

ततः किं ततः किं ततः किं ततः किम्।।" इति शङ्कराचार्यवचनादेव ज्ञायते यद् गुरोः पादपद्मयोः भक्तिमान् यः स एव संसारार्णवतरणे सक्षमो भवति। स एव आत्मज्ञानं प्राप्नोति। आत्मज्ञानलाभाय गुरौ सम्पूर्णा भक्तिः गुरुवचस्सु श्रद्धा विश्वासश्च अपेक्षते। अत एव अद्वैतवेदान्ते ब्रह्मज्ञाने अधिकारिणः शमादिषट्कसम्पत्तिः भवेत्। शमादयस्तावत् शमः दमः उपरतिः तितिक्षा समाधानं श्रद्धा च। तत्र श्रद्धा नाम गुरूपदिष्टवेदान्तवाक्येषु विश्वासः। एवं गुरौ श्रद्धावान् भक्तिमान् च संसारात् मायावृतात् जगतः शीघ्रमेव मुक्तिं प्राप्नोति। तस्मात् त्वं तादृशः भूत्वा शीघ्रमेव मोक्षं लभस्व। किञ्च इन्द्रियैः सह मनसः संगमनं नाम निग्रहः अपेक्षते। अर्थात् शमादिसम्पन्नः भव। तेन त्वं स्वस्मिन् स्थितं परमात्मानं द्रष्टुं शक्नोषि। तत्प्राप्त्यर्थं त्वं गोविन्दं भज इति अविवेकिनं प्रति उपदेशः।१३।

इदं स्तोत्रं भगवच्चरणैः श्रीशङ्कराचार्यैः शिष्याणां नाम तेषां साक्षात् शिष्याणां किञ्च परम्परया अस्माकं कृते कृत्याकृत्यविवेकविषये उपदेशमुखेन उक्तम्। ये श्रद्धान्विताः भूत्वा विश्वासं कृत्वा आत्मज्ञानलाभाय यत्नं करिष्यन्ति ते अवश्यं मुक्ताः भविष्यन्ति। परन्तु येषां चित्ते ज्ञानोदयः न भविष्यति ते जननमरणादिचक्रैः बद्धाः सन्तः पुनः पुनः दुःखमूलं संसारम् आगमिष्यन्ति। तस्माद् एतस्मात् संसारदुःखात् मुक्तिं प्राप्तुं त्वं गोविन्दं भज इत्यर्थः।

पाठगतप्रश्नाः-४

१८. कीदृशः नियन्ता अपेक्षते।

१९. कथं जनः संसारात् मुक्तो भवति।

२०. निजहृदयस्थस्य देवस्य दर्शनं कथं लभ्यते।

२१. इदं मोहमुद्गरस्तोत्रं कीदृशम्।

२२. के नरके पच्यन्ते।

श्रीरामगुणवर्णना

८.६) सम्पूर्णः मूलपाठः (श्रीरामगुणवर्णना)

स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते।। १।।
कदाचिदुपकारेण कृतेनैकेन तुष्यति।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया।। २।।
शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः।
कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि।। ३।।
बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः।
वीर्यवान्न च वीर्येण महता स्वेन विस्मितः।। ४।।
न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरञ्जते।। ५।।
कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते।
मन्यते परया प्रीत्या महत्स्वर्गफलं ततः।। ६।।
नाश्रेयसि रतो यश्च न विरुद्धकथारुचिः।
उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा।। ७।।
अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित्।
लोके पुरुषसारज्ञः साधुरेको विनिर्मितः।। ८।।
धर्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान्।
लौकिके समयाचारे कृतकल्पो विशारदः।। ९।।
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान्।
अमोघक्रोधहर्षश्च त्यागसंयमकालवित्।। १०।।
रामः सत्पुरुषो लोके सत्यः सत्यपरायणः।
साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह।। ११।।

८.७) साम्प्रतं मूलपाठमवगच्छाम - (श्रीरामगुणवर्णना-१)

स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते।
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते।। १।।
कदाचिदुपकारेण कृतेनैकेन तुष्यति।

न स्मरत्यपकाराणां शतमप्यात्मवत्तया।। २।।
शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः।
कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि।। ३।।
बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः।
वीर्यवान्न च वीर्येण महता स्वेन विस्मितः।। ४।।

अन्वयार्थः -

स श्रीरामचन्द्रः च नित्यं सततं प्रशान्तात्मा अक्रोधनस्वभावः मृदुपूर्वं मृदुक्तिपूर्वं च भाषते वक्ति। परुषम् रूक्षम् उच्यमानः कोऽपि कटुक्तिं करोति चेदपि स न नैव परुषम् उत्तरं रूक्षस्वरेण प्रत्युत्तरं प्रतिपद्यते प्रयच्छति इत्यर्थः।१।

एकेन केनापि पुरुषेण कदाचित् कुत्रापि केनापि प्रकारेण उपकारेण सौकर्यविधानेन कृतेन कुर्वता अपि तुष्यति आत्मवत्तया स्वदिव्यदेहवत्तया स्वीकरोति। सः अपकाराणां दुःखं दत्तवतां शतम् अपि बहु अपराधम् अपि आत्मवत्तया स्वदेहवत्तया न स्मरति विस्मरति इत्यर्थः।२।

नित्यं सर्वदा शीलवृद्धैः सदाचारसम्पन्नैः ज्ञानवृद्धैः विद्या येषां परिपक्वाः सम्पन्नाः तादृशैः, वयोवृद्धैः ज्येष्ठैः, सज्जनैः सत्पुरुषैः, अस्त्रयोग्यान्तरेषु अस्त्रयोग्यस्य अन्तरेषु मध्यकालेषु अस्त्रविद्याभ्याससमये अपि वै निश्चयेन कथयन् आस्त वदति स्म इत्यर्थः।३।

स रामचन्द्रः बुद्धिमान् सर्वविधवचनविषयेषु प्रशस्तबुद्धिविशिष्टः, मधुराभाषी मधुरं मनोहरम् आभाषितुं शीलम् अस्य मधुरवचनशाली, पूर्वभाषी प्रथमभाषणेन स्वाभिमुख्यप्रदर्शकः, प्रियंवदः सत्यभाषी परन्तु प्रियवाक्यस्य वक्ता, वीर्यवान् बलशाली, परन्तु स्वेन स्वकीयेन महता प्रबलेन वीर्येण पराक्रमेण न विस्मितः आत्मबोधविहीनः न इत्यर्थः।४।

व्याख्यानम् -

अत्र श्रीरामचन्द्रस्य गुणवर्णना क्रियते। स श्रीरामः सर्वदा शान्तमनस्कः भूत्वा एव तिष्ठति। किञ्च कदापि किमपि वक्तव्यं चेत् क्रोधादिकम् अकृत्वा कोमलस्वरेण सम्भाषते। यदि कदापि कश्चन तेन सह कठोरवचनेन भाषणं करोति तदापि स तेन सह कोमलशब्दैः ललितवाक्यैः भाषते। एवं श्रीरामः स्वभावेन शान्तः मृदुभाषी च।१।

कश्चन सामान्यजनः अपि यदि तस्य कमपि उपकारं कदापि कुत्रापि करोति तर्हि स श्रीरामः तं कदापि न विस्मरति। किन्तु बहवः यदि तस्य अपकारं कुर्वन्ति, तस्य दुःखं जनयन्ति, तथापि स कृपासिन्धुः स्वस्य माहात्म्येन तान् प्रति कदापि क्रोधं न करोति। तेषाम् अपकारान् अपि विस्मरति। अत्र भगवतः श्रीरामचन्द्रस्य उदारतायाः परिचयः प्राप्यते।२।

रामचन्द्रः सर्वदा सदाचारसम्पन्नैः पूज्यैः सह वार्तालापेन तेभ्यः सदाचारज्ञानम् अलभत। एवमेव येषां विद्याः परिपक्वाः तादृशैः सह वार्तालापेन तेभ्यः विविधशास्त्राणां ज्ञानम् अलभत। ये वयसा ज्येष्ठः अर्थाद् जीवने विविधविषये अभिज्ञतां ये लब्धवन्तः तेभ्यः कस्मिन् परिस्थितौ कथं स्थेयम् इत्यादिविषये

ज्ञानम् अलभत। किञ्च, ये सत्पुरुषाः तेभ्यः नीत्युपदेशान् लब्धवान्। स श्रीरामः एतैः सह अस्त्राभ्यासकाले अपि वार्तालापं कुर्वन्ति स्म। एवं सर्वान् प्रति तस्य श्रद्धा परिस्फुटा भवति।३।

रामचन्द्रस्य कथं कदा किं वक्तव्यम् इत्यस्मिन् विषये विशिष्टबुद्धिः आसीत्। अतः स व्यवहारेषु प्रशस्तबुद्धिविशिष्टः। तस्य मधुरभाषणमेव स्वभावः अतः स मधुराभाषी। अपि च, प्रियवाक्कथने निपुणः स यदा अतिनीचेन सहापि वार्ताम् आलपति स्म तदा आदौ सम्भाष्य सः अपरस्य आभिमुख्यं सम्पादयति स्म। सः अत्यन्तबलशाली भूत्वा अपि स्वकीयेन महता बलेन आत्मबोधविहीनः अन्धः न आसीत्। अत्र श्रीरामस्य महत्त्वं ज्ञायते।।४।

पाठगतप्रश्नाः-५

२३. स रामचन्द्रः कथं भाषते।

२४. रामचन्द्रं प्रति परुषवचः उच्यते चेत्स किं करोति।

२५. श्रीरामचन्द्रः किं न स्मरति।

२६. श्रीरामचन्द्रः कथं न स्मरति।

२७. श्रीरामः कथं तुष्यति।

२८. श्रीरामः कैः सह अस्त्राभ्यासकाले अपि कथयन्नास्त।

८.८) साम्प्रतं मूलपाठमवगच्छाम (श्रीरामगुणवर्णना-२)

न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः।
अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरञ्जते।। ५।।
कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते।
मन्यते परया प्रीत्या महत्स्वर्गफलं ततः।। ६।।
नाश्रेयसि रतो यश्च न विरुद्धकथारुचिः।
उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा।। ७।।
अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित्।
लोके पुरुषसारज्ञः साधुरेको विनिर्मितः।। ८।।

अन्वयार्थः -

न च अनृतकथः अनृता मृषा कथा कथनं यस्य स श्रीरामचन्द्रः अनृतकथः मिथ्यावादी कदापि मिथ्याभाषणं न करोति। विद्वान् सकलज्ञानविशिष्टः स वृद्धानां ज्ञानादिभिः वृद्धिं गतानां प्रतिपूजकः पूजादानादिभिः सम्मानकर्ता। स प्रजाभिः देशस्थैः जनैः अनुरक्तः अनुरागविषयीभूतः। कुत इति चेत्- प्रजाः च अपि प्रजाजनान् अपि स श्रीरामः अनुरञ्जते अनुरञ्जयति।५।

कुलोचितमतिः कुलोचिता इक्ष्वाकुकुलयोग्या मतिः बुद्धिः यस्य सः स्वकुलयोग्यबुद्धिसम्पन्नः श्रीरामचन्द्रः क्षात्रं क्षत्रियपालनीयं प्रजापालनादिकं स्वधर्मं स्वकर्तव्यं बहु अधिकं मन्यते पालयति। तत्र आधिक्ये हेतुः तावत् - ततः प्रजापालनादिरूपात् क्षात्रधर्मात् परया प्रीत्या महत्या श्रद्धया महद् अत्युत्कृष्टं स्वर्गफलं देवलोकप्राप्तिरूपफलं मन्यते निश्चिनोति।६।

यः श्रीरामचन्द्रः अश्रेयसि निष्फले अकल्याणे कर्मणि न रतः आसक्तः, न च विरुद्धकथारुचिः विरुद्धकथासु धर्मविरुद्धग्राम्यालापादिषु प्रीतिरहितः स उत्तरोत्तरयुक्तीनां वादादिषु स्वपक्षनिर्वाहकोत्तरोत्तरयत्ने वाचस्पतिर्यथा वाचस्पतिरिव वक्ता अप्रतिहतवक्ता।७।

स श्रीरामचन्द्रः अरोगः रोगादिसंसर्गरहितः, तरुणः नित्यतारुण्यविशिष्टः, वाग्मी प्रशस्तवचनवान्, वपुष्मान् प्रशस्तशरीरः, देशकालवित् लौकिकवैदिककर्मोचित-देशकालयोः ज्ञाता, लोके पुरुषसारज्ञः पुरुषसारान् पुरुषस्य अन्तर्गूहितं तत्त्वं जानाति इति पुरुषसारज्ञः, साधुः परकार्यसाधनशीलः, विनिर्मितः विशेषेण विलक्षणत्वेन निर्मितः अर्थाद् अघटितघटनापटीयान्।८।

व्याख्यानम् -

अत्रापि भगवतः श्रीरामचन्द्रस्य महिमाकथनं क्रियते। स कदापि मिथ्याभाषणं न करोति। सर्वविधज्ञानसम्पन्नः स परन्तु ये वयोज्येष्ठाः किञ्च ज्ञानज्येष्ठाः आचारज्येष्ठाश्च तेषां सम्मानं सेवादिकं च करोति। स सर्वेषां प्रजानाम् अनुरागविषयीभूतः भवति। कुतः इति चेदुच्यते यत् सः प्रजाजनान् अनुरञ्जयति। स स्वयं पूर्वं प्रजानामनुरञ्जनं करोति। ततः अनुरञ्जिताभिः प्रजाभिः अनुरक्तः भवति।५।

स श्रीरामः स्वस्य इक्ष्वाकुकुलस्य विषये ज्ञानसम्पन्नः आसीत्। तस्य मतिः सूक्ष्मविचारसहिता इक्ष्वाकुकुलयोग्या। स स्वस्य प्रजापालनादिरूपं क्षत्रियधर्मं अत्यन्तं श्रद्धया पालयति। यतो हि क्षत्रियधर्मस्य श्रद्धया पालनेन महत्स्वर्गफलं लभ्यते इति स चिन्तयति।६।

द्युतक्रीडादेः यस्य कर्मणः किमपि महत् फलं नास्ति तादृशं कर्म श्रीरामः न कदापि आचरति। धर्मप्रसङ्गं त्यक्त्वा ग्रामालापादिकं स न कदापि करोति। यदा विविधशास्त्राणि आधारीकृत्य वादः प्रचलति तदा तत्र स वाचस्पति इव अप्रतिहतवक्ता। अर्थाद् वादादिषु न कश्चित् तं पराजेतुं शक्नोति।७।

तस्य श्रीरामस्य शरीरं सर्वदा ज्वरादिरोगरहितं भवति। सर्वदा तारुण्यं तस्य अङ्गेषु प्रतिभाति। तस्य देहः सुदृढः। अपि च लौकिकवैदिककर्माणि कस्मिन् काले कथं करणीयानि इति विषये सम्यक्तया जानाति स्म। कश्चन पुरुषः अन्तः किं चिन्तयति इति स एकवारं तं पुरुषं दृष्ट्वा ज्ञातुं शक्नोति। तस्मात् स साधुः इव अन्तर्यामी इति ज्ञायते।८।

पाठगतप्रश्नाः-६

२९. श्रीरामः केषां प्रतिपूजकः - क) प्रजानाम्, ख) अमात्यानाम्, ग) वृद्धानाम्, घ) योगिनाम्

३०. रामचन्द्रः कथं प्रजाभिः अनुरक्तो भवति।

३१. रामचन्द्रः कान् अनुरञ्जते।

३२. रामचन्द्रः किं बहु मन्यते।

३३. रामचन्द्रः कस्मिन् न रतः।

३४. रामचन्द्रः कीदृशः वक्ता आसीत्।

३५. रामचन्द्रः लोके कीदृशः अस्ति।

३६. पुरुषसारज्ञः इत्यस्य किं तात्पर्यम्।

८.९) साम्प्रतं मूलपाठमवगच्छाम (श्रीरामगुणवर्णना-३)

धर्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान्।
लौकिके समयाचारे कृतकल्पो विशारदः।। ९।।
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान्।
अमोघक्रोधहर्षश्च त्यागसंयमकालवित्।। १०।।
रामः सत्पुरुषो लोके सत्यः सत्यपरायणः।
साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह।। ११।।

अन्वयार्थः -

स श्रीरामचन्द्रः धर्मकामार्थतत्त्वज्ञः धर्मकामार्थानां तत्त्वं जानाति पुरुषार्थतत्त्वविद् इत्यर्थः। स स्मृतिमान् ज्ञातार्थविषये विस्मरणरहितः, प्रतिभावान् प्रतिभानं प्रतिवस्तुप्रकाशनं तद्वान्, लौकिके लोकिकप्रमाणे समयाचारे साङ्केतिकाचारे च कृतकल्पः कृतसंस्थापनः विशारदः आचरणसमर्थः।९।

निभृतः विनीतः, संवृताकारः संवृतः आकारो यस्य स कर्तव्यार्थव्यञ्जकेङ्गिताकारगोपनचतुरः, गुप्तमन्त्रः फलपर्यन्तम् अन्यैः अविदितमन्त्रः, सहायवान् प्रशस्तमन्त्रयुक्तः, अमोघक्रोधहर्षः अमोघौ निष्फलौ क्रोधहर्षौ यस्य स फलपर्यवसायिकोपप्रसादः, त्यागसंयमकालवित् त्यागसंयमयोः दानग्रहणयोः कालं वेत्ति जानातीति त्यागसंयमकालविद् वस्तुत्यागग्रहणकालवेत्ता भवति।१०।

रामः दाशरथिः लोके जगति सत्पुरुषः सज्जनः सत्यः सत्यवान् सत्यपरायणः सत्यधर्मैकनिष्ठः। धर्मः क्षात्रधर्मः श्रिया सह तत्फलभूतया सम्पदा सह रामात् श्रीरामचन्द्रात् साक्षात् अव्यवधानेन विनिर्वृत्तः निष्पन्नः धर्मार्थयोः इतरनिरपेक्षतया निर्वाहकः स इत्यर्थः।११।

व्याख्यानम् -

धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः। तेषां विषये श्रीरामस्य ज्ञानमतीव गभीरम्। स यद् एकवारम् अवगच्छति तत् न कदापि विस्मरति। कस्यापि वस्तुनः प्रकाशने तस्य अभिनवसामर्थ्यं वर्तते। किञ्च यथासमयं वैदिकलौकिककर्मादीनाम् आचरणे तस्य सामर्थ्यम् अनुपमम्। अर्थात् स वैदिकलौकिककर्मादीनाम् आचरणे अतीव निपुणः। एवमत्र श्रीरामचन्द्रस्य सर्वेषु कार्येषु सामर्थ्यमस्तीति स्फुटम्।९।

स श्रीरामः विनयसम्पन्नः। कस्यापि कार्यस्य सिद्ध्यर्थम् इङ्गितादिकम् अपेक्षते, अन्यथा तस्य कार्यस्य विघ्नः सम्भवेत्। स तादृशेङ्गितस्य गोपने दक्षः। किञ्च, कस्यापि कर्मणः यावत् फलं न भवति तावत् तस्य मन्त्रणादिकं तं परित्यज्य अन्यः कश्चिद् अपि ज्ञातुं नैव शक्नोति। अपि च तस्य मन्त्रणम् अतीवयुक्तिसम्मतं भवति। न केवलम् एतदेव, स क्रोधं वा हर्षं वा करोति चेत् स कदापि निष्फलः न भवति। अपि च स कदा कस्य त्यागः कदा कस्य ग्रहणं वा कर्तव्यम् इत्यस्मिन् विषये विलक्षणबुद्धिसम्पन्नः अस्ति।१०।

स श्रीरामचन्द्रः लोके अत्यन्तः सज्जनः। अर्थात् तस्य स्वशत्रौ अपि स्नेहः अस्ति। सः सत्यस्वरूपः सत्यपरायणश्च। सत्यधर्मस्य परिपालनं स सर्वदा करोति। किञ्च स राजश्रिया सह स्वधर्मस्य निर्वहनं सम्यक्तया करोति।११।

पाठगतप्रश्नाः-७

३७. धर्मकामार्थतत्त्वज्ञः इत्यस्य किं तात्पर्यम्।

३८. रामचन्द्रः कुत्र कृतकल्पः।

३९. रामचन्द्रः लोके कीदृशः

४०. श्रीरामः किंपरायणः- क) धर्मपरायणः, ख) ध्यानपरायणः, ग) सत्यपरायणः, घ) प्रजाकल्याणपरायणः।

४१. श्रीरामस्य धर्मः केन सह विनिर्वृत्तः - क) पत्न्या सह, ख) मन्त्रिभिः सह, ग) श्रिया सह, घ) भुवा सह।

पाठसारः

परमकारुणिकाः भगवन्तः श्रीशङ्कराचार्याः सर्वेषां कृते ज्ञानोदयार्थम् इदं द्वादशपञ्जरिकास्तोत्रं रचितवन्तः। अस्मिन् स्तोत्रे प्रतिपदं ते संसारस्य अनित्यता, तत्र दुःखमेव मूलम्, एतस्मात् मुक्तये गोविन्दस्य अर्थात् परब्रह्मणः भजनं कार्यम् इत्युपदेशं दत्तवन्तः। स्त्रोत्रात् साररूपेण एवं ज्ञायते यत् - धनजनस्त्रीपुत्रादिषु आत्मबुद्धिः नैव करणीया। यतो हि केनापि सह कस्यापि सम्बन्धः क्षणिक आभासश्च। तस्मात् संसारविषयेषु अहम्भावः न स्यात्। किञ्च यावत् सत्कर्मणा उपार्जनं क्रियते तेन स्वस्य जीवनयापनं कर्तव्यम्। ये खलु कामक्रोधादिभिः मत्ताः, ते चिन्तयन्ति यत् जगत् तेषाम् अधीने वर्तते इति। एवंविधाः अज्ञानिनः प्रत्यहं दुःखैः बहुधा दुःखिताः सन्तः नरककष्टम् अनुभवन्ति। सर्वदा समचित्तो भवेत्। अर्थात् सुखे दुःखे कदापि लिप्तेन न भवितव्यम् इति। किञ्च, जीवनमिदं पद्मपत्रे स्थितं जलमिव। कदा गमिष्यति किं वा भविष्यति इति न कश्चन वक्तुं शक्नोति। तस्मात् शीघ्रमेव

आत्मचिन्तनेन ब्रह्मस्वरूपावाप्तिरूपः मोक्षः साधनीयः। इदं स्तोत्रं पठित्वा यः गुरौ श्रद्धावान् भूत्वा ब्रह्मज्ञानलाभाय प्रयत्नं कुर्यात् तस्य अनन्तसुखप्राप्तिः मुक्तिश्च भवेद् इति भगवतां शङ्कराचार्यपादानामाशयः।

पाठस्यास्य द्वितीयः भागः श्रीरामगुणवर्णना महामुनिना वाल्मीकिमहर्षिणा विरचिते रामायणाख्ये महाकाव्ये अस्ति। तत्र दशरथपुत्रस्य श्रीरामचन्द्रस्य गुणवर्णना क्रियते। तत्र चितांशस्य सारः तावत् - स श्रीरामः सर्वदा प्रशान्तचित्तः भवति। स कदापि केनापि सह कठोरभाषणं न करोति। स सर्वदा मधुरं प्रियं च वाक्यं व्यवहरति। नीचजनेषु अपि तस्य समानप्रीतिः वर्तते। कदापि कश्चित् तस्य किमपि उपकारं करोति चेत् स सर्वदा तं स्मरति। किञ्च बहवः तस्य अपकारान् कुर्वन्ति चेदपि सः तान् न स्मरति। सर्वान् प्रति तस्य श्रद्धा अस्ति। स वृद्धानां वाक्यं श्रुत्वा जीवनं परिपालयति। तस्य महान् पराक्रमः वर्तते परन्तु निष्प्रयोजनं तस्य पराक्रमस्य प्रकाशं न करोति। स्वस्य धर्मस्य परिपालनम् अपि स सम्यक्तया करोति। द्युतादिक्रीडया स कालव्ययं न करोति। स यदि वादेषु प्रवृत्तः भवति तदा तस्य पराजयः असम्भवः अस्ति। किञ्च स एवं शुद्धचित्तः यत् यः कश्चित् पुरुषः मनसि यत् किमपि चिन्तयति, स तत् ज्ञातुं शक्नोति। राज्यपरिपालनस्य कौशलम् अपि स सम्यक्तया वेत्ति। तस्य मन्त्रणं यावत् कर्मणः फलं न आयाति तावत् नैव ज्ञातुं शक्यते। अपि च सर्वदा सत्यस्य पालनं करोति। शत्रुं प्रति अपि तस्य द्वेषः नास्ति, अपि तु स्नेहः एव अस्ति। स सम्पदा सह धर्मस्य निर्वाहकः। एवमेव भगवतः श्रीरामस्य माहात्म्यं प्रतिपादितम्।

पाठान्तप्रश्नाः

४२. "मूढ जहीहि धनागमतृष्णाम्" इति श्लोकं प्रपूर्य व्याख्यात।

४३. "कामं क्रोधं लोभं मोहम्" इति श्लोकं प्रपूर्य व्याख्यात।

४४. "मा कुरु धनजनयौवनगर्वम्" इति श्लोकं प्रपूर्य व्याख्यात।

४५. "सुरमन्दिरतरुमूलनिवासः" इति श्लोकं प्रपूर्य व्याख्यात।

४६. "गुरुचरणाम्बुजनिर्भरभक्तः" इति श्लोकं प्रपूर्य व्याख्यात।

४७. मोहमुद्गरः इति स्तोत्रस्य सारं प्रतिपादयत।

४८. "शीलवृद्धैर्ज्ञानवृद्धैः" इति श्लोकं प्रपूर्य व्याख्यात।

४९. "बुद्धिमान् मधुराभाषी" इति श्लोकं प्रपूर्य व्याख्यात।

५०. "कुलोचितमतिः" इति श्लोकं प्रपूर्य व्याख्यात।

५१. "अरोगस्तरुणो" इति श्लोकं प्रपूर्य व्याख्यात।

५२. "धर्मकामार्थतत्त्वज्ञः" इति श्लोकं प्रपूर्य व्याख्यात।

५३. "श्रीरामगुणवर्णना" इति पाठ्यांशस्य सारं प्रतिपादयत।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. सन्निहिते मरणे डुकृञ् करणे इत्यादिव्याकरणशास्त्रादिकं न रक्षति।

२. मूढेन धनागमतृष्णा त्यक्तव्या।

३. अर्थात् सुखलेशः अपि न प्राप्यते। अर्थः यदा तिष्ठति स्वपुत्रादपि अपहरणादिभीतिः उत्पद्यते। अतः अर्थः अनर्थः भवति।

४. स्वकर्मणा उपार्जितेन धनेन चित्तं विनोदनीयम्।

५. सर्वत्र एषा नीतिःविहिता यद् धनिकानां पुत्रादेः "अयं मम सर्वस्वम् अपहरेत्" इत्यादिभीतिः भवति।

६. कान्ता पुत्रः इत्यादिसम्बन्धः सर्वः अनित्यः एव। परन्तु संसारे तादृश-सम्बन्धः नित्यत्वेन भासमानः, अतः मायावृतः संसारः विचित्रः।

उत्तराणि-२

७. धनजनयौवनानां गर्वः न करणीयः। यतो हि कालः निमिषेण धनजनयौवनानि हर्तुं समर्थः।

८. कामं क्रोधं लोभं मोहं त्यक्त्वा आत्मनः चिन्ता कर्तव्या।

९. सुरमन्दिरे तरुमूले वा निवासः, भूतलं शय्या, मृगचर्म, विषयभोगे वितृष्णा यदा भवति तदा एव जनः विरागसुखं लभते।

१०. विरागः सर्वस्य सुखं करोति।

११. शत्रौ मित्रे पुत्रे बन्धौ च विग्रहसन्धौ यत्नः न करणीयः।

१२. विष्णुत्वप्राप्तये अरौ मित्रे सुते स्वजने च विग्रहसन्धौ च प्रयत्नः नैव करणीयः। सर्वत्र समचित्तः भूत्वा विष्णुत्वप्राप्तये स्थेयः।

उत्तराणि-३

१३. त्वयि मयि चान्यत्र अर्थात् सर्वत्र विष्णुः अस्ति।

१४. सर्वत्र इदं मम इदं तव इत्यादिभेदबुद्धिम् उत्सृज।

१५. प्राणायामः, प्रत्याहारः, ब्रह्म एव नित्यं वस्तु ततः अन्यद् अखिलम् अनित्यम् इति नित्यानित्यविवेकविचारः, जाप्यसमेतसमाधिविधानं च जाप्य महदवधानं कार्यम्।

१६. यथा पद्मपत्रे स्थितं सलिलं क्षणस्थायि भवति तद्वत् तथैव जीवनम् अत्यन्तं चञ्चलम्।

१७. व्याध्यभिमानग्रस्तः दुःखभरितः अखिलः लोकः।

उत्तराणि-४

१८. यः पाणिद्वयं गृहीत्वा जननमरणादिविकारेभ्यः विरुद्धं पृथक् आत्मतत्त्वं बोधयिष्यति।

१९. गुरुचरणाम्बुजनिर्भरभक्तः जनः संसारात् मुक्तो भवति।

२०. इन्द्रियैः सह मनसः संयमात् निजहृदयस्थस्य देवस्य दर्शनं भविष्यति।

२१. इदं मोहमुद्गरस्तोत्रं शिष्याणां कृते उपदेशरूपम्।

२२. येषां चित्ते विवेको नास्ति ते नरके पच्यन्ते।

उत्तराणि-५

२३. स रामचन्द्रः मृदुपूर्वं भाषते।

२४. रामचन्द्रं प्रति परुषवचः उच्यते चेदपि स पुरुषतया उत्तरं न प्रयच्छति।

२५. श्रीरामचन्द्रः शतमपि अपकारान् न स्मरति।

२६. श्रीरामचन्द्रः आत्मवत्तया अपकारान् न स्मरति।

२७. श्रीरामः एकेनापि उपकारेण तुष्यति।

२८. श्रीरामः शीलवृद्धैः ज्ञानवृद्धैः वयोवृद्धैः सज्जनैः सह अस्त्राभ्यासकाले अपि कथयन्नास्त।

उत्तराणि-६

२९. ग) वृद्धानाम्।

३०. रामचन्द्रः प्रजाः अनुरञ्जयति अतः स प्रजाभिः अनुरक्तो भवति।

३१. रामचन्द्रः प्रजाजनान् अनुरञ्जते।

३२. रामचन्द्रः स्वधर्मं क्षात्रं बहु मन्यते।

३३. रामचन्द्रः निष्फले कर्मणि न रतः।

३४. रामचन्द्रः वाचस्पतिरिव वक्ता आसीत्।

३५. रामचन्द्रः लोके पुरुषसारज्ञः अस्ति।

३६. पुरुषसारज्ञः पुरुषस्य सारं जानाति यः स पुरुषसारज्ञः। अर्थात् पुरुषस्य हृदयस्थं भावं जानाति इति।

उत्तराणि-७

३७. धर्मकामार्थतत्त्वज्ञः नाम धर्मार्थकामानां तत्त्वं यः जानाति। पुरुषार्थविद् इति तात्पर्यम्।

३८. रामचन्द्रः लौकिके समायाचारे च कृतकल्पः।

३९. रामचन्द्रः लोके सत्पुरुषः।

४०. ग) सत्यपरायणः।

४१. ग) श्रिया सह।

॥ इति अष्टमः पाठः ॥

९

348sk09

शिवराजविजयः - बटुसंवादः

प्रस्तावना

कवेः भावयित्रीप्रतिभया समुद्भूतं कर्म भवति काव्यम्। तच्च काव्यं ध्वनिकाव्यं गुणीभूतव्यङ्ग्यं चेति द्वैविध्यं गतम्। तत्र पुनः दृश्यं श्रव्यं चेति भेदद्वयम्। तत्र श्रव्यकाव्यं पुनः गद्यं पद्यं चेति द्विविधम्। तत्र निखिलसंस्कृतसाहित्ये छन्दोमयात् पद्यादनन्तरमेव गद्यकाव्यस्याभ्युदयः। गद्यं प्रथमं कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां दृश्यते इति बलदेवोपाध्यायमहाभागस्याशयः। कविप्रतिभायाः परीक्षणस्थलं भवति गद्यकाव्यम्, यथा सुवर्णपरीक्षणस्थलं भवति निकषम्। निकषे कषिता सुवर्णस्य रेखा एव सुवर्णस्य वैशिष्ट्यं सूचयति एवमेव गद्यस्य एका पङ्क्तिरेव केवः रससिद्धतां वचनवक्रतां चिन्तनपद्धतिं चारुतया सूचयति। अतः प्रसिद्धा इयं भणितिः – "गद्यं कवीनां निकषं वदन्ति" इति।। पद्यकाव्ये तु आदौ छन्दसि दृष्टिपातो भवति। परन्तु गद्यकाव्ये प्रथमदृष्टिपातः पदसन्निवेशे भवति।

बाणभट्टाद् आरभ्य गद्यकाव्यसंरचनपरम्परायां विद्यमानेषु कविषु अम्बिकादत्तव्यासः अन्यतमः प्रसिद्धश्च। अयं जयपुरनिवासी कविः पुराणकर्तुः व्यासस्य द्विरवतारः इति प्रसिद्धिः। अनेन बहवः संस्कृतभाषया हिन्दीभाषया च ग्रन्था विरचिताः। तद्विरचितेषु ग्रन्थेषु शिवराजविजयः इति ऐतिहासिकं गद्यकाव्यं महत्स्थानं बिभर्ति। काव्यमिदं महाराष्ट्राधीशं शिवराजमाश्रित्य लिखितम्। ऐतिहासिक–वृत्तान्तसमाश्रयणेन काव्यस्यास्य लेखनाद् इयम् आख्यायिका इति वक्तुं शक्यते।

अधर्मस्य मूलविग्रहाः यवनाः यदा अस्माकम् उपरि शासनं कृतवन्तः, अस्माकं परम्परायाः नीतेश्च नाशं कृतवन्तः, तदा दक्षिणदेशे सनातनधर्मस्य रक्षणे नियुक्तः आसीद् एकः वीरः। स एव शिवराजः। शिवराजस्य जननी जीजाबाई जनकश्च शाहजी भोसले आसीत्। एतस्य सनातनपरम्परासंरक्षकस्य शिवराजस्य विजययात्रामाश्रित्य एव अस्य काव्यस्य विकाशः।

अस्य प्रथमविरामस्य प्रथमनिःश्वासस्य प्रथमतः केचन परिच्छेदाः अध्येयत्वेन चिताः। अस्मिन् पाठे सूर्योदयस्य, गौरवटोः श्यामवटोः स्वरूपं वार्तालापः, योगिराजस्य समाधित उत्थानम् इत्येते विषयाः क्रमशः वर्णिताः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- हिन्दुपरम्परायां भगवतः सूर्यस्य महिमानं जानीयात्।
- गौरवटोः स्वरूपं जानीयात्।
- श्यामवटोः स्वरूपं जानीयात्।
- तयोः वार्तालापप्रसङ्गं जानीयात्।
- योगिराजप्रसङ्गं जानीयात्।
- पाठ्यांशस्य अन्वयार्थसङ्गमनं जानीयात्।
- पाठ्यांशस्थानां पदानां व्याकरणविमर्शं पर्यायशब्दान् च जानीयात्।

९.१) सम्पूर्णः मूलपाठः

"विष्णोर्माया भगवती यया सम्मोहितं जगत्।"(भागवतम्१०।१।२५)

"हिंस्रः स्वपापेन विहिंसितः खलः

साधु समत्वेन भयाद् विमुच्यते।" (भागवतम्, १०।७।३१)

"अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य , शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्धसङ्ख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामि"ति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटिरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रवटुः।

"अहो चिररात्राय प्रसुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि।" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्तुमारेभे।

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परस्सहस्र-पुण्डरीक-पटल-परिलसितं पतत्रिकुल-कूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनित-दिगन्तरः, फल-पटलाऽऽस्वाद-चपलित-

चञ्चु–पतङ्गकुलाऽऽ–क्रमणाधिक–विनत–शाख–शाखि समूह–व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति, तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणुरूषित इव श्यामः, चन्दनचर्चित-भालः कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः, सुगन्धपटलै-रुन्निद्रयन्निव निद्रामन्थराणि कोरकनिकुरम्बकान्तरालसुप्तानि मिलिन्दवृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्-

'अलं भो अलम्! मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासन्ते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यवनत्रासेन निःशब्दं रुदतीम्, परमसुन्दरीम्, कलितमानवदेहामिव सरस्वतीं सान्त्वयन्, मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयान्येतस्याः पितरौ गृहं च -'

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात तयोर्दृष्टिः।

तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति, प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि।

'अहो! प्रबुद्धो मुनिः! प्रबुद्धो मुनिः! इत एवागच्छति, इत एवागच्छति, सत्कार्योऽयं सत्कार्योऽयम्' इति तौ सम्भ्रन्तौ बभूवतुः।

अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियमसम्पादनाय प्रयाते गौरवटौ, छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु, 'इत आगम्यताम्, सनाथ्यतामेष आश्रमः' इति सप्रणाममभिगम्य वदत्सु निखिलेषु , योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च।

तस्मिन् पूज्यमाने, 'योगिराडुत्थित' इति, आयात इति च आकर्ण्य, कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।

९.२) साम्प्रतं मूलपाठमवगच्छाम – १

"विष्णोर्माया भगवती यया सम्मोहितं जगत्।"(भागवतम्१०।१।२५)

"हिंस्रः स्वपापेन विहिंसितः खलः

साधु समत्वेन भयाद् विमुच्यते।" (भागवतम्, १०।७।३१)

अन्वयार्थः - विष्णोः चराचरं विवेष्टि व्याप्नोति इति विष्णुः, तस्य जगद्व्यापकस्य नारायणस्य माया त्रिगुणमयी सत्त्वप्रधाना शक्तिः भगवती भगप्रभृतिषडैश्वर्यसम्पन्ना। कीदृशी सा इति तदुच्यते, यया सत्त्वप्रधानया मायया जगत् गच्छतीति जगत् निखिलं भुवनं सम्मोहितं चारुतया मोहेन वशीकृतम्।

हिंस्रः हिंसनशीलः खलो दुर्जनः स्वपापेन निजकृतेन पातकेन विहिंसितः घातितः। साधुः सज्जनः समत्वेन रागद्वेषादिविरहिततया समत्वभावनया भयाद् भीतेः विमुच्यते मुक्तिं प्राप्नोति।

व्याख्यानम् - गद्यकाव्यस्यास्य विरामत्वेन विभागाः परिकल्पिताः। तत्र ग्रन्थादौ प्रथमे विरामे "समाप्तिकामो मङ्गलमाचरेत्" इति शिष्टाचारानुमितश्रुतिम् अनुसृत्य ग्रन्थस्य निर्विघ्नं परिसमाप्तये शिष्यशिक्षणाय च मङ्गलं विदधाति कविः अम्बिकादत्तव्यासः भागवतस्य श्लोकांशद्वयस्य उद्धरणेन। मङ्गलं त्रिविधं भवति - आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकं च।

विष्णोर्माया इति प्रस्तुतेन श्लोकार्धेन देवतानमस्कारात्मकं मङ्गलं विहितम्। नमस्कारो हि नमस्कर्तुः अपकर्षबोधनं नमस्कार्य चोत्कर्षख्यापनं भवति। विष्णोर्माया इत्यत्र नमस्कारवाचकपदाभावः अस्ति चेदपि जगतः तन्मायाधीनत्वकथनात् जगति विद्यमानेभ्यः सर्वेभ्यः विष्णुः उत्कृष्टः इति बुध्यते। एवं विष्णोः नमस्कारविधानात् नमस्कारात्मकं भवति मङ्गलम्।

चराचरं विवेष्टि व्याप्नोति इति विष्णुः। तस्य नारायणस्य या भगवती भगप्रभृतिषडैश्वर्यसम्पन्ना माया सा समस्तं संसारं मोहयति। मोहो हि अविवेकः। मुग्धो जनो विवेचनाय न समर्थो भवति। यथा कस्मिंश्चिद् विषये तन्मयताम् आपन्नो जनो नान्यत् किञ्चिज्जानाति मायया मुग्धो जनोऽपि तथैव मायानिर्मितं लौकिकं वस्तुजातं विहाय अलौकिकं परमेश्वरतत्त्वं नावगच्छति। एषा अनवगतिरेव संसारे पुनरावर्तनस्य जननमरणचक्रे पतनस्य दुःखानुभूवस्य च मूलम्।

सा माया भगवती। मायाशक्तिः भगवतो न भिन्ना। दाहिका शक्तिर्यथा अग्नितो न भिन्ना मायाशक्तिरपि भगवतः विष्णुतो न भिन्ना। शक्ति- शक्तिमतोः नास्ति कश्चन भेदः। अतो यथैव भगवान् षडैश्वर्यसम्पन्नः भगवतः शक्तिरूपिणी मायापि तथैव षडैश्वर्यशालिनी। भगोऽस्यास्तीति भगवान्। भगशब्दस्य अर्थनिरूपणप्रसङ्गे उक्तम् -

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिणा।। इति।

एते ऐश्वर्यादयः षड्गुणाः भगवति पूर्णतया सदैव विराजमानाः। भगवतो भिन्नायां तच्छक्तौ अपि एते गुणा अवतिष्ठन्ते। अतः शक्तिरपि भगवतीति कथ्यते। एषा भगवतः शक्तिः भगवती माया दुर्गाकालिकादिरूपेण पुराणेषु उपवर्णिता। सा त्रिगुणमयी। त्रिषु गुणेषु अन्यतमं तमः। आवरणं नाम तमः। यथा तमसा आवृतो भवति प्रकाशः तथैव मायायाः तमोगुणेनापि आवृतं भवति ज्योतिःस्वरूपं परमतत्त्वम्।

हिंस्रः स्वपापेन इति श्लोकार्धेन वस्तुनिर्देशात्मकं मङ्गलं विदधाति कविः।अत्र काव्ये हिंस्रानां यवनशासकानां दुष्कर्मजनिता विनष्टिः तथा ग्रन्थनायकस्य सज्जनप्रवरस्य शिवराजस्य स्वपुण्यजनिता विजयरूपा अभ्युन्नतिः प्रदर्शिता। अतः मङ्गलमिदं वस्तुनिर्देशात्मकम् एव।

हिंस्रा हि मानवाः पापशीलाः। पातकञ्च मानवं नरके पातयति। दुर्जनाः दुष्कर्माणि कुर्वन्तः तज्जन्यपापैः काले विनश्यन्ति। तथा हि कंसादिपापाः स्वपापैरेव विनष्टाः। उच्यते च - "अनार्यजुष्टेन पथा प्रवृत्तानां शिवं कुतः" इति। किन्तु साधवः सत्कर्मभिः परित्राणं लभन्ते। सत्कर्मभिरेव धर्मो भवति। येन अयं धर्मो रक्ष्यते धर्मोऽपि तेन पुंसा रक्ष्यमाणः तं जनं रक्षति। तथा हि युधिष्ठिरादयः पाण्डवा विपदि पतिताः सन्तोऽपि स्वार्जितपुण्यैः अभ्युदयं लब्धवन्तः। उक्तञ्च गीतायां - "स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्" इति। एवं दुर्जननिन्दासज्जनप्रशंसाभ्यां सहृदयानां पाठकानां मङ्गलं विधीयते।

व्याकरणविमर्शः

- भगवती - भगः अस्य अस्तीति विग्रहे भगशब्दात् मतुपि भगवत् इति शब्दो निष्पद्यते। ततः स्त्रियां ङीपि सौ भगवती इति रूपम्।
- स्वपापेन – स्वं पापं स्वपापम्, तेन स्वपापेनेति कर्मधारयसमासः।
- विहिंसितः - विपूर्वकात् हिंस्धातोः क्तप्रत्यये विहिंसितशब्दो निष्पन्नः। ततः सौ विहिंसितः इति रूपम्।

कोषः

- "विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः" इत्यमरः।
- "अथो जगती लोको विष्टपं भुवनं जगत्" इत्यमरः।
- "दरस्त्रासो भीतिर्भीः साध्वसं भयम्" इत्यमरः।

पाठगतप्रश्नाः – १

१. कया सम्मोहितं जगत्।

२. कः स्वपापेन विहिंसितो भवति।

३. कः कथं भयाद् विमुच्यते।

४. विष्णोर्मायेति कीदृशं मङ्गलम्।

५. हिंस्रः इति कीदृशं मङ्गलम्।

९.३) साम्प्रतं मूलपाठमवगच्छाम – २

"अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य , शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्धसङ्ख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामि"ति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटिरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रवटुः।

अन्वयार्थः - भगवतः ईशस्य मरीचिमालिनः सूर्यस्य पूर्वस्यां प्राच्यां दिशि एषः अयम् अरुणः लोहितः प्रकाशः आलोकः। एषः अयं भगवान् दिवाकरः आकाशमण्डस्य गगनमण्डलस्य मणिः रत्नम्, खेचरचक्रस्य खेचरस्य चक्रस्य तारासमुदायस्य चक्रवर्ती सार्वभौमः प्रभुः, आखण्डलदिशः आखण्डलस्य इन्द्रस्य दिशः दिग्भागस्य पूर्वदिशः कुण्डलं कर्णवेष्टनम्, पूर्वदिशः कर्णाभरणरूपः इत्यर्थः। ब्रह्माण्डभाण्डस्य ब्रह्माण्डभवनस्य दीपकः प्रकाशः। पुण्डरीकपटलस्य कमलसमुदायस्य प्रेयान् नितान्तप्रियः, सूर्यः कमलानां प्रियतमः इत्यर्थः। कोकलोकस्य चक्रवाकसमुदायस्य शोकविमोकः शोकस्य दुःखस्य विमोकः अपहारकः नाशकः। चक्रवाकपक्षिणां रात्रौ स्वप्रियातः वियोगो भवति। सूर्ये उदिते दुःखं मिलनेन अपगतं भवति इत्यर्थः। रोलम्बकदम्बस्य रोलम्बस्य द्विरेफस्य कदम्बः व्रातस्य अवलम्बः आश्रयः, मधुकरसमुदायस्य आश्रयभूतः भास्करः इत्यर्थः। सर्वव्यवहारस्य सर्वविधकार्याणां सूत्रधारः प्रवर्तकः, सकलकार्याणाम् आरम्भकः सूर्यः। दिनस्य दिवसस्य इनः स्वामी, दिवसस्य प्रभुः सूर्यः इति। अयं सूर्यः एव अहोरात्रं दिवसं रात्रिं च जनयति, दिनरात्र्योः नियन्त्रकः इत्यर्थः। अयं सूर्यः एव वत्सरं वर्षं द्वादशसु द्वादशभागेषु भागेषु विभागेषु विभनक्ति विभाजयति, यतो हि सूर्यस्य गतिं दृष्ट्वा एव वर्षस्य निर्णयः भवति। अयं सूर्यः एव षण्णाम् ऋतूनाम् कारणं हेतुभूतम्, सूर्यस्य प्रकाशादिकं निर्णीय ऋतुगणना एव भवति। एषः सूर्यः एव उत्तरम् उदीचीं दक्षिणं अवाचीं च अयनम् स्वीयमार्गम् अङ्गीकरोति स्वीकरोति। एनेन भास्करेण एव युगभेदाः सत्यत्रेताद्वापरकलयः युगाः सम्पादिताः कृताः। एनेनैव सूर्येण कल्पभेदाः द्विसहस्रदेवयुगात्मकाः कालभेदाः कृताः व्यवस्थापिताः। एनमेव भास्करम् एव आश्रित्य अवलम्ब्य परमेष्ठिनः ब्रह्मणः पराद्धसंख्या चरमा परार्धनाम्नी संख्या भवति। असौ सविता एव जगत् भुवनं चर्कर्ति पुनः पुनः करोति, बर्भर्ति पुनः पुनः भरति, जर्हर्ति पुनः पुनः हरति। वेदाः ऋग्-यजुः-साम-अथर्वाः एतस्यैव सूर्यस्यैव वन्दिनः स्तुतिवाचकाः। गायत्री अमुमेव आदित्यम् एव गायति स्तौति। ब्रह्मनिष्ठाः वेदवेत्तारः ब्रह्मणि निष्ठाः ब्राह्मणाः अमुम् एव भास्करम् एव अहरहः प्रत्यहम् उपतिष्ठन्ते उपासते। श्रीरामचन्द्रस्य दशरथपुत्रस्य कूलमूलं वंशाग्रजः अयं सूर्यः। एष भास्करः, धन्यः प्रशंसायाः योग्यः, विश्वेषां समेषां जनानाम् प्रणम्यः वन्दनीयः - इति इत्थम् उदेष्यन्तम् उदीयमानं भास्वन्तं सूर्यं प्रणमन्

नमस्कुर्वन् निजपर्णकुटिरात् स्वपत्रोटजातात् स्वकीयगृहात् वा कश्चित् अज्ञातनामा (गौरसिंहः) गुरुसेवनपटुः आचार्यस्य सेवायाम् एकनिष्ठः विप्रवटुः ब्राह्मणस्य पुत्रः निश्चक्राम निर्गतवान्।

व्याख्यानम् - अत्र सूर्यस्य वर्णना क्रियते। तस्य सूर्यस्य प्रकाशः लोहितवर्णयुक्तः रक्ताभसहितः। अयं सूर्यः आकाशस्थानां नक्षत्रानां रत्नतुल्यः। पक्षिसमुदायस्य राजा सः सूर्यः। पूर्वदिग्भागस्य सः कर्णाभरणरूपः। पूर्वदिशः सः अलङ्कारः इत्यर्थः। ब्रह्माण्डस्य सः प्रदीपतुल्यः। सः स्वस्य आलोकेन पृथिव्याः सर्वम् आलोकयति। कमलवृन्दानि सूर्यस्य आलोकेन एव फुल्लन्ति। रात्रौ चक्रवाकविहगस्य स्वप्रियया सह वियोगः भवति। प्रातः पुनः सूर्यस्य आगमने तयोः मेलनं भवति। तस्मात् तयोः वियोगे यत् दुःखं जायते तस्य अयं सूर्यः नाशकः। मधुकराः मधूनाम् आहरणं कृत्वा जीवन्ति। ते पुष्पात् एव मधु स्वीकुर्वन्ति। सूर्यस्य उदये पुष्पानि विकसन्ति। तस्मात् मधुकरसमुदायस्य सूर्यः आधारभुतः। सर्वविधं शुभकार्यं दिवसे एव अनुष्ठीयन्ते। तस्मात् सूर्यःएव सकलकार्याणां प्रवर्तकः। सूर्यः उदेति चेदेव खलु दिवसः इति कथ्यते। तस्मात् दिवसस्य स्वामी सः सूर्यः। सूर्यस्य प्रभावेण दिवसः रात्रिः च भवति। भास्करस्य गत्या एव वर्षस्य गणना विधीयते। तस्यैव प्रभावेण षट् ऋतवः प्रकृतौ दृश्यन्ते। उत्तरायनं दक्षिणायनं च अस्य एव विधीयते। सूर्यः एव सत्ययुगस्य त्रेतायुगस्य द्वापरयुगस्य कलियुगस्य च सम्पादकः। द्विसहस्रदेवयुगात्मकः कालभेदः (२०० वत्सरात्मकः देवयुगः = १ कल्पयुगः) कल्पः इति उच्यते। तस्य अपि परिचालकः सूर्यः एव। ब्रह्मणः परार्द्धपर्यन्तं संख्यागणना सूर्यम् आश्रित्य एव भवति। अयं सूर्यः एव जगत् पुनः पुनः सृजति पालयति नाशयति च। ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः एते चत्वारः वेदाः। वेदाः सूर्यम् एव आधिक्येन स्तौति। गायत्रीमन्त्रस्य देवता सूर्यः एव। ब्रह्मणाः प्रत्यहं सूर्यस्य उपासनां कुर्वन्ति। सूर्यवंशस्य अयम् आदिपुरुषः। इत्थं भास्करं प्रणम्य एकः गुरुसेवानिष्ठः ब्राह्मणपुत्रः स्वस्य पर्णकुटिरात् बहिः आगतवान्।

व्याकरणविमर्शः

- मरीचिमालिनः - मरीचीनां माला मरीचिमाला इति षष्ठीतत्पुरुषसमासः। मरीचिमाला अस्य अस्तीति मरीचिमाली इति "अत इनिठनौ" इत्यनेन इनिप्रत्ययः।
- खेचरचक्रस्य – खे चरन्ति ये ते खेचराः विहगाः इत्यर्थः। तेषां खेचराणां चक्रं खेचरचक्रम्, तस्य इति षष्ठीतत्पुरुषसमासः।
- ब्रह्माण्डभाण्डस्य – ब्रह्माण्डमेव भाण्डं ब्रह्माण्डभाण्डम्, तस्य इति कर्मधारयसमासः।
- पुण्डरीकपटलस्य – पुण्डरीकाणां पटलं पुण्डरीकपटलम्, तस्य इति षष्ठीतत्पुरुषसमासः।
- रोलम्बकदम्बस्य – रोलम्बानां कदम्बः रोलम्बकदम्बः, तस्य इति षष्ठीतत्पुरुषसमासः।
- निजपर्णकुटीरात् - पर्णानां कुटीरः पर्णकुटीरः। निजस्य पर्णकुटीरः निजपर्णकुटीरः, तस्मात् निजपर्णकुटीरात् इत्युभयत्र षष्ठीतत्पुरुषसमासः।
- विप्रवटुः विप्रश्चासौ वटुः इति कर्मधारयसमासः। ब्राह्मणबालकः इत्यर्थः।
- जनयति - जन्धातोः णिचि लटि तिपि जनयतीति रूपम्। अत्र "बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः" इत्यनेन परस्मैपदम्।

- चर्कर्ति - डुकृञ् करणे इति धातोः यङ्लुकि लटि तिपि चर्कर्ति इति रूपम्।
- कुटीरः – ह्रस्वा कुटी इत्यर्थे "कुटीशमीशूण्डाभ्यो रः" इत्यनेन रप्रत्यये कुटीरशब्दो निष्पन्नः।
- उपतिष्ठन्ते - उपपूर्वकात् स्थाधातोः लटि "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्वति वक्तव्यम्" इत्यनेन आत्मनपदे प्रथमबहुवचने झप्रत्यये उपतिष्ठन्ते इति रूपम्।

पाठगतप्रश्नाः–२

६. कस्य प्रकाशः पूर्वस्यां दिशि।

७. सूर्यः आकाशमण्डलस्य कः।

८. सूर्यः कस्य चक्रवर्ती।

९. ब्रह्माण्डभाण्डस्य कः।

१०. सूर्यः कस्य शोकविमोकः।

११. अयं वत्सरं केषु भागेषु विभनक्ति।

१२. उपतिष्ठन्ते इत्यत्र आत्मनेपदं कथम्।

१३. जनयति इत्यत्र परस्मैपदं कथम्।

१४. सूर्यः कस्य कुलमूलम्।

९.४) साम्प्रतं मूलपाठमवगच्छाम – ३

"अहो चिररात्राय प्रसुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि।" इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्तुमारेभे।

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।

अन्वयार्थः - "अहो सविस्मयं चिररात्राय चिरकालं यावत् अहं वटुः प्रसुप्तः शयितः। स्वप्नजालपरतन्त्रेण निद्रानायासवशीभूतेन एव महान् पुण्यमयः अत्यन्तपुण्यवान् समयः कालः अतिवाहितः अतीतः। अस्मद्गुरुचरणानां मदीयाचार्यपादानाम् अयम् एष सन्ध्योपासनसमयः सन्ध्यासम्पादनकालः। तत् तस्मात् सपदि शीघ्रम् कुसुमानि पुष्पाणि अवचिनोमि सङ्कलयामि।" इति चिन्तयन् विचारयन् एकम् कदलीदलम् रम्भापर्णम् आकुञ्च्य आच्छिद्य तृणशकलैः बालतृणैः सन्धाय

संयोज्य, पुटकं कुसुमस्थापनपात्रं विधाय सम्पाद्य, पुष्पावचयं कुसमचयनं कर्तुं विधातुम् आरेभे आरब्धवान्।

असौ वटुः ब्रह्मचारी आकृत्या आकारेण सुन्दरः मनोरमः, वर्णेन रङ्गेण गौरः धवलः, जटाभिः ब्रह्मचारी वटुः, वयसा षोडशवर्षदेशीयः षोडशवयस्कल्पः, कम्बुकण्ठः शङ्खग्रीवः, आयतललाटः दीर्घभालः, सुबाहुः शोभनपाणिः विशाललोचनः दीर्घायितनयनः च आसीत् अभवत्।

व्याख्यानम् - ततः स वटुः अचिन्तयत् यत् स बहुकालं शयितः। तेन हि पुण्यमयः कालः निद्रापरतन्त्रतया यापितः। इदानीं तस्य गुरुचरणानां सन्ध्योपासनासमयः। अतः स सत्वरं कुसुमानि अवचेतुं एकम् कदलीपर्णम् आच्छिद्य तत्र बालतृणसन्धानेन कुसुमस्थापनपात्रं निर्माय पुष्पाणि चेतुम् आरब्धवान्।

स वटुः मनोरमकायः धवलवर्णीयः जटाभिः ब्रह्मचारी षोडशवयस्कः शङ्खग्रीवः दीर्घभालः सुन्दरबाहूपेतः विस्तृतलोचनः च आसीत्।

व्याकरणविमर्शः

- स्वप्नजालपरतन्त्रेण – स्वप्न एव जालं स्वप्नजालमिति कर्मधारयसमासः। तस्य परतन्त्रेण स्वप्नजालपरतन्त्रेण इति षष्ठीतत्पुरुषसमासः।
- कदलीदलम् – कदल्याः दलं कदलीदलम् इति षष्ठीतत्पुरुषसमासः।
- तृणशकलैः - तृणानां शकलैः तृणशकलैः इति षष्ठीतत्पुरुषसमासः।
- पुष्पावचयम् - पुष्पाणाम् अवचयः पुष्पावचयः, तं पुष्पावचयम् इति षष्ठीतत्पुरुषसमासः।
- कम्बुकण्ठः - कम्बुरिव कण्ठो यस्य स कम्बुकण्ठः इति बहुव्रीहिः।
- आयतललाटः - आयतं ललाटं यस्य स आयतललाट इति बहुव्रीहिः।
- विशाललोचनः - विशाले लोचने यस्य स विशाललोचनः इति बहुव्रीहिसमासः।
- षोडशवर्षदेशीयः - षोडशवर्षशब्दाद् "ईषदसमाप्तौ कल्पब्देश्य-देशीयरः" इत्यनेन सूत्रेण देशीयर्-प्रत्यये षोडशवर्षदेशीयः इति रूपम्।

कोषः

- "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरः।
- "ललाटमलिकं गोधिः" इत्यमरः।
- "लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी" इत्यमरः।

पाठगतप्रश्नाः – ३

१५. गौरवटुना महान् पुण्यमयः समयः कथम् अतिवाहितः।

१६. कस्येदानीं सन्ध्योपासनसमयः।

१७. किमर्थः गौरवटुः पुष्पाणि अवचिनोति।

१८. गौरवटुः कीदृशः।

९.५) साम्प्रतं मूलपाठमवगच्छाम – ४

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम–पवित्र–पानीयं परस्सहस्र–पुण्डरीक–पटल–परिलसितं पतत्रिकुल–कूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर–झर्झर–ध्वनित–दिगन्तरः, फल–पटलाऽऽस्वाद–चपलित–चञ्चु–पतङ्गकुलाऽऽ–क्रमणाधिक–विनत–शाख–शाखि समूह–व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

अन्वयार्थः - कदलीदलकुञ्जायितस्य रम्भापलाशोद्यानीभूतस्य, एतत्कुटीरस्य समीपतरवर्तिपर्णोटजस्य, समन्तात् परितः, पुष्पवाटिका कुसुमोद्यानम्, पूर्वतः प्राच्यां, परमपवित्रपानीयम् अत्यन्तपूतजलं, परःसहस्रपुण्डरीकपटलपरिलसितं सहस्राधिकश्वेतकमलसमूहोपशोभितं, पतत्रिकुलकूजितपूजितं विहगनिवहरवराजितं, पयःपूरितम् अम्भोभरितं, सरः कासारः, आसीत् अविद्यत। दक्षिणतः दक्षिणस्यां दिशि च एकः निर्झरझर्झरध्वनिध्वनितदिगन्तरः वारिप्रवाहझर्झरनादनिनादितदिगन्तरालः, फलपटलास्वादलपलितचञ्चुपतङ्गकूलाक्रमणाधिकविनतशाखशाखिसमूहव्याप्तः फल–समूहभक्षणचञ्चलमुखभाग–पतगनिवहाक्रमणातीवनम्रीभूतशाख–वृक्षसकलसमावृतः, सुन्दरकन्दरः शोभनदरः पर्वतखण्डः शिलाभाग आसीत् अवर्तत।

व्याख्यानम् - गौरसिंहो यस्मिन् कुटिरे न्यवसत् तस्य चतुर्षु दिग्भागेषु परिवृत्य रम्भापादपाः वर्तन्ते स्म। तेन तत् कुटीरं कुञ्जायते स्म। परितश्च आसन् पुष्पोद्यानानि। अस्य पूर्वतो वर्तते जलसम्पूरितः सरोवरो यत्र पवित्रासु अप्सु सहस्रशः श्वेताब्जानि शोभन्ते स्म। अपि च, पक्षिभिराकुलितः स तेषां कलरवैः सर्वदा मुखरितोऽवर्तत। दक्षिणत आसीद् एकः पर्वतखण्डो यस्य वृक्षा आसन् विहगकुलकुलायभूताः। रम्यैः कन्दरैः सुशोभितात् तस्मात् पर्वतखण्डात् प्रच्यवन्त्याः निर्झरिण्या झर्झरध्वनिना चतुर्दिशो ध्वनिता अभूवन्।

व्याकरणविमर्शः

- कदलीदलकुञ्जायितस्य - कदलीनां दलानि कदलीदलानि इति षष्ठीतत्पुरुषसमासः, तैः कुञ्जायित इति तृतीयातत्पुरुषसमासः, तस्य।
- परमपवित्रपानीयं - परमं च तत् पवित्रं चेति कर्मधारयः, तादृशं पानीयं यस्य तत् इति

बहुव्रीहिसमासः।

- परस्सहस्रपुण्डरीकपटलपरिलसितम् - परस्सहस्राणि इति निपातनात् समासः। "पारस्करप्रभृतीनि च संज्ञायाम्" इति सुडागमः। परस्सहस्राणि पुण्डरीकाणि इति कर्मधारयसमासः। तेषां पटलमिति षष्ठीतत्पुरुषसमासः। तेन परिलसितमिति तृतीयातत्पुरुषसमासः।
- पतत्रिकुलकूजितपूजितम् - पतत्रिणां कुलं पतत्रिकुलमिति षष्ठीतत्पुरुषसमासः। तस्य कूजितमिति षष्ठीतत्पुरुषसमासः। तेन पूजितमिति तृतीयातत्पुरुषसमासः।
- पयःपूरितं - पयसा पूरितम् इति तृतीयातत्पुरुषसमासः।
- निर्झरझर्झरध्वनिध्वनितदिगन्तरः - झर्झररूपः ध्वनिः झर्झरध्वनिः शाकपार्थिवादिवत् समासः। निर्झराणां झर्झरध्वनिरिति षष्ठीतत्पुरुषसमासः। तेन ध्वनितानि इति तृतीयातत्पुरुषसमासः। तादृशानि दिगन्तराणि यस्य स इति बहुव्रीहिसमासः।
- फलपटलाऽऽस्वादचपलितचञ्चुपतङ्गकुलाऽऽक्रमणाधिकविनत-शाशशाखिसमूहव्याप्तः - फलानां पटलं फलपटलमिति षष्ठीतत्पुरुषः। तस्य आस्वादः फलपटलास्वादः इति षष्ठी-तत्पुरुषः। तेन चपलिताः फलपटलास्वादचपलिताः इति तृतीया-तत्पुरुषः। तादृशाः चञ्चवः येषां ते फलपटलास्वादचपलितचञ्चवः इति बहुव्रीहिः। तादृशाः पतङ्गा इति कर्मधारयसमासः। तेषां कुलमिति षष्ठीतत्पुरुषः। तस्य आक्रमणम् इति षष्ठीतत्पुरुषः। तेन आक्रमणेन अधिकविनताः इति तृतीयातत्पुरुषः। अधिकविनताः शाखाः येषां ते अधिकविनताशाखा इति बहुव्रीहिः। तादृशाः शाखिनः इति कर्मधारयः। तेषां समूह इति षष्ठीतत्पुरुषः। तेन व्याप्त इति तृतीयातत्पुरुषः।
- सुन्दरकन्दरः - सुन्दराः कन्दराः यस्मिन् स इति बहुव्रीहिसमासः।

कोषः

- "कदली वाणरबुसा रम्भा मोचांशुमत्फला" इत्यमरः।
- "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्" इत्यमरः।
- "वृक्षो महीरुहः शाखी विटपी पादपस्तरुः" इत्यमरः।
- "दरी तु कन्दरो वा स्त्री" इत्यमरः।

पाठगतप्रश्नाः – ४

१९. कुटीरं कीदृशम्।

२०. कुटीरस्य समन्तात् किमासीत्।

२१. कुटीरस्य पूर्वतः कीदृशं सर आसीत्।

२२. कुटीरस्य दक्षिण्यस्यां दिशि किमासीत्।

२३. निर्झरझर्झरध्वनिध्वनितदिगन्तरः इत्यत्र समासः लेख्यः।

२४. परमपवित्रपानीयम् इत्यत्र समासः लेख्यः।

९.६) साम्प्रतं मूलपाठमवगच्छाम – ५

यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति, तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणुरूषित इव श्यामः, चन्दनचर्चित-भालः कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः, सुगन्धपटलै-रुन्निद्रयन्निव निद्रामन्थराणि कोरकनिकुरम्बकान्तरालसुप्तानि मिलिन्दवृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्-

'अलं भो अलम्! मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासन्ते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यवनत्रासेन निःशब्दं रुदतीम्, परमसुन्दरीम्, कलितमानवदेहामिव सरस्वतीं सान्त्वयन्, मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत्परिमार्गणीयान्येतस्याः पितरौ गृहं च-'

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात तयोर्दृष्टिः।

अन्वयार्थः - यावत् यावत्कालपर्यन्तम् एष पूर्ववर्णितः ब्रह्मचारी वटुः ब्रह्मव्रती अलिपुञ्जं भ्रमरकुलम् उद्धूय निवार्य कुसुमकोरकान् पुष्पकुड्मलान् अवचिनोति चिनोति, तावत् तस्मिन्नेव काले तस्य एव वटोः एव सतीर्थ्यः सहाध्येता अपरः अन्यः तत्समानवयाः तत्समवर्षीयः, कस्तूरिकारेणुरुषितः मृगनाभिचूर्णछुरितः इव श्यामः श्यामवर्णीयः, चन्दनचर्चितभालः चन्दनलिप्तललाटः, कर्पूरागुरु-क्षोदच्छुरित-वक्षो-बाहु-दण्डः कपूरागुरुचूर्णलिप्तवक्षःस्थलभुजदण्डः, सुगन्धपटलैः सौरभसमूहैः उन्निद्रयन् जागरयन् इव निद्रामन्थराणि तन्द्राशिथिलानि कोरकनिकुरम्बकान्तरालसुप्तानि कलिकासमूहान्तरनिद्रागतानि मिलिन्दवृन्दानि मधुकरकुलानि झटिति शीघ्रं समुपसृत्य समागत्य निवारयन् ताडयन् गौरवटुं शुक्लवर्णीयं ब्रह्मचारिणम् अवादीत् अकथयत्-

"अलं भो अलम्! भो मित्र पुष्पचयनेन प्रयोजनं नास्ति, मया एव पूर्वम् आदौ कुसुमानि प्रसूनानि अवचितानि सङ्कलितानि, त्वं तु गौरवटुः तु चिरं बहुसमयं रात्रौ यामिन्याम् अजागरीः जागरितवान् इति अस्मात् कारणात् क्षिप्रं शीघ्रं न उत्थापितः न जागरितः। गुरुचरणाः आचार्यपादाः अत्र अस्मिन् स्थाने तडागतटे पुष्करिण्याः तीरे सन्ध्यां प्रातःकालीनाम् पूजाम् उपासन्ते विदधति। तेषां गुरुवर्याणां समीपे निकटे मया श्यामवटुना निखिला सामग्री समस्तानि सन्ध्योपासनसहायकानि द्रव्याणि संस्थापिता समुपकल्पितानि। यां पूर्वदृष्टां च पुनः सप्तवर्षकल्पां प्रायः सप्तवर्षीयां यवनत्रासेन यवनभयेन निःशब्दं शब्दरहिततया रुदतीं क्रन्दन्तीं परमसुन्दरीम् अतिशयकमनीयां कलितमानवदेहाम् धृतनरमूर्तिम्

सरस्वतीम् इव शारदाम् इव सान्त्वयन् समाश्वसयन्, मरन्दमधुराः पुष्परसोपेतानि अपः जलानि पाययन् गलविवरं प्रवेशयन्, कन्दखण्डानि मुनिभोज्यविशेषभागान् भोजयन् खादयन् त्वं गौरवटुः त्रियामाया यामिन्याः यामत्रयं प्रहरत्रयम् अनैषीः यापितवान् असि, सा इयं सा कन्यका अधुना इदानीं स्वपिति निद्रां यापयति। उद्बुद्ध्य उत्थाय च पुनः तथैव पूर्ववत् रोदिष्यति क्रन्दिष्यति, तत् तस्माद् हेतोः एतस्याः कन्यकायाः पितरौ मातापितरौ गृहं च भवनं च परिमार्गणीयानि अन्वेषणीयानि"

इति एवं संश्रुत्य श्रुत्वा उष्णं बलात् निःश्वस्य निःश्वसनं सम्पाद्य यावत् यावत्कालं स गौरवटुः अपि किञ्चिद् वक्तुं कथयितुम् इयेष वाञ्छति स्म तावद् तदैव अकस्मात् हठात् पर्वतशिखरे गिरिशृङ्गे तयोः गौरवटु–श्यामवङ्गोः दृष्टिः दर्शनं निपपात अपतत्।

व्याख्यानम् - यदा गौरवटुः भ्रमरकुलं निवार्य कुसुमानि अवचिनोति स्म तदा तस्य सहाध्येता तत्समानवयस्कः श्यामवटुः आगतः। श्यामवटुः दर्शनेन अतीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कपूरागुरुचूर्णलिप्तम् आसीत्। स शीघ्रमागत्य कुसुमाभ्यन्तरे निद्रात उत्थितानि मधुकरवृन्दानि समागत्य निवारयन् गौरवटुं कथितवान् यत् पुष्पचयनेन प्रयोजनं नास्ति। तेन पूर्वम् एव कुसुमानि चितानि। गौरवटुः तु रात्रौ बहुसमयं जागरित आसीत् अतः प्रातः स न उत्थापितः। गुरुचरणाः तडागतटे सन्ध्यांवन्दनं कुर्वन्ति। तेषां सन्ध्योपासनसहायकानि द्रव्याणि श्यामवटुना संस्थापितानि। ततः स कथितवान् यद् यां सप्तवर्षकल्पां यवनभयेन क्रन्दन्तीं सान्त्वयन् त्वं अपः पाययन् मुनिभोज्यं भक्षयन् रात्रौ त्रीन् प्रहरान् यापितवान् सा कन्यका साम्प्रतं निद्राति। तस्याः रोदनं यथा न स्यादतः तस्या पितरौ गृहं च भवनं च अन्वेष्टव्यम् इति। एवं श्रुत्वा गौरवटुः यदा किञ्चिद्वक्तुम् उद्यतः तदा द्वयोः हठात् पर्वतशृङ्गे दृष्टिपातः अभवत्।

व्याकरणविमर्शः

- कुसुमकोरकान् - कुसुमानां कोरकाः कुसुमकोरकाः, तान् इति षष्ठीतत्पुरुषः।
- तत्समानवयाः - तस्य समानः तत्समानः इति षष्ठीतत्पुरुषः। तत्समानं वयः यस्य स इति बहुव्रीहिसमासः।
- कस्तूरिकारेणुरूषितः - कस्तूरिकाणां रेणवः कस्तूरिकारेणवः इति षष्ठीतत्पुरुषः। तैः रूषितः इति तृतीयातत्पुरुषः।
- चन्दनचर्चितभालः - चन्दनेन चर्चितं चन्दनचर्चितमिति तृतीयातत्पुरुषः। चन्दनचर्चितं भालं यस्य स इति बहुव्रीहिः।
- कर्पूरागुरुक्षोदच्छुरितवक्षोबाहुदण्डः - कर्पूरमिश्रितः अगुरुः कर्पूरागुरुः इति शाकपार्थिवादिवत्समासः। तस्य क्षोदः इति षष्ठीतत्पुरुषः। तेन छुरितम् इति तृतीयातत्पुरुषः। कर्पूरागुरुक्षोदच्छुरितं वक्षोबाहुदण्डं यस्य स कर्पूरागुरुक्षोदच्छुरित-वक्षोबाहुदण्डः इति बहुव्रीहिः। वक्षश्च बाहुदण्डौ च वक्षबाहुदण्डमिति समाहारद्वन्द्वः।
- मिलिन्दवृन्दानि - मिलिन्दानां वृन्दानि इति षष्ठीतत्पुरुषः।
- तडागतटे - तडागस्य तटः तडागतटः, तस्मिन्निति षष्ठीतत्पुरुषः।

- यवनत्रासेन – यवनेभ्यः त्रासेन यवनत्रासेनेति पञ्चमीतत्पुरुषः।
- कलितमानवदेहाम् - मानवानां देहः मानवदेहः इति षष्ठीतत्पुरुषः। कलितो मानवदेहः यया सा, ताम् इति बहुव्रीहिः।
- समुपसृत्य - समुपसंघातपूर्वकात् सृधातोः ल्यपि समुपसृत्य इति।
- निवारयन् - निपूर्वकाद् वारिधातोः शतरि पुंसि सौ निवारयन् इति।
- अवादीत् - वदेर्लुङि तिपि अवादीत् इति।
- अवचितानि - अवपूर्वकात् चिनोतेः कर्मणि क्तप्रत्यये नपुंसके जसि रूपम्।
- अजागरीः - जागर्तेः लुङि सिपि अजागरीः इति रूपम्।
- उत्थापितः - उत्पूर्वकात् स्थाधातोः णिचि कर्मणि क्तप्रत्यये पुंसि सौ उत्थापितः इति रूपम्।
- सान्त्वयन् - सान्त्व्-धातोः शतरि पुंसि सुप्रत्यये सान्त्वयन् इति।

कोषः

- "स्यान्निकायः पुञ्जराशिः" इत्यमरः।
- "सतीर्थ्यास्त्वेकगुरवः" इत्यमरः।
- "कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु" इत्यमरः।

पाठगतप्रश्नाः – ५

२५. श्यामवटुः कीदृश आसीत्।

२६. आचार्यपादाः कुत्र सन्ध्यावन्दनं कुर्वन्ति स्म।

२७. श्यामवटुना का संस्थापिता।

२८. गौरवटुः कथं प्रहारत्रयं जागरितवान्।

२९. गौरवटुः कि पाययन् स्थितः।

३०. सा बाला कथं रोदिति स्म।

३१. गौरवटुना श्यामवटुना च कानि परिमार्गणीयानि।

३२. कुत्र गौरवटोः श्यामवटोश्च दृष्टिः पतिता।

९.७) साम्प्रतं मूलपाठमवगच्छाम – ६

तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं

पूजयन्ति, प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि।

अन्वयार्थः - तस्मिन् पूर्वोक्ते पर्वते गिरौ एकः महान् विशालं कन्दरः गह्वरम् आसीत् अभवत्। तस्मिन् एव तस्मिन् गह्वरे एव एकः महामुनिः महर्षिः समाधौ चित्तवृत्तिनिरोधाख्ये योगे तिष्ठति स्म वर्तते स्म। कदा कस्मिन् समये स महामुनिः समाधिं योगम् अङ्गीकृतवान् स्वीकृतवान् इति न कोऽपि वेत्ति जानाति। ग्रामणी–ग्रामीण–ग्रामाः ग्रामाधिप–ग्रामवासिनां निवहाः समागत्य समुपेत्य मध्ये मध्ये अन्तरा अन्तरा तं समाधिस्थं मुनिपुङ्गवं पूजयन्ति वरीवस्यन्ति, प्रणमन्ति नमस्कुर्वन्ति स्तुवन्ति स्तुतिं कुर्वन्ति च। तं योगिराजं केचित् केचन जनाः कपिलः सिद्धाग्रगण्यः कपिलाख्यो मुनिः इति एवं प्रकारेण, अपरे अन्ये लोमशः तदाख्यो मुनिः इति, इतरे अपरे जैगीषव्यः तदाख्यो मुनिः इति, अन्ये इतरे च मार्कण्डेय एतन्नामा मुनिः इति विश्वसन्ति स्म विश्वासं कुर्वन्ति स्म। स एव तादृशः महामुनिरेव अयम् एषः अधुना सम्प्रति शिखरात् अचलशृङ्गात् अवतरन् नीचैरागच्छन् ब्रह्मचारिवटुभ्याम् वेदाध्यायिभ्यां गौरश्यामवटुभ्याम् अदर्शि दृष्टः।

व्याख्यानम् - युगयुगान्तराणि तस्य पर्वतस्य कन्दरे एकः योगिराजः मुनिप्रवरः समाधिमग्नो वर्तते। तस्य प्रकृतं स्वरूपं न कोऽपि वेत्ति। केचित्तं कपिलं, केचित् जैगीषव्यं, इतरे लोमशं केदिद्वा तं मार्कण्डेयं जानन्ति विश्वसन्ति च। कपिलो हि सिद्धानाम् अग्रगण्यः सांख्यशास्त्रस्य प्रवक्ता मुनिसत्तमः। स हि वस्तुतः श्रीविष्णोरंशावतारः "सिद्धानां कपिलो मुनिरि"ति भगवद्वचनात्। जैगीषव्यः महाभारतोक्तः प्रख्यातः सिद्धमहर्षिः। योगबलेन आत्तशक्तिः स युगपत् सर्वलोकचारी अभवत्। लोमशः महाभारतवर्णितो मुनिविशेषो यो बहुशः पृथिव्याः प्रदक्षिणं कृतवान्। भगवता व्यासेन आदिष्टः सन् स वनवासकाले पाण्डवान् तीर्थस्थानानि नैकानि अदर्शयत्। मृकण्डमुनेरपत्यं मार्कण्डेयो भगवतः शिवस्याराधनां कृत्वा तत्प्रसादात् चिरजीवी बभूव। ग्रामपतयः तथा सर्वाः ग्राम्यप्रजाः समागम्य मध्ये मध्ये तस्मै पूजाप्रणामादिकं निवेदयन्ति स्म। किन्तु योगिराजस्य समाधिर्न भग्नः। चित्तवृत्तिनिरोधो हि योगः। योगस्य चरमावस्था हि समाधिः। समाधिर्नाम ध्यानावस्थाविशेषो यत्र तत्त्वसाक्षात्कारो भवति। तत्र बाह्यं रूपादिकं न प्रतीयते। बाह्यं किमपि वृत्तं निरुद्धचित्तं योगिनं न स्पृशति। अत एव पूजादिना स योगी न समाधित उत्थितः। स योगिराज इदानीं पर्वताद् अवतरति इति गौरवटुः श्यामवटुश्च दृष्टवान्।

व्याकरणविमर्शः

- महामुनिः – महान् चासौ मुनिः महामुनिः इति कर्मधारयसमासः।
- ग्रामणीग्रामीणग्रामाः - ग्रामण्यश्च ग्रामीणाश्च ग्रामणीग्रामीणाः इतरेतरद्वन्द्वसमासः। तेषां ग्रामाः ग्रामणीग्रामीणग्रामाः इति षष्ठीतत्पुरुषसमासः।
- अदर्शि - दृश्धातोः कर्मणि लुङि प्रथमपुरुषैकवचने रूपम्।
- अवतरन् - अवपूर्वात् तृधातोः शतरि सौ रूपमिदम्।

कोषः

- "समौ संवसथ-ग्रामौ" इत्यमरः।
- "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा। गह्वरम्" इत्यमरः।

पाठगतप्रश्नाः – ६

३३. तस्य पर्वतस्य कन्दरे कः निवसति स्म।

३४. महामुनिं के पूजयन्ति स्म।

३५. महामुनिं कीदृशं विश्वसन्ति स्म।

३६. कं पर्वतशिखराद् अवतरितुं दृष्टवान् गौरवटुः श्यामवटुः च।

९.८) साम्प्रतं मूलपाठमवगच्छाम – ७

'अहो! प्रबुद्धो मुनिः! प्रबुद्धो मुनिः! इत एवागच्छति, इत एवागच्छति, सत्कार्योऽयं सत्कार्योऽयम्' इति तौ सम्भ्रन्तौ बभूवतुः।

अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियमसम्पादनाय प्रयाते गौरवटौ, छात्रगणसहकारेण प्रस्तुतासु च स्वागतसामग्रीषु, 'इत आगम्यताम्, सनाथ्यतामेष आश्रमः' इति सप्रणाममभिगम्य वदत्सु निखिलेषु , योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च।

तस्मिन् पूज्यमाने, 'योगिराडुत्थित' इति, आयात इति च आकर्ण्य, कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।

अन्वयार्थः - 'अहो! प्रबुद्धो मुनिः! प्रबुद्धो मुनिः! साश्चर्यं समाधित उत्थितो मुनिः, इतः अस्मदाश्रमाभिमुखम् एव आगच्छति आयाति, इत अस्मदाश्रमाभिमुखम् एव आगच्छति आयाति, अयं योगिराजः सत्कारयोग्यः अयं सत्कार्यः सत्कारार्हः' इति तौ गौरवटुश्यामवटू सम्भ्रन्तौ हर्षान्वितौ बभूवतुः अभवताम्।

अथ ततः परं समापितसन्ध्यावन्दनादिक्रिये विहितसन्ध्यावन्दनादिकर्मके समायाते समागते गुरौ आचार्ये, तदाज्ञया गुरोराज्ञया नित्यनियमसम्पादनाय सन्ध्यावन्दनादिनित्यकर्मनिष्पादनाय प्रयाते गते गौरवटौ श्वेतब्रह्मचारिणि, छात्रगणसहकारेण शिष्यसमुदायसाहाय्येन स्वागतसामग्रीषु अभिवादनोपचारद्रव्येषु प्रस्तुतासु सज्जीकृतेषु च, 'इत अत्र आगम्यतां समागम्यताम्, सनाथ्यताम्

अलङ्क्रियताम् एष आश्रमः इदं तपस्विस्थलम्' इति सप्रणामं प्रणामसहितम् अभिगम्य समागत्य वदत्सु भाषमाणेषु निखिलेषु सर्वेषु उपस्थितेषु, योगिराजः मुनिप्रवरः आगत्य एत्य तन्निर्दिष्टकाष्ठपीठं मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वान् इव दिवाकरः इव उदयगिरिम् उदयाचलम् आरुरोह आरूढवान् उपाविशत् उपविष्टवान् च।

तस्मिन् मुनिप्रवरे पूज्यमाने अर्च्यमाने 'योगिराट् महामुनिः उत्थित समुत्थितः' इति, 'आयातः समागतः' इति च कर्णपरम्परया श्रुतिमार्गेण आकर्ण्य संश्रुत्य बहवो जनाः नैके मानवाः परितः सर्वासु दिक्षु स्थिताः सम्प्राप्ताः। ते सुघटितं शोभनाकारं शरीरं कायम्, सान्द्रां प्रगाढां जटां सटाम्, विशालानि दीर्घायतान् अङ्गानि अवयवान्, अङ्गारप्रतिमे अङ्गारसदृशे नयने नेत्रे, मधुरां मनोहरां गम्भीरां गभीरां च वाचं वाणीं वर्णयन्तः प्रशंसन्तः चकिता विस्मिता इव सञ्जाताः अभवन्।

व्याख्यानम् - प्रबुद्धो मुनिः अतः तस्य सत्कारो विधेयः इति गौरवटुः श्यामवटुः च हर्षान्वितः अभवत्। ततः सन्ध्यावन्दनादिक्रियां सम्पाद्य गुरुचरणाः समागताः। तदाज्ञया गौरवटुः नित्यनियमसम्पत्तये गतः। तदा छात्रगणसहिताः सर्वे स्वागतसामग्रीः सज्जीकृत्य 'अत्र आगम्यताम्, अलङ्क्रियताम् एष आश्रमः' इति सप्रणामं समागत्य वदन्त आसन्। ततः योगिराजः मुनिप्रवरः आगत्य मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वान् इव दिवाकरः इव उदयगिरिम् उदयाचलम् आरुह्य उपविष्टवान्।

तस्य मुनिप्रवरस्य योगिराजस्य पूजनात्परं 'योगिराट् उत्थितः' इति, 'आयातः' इति च वार्तां कर्णपरम्परया श्रुत्वा बहवो जनाः आश्रमम् आगताः। तस्य योगिराजस्य सुघटितः कायः, प्रगाढा जटा, विशालाः च अवयवाः, अङ्गारसदृशे नेत्रे, मनोहरा गम्भीरा च वाणी आसीत्। एतत्सर्वं प्रशंसन्तः जना चकिता अभवन्।

व्याकरणविमर्शः

- समापितसन्ध्यावन्दनादिक्रिये – सन्ध्याया वन्दनम् इति सन्ध्यावन्दनमिति षष्ठीतत्पुरुषः। सन्ध्यावदनम् आदि यासां ताः सन्ध्यावन्दनादयः इति बहुव्रीहिसमासः। ताश्चामी क्रियाश्चेति सन्ध्यावन्दनादिक्रियाः इति कर्मधारयः। समापिताः सन्ध्यावन्दनादिक्रियाः येन स समापितसन्ध्यावन्दनादिक्रियः, तस्मिन् इति बहुव्रीहिः।
- नित्यनियमसम्पादनाय – नित्याः नियमाः नित्यनियमाः इति कर्मधारयः। तेषां सम्पादनाय नित्यनियमसम्पादनाय इति षष्ठीतत्पुरुषः।
- स्वागतसामग्रीषु - स्वागतार्थाः सामग्र्यः स्वागतसामग्र्यः, तासु इति शाकपार्थिवादिवत्समासः।
- आरुरोह – आङ्पूर्वकाद् रुहधातोः लिटि तिपि आरुरोह इति।
- उपाविशत् - उपपूर्वपूर्वकाद् विशतेः लङि तिपि उपाविशत् इति।

कोषः

- "भास्वद्विवश्वत्सप्ताश्वहरिदश्वोष्णरश्मयः" इत्यमरः।

- "कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः" इत्यमरः।

पाठगतप्रश्नाः–८

३७. महामुनिः कुत्र उपाविशत्।

३८. महामुनिः क इव कुत्र आरुरोह।

३९. नित्यनियमसम्पादनाय इत्यत्र समासनिर्णयः कार्यः।

४०. महामुनिः दर्शनेन कीदृश आसीत्।

पाठसारः

सूर्यः आकाशस्थनक्षत्राणां मध्ये मणिरूपः। पूर्वस्यां दिशायां स कुण्डलरूपेण विराजते। स कमलस्य वल्लभः चक्रवाकमिथुनस्य च शोकापहारकः। यतः सूर्यस्य उदयास्तगमनाभ्यां नियम्यते पद्मिनीमां प्रकाशः मालिन्यं च। दिनस्वामी स सूर्यः सर्वव्यवहाराणां प्रवर्तयिता। किं बहुना। सूर्ये उदिते दिनम् अस्तमिते च रात्रिः पृथिव्यां विधीयते। सूर्यगतिकारणाद् एव द्वादशवत्सरस्य भेदाः, ऋतूनां युगानां तथा कल्पानाम् अपि भेदाः भवन्ति। वेदेषु सूर्यदेवः एव स्तूयते। गायत्रीमन्त्रेण सद्विप्राः प्रतिदिनं सूर्यस्य एव उपासनां कुर्वन्ति। तस्यैव कुले भगवान् श्रीरामचन्द्रः जन्म अलभत। अत एव स विश्ववासिनां परमपूजनीयः इत्येवं सूर्यवन्दनं कुर्वन् निजकुटिरात् गौरवटुः बहिरागतः।

विलम्बात् प्रबोधनहेतोः गुरुसेवायां विघ्नम् आशङ्क्य स गुरोः सन्ध्योपासनार्थं पुष्पावचयं कर्तुमुद्यतः। अतः स सत्वरं कुसुमानि अवचेतुं एकम् कदलीपर्णम् आच्छिद्य तत्र बालतृणसन्धानेन कुसुमस्थापनपात्रं निर्माय पुष्पाणि चेतुम् आरब्धवान्। स वटुः मनोरमकायः धवलवर्णीयः जटाभिः ब्रह्मचारी प्रायः षोडशवयस्कः शङ्खग्रीवः दीर्घभालः सुन्दरबाहूपेतः विस्तृतलोचनः च आसीत्।

एतस्मिन् अवसरे तस्यैव कोऽपि सतीर्थः श्यामवटुः आगम्य अवदत् यद् अलं पुष्पचयनेन इति। स श्यामवटुः दर्शनेन अतीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कपूरागुरुचूर्णलिप्तम् आसीत्। स गौरवटुम् उक्तवान् यद् यवनत्रासाद् भीतायाः बालिकायाः सेवया गौरवटोः रात्रौ प्रहरत्रयम् अतीतम्। अतः स प्रातः शीघ्रं न जागरितः। श्यामवटुना गुरोः उपासनसामग्री प्रागेव उपकल्पिता। अधुना तस्याः बालिकायाः पित्रोः गृहस्य च अन्वेषणं विधातव्यमिति। तयोः आलापसमये हठात् तयोः पर्वतशिखरे दृष्टिः पतिता।

तत्र पर्वतस्य कन्दरे बहुसमयं व्याप्य एकः महामुनिः समाधौ मग्न आसीत्। तस्य परिचयः कोऽपि न जानाति स्म। तं मुनिं तत्रत्या ग्रामण्यः ग्रामवासिनश्च पूजयन्ति स्म। स एव मुनिः समाधित उत्थाय

यदा पर्वताद् अवतरन् आसीत् तदा वटुद्वयेन स दृष्टः। स च तपोवनाभिमुखं समागच्छति स्म। ततः तपोवनाध्यक्षेण सच्छात्रेण ब्रह्मचारिगुरुणा स महामुनिः स्वागतवाग्भिः समाहूतः यथाविधि अभ्यर्चितश्च। ततः योगिराजः आगत्य मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वान् इव दिवाकरः इव उदयगिरिम् उदयाचलम् आरुह्य उपविष्टवान्।

स मुनिः समाधित उत्थितः आश्रमम् आयातः इति च वार्तां कर्णपरम्परया श्रुत्वा बहवो जनाः तं द्रष्टुम् आश्रमम् आगताः। तस्य योगिराजस्य सुघटितः कायः, प्रगाढा जटा, विशालाः च अवयवाः, अङ्गारसदृशे नेत्रे, मनोहरा गम्भीरा च वाणी आसीत्। एतत्सर्वं प्रशंसन्तः जना चकिता अभवन्। एवं समासेन पाठसारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. विष्णोर्माया भगवती यया सम्मोहितं जगत् - इति श्लोकांशं व्याख्यात।

२. हिंस्रः स्वपापेन विहिंसितः - इति श्लोकांशं प्रपूर्य व्याख्यात।

३. शिवराजविजयकाव्यदिशा सूर्योदयं वर्णयत।

४. कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परस्सहस्र-पुण्डरीक-पटल-परिलसितं पतत्रिकुल-कूजितपूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनित-दिगन्तरः, फल-पटलाऽऽस्वाद-चपलित-चञ्चु-पतङ्गकुलाऽऽ-क्रमणाधिक-विनत-शाख-शाखि समूह-व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्। - इति व्याख्यात।

५. तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति, प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्मचारिवटुभ्यामदर्शि। - इति व्याख्यात।

६. आश्रमे सत्कारपर्यन्तं योगिराजवृत्तान्तं वर्णयत।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. भगवत्या विष्णोः मायया सम्मोहितं जगत्।

२. हिंस्रः स्वपापेन विहिंसितो भवति।

३. साधुः समत्वेन भयाद् विमुच्यते।

४. विष्णोर्मायेति कीदृशं नमस्कारात्मकं मङ्गलम्।

५. हिंस्रः इति वस्तुनिर्देशात्मकं मङ्गलम्।

उत्तराणि-२

६. भगवतः मरीचिमालिनः प्रकाशः पूर्वस्यां दिशि।

७. सूर्यः आकाशमण्डलस्य मणिः।

८. सूर्यः खेचरचक्रस्य चक्रवर्ती।

९. ब्रह्माण्डभाण्डस्य दीपकः सूर्यः।

१०. सूर्यः कोकलोकस्य शोकविमोकः।

११. सूर्यः वत्सरं द्वादशसु भागेषु विभनक्ति।

१२. उपतिष्ठन्ते इत्यत्र "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यम्" इति वार्तिकेन आत्मनेपदम्।

१३. जनयति इत्यत्र "बुधयुधनशजनेङ्भ्रुद्रुस्रुभ्यो णेः" इत्यनेन परस्मैपदम्।

१४. सूर्यः श्रीरामचन्द्रस्य कुलमूलम्।

उत्तराणि-३

१५. गौरवटुना महान् पुण्यमयः समयः स्वप्नजालपरतन्त्रेण एव अतिवाहितः।

१६. गौरवटोः गुरुचरणानां प्रातः सन्ध्योपासनसमयः।

१७. गुरोः सन्ध्योपासनायै गौरवटुः पुष्पाणि अवचिनोति।

१८. गौरवटुः मनोरमकायः, धवलवर्णीयः, जटाभिः ब्रह्मचारी, प्रायः षोडश–वयस्कः, शङ्खग्रीवः, दीर्घभालः, सुन्दरबाहूपेतः विस्तृतलोचनः च आसीत्

उत्तराणि–३

१९. गौरवटोः कदलीदलकुञ्जायितं कुटीरम्।

२०. कुटीरस्य समन्तात् पुष्पवाटिका आसीत्।

२१. कुटीरस्य पूर्वतः परमपवित्रपानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुलकूजितपूजितं पयःपूरितं सर आसीत्।

२२. कुटीरस्य दक्षिण्यस्यां दिशि एकः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

२३. निर्झरझर्झरध्वनिध्वनितदिगन्तरः - झर्झररूपः ध्वनिः झर्झरध्वनिः शाकपार्थिवादिवत् समासः। निर्झराणां झर्झरध्वनिरिति षष्ठीतत्पुरुषसमासः। तेन ध्वनितानि इति तृतीयातत्पुरुषसमासः। तादृशानि दिगन्तराणि यस्य स इति बहुव्रीहिसमासः।

२४. परमपवित्रपानीयम् - परमं च तत् पवित्रं चेति कर्मधारयः, तादृशं पानीयं यस्य तत् इति बहुव्रीहिसमासः।

उत्तराणि-४

२५. श्यामवटुः दर्शनेन अतीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कपूरागुरुचूर्णलिप्तम् आसीत्।

२६. आचार्यपादाः आश्रमे तडागतटे सन्ध्यावन्दनं कुर्वन्ति स्म।

२७. श्यामवटुना आचार्याणां सन्ध्योपासनसामग्री संस्थापिता।

२८. गौरवटुः यवनत्रासेन भीतां बालिकां मधुरं पयः पाययन् मुनिभोज्यं च खादयन् तां सान्त्वयन् प्रहारत्रयं जागरितवान्।

२९. गौरवटुः मरन्दमधुरा अपः पाययन् स्थितः।

३०. सा बाला यवनत्रासेन रोदिति स्म।

३१. गौरवटुना श्यामवटुना च बालिकायाः पितरौ भवनं च परिमार्गणीयानि।

३२. पर्वतशिखरे गौरवटोः श्यामवटोश्च दृष्टिः पतिता।

उत्तराणि-५

३३. तस्य पर्वतस्य कन्दरे एकः समाधौ लीनः महामुनिः निवसति स्म।

३४. ग्रामणी-ग्रामीण-ग्रामाः महामुनिं पूजयन्ति स्म।

३५. महामुनिं केचन जनाः कपिलः इति, अन्ये लोमशः इति, अपरे जैगीषव्यः इति, अन्ये इतरे च मार्कण्डेयः इति विश्वसन्ति स्म।

३६. समाधिमग्नः य आसीत् तं महामुनिं पर्वतशिखराद् अवतरितुं दृष्टवान् गौरवटुः श्यामवटुः च।

उत्तराणि-६

३७. महामुनिः आश्रमाचार्यनिष्ठकाष्ठपीठम् उपाविशत्।

३८. महामुनिः भास्वान् इव उदयगिरिम् इव आश्रमाचार्यनिष्ठकाष्ठपीठम् आरुरोह।

३९. नित्यनियमसम्पादनाय इत्यत्र समासनिर्णयः कार्यः।

४०. महामुनिः सुघटितकायः, प्रगाढजटः, विशालावयवः, अङ्गारनेत्रः, मनोहरवाणीकः च आसीत्।

॥ इति नवमः पाठः ॥

348sk10

१०

शिवराजविजयः - योगीराजसंवादः

प्रस्तावना

योगिराजसपर्यायाः परं बालिकारोदनवृत्तान्तम्, भारतवर्षे यवनानां दुराचारः, योगिराजस्य योगाचरणम्, भारतवर्षस्य वर्तमानदशा इत्येते अस्मिन् पाठे क्रमशः वर्णिताः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- बालिकाप्राप्तिवृत्तान्तं जानीयात्।
- बालिकारोदनवृत्तान्तं जानीयात्।
- बालिकापहरणवृत्तान्तं जानीयात्।
- यवनानां दुराचारान् जानीयात्।
- योगिराजस्य योगप्रसङ्गं जानीयात्।
- पाठ्यांशस्य अन्वयार्थसङ्गमनं जानीयात्।
- पाठ्यांशस्थानां पदानां व्याकरणविमर्शं पर्यायशब्दान् च जानीयात्।

१०.१) सम्पूर्णः मूलपाठः

अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटीरात् अश्रूयत तस्या एव बालिकायाः सकरुणरोदनम्।

ततः 'किमिति। कुत इति। केयमिति। कथमिति।' पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामवटुमादिश्य कथितम्–

'भगवन्! श्रूयतां यदि कुतूहलम्। ह्यः सम्पादित–सायन्तन–कृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि परितः समासीनेषु छात्रवर्गेषु, धीर–समीर–स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी– कामिनी–चन्दनबिन्दाविव इन्दौ, कौमुदी–कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुषु इव मौनमाकलयत्सु पतंग–कुलेषु, कैरव–विकाश–हर्ष–प्रकाश–मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान–निःश्वासम्,

श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठं क्रन्दनमश्रौषम्।

तत्क्षणमेव च 'कुत इदम्। किमिदमिति दृश्यतां ज्ञायताम्' इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राऽऽघ्रता, अश्रुप्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल–गौरीम्,कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनवाष्पाणि।

अथ 'कन्यके! मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः' इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, 'बालिके! कथय क्व ते पितरौ। कथमेतस्मिन्नाश्रमप्रान्ते समायाता। किं ते कष्टम्। कथमरोदीः। किं वाञ्छसि। किं कुर्मः।' इति पृष्टा मुग्धतया अपरिकलित–वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद् – एषा अस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति।

एनां च सुन्दरीमाकलय्य कोऽपि यवन–तनयो नदीतटान्मातुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य बिभीषिकयाऽस्याः क्रन्दन–कोलाहलं शमयितुमियेष; तावदकस्मात् कोऽपि काल–कम्बल इव भल्लूको वनान्तादुपाजगाम। दृष्ट्वैव यवन–तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश–पलाशि–श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत एव समायाता यावद् भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीते'ति।

तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच - 'विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः।'

ततः स उवाच – 'महात्मन्! क्वाधुना विक्रमराज्यम्। वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश–शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजयध्वनिः। क्व सम्प्रति तीर्थे तीर्थे घण्टानादः। क्वाद्यापि मठे मठे वेदघोषः। अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्रष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद्

दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः' इत्येव श्रूयतेऽवलोक्यते च परितः।

तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच - "कथमेतत्। ह्य एव पर्वतीयाञ्छकान् विनिर्जित्य महता जयघोषेण स्वराजधानीमायातः श्रीमानादित्य-पदलाञ्छनो वीरविक्रमः। अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्धूयते, अधुनापि तेषां पटहगोमुखादीनां निनादः कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षाणां सप्तदश-शतकानि व्यतीतानि।" इति।

ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम् -

"भगवन्! बद्ध–सिद्धासनैर्निरुद्ध–निःश्वासैः प्रबोधितकुण्डलिनीकैः विजित–दशेन्द्रियैरनाहत–नाद–तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य, चन्द्र–मण्डलं भित्त्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्र–स्वरूपैर्ध्यानावस्तितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये भवता ये पुरुषा अवलोकिताः तेषां पञ्चाशत्तमोऽपि पुरुषो नावलोक्यते। अद्य न तानि स्रोतासि नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम्। किमधिकं कथयामो भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति।"

इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद – "सत्यं न लक्षितो मया समय–वेगः। यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम–समये उदस्थाम्। पुनश्च वैक्रम–समये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति।"

१०.२) साम्प्रतं मूलपाठमवगच्छाम – १

अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटीरात् अश्रूयत तस्या एव बालिकायाः सकरुणरोदनम्।

ततः 'किमिति। कुत इति। केयमिति। कथमिति।' पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामवटुमादिश्य कथितम्–

'भगवन्! श्रूयतां यदि कुतूहलम्। ह्यः सम्पादित–सायन्तन–कृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि परितः समासीनेषु छात्रवर्गेषु, धीर–समीर–स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी– कामिनी–चन्दनबिन्दाविव इन्दौ, कौमुदी–कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुषु इव मौनमाकलयत्सु पतंग–कुलेषु, कैरव–विकाश–हर्ष–प्रकाश–मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान–निःश्वासम्,

श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम्।

अन्वयार्थः - अथ ततः परं योगिराजं मुनिप्रवरं सम्पूज्य समर्च्य किमपि किञ्चिदपि आलपितुं वक्तुं यावत् यदा एव ईहितं प्रयतितं तावत् तदा एव कुटीरात् उटजात् तस्याः पूर्वोक्तायाः बालिकायाः कन्यकायाः सकरुणरोदनं शोकसहितं विलापम् अश्रूयत श्रुतिगोचरम् अभवत्।

ततः कन्यकारोदनाकर्णनात्परं 'किमिति किमर्थं रोदनम्। कुत इति कस्मात् प्रदेशात् क्रन्दनम्। का इयम् इति का एषा रोदिति इति। कथम् इति क्रन्दनस्य किं कारणम् इति।' पृच्छापरवशे प्रश्नपरतन्त्रे योगिराजे योगिवरे ब्रह्मचारिगुरुणा वह्नेः आचार्येण बालिकां क्रन्दन्तीं बालां सान्त्वयितुम् आश्वासयितुं श्यामवटुं श्यामलं ब्रह्मचारिणम् आदिश्य आज्ञाप्य कथितं उक्तम्–

भगवन् योगैश्वर्यसम्पन्नमहर्षे यदि चेत् कुतूहलम् वृत्तान्तज्ञानकौतुकं (अस्ति तर्हि) श्रूयतां समाकर्ण्यताम् एतदेव यत् – ह्यः गतवासरे सम्पादित–सायन्तन–कृत्ये विहितसन्ध्यावन्दने अत्रैव अस्मिन्नेव स्थाने कुशास्तरणम् दर्भासनम् अधिष्ठिते आरूढे मयि गौरश्यामवटुशिक्षके मुनौ परितः समन्तात् समासीनेषु समुपविष्टेषु छात्रवर्गेषु शिष्यसमुदायेषु धीर–समीर–स्पर्शेन मन्द–मन्द–वायुसम्पर्केण मन्दमन्दं शनैः शनैः आन्दोल्यमानासु सञ्चाल्यमानासु व्रततिषु वल्लरीषु, समुदिते उदयं प्राप्तवते यामिनी–कामिनी–चन्दनबिन्दौ रात्रिरूपायाः ललनायाः ललाटतिलके इव इन्दौ चन्द्रे, कौमुदी–कपटेन ज्योत्स्नाव्याजेन सुधाधाराम् इव पीयुषप्रवाहम् इव वर्षति वर्षणं कुर्वति गगने आकाशे, अस्मन्नीतिवार्तां मन्मुखात् नयकथनं शुश्रूषुषु इव श्रोतुम् इच्छुषु इव मौनं मूकतां आकलयत्सु समादधत्सु पतङ्ग–कुलेषु विहगकुलेषु, कैरव–विकाश–हर्षप्रकाश–मुखरेषु कुमुद–प्रफुल्लन–मोदप्रकाशन–शब्दायमानेषु चञ्चरीकेषु द्विरेफेषु, (अहम्) अस्पष्टाक्षरम् अस्फुटवर्णम्, कम्पमाननिःश्वासं वेपमाननिःश्वसनं, चीत्कारमात्रं चीत्काररूपम्, दीनतामयं कारुण्यसमन्वितम्, अत्यवधानश्रव्यत्वाद् विशेषावधानेन श्रवणयोग्यत्वाद् अनुमितदविष्ठतं अनुमितदूरत्वं क्रन्दनं रोदनम् अश्रौषम् अशृण्वम्।

व्याख्यानम् - योगिराजसपर्यायाः परं यदा तेन सह वार्तालापं कर्तुं चेष्टितवान् ब्रह्मचारिगुरुः तदा कुटीरात् यवनत्रस्ताया बालिकायाः सकरुणरोदनं श्रुत्वा 'किमर्थं रोदनम्। कुतः क्रन्दनम्। का इयम् रोदिति इति। क्रन्दनस्य किं कारणम् इति।' इति योगिराजः पृष्टवान्। तदा ब्रह्मचारिगुरुः श्यामवटुं बालिकासान्त्वनाय आदिश्य योगिराजाय बालिकावृत्तान्तं कथितवान्।

यदा ब्रह्मचारिगुरुः सायन्तनीं सन्ध्योपासनां समाप्य दर्भासनासीनः छात्रपरिवेष्टितः सन् उपदेष्टुम् उपविष्टः। तदा मन्दमन्दपवनस्पर्शेण लताः सञ्चलन्त्यः आसन्। यामिनीरूपायाः कामिन्याः कपालबिन्दुरिव चन्द्रः उदयं गतः। ज्योत्स्नाव्याजेन आकाशः सुधाधारामिव वर्षन् आसीत्। पक्षिणः तथा मूका आसन् यथा ते अपि ब्रह्मचारिगुरोः नीतिव्याख्यां श्रोतुकामाः। कुमुदविकासेन हर्षं प्राप्तवन्त आसीत्

तदा द्विरेफाः। तस्मिन्नेव समये ब्रह्मचारिगुरुः अस्फुटवर्णं वेपमाननिःश्वसनं चित्कारमात्रं दीनतायुक्तं दूरात् एकं क्रन्दनं श्रुतवान्।

व्याकरणविमर्शः

- सम्पादितसायन्तनकृत्ये - सायन्तनानि कृत्यानि सायन्तन-कृत्यानि इति कर्मधारयः। सम्पादितानि सायन्तनकृत्यानि येन स सम्पादितसायन्तनकृत्यः, तस्मिन् इति बहुव्रीहिः।
- कुशास्तरणम् - कुशनिर्मितम् आस्तरणं कुशास्तरणम् इति शाकपार्थिवादिवत्समासः।
- अधितिष्ठति - अधिपूर्वकात् स्थाधातोः शतृप्रत्यये पुंसि ङौ अधितिष्ठति इति रूपम्।
- समासीनेषु - सम्पूर्वकाद् आस्धातोः शानचि पुंसि सुपि समासीनेषु इति रूपम्।
- धीरसमीरस्पर्शेन – धीरः समीरः धीरसमीरः इति कर्मधारयः। तस्य स्पर्शः, तेन इति षष्ठीतत्पुरुषः।
- यामिनीकामिनीचन्दनबिन्दौ - यामिनी एव कामिनी यामिनीकामिनी इति कर्मधारयः। चन्दनस्य बिन्दुः चन्दनबिन्दुः इति षष्ठीतत्पुरुषः। यामिनीकामिन्याः चन्दनबिन्दुः यामिनीकामिनी-चन्दनबिन्दुः, तस्मिन् इति षष्ठीतत्पुरुषः।
- पतङ्गकुलेषु - पतङ्गानां कुलानि पतङ्गकुलानि, तेषु इति षष्ठीतत्पुरुषः।
- कैरवविकाशहर्षप्रकाशमुखरेषु - कैरवाणां विकाशः कैरवविकाशः इति षष्ठीतत्पुरुषः। तज्जनितः हर्षः कैरवविकाशहर्षः इति शाकपार्थिवादिवत्समासः। तस्य प्रकाशः कैरवविकाशहर्षप्रकाशः इति षष्ठीतत्पुरुषः। तेन मुखराः इति तृतीयातत्पुरुषः, तेषु।
- अस्पष्टाक्षरम् - न स्पष्टम् अस्पष्टम् इति नञ्समासः। अस्पष्टम् अक्षरं यस्य तत् अस्पष्टाक्षरम् इति बहुव्रीहिः।
- कम्पमाननिःश्वासम् - कम्पमानो निःश्वासो यस्मिन् तत् कम्पमाननिःश्वासमिति बहुव्रीहिः।
- अनुमितदविष्ठतम् - अनुमिता दविष्ठता यस्य तद् अनुमितदविष्ठतम् इति बहुव्रीहिः।
- अश्रौषम् - श्रुधातोः लुङि उत्तमपुरुषैकवचने अश्रौषम् इति रूपम्।

कोषः

- "कौतूहलं कौतुकञ्च कुतुकञ्च कतूहलम्" इत्यमरः।
- "समन्ततस्तु परितः सर्वतो विष्वगित्यपि" इत्यमरः।
- "बल्ली तु व्रततिर्लता" इत्यमरः।
- "चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः।

पाठगतप्रश्नाः – १

१. बालिकां सान्त्वयितुं कमादिदेश ब्रह्मचारिगुरुः।

२. समुदितः चन्द्रः कीदृश आसीत्।

३. गगनं किं वर्षति।

४. ब्रह्मचारिगुरुः कीदृशं कन्दनम् अश्रौषत्।

५. कम्पमाननिःश्वासम् इत्यस्य समासः दर्शनीयः।

१०.३) साम्प्रतं मूलपाठमवगच्छाम – २

तत्क्षणमेव च 'कुत इदम्। किमिदमिति दृश्यतां ज्ञायताम्' इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राऽऽघ्रता, अश्रुप्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल–गौरीम्,कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनवाष्पाणि।

अन्वयार्थः - तत्क्षणमेव तस्मिन्नेव समये च पुनः 'कुतः कस्मात् स्थानाद् इदं रोदनम्। किमिदं किं कारणम् अस्य इति दृश्यताम् ईक्ष्यताम् ज्ञायतां बुध्यताम्' इति इत्थम् आदिश्य आज्ञाप्य छात्रेषु शिष्येषु छात्रेषु विसृष्टेषु प्रेरितेषु, क्षणानन्तरं किञ्चित्परं एकेन छात्रेण एकेन शिष्येण भयभीता भयग्रस्ता सवेगं वेगसहितम् अत्युष्णं बहुसन्तापग्रस्तं दीर्घं पृथुलं निःश्वसती श्वासं गृह्णन्ती, मृगी इव हरिणी इव व्याघ्राऽऽघ्रता शार्दूलाक्रान्ता, अश्रुप्रवाहैः नयनवाष्पप्रवाहनैः स्नाता विहितस्नाना, सवेपथुः सकम्पा एका कन्यका एका बालिका अङ्के क्रोडे निधाय संस्थाप्य समानीता आनीता।

चिरान्वेषणेन अपि बहुधा अनुसन्धानेन अपि च पुनः तस्याः बालायाः सहचरी सखी सहचरो सखा वा न प्राप्तः न अधिगतः। तां च बालिकां चन्द्रकलया इव हिमांशुरेखया इव निर्मितां रचिताम्, नवनीतेन हैयङ्गवीनेन इव रचितां विहिताम्, मृणाल–गौरीं कमलदण्डसदृशधवलाम्, कुन्दकोरकाग्रदतीं कुन्दकोरकाग्रभागसदृश धवलदन्तान्वितां सक्षोभं सभयं रुदतीं क्रन्दन्तीम् अवलोक्य वीक्ष्य अस्माभिः अपि आश्रमनिवासिभिः अपि नयनवाष्पाणि नेत्राश्रूणि निरोद्धुम् अवरोधनाय न पारितं न शक्तम्।

व्याख्यानम् - तस्मिन्नेव समये 'कुतः इदं रोदनम्। किं कारणम् अस्य' इति ज्ञातुं ब्रह्मचारिगुरुः शिष्यान् आदिष्टवान्। छात्राणां मध्ये केनचित् यवनभयव्याकुला असहाया क्रन्दनरता कन्यका अङ्के कृत्वा समानीता। सा कन्या सन्तापेन दीर्घं निःश्वसती, व्याघ्राक्रान्ता हरिणी इव, अश्रुप्रवाहस्नाता, कम्पमाना

आसीत्। बहुधा अन्वेषणेन अपि तस्याः सहचरं सहचरीं वा कोपि शिष्यो न प्राप्तवान्। तां बहुधां क्रन्दनरतां त्रस्तां च दृष्ट्वा सर्वे एव आश्रमवासिनः अश्रुपातं कृतवन्तः।

व्याकरणविमर्शः

- व्याघ्राघ्राता – व्याघ्रेण आघ्राता इति तृतीयातत्पुरुषः
- अश्रुप्रवाहैः - अश्रूणां प्रवाहः अश्रुप्रवाहः, तै इति षष्ठीतत्पुरुषः।
- सवेपथुः- वेपथुना सह वर्तमाना इति बहुव्रीहिः।
- मृणालगौरीम् - मृणाल इव गौरी मृणालगौरी, ताम् इति उपमानकर्मधारयः।
- कुन्दकोरकाग्रदतीम् - कुन्दानां कोरकाणि कुन्दकोरकाणि इति षष्ठीतत्पुरुषः। कुन्दकोरकाणाम् अग्राणि कुन्दकोरकाग्राणि इति षष्ठीतत्पुरुषः। कुन्दकोरकाग्राणि इव दन्ताः यस्याः सा कुन्दकोरकाग्रदती, ताम् इति बहुव्रीहिः।
- भयभीता - भयेन भीता इति तृतीयातत्पुरुषः।
- दृश्यताम् - दृश्धातोः कर्मणि लोटि प्रथमपुरुषैकवचने रूपम्।
- ज्ञायताम् - ज्ञाधातोः कर्मणि लोटि प्रथमपुरुषैकवचने रूपम्।
- निःश्वसती - निर्-पूर्वकात् श्वस्धातोः शतृप्रत्यये ङीपि सौ निःश्वसती इति रूपम्।

कोषः

- "शार्दूलद्वीपिनौ व्याघ्रे" इत्यमरः।
- "उत्सङ्गचिह्नयोरङ्कः" इत्यमरः।

पाठगतप्रश्नाः – २

६. कीदृशी बालिका छात्रेण अङ्के समानीता।

७. क्रन्दन्तीं बालिकां दृष्ट्वा किं निरोद्धुम् आश्रमवासिनः असमर्थाः।

८. कुन्दकोरकाग्रदतीम् इत्यत्र समासः दर्शनीयः।

१०.४) साम्प्रतं मूलपाठमवगच्छाम – ३

अथ 'कन्यके! मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः' इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य,

'बालिके! कथय क्व ते पितरौ। कथमेतस्मिन्नाश्रमप्रान्ते समायाता। किं ते कष्टम्। कथमरोदीः। किं वाञ्छसि। किं कुर्मः।' इति पृष्टा मुग्धतया अपरिकलित–वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद् – एषा अस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति।

अन्वयार्थः - अथ बालिकादर्शनाद् अनन्तरं 'कन्यके हे बाले! मा भैषीः भयं मा कार्षीः। पुत्रि! हे नन्दिनि! त्वां भवतीं मातुः अम्बायाः समीपे निकटे प्रापयिष्यामः प्रेषयिष्यामः। दुहितः पुत्रि! खेदं क्लेशं मा वह मा धारय। भगवति! हे ऐश्वर्यशालिनि! किञ्चिद् ईषत् भुङ्क्ष्व खाद, पयः पिब दुग्धस्य पानं कुरु। एते पुरोदृश्यमानाः तव भवत्याः भ्रातरः सहोदराः; यत् यत्किमपि कथयिष्यसि वक्ष्यसि तदेव करिष्यामः वयं तदेव विधास्यामः। मा स्म, रोदनैः क्रन्दनैः प्राणान् असून् संशयपदवीं सन्देहास्थितिम् आरोपयः समारोपयः। कोमलं सुकुमारम् इदम् एतत् शरीरं देहं शोकज्वालावलीढं क्लेशाग्निपरिव्याप्तं मा स्म कार्षीः मा कुरु इति एवम्प्रकारेण सहस्रधा बहुभिः प्रकारैः बोधनेन सान्त्वनप्रदानेन कथमपि केनापि प्रकारेण सम्बुद्धा अवबोधिता सती किञ्चिद् अत्यल्पं दुग्धं पयः पीतवती अपिबत्।

ततश्च पयःपानात्परं मया ब्रह्मचारिणाम् आचार्येण क्रोडे अङ्के उपवेश्य संस्थाप्य, 'बालिके कन्यके! क्व कुत्र ते तव पितरौ जनकः जननी च कथय वद। कथं केन प्रकारेण एतस्मिन् आश्रमप्रान्ते आश्रमप्रदेशे समायाता समागता। ते तव किं कीदृशं कष्टं दुःखम्। कथं केन प्रकारेण अरोदीः कन्द्रनं करोषि। किं वाञ्छसि किम् इच्छसि। किं कुर्मः वयं किं कर्तुं शक्नुमः।' इति एवं पृष्टा जिज्ञासिता मुग्धतया सरलतया अपरिकलित–वाक्पाटवा अज्ञातवचनचातुर्या, भयेन साध्वंसेन विशिथिलवचनविन्यासा गलितवचःक्रमा, लज्जया हिस्रपया अतिमन्दस्वरा अतिशयेन कोमलस्वरा, शोकेन कष्टेन रुद्धकण्ठा स्तम्भितगलविवरा, चकितचकिता इव अत्यन्तं भीत इव कथं कथमपि येन केनापि प्रकारेण अस्मान् आश्रमवास्तव्यान् अबोधयद् विज्ञापितवती यद् एषा इयं बालिका अस्मिन् एतस्मिन् नेदीयसि एव अतिसमीपे एव ग्रामे वसतः वासं कुर्वतः कस्यापि कस्यचिदपि ब्राह्मणस्य विप्रस्य तनया पुत्री अस्ति भवति।

व्याख्यानम् - सर्वे आश्रमवासिनः बालिकायाः सान्त्वनाय बहुधा चेष्टितवन्तः। ते तां तस्याः मातरं पितरं च प्रति नेष्यन्तीति उक्तवन्तः। बहुधा भोजनाय पानाय च अनुरुद्धा सा बालिका अत्यल्पं दुग्धं पयः पीतवती।

पयःपानात्परं ब्रह्मचारिगुरुः तां प्रति तस्याः परिचयः कः, कथं सा अत्र सम्प्राप्ता, किं तस्या दुःखम् इत्यादिप्रश्नान् पृष्टवान्। एवं पृष्टा सा सरलतया अज्ञातवचनचातुर्या, भयेन शिथिलवचनविन्यासा, लज्जया कोमलस्वरा, कष्टेन रुद्धकण्ठा आश्रमवास्तव्यान् उक्तवती यत् सा समीपवर्तिनः एकस्य ग्रामस्य ब्राह्मणस्य कन्यका।

व्याकरणविमर्शः

- मा भैषीः – "माङि लुङ्" इति सूत्रेण माङ्योगे भीधातोः लुङि मध्यमपुरुषैकवचने भैषीः इति रूपम्। अत्र "न माङ्योगे" इत्यनेन सूत्रेण अडागमाभावः।
- शोकज्वालावलीढम् - शोकरूपा ज्वाला शोकज्वाला इति शाकपार्थिवादिवत्समासः। शोकज्वालाभिः अवलीढं शोकज्वालावलीढम् इति तृतीयातत्पुरुषः। अवपूर्वात् लिह्धातोः क्तप्रत्यये अवलीढशब्दो निष्पन्नः।
- अपरिकलितवाक्पाटवा - वाचः पाटवं वाक्पाटवम् इति षष्ठीतत्पुरुषः। न परिकलितम् अपरिकलितम् इति नञ्समासः। अपरिकलितं वाक्पाटवं यस्याः सा अपरिकलितवाक्पाटवा इति बहुव्रीहिः।
- विशिथिलवचनविन्यासा - वचनानां विन्यासः वचनविन्यासः इति षष्ठीतत्पुरुषः। विशिथिलः वचनविन्यासः यस्याः सा विशिथिलवचनविन्यासा इति बहुव्रीहिः।

कोषः

- "मन्युशोकौ तु शुक् स्त्रियाम्" इत्यमरः।
- "दुग्धं क्षीरं पयः समम्" इत्यमरः।
- "मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा" इत्यमरः।

पाठगतप्रश्नाः – ३

९. बहुधा सम्बोधिता बालिका किं कृतवती।

१०. सा बाला कस्य कन्यका।

११. अपरिकलितवाक्पाटवा इत्यत्र समासः प्रदर्शनीयः।

१२. विशिथिलवचनविन्यासा इत्यत्र समासः प्रदर्शनीयः।

१०.५) साम्प्रतं मूलपाठमवगच्छाम – ४

एनां च सुन्दरीमाकलय्य कोऽपि यवन–तनयो नदीतटान्मातुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य बिभीषिकयाऽस्याः क्रन्दन–कोलाहलं शमयितुमियेष; तावदकस्मात् कोऽपि काल–कम्बल इव भल्लूको वनान्तादुपाजगाम। दृष्ट्वैव यवन–तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश–पलाशि–श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत एव समायाता यावद् भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीते'ति।

अन्वयार्थः - एनां पूर्वोक्ताम् इमां च सुन्दरीं मनोहराम् आकलय्य निश्चित्य कोऽपि कश्चन यवनतनयः यवनपुत्रः नदीतटात् तरङ्गिणीतीरात् मातुः जनन्याः हस्तात् भुजात् आच्छिद्य बलात् अपहृत्य क्रन्दन्तीं रोदनं कुर्वन्तीं नीत्वा स्वीकृत्य अपससार पलायनं कृतवान्। ततः पलायनात्परं कञ्चिदध्वानम् ईषन्मार्गम् अतिक्रम्य गत्वा यावत् यदा असिधेनुकां छुरिकां सन्दर्श्य दर्शयित्वा बिभीषिकया भयेन अस्याः बालिकायाः क्रन्दनकोलाहलं रोदनचित्कारं शमयितुं शान्तं विधातुम् इयेष इष्टवान्, तावत् तदा अकस्मात् हठात् कोऽपि कश्चन कालकम्बलः इव यमकम्बलः इव भल्लूकः ऋक्षः वनान्तात् अरण्यप्रान्ताद् उपाजगाम उपागतः। असी यवनतनयः यवनपुत्रः दृष्ट्वा एव भल्लूकम् अवलोक्य एव तत्र एव तस्मिन्नेव प्रदेशे इमां कन्यकां एतां बालिकां त्यक्त्वा परित्यज्य एकं शाल्मलितरुम् एकं शाल्मलीवृक्षम् आरुरोह समारूढवान्। इयं विप्रतनया एषा ब्राह्मणकन्यका च पलाश–पलाशि–श्रेण्यां किंशुकविटपपङ्क्तौ प्रविश्य प्रवेशं विधाय घुणाक्षरन्यायेन इत एव आश्रमप्रान्तं समायाता समागता यावद् यदा भयेन त्रासेन पुनः भूयः रोदितुं विलपितुम् आरब्धवती समारेभे तावत् तदा अस्मच्छात्रेण एव मदीयशिष्येण एव आनीता अत्र सम्प्रापिता' इति बालिकासम्प्राप्तिवृत्तान्तम्।

व्याख्यानम् - कदाचित् मात्रा यदा ब्राह्मणकन्यका सा नदीतटे भ्रमति स्म तदा कोऽपि यवनयुवको मातुर्हस्तात् सप्रसभं ताम् अपहृत्य वनमार्गेण आगतः। सहसा मार्गमध्ये समापतिते कंस्मिश्चिद् भल्लुके भयाद् यवनोऽसौ शाल्मलीतरुम् आरुरोह। बालिका अपि वनवर्त्मना किंशुकविटपपङ्क्तौ प्रविश्य घुणाक्षरन्यायेन आश्रमं समायाता क्रन्दनरता उद्धृता च तपोवनबालकेन इत्येवं बालिकावृत्तान्तं समाप्तम्।

कामान्धः स यवनो निर्दयेन हृदयेन अस्फुटस्वरामपि बालिकां तन्मातुः हृदयं शून्यं कुर्वन् अपहर्तुं न विचलितः अभवत्। एतेन यवनानां कीदृशी जघन्या कामलोलुपता इति स्पष्टम्। अतो भारतवर्षस्य अभ्युदयाय तेषां नाशः साधनीयः।

व्याकरणविमर्शः

- यवनतनयः – यवनस्य तनयः यवनतनयः इति षष्ठीतत्पुरुषः।
- नदीतटात् - नद्याः तटः नदीतटः, तस्मात् इति षष्ठीतत्पुरुषः।
- कन्दन्तीम् - क्रन्द्-धातोः शतरि स्त्रियां ङीपि अमि इदं रूपम्।
- कन्दनकोलाहलम् - क्रन्दनोत्थः कोलाहलः क्रन्दनकोलाहलः, तम् इति शाकपार्थिवादिवत्समासः।
- पलाशपलाशिश्रेण्याम् - पलाशाश्चामी पलाशिनश्च पलाशपलाशिनः इति कर्मधारयः। तेषां श्रेणी, तस्यामिति षष्ठीतत्पुरुषसमासः।

कोषः

- "आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी।" इत्यमरः।
- "अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः।" इत्यमरः।

पाठगतप्रश्नाः – ४

१३. यवनतनयः कथं बालिकाम् अपहृतवान्।

१४. यवनतनयः केन प्रकारेण बालिकाक्रन्दनं शमयितुम् इष्टवान्।

१५. यवनतनयः भल्लूकं दृष्ट्वा किं कृतवान्।

१६. भल्लूकः कीदृश आसीत्।

१०.६) साम्प्रतं मूलपाठमवगच्छाम – ५

तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच - 'विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः।'

ततः स उवाच – 'महात्मन्! क्वाधुना विक्रमराज्यम्। वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश–शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजयध्वनिः। क्व सम्प्रति तीर्थे तीर्थे घण्टानादः। क्वाद्यापि मठे मठे वेदघोषः। अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्रष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः' इत्येव श्रूयतेऽवलोक्यते च परितः।

अन्वयार्थः - तद् ब्रह्मचारिणाम् आचार्यवचनम् आकर्ण्य निशम्य कोपज्वालाज्वलितः क्रोधाग्निसमुद्दीप्तः इव यथा योगी मुनिप्रवरः प्रोवाच निगदितवान्– "विक्रमराज्ये अपि विक्रमादित्यशासिते प्रदेशे अपि कथम् एष किमर्थम् एतादृशः पातकमयः पापरूपः दुराचाराणां खलानाम् उपद्रवः विघ्नः।"

ततः एतच्छ्रवणाद् अनन्तरं स ब्रह्मचारिगुरुः उवाच जगाद – "महात्मन् योगिन्, क्व कुत्र अधुना सम्प्रति विक्रमराज्यं विक्रमादित्यभूपतेः शासनम्। वीरविक्रमस्य तु शूरस्य विक्रमादित्यस्य तु भारतभुवं भारतवर्षं विरहय्य परित्यज्य गतस्य दिवं गतस्य वर्षाणां वत्सराणां सप्तदशशतकानि सप्तवर्षशतवर्षाणि व्यतीतानि अतीतानि। क्व कुत्र अधुना साम्प्रतं मन्दिरे मन्दिरे प्रतिदेवालयं जयजयध्वनिः जयजयनादः। क्व कुत्र सम्प्रति अधुना तीर्थे तीर्थे प्रतितीर्थं घण्टानादः वाद्यमानघण्टाध्वनिः। क्व कुत्र अद्यापि अस्मिन् दिवसेऽपि मठे मठे प्रतिमठं वेदघोषः श्रुत्यध्ययननादः। अद्य अधुना हि निश्चयेन वेदाः श्रुतयः विच्छिद्य छित्त्वा वीथीषु मार्गेषु विक्षिप्यन्ते विकीर्यन्ते। धर्मशास्त्राणि मन्वादिप्रणीतस्मृतिशास्त्राणि उद्धूय उत्तोल्य धूमध्वजेषु अग्निषु ध्मायन्ते दह्यन्ते। पुराणानि वेदव्यासविरचितानि श्रीमद्भागवतादीनि पिष्ट्वा चूर्णीकृत्य पानीयेषु जलेषु पात्यन्ते प्रक्षिप्यन्ते। भाष्याणि सूत्रव्याख्यानानि महाभाष्यादीनि भ्रंशयित्वा विचूर्ण्य भ्राष्ट्रेषु भर्जनपात्रेषु भर्ज्यन्ते वह्निना दह्यन्ते। क्वचित्

कुत्रचित् मन्दिराणि देवालयाः भिद्यन्ते नाश्यन्ते, क्वचित् कुत्रचित् तुलसीवनानि तुलसीवृक्षाणाम् अरण्यानि छिद्यन्ते कर्त्यन्ते। क्वचित् कूत्रचित् दाराः परस्त्रियः अपह्रियन्ते चोर्यन्ते। क्वचित् कुत्रचित् धनानि सुवर्णादीनि द्रव्याणि लुण्ठ्यन्ते अपह्रियन्ते। क्वचित् कुत्रचित् आर्तनादाः करुणरोदनानि, क्वचित् कुत्रचित् रुधिरधाराः शोणितप्रवाहाः, क्वचित् कुत्रचिद् अग्निदाहः वह्निदहनम्, क्वचित् कुत्रचित् गृहनिपातः भवनविनाशः इत्येव एवम् एव श्रूयते समाकर्ण्यते अवलोक्यते दृश्यते च पुनः परितः सर्वासु दिक्षु।

व्याख्यानम् - ब्रह्मचारिगुरुवचः श्रुत्वा क्रोधाग्निना समुद्दीप्तः इव मुनिप्रवरः विक्रमशासने एतादृशः दुराचारः कथमिति पृष्टवान्। वस्तुतस्तु तस्मिन् समये नासीद् विक्रमराज्यम्। विक्रमराज्ये समाधिम् आश्रित्य यदा स उत्थितस्तदा सप्तदश-शतवर्षाणि अतिक्रान्तानि।

अतः ब्रह्मचारिगुरुः योगिराजं प्रति कथितवान् यद् - इदानीं नास्ति विक्रमसमयः। यवनकाले अस्मिन् वेदघोषमुखरिताया भारतभूमेः धर्मीयं परिमण्डलम् अवलुप्तम्। इदानीं तु प्रतिमन्दिरं जयजयनादः, प्रतितीर्थं घण्टानादः, प्रतिमठं वेदघोषः अवलुप्तः। इदानीं यवनाः वेदानां स्मृतिशास्त्राणां पुराणानां भाष्याणां च सनातनधर्मप्रतीकानां विनाशं विदधति। ते मन्दिराणि तुलसीवनानि च नाशयन्ति।क्वचित् ते परस्त्रियां सुवर्णादिद्रव्याणां च अपहरणं कुर्वन्ति। एवं सर्वासु दिक्षु आर्तनादाः, शोणितप्रवाहाः, अग्निदाहः भवनविनाशः इत्येवं पातकमयानि यवनानां कार्याणि दृश्यन्ते। एवं यवनानां दुराचारः सखेदं वर्णितो ब्रह्मचारिगुरुणा।

व्याकरणविमर्शः

- कोपज्वालाज्वलितः - कोपस्य ज्वाला कोपज्वाला इति षष्ठीतत्पुरुषः। कोपज्वालया ज्वलितः कोपज्वालाज्वलितः इति तृतीयातत्पुरुषः।
- महात्मन् - महान् आत्मा यस्य स महात्मा इति बहुव्रीहिसमासः। तस्य सम्बोधने प्रथमैकवचने महात्मन् इति रूपम्।
- विक्रमराज्यम् - विक्रमस्य राज्यं विक्रमराज्यमिति षष्ठीतत्पुरुषः।
- घण्टानादः - घण्टायाः नादः घण्टानादः इति षष्ठीतत्पुरुषः।

कोषः

- "एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा" इत्यमरः।
- "मठश्छात्रानिलयः" इत्यमरः।
- "क्लीबेऽम्बरीषं भाष्ट्रो ना" इत्यमरः।
- "गृहं गेहोद्वसितं वेश्म सद्म निकेतनम्" इत्यमरः।

पाठगतप्रश्नाः – ५

१७. वीरविक्रमस्य भारतवर्षं त्यक्त्वा गतस्य कति वर्षाणि गतानि।

१८. यवनकाले वेदानां का दशा।

१९. यवनकाले मन्दिराणां तुलसीवनानां च का दशा।

२०. यवनकाले स्मृतिशास्त्राणां पुराणानां भाष्याणां च का दशा।

१०.७) साम्प्रतं मूलपाठमवगच्छाम – ६

तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच - "कथमेतत्। ह्य एव पर्वतीयाञ्छकान् विनिर्जित्य महता जयघोषेण स्वराजधानीमायातः श्रीमानादित्य-पदलाञ्छनो वीरविक्रमः। अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्भूयते, अधुनापि तेषां पटहगोमुखादीनां निनादः कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षाणां सप्तदश-शतकानि व्यतीतानि।" इति।

अन्वयार्थः - तद् ब्रह्मचारिगुरवचः आकर्ण्य निशम्य दुःखितः क्षुब्धः चकितः विस्मितः च योगिराट् योगीश्वर उवाच जगाद – "कथम् एतत् तव एतद्वचः कथं संगतं भवति। ह्यः एव पूर्वस्मिन् दिवसे एव पर्वतीयान् गिरिस्थितान् शकान् तज्जातीयकान् विनिर्जित्य पराजित्य महता प्रचुरेण जयघोषेण जय जयेति शब्देन स्वराजधानीं स्वप्रशासनकेन्द्रम् उज्जयिनीम् आयातः आगतः श्रीमान् श्रीसम्पन्नः आदित्यपदलाञ्छनः आदित्यपदविभूषितः वीरविक्रमः शौर्यवान् विक्रमादित्यः। अद्य अपि इदानीम् अपि तद्विजयपताका विक्रमादित्यविजयध्वजः मम योगिराजस्य चक्षुषोः नयनयोः अग्रतः इव सम्मुखे इव समुद्भूयते समुद्भास्यते। अधुना अपि सम्प्रति एव तेषां विक्रमादित्यसम्बन्धिनां पटहगोमुखादीनां आनकादिवाद्यविशेषाणां निनादः ध्वनिः कर्णशष्कुलीं श्रवणेन्द्रियगह्वरं पूरयति इव बिभर्ति इव। तत् तस्मात् कथं केन प्रकारेण अद्य इदानीं वर्षाणां सप्तदशशतकानि सप्तदशशतवर्षाणि व्यतीतानि अतिक्रान्तानि।" इति।

व्याख्यानम् - ब्रह्मचारिगुरवचनश्रवणात्परं दुःखितः विस्मयं गतः च योगिराजः कथितवान् यत् – कथम् एतत् तव कथनं संगच्छते। ह्य एव शकजातीयान् पराजित्य महाजयघोषेण वीरः विक्रमादित्यः स्वराजधानीम् उज्जयिनीम् आयातः आगतः। इदानीम् अपि विक्रमादित्यविजयध्वजः योगिराजस्य चक्षुषोः अग्रभागे भासते। सम्प्रति एव विक्रमादित्यविजयोत्सवस्य निनादः श्रवणेन्द्रियं प्रवेशयति। ततः न ज्ञायन्ते सप्तदशशतवर्षाणि व्यतीतानि इति।

व्याकरणविमर्शः

- दुःखितः - दुःखशब्दाद् इतच्प्रत्यये दुःखितः इति निष्पन्नम्।
- आकर्ण्य - आङ्पूर्वकात् कर्णिधातोः ल्यपि आकर्ण्येति रूपम्।

- विनिर्जित्य - विपूर्वकात् निर्-पूर्वकाच्च जिधातोः ल्यपि विनिर्जित्येति रूपम्।
- श्रीमान् - श्रीरस्यास्तीति विग्रहे श्रीशब्दात् मतुप्प्रत्यये पुंसि सौ श्रीमान् इति रूपम्।
- आदित्यपदलाञ्छनः - आदित्यस्य पदम् आदित्यपदम् इति षष्ठीतत्पुरुषः। तदेव लाञ्छनं यस्य स आदित्यपदलाञ्छनः इति बहुव्रीहिः।
- विजयपताका - विजयस्य पताका इति षष्ठीतत्पुरुषः। अथवा विजयसूचिका पताका इति शाकपार्थिवादिवत्समासः।
- समुद्धूयन्ते - सम्पूर्वकात् उत्पूर्वकात् हुधातोः कर्मणि लटि प्रथमपुरुषस्य बहुवचने रूपम्।
- कर्णशष्कुलीम् - कर्णस्य शष्कुली कर्णशष्कुली, ताम् इति षष्ठीतत्पुरुषः।

कोषः

- "कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्।" इत्यमरः।
- "आनकः पटहोऽस्त्री" इत्यमरः।

पाठगतप्रश्नाः – ६

२१. कान् पराजित्य जयघोषेण राजधानीमायातः वीरविक्रमः।

२२. विक्रमादित्यस्य अपरं नाम किम्।

१०.८) साम्प्रतं मूलपाठमवगच्छाम – ७

ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम् -

"भगवन्! बद्ध–सिद्धासनैर्निरुद्ध–निःश्वासैः प्रबोधितकुण्डलिनीकैः विजित–दशेन्द्रियैरनाहत–नाद–तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य, चन्द्र–मण्डलं भित्त्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्र–स्वरूपैर्ध्यानावस्तितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये भवता ये पुरुषा अवलोकिताः तेषां पञ्चाशत्तमोऽपि पुरुषो नावलोक्यते। अद्य न तानि स्रोतासिं नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम्। किमधिकं कथयामो भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति।"

अन्वयार्थः - ततः तदा सर्वेषु समस्तेषु जनेषु स्तब्धेषु मौनम् आस्थितेषु चकितेषु विस्मितेषु च ब्रह्मचारिगुरुणा ब्रह्मचारिणाम् आचार्येण प्रणम्य नमस्कृत्य कथितम् उक्तम् –

"भगवन् ऐश्वर्यादिषट्कवन्, बद्धसिद्धासनैः गृहीतासनविशेषैः निरुद्धनिश्वासैः प्राणायामादिभिः अवरुद्धश्वासकलापैः प्रबोधितकुण्डलिनीकैः समुद्योतितकुण्डलिनीकैः विजितदशेन्द्रियैः

वशीकृतदशहृषीकैः अनाहतनादतन्तुं सुषुम्नामध्यस्थतुरीयपद्मोत्थितशब्दम् अवलम्ब्य आश्रित्य आज्ञाचक्रं भ्रूमध्यस्थद्विदलात्मकं चक्रं संस्पृश्य सम्यक् स्पृष्ट्वा, चन्द्रमण्डलं हिमांशुविम्बं षोडशदलात्मकचक्रं भित्त्वा विभिद्य, तेजःपुञ्जं महाप्रकाशम् अविगणय्य अवज्ञाय, सहस्रदलकमलस्य अन्तः सहस्रारचक्रस्य अभ्यन्तरं प्रविश्य निविश्य, परमात्मानं परं ब्रह्म साक्षात्कृत्य अनुभूय तत्र एव तस्मिन् परब्रह्मणि एव रममाणैः विहरद्भिः मृत्युञ्जयैः अमरैः आनन्दमात्रस्वरूपैः चिन्मयब्रह्ममयैः ध्यानावस्थितैः आबद्धध्यानैः भवादृशैः भवत्सदृशैः योगिवरैः कालवेगः समयजवो न ज्ञायते न बुध्यते। तस्मिन् समये तत्काले भवता योगिराजेन ये पुरुषा जना अवलोकिता ईक्षिताः तेषां सज्जनानां पञ्चाशत्तमः अपि पञ्चाशत्संख्यापूरकः अपि पुरुषो मानवो न अवलोक्यते न दृश्यते। अद्य इदानीं न तानि भवद्दृष्टाः स्रोतासिं सरितां धाराः, न सा पुरावर्तिनी संस्था स्थितिः नगराणां जनपदानां, न सा पुरा विद्यमानः आकृतिः आकारः गिरीणां पर्वतानाम्, न सा पुरावलोकिता सान्द्रता गहनता विपिनानाम् अरण्यानाम्। किमधिकं किम् इतोऽपि अतिरिक्तं कथयामो वदामः भारतवर्षम् आसमुद्राद् हिमाचलपर्यन्तं भारतभूमिः अधुना सम्प्रति अन्यादृशम् इव पूर्वतः पृथग् इव सम्पन्नम् जातम् अस्ति वर्तते"।

व्याख्यानम् - तदा सर्वे जनाः मौनम् आस्थिताः विस्मिताश्च। स योगिवरः आसनविशेषोपविष्टः प्राणायामादिभिः श्वासनिरोधं कृत्वा, कुण्डलिनीप्रबोधं सम्पाद्य, दश इन्द्रियाणि जित्वा, अनाहतनादतन्तुम् आश्रित्य, आज्ञाचक्रं सम्यक् स्पृष्ट्वा, चन्द्रबिम्बं भित्त्वा, तेजःपुञ्जम् अवज्ञाय, सहस्रारचक्रस्य अन्तः प्रविश्य, परं ब्रह्म अनुभूय, तस्मिन् परब्रह्मणि एव रममाणः अमरः आनन्दमात्रस्वरूपः ध्यानोपविष्टः कालवेगं न ज्ञातवान्। ब्रह्मचारिणाम् आचार्यः नमस्कृत्य एवं कथितवान्।

तस्मिन् समये योगिराजः यथा जनान् दृष्टान् तेषां सज्जनानां अर्धभागमपि इदानीं न दृष्टवान् ब्रह्मचारिगुरुः। इदानीं योगिराजेन प्रवाहाः न दृष्टाः, जनपदानां स्थितिः न पुरा इव, पर्वतानाम् आकारः अपि न पूर्ववत्, विपिनानां गहनता न पूर्वदृष्टा। भारतवर्षम् इदम् इदानीं विक्रमादित्यशासनकालात् भिन्नमेव।

योगपद्धतेः निरवद्या वर्णना ब्रह्मचारिवाचमाश्रित्य कविना सम्पादिता। कुण्डलिनी हि गुणत्रयसमन्विता शिवशक्त्यात्मिका नादशक्तिः। हठयोगेन नादमास्थाय तस्याः प्रोद्बोधः साधनीयः। तादृशे समाधौ स्थितो योगी निष्कामो दीप इव निश्चलः तिष्ठति परमात्मसाक्षात्कारं करोति। तदा योगी बाह्यं घटनाजातं किमपि वेदितुं न शक्नोति। खेचरीमुद्राद्यासनेषु संस्थिताः योगिन समाधिस्था भवन्ति। योगिराजः अपि तथा समाहितः सन् कालगतिं न ज्ञातवान्। विक्रमादित्याद् अनन्तरं कथङ्कारं यवनानां करालकरनिगडनिगडिता भारतमातृका उत्सन्नवेदधर्मा दुर्गतिकवलिता संवृत्ता इति ब्रह्मचारिणामाशयः।

व्याकरणविमर्शः

- बद्धसिद्धासनैः – सिद्धमासनं सिद्धासनमिति कर्मधारयः। बद्धं सिद्धासनं यैस्ते बद्धसिद्धासनाः इति बहुव्रीहिः, तैः बद्धसिद्धासनैः।

- अविगणय्य - नञ्-वि-संघात-पूर्वकाद् गणेर्णिचि ल्यपि अविगणय्य इति रूपम्।
- निरुद्धनिःश्वासैः - निरुद्धाः निश्वासाः यैः ते निरुद्धनिःश्वासाः इति बहुव्रीहिः।
- प्रबोधितकण्डुलिनीकैः - प्रबोधिता कुण्डलिनी यैः ते प्रबोधितकण्डुलिनीकाः, तैः इति बहुव्रीहिः।
- विजितदशेन्द्रियैः - विजितानि दशेन्द्रियाणि यैः ते विजितदशेन्द्रियाः, तैः इति बहुव्रीहिः।
- अनाहतनादतन्तुम् - अनाहतश्चासौ नादश्चेति अनाहतनादः इति कर्मधारयः। तस्य तन्तुमिति षष्ठीतत्पुरुषः।

कोषः

- "कालो दिष्टोऽप्यनेहापि समयः" इत्यमरः।
- "अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः" इत्यमरः।

पाठगतप्रश्नाः – ७

२३. योगिराजः कस्य प्रबोधं सम्पादयति।

२४. योगिराजः किं जयति।

२५. योगिराजः समाधौ कस्य साक्षात्कारं सम्पादयति।

२६. योगिराजः कुत्र रममाणो भवति।

२७. योगिराजदृष्टानि कानि यवनकाले न दृश्यन्ते।

१०.९) साम्प्रतं मूलपाठमवगच्छाम – ८

इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद - "सत्यं न लक्षितो मया समय-वेगः। यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम-समये उदस्थाम्। पुनश्च वैक्रम-समये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति।"

अन्वयार्थः - इदं ब्रह्मचारिगुरवचः आकर्ण्य श्रुत्वा किञ्चित् ईषत् स्मित्वा हसित्वा इव परितः सर्वतः अवलोक्य दृष्ट्वा च योगी मुनिप्रवरः जगाद - "सत्यम् अवितथम्, मया योगिना समयजवः कालवेगः न लक्षितः न ज्ञातः। यौधिष्ठिरे समये युधिष्ठिरस्य राज्यशासनकाले कलितसमाधिः सम्प्राप्तसमाधिः अहं योगिवरः वैक्रम-समये विक्रमादित्यस्य शासनकाले उदस्थां समाधित उत्थितः। पुनः च भूयः च वैक्रमसमये विक्रमकाले समाधिं चित्तवृत्तिनिरोधात्मकम् आकलय्य आलम्ब्य अहं योगी अस्मिन् अत्र दुराचारमये पापमये समये यवनशासनकाले समये उत्थितः जागृतः अस्मि भवामि। अहं योगी पुनः भूयः गत्वा कन्दरं प्रविश्य समाधिं चित्तवृत्तिनिरोधम् एव कलयिष्यामि करिष्यामि, किन्तु परन्तु

तावत् तावत्पर्यन्तं का दशा कीदृशी अवस्था भारतवर्षस्य भारतदेशस्य इति सङ्क्षिप्य समासेन कथ्यताम् उच्यताम्।"

व्याख्यानम् - योगिराजः समाधिमाश्रित्य आसीद् अतः तेन समयवेगः न ज्ञातः। स योगिराजः युधिष्ठिरस्य राज्यशासनकाले समाधिं सम्प्राप्तः। ततः स वैक्रम-समये समाधित उत्थितः। भूयः च विक्रमकाले समाधिम् अवलम्ब्य स योगी दुराचारमये यवनशासनकाले उत्थितः। स योगी पुनः कन्दरं प्रविश्य समाधिमग्न एव भविष्यति, किन्तु स भारतवर्षस्य इदानीन्तनीं स्थितिं ज्ञातुमिच्छति इति योगिराजः ब्रह्मचारिणाम् आचार्यं प्रति कथितवान्।

व्याकरणविमर्शः

- कलितसमाधिः – कलितः समाधिः येन स कलितसमाधिः इति बहुव्रीहिः।
- यौधिष्ठिरे - युधिष्ठिरस्य अयम् इति युधिष्ठिरशब्दाद् अण्प्रत्ययः यौधिष्ठरः, तस्मिन् यौधिष्ठिरे।
- समुत्थितः - सम्पूर्वाद् उत्पूर्वात् स्थाधातोः क्तप्रत्यये सौ रूपम्।
- कलयिष्यामि - कल्धातोः णिचि लृटि मिपि कलयिष्यामीति रूपम्।
- कथ्यताम् - कथ्धातोः कर्मणि लटि प्रथमैकवचने इदं रूपम्।

कोषः

- "समन्ततस्तु परितः सर्वतो विष्वगित्यपि" इत्यमरः।
- "सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति" इत्यमरः।

पाठगतप्रश्नाः – ८

२८. योगिराजः विक्रमशासनात्पूर्वं कस्य शासनकाले समाधिमग्नः।

२९. योगिराजः कदा पुनः समाधिं गतः यवनकाले उत्थितः।

३०. योगिराजः समाधौ प्रवेशात्पूर्वं किं ज्ञातुम् इच्छति।

पाठसारः

योगिराजसपर्यायाः अनन्तरं यदा तेन सह वार्तालापारम्भकाले कुटीरात् यवनत्रस्ताया बालिकायाः सकरुणरोदनमागतम्। तदा का रोदिति कथं रोदिति इत्यादिकं योगिराजः पृष्टवान्। तदा ब्रह्मचारिगुरुः योगिराजाय बालिकावृत्तान्तं निवेदितवान्।

यदा ब्रह्मचारिगुरुः सायन्तनीं सन्ध्योपासनां समाप्य दर्भासनासीनः छात्रपरिवेष्टितः सन् उपदेष्टुम् उपविष्टः तदा ब्रह्मचारिगुरुः अस्फुटवर्णं वेपमाननिःश्वसनं चित्कारमात्रं दीनतायुक्तं दूरात् एकं क्रन्दनं श्रुतवान्।

ततः क्रन्दनहेतुं ज्ञातुं स छात्रान् आदिष्टवान्। छात्रेषु एकः यवनभयव्याकुलाम् असहायां क्रन्दनरताम् एकां कन्यकां क्रोडे स्वीकृत्य समानीतवान्। सा कन्या सन्तापेन दीर्घं निःश्वसती, व्याघ्राक्रान्ता हरिणी इव, अश्रुप्रवाहस्नाता, कम्पमाना आसीत्। बहुधा अन्वेषणेन अपि तस्याः सहचरं सहचरीं वा कोपि शिष्यो न प्राप्तवान्। तां बहुधां क्रन्दनरतां त्रस्तां च दृष्ट्वा सर्वे एव आश्रमवासिनः अश्रुपातं कृतवन्तः।

बहुधा अनुरुद्धा सा बालिका अत्यल्पं दुग्धं पयः पीतवती। पयःपानात्परं ब्रह्मचारिगुरुणा पृष्टा सा उक्तवती यत् सा समीपवर्तिनः एकस्य ग्रामस्य ब्राह्मणस्य कन्यका। कदाचित् मात्रा नदीतटे भ्रमणावसरे एकेन यवनतनयेन सा मातुर्हस्तात् सप्रसभं अपहृत्य वनमार्गम् आनीता। सहसा मार्गे भल्लुकं दृष्ट्वा भीतो यवनः शाल्मलीतरुम् आरूढवान्। तदा बालिका इतस्ततः भ्रमित्वा तपोवनसान्निध्यं सम्प्राप्ता क्रन्दनरता उद्धृता च तपोवनबालकेन इत्येवं बालिकावृत्तान्तं समाप्तम्।

ब्रह्मचारिगुरुवचः श्रुत्वा क्रोधाग्निसमुद्दीप्तः मुनिप्रवरः विक्रमशासने एतादृशः दुराचारः कथमिति पृष्टवान्। तदा ब्रह्मचारिगुरुः योगिराजं प्रति कथितवान् यद् - इदानीं नास्ति विक्रमसमयः। यवनकाले अस्मिन् वेदघोषमुखरिताया भारतभूमेः धर्मीयं परिमण्डलम् अवलुप्तम्। इदानीं तु प्रतिमन्दिरं जयजयनादः, प्रतितीर्थं घण्टानादः, प्रतिमठं वेदघोषः अवलुप्तः। इदानीं यवनैः वेदा स्मृतिशास्त्राणि पुराणानि भाष्याणि च विनष्टानि। एवं बहुधा यवनानां दुराचारः सखेदं वर्णितो ब्रह्मचारिगुरुणा।

वस्तुतस्तु योगिराजः विक्रमादित्यस्य शकविजयकाले समाधिं गतः। अतः न ज्ञायन्ते सप्तदशशतवर्षाणि व्यतीतानि इति। तदा सर्वे जनाः मौनम् आस्थिताः विस्मिताश्च। स योगिवरः आसनविशेषोपविष्टः प्राणायामादिभिः श्वासनिरोधं कृत्वा, कुण्डलिनीप्रबोधं सम्पाद्य, दश इन्द्रियाणि जित्वा, अनाहतनादतन्तुम् आश्रित्य, आज्ञाचक्रं सम्यक् स्पृष्ट्वा, चन्द्रबिम्बं भित्त्वा, तेजःपुञ्जम् अवज्ञाय, सहस्रारचक्रस्य अन्तः प्रविश्य, परं ब्रह्म अनुभूय, तस्मिन् परब्रह्मणि एव रममाणः अमरः आनन्दमात्रस्वरूपः ध्यानोपविष्टः कालवेगं न ज्ञातवान्। ब्रह्मचारिणाम् आचार्यः नमस्कृत्य एवं कथितवान्। भारतवर्षम् इदम् इदानीं विक्रमादित्यशासनकालात् भिन्नमेव।

योगिराजः युधिष्ठिरस्य राज्यशासनकाले समाधिं सम्प्राप्तः। ततः स वैक्रम–समये समाधित उत्थाय पुनः समाधिम् अवलम्ब्य दुराचारमये यवनकाले उत्थितः। स योगी पुनः कन्दरं प्रविश्य समाधेः पूर्वं भारतवर्षस्य वर्तमानकालिकां दशां ज्ञातुमिच्छति इति योगिराजः ब्रह्मचारिणाम् आचार्यं प्रति कथितवान्। एवं समासे पाठसारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. ब्रह्मचारिगुरुमुखेन बालिकाप्राप्तिवृत्तान्तं संक्षेपेण लिखत।

२. 'भगवन्! श्रूयतां यदि कुतूहलम्। ह्यः सम्पादित-सायन्तन-कृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि परितः समासीनेषु छात्रवर्गेषु, धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी- कामिनी-चन्दनबिन्दाविव इन्दौ, कौमुदी-कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुषु इव मौनमाकलयत्सु पतंग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान-निःश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठं क्रन्दनमश्रौषम्। - इति व्याख्यात।

३. अथ 'कन्यके! मा भैषीः, पुत्रि! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः' इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, 'बालिके! कथय क्व ते पितरौ। कथमेतस्मिन्नाश्रमप्रान्ते समायाता। किं ते कष्टम्। कथमरोदीः। किं वाञ्छसि। किं कुर्मः।' इति पृष्टा मुग्धतया अपरिकलित–वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद् – एषा अस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति। – इति व्याख्यात।

४. ततः स उवाच – 'महात्मन्! क्वाधुना विक्रमराज्यम्। वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश–शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजयध्वनिः। क्व सम्प्रति तीर्थे तीर्थे घण्टानादः। क्वाद्यापि मठे मठे वेदघोषः। अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्रष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः' इत्येव श्रूयतेऽवलोक्यते च परितः। – इति व्याख्यात।

५. योगिराजस्य समाध्याचरणं वर्णयत।

६. इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद – "सत्यं न लक्षितो मया समय–वेगः। यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम–समये उदस्थाम्। पुनश्च वैक्रम–समये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति।" – इति व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. बालिकां सान्त्वयितुं श्यामवटुमादिदेश ब्रह्मचारिगुरुः।

२. यामिनीरूपायाः कामिन्याः कपालबिन्दुरिव समुदितः चन्द्रः।

३. गगनं ज्योत्स्नाव्याजेन सुधाधारामिव वर्षति।

४. ब्रह्मचारिगुरुः अस्फुटवर्णं वेपमाननिःश्वसनं चित्कारमात्रं दीनतायुक्तं कन्दनम् अश्रौषत्।

५. कम्पमानो निःश्वासो यस्मिन् तत् कम्पमाननिःश्वासमिति बहुव्रीहिः।

उत्तराणि-२

६. भयभीता, वेगसहितम् अत्युष्णं पृथुलं निःश्वसती, हरिणी इव शार्दूलाक्रान्ता, नयनवाष्पप्रवाहनैः स्नाता, सकम्पा बालिका छात्रेण अङ्के समानीता।

७. कन्दन्तीं बालिकां दृष्ट्वा नयनवाष्पाणि निरोद्धुम् आश्रमवासिनः असमर्थाः।

८. कुन्दानां कोरकाणि कुन्दकोरकाणि इति षष्ठीतत्पुरुषः। कुन्दकोरकाणाम् अग्राणि कुन्दकोरकाग्राणि इति षष्ठीतत्पुरुषः। कुन्दकोरकाग्राणि इव दन्ताः यस्याः सा कुन्दकोरकाग्रदती, ताम् इति बहुव्रीहिः।

उत्तराणि-३

९. बहुधा सम्बोधिता बालिका किञ्चित् पयः पीतवती।

१०. सा बाला समीपस्थे ग्रामे वासिनः ब्राह्मणस्य एकस्य कन्यका।

११. वाचः पाटवं वाक्पाटवम् इति षष्ठीतत्पुरुषः। न परिकलितम् अपरिकलितम् इति नञ्समासः। अपरिकलितं वाक्पाटवं यस्याः सा अपरिकलितवाक्पाटवा इति बहुव्रीहिः।

१२. वचनानां विन्यासः वचनविन्यासः इति षष्ठीतत्पुरुषः। विशिथिलः वचनविन्यासः यस्याः सा विशिथिलवचनविन्यासा इति बहुव्रीहिः।

उत्तराणि-४

१३. कदाचित् मात्रा सह ब्राह्मणकन्यका नदीतटे भ्रमति स्म तदा यवनतनयः मातुर्हस्तात् सप्रसभं ताम् अपहृतवान्।

१४. यवनतनयः छुरिकां दर्शयित्वा बालिकाक्रन्दनं शमयितुम् इष्टवान्।

१५. यवनतनयः भल्लूकं दृष्ट्वा भयात् शल्मलीतरुम् आरूढवान्।

१६. भल्लूकः कालकम्बल आसीत्।

उत्तराणि-५

१७. वीरविक्रमस्य भारतवर्षं त्यक्त्वा गतस्य सप्तदशशतवर्षाणि गतानि।

१८. यवनकाले वेदाः विच्छिद्य मार्गेषु विक्षिप्यन्ते।

१९. यवनकाले मन्दिराणि भिद्यन्ते तुलसीवनानि छिद्यन्ते च।

२०. यवनकाले स्मृतिशास्त्राणि उत्तोल्य अग्निषु दह्यन्ते, पुराणानि चूर्णीकृत्य जलेषु प्रक्षिप्यन्ते भाष्याणि भ्रंशयित्वा भर्जनपात्रेषु भर्ज्यन्ते च।

उत्तराणि–६

२१. शकान् पराजित्य जयघोषेण राजधानीमायातः वीरविक्रमः।

२२. विक्रमादित्यस्य श्रीवत्सः इति अपरं नाम।

उत्तराणि-७

२३. योगिराजः कुण्डलिन्याः प्रबोधं सम्पादयति।

२४. योगिराजः दशेन्द्रियाणि जयति।

२५. योगिराजः समाधौ परमब्रह्मणः साक्षात्कारं सम्पादयति।

२६. योगिराजः परमे ब्रह्मणि रममाणो भवति।

२७. योगिराजे दृष्टाः सत्पुरुषाः, नदीनां धाराः, नगराणां पुरातनी स्थितिः, गिरीणां पूर्ववद् आकारः, अरण्यानां गहनता च यवनकाले न दृश्यन्ते।

उत्तराणि–८

२८. योगिराजः विक्रमशासनात्पूर्वं कस्य युधिष्ठिरस्य शासनकाले समाधिमग्नः।

२९. योगिराजः विक्रमशासनकाले पुनः समाधिं गतः यवनकाले उत्थितः।

३०. योगिराजः समाधौ प्रवेशात्पूर्वं भारतवर्षस्य वर्तमानदशां ज्ञातुम् इच्छति।

॥ इति दशमः पाठः ॥

११

348sk11

शिवराजविजयः - यवनदुराचारः

प्रस्तावना

योगिराजः ब्रह्मचारिमुखाद् यवनदुराचारं शृणोति इति अस्मिन् पाठे विषयः। तत्रादौ कालकलापः, महामदस्य भारताक्रमणम्, महामदस्य सोमतीर्थध्वंसः, महामदराज्यध्वंसः, यवनराज्यारम्भः, दक्षिणप्रदेशे सनातनधर्मरक्षकः शिववीरः इत्येवं क्रमशः विषया अस्मिन् पाठे वर्णिताः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- यवनदुराचारं जानीयात्।
- कालकलापं जानीयात्।
- महामदस्य भारताक्रमणं जानीयात्।
- महामदस्य सोममन्दिराक्रमणं जानीयात्।
- महामदराज्यध्वंसं जानीयात्।
- भारते यवनराज्यारम्भं जानीयात्।
- दक्षिणदेशे शिववीरं जानीयात्।
- पाठ्यांशस्थानां पदानां व्याकरणविमर्शं पर्यायशब्दान् च जानीयात्।

११.१) सम्पूर्णः मूलपाठः

तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थ-प्रसादसम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो बाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभत -

'भगवन्! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाऽभिमन्यामहे'।

उपक्रममुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्,भज्यमानं च स्वरं

सकलपापमयः सकलोपद्रवमयश्चायं वृत्तान्तः' इति, अतएव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्जलापयिषामि, न वा चिखेदयिषामि इति च विचिन्त्य-

'मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः। स एव कदाचित् पयःपूर-पूरितान्यकूपारतलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यानतडागगोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यताम् कदाचिदस्मिन्नेव भारतवर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्षवाताऽऽतप-हिमसहानि तपासिं अतापिषत। सम्प्रति म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्य्यन्ते, स्मृतयः समृद्यन्ते; मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराजवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्' इति कथयित्वा तूष्णीमवतस्थे।

अथ स मुनिः - "धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण श्रिया सौख्येन धर्मेण विद्यया च सममेव परलोकं सनाथितवति वीरविक्रमादित्ये, शनैः शनैः पारम्परिक-विरोध-विशिथिलीकृतस्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, "इन्द्रस्त्वं वरुणस्त्वं कुवेरस्त्वम्" इति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजिनीस्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।

एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरप्रदेशचूडायितं सोमनाथ-तीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदुर्य-पद्मराग-माणिक्य-मुक्ताफलादिजटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः, भित्तीः वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय शतद्वयमणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचिक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य सङ्गृह्य महादेवमूर्तावपि गदामुदतूतुलत्।

अथ "वीर, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चतममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणोऽन्यदपि सुवर्णकोटिद्वयम्, मैनां भगवन्मूर्तिं स्प्राक्षीः" - इति साम्रेडं कथयत्सु रुदत्सु प्रणमत्सु च पूजकवर्गेषु नाहं मूर्तिर्विक्रीणामि, किन्तु भिनद्मि इति सङ्गर्ज्य जनताया हाहाकार-कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि

च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव।

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रञ्च पारस्परिकविरोधज्वरग्रस्तं विस्मृतराजनीतिं भारतवर्षदुर्भाग्यायमाणमाकल-य्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः रिङ्क्तरङ्गभङ्गा गङ्गाऽपि शोणितशोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि।

तमारभ्याद्यावधि राक्षसा एव राजमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं गृहीतविग्रह इव चाधर्मः आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिलीवल्लभतां कलङ्कयति। अस्यैव पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु बङ्गेषु कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।

दक्षिणदेशो हि पर्वतबहुलोऽस्ति अरण्यानीसङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणां, भूषणं भटानां, निधिर्नीतीनाम् कुलभवनं कौशलानां पारावारः परमोत्साहानां कश्चन प्रातःस्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन्पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धवैरम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनां, सतां त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवऽऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकम् विनिवेदयामो योगबलावगतसकलगोप्यतमवृत्तान्तेषु योगिराजेषु इति कथयित्वा विरराम।

११.२) साम्प्रतं मूलपाठमवच्छाम - १६

तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थ-प्रसादसम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो

बाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभत -

'भगवन्! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाऽभिमन्यामहे'।

अन्वयार्थः -

तत् योगिराजवचनं संश्रुत्य निशम्य भारतवर्षीय- दशासंस्मरणसञ्जातशोकः भारतदेशीयानां स्थितिचिन्तनमात्रेण समुत्पन्ना करुणा यस्य स हृदयस्थप्रसारसम्भार्रोरणश्रमेण मानसप्रसन्नतासमूहनिःसारणपरिश्रमेण इव यथा अतिमन्थरेण नितान्तमन्देन स्वरेण ध्वनिना "मा स्म धर्मध्वंसोद्घोषणैः मा स्म श्रुतिप्रतिपाद्यधर्मोत्पाटनवचनैः योगिराजस्य महामुनेः धैर्यं वीरत्वम् अवधीय अवनमय" इति अनेन प्रकारेण कण्ठं गलविवरं रुन्धतः पिदधतः वाष्पान् नयनाश्रुनिवहान् अविगणय्य समुपेक्ष्य नेत्रे लोचने प्रमृज्य स्वच्छे विधाय उष्णं निदाघयुतं निःश्वस्य निःश्वासं स्वीकृत्य कातराभ्याम् इव करुणासहिताभ्याम् इव नयनाभ्यां नेत्राभ्यां परितः समन्ताद् अवलोक्य सन्दृश्य ब्रह्मचारिगुरुः वर्णिनाम् आचार्यः प्रवक्तुं कथयितुम् आरभत प्रारभत -

भगवन् महात्मन् दम्भोलिघटिता वज्रविनिर्मिता इयम् एषा सन्निकृष्टा रसना जिह्वा या दारुणदानवोदन्तोदीरणैः भीषणदैत्यवार्तासमुच्चारणैः न दीर्यते न भिद्यते, लोहसारमयं अयोमयसदृशम् अतिकठिनं हृदयं स्वान्तं यत् यावनान् यवनैः म्लेच्छैः विहितान् परस्सहस्रान् अनेकान् दुराचारान् अत्याचारान् संस्मृत्य स्मारं स्मारं शतधा खण्डेषु न भिद्यते विभज्यते, न च भस्मसात् भवति न च अग्निसाद् भवति। अस्मान् धिक् अत्राश्रमे निवसतः प्रति धिक्कारः, ये वयम् अद्यापि अस्मिन् दुराचारमये कालेऽपि जीवामः जीवनं धारयामः, श्वसिमः श्वासक्रियां कुर्मः, विचरामः सञ्चरणं कुर्मः, आत्मनः स्वान् अस्मान् आर्यवंशीयान् वैदिककुलोद्भवान् च अभिमन्यामहे स्वीकुर्मः।

व्याख्यानम् -

योगिराजो यदा भारतवर्षस्य इदानीन्तनस्थितिं ज्ञातुं ब्रह्मचारिगुरुं पृष्टवान्। तदा ब्रह्मचारिगुरोः का अवस्था अत्र सा वर्णिता। स हि भारतवर्षस्य यवनकृतायाः अवस्थाया वर्णनावसरे अत्यन्तं दुःखमनुभूतवान्। भारतवर्षस्य अवस्थावर्णनकाले ब्रह्मचारिगुरोः हृदये भारतीयानां दशास्मरणेन करुणा उदिता। तस्य मते तु योगिराजस्यापि इदं वर्णनं धैर्यस्य च्युतये कारणं भविष्यतीति। तस्य भारतवर्षवर्णनकाले कण्ठं नयनाश्रवः अवरुद्धवन्तः। तथापि स कथञ्चित् तान् नयनवाष्पान् अविगणय्य अश्रुसिक्तस्य नेत्रद्वयस्य मार्जनं विधाय दीर्घश्वासं स्वीकृतवान्। स सकरुणसदृशाभ्यां नयनाभ्यां सर्वां दिशं दृष्ट्वा ब्रह्मचारिगुरुः इत्येवं कथयितुम् आरब्धवान्।

ब्रह्मचारिगुरुः अत्र सनातनधर्मावलम्बिनाम् आर्याणां विषये खेदं प्रस्तुतवान्। स कथितवान यद् वज्रनिर्मिता हि तस्य रसना। अन्यथा तु भारतीयेषु दुष्टानां यवनानाम् अत्याचारस्य वर्णनेन सा भिन्ना भवेत्। एवमेव आर्याणां हृदयमपि वज्रसारम्। अतः एव यवनानाम् अत्याचारं स्मृत्वा अपि तद्

अनेकप्रकारेण न भिन्नम्। न हि तद् हृदयम् अग्निना दग्धम्। एवमेव आश्रमवासिनः ते निन्द्याः, यतो हि अस्मिन् यवनात्याचारसमये अपि ते आर्यवंशीयाः वयम् इति साभिमानं जीवनधारणं, श्वासधारणं सञ्चरणं च कुर्वन्ति। एवं यवनानां दुराचारप्रसङ्ग उक्तः।

व्याकरणविमर्शः

- संश्रुत्य - सम्पूर्वात् श्रृणोतेः "समानकर्तृकयोः पूर्वकाले" इति क्त्वाप्रत्यये ततः "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति ल्यपि रूपम्।
- भारतवर्षीयदशासंस्मरणसञ्जातशोकः - भारतवर्षस्येति विग्रहे भारतवर्षशब्दात् छप्रत्यये छस्य "आयनेयीनीनिययः फढखछघां प्रत्ययादीनाम्" इति ईयादेशे भारतवर्षीयेति सिध्यति। भारतवर्षीया चासौ दशा चेति भारतवर्षीयदशा इति कर्मधारयसमासः। भारतवर्षीयदशायाः संस्मरणं भारतवर्षीयदशासंस्मरणमिति षष्ठीतत्पुरुषः। भारतवर्षीयदशासंस्मरणेन सञ्जातः भारतवर्षीयदशासंस्मरणसञ्जातः इति तृतीयातत्पुरुषः। भारतवर्षीयदशासंस्मरणसञ्जातः शोको यस्य स भारतवर्षीयदशासंस्मरणसञ्जातशोकः इति बहुव्रीहिसमासः।
- हृदयस्थप्रसादसम्भारोद्गिरणश्रमेण - हृदये तिष्ठतीति विग्रहे हृदयोपपदे स्थाधातोः कप्रत्यये हृदयस्थशब्दो निष्पन्नः। हृदयस्थश्चासौ प्रसादसम्भारश्चेति हृदयस्थप्रसादसम्भारः इति कर्मधारयसमासः। तस्य उद्गिरणं हृदयस्थप्रसाद-सम्भारोद्गिरणमिति षष्ठीतत्पुरुषः। तस्मिन् श्रमः हृदयस्थप्रसाद-सम्भारोद्गिरणश्रमः, तेन हृदयस्थप्रसादसम्भारोद्गिरणश्रमेण इति सप्तमीतत्पुरुषः।
- अवधीरय - अवपूर्वाद् धृधातोर्लोटि मध्यमपुरुषैकवचने सिपि अवधीरय इति रूपम्।
- रुन्धतः - रुध्धातोः शतृप्रत्यये पुंसि शसि रूपम्।
- अविगणय्य - विपूर्वात् गण्धातोर्णिचि ल्यपि विगणय्य इति रूपम्। न विगणय्य अविगणय्य इति।
- प्रमृज्य - प्रपूर्वान्मृजेः क्त्वो ल्यपि प्रमृज्य इति रूपम्।
- अवलोक्य - अवपूर्वात् लोकिधातोः क्त्वो ल्यपि अवलोक्य।
- प्रवक्तुम् - प्रपूर्वाद् वक्तेः तुमुनि प्रवक्तुम् इति रूपम्।
- आरभत - आङ्पूर्वाद् रभतेः लङि प्रथमपुरुषैकवचने रूपम्।
- दम्भोलिघटिता – दम्भोलिना घटिता दम्भोलिघटिता इति तृतीयातत्पुरुषः।
- दारुणदानवोदन्तोदीरणैः - दारुणाः चामी दानवाश्च दारुणदानवाः इति कर्मधारयसमासः। दारुणदानवानाम् उदन्तः दारुणदानवोदन्तः इति षष्ठीतत्पुरुषः। दारुणदानवोदन्तस्य उदीरणानि, तैः दारुणदानवदन्तोदीरणैः इति षष्ठीतत्पुरुषः।
- भस्मसात् - भस्मशब्दाद् 'विभाषा साति कात्स्न्र्ये' इति सूत्रेण सातिप्रत्ययेन भस्मासात् इति निष्पन्नम्।
- धिगस्मान् इत्यत्र धिक्शब्दयोगा द्वितीया-
  उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।

द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। इति वार्तिकेन।

कोषः

- "पुरोगमः पुरोगामी मन्दगामी तु मन्थरः" इत्यमरः।
- "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः।
- "रसज्ञा रसना जिह्वा" इत्यमरः।
- "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्" इत्यमरः।

पाठगतप्रश्नाः

१. आर्याणां रसना कीदृशी?

२. आर्याणां हृदयं कीदृशम्?

३. दम्भोलिघटिता इत्यत्र समासं दर्शयत।

११.३) साम्प्रतं मूलपाठमवच्छाम - १७

उपक्रममुपाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानं च स्वरम् अवागच्छत् 'सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः सकलोपद्रवमयश्चायं वृत्तान्तः' इति, 'अतएव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्जलापयिषामि, न वा चिखेदयिषामि' इति च विचिन्त्य-

'मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः। स एव कदाचित् पयःपूर-पूरितान्यकूपारतलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यानतडागगोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यताम् कदाचिदस्मिन्नेव भारतवर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्षवाताऽऽतपहिमसहानि तपासिं अतापिषत। सम्प्रति म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्य्यन्ते, स्मृतयः समृद्यन्ते; मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराजवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्' इति कथयित्वा तूष्णीमवतस्थे।

अन्वयार्थः -

उपक्रमं भारतदुर्दशाया उपोद्घातम् उपाकर्ण्य श्रुत्वा अवलोक्य दृष्ट्वा च मुनेः ब्रह्मचारिणाम् आचार्यस्य विमनायमानम् उन्मनायमानं हरिद्राद्रवक्षालितम् इव महारजनरसधौतम् इव वदनं मुखम्, निपतद्वारिबिन्दुनी प्रवच्यवन्नयनजले, अञ्चितरोमकञ्चुकं सरोमाञ्चं शरीरं वपुः, कम्पमानं वेपमानम् अधरम्

ओष्ठद्वयम्, भज्यमानं त्रुट्यमानं च स्वरं शब्दम् अवागच्छत् ज्ञातवान्। 'सकलानर्घमयः अखिलपापमयः, सकलवञ्चनामयः अशेषवञ्चनासमन्वितः, सकलपापमयः समस्तपातकमयः सकलोपद्रवमयः सम्पूर्णोपसर्गमयः च अयम् एष वृत्तान्तः कथानकः' इति, 'अत एव अस्माद् हेतोः तत्स्मरणमात्रेण अपि तादृशावद्यस्मृतिमात्रेण अपि खिद्यते क्लेशम् अनुभवति, एष ब्रह्मचारिगुरुः हृदये चेतसि तत् तस्माद् अहं योगिराजः एनं महामुनिं निरर्थं निष्प्रयोजनं न नहि जिग्लापयिषामि ग्लापयितुं वाञ्छामि, न वा चिखेदयिषामि खेदयितुम् इच्छामि' इति च अनेन प्रकारेण विचिन्त्य चिन्तयित्वा-

मुने! ब्रह्मचारिगुरो! विलक्षणः विवेचनाक्षमः अयम् एष भगवान् निखिलैश्वर्यसम्पन्नः सकलकलाकलापकलनः अशेषकलासमूहनिर्माता सकलकालनः समस्तस्य विक्षयकारी करालः भयङ्करः कालः महाकालः स एव महाकाल एव कदादित् कंस्मिंश्चित् समये पयःपूरपूरितानि वारिस्रोतोभरितानि अकूपारतलानि अब्धितलानि मरूकरोति मरुस्थलं विदधाति, सिंह-व्याघ्र-भल्लुक-गण्डक-पेरु-शश-सहस्रव्याप्तानि केसरि-शार्दूल-ऋक्ष-खड्गि-जम्बुक-हरिणसहस्र-समावृतानि अरण्यानि वनानि जनपदीकरोति नगरीकरोति, मन्दिर-प्रासाद-हर्म्य-शृङ्गाटकचत्वरोद्यानतडागगोष्ठमयानि देवसदन-राजसदन-धनिकावास-चतुष्पथाङ्गण-गोस्थानक-भूयिष्ठानि नगराणि जनपदानि च काननीकरोति वनीकरोति। निरीक्ष्यताम् अवलोक्यतां कदाचित् कंस्मिंश्चित् समये अस्मिन् एव एतस्मिन् एव भारतवर्षे भारतदेशे यायजूकैः यागकरणशीलैः राजसूयादियज्ञाः राजसूयप्रभृतयः विविधयागाः व्ययाजषित विहिताः, कदाचित् कंस्मिंश्चित् समये इह एव अस्मिन् एव भारतवर्षे भारतदेशे वर्षवातातपहिमसहानि वर्षाकालवनग्रीष्मशीतसहानि तपांसि कृच्छ्रादीनि कर्माणि च अतापिषत तप्तानि, सम्प्रति तु अस्मिन् काले तु म्लेच्छैः यवनैः गावः धेनवः हन्यन्ते प्राणैः वियुज्यन्ते, वेदाः श्रुतयः विदीर्यन्ते नाश्यन्ते, स्मृतयः मन्वादिप्रणीतानि धर्मशास्त्राणि समृद्यन्ते मर्दितानि क्रियन्ते, मन्दिराणि देवसदनानि मन्दुरीक्रियन्ते वाजिशालीक्रियन्ते, सत्यः पतिव्रता रमण्यः पात्यन्ते पातिव्रत्यात् वियुज्यन्ते, सन्तः च सत्पुरुषाः च सन्ताप्यन्ते सम्पीड्यन्ते, सर्वम् एतत् अखिलम् इदं माहात्म्यं महत्त्वं तस्य एव पूर्वोक्तस्य एव महाकालस्य इति इत्यस्मात् हेतोः कथं केन कारणेन धीरधौरेयः अपि धीरधुरन्धरः अपि धैर्यं धीरत्वं विधुरयसि परित्यजसि, शान्तिम् आकलय्य संश्रित्य अतिसङ्क्षेपेण अतीव समासेन कथय वद यवनराज्यवृत्तान्तं यवनशास्तिकथानकम्, न नहि जाने अवगच्छामि किमिति कथम् अनावश्यकम् अपि प्रयोजनहीनम् अपि शुश्रूषते श्रोतुम् इच्छति मे मम हृदयं स्वान्तम् इति एवम्प्रकारेण कथयित्वा वर्णयित्वा तूष्णीं मौनम् अवतस्थे जातः।

व्याख्यानम् -

उपक्रमं श्रुत्वा अवलोक्य ब्रह्मचारिणाम् आचार्यस्य रक्तं वदनम्, अश्रुसहिते नेत्रे, सरोमाञ्चं शरीरम्, वेपमानौ अधरौ अवरुध्यमानं च कण्ठं दृष्ट्वा च महामुनिः यवनात्याचारवृत्तान्तः अतीव दुःखदायकः इति ज्ञातवान्। ततः स ब्रह्मचारिगुरुं प्रति उक्तवान् वस्तुतो हि कालगतिः अननुमेया। कालचक्रेणैव अखिलं जगत् भवति नियन्त्रितम्। सर्वं हि वस्तुजातं कालाधीनम्। कालस्य द्विविधा मूर्तिः सर्जनात्मिका ध्वंसात्मिका च। तथाहि स कालः पृथिवीमिमां रम्यां विदधाति तथैव स एव निर्दयं सर्वं धूलिसात् करोति। स निमेषेण अरण्यानि जनपदीकरोति। अपरतो नगराणि काननीकरोति। प्राक्

कालप्रसादेन भारतवर्षे श्रुतिस्मृतिपुराणादीनाम् अनुशीलनपरम्परा आसीत्। सम्प्रति तु कालवशादेव तत्सर्वं प्रनष्टम्। तटप्रपात इव कालकृतिर्भवति भङ्गुरा। अत एव कालवशेन एव भवति सनातनधर्मस्य पीडनम् इति विविच्य धैर्यधारणं कर्तव्यम्। यतो हि चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च इति महामुनेराशयः।

व्याकरणविमर्शः

- विमनायमानम् – विगतं मनः यस्य स विमनाः इति बहुव्रीहिः। विमनाः इव आचरतीति विमनःशब्दात् क्यचि शानचि पुंसि अमि रूपम्।
- हरिद्राद्रवक्षालितम् - हरिद्रायाः द्रवः हरिद्रादवः इति षष्ठीतत्पुरुषः। तेन क्षालितं हरिद्राद्रवक्षालितम् इति तृतीयातत्पुरुषः।
- निपतद्वारिबिन्दूनी - निपतन्तो वारिबिन्दवो याभ्यां ते निपतद्वारि-बिन्दूनी इति बहुव्रीहिः। वारिणां बिन्दवः वारिबिन्दवः इति षष्ठीतत्पुरुषः।
- अञ्चितरोमकञ्चुकम् - रोमाणां कञ्चुकाः रोमकञ्चुकाः इति षष्ठीतत्पुरुषः। अञ्चिताः रोमकञ्चुकाः यत्र तदिति बहुव्रीहिः।
- जिग्लापयिषामि - ग्लै हर्षक्षये इति धातोः पुकि णिचि सनि लटि मिपि रूपम्।
- चिखेदिषामि - खिदेर्णिचि सनि मिपि रूपम्।
- सकलकलाकलापकलनः - सकला या कलाः सकलकलाः इति कर्मधारयः। सकलकलानां कलापः सकलकलाकलापः इति षष्ठीतत्पुरुषः। तस्य कलनः सकलकलाकलापकलनः इति षष्ठीतत्पुरुषः।
- सकलकलनः - सकलानां कलनः इति षष्ठीतत्पुरुषः।
- पयःपूरपूरितानि - पयसां पूरः पयःपूरः इति षष्ठीतत्पुरुषः। तेन पूरितानि पयःपूरितानि इति तृतीयातत्पुरुषः।
- काननीकरोति - अकाननिा काननानि करोति इति काननशब्दाद् अभूततद्भावे च्वौ, कृधातोर्लटि तिपि इति रूपम्।

कोषः

- "कलापो भूषणे बर्हे तूणीरे संहतावपि" इत्यमरः।
- "कालो मृत्यौ महाकाले" इत्यमरः।
- "शृङ्गाटकचतुष्पथे" इत्यमरः।
- "इज्याशीलो यायजूको यज्वा तु विधिगेष्टवान्" इत्यमरः।

पाठगतप्रश्नाः

४. यवनदुराचारवृत्तान्तः कीदृशः?

५. कीदृशः कालः?

६. कीदृशानि अरण्यानि जनपदीकरोति कालः।

७. कीदृशानि नगराणि काननीकरोति कालः।

११.४) साम्प्रतं मूलपाठमवच्छाम - १८

अथ स मुनिः - "धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण शान्त्या श्रिया सौख्येन धर्मेण विद्यया च सममेव परलोकं सनाथितवति तत्रभवति वीरविक्रमादित्ये, शनैः शनैः पारम्परिक-विरोध-विशिथिलीकृत-स्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, "इन्द्रस्त्वं वरुणस्त्वं कुवेरस्त्वम्" इति वर्णनामात्रसक्तेषु बुधजनेषु कश्चन गजिनीस्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, परश्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।

अन्वयार्थः -

अथ योगिराजवचनश्रवणाद् अनन्तरं स प्रसिद्धः मुनिः ब्रह्मचारिगुरुः अवदद् भगवन् योगिराट्, धैर्येण धीरतया प्रसादेन प्रसन्नतया प्रतापेन प्रभावेण तेजसा कान्त्या वीर्येण सामर्थ्येन विक्रमेण पराक्रमेण शान्त्या शमेन श्रिया लक्ष्म्या सौख्येन सुखेन धर्मेण श्रुतिपविहितेन कर्मणा विद्यया ज्ञानेन च पुनः समम् एव सार्धम् एव परलोकं स्वर्लोकं सनाथितवति प्रस्थिते तत्रभवति पूज्ये वीरविक्रमादित्ये एतन्नामकोज्जयिनीशासके, शनैः शनैः मन्दं मन्दं पारस्परिकविरोधविशिथिल-स्नेहबन्धेषु अन्योऽन्यवैरश्लथीकृतप्रेमसम्बन्धेषु राजसु नृपेषु, भामिनी-भूजङ्ग-भूरिभावप्रभावपराभववैभवेषु कामिनीभ्रूविलास-बहुलीला-प्रभाव-पराजयधनेषु भटेषु वीरेषु, स्वार्थचिन्तासन्तानवितानैकतानेषु मलिन-स्वाभ्युदय-चिन्तामात्र-परायणेषु अमात्यवर्गेषु सचिवसमूहेषु प्रशंसामात्रप्रियेषु निजकीर्तिश्रुतिरसिकेषु प्रभुषु शासकेषु, "इन्द्रस्त्वं पुरन्दरस्त्वं वरुणस्त्वं यादसां पतिस्त्वं कुवेरस्त्वं धनाधिपतिस्त्वमि"ति एवम्प्रकारेण वर्णनामात्रसक्तेषु प्रशंसामात्रतत्परेषु बुधजनेषु सुधीसमुदायेषु, कश्चन कोऽपि गजिनीस्थानवासी गजिनीति प्रसिद्धजनपदकृतवसतिः महामदः महमुद इत्याख्यः यवनः म्लेच्छः ससेनः चमूभिः सहितः प्राविशत् प्रवेशनम् अकरोत् भारते वर्षे भारताख्ये देशे। स महमूदनामकः च पुनः प्रजाः जनताः विलुण्ठ्य अपहृत्य मन्दिराणि देवसदनानि निपात्य पातयित्वा प्रतिमाः विग्रहान् विभिद्य विदीर्य परःशतान् शताधिकान् जनान् प्रजाः दासीकृत्य दासान् विधाय शतशः अनेकेषु उष्ट्रेषु क्रमेलकेषु रत्नानि मणिमाणिक्यादीनि आरोप्य संस्थाप्य स्वदेशं गजनीति निजस्थानम् अनैषीत् स्वीकृतवान्।

व्याख्यानम् -

अत्र महामदस्य भारताक्रमणं सोमनाथमन्दिरस्य लुण्ठनं च वर्णितम्। यदा धैर्यं प्रसन्नता प्रतापः तेजः, विक्रमः धर्मः इत्यादिगुणानाम् आश्रयः विक्रमादित्यः स्वर्गलोकं गतवान् तदा कश्चित् गजिनीनामकस्य स्थानस्य राजा महामदः सैन्यानि स्वीकृत्य भारतवर्षम् आगतवान्। स भारतीयान् मारयित्वा मन्दिराणि प्रतिमाः च नाशयित्वा, बहून् जनान् स्वस्य दासरूपेण अङ्गीकृत्य बहूनि रत्नानि च बलात् स्वीकृत्य स्वस्य राजधानीं गजिनीस्थानं प्रति अगच्छत्।

व्याकरणविमर्शः

- सनाथितवति - नाथेन सह वर्तते सनाथ इति सहार्थबहुव्रीहिः। सनाथं करोति सनाथयति। ततः ण्यन्तात् सनाथेः क्तवतुप्रत्यये ततः सप्तम्यां ङौ सनाथितवति इति रूपम्।
- पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु - पारस्परिको विरोधः कर्मधारयसमासः। तेन विशिथिलीकृतः इति तृतीयातत्पुरुषः। स्नेहस्य बन्धनमिति षष्ठीतत्पुरुषः। पारस्परिकविरोधविशिथिलीकृतं स्नेहबन्धनं येषां ते पारस्परिकविरोधविशिथीलकृतस्नेहबन्धनाः इति बहुव्रीहिः, तेषु।
- स्वार्थचिन्तासन्तानवितानैकतानेषु - स्वार्थानां चिन्ताः इति षष्ठीतत्पुरुषः। स्वार्थचिन्तानां सन्तानम् इति षष्ठीतत्पुरुषः। तस्य वितानम् इति षष्ठीतत्पुरुषः। तस्मिन् एकतानाः सप्तमीतत्पुरुषः, तेषु।
- प्रशंसामात्रप्रियेषु - प्रशंसा एव प्रशंसामात्रम् इति नित्यसमासः। प्रशंसामात्रं प्रियं येषां ते प्रशंसामात्रप्रियाः इति बहुव्रीहिः, तेषु।
- वर्णनामात्रसक्तेषु - वर्णना एव वर्णनामात्रम् इति नित्यसमासः। तत्र सक्तेषु वर्णनामात्रसक्तेषु इति सप्तमीतत्पुरुषः।
- गजिनीस्थाननिवासी - गजिनीनामकं स्थानं गजिनीस्थानमिति शाकपार्थिवादिवत्समासः। तत्र निवासी इति सप्तमीतत्पुरुषः।

कोषः

- "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरः।

पाठगतप्रश्नाः

८. विक्रमादित्यः केन सह परलोकं गतः?

९. गजनीस्थाननिवासी इत्यत्र कः समासः?

१०. राज्ञां परस्परवैरं यदा प्रवृद्धं तदा कः भारतवर्षम् आक्रान्तवान्।

११. भारतवर्षाक्रमणात्परं महामदः किं कृतवान्।

११.५) साम्प्रतं मूलपाठमवच्छाम - १९

एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरप्रदेशचूडायितं सोमनाथतीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदुर्य-पद्मराग-माणिक्य-मुक्ताफलादिजटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः, भित्तीः वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय शतद्वयमणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचिक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य सङ्गृह्य महादेवमूर्तावपि गदामुदतूतुलत्।

अन्वयार्थः -

एवम् अनेन प्रकारेण स महामदः ज्ञातास्वादः सम्प्राप्तविलुण्ठनरसः पौनःपुन्येन भूयो भूयः द्वादशवारम् आगत्य समेत्य भारतं भारतवर्षम् अलुलुण्ठत् लुण्ठितवान्। तस्मिन्नेव लुण्ठनविषयके एव स्वसंरम्भे निजोद्योगे एकदा एकस्मिन् समये गुर्जरदेशचूडायितं गुर्जर(गुजराट्)-प्रदेशस्य भूषणभूतं सोमनाथतीर्थम् अपि सोमनाथेश्वरमूर्तिम् अपि धूलीचकार नाशितवान्। अद्य तु सम्प्रति तु तत्तीर्थस्य सोमनाथतीर्थस्य नाम अपि अभिधानम् अपि केनापि केनचिद् अपि जनेन न नहि स्मर्यते स्मृतिपथम् आनीयते। परं किन्तु तत्समये तदानीन्तने काले लोकोत्तरं लोकश्रेष्ठं तस्य सोमनाथमन्दिरस्य वैभवं सम्पत् आसीत् अवर्तत। तत्र सोमनाथदेवमन्दिरे हि महार्हवैदूर्यपद्मरागमाणिक्यमुक्ताफलादिजटितानि महार्हाणि बहुमूल्यानि वैदुर्यपद्मरागमाणिक्यमुक्ताफलादीनि वैदूर्यलोहिकतमणिमौक्तिकादीनि तैः जटितानि कपाटानि द्वाराणि, स्तम्भान् स्थूणाः, गृहावग्रहणीः आवासानां देहलीः, भित्तीः कुड्यानि, वलभीः गोपानसीः, विटङ्कानि च कपोतपालिकाः च निर्मथ्य मथित्वा रत्ननिचयं माणिक्यसमूहम् आदाय संगृह्य शतद्वयमणसुवर्णशृङ्खलावलम्बिनीं द्विशतमणहेमेन निर्मितां शृङ्खलावलम्बिनीं चञ्चच्चाकचिक्यचकितीकृतावलोचक-लोचननिचयां चञ्चच्चाकचक्येन सुवर्णस्य उज्ज्वलवर्णेन चकितीकृतः विस्मयीकृतः अवलोचकलोचनानां समूहः द्रष्टुः नेत्रसमूहः यया ताम् उज्ज्वलसुवर्णवर्णशोभितां महाघण्टां बृहद्घण्टां प्रसह्य बलात् सङ्गृह्य स्वीकृत्य महादेवमूर्तौ अपि महादेवस्य पार्वतीप्राणनाथस्य मूर्तौ विग्रहे अपि गदां तादृशशस्त्रम् उदतूतुलत् उत्तोलितवान्।

व्याख्यानम् -

एकवारं भारते लुण्ठनादिकं कृत्वा महामदस्य लोभः वर्धितः। अतः स द्वादशवारं भारतर्षं प्रति आक्रान्तवान्। तदा एकवारं स गुर्जरप्रदेशस्य अभिधानम् आधुनिकगुजराट्प्रदेशस्य विख्यातस्य सोमनाथमन्दिरस्य लुण्ठनं कृतवान्। अधुना तस्य तीर्थस्य तथा अभिधानं नास्ति, परन्तु पुरा तत्तीर्थम् अत्यन्तं प्रसिद्धम् आसीत्। तस्मिन् मन्दिरे यावद् वैभव्यम् आसीत् तावत् तस्मिन् समये जगति कुत्रापि नासीत्। तस्य मन्दिरस्य द्वाराणि स्तम्भानि च बहुमूल्यवैदूर्यपद्मरागमणि-माणिक्यादिरत्नैः निर्मितानि आसन्। न केवलं एतदेव तत्र यानि गृहाणि मन्दिरस्य भित्तयः च आसन् तानि अपि मणिमुक्तादिवेष्टितानि। पशुपक्षिणाम् आवासस्थानानि अपि सुवर्णेन निर्मितानि। मन्दिरस्य देहल्याम् अन्तः शतशः पद्मरागादिबहुमूल्यानि रत्नानि स्थापितानि। महामदः तानि सर्वाणि विनाश्य स्वीकृतवान्। किञ्च तस्मिन्

मन्दिरे एका महाघण्टा आसीत् या द्विशतमणिपरिमितसुवर्णेन निर्मिता। तस्या औज्ज्वल्यं दृष्ट्वा सर्वे चकिताः। तां महाघण्टामपि स्वीकृत्य स गदया महादेवमूर्तिं नाशितवान्।

व्याकरणविमर्शः

- स्वप्नजालपरतन्त्रेण – स्वप्न एव जालं स्वप्नजालमिति कर्मधारयसमासः। तस्य परतन्त्रेण स्वप्नजालपरतन्त्रेण इति षष्ठीतत्पुरुषसमासः।
- ज्ञातास्वादः - ज्ञात आस्वादः येन स ज्ञातास्वादः इति बहुव्रीहिसमासः।
- गुर्जरदेशचूडायितम् - गुर्जरदेशस्य चूडायितं गूर्जरदेशचूडायितम् इति षष्ठीतत्पुरुषः।
- वैदूर्यपद्मरागमाणिक्यमुक्ताफलजटितानि - वैदूर्यं च पद्मरागः च माणिक्यं च मुक्ताफलं च वैदूर्यपद्मरागमाणिक्यमुक्ताफलानि इति इतरेतरद्वन्द्वसमासः। तैः जटितानि इति तृतीयातत्पुरुषः।
- रत्ननिचयम् - रत्नानां निचयः रत्ननिचयः, तमिति षष्ठीतत्पुरुषः।

कोषः

- "कालो दिष्टोऽप्यनेहापि समयः" इत्यमरः।
- "स्तम्भौ स्थूणाजडीभावौ" इत्यमरः।
- "गोपानसी तु वलभी" इत्यमरः।
- "वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः" इत्यमरः।

पाठगतप्रश्नाः

१२. महामदः कतिवारं भारतस्य विलुण्ठनं कृतवान्।

१३. महामदः किं धूलीचकार।

१४. महामदः सोमनाथमन्दिरस्य कीदृशी घण्टां स्वीकृतवान्।

१५. गुर्जरदेशचूडायितम् इत्यत्र कः समासः।

११.६) साम्प्रतं मूलपाठमवच्छाम - २०

अथ "वीर, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" - इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु - "नाहं मूर्तिं विक्रीणामि, किन्तु भिनद्मि" इति सङ्गर्ज्य जनताया हाहाकारकलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि

परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।

अन्वयार्थः -

अथ महादेवविग्रहे गदाघाताद् अनन्तरं, वीर शूर महामद, गृहीतं स्वायत्तीकृतम् अखिलं समग्रं वित्तं रत्नम्, पराजिताः पराभवग्रस्ताः आर्यसेनाः आर्यचमूः, बन्दीकृताः निगडिता वयम् आर्याः, सञ्चितं संगृहीतम् अमलं स्वच्छं यशः कीर्तिः, इतः अपि एतादृशात् सौभाग्यात्परमपि ते तव क्रोधः अमर्षः न नहि शाम्यति शान्तो भवति चेत् यदि अस्मान् पूजकवृन्दान् ताडय प्रहर, मारय प्राणरहितान् कुरु, छिन्धि विदारय, भिन्धि भिन्नान् कुरु, पातय पर्वतशिखरात् अधःपातं विधेहि, मज्जय पारावारतले अवगाहय, खण्डय शरीराणि खण्डितानि विधेहि, कर्तय द्विधा देहं कुरु, ज्वलय वह्नौ गात्रदाहं कारय, किन्तु परन्तु इमां सम्मुखस्थाम् अकिञ्चित्करीं न किञ्चिदपि क्रियाशीलां जडां चैतन्यविरहितां महादेवप्रतिमां शिवमूर्तिं त्यज मुञ्च। यदि एवम् इत्थं न नहि स्वीकरोषि अङ्गीकरोषि तत् तर्हि अस्मत्तः अस्मभ्यं पूजकेभ्यः अन्यदपि इतः अधिकमपि सुवर्णकोटिद्वयं कोटिद्वयहेममुद्रां गृहाण स्वीकुरु, एनाम् इमां भगवन्मूर्तिं शिवलिङ्गं मा नहि स्प्राक्षीः स्पृश इति इत्थं साम्रेडं बहुशः बहुवारं कथयत्सु वदत्सु रुदत्सु प्रलापरतेषु प्रणमत्सु प्रणामकुर्वत्सु च पूजकवर्गेषु शिवसेवकसमुदायेष अहं महामदः न नहि मूर्तीः विक्रीणामि विग्रहानां विक्रयं करोमि, किन्तु परन्तु भिनद्मि भेदं करोमि इति अनेन प्रकारेण सङ्गर्ज्य गर्जनं विधाय जनतायाः लोकस्य हाहाकारकलकलं हा-हा-इत्यकारकं ध्वनिम् आकर्णयन् शृण्वन् घोरगदया प्रचण्डगदया मूर्तिं प्रतिमाम् अतुत्रुटत् भङ्क्तवान्। गदापातसमकालम् एव गदाप्रहारसमयम् एव अनेकार्बुदपद्ममुद्रामूल्यानि बहुसङ्ख्यमूल्यानि रत्नानि विविधमौक्तिकादीनि मूर्तिमध्यात् शिवलिङ्गस्य अभ्यन्तराद् उच्छलितानि उत्पतितानि, परितः समन्तात् अवाकीर्यन्त प्रकीर्णानि विस्तृतानि। स च महामदः दग्धमुखः महादुष्टः तानि विकीर्णितानि रत्नानि मौक्तिकानि मूर्तिखण्डानि शिवलिङ्गखण्डानि च क्रमेलकपृष्ठेषु उष्ट्रपृष्ठेषु आरोप्य संस्थाप्य सिन्धुनदम् एतन्नामिकां सरितम् उत्तीर्य उल्लङ्घ्य स्वकीयां स्वस्य विजयध्वजिनीं जयपताकिनीं गजिनीम् एतन्नामिकां राजधानीं शासनकेन्द्रं प्राविशत् गतवान्।

व्याख्यानम् -

महादेवविग्रहे गदाघाताद् अनन्तरमेव तत्रत्याः पूजका महामदं प्रार्थितवन्तः यत् - तेन महामदेन सर्वं स्वीकृतम्। आर्यसेनाः पराजिताः। अतः महत्सौभाग्यं तस्य। अतः महामदः तान् ताडयतु, मारयतु, विदारयतु, पर्वतादि-उच्चस्थानात् अधः निक्षिपयतु, परन्तु महादेवमूर्तिं नैव स्पृशतु इति। ते पूजकाः तस्मै सुवर्णकोटिद्वयमपि दातुम् इष्टवन्तः। परन्तु सः महामदः उक्तवान् - अहं मूर्तेः विक्रयणं न करिष्यामि, परन्तु तां नाशयिष्यामि इति। एवमुक्त्वा स जनानां क्रन्दनध्वनिम् अवज्ञाय भीषणगदया महादेवस्य मूर्तौ गदाघातं कृतवान्। गदया महामदः यदा महादेवमूर्तौ आघातम् अकरोत् तदा तत्तः बहुमूल्यानि रत्नानि समन्तात् विस्तृतानि। स पाप्मा तानि रत्नानि मदादेवस्य मूर्तिखण्डम् अपि उष्ट्रस्य पृष्ठे संस्थाप्य स्वस्य राजधानीं गजिनीं गतवान्।

व्याकरणविमर्शः

- आर्यसेनाः – आर्याणां सेनाः आर्यसेनाः इति षष्ठीतत्पुरुषः।
- सुवर्णकोटिद्वयम् - सुवर्णस्य कोटिद्वयं सुवर्णकोटिद्वयम् इति षष्ठीतत्पुरुषः।
- हाहाकारकलकलम् - हाहाकारं च कलकलं च हाहाकारकलकलम् इति द्वन्द्वसमासः।
- दग्धमुखः - दग्धं मुखं यस्य स दग्धमुखः इति बहुव्रीहिसमासः।

कोषः

- "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरः।
- "विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्" इत्यमरः।
- "द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः।
- "ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः" इत्यमरः।
- "यशः कीर्तिः समज्ञा च" इत्यमरः।

पाठगतप्रश्नाः

१६. शिवमूर्तिस्पर्शनिषेधाय अनुरुद्धः महामदः किमुक्तवान्।

१७. मूर्तौ गदापातात्परं किमभवत्।

१८. दग्धमुखः इत्यत्र कः समासः।

११.७) साम्प्रतं मूलपाठमवच्छाम - २१

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव।

अन्वयार्थः -

अथ गजिनीगमनात् परं कालक्रमेण समयचक्रेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं शोकसहितं सकष्टं क्लेशसहितं च प्राणान् असून् त्यक्तवति परित्यक्तवति महामदे महामदनामके यवने, गोरदेशवासी गोरदेशवास्तव्यः कश्चित् कश्चन शहाबुद्दीननामा शहाबुद्दीनाभिधेयः प्रथमम् आदौ गजिनीदेशं गजिनीराजधानीम् आक्रम्य समाक्रम्य महामदकुलं महामूदवंशं धर्मराजलोकाध्वन्यध्वनीनं यमलोकमार्गपथिकं विधाय कृत्वा सर्वाः प्रजाः सर्वान् नागरिकान् च पशुमारं पशुवत्प्रहारेण मारयित्वा निहत्य तद्रुधिरार्द्रमृदा प्रजारक्तार्द्रभूम्या गोरदेशे गोरनामके देशे बहून् अनेकान् गृहान् गेहान् निर्माय विधाय

चतुरङ्गिण्या हस्त्यश्वरथपदातिकया अनीकिन्या सेनया भारतवर्षं भारताख्यदेशं प्रविश्य निविश्य शीतलशोणितान् अपि अनुष्णरक्तान् अपि असयन् असिना मारयन् पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) इत्येतत्संख्यके संवत्सरे दिल्लीं दिल्लीनामिकां अश्वयाम्बभूव अधिकृतवान्।

व्याख्यानम् -

१०८७ -तमे वर्षे महामुदस्य मृत्यो परं गोरदेशवास्तव्यः शहाबुद्दीनाभिधेयः गजिनीराजधानीं गत्वा महामुदवंशीयान् हतवान्। ततः प्रजाजनान् पशुवत् प्रहृत्य अनेकसैन्यसहितः भारतवर्षं प्रविवेश। तत्र च अनुग्रस्वभावान् अपि असिना मारयन् १२५० इत्येतत्संख्यके संवत्सरे दिल्लीम् अधिकृतवान्।

व्याकरणविमर्शः

- शहाबुद्दीननामा – शहाबुद्दीनः नाम यस्य स शहाबुद्दीननामा इति बहुव्रीहिः।
- पशुमारम् - पशूपपदे मृधातोः "उपमाने कर्मणि च" इत्यनेन सूत्रेण णमुलि पशुमारम् इति रूपम्।
- तद्रुधिरार्द्रमृदा - तेषां रुधिराणि तद्रुधिराणि इति षष्ठीतत्पुरुषः। तैरार्द्रमिति तृतीयातत्पुरुषः। तादृशी मृद्, तया इति कर्मधारयः।
- शीतलशोणितान् - शीतलानि शोणितानि येषां ते शीतलशोणिताः, तान् इति बहुव्रीहिसमासः।
- अश्वयाम्बभूव – तेनातिक्रामतीत्यर्थे अश्वशब्दात् णिचि ततश्च लिटि भूधातोरनुप्रयोगे आमि प्रथमपुरुषैकवचने अश्वयाम्बभूव इति रूपम्।

कोषः

- "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्" इत्यमरः।
- "अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि" इत्यमरः।
- "संवत्सरोऽब्दो हायनोऽस्त्री शरत्समाः" इत्यमरः।

पाठगतप्रश्नाः

१९. महामदः कस्मिन् वैक्रमाब्दे प्राणान् त्यक्तवान्।

२०. महामदमृत्योः परं कः गजनीम् आक्रान्तवान्।

२१. कदा च शहाबुद्दीनः दिल्लीश्वरः संवृत्तः।

२२. शीतलशोणितान् इत्यत्र कः समासः।

११.८) साम्प्रतं मूलपाठमवच्छाम - २३

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रञ्च पारस्परिकविरोधज्वरग्रस्तं विस्मृतराजनीतिं भारतवर्षदुर्भाग्यायमाणमाकल-य्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन

वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः रिङ्क्तरङ्गभङ्गा गङ्गाऽपि शोणितशोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि। स एव प्राधान्येन यावनराज्याङ्कुरारोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीननामा प्रथमभारतसम्राट् सञ्जातः

अन्वयार्थः -

ततः तस्मात्परं दिल्लीश्वरं दिल्लीप्रदेशाधिपं पृथ्वीराजम् एतन्नामकं चौहानवंशीयं राजानम्, कान्यकुब्जेश्वरं कान्यकुब्जदेशस्याधिपं जयचन्द्रम् एतन्नामकं पारस्परिकविरोधज्वरग्रस्तम् अन्योन्यविरोधज्वरकवलितं विस्मृतराजनीतिं क्षात्रकार्यानभिज्ञं भारवर्षदुर्भाग्यायमाणं भारतवर्षस्य दुर्दशां समागच्छन्तीम् आकलय्य ज्ञात्वा अनायासेन विना श्रमम् उभौ अपि द्वौ अपि पृथ्वीराजजयचन्द्रौ विशस्य विनाश्य वाराणसीपर्यन्तं काशीं यावत् अखण्डमण्डलं समस्तजनपदम् अकण्टकं विघ्नरहितम् अकीटकिट्टं कीटकिट्टशून्यं महारत्नम् इव महामणिम् इव महाराज्यं विस्तृतं साम्राज्यम् अङ्गीचकार स्वीकृतवान्। तेन आक्रमणकारिणा शहाबुद्दीनेन वाराणस्याम् अपि काशीनगर्याम् अपि बहवः अत्यधिकाः अस्थिगिरयः कीकसपर्वताः प्रचिता निर्मिताः। रिङ्क्तरङ्गभङ्गा चञ्चलोर्मिबहुला गङ्गा अपि भागीरथी अपि शोणितशोणा रक्तरञ्जिता शोणीकृता शोणनदतां प्रापिता, परस्सहस्राणि च सहस्राद् अप्यधिकानि च देवमन्दिराणि देवतायतनानि भूमिसात्कृतानि खण्डितानि। स एव शहाबुद्दीन एव प्राधान्येन प्रमुखतया भारते एतन्नामके भारतवर्षे यवनराज्याङ्कुरारोपकः यवनशासनस्य बीजारोपकारी अभूत् बभूव। तस्य एव शहाबुद्दीनस्य एव कश्चिद् एकः क्रीतदासः अनुचरः कुतुबुद्दीननामा कुतुबुद्दीनाभिधेयः प्रथमभारतसम्राट् भारतवर्षस्य आदिमः अधिपतिः सञ्जातः अभवत्।

व्याख्यानम् -

शत्रवो हि छिद्रमास्थाय प्रविशन्ति। एवमेव पृथ्वीराज-जयचन्द्रयोः भेदच्छिद्रम् अवलम्ब्य शहाबुद्दीनेन यवनभूपेन भारतमाक्रान्तम्। तेन हि सर्वान् भारतीयान् पराजित्य स्वराज्यं निष्कण्टकं कृतम्। शहाबुद्दीनेन काशीनगर्याम् अपि अत्यधिकाः अस्थिगिरयः निर्मिताः। तरङ्गबहुला भागीरथी अपि रक्तरञ्जिता शोणनदतां प्रापिता। सहस्राद् अप्यधिकानि देवतायतनानि विखण्डितानि। शहाबुद्दीन एव प्राधान्येन प्रमुखतया भारतवर्षे यवनशासनस्य अङ्कुरारोपकारी अभूत्। शहाबुद्दीनस्य एव कुतुबुद्दीननामकः अनुचरः भारतवर्षस्य आदिमः अधिपः अभवत्।

व्याकरणविमर्शः

- विस्मृतराजनीतिम् - विस्मृता राजनीतिः येन स विस्मृतराजनीतिः, तमिति बहुव्रीहिसमासः।
- विशस्य - विपूर्वात् शसेः क्त्वोर्ल्यपि विशस्य इति रूपम्।
- रिङ्क्तरङ्गभङ्गा - तरङ्गाणां भङ्गाः तरङ्गभङ्गा इति षष्ठीतत्पुरुषः। रिङ्क्तः तरङ्गभङ्गा यस्याः सा रिङ्क्तरङ्गभङ्गा इति बहुव्रीहिः।

कोषः

- "किट्टं मलेऽस्त्रियाम्" इत्यमरः।

- "कीकसं कुल्यमस्थि च" इत्यमरः।
- "भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः" इत्यमरः।

पाठगतप्रश्नाः

२३. यावनकाले दिल्लीश्वरः कः।

२४. यावनकाले कान्यकुब्जेश्वरः कः।

२५. शहाबुद्दीनेन गङ्गा कीदृशी विहिता।

२६. यवनशासनस्य भारते अङ्कुरारोपकः कः।

२७. को भारतस्य प्रथमः यवनसम्राट्।

२८. रिङ्क्तरङ्गभङ्गा इत्यत्र कः समासः।

११.९) साम्प्रतं मूलपाठमवच्छाम - २४

तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगम्, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिलीवल्लभतां कलङ्कयति। अस्यैव पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु बङ्गेषु कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।

अन्वयार्थः -

तं कुतुबुद्दीननामकम् आरभ्य अद्यावधि साम्प्रतं पर्यन्तं राक्षसा एव धर्मविरोधिनः यवना एव राज्यं शासनम् अकार्षुः कृतवन्तः। दानवाः धर्मविरोधिनः एव च दीनान् दुःखग्रस्तान् अदीदलन् नाशितवन्तः। केवलम् एकाकी अकबरशाह-नामा एतन्नामको नृपः यद्यपि भारतवर्षस्य भारतदेशस्य गूढशत्रुः प्रच्छन्नशत्रुः तथापि शान्तिप्रियः शमरतः विद्वत्प्रियः पण्डितप्रियः च अभूत् आसीत्। अस्य एव अकबरशाहनामकस्य एव प्रपौत्रः तनयात्मजः मूर्तिमद् इव सविग्रह इव कलियुगं कलिकालः, गृहीतविग्रहः धृतवपुष्कः अधर्मः इव पापः इव, आलमगीरोपाधिधारी आलमगीर इत्युपनाम्ना प्रसिद्धः अवरङ्गजीवः अवरङ्गजीवाभिधेयः सम्प्रति इदानीं दिलीवल्लभतां दिल्लीश्वरतां कलङ्कयति दूषयति। अस्य एव अवरेङ्गजीवस्य एव पताका ध्वजः केकयेषु पञ्जाबदेशे, मत्स्येषु मत्स्यदेशे, मगधेषु मगधदेशे, अङ्गेषु अङ्गदेशे बङ्गेषु बङ्गदेशेषु कलिङ्गेषु कलिङ्गदेशे च दोधूयन्ते पौनःपुण्येन समुच्छ्रियन्ते, केवलं दक्षिणदेशे दक्षिणप्रदेशे अधुना इदानीम् अस्य म्लेच्छनृपस्य अबरङ्गजीबस्य परिपूर्णः समग्ररूपेण अधिकारः प्रशासनाधिकारः न संवृत्तः न सम्पन्नः।

व्याख्यानम् -

कुतुबुद्दीनाद् आरभ्य यवनराज्यम् तदानीमपि इति ज्ञापितवान् ब्रह्मचारिगुरुः। दुष्टेषु यवनशासकेषु एकः अकबरशाहनामको नृपः शान्तिप्रय आसीत्। तस्य प्रपौत्रः अत्यन्ततया दुष्टः राज्यशासनं तदा कुर्वन् आसीत्।तस्य ध्वज एव केकेय-मत्स्य-मगध-अङ्ग-बङ्ग-कलिङ्गदेशेषु उत्तोलित आसीत्। केवलं दक्षिणप्रदेशे अबरङ्गजीबस्य परिपूर्णः अधिकारः नासीत्।

व्याकरणविमर्शः

- गूढशत्रुः - गूढश्चासौ शत्रुश्च गुढशत्रुः इति कर्मधारयः।
- विद्वत्प्रियः - विद्वांसः प्रिया यस्य स विद्वत्प्रियः इति बहुव्रीहिः।
- गृहीतविग्रहः - गृहीतो विग्रहो येन स गृहीतविग्रहः इति बहुव्रीहिः।
- अदीदलन् - दल विदारणे इति धातोः लुङि झिप्रत्यये अदीदलन् इति रूपम्।
- दोधूयन्ते - धूञ् कम्पने इति धातोः यङि प्रथमपुरुषबहुवचने दोधूयन्ते इति रूपम्।।

कोषः

- "असुरा दैत्यदैतेयदनुजेन्द्रारिपर्वताः" इत्यमरः।

पाठगतप्रश्नाः

२९. यवननृपेषु को विद्वत्प्रियः।

३०. कः दिल्लीवल्लभतां कलङ्कयति।

३१. कुत्र कुत्र अवरङ्गजीवस्य पताका आसीत्।

११.१०) साम्प्रतं मूलपाठमवच्छाम - २६

दक्षिणदेशो हि पर्वतबहुलोऽस्ति अरण्यानीसङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणां, भूषणं भटानां, निधिर्नीतीनाम् कुलभवनं कौशलानां पारावारः परमोत्साहानां कश्चन प्रातःस्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन्पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धवैरम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनां, सतां त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवऽऽश्रयः। इयमेव

वर्तमाना दशा भारतवर्षस्य। किमधिकम् विनिवेदयामो योगबलावगतसकलगोप्यतमवृत्तान्तेषु योगिराजेषु इति कथयित्वा विरराम।

अन्वयार्थः -

दक्षिणदेशो भारतस्य दक्षिणप्रदेशो हि निश्चयेन पर्वतबहुलः गिरिप्रचुरः अस्ति अरण्यानीसङ्कुलः महारण्यव्याप्तः च पुनः अस्ति वर्तते इति अनेन कारणेन चिरोद्योगेन बहुधा प्रयासेन अपि अयम् अबरङ्गजीवः न नहि अशकत् समर्थः अभवत् महाराष्ट्रकेसरिणः महाराष्ट्रसिंहान् हस्तयितुं वशीकर्तुम्। साम्प्रतम् इदानीम् अस्य एव अबरङ्गजीवस्य आत्मीयः प्रियः दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा प्रेष्यत सम्प्रेष्यते इति श्रूयते इति आकर्ण्यते। महाराष्ट्रदेशरत्नं महाराष्ट्रादेशस्य चूडामणिः, यवन-शोणित-पिपासाऽऽकुलकृपाणः म्लेच्छरक्तपानेच्छाकुलखड्गकः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः शूरताङ्गनाकेशवेशरम्यघननागकेशरचर्चनदेदीप्यमानभुजखण्डः, महाराष्ट्राणां महाराष्ट्रदेशवास्तव्यानां जनानां शेखररत्नसदृशः, भटानां शूराणां भूषणम् अलङ्कारः, नीतीनां राजनयानां निधिः कोषः, कौशलानां दक्षतानां कुलभवनम्, पारावारः समुद्रः परमोत्साहानाम् उत्कृष्टोत्साहानाम्, कश्चन प्रातःस्मरणीयः अत्यन्तं माननीयः स्वधर्माग्रहग्रहग्रहिलः सनातनधर्मस्य दृढतया परिपालकः, शिव इव शङ्कर इव धृतावतारः स्वीकृतावतारः, शिववीरः तन्नामकः अस्मिन् नेदीयसि एव अस्मिन् सन्निकर्षे एव सिंहदुर्गे सिंहगढनामके दुर्गे ससेनः सेनासहितः निवसति। विजयपुराधीश्वरेण विजयपुरशासकेन साम्प्रतम् इदानीम् अस्य शिववीरस्य प्रवृद्धं समुपबृंहितं वैरं शत्रुत्वम्। 'कार्यं स्वतन्त्रताप्राप्तिरूपं कर्म वा साधयेयं सिद्धं विधास्यामः, देहं कायं वा पातयेयम् पातयिष्यामः' इति अस्य शिववीरस्य सारगर्भा सारसमन्विता महती प्रतिज्ञा भीषणः सङ्कल्पः। सतीनां कुलव्रतानाम्, सतां सज्जनानाम्, त्रैवर्णिकस्य ब्राह्मणक्षत्रियवैश्यात्मकस्य, आर्यकुलस्य आर्यसमाजस्य, धर्मस्य सनातनहिन्दुधर्मस्य भारतवर्षस्य भारतप्रदेशस्य च आशा-सन्तान-वितानस्य आशापरम्पराविस्तरणस्य अयं शिववीरः आश्रयः आधारः। इयम् एव एषा एव भारतवर्षस्य भारतदेशस्य वर्तमाना दशा इदानीन्तनदशा। किमधिकं कियद्बहुलं विनिवेदयामः सूचयामः योगिराजेषु योगिवरेषु योगबलावगतसकलगोप्यतमवृत्तान्तेषु ध्यानबलावगताखिलरहस्यमयवृत्तेषु इति एवं प्रकारेण कथयित्वा उक्त्वा विरराम विरतवान्।

व्याख्यानम् -

दक्षिणदेशो गिरिप्रचुरः महारण्यव्याप्तः चासीत् अत एव अबरङ्गजीवः तस्याधिकारे असमर्थः। तत्र अबरङ्गजीवस्य प्रियः दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा आसीत्। तत्र महाराष्ट्रदेशरत्नभूतः म्लेच्छरक्तपानेच्छासम्पन्नः, महाराष्ट्रदेशवास्तव्यानां शेखररत्नभूतः, भटानाम् अलङ्कारः, राजनयानां निधिः इत्येवम्भूतः प्रातःस्मरणीयः सनातनधर्मस्य दृढतया परिपालकः शिव इव शिववीरः आसीत्। स सिंहदुर्गे निवसन्नासीत्। तेन विजयपुराधीशस्य शत्रुत्वं वर्धितम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इति शिववीरस्य सारगर्भः भीषणः सङ्कल्पः। स एव आर्याणाम् आश्रयः। एवं प्रकारेण योगिराजं कथयित्वा ब्रह्मचारिगुरुः विरतवान्।

व्याकरणविमर्शः

- पर्वतबहुलः - पर्वतैर्बहुलः पर्वतबहुलः इति तृतीयातत्पुरुषः।
- अरण्यानीसङ्कुलः - महद् अरण्यम् अरण्यानीति इन्द्रवरुणेति सूत्रेण आनुकि ङीपि अरण्यानीशब्दः। अरण्यान्या सङ्कुलः अरण्यानीसङ्कुलः इति तृतीयातत्पुरुषह।
- महाराष्ट्रदेशरत्नम्- महाराष्ट्रदेशस्य रत्नम् इति कर्मधारयसमासः।
- यवनशोणितपिपासाकुलकृपाणः - यवनानां शोणितं यवनशोणितम् इति षष्ठीतत्पुरुषः। तस्य पिपासा इति षष्ठीतत्पुरुषः। तया आकुलः इति तृतीयातत्पुरुषः। तादृक् कृपाणो यस्य स इति बहुव्रीहिः।

पाठगतप्रश्नाः

३२. दक्षिणदेशः कीदृश आसीत्।

३३. दक्षिणदेशशासकत्वेन यवनराजेन को नियुक्तः।

३४. शिववीरः मुकुटमणिः कस्य आसीत्।

३५. शिववीरः कुत्र निवसति स्म।

३६. शिववीरः कीदृशः।

पाठसारः

योगिराजो भारतवर्षस्य इदानीन्तनस्थितिं ज्ञातुं ब्रह्मचारिगुरुं पृष्टवान्। तदा ब्रह्मचारिगुरोः अवस्था अत्र वर्णिता। स हि भारतवर्षस्य यवनकृतायाः अवस्थाया वर्णनावसरे अत्यन्तं दुःखमनुभूतवान्।

ब्रह्मचारिगुरुः अत्र सनातनधर्मावलम्बिनाम् आर्याणां विषये खेदं प्रस्तुतवान्। स कथितवान यद् वज्रनिर्मिता हि तस्य रसना। अन्यथा तु भारतीयेषु दुष्टानां यवनानाम् अत्याचारस्य वर्णनेन सा भिन्ना भवेत्। एवमेव आर्याणां हृदयमपि वज्रसारम्। अतः एव यवनानाम् अत्याचारं स्मृत्वा अपि तद् अनेकप्रकारेण न भिन्नम्। न हि तद् हृदयम् अग्निना दग्धम्। एवमेव आश्रमवासिनः ते निन्द्याः, यतो हि अस्मिन् यवनात्याचारसमये अपि ते आर्यवंशीयाः वयम् इति साभिमानं जीवनधारणं, श्वासधारणं सञ्चरणं च कुर्वन्ति।

ततः मुनिः स ब्रह्मचारिगुरुं प्रति उक्तवान् वस्तुतो हि कालगतिः अननुमेया। सम्प्रति तु कालवशादेव तत्सर्वं प्रनष्टम्। तटप्रपात इव कालकृतिर्भवति भङ्गुरा। अत एव कालवशेन एव भवति सनातनधर्मस्य पीडनम् इति विविच्य धैर्यधारणं कर्तव्यम्

अत्र महामदस्य भारताक्रमणं सोमनाथमन्दिरस्य लुण्ठनं च वर्णितम्। यदा धैर्यं प्रसन्नता प्रतापः तेजः, विक्रमः धर्मः इत्यादिगुणानाम् आश्रयः विक्रमादित्यः स्वर्गलोकं गतवान् तदा कश्चित् गजिनीनामकस्य स्थानस्य राजा महामदः सैन्यानि स्वीकृत्य भारतवर्षम् आगतवान्। स द्वादशवारं भारतर्षं प्रति आक्रान्तवान्। तदा एकवारं स गुर्जरप्रदेशस्य विख्यातस्य सोमनाथमन्दिरस्य लुण्ठनं कृतवान्। स गदया महादेवमूर्तिं नाशितवान्।

महादेवविग्रहे गदाघाताद् अनन्तरमेव तत्रत्याः पूजका महामदं प्रार्थितवन्तः यत् यथा महादेवमूर्तिः भग्ना न भवेत्। महामदः तथा वार्तां नैव श्रुतवान्। गदया स यदा महादेवमूर्तौ आघातम् अकरोत् तदा तत्तः बहुमूल्यानि रत्नानि समन्तात् विस्तृतानि। स पाप्मा तानि रत्नानि मदादेवस्य मूर्तिखण्डम् अपि उष्ट्रस्य पृष्ठे संस्थाप्य स्वस्य राजधानीं गजिनीं गतवान्।

१०८७ -तमे वर्षे महामुदस्य मृत्यो परं गोरदेशवास्तव्यः शहाबुद्दीनाभिधेयः गजिनीराजधानीं गत्वा महामुदवंशीयान् हतवान्। ततः प्रजाजनान् पशुवत् प्रहृत्य अनेकसैन्यसहितः भारतवर्षं प्रविवेश। तत्र च अनुग्रस्वभावान् अपि असिना मारयन् १२५० इत्येतत्संख्यके संवत्सरे दिल्लीम् अधिकृतवान्। स शहाबुद्दीन एव प्राधान्येन प्रमुखतया भारतवर्षे यवनशासनस्य अङ्कुरारोपकारी अभूत्। शहाबुद्दीनस्य एव कुतुबुद्दीननामकः अनुचरः भारतवर्षस्य आदिमः अधिपः अभवत्।

कुतुबुद्दीनाद् आरभ्य यवनराज्यं प्रवृत्तम्। दुष्टेषु यवनशासकेषु एकः अकबरशाहनामको नृपः शान्तिप्रय आसीत्। तस्य प्रपौत्रः अत्यन्ततया दुष्टः राज्यशासनं तदा कुर्वन् आसीत्। तस्य ध्वज एव केकेय-मत्स्य-मगध-अङ्ग-बङ्ग-कलिङ्गदेशेषु उत्तोलित आसीत्। केवलं दक्षिणप्रदेशे अबरङ्गजीबस्य परिपूर्णः अधिकारः नासीत्।

दक्षिणदेशो गिरिप्रचुरः महारण्यव्याप्तः चासीत् अत एव अबरङ्गजीवः तस्याधिकारे असमर्थः। तत्र अबरङ्गजीवस्य प्रियः दक्षिणदेशशासकत्वेन 'शास्तिखान'-नामा आसीत्। तत्र महाराष्ट्रदेशरत्नभूतः म्लेच्छरक्तपानेच्छासम्पन्नः, महाराष्ट्रदेशवास्तव्यानां शेखररत्नभूतः, भटानाम् अलङ्कारः, राजनयानां निधिः इत्येवम्भूतः प्रातःस्मरणीयः सनातनधर्मस्य दृढतया परिपालकः शिव इव शिववीरः आसीत्। स सिंहदुर्गे निवसन्नासीत्। तेन विजयपुराधीशस्य शत्रुत्वं वर्धितम्। 'कार्यं वा साधयेयं देहं वा पातयेयम्' इति शिववीरस्य सारगर्भः भीषणः सङ्कल्पः। स एव आर्याणाम् आश्रयः। एवं प्रकारेण योगिराजं कथयित्वा ब्रह्मचारिगुरुः विरतवान् इति पाठसारः।

पाठान्तप्रश्नाः

१. सोमनाथमन्दिरलुण्ठनवृत्तान्तं वर्णयत।

२. महामदस्य भारताक्रमणं वर्णयत।

३. दक्षिणदेशं वर्णयत।

४. अथ "वीर, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, बन्दीकृता वयम्, सञ्चितममलं यशः,

इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः" - इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु - "नाहं मूर्तिं विक्रीणामि, किन्तु भिनद्मि" इति सङ्गर्ज्य जनताया हाहाकारकलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्। - इति व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. आर्याणां दम्भोलिघटिता रसना।

२. आर्याणां वज्रसारमयं हृदयम्।

३. दम्भोलिना घटिता दम्भोलिघटिता इति तृतीयातत्पुरुषः।

४. सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः सकलोपद्रवमयश्च यवनदुराचारवृत्तान्तः।

५. विलक्षणो भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः।

६. सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तानि अरण्यानि जनपदीकरोति कालः।

७. मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वरोद्यानतडागगोष्ठमयानि नगराणि च काननीकरोति।

८. विक्रमादित्यः धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण शान्त्या श्रिया सौख्येन धर्मेण विद्यया च सह परलोकं गतः।

९. गजिनीनामकं स्थानं गजिनीस्थानमिति शाकपार्थिवादिवत्समासः। तत्र निवासी इति सप्तमीतत्पुरुषः।

१०. राज्ञां परस्परवैरं यदा प्रवृद्धं तदा गजिनीस्थाननिवासी महामदः भारतवर्षम् आक्रान्तवान्।

११. भारतवर्षाक्रमणात्परं महामदः भारतीयान् मारयित्वा मन्दिराणि प्रतिमाः च नाशयित्वा, बहून् जनान् स्वस्य दासरूपेण अङ्गीकृत्य बहूनि रत्नानि च बलात् स्वीकृत्य गजिनीस्थानं प्रति अगच्छत्।

१२. महामदः द्वादशवारं भारतस्य विलुण्ठनं कृतवान्।

१३. महामदः गुर्जरदेशचूडायितं सोमतीर्थं धूलीचकार।

१४. महामदः सोमनाथमन्दिरस्य द्विशतसुवर्णपरिमितां घण्टां स्वीकृतवान्।

१५. गुर्जरदेशस्य चूडायितं गूर्जरदेशचूडायितम् इति षष्ठीतत्पुरुषः।

१६. शिवमूर्तिस्पर्शनिषेधाय अनुरुद्धः महामदः "नाहं मूर्तिं विक्रीणामि, किन्तु भिनद्मि" इति उक्तवान्।

१७. मूर्तौ गदापातात्परमेव अनेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्याद् उच्छलितानि परितः अवकीर्णानि।

१८. दग्धं मुखं यस्य स दग्धमुखः इति बहुव्रीहिसमासः।

१९. महामदः सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे प्राणान् त्यक्तवान्।

२०. महामदमृत्योः परं गोरदेशनिवासी शहाबुद्दीनः गजनीम् आक्रान्तवान्।

२१. पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) शहाबुद्दीनः दिल्लीश्वरः संवृत्तः।

२२. शीतलानि शोणितानि येषां ते शीतलशोणिताः, तान् इति बहुव्रीहिसमासः।

२३. यावनकाले दिल्लीश्वरः पृथ्वीराजः।

२४. यावनकाले कान्यकुब्जेश्वरः जयचन्द्रः।

२५. शहाबुद्दीनेन गङ्गा शोणितशोणा विहिता।

२६. यवनशासनस्य भारते अङ्कुरारोपकः शहाबुद्दीनः।

२७. कुतुबुद्दीनः भारतस्य प्रथमः यवनसम्राट्।

२८. रिङ्क्तरङ्गभङ्गा - तरङ्गाणां भङ्गाः तरङ्गभङ्गा इति षष्ठीतत्पुरुषः। रिङ्क्तः तरङ्गभङ्गा यस्याः सा रिङ्क्तरङ्गभङ्गा इति बहुव्रीहिः।

२९. अकबरशाह-नामा गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च।

३०. अकवरशाह-नामकस्य प्रपौत्रो मूर्तिमदिव कलियुगम्, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिलीवल्लभतां कलङ्कयति।

३१. अवरङ्गजीवस्य पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु बङ्गेषु कलिङ्गेषु च आसीत्।

३२. दक्षिणदेशः पर्वतबहुलः अरण्यानीसङ्कुलश्चासीत्।

३३. दक्षिणदेशशासकत्वेन यवनराजेन शास्तिखान-नामको नियुक्तः।

३४. शिववीरः महाराष्ट्राणां मुकुटमणिरासीत्।

३५. शिववीरः सिंहदुर्गे ससेनो निवसति स्म।

३६. शिववीरः सतीनां सतां त्रैवर्णिकस्य आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्य आश्रयः।

।।इति एकादशः पाठः।।

348sk12

१२

उत्तररामचरितम् - प्रस्तावना

प्रस्तावना

अस्मिन् ग्रन्थे वयं नाटकस्य प्रथमाङ्कस्य आदितः कांश्चन अंशान् पठामः। प्रथमतः सूत्रधारः नटः च मञ्चम् आगत्य नाटकस्य प्रस्तावनां करोति। रामः जनकविरहेण परिखिन्नां सीतां सान्त्वयितुं सिंहासनाद् उत्थाय अन्तःपुरं गच्छति। ततः अष्टावक्रः आगत्य तयोः कुशलसंवादं पृच्छति। किञ्च वसिष्ठादिभिः गुरुजनैः रामाय ये उपदेशाः प्रदत्ताः तत्सर्वं रामः श्रावयति। तदनन्तरं लक्ष्मणः आगत्य कथयति यत् रामचरितात्मकं चित्रं ताभ्यां यथा आदिष्टम् आसीत् तथा एव अङ्कणं सम्पाद्य चित्रकारः आगतः। तदनु रामः सीतायाः विनोदाय तं चित्रपटं सीतायै प्रदर्शयति। एवं चित्रदर्शनपर्व आरभ्यते। तस्मिन् तारकाराक्षसीवधात् आरभ्य रामसीतयोः विवाहः, वनवासगमनम्, शृङ्गवेरपुरम् इत्येवं घटनाक्रमेण विन्ध्यारण्यस्य चित्रम् आगच्छति। अन्ते राममुखेन गोदावर्याः तस्याः तटे च तेषां जीवनपद्धतेः वर्णनेन ग्रन्थसमाप्तिः भवति।

अस्मिन् पाठे वयम् उत्तररामचरितस्य नाटकस्य प्रस्तावनां पठामः। अत्र सप्त श्लोकाः काश्चन उक्तयः वर्तन्ते। प्रथमतः सूत्रधारः आगत्य कवेः भवभूतेः वर्णनं करोति। तत्र सूत्रधारः अयोध्यावासी सन् नटेन सह मिलति। ततः नटसूत्रधारयोः मध्ये अयोध्यायाः विषये तस्याः निःशब्दतायाः विषये सुदीर्घः वार्तालापः प्रचलति। तद्वार्तालापप्रसङ्गेन एव नाट्यस्य आरम्भः भवति। तत् कथम् इति पाठं पठित्वा एव ज्ञास्यामः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामस्य सीतायाः चरितं जानीयात्।
- नाटके सूत्रधारनटयोः विषये ज्ञातुं समर्थः भवेत्।
- नान्दीविषये ज्ञातुं समर्थः भवेत्।
- छन्दसां लक्षणानि जानीयात्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।

१२.१) सम्पूर्णः मूलपाठः

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।
विन्देम देवतां वाचममृतामात्मनः कलाम्॥१॥
(नान्द्यन्ते)

सूत्रधारः - अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियानाथस्य यात्रायामार्यमिश्रान् विज्ञापयामि। एवमत्रभवन्तो विदांकुर्वन्तु। अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो भवभूतिर्नाम जातूकर्णीपुत्रः।

यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते।।२।।

सूत्रधारः - एषोऽस्मि कार्यवशादायोध्यकस्तदानींतनश्च संवृत्तः (समन्तादवलोक्य) भोः भोः! यदा तावदत्रभवतः पौलस्त्यकुलधूमकेतोः महाराजरामस्यायं पट्टाभिषेकसमयो रात्रिन्दिवमसंहृतानन्दनान्दीकः, तत्किमिदानीं विश्रान्तचारणानि चत्वरस्थानानि?

(प्रविश्य)

नटः - भाव ! प्रेषिता हि स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गमराक्षसाः सभाजनोपस्थायिनश्च नानादिगन्तपावना ब्रह्मर्षयो राजर्षयश्च,
यत्समाराधनायैतावतो दिवसान् प्रमोद आसीत्।

सूत्रधारः - आ, अस्त्येतन्निमित्तम्।

नटः - अन्यच्च -

वसिष्ठाधिष्ठिता देव्यो गता रामस्य मातरः।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥३॥

सूत्रधारः - वैदेशिकोऽस्मीति पृच्छामि। कः पुनर्जामाता ?

कन्यां दशरथो राजा शान्तां नाम व्यजीजनत्।
अपत्यकृतिकां राज्ञे रोमपादाय तां ददौ ॥४॥

विभाण्डकसुतस्तामृष्यश्रृङ्ग उपयेमे। तेन द्वादशवार्षिकं सत्रमारब्धम्। तदनुरोधात्कठोरगर्भा- मपि जानकीं विमुच्य गुरुजनस्तत्र यातः।

सूत्रधारः - तत्किमनेन ? एहि राजद्वारमेव स्वजातिसमयेनोपनिष्ठावः।

नटः - तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः।

सूत्रधारः - मारिष,

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥ ५॥

नटः - अतिदुर्जन इति वक्तव्यम्।

देव्यामपि हि वैदेह्यां सापवादो यतो जनः।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

सूत्रधारः - यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत ततः कष्टं स्यात्।

नटः - सर्वथा ऋषयो देवाश्च श्रेयो विधास्यन्ति। (परिक्रम्य) भो भोः क्वेदानीं महाराजः? (आकर्ण्य) एवं जनाः कथयन्ति -

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥७॥

(इति निष्क्रान्तौ)

(इति प्रस्तावना)

१२.२) साम्प्रतं मूलपाठम् अवगच्छाम - १

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥१॥

अन्वयः -

पूर्वेभ्यः कविभ्यः इदं नमोवाकं प्रशास्महे, आत्मनः अमृतां कलां देवतां वाचं विन्देम।

अन्वयार्थः -

पूर्वेभ्यः प्राचीनेभ्यः कविभ्यः व्यासवाल्मीकिकालिदासादिभ्यः काव्यकर्तृभ्यः नमोवाकं नमस्कारम् इदं मङ्गलाचरणात्मकं प्रशास्महे निर्दिशामः। आत्मनः ब्रह्मणः परमात्मनः अमृतां नित्यां कलाम् अंशभूतां देवतां देवीं वाचं वाणीं सरस्वतीं विन्देम लभेमहि प्रार्थयामहे।

व्याख्यानम् -

रङ्गविघ्नानां नाशाय रङ्गादौ मङ्गलम् आचरणीयं भवति। तदेव मङ्गलं नाट्यशास्त्रे नान्दी इति नाम्ना अभिधीयते। अतः महाकविः भवभूतिः अपि काव्यस्य आदौ नान्दीं करोति प्रस्तुतेन श्लोकेन। श्लोके अस्मिन् मङ्गलम् आशीर्वचनात्मकं वर्तते। अत्र पूर्ववर्तिनः व्यासवाल्मीक्यादीन् कवीन् कविः भवभूतिः नमःशब्दमुच्चार्य स्तौति। तेषां प्रसादात् भगवतः ब्रह्मणः अंशभूता वागधिष्ठात्री देवी सरस्वती अभीष्टा वर्तते। एवं कविना कृतस्य पूर्वकविवन्दनस्य फलं वाग्देव्याः लाभः। अर्थात् वाक् यथासमयं यथार्थं स्फुरतु इति कवेः आशयः।

विशेषटिप्पणी -

अत्र महाकविः भवभूतिः उत्तररामचरितरूपं नाटकं रचयितुकामः प्रारम्भे विघ्ननाशाय चिकीर्षितग्रन्थस्य परिसमाप्तये च शिष्टाचारपरिपालनात्मकं मङ्गलम् इदं कविभ्यः इत्यनेन श्लोकेन

विदधाति। मङ्गलं हि शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं भवति। तच्च – आशीर्वादात्मकं वस्तुनिर्देशात्मकं नमस्कारात्मकं च भवति। अत्र नमस्कारात्मकं मङ्गलं विदधाति कविः।

अत्र मङ्गलश्लोकः नान्दी। नन्दयति आनन्दयति जनान् इति नान्दी। नाटके मङ्गलार्थम् आदौ विहितं पद्यं नान्दीत्युच्यते। तस्या लक्षणमुक्तं विश्वनाथेनसाहित्यदर्पणे -

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।

देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता।।

मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।

पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत।।

अर्थात् देवब्राह्मणनृपाणां आशीर्वचनयुक्ता स्तुतिः यत्र वर्तते सा नान्दीति उच्यते। सा च नान्दी द्वादशपदा अष्टपदा वा भवति। इयं द्वादशपदा नान्दी।

व्याकरणविमर्शः -

१. नमोवाकम् - वच्धातोः क्विप्प्रत्यये वाक् इति रूपम्। तस्य वचनम् इत्यर्थः। नमः वाकः यस्मिन् स इति नमोवाक् इति बहुव्रीहिसमासः, तं नमोवाकम्।

२. प्रशास्महे - प्रपूर्वकात् इच्छार्थकात् शास्धातोः उत्तमपुरुषैकवचने रूपम्। प्रशास्महे इत्यस्य निर्दिशामः इत्यर्थः।

३. विन्देम - तौदादिकात् विद्-धातोः विधिलिङि उत्तमपुरुषैकवचने विन्देम इति रूपम्।

४. अमृताम् - अविद्यमानं मृतं मरणं यस्याः सा अमृता इति बहुव्रीहिसमासः, ताम् अमृताम्। मरणरहिताम् इत्यर्थः।

छन्दः -

अस्मिन् श्लोके अनुष्टुप्-छन्दः वर्तते। तस्य लक्षणं तावत् -

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।

द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।

एकस्मिन् श्लोके चत्वारः पादाः भवन्ति। अनुष्टुप्छन्दसि प्रत्येकपादस्य षष्ठाक्षरं गुरु भवति पञ्चमाक्षरं च लघु भवति। सप्तमाक्षरं द्वितीयपादे चतुर्थपादे ह्रस्वं भवति, प्रथमपादे तृतीयपादे च दीर्घं भवति।

पाठगतप्रश्नाः- १

१. कविः किम् इच्छति।

२. अनुष्टुप्छन्दसः लक्षणं लिखत।

३. नमोवाकम् इति रूपं साधयत।

१२.३) साम्प्रतं मूलपाठम् अवगच्छाम - २

(नान्द्यन्ते)

सूत्रधारः - अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियानाथस्य यात्रायामार्यमिश्रान् विज्ञापयामि। एवमत्रभवन्तो विदाङ्कुर्वन्तु - अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो भवभूतिर्नाम जातूकर्णीपुत्रः।

अन्वयार्थः -

(मङ्गलाचरणस्यान्ते) अलं पर्याप्तम् अतिविस्तरेण अधिकविस्तारेण। अद्य अस्मिन् दिने खलु भगवतः सर्वैश्वर्यविभूषितस्य कालप्रियानाथस्य दुर्गावल्लभस्य शिवस्य यात्रायां महोत्सवे आर्यमिश्रान् आर्यान् आदरणीयान् मिश्रान् पठितबहुशास्त्रान् अथवा गौरवितान् विज्ञापयामि सविनयं निवेदयामि एवम् इत्थम् अत्रभवन्तः अत्रोपस्थिताः पूज्याः भवन्तः विदाङ्कुर्वन्तु जानन्तु। तत्रभवान् अत्रानुपस्थितः पूज्यः श्रीमान् काश्यपः कश्यपगोत्रोत्पन्नः श्रीकण्ठपदलाञ्छनः श्रीकण्ठनामधेयः पदवाक्यप्रमाणज्ञो व्याकरणमीमांसान्याय-शास्त्रज्ञः भवभूतिर्नाम भवभूतिरिति नामधेयः जातूकर्णीपुत्रः जतुकर्णीगोत्रजायाः स्त्रियाः सुतः अस्ति भवति खलु।

व्याख्यानम् -

नान्द्यन्ते सूत्रधारः वदति यत् अधिकविस्तारः मास्तु। ततः स भगवतः शिवस्य उत्सवम् उपलक्ष्य समुपस्थितान् सभ्यान् कवेः भवभूतेः विषये ज्ञापयति। स कथयति यत् कविः भवभूतिः काश्यपगोत्रजः वर्तते। श्रीकण्ठ इति तस्य अपरं नाम भवति। व्याकरणे न्याये मीमांसायां च सः अत्यन्तं निष्णातः। स हि जातूकर्ण्याः पुत्रः भवभूतिः।

विशेषटिप्पणी -

"नान्द्यन्ते प्रविशति सूत्रधारः" इत्युक्तेः नान्दीपाठात्परमेव सूत्रधारस्य प्रवेशः। सूत्रं नाटकप्रयोगानुष्ठानं धारयति इति सूत्रधारः। साहित्यदर्पणे सूत्रधारलक्षणम् उक्तं -

नाट्योपकरणादीनि सूत्रमित्यभिधीयते।

सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते।।

व्याकरणविमर्शः -

१. विदाङ्कुर्वन्तु - ज्ञानार्थकात् विद्धातोः लोटि कृधातोः अनुप्रयोगे प्रथमपुरुषबहुवचने रूपम्। जानन्तु इति तदर्थः।

२. श्रीकण्ठपदलाञ्छनः- श्रीकण्ठ इति पदं लाञ्छनं यस्य स इति श्रीकण्ठपदलाञ्छनः श्रीकण्ठपदनामकः इत्यर्थः।

३. पदवाक्यप्रमाणज्ञः- जानाति इति ज्ञः। पदं (व्याकरणम्) च वाक्यं (न्यायः) प्रमाणं (मीमांसा) च इति पदवाक्यप्रमाणानि, तेषां ज्ञः इति पदवाक्यप्रमाणज्ञः।

४. कालप्रियानाथस्य – कालस्य प्रिया कालप्रिया इति षष्ठीतत्पुरुषसमासः। दुर्गा इत्यर्थः। तस्याः नाथः कालप्रियानाथः इति षष्ठीतत्पुरुषसमासः, तस्य।

५. आर्यमिश्रान् - आर्याः च अमी मिश्राः च आर्यमिश्राः इति कर्मधारयसमासः, तान् आर्यमिश्रान्।

६. जातूकर्णीपुत्रः - जतूकर्णस्य गोत्रापत्यं स्त्री जातूकर्णी। तस्याः पुत्रः जातूकर्णीपुत्रः इति षष्ठीतत्पुरुषसमासः।

पाठगतप्रश्नाः - २

४. आर्यमिश्रान् कदा विज्ञापयति सूत्रधारः।

५. भवभूतिः कीदृशः।

६. पदवाक्यप्रमाणज्ञः इति पदस्य का व्युत्पत्तिः।

१२.४) साम्प्रतं मूलपाठम् अवगच्छाम - ३

यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते।।२।।

अन्वयः -

यं ब्रह्माणम् इयं देवी वाक् वश्या इव अनुवर्तते। तत्प्रणीतम् उत्तरं रामचरितं प्रयोक्ष्यते।

अन्वयार्थः -

यं भवभूतिं ब्रह्माणं यजनादिषट्कर्मनिरतं ब्राह्मणम् इयम् एषा देवी भगवती वाक् वाणी सरस्वती वश्या इव अधीना स्त्री इव अनुवर्तते अनुसरणं करोति। तत्प्रणीतं भवभूतिकृतम् उत्तरं रामचरितम् उत्तररामचरिताख्यं नाटकं प्रयोक्ष्यते अभिनेष्यते।

व्याख्यानम् -

अत्र सूत्रधारमुखेन स्वगुणवर्णनं कविः करोति। यथा एकेन पुरुषेण वशीभूता नारी तं पुरुषं सततम् अनुकरोति। तेन पुरुषेण उक्तं यत् किमपि सम्पाद्यं सा नारी सम्पादयति। एवमेव वाचां देवी हंसवाहना सरस्वती अपि कविं भवभूतिं सततम् अनुगच्छति। अतः कविः यथा इष्टवान् तथा एव वाक्यद्वारा मनोगतं भावं प्रकटयितुं समर्थः। अनेन नाट्यस्यापि अस्य असाधारणत्वं प्रकाशितं भवति। अत्र नाट्यस्य नामोल्लेखः अपि कविना क्रियते उत्तररामचरितम् इति। उत्तरं नाम राज्याभिषेकात् अनन्तरम्। रामचरितं च पुरुषोत्तमस्य श्रीरामस्य चरित्रम्। रावणवधात् परं वनवासं समाप्य यदा रामः

प्रत्यागतवान् तदा रामस्य राज्याभिषेकः सञ्जातः। ततः परं श्रीरामस्य चरितम् अर्थात् जीवनवृत्तान्तः नाट्ये अस्मिन् वर्णितः अस्ति। तदेव नाटकम् इदानीम् अभिनयेन प्रस्तूयते इति सूत्रधारस्य उद्घोषः।

विशेषटिप्पणी -

अत्र प्ररोचना प्रस्तुता। तस्या लक्षणं तावत् -

"निवेदनं प्रयोज्यस्य निर्देशो देशकालयोः।

कविकाव्यादीनां प्रंशसा तु प्ररोचना।।" इति।

अत्र संस्कृते भाषणाद् भारती वृत्तिः। तस्या लक्षणं तावत् -

"भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः।" इति।

व्याकरणविमर्शः -

१. वश्या - वश्धातोः यति टापि वश्या इति रूपम्। वशंगता इत्यर्थः।

२. प्रणीतम् - प्रपूर्वकात् नीधातोः क्तप्रत्यये नपुंसकलिङ्गे प्रथमैकवचने रूपम्।

३. प्रयोक्ष्यते - प्रपूर्वकात् युज्धातोः लृटि प्रथमपुरुषैकवचने रूपम्।

४. रामचरितम् - रामस्य चरितं रामचरितम् इति षष्ठीतत्पुरुषसमासः।

५. तत्प्रणीतम् - तेन प्रणीतं तत्प्रणीतम् इति तृतीयातत्पुरुषसमासः।

सन्धिविच्छेदः -

१. वाग्वश्येवानुवर्तते - वाक् वश्या इव अनुवर्तते।

अलङ्कारविमर्शः -

१. वश्येव इत्यत्र क्रियोत्प्रेक्षणाद् उत्प्रेक्षालङ्कारः। तल्लक्षणं तावत्- "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।" इति।

छन्दः - अस्मिन् श्लोके अनुष्टुप्-छन्दः वर्तते।

पाठगतप्रश्नाः - ३

७. अस्य नाटकस्य नाम किम्।

८. वाग्वश्येवानुवर्तते इत्यस्य सन्धिविच्छेदं कुरुत।

९. नाटकमिदं कः विरचितवान्।

१०. ग्रन्थकर्तुः कीदृशं वैशिष्ट्यम्।

१२.५) साम्प्रतं मूलपाठम् अवगच्छाम - ४

सूत्रधारः - **एषोऽस्मि कार्यवशादायोध्यकस्तदानींतनश्च संवृत्तः (समन्तादवलोक्य) भो भो! यदा तावदत्रभवतः पौलस्त्यकुलधूमकेतोः महाराजरामस्यायं पट्टाभिषेकसमयो रात्रिन्दिवमसंहृतानन्दनान्दीकः, तत्किमिदानीं विश्रान्तचारणानि चत्वरस्थानानि? (प्रविश्य)**

नटः - **भाव ! प्रेषिता हि स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गमराक्षसाः सभाजनोपस्थायिनश्च नानादिगन्तपावना ब्रह्मर्षयो राजर्षयश्च, यत्समाराधनायैतावतो दिवसान् प्रमोद आसीत्।**

सूत्रधारः - **आ, अस्त्येतन्निमित्तम्।**

अन्वयार्थः -

सूत्रधारः - एषः अहं सूत्रधारः कार्यवशात् अभिनयादिकार्यकारणात् आयोध्यकः अयोध्यावासी तदानीन्तनः रामकालीनः संवृत्तः सञ्जातः अस्मि वर्ते। (समन्तात् परितः अवलोक्य दृष्ट्वा) भो भो हे नट, अत्रभवतः पूज्यस्य पौलस्त्यकुलधूमकेतोः रावणवंशविनाशकस्य पट्टाभिषेकसमयः राज्याभिषेककालः रात्रिन्दिवम् अहर्निशम् असंहृतानन्दनान्दीकः असंहृता अविरतं वाद्यमाना आनन्दनान्दी यस्मिन् स तथोक्तः। तत्किम् तत् कथम् इदानीम् अधुना विश्रान्तचारणानि विश्रान्ताः अपगताः चारणाः नटाः येभ्यः तानि विश्रान्तचारणानि चत्वरस्थानानि चतुष्पथभूतयः।

नटः - भाव हे विद्वन् सूत्रधार स्वगृहात् निजगृहात् महाराजेन श्रीरामचन्द्रेण प्रेषिताः प्रस्थापिताः लङ्कासमरसुहृदो लङ्कायां रावणनगर्यां घटितः यः समरः युद्धः तत्र ये सुहृदः मित्राणि ते लङ्कासमरसुहृदः महात्मानः उदाराशयाः प्लवङ्गमराक्षसाः सुग्रीवादिवानराः विभीषणादिराक्षसाः, नानादिगन्तपावनाः नानादिशां पवित्रीकृतः ब्रह्मर्षयः ब्रह्मकुलोत्पन्नाः गौतमादयः ऋषयः, राजर्षयः क्षत्रियकुलोत्पन्नाः जनकादयः ऋषयः, सभाजनोपस्थायिनः रामस्य अभिनन्दनं कर्तुं समागताः यत्समाराधनाय येषां सत्काराय एतावतः इयतः दिवसान् दिनानि व्याप्य प्रमोदः आनन्दोत्सवः आसीत्।

सूत्रधारः - अस्तु तर्हि एतत् एव निःशब्दतायाः कारणम् अस्ति।

व्याख्यानम् -

अधुना सूत्रधारः नाट्यप्रसङ्गात् एकः अयोध्यानिवासी सञ्जातः। ततश्च स समन्तात् दृष्ट्वा प्रसङ्गनिर्देशं करोति - भोः अयं तावत् अयोध्याधिपतेः श्रीमतः रामचन्द्रस्य राज्याभिषेकस्य समयः। तर्हि रङ्गालयस्य प्राङ्गणे स्तावकाः स्तुतिपाठात् कथं विरताः। ततः नटः सूत्रधारं सम्बोध्य निःशब्दतायाः कारणं ज्ञापयन् वदति यत् उत्सवः समाप्तः। अतः रावणेन सह युद्धे ये वानरा आत्मपराक्रमं प्रदर्श्य युद्धं कृतवन्तः ते रामसुहृदः वानराः उत्सवार्थं समुपागताः आसन्। इदानीम् उत्सवः समाप्तः। अतः ते निजदेशं गताः। नानादेशाद् आगताः वसिष्ठादयः ब्रह्मर्षयः जनकादयः राजर्षयः अपि स्वप्रदेशं गताः। एवं सूत्रधारः नीरवतायाः कारणं जानाति।

व्याकरणविमर्शः -

१. संवृत्तः- समित्युपसर्गपूर्वकात् वृद्धातोः क्तप्रत्यये रूपम्।

२. पौलस्त्यकुलधूमकेतोः - पौलस्त्यस्य कुलं पौलस्त्यकुलम् इति षष्ठीतत्पुरुषसमासः। तस्य धूमकेतुः इव इति षष्ठीतत्पुरुषसमासः, तस्य।

३. पट्टाभिषेकसमयः - पट्टप्रधानः अभिषेकः पट्टाभिषेकः इति शाकपार्थिवादिवत्समासः। पट्टाभिषेकस्य समयः पट्टाभिषेकसमयः इति षष्ठीतत्पुरुषसमासः।

४. रात्रिन्दिवम्- रात्रौ च दिवा च रात्रिन्दिवम् इति समाहारद्वन्द्वसमासः।

५. विश्रान्तचारणानि - विश्रान्ताः चारणाः येभ्यः येषु वा तानि विश्रान्तचारणानि इति बहुव्रीहिसमासः।

६. लङ्कासमरसुहृदः - लङ्कायां वृत्तः समरः लङ्कासमरः। तस्मिन् सुहृदः लङ्कासमरसुहृदः।

७. नानादिगन्तपावनाः - नाना दिशः नानादिशः इति कर्मधारयसमासः। नानादिशाम् अन्ताः नानादिगन्ताः इति षष्ठीतत्पुरुषसमासः। तान् पावयन्ति इति नानादिगन्तपावनाः।

पाठगतप्रश्नाः - ४

११. के के रामराज्याभिषेकाय उपागताः।

१२. कथं ते अयोध्यामुपागताः।

१३. अयोध्यायां निःशब्दतायाः किं कारणम्।

१४. पट्टाभिषेकसमयः इत्यत्र समासनिर्णयः कार्यः।

१५. कः आयोध्यकः संवृत्तः।

१२.६) साम्प्रतं मूलपाठम् अवगच्छाम - ५

नटः - **अन्यच्च -**

वसिष्ठाधिष्ठिता देव्यो गता रामस्य मातरः।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥३॥

अन्वयः -

अन्यच्च, वसिष्ठाधिष्ठिता देव्यः रामस्य मातरः अरुन्धतीं पुरस्कृत्य यज्ञे जामातुः आश्रमं गताः।

अन्वयार्थः -

नटः - अन्यत् अपरम् अपि कारणम् अस्ति।

वसिष्ठाधिष्ठिताः कुलगुरुणा वसिष्ठेन संरक्षिताः देव्यः दशरथमहिष्यः कौशल्याकैकेयीसुमित्राः रामस्य रामचन्द्रस्य मातरः जनन्यः अरुन्धतीं गुरुपत्नीं पुरस्कृत्य अग्रे कृत्वा यज्ञे यज्ञनिमित्तं जामातुः कन्यापतेः ऋष्यशृङ्गस्य आश्रमं तपःस्थलं गताः प्राप्ताः।

व्याख्यानम् -

अस्मिन् श्लोके अयोध्यायां गीतावाद्यादेः अभावस्य अपरं कारणं वदति नटः। महाराजस्य दशरथस्य एका कन्या आसीत्। तस्याः नाम शान्ता। शान्ता महामुनिम् ऋष्यशृङ्गं परिणीतवती। तस्य जामातुः ऋष्यशृङ्गस्य आश्रमे कश्चन यज्ञः प्रचलति। अतः यज्ञदर्शनाय दशरथमहिष्यः श्रीरामस्य मातरः कौशल्याकैकीयासुमित्राः तत्र गताः। अतः ताः अयोध्यायाम् न सन्ति इति कारणात् तत्र गीतवाद्यादिकं न भवति इति तात्पर्यम्।

व्याकरणविमर्शः -

१. वसिष्ठाधिष्ठिताः- अधिपूर्वकात् स्थाधातोः क्तप्रत्यये टापि अधिष्ठिता इति रूपम्। वसिष्ठेन अधिष्ठिता वसिष्ठाधिष्ठिता इति तृतीयातत्पुरुषसमासः।

२. पुरस्कृत्य – पुरस् इति पूर्वकात् कृधातोः क्त्वाप्रत्यये क्त्वाप्रत्ययस्य स्थाने ल्यपि पुरस्कृत्य इति रूपम्।

सन्धिविच्छेदः

१. देव्यो गता रामस्य – देव्यः+गताः+रामस्य।

२. जामातुराश्रमम् - जामातुः+आश्रमम्।

छन्दः - अस्मिन् श्लोके अनुष्टुप् छन्दः।

पाठगतप्रश्नाः - ५

१६. रामस्य मातरः कुत्र किमर्थं च गताः।

१७. कां पुरस्कृत्य रामस्य मातरः गताः।

१२.७) साम्प्रतं मूलपाठम् अवगच्छाम - ६

सूत्रधारः - **वैदेशिकोऽस्मीति पृच्छामि। कः पुनर्जामाता ?**

कन्यां दशरथो राजा शान्तां नाम व्यजीजनत्।
अपत्यकृतिकां राज्ञे रोमपादाय तां ददौ ॥४॥
विभाण्डकसुतस्तामृष्यश्रृङ्ग उपयेमे। तेन द्वादशवार्षिकं सत्रमारब्धम्।
तदनुरोधात्कठोरगर्भामपि जानकीं विमुच्य गुरुजनस्तत्र यातः।

अन्वयः -

सूत्रधारः - वैदेशिकः अस्मि इति पृच्छामि। कः पुनः जामाता।

नटः - राजा दशरथः शान्तां नाम कन्यां व्यजीजनत् राज्ञे रोमपादाय अपत्यकृतिकां तां ददौ।

विभाण्डकसुतः ऋष्यशृङ्गः ताम् उपयेमे। तेन द्वादशवार्षिकं सत्रम् आरब्धम्। तदनुरोधात् कठोरगर्भाम् अपि जानकीं विमुच्य गुरजनः तत्र यातः।

अन्वयार्थः -

सूत्रधारः - वैदशिकः विदेशवासी अस्मि भवामि इति अतः पृच्छामि जिज्ञासां करोमि। कः पुनः जामाता कन्यापतिः।

नटः - राजा महाराजः दशरथः शान्तां नाम कन्यां कुमारीं व्यजीजनत् उत्पादयामास, राज्ञे महाराजाय रोमपादाय रोमपादाभिधाय अपत्यकृतिकां कृत्रिमकन्यारूपां तां शान्तां ददौ प्रदत्तवान्।

विभाण्डकसुतः विभाण्डकमुनेः पुत्रः ऋष्यशृङ्गः एतन्नामकः महर्षिः तां शान्ताम् उपयेमे परिणीतवान्। तेन मुनिना ऋष्यशृङ्गेण द्वादशवार्षिकं द्वादशवर्षाणि व्याप्य सत्रम् यज्ञः आरब्धम् उपक्रान्तः। तदनुरोधात् तस्य मुनेः आग्रहवशात् कठोरगर्भां पूर्णगर्भां जानकीं स्ववधूं जनकसुतां सीतां विमुच्य परित्यज्य गुरुजनः पूज्यजनः वसिष्ठकौशल्यादयः तत्र ऋष्यशृङ्गस्य आश्रमं गतः याताः।

व्याख्यानम् -

सूत्रधारः कथयति यत् स वैदेशिकः अस्ति। अर्थात् सः अयोध्यावासी नास्ति। अतः अयोध्याविषये तस्य समीचीनं ज्ञानं नास्ति इति सः अङ्गीकरोति। सूत्रधारः जानाति यत् दशरथस्य कापि पुत्री एव नास्ति। अतः स पृच्छति - कः पुनः महाराजस्य दशरथस्य जामाता इति।

अत्र नटः राज्ञः दशरथस्य कन्यायाः परिचयं प्रददाति। स वदति यत् राज्ञः दशरथस्य शान्ता नाम एका कन्या आसीत्। किन्तु जन्मनः परमेव राजा तां कन्याम् अङ्गराजाय रोमपादाय दत्तकरूपेण प्रदत्तवान्। विभाण्डकमुनेः पुत्रः महामुनिः ऋष्यशृङ्गः तां परिणीतवान्। स मुनिः ऋष्यशृङ्गः द्वादशवर्षव्यापिनम् एकं यज्ञं समारब्धवान्। अतः तस्य अनुरोधात् गर्भिणीं सीताम् अयोध्यायां संस्थाप्य वसिष्ठकौशल्याकैकेयीसुमित्रादयः तत्र यज्ञनिमित्तं गताः।

व्याकरणविमर्शः -

१. व्यजीजनत् - विपूर्वकात् जन्-धातोः णिचि लुङ्लकारे प्रथमपुरुषैकवचने व्यजीजनत् इति रूपम्।

२. अपत्यकृतिकाम् - कृता एव कृतिका अपत्यं च सा कृतिका इति अपत्यकृतिका इति कर्मधारयसमासः, ताम् अपत्यकृतिकाम्। विहितकृत्रिमकन्याम् इत्यर्थः।

३. उपयेमे- उपपूर्वकात् यम्धातोः लिटि प्रथमपुरुषैकवचने रूपम्।

४. कठोरगर्भाम् - कठोरः पूर्णः गर्भः यस्याः सा कठोरगर्भा, तां कठोरगर्भाम् इति बहुव्रीहिसमासः।

छन्दः - कन्यामित्यस्मिन् श्लोके अनुष्टुप् छन्दः।

पाठगतप्रश्नाः - ६

१८. राज्ञः दशरथस्य कन्यायाः नाम किम्।

१९. राजा दशरथः कन्यां कस्मै प्रदत्तवान्।

२०. अपत्यकृतिकाम् इत्यस्य कः अर्थः।

२१. कः शान्ताम् उपयेमे।

२२. ऋष्यशृङ्गः कीदृशं सत्रमारब्धवान्।

१२.८) साम्प्रतं मूलपाठम् अवगच्छाम - ७

सूत्रधारः - **तत्किमनेन ? एहि राजद्वारमेव स्वजातिसमयेनोपनिष्ठावः।**

नटः - **तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः।**

सूत्रधारः - **मारिष,**

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥ ५॥

अन्वयः -

सूत्रधारः - तत् अनेन किम्। एहि स्वजातिसमयेन राजद्वारम् एव उपतिष्ठावः।

नटः - तेन राज्ञः सुपरिशुद्धाम् उपस्थानस्तोत्रपद्धतिं निरूपयतु।

सूत्रधारः - मारिष, सर्वथा व्यवहर्तव्यम् अवचनीयता कुतः? हि जनो यथा स्त्रीणां साधुत्वे दुर्जनः तथा वाचाम् (अपि दुर्जनः)।

अन्वयार्थः -

सूत्रधारः - तत् तर्हि अनेन उत्सवविरामहेतोः चिन्तनेन किं साध्यते। स्वजातिसमयेन स्वजात्याः चारणजात्या समयेन आचारेण राजद्वारम् राज्ञो रामस्य प्रतीहारम् उपतिष्ठावः उपसृत्य तिष्ठावः।

नटः - तेन राजद्वारे स्तुतेः पठनीयतया निरूपयतु चिन्तयतु सुपरिशुद्धां सर्वथा दोषशून्याम् उपस्थानस्तोत्रपद्धतिं राजसमीपगमनार्थां स्तुतिपरिपाटीं भावः विद्वान् भवान्।

सूत्रधारः - मारिष आर्य, सर्वथा समस्तप्रकारेण व्यवहर्तव्यं व्यवहारः करणीयः अवचनीयता निर्दोषता कुतः कस्मात् कारणात्। हि यतः जनः लोकः यथा येन प्रकारेण स्त्रीणां नारीणां तथा तेनैव प्रकारेण वाचां वाणीनां साधुत्वे सत्यतायां दुर्जनः दोषदर्शी।

व्याख्यानम् -

ततः सूत्रधारः नटेन स्वकार्यं सम्पादयितुं राजद्वारं प्रति प्रस्थितः। तदा नटः सूत्रधारम् उद्दिश्य कथयति यत् राजद्वारे स्तुतिपाठस्य आवश्यकत्वात् दोषरहितां नृपोचितां राजस्तुतिपद्धतिं भवान् विचारयतु इति। ततः सूत्रधारः नटम् उद्दिश्य वदति यत्सर्वथा इति। अत्र सूत्रधारेण लोकस्य निन्दा विहिता। लोके जनाः दोषरहिते वस्तुनि अपि आयासेन दोषम् उद्भावयति। एवं ते यथा साध्वीनां स्त्रीणां सतीत्वे सन्देहं प्रकटयति तथा केनापि कविना लिखितेन काव्ये अपि। एवं दोषदर्शनं तेषां स्वभावसिद्धम् अस्ति। अतः तेषां विषये विचिन्त्य व्यवहारः न त्याज्यः। अतः सूत्रधारः अपि तत् सर्वम् अचिन्तयित्वा एव स्तुतिकरणार्थं राजद्वारं गमिष्यति इति तस्य आशयः। वस्तुतः अनेन पद्येन कविना सीताविषयकस्य अपवादस्य अवतारणा एव विहिता वर्तते।

विशेषटिप्पणी -

अत्र श्लोके सीतापवादस्य अवतारणा विहिता। तद् मुखसन्धेः समाधानाख्यमङ्गं भवति। तल्लक्षणं तावद् दर्पणे - "बीजस्यागमनं यत्तु तत्समाधानमुच्यते" इति।

व्याकरणविमर्शः -

१. सर्वथा - सर्वशब्दात् थाल्प्रत्यये सर्वथा इति रूपम्। सर्वेण प्रकारेण इति तदर्थः।
२. व्यवहर्तव्यम्- वि-अव इत्युपसर्गद्वयपूर्वकात् हृधातोः तव्यत्प्रत्यये प्रथमैकवचने रूपम्।
३. अवचनीयता - वचनीयं दोषः। तस्य भावः इति तल्प्रत्यये वचनीयता। न वचनीयता अवचनीयता इति नञ्तत्पुरुषसमासः।

सन्धिविच्छेदः -

१. कुतो ह्यवचनीयता - कुतः+हि+अवचनीयता।
२. दुर्जनो जनः - दुर्जनः+जनः।

अलङ्कारविमर्शः -

१. श्लोके कुतो ह्यवचनीयता इति वाक्यं प्रति उत्तरार्धवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः । तल्लक्षणं तावत् - "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।" इति।
२. यथा स्त्रीणां तथा वाचाम् इत्यत्र उपमालङ्कारः। तल्लक्षणं तावद्दर्पणे- "साम्यं वाच्यमवैधम्यं वाक्यैक्य उपमा द्वयोः।"इति।
३. अत्र उपमायाः काव्यलिङ्गालङ्कारस्य चाङ्गाङ्गिभावात् सङ्करालङ्कारः।

छन्दः - सर्वथा इत्यस्मिन् श्लोके अनुष्टुप् छन्दः।

पाठगतप्रश्नाः - ७

२३. अवचनीयता कुतः नास्ति।

२४. लोकः कीदृशः भवति।

१२.९) साम्प्रतं मूलपाठम् अवगच्छाम - ८

नटः - **अतिदुर्जन इति वक्तव्यम्।**

देव्यामपि हि वैदेह्यां सापवादो यतो जनः।

रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

सूत्रधारः - **यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत ततः कष्टं स्यात्।**

अन्वयः -

नटः - अतिदुर्जन इति वक्तव्यम्।

यतो हि जनः देव्यां वैदेह्याम् अपि सापवादः (वर्तते) रक्षोगृहस्थितिः (तस्य) मूलम् (अस्ति)। अग्निशुद्धौ तु (जनस्य) अनिश्चयः।

सूत्रधारः - यदि पुनः इयं किंवदन्ती महाराजं प्रति राजानं स्यन्देत ततः तदा कष्टं स्यात्।

अन्वयार्थः -

नटः - अतिदुर्जन अतिदोषदर्शी इति वक्तव्यं कथनीयम्। यतो हि यस्मात् कारणात् जनः लोकः देव्यां परमपूज्यायां वैदेह्यां जनकतनयायां सीतायाम् अपि सापवादः निन्दापरः वर्तते। रक्षोगृहस्थितिः रावणगृहनिवासः मूलं कारणम् अस्ति। अग्निशुद्धौ अग्निपरीक्षायां तु जनस्य अनिश्चयः निर्णयाभावः संशयः अस्ति।

सूत्रधारः - यदि पुनः चेत् इयम् एषा किंवदन्ती जनश्रुतिः महाराजं प्रति राजानं रामचन्द्रं प्रति स्यन्देत प्रस्रवेत् ततः तदा कष्टं कृच्छ्रं स्यात् भवेत्।

व्याख्यानम् -

पूर्वं सूत्रधारः लोकस्य निन्दाम् अकरोत्। अत्र नटः अपि लोकस्य अतिदुर्जनतां दोषदर्शितां वा प्रकाशयति। देवी तथा वैदेही इति पदाभ्यां सीतायाः चरित्रस्य अलौकिकोत्कर्षः ध्वनितो भवति। सीता अयोनिजा मनुष्यगर्भानुत्पन्ना। पुनश्च सा वैदेही अर्थात् आत्मज्ञानिनः विदेहराजस्य जनकस्य पुत्री अस्ति। तथापि राक्षसस्य रावणस्य गृहे तस्याः अवस्थानकारणात् जनाः तस्याः चरित्रदोषं पश्यन्ति। अग्निशुद्धौ अपि तेषां विश्वासः नास्ति। अतस्ते अतीव दुर्जनाः इति वक्तव्यम्। कविः भवभूतिः जनाः सीताचरित्रस्य निन्दकाः इति कथनेन रामस्य सीतापरित्यागः उचितः इति प्रस्तुतवान्। जनाः सीतायाः रावणराज्ये लङ्कायाम् अवस्थानकारणात् तस्याः दोषं प्रदर्शयन्ति। अत्र सूत्रधारः आशङ्कां प्रकटयति यत् केनापि प्रकारेण यदि एषा जनश्रुतिः महाराजं रामचन्द्रं प्रति प्रस्रवेत् तर्हि तस्य महत् कष्टं भवेत्।

व्याकरणविमर्शः -

१. वैदेह्याम्- विदेहस्य अपत्यं स्त्री इत्यर्थे विदेहशब्दात् अञ्प्रत्यये स्त्रियां ङीपि सप्तम्याः एकवचने रूपम्।

२. सापवादः - अपवादेन लाञ्छनेन सहितः सापवादः।

३. रक्षोगृहस्थितिः - रक्षसः गृहं रक्षोगृहम् इति षष्ठीतत्पुरुषसमासः। रक्षोगृहे स्थितिः रक्षोगृहस्थितिः इति सप्तमीतत्पुरुषसमासः।

४. अग्निशुद्धौ - अग्नौ शुद्धिः अग्निशुद्धिः इति सप्तमीतत्पुरुषसमासः।

५. अनिश्चयः - न निश्चयः अनिश्चयः इति नञ्तत्पुरुषसमासः।

सन्धिविच्छेदः -

१. सापवादो यतो जनः - सापवादः+यतः जनः।

२. रक्षोगृहस्थितिर्मूलमग्निशुद्धौ - रक्षोगृहस्थितिः+मूलम्+अग्निशुद्धौ।

३. त्वनिश्चयः - तु+अनिश्चयः।

अलङ्कारविमर्शः -

१. देव्यामपि इति श्लोके दोषाभावे सत्यपि दोषकथनाद् विभावनालङ्कारः। तल्लक्षणं तावत् - "विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।" इति।

२. अग्नशुद्धौ सत्यामपि अविश्वासाद् विशेषोक्तिरलङ्कारः। तल्लक्षणं तावत् -"सति हेतौ फलाभावो विशेषोक्तिः" इति।

३. अतिदुर्जन इति वक्तव्यम् इति वाक्यं प्रति पूर्ववाक्यस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः।

छन्दः - देव्यामपि इत्यस्मिन् श्लोके अनुष्टुप् छन्दः।

पाठगतप्रश्नाः - ८

२५. सीतायाः अपवादस्य किं कारणम्।

२६. रक्षोगृहस्थितिर्मूलमग्निशुद्धौ इत्यस्य सन्धिविच्छेदं कुरुत।

२७. लोकः कुत्र न विश्वसिति।

१२.१०) साम्प्रतं मूलपाठम् अवगच्छाम - ९

नटः - **सर्वथा ऋषयो देवाश्च श्रेयो विधास्यन्ति। (परिक्रम्य) भो भो क्वेदानीं महाराजः? (आकर्ण्य) एवं जनाः कथयन्ति -**

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥७॥

(इति निष्क्रान्तौ)

(इति प्रस्तावना)

अन्वयः -

नटः - सर्वथा ऋषयः देवाः च श्रेयः विधास्यन्ति। परिक्रम्य भो भो क्व इदानीं महाराजः? आकर्ण्य एवं जनाः कथयन्ति - स्नेहात् सभाजयितुम् एत्य अमूनि दिनानि उत्सवेन नीत्वा जनकोऽद्य विदेहान् गतः। ततः विमनसः देव्याः परिसान्त्वनाय नरेन्द्रः धर्मासनात् वासगृहं विशति।

अन्वयार्थः -

नटः - सर्वथा सर्वप्रकारेण ऋषयः वसिष्ठवाल्मीकिप्रमुखाः देवाः गङ्गापृथिव्यादयः देवताः च श्रेयः कल्याणं विधास्यन्ति करिष्यन्ति। (परिक्रम्य भ्रमित्वा) भो भो हे हे क्व इदानीं महाराजः अस्मिन् समये कुत्र अस्ति? आकर्ण्य श्रुत्वा एवम् इत्थं जनाः लोकाः कथयन्ति वदन्ति - स्नेहात् परमप्रेम्णः सभाजयितुम् रामचन्दम् अभिनन्दितुम् एत्य अयोध्यामागत्य अमूनि दिनानि एतानि दिनानि उत्सवेन प्रमोदेन राज्याभिषेकोत्सवेन नीत्वा यापयित्वा जनकः विदेहाधिपः अद्य अस्मिन् दिने विदेहान् स्वजनपदं जनकपुरीं गतः प्रस्थितः। ततः तस्मात् पितृगमनकारणात् विमनसः खिन्नायाः देव्याः सीतायाः परिसान्त्वनाय मनोविनोदाय नरेन्द्रः महाराजः रामचन्द्रः धर्मासनात् धर्मसिंहासनात् (उत्थाय) वासगृहम् सीतानिवासस्थानं विशति प्रविशति।

व्याख्यानम् -

ततः नटः सूत्रधारम् आश्वस्य वदति यत देवताः ऋषयः च सर्वदा मङ्गलम् एव कुर्वन्ति। अतः चिन्ता न कर्तव्या। ततः नटः समन्तात् दृष्ट्वा महाराजः श्रीरामचन्द्रः इदानीं कुत्र तिष्ठति इति पृच्छति। ततश्च कथयति यद् दशरथतनयस्य रामचन्द्रस्य पट्टाभिषेकम् उपलक्ष्य न केवलं महर्षयः अपि तु राजर्षयः अपि आगताः इति पूर्वमेव उक्तम्। अतः राजर्षिः जनकः अपि उत्सवम् उपलक्ष्य तत्र आगतः। अपि च श्रीरामस्य श्वशुरः अपि वर्तते। उत्सवसमाप्त्यनन्तरं सः अद्य स्वदेशं विदेहं प्रतिनिर्वृत्तः। अतः तस्य गमनानन्तरं जनकपुत्री रामस्य धर्मपत्नी सीता खिन्ना सञ्जाता। अतः तस्य खेदं दूरीकर्तुं रामः धर्मासनात् उत्थाय वासगृहं प्रति गतः इति आशयः। अत्र धर्मासनात् किञ्च नरेन्द्रः इति पदद्वयं रामचरित्रस्य वैशिष्ट्यं प्रदर्शयति। रामः राजधर्मपालने स्थिरमतिः आसीत्। अतः स आदौ नरेन्द्रः, ततः सीतापतिः। भाविघटनाचक्रस्य बहु किमपि आभ्यां पदाभ्यां द्योतितम्। एवं नाट्यस्य प्रस्तावना समाप्यते।

विशेषटिप्पणी -

एवम् उत्तररामचरितस्य प्रस्तावना प्रस्तुता। प्रस्तावनालक्षणं तावद् दर्पणे -

"नटी विदूषको वापि पारिपार्श्विक एव वा।

सूत्रधारेण सहिताः संलापं यत्र कुर्वते।।

चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।

आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि वा।।" इति।

अत्र प्रयोगातिशयप्रस्तावना। तल्लक्षणं दर्पणे -

"यदि प्रयोगे एकस्मिन् प्रयोगोन्यः प्रयुज्यते।

तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा।।"इति।

व्याकरणविमर्शः -

१. एत्य- आङ्पूर्वकात् इण्धातोः क्त्वाप्रत्यये तस्य ल्यबादेशे एत्य इति रूपम्।

२. विमनसः- विगतं मनः यस्याः सा विमनाः तस्याः विमनसः इति प्रादिसमासः।

सन्धिविच्छेदः -

१. दिनान्यमूनि - दिनानि+अमूनि।

२. नीत्वोत्सवेन – नीत्वा+उत्सवेन।

३. जनकोऽद्य – जनकः+अद्य।

४. गतो विदेहान् - गतः+विदेहान्।

५. देव्यास्ततो विमनसः - देव्याः+ततः+विमनसः।

६. धर्मासनाद्विशति - धर्मासनात्+विशति।

छन्दः - स्नेहादित्यस्मिन् वसन्ततिलकवृत्तम् अस्ति। अस्याः लक्षणं तावत् वृत्तरत्नाकरे - ज्ञेया वसन्ततिलका तभजा जगौ गः इति।

पाठगतप्रश्नाः - ९

२८. सीतायाः खिन्नतायाः किं कारणम्।

२९. रामः सिंहासनाद् उत्थाय कथं वासगृहं गच्छति।

३०. वसन्ततिलकछन्दसः किं लक्षणम्।

पाठसारः

समाप्तिकामो मङ्गलम् आचरेत् इति श्रुतिं मनसिकृत्य कविः नाट्यादौ पूर्वाचार्यान् व्यासवाल्मीक्यादीन् स्मरति। तेषां स्मरणेन वाग्देव्याः सरस्वत्याः लाभः तस्य इष्टः वर्तते। इदमेव मङ्गलं नान्दी इति कथ्यते नाट्यशास्त्रे। नान्दीपाठानन्तरं सूत्रधारः नाट्यकारस्य कवेः भवभूतेः संज्ञावंशादिपरिचयं प्रददाति। तदा एव स एतदपि सूचयति यत् राज्याभिषेकम् उपलक्ष्य अयोध्याम् आगताः अतिथयः सर्वे स्वस्वप्रदेशं प्रत्यागताः। महाराजदशरथस्य शान्ता नाम एका कन्या आसीत् यां स जन्मसमये एव दत्तकरूपेण अङ्गराजाया लोमपादाय प्रदत्तवान्। तस्याः पतिः महर्षिः ऋष्यशृङ्गः द्वादशवर्षव्यापिनम् एकं महायज्ञं समारब्धवान्। अतः तस्य अनुरोधात् रामजनन्यः कौशल्याकैकेयीसुमित्राः पूर्णगर्भां सीताम् अयोध्यायां संस्थाप्य वसिष्ठपत्नीम् अरुन्धतीं पुरस्कृत्य जामातुः आश्रमं गताः। अस्मिन् एव प्रसङ्गे सूत्रधारः सीताविषयकं लोकापवादं प्रकटयति तथा नटः अपि सीतायाः अग्निशुद्धिं जनाः न विश्वसन्ति इति कथयति। सूत्रधारः आशङ्कते यत् यदि राजा श्रीरामचन्द्रः एतत् सर्वं ज्ञास्यति तर्हि महदनिष्टं भविष्यति इति। तदाकर्ण्य नटः विश्वासं प्रकटयति यत् देवाः सर्वदा सर्वथा च जनानां कल्याणम् एव साधयन्ति। अपरतः पितुः जनकस्य अयोध्यायाः प्रस्थानकारणात् जानकी खिन्ना जाता। अतः तां सान्त्वयितुं पुरुषोत्तमः श्रीरामः सिंहासनाद् उत्थाय वासगृहं प्रति गृच्छति। एवं प्रकारेण नाटकस्य प्रस्तावना समाप्यते।

पाठान्तप्रश्नाः

१. नान्दी नाम किम्। नान्द्या लक्षणमुक्त्वा तस्याः विषये किञ्चिद् आलोचयत।

२. कः नाम सूत्रधारः।

३. भवभूतिः कः। तस्य विषये लिखत।

४. मङ्गलश्लोकस्य व्याख्यानं लिखत।

५. अयोध्यायां गीतवाद्यादेः अभावस्य किं कारणम् आसीत्।

६. सम्पूर्णम् उत्तररामचरितं नाटकं रामायणस्य कस्मात् भागात् किं पर्यन्तं व्याप्तम् इत्यादिकं सर्वं वर्णयत।

७. एकः श्लोकः उच्यतां यत्र अनुष्टुप्-छन्दः वर्तते। तत्र च लक्षणस्य समन्वयं प्रदर्शयत।

पाठगतप्रश्नानामुत्तराणि

१. कविः भगवतः अंशरूपां वाग्देवीं सरस्वतीम् इच्छति।

२. अनुष्टुप्छन्दसः लक्षणं -

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।

३. वच्धातोः क्विप्प्रत्यये वाक इति रूपम्। तस्य वचनम् इत्यर्थः। नमः वाकः यस्मिन् इति नमोवाकः इति बहुव्रीहिसमासः, तं नमोवाकम्।

४. आर्यमिश्रान् सर्वविभूतसम्पन्नस्य महादेवस्य उत्सवेविज्ञापयति सूत्रधारः।

५. भवभूतिः काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञः जातूकर्णीपुत्रः।

६. पदं च वाक्यं च प्रमाणं च पदवाक्यप्रमाणानि इति इतरेतरद्वन्द्वसमासः। तेषां ज्ञः पदवाक्यप्रमाणज्ञः।

७. अस्य नाटकस्य उत्तररामचरितं नाम।

८. वाक् + वश्या + इव + अनुवर्तते।

९. नाटकमिदं भवभूतिः विरचितवान्।

१०. ग्रन्थकर्तारं सरस्वती देवी वश्या स्त्री इव अनुवर्तते इति ग्रन्थकर्तुः वैशिष्ट्यम्।

११. रामस्य सुहृदः प्लवङ्गमराक्षसाः, वसिष्ठादयः ब्रह्मर्षयः, जनकादयः राजर्षयश्च रामराज्याभिषेकाय उपागताः।

१२. ते अभिषेकसमये रामस्य अभिनन्दनाय अयोध्यामुपागताः।

१३. राज्याभिषेकोत्सवसमाप्तेः परं दशरथमहिष्यः अयोध्यां त्यक्त्वा यज्ञाय ऋष्यशृङ्गमुनेः आश्रमं गता इति निःशब्दतायाः हेतुः। क

१४. अभिषेकस्य समयः अभिषेकसमयः इति षष्ठीतत्पुरुषः।

१५. सूत्रधारः आयोध्यकः संवृत्तः।

१६. रामस्य मातरः ऋष्यशृङ्गमुनेः अनुरोधाद् यज्ञं द्रष्टुं तस्य आश्रमं गताः।

१७. वसिष्ठपत्नीम् अरुन्धतीं पुरस्कृत्य रामस्य मातरः गताः।

१८. राज्ञः दशरथस्य कन्यायाः नाम शान्ता।

१९. राजा दशरथः कन्याम् अङ्गराजाय रोमपादाय प्रदत्तवान्।

२०. अपत्यकृतिकाम् इत्यस्य विहितकृत्रिमकन्याम् इत्यर्थः।

२१. विभाण्डकसुतः ऋष्यशृङ्गः शान्ताम् उपयेमे।

२२. ऋष्यशृङ्गः द्वादशवर्षव्यापि सत्रमारब्धवान्।

२३. सर्वथा व्यवहारः कर्तव्यः अतः अवचनीयता नास्ति।

२४. लोकः स्त्रीणां वाचां च साधुत्वे अपि दोषप्रदर्शकः भवति।

२५. सीतायाः अपवादस्य रक्षोगृहनिवासः कारणम्।

२६. रक्षोगृहस्थितिः+ मूलम्।

२७. लोकः अग्निशुद्धौ न विश्वसिति।

२८. सीतायाः खिन्नतायाः स्वपितुः जनकस्य विदेहगमनं कारणम्।

२९. रामः सिंहासनाद् उत्थाय सीतायाः मनोरञ्जनाय वासगृहं गच्छति।

३०. वसन्ततिलकछन्दसः लक्षणम् - उक्ता वसन्ततिलका तभजा जगौ गः इति।

॥ इति द्वादशः पाठः ॥

348sk13

१३

उत्तररामचरितम् - अष्टावक्रसंवादः

प्रस्तावना

अस्मिन् पाठे प्रस्तावनायाः परं नाटकम् आरभ्यते। अत्र प्रथमतः सीतां सान्त्वयितुं रामः प्रविशति। तस्मिन् एव काले महर्षिः अष्टावक्रः ऋष्यशृङ्गस्य आश्रमात् तत्र आगच्छति। स चागत्य सीतां रामं च प्रति गुरुजनैः वसिष्ठादिभिः प्रदत्तान् उपदेशान् श्रावयति। राम आदेशानुसारमेव जीवनं यापयिष्यति इति प्रतिज्ञां करोति। ततश्च लक्ष्मणः आगत्य चित्रकरेण अङ्कितं चित्रं द्रष्टुं रामं कथयति। प्रसङ्गतः सीतायाः पवित्रतां वर्णयति रामः इत्येतत् सर्वं वयं पाठस्य पठनेन एव ज्ञास्यामः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामस्य कांश्चन गुणान् ज्ञातुं शक्नुयात्।
- देव्याः सीतायाः चरितं जानीयात्।
- छन्दसां लक्षणानि जानीयात्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।।

१३.१) सम्पूर्णः मूलपाठः

(ततः प्रविशत्युपविष्टो रामः सीता च)

रामः- देवि ! वैदेहि ! विश्वसिहि ते हि गुरवो न शक्नुवन्ति विहातुमस्मान्।
किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥८॥

सीता - जाणामि अज्जउत्त! जाणामि। किंदु संदावआरिणो बन्धुजणविप्प-ओआ होन्ति।
(जानामि आर्यपुत्र! जानामि किन्तु संतापकारिणो बन्धुजनविप्रयोगा भवन्ति)।

रामः - एवमेतत्। एते हि दयमर्मच्छिदः संसारभावा। येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः।

(प्रविश्य)

कञ्चुकी - रामभद्र ! (इत्यर्धोक्ते साशङ्कम्) महाराज ! -

रामः - (सस्मितम्) आर्य ! ननु रामभद्र ! इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य। तद्यथाभ्यस्तमभिधीयताम्।

कञ्चुकी - देव ! ऋश्यशृङ्गाश्रमादष्टावक्रः सम्प्राप्तः।

सीता - अज्ज ! तदो किं विलम्बीअदि (आर्य! ततः किं विलम्ब्यते)।

रामः - त्वरितं प्रवेशय।

(कञ्चुकी निष्क्रान्तः।)

(प्रविश्य)

अष्टावक्रः - स्वस्ति वाम्।

रामः - भगवन् ! अभिवादये इत आस्यताम्।

सीता - भअव णमो दे। अवि कुसलं सजामातुअस्स गुरुअणस्स अज्जाए सन्ताए अ। (भगवन्नमस्ते। अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च?)

रामः - निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यशृङ्गः, आर्या च शान्ताः ?

सीता - अम्हे वि सुमरेदि (अस्मानपि स्मरति?)

अष्टावक्रः - (उपविश्य) अथ किम्। देवि ! कुलगुरुर्भगवान् वसिष्ठस्त्वामिदमाह-

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च॥९॥
तत्किमन्यदाशास्महे। केवलं वीरप्रसवा भूयाः।

रामः - अनुगृहीताः स्मः।

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥१०॥

अष्टावक्रः - इदं च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयो भूयः संदिष्टम् - 'यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात्सम्पादयितव्य' इति।

रामः- क्रियते यद्येषा कथयति।

अष्टावक्रः - ननान्दुः पत्या च देव्याः संदिष्टम्- 'वत्से, कठोरगर्भेति नानीतासि। वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः। तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामः इति।

रामः - (सहर्षलज्जास्मितम्) तथास्तु। भगवता वसिष्ठेन न किञ्चिदादिष्टोस्मि।

अष्टावक्रः - श्रूयताम्।

जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवं च राज्यम्।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्माद्यशो यत्परमं धनं वः॥११॥

रामः - यथा समादिशति भगवान्मैत्रावरुणिः।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता- अदो जेव्व राहवधुरन्धरो अज्जउत्तो। (अत एव राघवधुरन्धर आर्यपुत्रः।)

रामः - कः कोऽत्र भोः। विश्राम्यतामष्टावक्रः।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः।

(इति निष्क्रान्तः)

(प्रविश्य)

लक्ष्मणः- जयति जयत्यार्यः। आर्य! अर्जुनेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामभिलिखतम्। तत्पश्यत्वार्यः।

रामः- जानासि वत्स! दुर्मनायमानां देवीं विनोदयितुम्। तत्कियन्तमवधिं यावत्।

लक्ष्मणः- यावदार्याया हुताशनशुद्धिः।

रामः- शान्तं पापम् (ससान्त्ववचनम्।)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ १३ ॥
देवि देवयजनसम्भवे ! प्रसीद। एष ते जीवितावधिः प्रवादः।

क्लिष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि॥ १४॥

१३.२) साम्प्रतं मूलपाठम् अवगच्छाम - १०

(ततः प्रविशत्युपविष्टो रामः सीता च)

रामः- **देवि ! वैदेहि ! विश्वसिहि ते हि गुरवो न शक्नुवन्ति विहातुमस्मान्।**
किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥८॥

सीता - **जाणामि अज्जउत्त! जाणामि। किंदु संदावआरिणो बन्धुजणविप्प-ओआ होन्ति।**
(जानामि आर्यपुत्र! जानामि किन्तु संतापकारिणो बन्धुजनविप्रयोगा भवन्ति)।

रामः - **एवमेतत्। एते हि दयमर्मच्छिदः संसारभावा। येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः।**

अन्वयः -

(ततः प्रविशति उपविष्टः रामः सीता च)

रामः - दैवि वैदेहि, समाश्वसिहि, हि ते गुरवः अस्मान् विहातुं न शक्नुवन्ति। किन्तु अनुष्ठाननित्यत्वं स्वातन्त्र्यम् अपकर्षति। हि आहिताग्नीनां गृहस्थता प्रत्यवायैः सङ्कटा।

सीता - आर्यपुत्र, जानामि, बन्धुजनविप्रयोगाः सन्तापकारिणः भवन्ति।

रामः - एवम् एतत्। संसारभावाः हृदयमर्मच्छिदः येभ्यः बीभत्समानाः मनीषिणः सर्वान् कामान् सन्त्यज्य अरण्ये विश्राम्यन्ति।

अन्वयार्थः

(ततः तस्मात् प्रविशति मञ्चे आविर्भवति उपविष्टः आसीनः रामः तत्पत्नी सीता च)

रामः - हे देवि वैदेहि विदेहराजपुत्रि! समाश्वसिहि विश्वसिहि समाश्वस्ता भव। हि यतः ते तव गुरवः जनकमहोदयाः अस्मान् त्वां मां च विहातुं परित्यक्तुं न शक्नुवन्ति समर्थाः न भवन्ति।

किन्तु परन्तु अनुष्ठाननित्यत्वं नित्यनैमित्तिकादिकर्मकलापनिर्वतनस्य नियमितत्वं स्वातन्त्र्यं स्वच्छन्दताम् अपकर्षति न सहते। हि यतः आहिताग्नीनाम् आहिताः स्थापिताः अग्नयः यैः ते तेषाम् अग्निहोत्रिणां गृहस्थता गार्हस्थ्यं प्रत्यवायैः विहितानाचरणजन्यैः पातकैः सङ्कटा दुःखपूरिता।

सीता - आर्यपुत्र स्वामिन्, जानामि वेद्मि, किन्तु परन्तु बन्धुजनविप्रयोगाः पितृजनादिविरहाः सन्तापकारिणः खेदजनकाः भवन्ति सन्ति।

रामः - एवम् एतत् त्वया यदुक्तं तत् सत्यमेव। संसारभावाः जीवलोकधर्माः हृदयमर्मच्छिदः हृदयस्य मर्माणि सन्धिस्थानानि छिन्दति ये ते हृदयमर्मस्थलभेदकाः येभ्यः संसारभावेभ्यः बीभत्समानाः जुगुप्समानाः विरक्ताः मनीषिणः आत्मदर्शिनः सर्वान् समस्तान् कामान् विषयान् सन्त्यज्य परित्यज्य अरण्ये वने विश्राम्यन्ति शान्तिं प्राप्नुवन्ति।

व्याख्यानम् -

अत्र श्रीरामः पितृगमनात् तद्वियोगात् खिन्नां पत्नीं सीतां प्रति समाश्वासं करोति। जनकमहोदयाः अस्माकं पूज्याः गुरुजनाः च वर्तन्ते। अतः ते अधिकं कालं व्याप्य अस्मान् विहाय स्थातुं न शक्ताः। अतः स पुनरागमष्यति इति भावः। एवं प्रकारेण जानकीं सान्त्वयति प्रभुः श्रीरामः।

नित्यं नैमित्तिकं काम्यं चेति त्रिविधं कर्म भवति। तेषु नित्यकर्मानुष्ठाने फलं नास्ति, किन्तु अनाचारे प्रत्यवायो सम्भवति। नैमित्तिककर्मानुष्ठाने फलं विद्यते अपि च अकरणे सति प्रत्यवायो भवति। काम्यकर्मानुष्ठाने फलं किमपि नास्ति अविधाने दोषः अपि नास्ति। धार्मिकः पुरुषः एतानि कर्माणि नियतम् आचरन्ति। अर्थात् ते वैवाहिकजीवने नित्यम् अग्निहोत्रम् उपासते। तदेव तेषां नित्यकर्म। एवं विदेहराजः जनकः अग्निहोत्रम् आचरति स्म। अतः अयोध्यायां स बहुदिनं यावत् स्थातुम् अशक्तः आसीत्। तस्मात् एव स गतवान्, न तु सीतां प्रति स्नेहस्य न्यूनतावशात् इति सीतां प्रति रामस्य सान्त्वनवचनम्।

रामस्य आश्वासप्रदानात् परं सीता रामम् उद्दिश्य अकथयत् यत् सा सर्वमेव अवगच्छति इति। किन्तु स्वजनानां वियोगः सततं सन्तापदायी भवति। एतत्सीतावचः श्रुत्वा सत्यतया स्वीकृत्य च रामः अवदत् – अस्य संसारस्य धर्माः हृदयस्य मर्मभेदकाः सन्ति। येभ्यः विरक्ताः आत्मज्ञाः सर्वान् विषयान् परित्यज्य वनेषु शान्तिं लभन्ते। तत्र कामना एव दुःखस्य मूलम्।

व्याकरणविमर्शः -

१. विहातुम् - विपूर्वकात् हाधातोः तुमुन्प्रत्यये विाहतुम् इति रूपम्।

२. अनुष्ठानम्- अनुपूर्वकात् स्थाधातोः ल्युटि तस्य अनादेशे अनुष्ठानम् इति रूपम्। अनुष्ठानस्य नित्यत्वम् अनुष्ठाननित्यत्वम् इति षष्ठीतत्पुरुषसमासः।

३. प्रत्यवायः- प्रति अव इत्युपसर्गद्वयपूर्वकात् इण्धातोः घञ्प्रत्यये प्रत्यवाय इति रूपम्।

४. आहिताग्नीनाम् - आहितः अग्निः यैः ते आहिताग्नयः, तेषाम् आहिताग्नीनाम् इति बहुव्रीहिसमासः । साग्निकानाम् इत्यर्थः।

५. बीभत्समानाः - बध्धातोः सनप्रत्यये निष्पन्नाद् बीभत्सधातोः शानचि पुंसि प्रथमाबहुवचने बीभत्समानाः इति रूपम्।

६. बन्धुजनविप्रयोगाः - विपूर्वकात् प्रपूर्वकात् युज्धातोः घञा विप्रयोगशब्दो निष्पन्नः। बन्धुजनानां विप्रयोगाः बन्धुजनविप्रयोगाः इति षष्ठीतत्पुरुषसमासः।

सन्धिविच्छेदः -

१. किन्त्वनुष्ठाननित्यत्वम् - किन्तु+अनुष्ठाननित्यत्वम्।

२. ह्याहिताग्नीनाम् - हि+आहिताग्नीनाम्।

३. प्रत्यवायैर्गृहस्थता - प्रत्यवायैः+गृहस्थता।

छन्दः - अस्मिन् श्लोके अनुष्टुप्-छन्दः वर्तते।

अलङ्कारविमर्शः -

१. अत्र श्लोके पूर्वार्धं प्रति उत्तरार्धस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः।

२. उत्तरार्धेन पूर्वार्धस्य समर्थनाद् अर्थान्तरन्यासालङ्कारः। तल्लक्षणं दर्पणे -

"सामान्यं वा विशेषेण विशेषस्तेन वा यदि।

कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते।।

साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः।।" इति।

३. अत्र अर्थान्तरन्यासस्य काव्यलिङ्गस्य चाङ्गाङ्गिभावात् सङ्करालङ्कारः।

पाठगतप्रश्नाः - १

१. किं गृहस्थानां स्वातन्त्र्यम् अपकर्षति।

२. किन्त्वनुष्ठाननित्यत्वम् सन्धिविच्छेदं कुरुत।

३. कर्म कतिविधं कतिविधं भवति। कानि च तानि।

४. आहिताग्नीनां गृहस्थता कथं भवति।

५. के सन्तापकारिणः भवन्ति।

६. संसारभावाः कथं भवन्ति।

७. कथं मनीषिणः अरण्ये विश्राम्यन्ति।

१३.३) साम्प्रतं मूलपाठम् अवगच्छाम - ११

(प्रविश्य)

कञ्चुकी - **रामभद्र! (इत्यर्धोक्ते साशङ्कम्) महाराज ! -**

रामः - **(सस्मितम्) आर्य ! ननु रामभद्र ! इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य। तद्यथाभ्यस्तमभिधीयताम्।**

कञ्चुकी - **देव ! ऋश्यशृङ्गाश्रमादष्टावक्रः सम्प्राप्तः।**

सीता - **अज्ज ! तदो किं विलम्बीअदि (आर्य! ततः किं विलम्ब्यते)।**

रामः - **त्वरितं प्रवेशय।**

(कञ्चुकी निष्क्रान्तः।)

अन्वयः -

(प्रविश्य) कञ्चुकी - रामभद्र! (इत्यर्धोक्ते साशङ्कम्) महाराज!

रामः - (सस्मितम्) आर्य! ननु रामभद्र! इत्येव तातपरिजनस्य मां प्रति उपचारः शोभते। तद् यथा अभ्यस्तम् अभिधीयताम्।

कञ्चुकी - देव! ऋश्यशृङ्गाश्रमाद् अष्टावक्रः सम्प्राप्तः।

सीता - आर्य! ततः किं विलम्ब्यते।

रामः - त्वरितं प्रवेशय।

(कञ्चुकी निष्क्रान्तः।)

अन्वयार्थः -

(प्रविश्य प्रवेशं कृत्वा)

कञ्चुकी - रामभद्र शोभनराम (इत्यर्धोक्ते साशङ्कं सभयम्) महाराज प्रभो...।

रामः - (सस्मितम् ईषद्धास्येन सहितम्) आर्य तातपरिजनस्य पितृचरणसेवकस्य रामभद्र इत्येव मां रामचन्द्रं प्रति उपचारः व्यवहारः शोभते युज्यते। तत् तस्माद् हेतोः यथाभ्यस्तम् अभ्यासानुरूपम् अभिधीयताम् उच्यताम्।

कञ्चुकी - देव प्रभो ऋष्यशृङ्गाश्रमात् मुनेः ऋष्यशृङ्गस्य आश्रमात् अष्टावक्रः तन्नामकः महात्मा सम्प्राप्तः आगतः।

सीता - आर्य ततः तस्मात् किं किमर्थं विलम्ब्यते विलम्बः क्रियते।

रामः - त्वरितम् अतिशीघ्रं प्रवेशय प्रवेशं कारय।

(कञ्चुकी निष्क्रान्तः गतः)

व्याख्यानम् -

ततः कञ्चुकी प्रविश्य रामचन्द्रं पूर्वतनाभ्यासानुसारं रामभद्र इत्येव आहूतवान्। किन्तु इदानीं सः अयोध्यायाः अधिपतिः सञ्जातः। अतः सशङ्कितः स परस्मिन् एव मूहूर्ते रामं महाराज इति आहूतवान्। एतत् सर्वम् अवलोक्य श्रीरामः स्मितहासं कृत्वा कञ्चुकीम् उद्दिश्य अवोचत् यत् रामभद्र इत्येव व्यवहारः तस्मै रोचते। यतो हि एते परिचारकाः पितृचरणसेवकाः भवन्ति। अत्र रामस्य औदार्यं प्रशंसनीयमेव। महाराजः सन्नपि भृत्यान् भयरहितान् सम्पादयति, एतेन तस्य क्षमा कथम् आसीत् इति बुध्यते। एवं तस्य धीरोदात्तनायकत्वम् उपपन्नम्। तस्मात् हेतोः पूर्वाभ्यासानुसारं वक्तव्यम् इति। कञ्चुकी ज्ञापितवान् यत् ऋष्यशृङ्गमुनेः आश्रमात् महर्षिः अष्टावक्रः आगतः। तदा रामः सीता च महर्षिं शीघ्रमेव अन्तः आनयनाय आज्ञापयतः। ततः च कञ्चुकी निर्गच्छति।

विशेषटिप्पणी -

कञ्चुकः परिच्छेदः अस्यास्तीति कञ्चुकी। कञ्चुकिलक्षणं नाट्यशास्त्रे तावत् -

"अन्तःपुरचरो वृद्धो विप्रो रूपगुणान्वितः।

सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।।" इति। स्मितलक्षणं दर्पणे तु -

"ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम्।" इति।

व्याकरणविमर्शः -

१. तातपरिजनस्य – तातस्य परिजनः तातपरिजनः, तस्य तातपरिजनस्य इति षष्ठीतत्पुरुषसमासः।

२. ऋष्यशृङ्गाश्रमात् - ऋष्यशृङ्गस्य आश्रम ऋष्यशृङ्गाश्रमः, तस्माद् ऋष्यशृङ्गाश्रमाद् इति षष्ठीतत्पुरुषसमासः।

पाठगतप्रश्नाः - २

८. कस्य रामभद्र इत्युपचारः शोभते।

९. ऋष्यशृङ्गाश्रमात् क आगतः।

१०. कः रामं रामभद्र इति सम्बोधयति।

१३.४) साम्प्रतं मूलपाठम् अवगच्छाम - १२

(प्रविश्य)

अष्टावक्रः - स्वस्ति वाम्।

रामः - भगवन् ! अभिवादये इत आस्यताम्।

सीता - भअव णमो दे। अवि कुसलं सजामातुअस्स गुरुअणस्स अज्जाए सन्ताए अ।
(भगवन्नमस्ते। अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च?)

रामः - निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यश्रृङ्गः, आर्या च शान्ताः ?

सीता - अम्हे वि सुमरेदि (अस्मानपि स्मरति?)

अष्टावक्रः - (उपविश्य) अथ किम्। देवि ! कुलगुरुर्भगवान् वसिष्ठस्त्वामिदमाह-

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च॥९॥
तत्किमन्यदाशास्महे। केवलं वीरप्रसवा भूयाः।

अन्वयः -

(प्रविश्य) **अष्टावक्रः** - वां स्वस्ति।

रामः - भगवन् ! अभिवादये इत आस्यताम्।

सीता - भगवन् ते नमः। अपि सजामातृकस्य गुरुजनस्य आर्यायाः शान्तायाः च कुशलम्?

रामः - मे आवुत्तः सोमपीथी भगवान् ऋष्यश्रृङ्गः निर्विघ्नः, आर्या च शान्ताः ?

सीता - अस्मान् अपि स्मरति?

अष्टावक्रः - (उपविश्य) अथ किम्। देवि ! कुलगुरुः भगवान् वसिष्ठः त्वाम् इदम् आह-

भगवती विश्वम्भरा भवतीम् असूत। प्रजापतिसमो राजा जनकः ते पिता। नन्दिनि तेषां पार्थिवानां त्वं वधूः असि, येषां कुलेषु सविता गुरुः वयं च (गुरवः)।

तत् अन्यत् किम् आशास्महे। केवलं वीरप्रसवाः भूयाः।

अन्वयार्थः -

(प्रविश्य प्रवेशं सम्पाद्य) **अष्टावक्रः** - वां युवाभ्यां स्वस्ति कुशलम् अविनाशः भवतात्।

रामः - भगवन् देव अभिवादये प्रणमामि। इतः अत्र आस्यताम् उपविश्यताम्।

सीता - भगवन् षडैश्वर्यशालिन् ते तुभ्यं नमः। अपि सजामातृकस्य जामात्रा सह गुरुजनस्य कौशल्याकैकेयीसुमित्राणाम् आर्यायाः शान्तायाः दशरथकन्यायाः अपि कुशलं सर्वं कुशलम् अस्ति खलु।

रामः - मे मम सोमपीथी सोमपानकर्ता आवुत्तः भगिनीपतिः भगवान् ऋष्यश्रृङ्गः आर्या शान्ता च निर्विघ्नः विघ्नरहितः (खलु)।

सीता - किं सा शान्ता अस्मान् अपि स्मरति चिन्तयति।

अष्टावक्रः - (उपविश्य उपवेशनं कृत्वा) (स्मरन्ति सर्वे भवन्तीम्। कुशलिनः सर्वे) अथ अधुना किम्। देवि हे राजमहिषि, कुलगुरुः भगवान् वसिष्ठः त्वां सीताम् इदम् एतत् आह अवोचत् -

भगवती षाड्गुण्यपरिपूर्णा विश्वम्भरा पृथिवी भवतीं सीताम् असूत प्रसूतवती। प्रजापतिसमो ब्रह्मसदृशः राजा नृपः जनकः विदेहापतिः ते तव पिता जनकः। नन्दिनि हे सौभाग्यवति, तेषां प्रसिद्धानां पार्थिवानां राज्ञां त्वं सीता वधूः कुलस्त्री असि भवसि, येषां राज्ञां कुलेषु वंशेषु सविता सूर्यः गुरुः पिता वंशप्रवर्तकः वयं च गुरवः हितोपदेष्टारः स्म।

तत् तस्मात् अन्यत् अपरं किम् आशास्महे इच्छामः। केवलं वीरप्रसवा वीरपुत्रका भूयाः भवतात्।

व्याख्यानम् -

ततः भगवान् अष्टावक्रः प्रविश्य ताभ्यां रामसीताभ्याम् आशीर्वादं दत्तवान् कल्याणम् अस्तु इति। रामः तस्य अभिवादनं कृत्वा आसनग्रहणाय तम् अनुरुद्धवान्। सीता च तस्य नमस्कारं कृत्वा जामातुः ऋष्यशृङ्गस्य तथा आर्यायाः शान्तायाः कुशलवार्ताम् अपृच्छत्। रामोऽपि भगिनीपतेः

ऋष्यशृङ्गस्य भगिन्याः च वार्तां पृष्टवान्। ततः सीतापि जिज्ञासितवती यत् तौ अपि किं रामं सीतां च स्मरतः इति। तानि वचनानि श्रुत्वा आसने च समुपविश्य महर्षिः अष्टावक्रः सीताम् उक्तवान् यत् तथैव भवति। ततः स कुलगुरुणा वसिष्ठेन सीतां प्रति यत् कथितं तत्सर्वं विज्ञापितवान् –

भगवती पृथिवी सीतां प्रसूतवती। किञ्च प्रजापतितुल्यः राजा जनकः सीतायाः पिता। अपि च सीता यस्य रघुवंशस्य कुलवधूः तस्य वंशस्य गुरुः भगवान् सूर्यः स्वयं वसिष्ठश्च। अस्मिन् श्लोके रघुवंशस्य प्रतापः औज्ज्वल्यं च वसिष्ठमुखेन प्रकाशितं कविना। अत्र सीतां प्रति भगवतः वसिष्ठस्य वचने सीतायाः सर्वथा एव कल्याणं भविष्यति इति सारः वर्तते। एवम् एतेषां महाचरितानां संयोगात् सीतायाः कदापि अशुभं न भविष्यति, सदा मङ्गलमेव भविष्यति इत्याशयः।

अतः सीता वीरपुत्रस्य जननी भविष्यतीति महर्षेः वशिष्ठस्य आशीर्वादः।

विशेषटिप्पणी -

अत्र ऋषिश्रेयोविधानरूपस्य वसिष्ठानुग्रहस्य बीजस्य बहूकरणात् परिकरः। तल्लक्षणं दर्पणे - "बीजस्य बहूकरणं परिकरः।" इति।

अष्टावक्रं प्रति भगवन् इति रामस्य सम्बोधनम्। भगवतः लक्षणं तावत्-

"उत्पत्तिं च स्थितिं चैव लोकानामगतिं गतिम्।

वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।।" इति।

व्याकरणविमर्शः -

१. सजामातृकस्य- जामात्रा सहितः सजामातृकः तस्य सजामातृकस्य इति बहुव्रीहिसमासः।

२. सोमपीथी – पीथं नाम पानम्। सोमस्य पीथं सोमपीथम् इति षष्ठीतत्पुरुषसमासः। तद् अस्य अस्ति इति अर्थे सोमपीथशब्दात् अत इनिठनौ इति इनिप्रत्यये सोमोपीथी इति रूपम्

३. विश्वम्भरा- विश्वोपपदपूर्वकात् भृधातोः खच्प्रत्यये मुमागमे टापि विश्वम्भरा इति रूपम्।

अलङ्कारविमर्शः -

१. प्रजापतिसमः इत्यत्र उपमालङ्कारः। तल्लक्षणं तावत्- "साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।" इति।

२. श्लोके येषां कुलेषु सविता गुरुर्वयं च इत्यत्र चेति शब्दोपादानात्समुच्चयः। तल्लक्षणं दर्पणे -

"समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके।

खले कपोतिकान्यायात्तत्करः स्यात्परोऽपि चेत्।

गुणौ क्रिये च युगपत् स्यातां यद्वा गुणक्रिये।।" इति।

३. जनकः पिता इत्यत्र पुनरुक्तवदाभासः। तल्लक्षणं दर्पणे -

"आपाततो यदर्थस्य पौनरुक्त्येन भासनम्।

पुनरुक्तवदाभासः स भिन्नाकारशब्दगः।।" इति।

छन्दः - विश्वम्भरा इत्यस्मिन् श्लोके वसन्ततिलकं छन्दः वर्तते। तल्लक्षणं तावद् - "उक्ता वसन्ततिलकं तभजा जगौ गः" इति।

पाठगतप्रश्नाः - ३

११. सीतायाः माता का।

१२. सीतायाः पिता कः।

१३. सीता कस्य वंशस्य वधूः।

१४. सीतां प्रति वशिष्ठस्य क आशीर्वादः।

१३.५) साम्प्रतं मूलपाठम् अवगच्छाम - १३

रामः - **अनुगृहीताः स्मः।**

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥१०॥

अष्टावक्रः - **इदं च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयो भूयः संदिष्टम् - 'यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात्सम्पादयितव्य' इति।**

रामः- **क्रियते यद्येषा कथयति।**

अष्टावक्रः - **ननान्दुः पत्या च देव्याः संदिष्टमृष्यशृङ्गेण - 'वत्से, कठोरगर्भेति नानीतासि। वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः। तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामः इति।**

रामः - **(सहर्षलज्जास्मितम्) तथास्तु। भगवता वसिष्ठेन न किञ्चिदादिष्टोस्मि।**

अन्वयः -

रामः - अनुगृहीताः स्मः।

लौकिकानां साधूनां वाक् हि अर्थम् अनुवर्तते। पुनः आद्यानाम् ऋषीणां वाचम् अर्थः अनुधावति ॥१०॥

अष्टावक्रः - इदं च भगवत्या अरुन्धत्या देवीभिः शान्तया च भूयो भूयः सन्दिष्टम् - 'यः कश्चिद् अस्याः गर्भदोहदः भवति सः अवश्यम् अचिरात् सम्पादयितव्यः' इति।

रामः- एषा यत् कथयति क्रियते।

अष्टावक्रः - ननान्दुः पत्या ऋष्यशृङ्गेण च देव्याः सन्दिष्टम्- 'वत्से, कठोरगर्भा इति न आनीता असि। वत्सः अपि रामभद्रः त्वद्विनोदार्थम् एव स्थापितः। तत् पुत्रपूर्णोत्सङ्गाम् आयुष्मतीं द्रक्ष्यामः इति।

रामः - (सहर्षलज्जास्मितम्) तथा अस्तु। भगवता वसिष्ठेन न किञ्चिद् आदिष्टः अस्मि।

अन्वयार्थः -

रामः - अनुगृहीताः कृतार्थाः स्मः भवामः।

हि यतः लोकिकानां सामान्यानां साधूनां सतां वाक् वाणी अर्थं वस्तु अनुवर्तते अनुसरति। पुनः परन्तु आद्यानां वैदिकानां प्रधानानाम् ऋषीणाम् वशिष्ठादीनां वाचं वाणीम् अर्थं वस्तु अनुधावति अनुसरति।॥१०॥

अष्टावक्रः - इदं च भगवत्या देव्या अरुन्धत्या देवीभिः कौशल्याकैकेयीसुमित्राभिः शान्तया श्रीरामभगिन्या च भूयो भूयः वारं वारं सन्दिष्टम् आदिष्टम् - 'यः कश्चित् कोऽपि अस्याः सीताया गर्भदोहदः अभिलाषा भवति सः अवश्यं निश्चयेन अचिरात् अतिशीघ्रं सम्पादयितव्यः पूरणीयः' इति।

रामः- एषा सीता यत् यथा कथयति वदति तथा क्रियते सम्पाद्यते।

अष्टावक्रः - ननान्दुः पतिस्वसुः पत्या स्वामिना ऋष्यशृङ्गेण च देव्याः देवीं प्रति सन्दिष्टम् उक्तम् - 'वत्से कल्याणि, कठोरगर्भा पूर्णगर्भा इति न आनीता आहूता असि। वत्सः पुत्रः अपि रामभद्रः रामचन्द्रः त्वद्विनोदार्थं तव विनोदाय एव स्थापितः तत्र स्थितये आदिष्टः। तत् तस्मात् पुत्रपूर्णोत्सङ्गाम् सन्तानभूषितक्रोडाम् आयुष्मतीं चिरञ्जीविनीं द्रक्ष्यामः अवलोकयिष्यामः इति।

रामः - (सहर्षलज्जास्मितम् हर्षेण लज्जया स्मितहासेन च सहितम्) तथा एवम् अस्तु भवतु। भगवता कुलगुरुणा वसिष्ठेन न किञ्चिद् न किमपि कर्तुम् आदिष्टः अस्मि।

व्याख्यानम् -

सीता वीरपुत्रस्य जननी भविष्यतीति महर्षेः वशिष्ठस्य आशीर्वादं श्रुत्वा रामः आत्मानम् अनुगृहीतं मन्यते। स तदा महर्षीणाम् उत्कृष्टत्वं वर्णयति। लौकिकाः सामान्याः जनाः साधवः वा यत् भवति तदेव सर्वं वर्णयति। अर्थात् प्रत्यक्षीकृतस्य विषयस्य वर्णना एव तैः क्रियते। न कस्यापि अप्रत्यक्षस्य। किन्तु प्राचीनाः महर्षयः विपरीतम् एव आचरन्ति। ते यत् कथयति तत् सर्वमेव भाविनि काले भविष्यति। अनेन तेषां दूरदर्शिता ज्ञायते। अतः महर्षिः वसिष्ठः यत् सीतायां वीरपुत्रस्य जन्म भविता इति अवदत् तत् सत्यमेव भाविकाले सम्भविष्यति इति श्रीरामस्याशयः।

ततः अष्टावक्रः वसिष्ठपत्न्या अरुन्धत्या रामस्वस्रा शान्तया मातृभिः कौशल्याकैकेयीसुमित्राभिः च रामं प्रति प्रेषितं सन्देशं वर्णयति। सम्प्रति सीता गर्भवती अस्ति। अतः अस्याम् अवस्थायां तस्याः सर्वविधाः अभिलाषाः रामेण त्वरा पालनीयाः। रामः सहासं तेषाम् आदेशम् अङ्गीकरोति।

महर्षिः ऋष्यशृङ्गः अष्टावक्रमुखेन यज्ञस्थानं प्रति सीता कथं न आनीता इति ज्ञापयति। स वदति यत् सीता इदानीं पूर्णगर्भा अस्ति। अतः आगमने क्लेशः सम्भविष्यति इति विचिन्त्य सा न आनीता। वत्सः रामचन्द्रः अपि सीतायाः मनोरञ्जनाय एव अयोध्यायां तिष्ठति। ततश्च स ससुताम् आयुष्मतीं सीतां द्रष्टुं आगमिष्यति परमिति ऋष्यशृङ्गमुनेः आश्वासनम्। रामः तत्सर्वं श्रुत्वा वसिष्ठेन तं प्रति कश्च उपदेशः प्रदत्तः न वा इति पृच्छति।

विशेषटिप्पणी -

अत्र लौकिकानामिति श्लोके ऋषिश्रेयोविस्तरणरूपस्य बीजगुणस्य वर्णनाद् विलोभनं नाम सन्ध्यङ्गं भवति। तल्लक्षणं तावद् - "बीजगुणवर्णनं विलोभनम्" इति।

व्याकरणविमर्शः -

१. लौकिकानाम् - लोके भवा लौकिकाः। अत्र लोकात् ठञ्प्रत्ययः। लौकिकशब्दस्य षष्ठीबहुवचने लौकिकानामिति रूपम्।

२. आद्यानाम् - आदौ भवाः आद्याः। आदिशब्दाद् यत्प्रत्यये आद्यशब्दो निष्पन्नः। तस्य षष्ठीबहुवचने आद्यानाम् इति रूपम्।

३. ऋषीणाम् - ऋष गताविति धातुः। ऋष्धातोः "सर्वधातुभ्य इन्" इति सूत्रेण इन्प्रत्यये, "इगुपधात् कित्" इति सूत्रेण किति च ऋषिशब्दो निष्पन्नः। तस्यैव षष्ठीबहुवचने ऋषीणामिति रूपम्।

४. सन्दिष्टम् - सम्-पूर्वकात् दिश्धातोः क्तप्रत्यये नपुंसके सन्दिष्टम् इति रूपम्।

५. सम्पादयितव्यम् - सम्पूर्वकात् पद्धातोः णिचि तव्यति नपुंसके सम्पादयितव्यम् इति रूपम्।

६. कठोरगर्भा - कठोरः गर्भः यस्याः सा कठोरगर्भा इति बहुव्रीहिसमासः।

७. पुत्रपूर्णोत्सङ्गाम् - पुत्राभ्यां पूर्णः पुत्रपूर्णः इति तृतीयातत्पुरुषसमासः। पुत्रपूर्णः उत्सङ्गः यस्याः सा पुत्रपूर्णोत्सङ्गा इति बहुव्रीहिसमासः, ताम्।

छन्दः-

१. लौकिकानाम् इति श्लोके अनुष्टुप् छन्दः।

अलङ्कारविमर्शः -

१. लौकिकानाम् इति श्लोके लौकिकानां साधूनाम् अपेक्षया आद्यानाम् ऋषीणां वचसाम् आधिक्यवचनाद् व्यतिरेकालङ्कारः। तल्लक्षणं दर्पणे -

"आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा। व्यतिरेकः" इति।

पाठगतप्रश्नाः - ४

१५. केषां वाचम् अर्थः अनुधावति।

१६. केषाम् अर्थं वाग् अनुवर्तते।

१७. अरुन्धत्याः रामस्य जननीनां शान्तायाश्च रामं प्रति क आदेशः।

१८. सीता कुतः यज्ञं प्रति नानीता।

१९. रामः कथम् अयोध्यायां स्थापितः।

२०. ऋष्यशृङ्गः सीतां कीदृशीं द्रष्टुमिच्छति

१३.६) साम्प्रतं मूलपाठम् अवगच्छाम - १४

अष्टावक्रः - श्रूयताम्।

जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवं च राज्यम्।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्माद्यशो यत्परमं धनं वः॥११॥

रामः - यथा समादिशति भगवान्मैत्रावरुणिः।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता- अदो जेव्व राहवधुरन्धरो अज्जउत्तो। (अत एव राघवधुरन्धर आर्यपुत्रः।)

रामः - कः कोऽत्र भोः। विश्राम्यतामष्टावक्रः।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः।

(इति निष्क्रान्तः)

अन्वयः -

अष्टावक्रः - श्रूयताम्।

वयं जामातृयज्ञेन निरुद्धाः त्वं बाल एव असि च राज्यं नवम् (अत एव) प्रजानाम् अनुरञ्जते युक्तः स्याः तस्मात् यशः वः परमं धनम् (अस्ति)।।११।।

रामः - भगवान् मैत्रावरुणिः यथा समादिशति।

लोकस्य आराधनाय स्नेहं दयां सौख्यं च यदि वा जानकीम् अपि मुञ्चतो मे व्यथा न अस्ति॥ १२॥

सीता - अत एव आर्यपुत्रः राघवधुरन्धरः।

रामः - कः कः अत्र भोः। अष्टावक्रः विश्राम्यताम्।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः।

(इति निष्क्रान्तः)

अन्वयार्थः -

अष्टावक्रः - श्रूयताम् आकर्ण्यताम्।

वयं वसिष्ठादयः जामातृयज्ञेन ऋष्यशृङ्गस्य द्वादशवर्षव्यापिना यज्ञेन निरुद्धाः उपरुद्धाः स्मः। त्वं रामः बालः कुमारः राज्यशासने अप्रौढः च असि। राज्यं नवम् नूतनम् अस्ति। अतः प्रजानां लोकानाम्

अनुरञ्जने अनुरागोत्पादने युक्तः तत्परः स्याः भवेः। तस्मात् अनुरागोत्पादनात् यशः कीर्तिर्भविष्यति, यद् यशः वः युष्माकं परमं सर्वोत्कृष्टं धनम् सम्पत्।।११।।

रामः - भगवान् षडैश्वर्यसम्पन्नः मैत्रावरुणिः वसिष्ठमहर्षिः यथा समादिशति यथा आज्ञापयति तथैव करिष्यामीति भावः।

लोकस्य जनस्य आराधनाय प्रसादनाय स्नेहम् अनुरागं, दयां करुणां, सौख्यं सुखं च यदि वा जानकीम् अपि सीताम् अपि मुञ्चतः त्यजतः मे मम व्यथा दुःखं न अस्ति न भवति॥१२॥

सीता- अत एव अस्मात् कारणाद् आर्यपुत्रः मम स्वामी राघवधुरन्धरः रघुकूलशिरोमणिः।

रामः - कः कः अत्र भोः अत्र कः अस्ति। अष्टावक्रः विश्राम्यतां अष्टावक्रस्य विश्रामप्रबन्धः सम्पाद्यताम्।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः आगतः।

(इति निष्क्रान्तः एवमुक्त्वा निर्गतः)

व्याख्यानम् -

अत्र वसिष्ठः रामाय राज्यशासनविषयकम् उपदेशं ददाति। ऋष्यशृङ्गस्य यज्ञम् उपलक्ष्य राज्यस्य सर्वे एव प्रौढाः जनाः स्वयं कुलगुरुः वसिष्ठः च तत्र सन्ति। अतः तेषाम् आगमने विलम्बः भविष्यति। रामस्य च सम्प्रति एव राज्याभिषेकः अभवत्। अतः राज्यशासनविषये सः अधुनापि अनभिज्ञः अस्ति। रघुवंशीयानां नृपाणां यशः एव परमम् अभीष्टं वर्तते। अतः कीर्तिलाभाय सततं प्रजामनसाम् अनुरञ्जने तत्परः भवितव्यः। यथा प्रजाः नृपे सन्तुष्टाः भवेयुः इत्यस्मिन् विषये ध्यानं देयम्। तेनैव रामः यथार्थः प्रजापालकः राजा भवितुं शक्नुयात् इति वसिष्ठस्य अभिप्रायः। भाविनि काले प्रजानाम् अनुरागम् उत्पादयितुं रामेण सीतापरित्यागः करिष्यते इति घटनानिर्देशः अत्र प्राप्यते।

रामः वसिष्ठेन यथा आदिष्टं तथा एव कर्तुं प्रतिज्ञां कृतवान्। प्रजापालनाय स सर्वम् अपि कर्तुं समर्थः। तस्य कृते स स्नेहं दयां सौख्यं सर्वम् अपि परित्यक्तुं प्रस्तुतः। अपि च जनानाम् आराधनाय यदि धर्मपत्नी जानकी अपि त्यक्तव्या भवति तर्हि अपि तस्य किञ्चिदपि दुःखं न भविष्यति। अनेन श्रीरामस्य प्रजावात्सल्यं गुरुवचने श्रद्धा च प्रकाशिता भवति। अपि च भाविनि काले प्रजानां कृते सीता अपि परित्यक्ष्यते इति द्योत्यते।

प्रजापालनविषयिणीं रामस्य प्रतिज्ञाम् आकर्ण्य सीता स्वभर्तारं रामं प्रशंसन्ती अवदत् यद् अस्मात् कारणाद् एव श्रीरामः रघुकुलस्य श्रेष्ठः। रामः ततः भगवतः अष्टावक्रस्य विश्रामव्यवस्थाकरणाय आदिष्टवान्। तदनन्तरं भगवान् अष्टावक्रः विश्रामात् उत्थाय तत्र परिक्राम्यति। तदा तत्र लक्ष्मणः उपस्थितः। तं दृष्ट्वा अष्टावक्रः ' कुमारलक्ष्मणः प्राप्तः ' इत्युक्त्वा निष्क्रान्तः।

विशेषटिप्पणी -

अत्र जामातैयज्ञेनेति श्लोके प्रजानुरञ्जनाद् प्राप्तं यशः परमं धनमित्यादिना सीतानिर्वासनरूपं बीजमुक्तम्। तल्लक्षणं तावद् दर्पणे –

"अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।

फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।।" इति।

व्याकरणविमर्शः -

१. जामातृयज्ञेन – जामातुः यज्ञः जामातृयज्ञः इति षष्ठीतत्पुरुषसमासः, तेन जामातृयज्ञेन।

२. अनुरञ्जने - अनुपूर्वकात् रञ्ज्धातोः ल्युटि सप्तम्येकवचने अनुरञ्जने इति रूपम्।

३. सौख्यम् – सुखस्य भावः इत्यर्थे ष्यञ्प्रत्यये सौख्यम् इति रूपम्।

४. मुञ्चतः - मुच्-धातोः शतरि षष्ठ्येकवचने मुञ्चतः इति रूपम्।

५. मैत्रावरुणिः - मित्रश्च वरुणश्च मित्रावरुणौ इति इतरेतरद्वन्द्वसमासः। मित्रावरुणयोः अपत्यं पुमान् इति विग्रहे "बाह्वादिभ्यश्च" इति इञ्प्रत्यये मैत्रावरुणिः इति रूपम्।

छन्दः -

१. जामातृयज्ञेन इत्यस्मिन् श्लोके इन्द्रवज्राछन्दः वर्तते। तल्लक्षणम् उक्तं - स्यादिन्द्रवज्रा यदि तौ जगौ गः। इति।

२. स्नेहमिति श्लोके अनुष्टुप् छन्दः।

पाठगतप्रश्नाः - ५

२१. वसिष्ठादयः केन निरुद्धाः।

२२. रघुवंशीयानां परमं धनं किम्।

२३. जामातृयज्ञेनेति श्लोके किं छन्दः वर्तते। तस्य लक्षणं किम्।

२४. मैत्रावरुणिः इति रूपं साधयत।

२५. लोकस्य आराधनाय रामः किं किं त्यक्तुं प्रस्तुतः।

२६. राज्ञः प्रधानः धर्मः कः।

१३.७) साम्प्रतं मूलपाठम् अवगच्छाम - १५

(प्रविश्य)

लक्ष्मणः- **जयति जयत्यार्यः। आर्य! अर्जुनेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामभिलिखितम्। तत्पश्यत्वार्यः।**

रामः- **जानासि वत्स! दुर्मनायमानां देवीं विनोदयितुम्। तत्कियन्तमवधिं यावत्।**

लक्ष्मणः- **यावदार्याया हुताशनशुद्धिः।**

रामः- **शान्तं पापम् (ससान्त्ववचनम्।)**

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥१३॥
देवि देवयजनसम्भवे ! प्रसीद। एष ते जीवितावधिः प्रवादः।
क्लिष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि॥१४॥

अन्वयः -

(प्रविश्य) **लक्ष्मणः** - आर्यः जयति जयति। आर्य! अर्जुनेन चित्रकरेण अस्मदुपदिष्टम् आर्यस्य चरितम् अस्यां वीथ्याम् अभिलिखितम्। तत् आर्यः पश्यतु।

रामः- वत्स! दुर्मनायमानां देवीं विनोदयितुं जानासि । तत् कियन्तम् अवधिं यावत्।

लक्ष्मणः- आर्याया हुताशनशुद्धिः यावत्।

रामः-शान्तं पापम् (ससान्त्ववचनम्।)

उत्पत्तिपरिपूतायाः अस्याः पावनान्तरैः किम्। तीर्थोदकं च वह्निश्च अन्यतः न शुद्धिम् अर्हतः ॥ १३॥

देवयजनसम्भवे देवि, प्रसीद। एष प्रवादः ते जीवितावधिः।

क्लिष्टः जनः जनैः अनुरञ्जनीयः किल, तत् ते नः यद् अशुभम् उक्तं तत् न क्षमम्। सुरभिणः कुसुमस्य मूर्ध्नि स्थितिः नैसर्गिकी सिद्धा, चरणैः अवताडनानि न॥१४॥

अन्वयार्थः -

(प्रविश्य प्रवेशं सम्पाद्य) **लक्ष्मणः** - आर्यः जयति जयति महाराज, भवतः सदा विजयः। आर्य महाराज! अर्जुनेन चित्रकरेण अर्जुननामकेन चित्रकारिणा अस्मदुपदिष्टम् अस्माभिः उपवर्णितम् आर्यस्य श्रीरामस्य चरितं जीवनम् अस्यां वीथ्याम् अस्यां चित्रमयश्रेण्याम् अभिलिखितम् अङ्कितम्। तत् चित्रम् आर्यः रामचन्द्रः पश्यतु अवलोकयतु।

रामः - वत्स प्रिय! दुर्मनायमानां दुःखितमानसां देवीं सीतां विनोदयितुं सन्तोषयितुं जानासि शक्नोषि। तत् चित्रम् कियन्तम् अवधिं यावत् कियत्पर्यन्तम्।

लक्ष्मणः - आर्यायाः सीतायाः हुताशनशुद्धिः यावत् अग्निपरीक्षणपर्यन्तम्।

रामः - शान्तं पापम् त्वया एवं पुनः नैव वक्तव्यम् (ससान्त्ववचनम् अत्यन्तमधुरवचःसहितम्)

उत्पत्तिपरिपूतायाः उत्पत्त्या जन्मना एव परिपूतायाः अयोनिजत्वात् पवित्रायाः शुद्धाया अस्याः सीतादेव्याः पावनान्तरैः अग्न्यादिपवित्रताजनकैः किं किं प्रयोजनम्। तीर्थोदकं गङ्गादितीर्थजलं च वह्निश्च अग्निश्च अन्यतः अन्यस्मात् शुद्धिं पवित्रतां न अर्हतः सम्पादयितुं न योग्यौ भवतः।।१३।।

देवयजनसम्भवे देवयज्ञसमुत्पन्ने देवि भगवति, प्रसीद प्रसन्ना भव। एषः अयं ते तव जीवितावधिः आजीवनं प्रवादः लोकापवादः।

क्लिष्टः दुःखितः जनः लोकः जनैः अन्यलोकैः अनुरञ्जनीयः आराधनीयः किल निश्चयेन। तत् तस्मात् ते तव नः आवयोः विषये यत् अशुभम् अशिवम् तत् कथनं न क्षमम् न युक्तम् नोचितम्। सुरभिणः सुगन्धितस्य कुसुमस्य पुष्पस्य मूर्ध्नि मस्तके स्थितिः अवस्थानम् नैसर्गिकी स्वाभाविकी सिद्धा लोके प्रसिद्धा, परन्तु चरणैः पादैः अवताडनानि चरणमर्दनानि प्रहाराः वा न नैसर्गिकाणि न स्वाभाविकानि॥ १४॥

व्याख्यानम् -

लक्ष्मण आगत्य रामस्य विजयप्रशस्तिमुक्त्वा तस्मै निवेदयति यत् यथादिष्टं रामजीवनवृत्तान्तस्य चित्राङ्कनम् अर्जुननामकेन चित्रकारेण सम्पन्नम्। अत चित्रमिदं भवान् किञ्चित् पश्यतु इति रामं प्रार्थयति लक्ष्मणः। ततः रामः लक्ष्मणम् वदति यत् सीता पितृविरहे विषण्णचित्ता वर्तते, तस्मात् दुःखितायाः तस्या विनोदाय त्वं समर्थः। ततः स लक्ष्मणम् पृच्छति यत् चित्रमिदं किं पर्यन्तम् चित्रितम् इति। तदा लक्ष्मणः उत्तरं प्रदत्तवान् यत् - देव्या सीतायाः अग्निपरीक्षापर्यन्तं चित्रस्य अस्य व्याप्तिः। लक्ष्मणवचनं श्रुत्वा अप्रसन्नः रामः सुमधुरम् वदति तादृशं वाक्यं न वाच्यम्।

आजन्मशुद्धायाः सीतायाः शुद्धतायाः परीक्षायै अन्येन केनचित् द्रव्येण प्रयोजनं नास्ति। यथा तीर्थस्य जलं वह्निः च इत्यनयोः अन्यैः द्रव्यैः शुद्धीकरणस्य प्रयोजनं न भवति तयोः शुद्धत्वात् तथैव चिरशुद्धायाः सीतायाः अग्निना शुद्धिः नापेक्षते। स्वतः शुद्धत्वात् अन्यतः शुद्धिसम्पादनं नावश्यकमिति भावः।

ततः सीता प्रति रामः कथयति यत् सा यथा प्रसन्ना भवेत्। अयं लोकापवादः तस्या आजीवनमेव। ततो रामो वदति यत् ये जनास्तावत् स्वकुलस्य रक्षां कुर्वन्ति, तैः दुःखितजनाः न तिरस्कर्तव्याः अपि तु अवश्यम् अनुरञ्जनीयाः। अतः दुःखितायाः तव विषये यानि अशुभवाक्यानि प्रयुक्तानि तानि न युक्तानि इति भावयामि। प्रसङ्गस्य स्पष्टीकरणाय दृष्टान्तः प्रदीयते। सुरभिविशिष्टानां कुसुमानां पादैः मर्दनं न योग्यम्। यतो हि तेषां मस्तके अवस्थानं स्वाभाविकं भवति इति तात्पर्यम्।

व्याकरणविमर्शः -

१. दुर्मनायमानाम्- दुःस्थितं मनः यस्याः सा दुर्मनाः इति बहुव्रीहिसमासः। अदुर्मनाः दुर्मनाः भवति इत्यर्थे क्यङ्प्रत्यये निष्पन्नाद् दुर्मनायधातोः शानच्प्रत्यये टापि दुर्मनायमाना इति भवति। ततः द्वितीयैकवचने दुर्मनायमानाम् इति रूपम्।

२. उत्पत्तिपरिपूतायाः - उत्पत्त्या परिपूता उत्पत्तिपरिपूता इति तृतीयातत्पुरुषसमासः, तस्याः उत्पत्तिपरिपूतायाः।

३. पावनान्तरैः – पावयन्ति इति पावनानि। अन्यानि पावनानि पावनान्तराणि तैः इति पावनान्तरैः इति मयूरव्यंसकादिवत्समासः।

४. तीर्थोदकम् - तीर्थस्य उदकं तीर्थोदकम् इति षष्ठीतत्पुरुषसमासः।

५. अनुरञ्जनीयः– अनुपूर्वकात् रञ्ज्धातोः णिच्प्रत्यये अनीयर्प्रत्यये च अनुरञ्जनीय इति रूपम्।

६. नैसर्गिकी - निसर्गाद् आगता इत्यर्थे निसर्गशब्दात् ठकि ङीपि नैसर्गिकीशब्दो निष्पद्यते।

७. स्थितिः - स्थाधातोः क्तिन्प्रत्यये स्थितिशब्दो निष्पद्यते।

छन्दः -

१. उत्पत्तिपरिपूताया इत्यस्मिन् श्लोके अनुष्टुप् छन्दः।

२. क्लिष्टो जनः इति श्लोके वसन्ततिलकं छन्दः।

अलङ्कारविमर्शः-

१. उत्पत्तिपरिपूतायाः इत्यस्मिन् श्लोके तीर्थोदकवह्निदृष्टान्तेन सीतायाः पवित्रतासमर्थनाद् दृष्टान्तालङ्कारः। तल्लक्षणम् उक्तं दर्पणे- "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।" इति।

२. क्लिष्टो जनः इत्यस्मिन् श्लोके अपि दृष्टान्तालङ्कारः।

पाठगतप्रश्नाः - ६

२७. चित्रकारस्य किम् अभिधानम्।

२८. रामचरितं कियद् वीथिकायाम् अभिलिखितम्।

२९. किं किं स्वतः एव पवित्रं भवति।

३०. सीतायाः कैः प्रयोजनं नास्ति।

३१. क्लिष्टं जनं प्रति किं कर्तव्यम्।

३२. कुसुमस्य का नैसर्गिकी।

पाठसारः

भूमिसुता सीता वैदही रामपत्नी सीता आसीना। रामः सीतां सान्त्वयितुमनाः प्रविशति। तस्मिन्नेव समये ऋष्यशृङ्गमुनेः आश्रमाद् वसिष्ठादीनां संवादं स्वीकृत्य भगवान् अष्टावक्रः आगतः। स वसिष्ठादीनां सन्देशं श्रावयन् कथयति यत् महर्षिः वसिष्ठः सीतायै आशीर्वादं प्रदत्तवान् - सा वीरप्रसवा भूयाः इति। वसिष्ठपत्नी अरुन्धती राममातरः कौशल्याकैकेयीसुमित्राः शान्ता च रामं प्रति उक्तवत्यः यत् - सीता गर्भवती अस्ति, अतः इदानीं रामेण तस्याः सर्वा अभिलाषाः शीघ्रं पूरणीयाः। महर्षिः ऋष्यशृङ्गः अवदत् यत् कठोरगर्भत्वात् सीता यज्ञस्थानं प्रति आगन्तुं न समर्था। अतः स परं सपुत्रां तां द्रष्टुम् अयोध्याम् आगमिष्यति इति। कुलगुरुः वसिष्ठः रामम् आदिष्टवान् यत् प्रजाः यथा सुखिनः स्युः तथा राज्यपालनं कर्तव्यम्। यतो हि तेन एव रघुवंशीयानाम् अभीष्टं यशः प्राप्तुं शक्नुयात्। आदेशं श्रुत्वा रामः कथयति यत् प्रजानां सुखाय स स्नेहस्य दयायाः सौख्यस्य धर्मपत्न्याः सीताया अपि परित्यागं कर्तुं सन्नद्धः अस्ति। अनेन एव श्रीरामवचनेन स भाविकाले सीतां परित्यक्ष्यति इति सूचितो भवति। ततः कुमारः लक्ष्मणः प्रविशति। महर्षिः अष्टावक्रः विश्रामस्वीकाराय गच्छति। लक्ष्मणः कथयति यत् यथादिष्टं तथा एव रामचरितात्मकं चित्रपटम् अङ्कयित्वा चित्रकारः आगतः इति। ततः रामः लक्ष्मणं पृच्छति यत् एतस्य चित्रस्य व्याप्तिः कियत्पर्यन्तम्। तदा लक्ष्मणः वदति यत् सीतायाः अग्निशुद्धिपर्यन्तं तत्र चित्रितम् अस्ति इति। ततश्च रामः सीतायाः आजन्मशुद्धतां वर्णयति। यथा तीर्थजलं वह्निः च स्वतः पवित्रं तथा सीता अपि स्वतः पवित्रा। अतः रामः सीतायाः खेदो मा भवेदिति कथयति। यः क्लिष्टः जनो भवति तस्य क्लेशनिवारणमेव उचितम्, अतः सीतां प्रति लक्ष्मणस्य वचनं न योग्यम्। यतो हि कुसुमस्य स्वाभाविकम् अवस्थानं शिरसि एव भवति, न तु पादैः लेहनं तस्य उचितम्। एवं प्रकारेण अयं पाठः समाप्यते।

पाठान्तप्रश्नाः

१. किन्त्वनुष्ठाननित्यत्वमिति श्लोकं व्याख्यात।
२. गुरुजनैः रामं प्रति उक्तान् उपदेशान् लिखत।
३. विश्वम्भरा इत्यादिश्लोकं व्याख्यात।
४. लौकिकानां साधूनाम् आद्यानां च ऋषीणां कः भेदः - तत् लौकिकानाम् इत्यादिश्लोकव्याख्यानपुरःसरं वर्णयत।
५. सीतायाः आजन्मपवित्रताविषये श्रीरामेण किम् उक्तम्।
६. जामातृयज्ञेनेति श्लोकं व्याख्यात।
७. स्नेहं दयां च सौख्यम् इति श्लोकं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. अनुष्ठाननित्यत्वं गृहस्थानां स्वातन्त्र्यम् अपकर्षति।

२. किन्तु अनुष्ठाननित्यत्वम् इति सन्धिविच्छेदः।

३. कर्म त्रिविधं भवति - नित्यं नैमित्तिकं काम्यं च।

४. आहिताग्नीनां गृहस्थता प्रत्यवायैः सङ्कटा भवति।

५. बन्धुजनविप्रयोगाः सन्तापकारिणः भवन्ति।

६. संसारभावाः हृदयमर्मच्छिदो भवन्ति।

७. हृदमर्मच्छिद्भ्यः संसारभावेभ्यः विरक्ता मनीषिणः सर्वान् कामान् सन्त्यज्य अरण्ये विश्राम्यन्ति।

८. तातपरिजनस्य रामभद्र इत्युपचारः शोभते।

९. ऋष्यशृङ्गाश्रमाद् अष्टावक्रमुनिः आगतः।

१०. कञ्चुकी रामं रामभद्र इति सम्बोधयति।

११. सीतायाः माता का विश्वम्भरा पृथिवी।

१२. सीतायाः प्रजापतिसमः जनकः पिता।

१३. येषां वंशे सविता वंशप्रवर्तकः वसिष्ठादयश्च आचार्याः तेषां वंशस्य सीता वधूः।

१४. सीतां प्रति वशिष्ठस्य "वीरप्रसवाः भूयाः" इति आशीर्वादः।

१५. आद्यानाम् ऋषीणां वाचम् अर्थः अनुधावति।

१६. लौकिकानां साधूनाम् अर्थं वाग् अनुवर्तते।

१७. अरुन्धत्याः रामस्य जननीनां शान्तायाश्च रामं प्रति आदेशः अयं यद् इदानीं सीता पूर्णगर्भा, अतस्तस्य सर्वा अभिलाषाः रामेण शीघ्रमेव पूरणीयाः इति।

१८. सीता कठोरगर्भा इत्यतः यज्ञं प्रति नानीता।

१९. रामः सीताया विनोदाय अयोध्यायां स्थापितः।

२०. ऋष्यशृङ्गः सीतां पुत्रपूर्णक्रोडां द्रष्टुमिच्छति।

२१. वसिष्ठादयः जामातुः ऋष्यशृङ्गस्य यज्ञेन निरुद्धाः।

२२. रघुवंशीयानां प्रजानुरञ्जनात् प्राप्तं यशः परमं धनम्।

२३. जामातृयज्ञेनेति श्लोके इन्द्रवज्राछन्दः वर्तते। तस्य लक्षणं तावत् -
"स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति।

२४. मित्रश्च वरुणश्च मित्रावरुणौ इति इतरेतरद्वन्द्वसमासः। तयोः अपत्यं पुमान् इति विग्रहे "बाह्वादिभ्यश्च" इत्यनेन इञ्प्रत्यये मैत्रावरुणिः इति रूपम्।

२५. लोकस्य आराधनाय रामः स्नेहं दयां सौख्यं जानकीमपि त्यक्तुं प्रस्तुतः।

२६. राज्ञः प्रधानः धर्मः प्रजानाम् आराधनम्।

२७. चित्रकारस्य अर्जुनः इत्यभिधानम्।

२८. रामचरितं सीतायाः हुताशनशुद्धिं यावद् वीथिकायाम् अभिलिखितम्।

२९. तीर्थोदकम् अग्निश्च स्वतः एव पवित्रं भवति।

३०. सीतायाः पावनान्तरैः प्रयोजनं नास्ति।

३१. क्लिष्टः जनः तत्सम्बन्धिभिः क्लेशं विस्मार्य अनुरञ्जनीयः।

३२. कुसुमस्य शिरसि स्थितिः नैसर्गिकी।

॥ इति त्रयोदशः पाठः ॥

348sk14

१४

उत्तररामचरितम् - चित्रदर्शनम् - १

प्रस्तावना

अस्मिन् पाठे चित्रदर्शनम् आरभते। श्रीरामः लक्ष्मणेन सह चित्रं नीत्वा सीतायाः समीपं गतः। तत्र गत्वा रामः सीतायाः सन्तोषार्थं लोकापवादविषये निन्दाम् करोति। ततः ते चित्रदर्शनं प्रारभन्ते। ताटकराक्षस्याः निधनवृत्तान्तात् तानि चित्राणि अङ्कितानि सन्ति। ततश्च ते वृत्तक्रमेण चित्राणि पश्यन्ति किञ्च चित्रविषये स्वाभिमतं प्रकाशयन्ति। तत्र मिथिलावृत्तान्तः, तेषां विवाहः, विवाहात् परम् अयोध्याप्राप्तिः, तत्कालीनं तेषां जीवनं च चित्रमाध्यमेन सम्यक् प्रकाशितं वर्तते। अस्मिन् चित्रदर्शनप्रसङ्गे कविः सीतामुखेन श्रीरामं राममुखेन च सीतां वर्णयति। एवं चित्रदर्शनेन कविः सम्पूर्णस्य अपि रामायणस्य वृत्तान्तानि स्मारयितुं चेष्टते। अस्मिन् पाठे वयं तस्य एव चित्रदर्शनस्य कञ्चिद् भागं पठामः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामसीतयोः शरीरसौन्दर्यादिकं जानीयात्।
- चित्रदर्शनमाध्यमेन सम्पूर्णस्य अपि रामायणस्य घटनाक्रमं ज्ञातुं शक्नुयात्।
- छन्दसां लक्षणानि जानीयात्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।

१४.१) सम्पूर्णः मूलपाठः

सीता - **होदु अज्जौत्त होदु। एहि। पेक्खह्म दाव दे चरिदम्। (भवत्वार्यपुत्र भवतु। एहि। प्रेक्षामहे तावत्ते चरितम्।)**

(इत्युत्थाय परिक्रामति)

लक्ष्मणः - **इदं तदालेख्यम्।**

सीता - **(निर्वर्ण्य) के एदे उवरिणिरन्तरदा उवत्थुवन्दि विअ अज्जउत्तम् (क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम्।)**

लक्ष्मणः - देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रान्तानि। तेन ताटकावधे प्रसादीकृतान्यार्यस्य।

रामः - वन्दस्व देवि, दिव्यास्त्राणि।

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्रं शरदां तपांसि।
एतान्यपश्यन्गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि॥१५॥

सीता- णमो एदारणम्। (नम एतेभ्यः)

रामः- सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति।

सीता- अणुगहीदह्मि। (अनुगृहीतास्मि।)

लक्ष्मणः - एष मिथिलावृत्तान्तः।

सीता -अम्महे, दलन्तणवणीलुप्पलसिणिद्धमसिणसोहमाणमंसलेन देहसोहग्गेण विह्मअत्थिमिदताददीसन्तसोम्मसुन्दरसिरौ अणादरखंडिदसङ्करसरासणो सिहण्डमुद्धमुहमुण्डलो अज्जउत्तो आलिहिदो। (अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशंकरशरासनः शिखण्ड मुग्धमुखमण्डल आर्यपुत्र आलिखितः।)

लक्ष्मणः - आर्ये ! पश्य पश्य।

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

रामः - सुश्लिष्टमेतत्।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

सीता - एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहादिक्खिदा तुझे। अह्मो। जाणामि तस्सि जेव्व काले वत्तामि। (एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो! जानामि तस्मिन्नेव काले वर्ते।)

रामः - एवम्

समयः स वर्तत इवैष यत्र मां
समनन्दयत्सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥ १८ ॥

लक्ष्मणः - इयमार्या। इयमप्यार्या माण्डवी। इयमपि वधूः श्रुतकीर्तिः।

सीता - वच्छ, इयं वि अवरा का। (वत्स इयमप्यपरा का।)

लक्ष्मणः - (सलज्जास्मितम्। अपवार्य) अये, ऊर्मिलां पृच्छत्यार्या। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्)। आर्ये! दृश्यतां द्रष्टव्यमेतत्। अयं च भगवान्भार्गवः।

सीता - (ससंभ्रमम्) कम्पितास्मि। (कम्पिदह्मि)

रामः - ऋषे ! नमस्ते।

लक्ष्मणः - आर्ये! पश्य। अयमार्येण---(इत्यर्धोक्ते।)

रामः - (साक्षेपम्) अयि ! बहुतरं द्रष्टव्यम्। अन्यतो दर्शय।

सीता - (सस्नेहबहुमानं निर्वर्ण्य।) सुट्ठु सोहसि अज्जउत्त एदिणा विणअमाहप्पेण। (सुष्ठु शोभसे आर्यपुत्र ! एतेन विनयमाहात्म्येन।)

लक्ष्मणः- एते वयमयोध्यां प्राप्ताः।

रामः - (साश्रुम्) स्मरामि।

जीवत्सु तातपादेषु नूतने दारसंग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥

इयमपि तदा जानकी -

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम्।
ललिततलितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः।।२०।।

लक्ष्मणः - एषा मन्थरा।

रामः - (सत्वरमन्यतो दर्शयन्) देवि वैदेहि।

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः।।२१।।

लक्ष्मणः - (विहस्य, स्वगतम्) अये मध्यमाम्बावृत्तमन्तरितमार्येण।

१४.२) साम्प्रतं मूलपाठम् अवगच्छाम - १६

सीता - होदु अज्जौत्त होदु। एहि। पेक्खह्म दाव दे चरिदम्। (भवत्वार्यपुत्र भवतु। एहि। प्रेक्षामहे तावत्ते चरितम्।)

(इत्युत्थाय परिक्रामति)

लक्ष्मणः - इदं तदालेख्यम्।

सीता - **(निर्वर्ण्य) के एदे उवरिणिरन्तरदा उवत्थुवन्दि विअ अज्जउत्तम् (क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम्।)**

लक्ष्मणः - **देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रान्तानि। तेन ताटकावधे प्रसादीकृतान्यार्यस्य।**

रामः - **वन्दस्व देवि, दिव्यास्त्राणि।**

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्रं शरदां तपांसि।
एतान्यपश्यन्गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि॥१५॥

सीता- **णमो एदारणम्। (नम एतेभ्यः)**

रामः- **सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति।**

सीता- **अणुगहीदह्मि। (अनुगृहीतास्मि।)**

अन्वयः -

सीता - आर्यपुत्र भवतु भवतु। एहि। ते तावत् चरितं प्रेक्षामहे।

(इति उत्थाय परिक्रामति)

लक्ष्मणः - इदं तद् आलेख्यम्।

सीता - (निर्वर्ण्य) के एते उपरि निरन्तरस्थिता आर्यपुत्रम् उपस्तुवन्ति इव।

लक्ष्मणः - देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात् कौशिकम् ऋषिम् उपसङ्क्रान्तानि। तेन ताटकावधे आर्यस्य प्रसादीकृतानि।

रामः - देवि, दिव्यास्त्राणि वन्दस्व।

ब्रह्मादयः पुराणाः गुरवः ब्रह्महिताय शरदां परःसहस्रं तपांसि तप्त्वा एतानि स्वानि तपोमयानि तेजांसि एव अपश्यन्॥१५॥

सीता - एतेभ्यः नमः।

रामः - सर्वथा इदानीं त्वत्प्रसूतिम् उपस्थास्यन्ति।

सीता - अनुगृहीता अस्मि।

अन्वयार्थः -

सीता - आर्यपुत्र भवतु भवतु अस्तु अस्तु मम विषये प्रवादस्य चिन्ता न कर्तव्या। एहि आगच्छ। ते तव तावत् अपि चरितं चरित्रं प्रेक्षामहे पश्यामः। (इति उत्थाय परिक्रामति)

लक्ष्मणः - इदं तद् आलेख्यं चित्रम्।

सीता - (निर्वर्ण्य अवलोक्य) के एते इमे उपरि ऊर्ध्वं निरन्तरस्थिता अविरलं विहितावस्थानाः आर्यपुत्रम् उपस्तुवन्ति पूजयन्ति इव।

लक्ष्मणः - देवि मातः सीते! एतानि तानि सरहस्यानि गुह्यानि जृम्भकास्त्राणि विशेषशक्तिसम्पन्नानि दिव्यास्त्राणि यानि भगवतः देवात् कृशाश्वात् तन्नामकाद् ऋषेः कौशिकम् ऋषिम् कुशकर्षेः पुत्रं विश्वामित्रमहर्षिम् उपसङ्क्रान्तानि उपगतानि। तेन ताटकावधे ताटकासुरवधकाले आर्यस्य अनुकम्पया अग्रजाय रामचन्द्राय प्रसादीकृतानि आशीर्वादरूपेण अर्पितानि।

रामः - देवि प्रिये, दिव्यास्त्राणि जृम्भिकास्त्राणि वन्दस्व अभिवादयस्व।

ब्रह्मादयः ब्रह्मा आदिः येषां ते प्रजापतिप्रभृतयः पुराणाः प्राचीनाः गुरवः आचार्याः ब्रह्महिताय वेदस्य रक्षणाय शरदां वर्षाणां परःसहस्रं सहस्राधिकं तपांसि तपस्याः तप्त्वा विधाय एतानि इमानि स्वानि निजानि आत्मीयानि तपोमयानि तपस्याया उद्भूतानि तेजांसि तेजोरूपाणि एव अपश्यन् दृष्टवन्तः॥१५॥

सीता - एतेभ्यः नमः नमस्कारं विज्ञापयामि।

रामः - सर्वथा सर्वप्रकारेण इदानीम् अधुना त्वत्प्रसूतिम् तव सन्तानम् उपस्थास्यन्ति प्राप्स्यन्ति।

सीता - अनुगृहीता अनुग्रहं सम्प्राप्ता अस्मि भवामि।

व्याख्यानम् -

रामस्य प्रशंसावचनं श्रुत्वा आनन्दिता सीता रामेण सह चित्रं द्रष्टुमारभते। एकस्मिन् चित्रे उपरिभागे केचन निरन्तरस्थिताः भगवन्तं रामं स्तुवन्ति इति दृश्यते। ततः सा यदा अस्मिन् विषये लक्ष्मणं पृच्छति तदा लक्ष्मणः उत्तरं प्रयच्छति यद् एतानि हि मन्त्रयुक्तानि जृम्भकनामानि अस्त्राणि। भगवता कृशाश्वेन ऋषये कौशिकाय एतानि दिव्यास्त्राणि प्रदत्तानि। ताटकाराक्षसीवधावसरे भगवते रामचन्द्राय प्रसन्नो भूत्वा विश्वामित्रः इमानि अस्त्राणि रामाय अनुग्रहपूर्वकं दत्तवान्।

लक्ष्मणोक्तेः अनन्तरं सीतां प्रति तेषां दिव्यानाम् अस्त्राणां वन्दनाय उक्तवान्। भगवान् श्रीरामः दिव्यास्त्राणां स्वरूपं वर्णयति यत् पुरा दानवादयः बहवः अखिलधर्ममूलभूतं वेदं विनाशयितुम् उद्युक्ताः। अतः तान् निवारयितुं जगत्स्रष्टृप्रजापतिप्रभृतयः प्राचीनाः आचार्याः कठोरां तपस्याम् कर्तुम् आरब्धवन्तः। सरस्राधिकवत्सरान् व्याप्य तपांसि आचरितवन्तः। ततः परं ते स्वकीयानि तेजांसि इव समुत्पन्नानि दिव्यास्त्राणि अवलोकितवन्तः।

रामवचनात् तेषां जृम्भकास्त्राणां दिव्यत्वं ज्ञात्वा देवी सीता तानि दिव्यास्त्राणि प्रणमन्ति। रामः सीतां कथयति यत् यथा स एतानि प्राप्तवान् तथैव तयोः सन्ततिः अपि एतानि दिव्यास्त्राणि प्राप्स्यति। सीता रामं वदति यत् - सा तस्य वचनेन अनुगृहीता अस्ति इति।

व्याकरणविमर्शः -

१. निर्वर्ण्य – निर्–पूर्वकात् वर्ण–धातोः ल्यपि निर्वर्ण्य इति रूपम्।

२. उपस्तुवन्ति - उपपूर्वकात् स्तुधातोः लटि प्रथमपुरुषचबहुवचने उपस्तुवन्ति इति रूपम्।

३. प्रसादीकृतानि - अप्रसादानि प्रसादानि कृतानि इत्यर्थे च्विप्रत्यये कृधातोः अनुप्रयोगे क्तप्रत्यये नपुंसके प्रथमाबहुवचने प्रसादीकृतानि इति रूपम्।

४. दिव्यास्त्राणि – दिव्यानि च तानि अस्त्राणि दिव्यास्त्राणि इति कर्मधारयसमासः।

५. उपसङ्क्रान्तानि - उपपूर्वकात् सम्पूर्वकात् क्रम्धातोः क्तप्रत्यये नपुंसके प्रथमाबहुवचने उपसङ्क्रान्तानि इति रूपम्।

६. ब्रह्मादयः - ब्रह्म आदिर्येषां ते ब्रह्मादयः इति बहुव्रीहिसमासः।

७. तप्त्वा - सन्तापार्थकात् तप्-धातोः क्त्वाप्रत्यये तप्त्वा इति रूपम्।

छन्दः - ब्रह्मादयः इत्यस्मिन् श्लोके इन्द्रवज्रोपेन्द्रवज्रयोः समावेशाद् उपजातिच्छन्दः। तल्लक्षणं छन्दोमञ्जर्याम्-

"अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ते।।" इति।

अलङ्कारविमर्शः -

१. ब्रह्मादय इति श्लोके शस्त्रदर्शनेन महापुरुषाणामपि कीर्तनाद् उदात्तालङ्कारः। तल्लक्षणम् -

"लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्।।" इति।

२. अस्मिन् श्लोके अद्भुतानां शस्त्राणां वर्णनेन भाविकालङ्कारः। तल्लक्षणं दर्पणे -

"अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः।
यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्।।" इति।

३. स्वान्येव तेजांसीत्यत्र रूपकालङ्कारः।

४. अलङ्कारत्रयस्य अङ्गाङ्गिभावात् सङ्करालङ्कारः।

पाठगतप्रश्नाः - १

१. दिव्यास्त्राणि कस्माद् विश्वामित्रेण सम्प्राप्तानि।

२. रामचन्द्रेण कदा कस्माद् दिव्यास्त्राणि आप्तानि।

३. ब्रह्मादयः किमर्थं तपः कृतवन्तः।

४. ब्रह्मादयः कियन्तं कालं तपः कृतवन्तः।

५. ते कीदृशानि दिव्यास्त्राणि अपश्यन्।

६. उपजातिच्छन्दसः किं लक्षणम्।

७. प्रसादीकृतानि इति रूपं साधयत।

१४.३) साम्प्रतं मूलपाठम् अवगच्छाम - १७

लक्ष्मणः - **एष मिथिलावृत्तान्तः।**

सीता - **अम्महे, दलन्तणवणीलुप्पलसिणिद्धमसिणसोहमाणमंसलेन देहसोहग्गेण विह्मअत्थिमिदताददीसन्तसोम्मसुन्दरसिरौ अणादरखंडिदसङ्करसरासणो सिहण्डमुद्धमुहमुण्डलो अज्जउत्तो आलिहिदो। (अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशंकरशरासनः शिखण्ड -मुग्धमुखमण्डल आर्यपुत्र आलिखितः।)**

लक्ष्मणः - **आर्ये ! पश्य पश्य।**

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

रामः - **सुश्लिष्टमेतत्।**

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

अन्वयः -

लक्ष्मणः - एष मिथिलावृत्तान्तः।

सीता - अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीः अनादरत्रुटितशङ्करशरासनः शिखण्डमुग्धमुखमण्डलः आर्यपुत्रः आलिखितः।

लक्ष्मणः - आर्ये ! पश्य पश्य।

एष तव तातः सम्बन्धिनः वसिष्ठादीन् अर्चति (तथा)। जनकानां पुरोहितः गौतमः शतानन्दः (सम्बन्धिनः वसिष्ठादीन् अर्चति)॥१६॥

रामः - सुश्लिष्टम् एतत्।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः। यत्र स्वयं कुशिकनन्दनः दाता ग्रहीता च॥१७॥

अन्वयार्थः -

लक्ष्मणः - एषः अयं मिथिलावृत्तान्तः मिथिलानगरोदन्तः।

सीता - अहो आश्चर्येण दलन्नवनीलोत्पलश्यामलस्निग्धमसृण-शोभमानमांसलेन दलत् विकसत् यत् नवं नूतनं नीलोत्पलं नीलकमलं तद् इव श्यामलं श्यामं स्निग्धं चिक्कणं मसृणं कोमलं शोभमानं सुन्दरं मांसलं बलवत् तेन देहसौभाग्येन शरीरसौन्दर्येण विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीः विस्मयेन आश्चर्येण स्तिमितः निश्चलः यः तातः पिता तेन दृश्यमाना अवलोक्यमाना सौम्या आह्लादकरी

सुन्दरी मनोहारिणी श्रीः शोभा यस्य तथोक्तः अनादरत्रुटितशङ्करशरासनः अनादरेण अवहेलया त्रुटितं भग्नं शङ्करस्य शिवस्य शरासनं धनुः येन तथोक्तः शिखण्डमुग्धमुखमण्डलः शिखण्डेन काकपक्षेण मुग्धं सुन्दरं मुखमण्डलं वदनमण्डलं यस्य स आर्यपुत्रः रामः आलिखितः चित्रितः।

लक्ष्मणः - आर्ये ! पश्य पश्य अवलोकय अवलोकय। एषः अयं तव भवत्याः सीतायाः तातः पिता जनकः जनकानां पुरोहितः जनकराजस्य पुरोधाः गौतमः शतानन्दः तन्नामकमुनिः सम्बन्धिनः वसिष्ठादीन् वरपक्षीयान् अर्चति सत्करोति॥१६॥

रामः - सुश्लिष्टं सुसम्बद्धम् एतत्।

जनकानां जनकवंशोद्भवानां रघूणां रघुवंशोद्भवानां नृपाणां च सम्बन्धः अपत्यसम्बन्धः कस्य पुरुषस्य न प्रियः अभिप्रेतः, अपि तु सर्वस्यापि अभिप्रेत इति भावः। यत्र यस्मिन् वैवाहिके सम्बन्धे स्वयं कुशिकनन्दनः विश्वामित्रः दाता दानकर्ता ग्रहीता च प्रतिग्रहीता च वर्तते।॥१७॥

व्याख्यानम् -

तदनन्तरं लक्ष्मणः तस्मिन् चित्रे मिथिलावृत्तान्तं दर्शयितुम् आरभते। तस्मिन् चित्रे अङ्कितं रामस्य सौन्दर्यम् अवलोक्य सीता प्रसन्ना सती- प्रस्फुटितनीलपद्मं यथा श्यामलं स्निग्धं मसृणं च भवति तादृशं शरीरं वर्तते श्रीरामचन्द्रस्य। तत्सौन्दर्यदर्शने निश्चलः पितृदेवः सविस्मयं तस्य कान्तिम् अवलोकते। श्रीरामः अनायासेन एव हरधनुः खण्डितवान्। शिखण्डेन तादृशस्य श्रीरामस्य मुखम् अत्यधिकं सुन्दरं दृश्यते।

ततश्च लक्ष्मणः सीतारामयोः विवाहकालीनं चित्रं दर्शयति। विवाहात् प्राग् वरपक्षिणः वसिष्ठादयः मिथिलानगरे नृपस्य जनकस्य गृहम् आगताः। तस्मिन् चित्रे सीतायाः पिता महाराजः जनकः तेषां वंशस्य कुलपुरोहितः गौतमः शतानन्दः वसिष्ठादीनां सत्कारं कुर्वन्ति। अनेन विवाहकालीनं घटनाचक्रं द्वयोः अपि स्मृतिपथि आगतम्।

अत्र सीतारामयोः विवाहस्य माहात्म्यं वर्णयति स्वयं श्रीरामः। अस्मिन् विवाहे कन्यारूपेण जनकवंशजा सीता वर्तते। वररूपेण च तिष्ठति रघुवंशीयः पुरुषोत्तमः श्रीरामः। उभयोः एव वंशौ पूज्यौ वर्तते। तयोः परिणयेन च एवंविधयोः द्वयोः वंशयोः मध्ये सम्बन्धः सम्भवति। किञ्च एतस्य विवाहस्य अपरमपि माहात्म्यं वर्तते। अत्र कन्यादानकर्ता कन्याग्रहणकर्ता च एकः एव वर्तते। स च कुशिकमुनिपुत्रः स्वयं कौशिकः। एवं विवाहस्य माहात्म्यं वर्णयन् श्रीरामः ताभ्यां जातः पुत्रः अपि सर्वगुणसम्पन्नः भविष्यति इति प्रकटयति।

व्याकरणविमर्शः -

१. मांसलम् - मांसम् अस्यास्तीति विग्रहे मांसशब्दात् लच्प्रत्यये मांसलशब्दो निष्पन्नः।

२. देहसौभाग्येन – सुभगस्य भावः इति विग्रहे सुभगशब्दात् ष्यञ्प्रत्यये सौभाग्यम् इति निष्पद्यते। देहस्य सौभाग्यम् देहसौभाग्यमिति षष्ठीतत्पुरुषसमासः, तेन।

३. अनादरखण्डितशङ्करशरासनः - अनादरेण खण्डितम् अनादरखण्डितमिति तृतीयातत्पुरुषसमासः। शङ्करस्य शरासनं शङ्करशरासनमिति षष्ठीतत्पुरुषसमासः। अनादरखण्डितं शङ्करशरासनं येन सः अनादरखण्डितशङ्करशरासनः इति बहुव्रीहिसमासः।

४. शिखण्डमुग्धमुखमण्डलः - शिखण्डेन मुग्धं शिखण्डमुग्धमिति तृतीयातत्पुरुषसमासः। शिखण्डमुग्धं मुखमण्डलं यस्य स शिखण्डमुग्धमुखमण्डलः इति बहुव्रीहिसमासः।

५. वसिष्ठादीन् - वसिष्ठ आदिर्येषां ते वसिष्ठादयः इति, तान् इति तद्गुणसंविज्ञानबहुव्रीहिः

६. गौतमः - गोतमस्यापत्यं पुमान् इत्यर्थे गोतमशब्दाद् अण्प्रत्यये गौतमः इति निष्पन्नम्।

७. पुरोहितः - पुरो धीयते इत्यर्थे पुरस् इत्युपपदे धाधातोः क्तप्रत्यये पुरोहितशब्दो निष्पन्नः।

८. ग्रहीता - ग्रह्-धातोः कर्तरि तृच्प्रत्यये निष्पन्नाद् ग्रहीतृशब्दात् पुंसि प्रथमैकवचने सौ ग्रहीता इति रूपम्।

छन्दः - सम्बन्धिनः, जनकानाम् इति श्लोकद्वये अनुष्टुप् छन्दः।

व्याकरणविमर्शः -

१. जनकानामिति श्लोक कस्य न प्रियः इत्यनेन अपि तु सर्वस्य प्रियः इत्यर्थान्तरस्य आपाताद् अर्थापत्तिरलङ्कारः।

पाठगतप्रश्नाः - २

८. आर्यपुत्रः कीदृश आलिखितः।

९. अनादरखण्डितशङ्करशरासनः इत्यत्र समासं लिखत।

१०. सीतायाः तातः कान् अर्चति।

११. जनकस्य पुरोहितः कः।

१२. जनकेन सह कः वसिष्ठादीन् अर्चति।

१३. कस्य कस्य च सम्बन्धः समेषां प्रियः।

१४. सम्बन्धे दाता ग्रहीता च कः।

१४.४) साम्प्रतं मूलपाठम् अवगच्छाम - १८

सीता - **एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहादिक्खिदा तुझे। अह्मो। जाणामि तस्सि जेव्व काले वत्तामि। (एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो! जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते।)**

रामः - **एवम्**

समयः स वर्तत इवैष यत्र मां
समनन्दयत्सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥ १८ ॥

लक्ष्मणः - इयमार्या। इयमप्यार्या माण्डवी। इयमपि वधूः श्रुतकीर्तिः।

सीता - वच्छ, इयं वि अवरा का। (वत्स इयमप्यपरा का।)

लक्ष्मणः - (सलज्जास्मितम्। अपवार्य) अये, ऊर्मिलां पृच्छत्यार्या। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्)। आर्ये! दृश्यतां द्रष्टव्यमेतत्। अयं च भगवान्भार्गवः।

सीता - (ससंभ्रमम्) कम्पितास्मि। (कम्पिदह्मि)

रामः - ऋषे ! नमस्ते।

लक्ष्मणः - आर्ये! पश्य। अयमार्येण---(इत्यर्धोक्ते।)

रामः - (साक्षेपम्) अयि ! बहुतरं द्रष्टव्यम्। अन्यतो दर्शय।

सीता - (सस्नेहबहुमानं निर्वर्ण्य।) सुट्ठु सोहसि अज्जउत्त एदिणा विणअमाहप्पेण। (सुष्ठु शोभसे आर्यपुत्र ! एतेन विनयमाहात्म्येन।)

अन्वयः -

सीता - एते खलु तत्कालकृतगोदानमङ्गलाः यूयं चत्वारो भ्रातरो विवाहदीक्षिताः। अहो! जानामि तस्मिन् एव प्रदेशे तस्मिन् एव काले वर्ते।

रामः - एवम्,

हे सुमुखि, एष स समयः वर्तते इव, यत्र गौतमार्पितः आगृहीतकमनीयकङ्कणः अयं तव करः मूर्तिमान् महोत्सवः इव मां समनन्दयत्॥१८॥

लक्ष्मणः - इयम् आर्या। इयम् अपि आर्या माण्डवी। इयम् अपि वधूः श्रुतकीर्तिः।

सीता - वत्स, इयम् अपि अपरा का।

लक्ष्मणः - (सलज्जास्मितम्। अपवार्य) अये, आर्या ऊर्मिलां पृच्छति। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्)। आर्ये! दृश्यतां द्रष्टव्यम् एतत्। अयं च भगवान् भार्गवः।

सीता - (ससंभ्रमम्) कम्पिता अस्मि।

रामः - ऋषे ! नमस्ते।

लक्ष्मणः - आर्ये! पश्य। अयम् आर्येण---(इत्यर्धोक्ते।)

रामः - (साक्षेपम्) अयि ! बहुतरं द्रष्टव्यम्। अन्यतो दर्शय।

सीता - (सस्नेहबहुमानं निर्वर्ण्य।) आर्यपुत्र, एतेन विनयमाहात्म्येन सुष्ठु शोभसे।

अन्वयार्थः -

सीता - एते इमे खलु निश्चयेन तत्कालकृतगोदानमङ्गलाः तत्काले विवाहप्राक्काले कृतं सम्पादितं गोदानमङ्गलं केशदानरूपं मङ्गलकार्यं यैः ते यूयं चत्वारः भ्रातरः सहोदराः विवाहदीक्षिताः उद्वाहसंस्कृताः। अहो आश्चर्यम् जानामि चिन्तयामि यत् तस्मिन्नेव प्रदेशे स्थाने तस्मिन्नेव काले विवाहसमये वर्ते अस्मि।

रामः - एवं तथा,

हे सुमुखि शोभनवदने एषः अयं सः अनुभूतः समयः कालः वर्तते इव यत्र यस्मिन् काले गौतमार्पितः शतानन्दप्रदत्तः आगृहीतकमनीयकङ्कणः आगृहीतं धृतं कमनीयं सुन्दरं कङ्कणं करभूषणं येन सः परिहितमनोहरवलयः अयम् एष तव भवत्याः करः हस्तः मूर्तिमान् शरीरी महोत्सव इव मां रामं समनन्दत् आनन्दितमकरोत्॥१८॥

लक्ष्मणः - इयम् एषा आर्या भवती सीता। इयम् एषा अपि आर्या माण्डवी भरतपत्नी। इयम् अपि श्रुतकीर्तिः शत्रुघ्नपत्नी।

सीता - वत्स, इयम् अपि अपरा अन्या का।

लक्ष्मणः - (सलज्जास्मितं लज्जया स्मितेन च सहितम्, अपवार्य स्वगतम्) अये ऊर्मिलां मम पत्नीं पृच्छति जिज्ञासते आर्या सीता। भवतु अस्तु। अन्यतः अन्यत् किमपि चित्रं सञ्चारयामि पश्यामि। (प्रकाशम्) आर्ये भद्रे दृश्यताम् अवलोक्यतां द्रष्टव्यम् अवलोकनीयम् एतत् इदम्। अयम् एष च भगवान् भार्गवः भृगुपुत्रः परशुरामः।

सीता - (ससम्भ्रमम् सभयम्) कम्पिता अस्मि कम्पमाना भवामि।

रामः - ऋषे मुने नमः नमस्काराः ते तुभ्यम्।

लक्ष्मणः - आर्ये सीते! पश्य। अयं परशुरामः आर्येण रामचन्द्रेण ---(इत्यर्धोक्ते इति वाक्यसमापनात्पूर्वमेव)

रामः - (साक्षेपम् आक्षेपसहितम्) अयि! बहुतरं द्रष्टव्यम् बहु किमपि द्रष्टव्यम्। अन्यतो दर्शय अन्यत्र चित्रितं दर्शय।

सीता - (सस्नेहबहुमानं स्नेहेन बहुमानेन च सहितं निर्वर्ण्य अवलोक्य।) आर्यपुत्र! एतेन अनेन विनयमाहात्म्येन स्वोत्कर्षताकथनरूपेण विनयमाहात्म्येन सुष्ठु सुन्दरं शोभसे।

व्याख्यानम् -

ततः सीता विवाहसंस्कारेण संस्कृतान् केशदानं कुर्वतः चतुरः सहोदरान् रामलक्ष्मणभरतशत्रुघ्नान् पश्यति। सीता अन्वभूत् यत् सा तस्मिन् एव विवाहकाले इदानीम् अस्ति। अनेन चित्रकारस्य निपुणता ज्ञातुं शक्यते।

तदनु रामः वदति - अस्मिन् चित्रे तयोः विवाहकालीना सा स्थितिः चित्रिता यत्र सीतायाः हस्तः श्रीरामस्य हस्तस्य उपरि स्थापितः। तत् श्रीरामः एवं वर्णयति यत् सीताया हस्तः

सुन्दरकङ्कणभूषितः आसीत्। यदा पुरोहितः शतानन्दः सीतायाः हस्तं रामस्य हस्तस्य उपरि अस्थापयत् तदा सीतायाः कोमलः हस्तः श्रीरामम् अतीव अनन्दयत्। रामः सीताहस्तं महोत्सवरूपेण वर्णयति। यथा महोत्सवकाले महान् आनन्दः जायते तथा सीताहस्तसंस्पर्शेन अपि रामहृदये आनन्दतरङ्गः उत्थितः।

ततः लक्ष्मणः क्रमशः रामपत्नीं भरतपत्नीं माण्डवीं शत्रुघ्नपत्नीं श्रुतकीर्तिं स्वपत्नीम् ऊर्मिलां च दृष्टवान् सीतां च दर्शयति। तदनन्तरं लक्ष्मणः अन्यद् एकं चित्रम् अपश्यत् यत्र भगवान् श्रीपरशुरामः चित्रितः। तत् दृष्ट्वा देवी सीता कम्पिता । ततः श्रीरामः परशुरामं प्रणमति।

तदा लक्ष्मणः रामेण परशुरामः पराजितः इति वक्तुं यावत् प्रवर्तते तावत् श्रीरामः तं तस्माद्वर्णनात् निवार्य अपरं चित्रं प्रदर्शयितुं कथयति। तदा रामस्य विनयम् अवलोक्य सीता रामस्य विनयाधिक्येन प्रकाशितं सौन्दर्यं वर्णयति।

व्याकरणविमर्शः -

१. समनन्दयत्- समुपसर्गपुर्वकात् नन्द्धातोः णिचि लङि प्रथमपुरुषैकवचने समनन्दयत् इति रूपम्।

२. सुमुखि- शोभनं मुखं यस्याः सा सुमुखी सम्बोधनैकवचने सुमुखि इति रूपम्।

३. आगृहीतकमनायकङ्णः– आपूर्वकात् ग्रह्–धातोः क्तप्रत्यये आगृहीत इति रूपम्। आगृहीतं कमनीयं कङ्कणं येन सः आगृहीतकमनीयकङ्कणः।

४. महोत्सवः - महान् च असौ उत्सवः महोत्सवः इति कर्मधारयसमासः।

५. विनयमाहात्म्येन – विनयस्य माहात्म्यं विनयमाहात्म्यम्, तेनेति षष्ठीतत्पुरुषसमासः।

छन्दः -

१. समयः स इत्यस्मिन् श्लोके मञ्जुभाषिणीच्छन्दः। तल्लक्षणं छन्दोमञ्जर्यां - "सहसा जगौ भवति मञ्जुभाषिणी" इति।

अलङ्कारविमर्शः -

१. समयः स इत्यस्मिन् श्लोके वर्तते इव इति क्रियोत्प्रेक्षा, मूर्तिमान् महोत्सव इव इति गुणोत्प्रेक्षा, भूतस्य वृत्तान्तस्य प्रस्तावाच्च भाविकालङ्कारः।

पाठगतप्रश्नाः - ३

१५. रामादयः भ्रातरः चित्रे कीदृशाः।

१६. तस्मिन्नेव काले इत्यनेन कः कालः अभिप्रेतः।

१७. सीतायाः करः केन रामस्य हस्ते अर्पितः।

१८. सीतायाः करः कीदृशः।

१९. सीतायाः हस्तः रामं किम् इव आनन्दितम् अकरोत्।

२०. मञ्जुभाषिणीवृत्तस्य लक्षणं लिखत।

२१. रामः केन माहात्म्येन शोभते।

१४.५) साम्प्रतं मूलपाठम् अवगच्छाम - १९

लक्ष्मणः- **एते वयमयोध्यां प्राप्ताः।**

रामः - **(साश्रम्) स्मरामि, हन्त स्मरामि।**

जीवत्सु तातपादेषु नूतने दारसंग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥

इयमपि तदा जानकी -

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम्।
ललिततलितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः।।२०।।

लक्ष्मणः - **एषा मन्थरा।**

रामः - **(सत्वरमन्यतो दर्शयन्) देवि वैदेहि।**

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः।।२१।।

लक्ष्मणः - **(विहस्य, स्वगतम्) अये मध्यमाम्बावृत्तमन्तरितमार्येण।**

अन्वयः -

लक्ष्मणः- एते वयम् अयोध्यां प्राप्ताः।

रामः - (साश्रम्) स्मरामि, हन्त स्मरामि।

तातपादेषु जीवत्सु दारसंग्रहे नूतने मातृभिः चिन्त्यमानानां नः ते हि दिवसा गताः॥१९॥

इयमपि तदा जानकी -

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैः दशनकुसुमैः मुग्धालोकं मुखं दधती शिशुः ललितललितैः ज्योत्स्नाप्रायैः अकृत्रिमविभ्रमैः मधुरैः अङ्गकैः मे अम्बानां च कुतूहलम् अकृत।।।२०।।

लक्ष्मणः - एषा मन्थरा।

रामः - (सत्वरमन्यतो दर्शयन्) देवि वैदेहि।

शृङ्गवेरपुरे अयं स इङ्गुदीपादपः. यत्र पुरा स्निग्धेन निषादपतिना समागमः आसीत्।।२१।।

लक्ष्मणः - (विहस्य, स्वगतम्) अये आर्येण मध्यमाम्बावृत्तम् अन्तरितम्।

अन्वयार्थः -

लक्ष्मणः- एते वयम् अयोध्यां प्राप्ताः वयम् अयोध्यां प्राप्तवन्तः तथा आलिखिताः।

रामः - (साश्रम् अश्रुपातपूर्वकम्) स्मरामि, हन्त स्मरामि।

तातपादेषु पितृचरणेषु जीवत्सु प्राणं दधत्सु दारसंग्रहे विवाहे नूतने नवे मातृभिः जननीभिः चिन्त्यमानानां लाल्यमानानां नः अस्माकं ते पूर्वानुभूताः हि निश्चयेन दिवसाः गताः दिवसाः व्यतीताः॥ १९॥

इयम् एषा अपि तदा विवाहात् परं जानकी देवी सीता -

प्रतनुविरलैः प्रतनूनि च तानि विरलानि तैः अतिसूक्ष्मानिविडैः प्रान्तोन्मीलन्मनोहरकुन्तलैः प्रान्तोन्मिलन्तः कपोलप्रान्ते स्फुरन्तः तैः मनोहरैः कुन्तलैः सुन्दरैः केशैः, दशनकुसुमैः कुसुमतुल्यदन्तैः मुग्धालोकं दर्शनीयं मुखम् आननं दधती धारयन्ती शिशुः बालिका इयं जानकी अपि एषा सीता अपि ललितललितैः मनोहरादपि मनोहरैः ज्योत्स्नाप्रायैः कौमुदीतुल्यैः अकृत्रिमविभ्रमैः स्वाभाविकविलासैः मधुरैः प्रियैः अङ्गकैः अवयवैः मे मम अम्बानां जननीनां कौशल्यादीनां कुतूहलं कौतुकम् अकृत अकरोत्॥ २०॥

लक्ष्मणः - एषा मन्थरा अर्थाद् अयं मन्थरवृत्तान्तः आलिखितः।

रामः - (सत्वरम् शीघ्रम् अन्यतो मन्थरावृत्तान्तसूचकस्थलाद् अन्यत्र दर्शयन् अवलोकयन्) देवि प्रिये वैदेहि सीते।

शृङ्गवेरपुरे शृङ्गवेरपुराख्ये स्थाने अयम् एष स पूर्वदृष्टः इङ्गुदीपादपः तापसतरुः यत्र वनगमनकाले पुरा पूर्वं स्निग्धेन स्नेहयुक्तेन परमभक्तेन निषादपतिना निषादाधिपेन गुहेन समागमः साक्षात्कारः आसीत् प्रवृत्तः।।२१।।

लक्ष्मणः - (विहस्य सस्मितम्, स्वगतम् आत्मगतम्) अये अहो आर्येण श्रीरामेण मध्यमाम्बावृत्तम् कैकेय्याः चरितम् अन्तरितम् निह्नुतम्।

व्याख्यानम् -

ततः परस्मिन् चित्रे विवाहात् परं तेषाम् अयोध्यानगरप्राप्तिः अङ्किता। रामः सक्रन्दनं कथयति यत् स सर्वमेतत् वृत्तान्तं स्मरति इति।

अत्र श्रीरामः विवाहात् परं तेषां जीवनं कथम् अतिवाहितम् इति वर्णयति। स वदति यत् तस्मिन् काले तस्य पितृचरणाः जीविताः आसन्। अतः राज्यादिविषये सर्वं चिन्तनादिकं स करोति स्म। अपि च तेषां मातरः तेषां सुखदुःखादिविषये सततं चिन्तयन्त्यः आसन्। मातृषु पितृषु च सत्सु ते सर्वथा एव चिन्तामुक्ताः आसन्। एवं तस्मिन् काले तेषां दिनानि सुखेन गच्छन्ति स्म। अत्र तानि सुखमयानि दिनानि चित्रम् अवलोक्य स्मृतिपथमायान्ति श्रीरामचन्द्रस्य।

ततः श्रीरामः चित्रे चित्रितायाः विवाहोत्तरवर्तिकालीनायाः सीतायाः शरीरसौन्दर्यं वर्णयति। सीतायाः मुखम् अतीव निपुणतया भगवता निर्मितम्। अतः तद् विरलम् आसीत्। तस्याः सुन्दरकेशाः मुखस्य उपरि स्फुरन्ति स्म। तस्याः श्वेताः दन्ताः पुष्पाणि इव कोमलानि आसन्। एवं मोहकरं

मुखमण्डलं धारयन्त्याः सीतायाः अङ्गानि अतिकोमलानि आसन्। यथा ज्योत्स्ना जनानां मनसि प्रमोदम् उत्पादयति तथा स्वाभाविकतया विलासयुक्तानि सीतायाः अङ्गानि अपि रामस्य तथा तस्य जननीनां कौशल्याकैकेयीसुमित्राणां मनःसु कुतूहलम् असृजत्। अतः ताः पुनः पुनः जानकीम् अवलोकितुम् समुत्सुकाः आसन्।

ततः मन्थरावृत्तान्तं यदा लक्ष्मणः दर्शयति तदा रामः कैकेय्या मातुः अपवादविषयकम् आलोचनम् अनिच्छन् चित्रान्तरं पश्यति। यत् दृष्ट्वा स सीतां प्रति कथयति यत् अयमेव स तापसतरुः यत्र निषादराजेन गुहेन सह तस्य साक्षात्कारो जातः।

व्याकरणविमर्शः -

१. जीवत्सु- जीव्-धातोः शतृप्रत्यये सप्तमीबहुवचने जीवत्सु इति रूपम्।

२. चिन्त्यमानानाम्- चिन्त्-धातोः कर्मणी शानचि षष्ठीबहुवचने चिन्त्यमानानाम् इति रूपम्।

३. प्रान्तोन्मीलन्मनोहरकुन्तलैः- प्रान्तयोः उन्मीलन्तः प्रान्तोन्मीलन्तः इति सप्तमीतत्पुरुषः। मनोहराः कुन्तलाः मनोहरकुन्तलाः इति कर्मधारयसमासः। प्रान्तोन्मीलन्तः मनोहरकुन्तलाः प्रान्तोन्मीलन्मनोहरकुन्तलाः, तैः इति कर्मधारयसमासः।

४. दशनकुसुमैः– दशनाः कुसुमानीव तैः दशनकुसुमैः इति कर्मधारयसमासः।

५. मुग्धालोकम्- मुग्धः आलोकः यस्य तत् मुग्धालोकम् इति बहुव्रीहिसमासः।

६. अकृत्रिमविभ्रमैः- अकृत्रिमाः विलासाः येषां तैः अकृत्रिमविभ्रमैः इति बहुव्रीहिसमासः।

छन्दः-

१. जीवत्सु इति श्लोके अनुष्टुप् छन्दः।

२. प्रतनुविरलैः इति श्लोके हरिणीछन्दः। तल्लक्षणं तावत्- "नसमरसला गः खड्वैर्दैर्हयैर्हरिणी मता" इति।

अलङ्कारविमर्शः -

१. जीवत्सु इति श्लोके दिवसानां सुखप्रदत्वे सत्यपि, तातपादानां जीवितत्वे पुनः नवविवाहरूपस्य हेत्वन्तरस्य खले कपोतिकान्यायात् साहित्येन एकत्रावतारणात् समुच्चयालङ्कारः।

२. प्रतनुविरलैः इत्यत्र मुग्धनायिकावत् असाधारणचेष्टादीनां वर्णनात् स्वभावोक्त्यलङ्कारः। तल्लक्षणं दर्पणे -

"स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्।" इति।

३. ज्योत्स्नाप्रायैः इत्यत्र लुप्तोपमालङ्कारः।

४. स्वभावोक्तेः उपमाया अङ्गाङ्गिभावात् सङ्करालङ्कारः।

पाठगतप्रश्नाः - ४

२२. श्रीरामस्य विवाहात्परं राज्यादिविषये कः चिन्तनं करोति स्म।

२३. कीदृशा दिवसाः रामादीनां गताः।

२४. सीतायाः केशाः कीदृशाः।

२५. सीतायाः दन्ताः कीदृशाः।

२६. सीतायाः मुखं कीदृशम्।

२७. सीताया अवयवाः कीदृशाः।

२८. कुत्र निषादराजेन सह रामस्य साक्षात्कारः सम्पन्नः।

पाठसारः

रामस्य प्रशंसावचनं श्रुत्वा आनन्दिता सीता रामेण सह चित्रं द्रष्टुमारभते।प्रथमतः ते तत् चित्रं पश्यन्ति यत्र ताटकावधकाले सन्तुष्टः ऋषिः वैश्वामित्रः कृशाश्वात् समालब्धानि दिव्यास्त्राणि अनुकम्पया रामाय प्रायच्छत्। रामवचनात् तेषां जृम्भकास्त्राणां दिव्यत्वं ज्ञात्वा देवी सीता तानि दिव्यास्त्राणि प्रणमन्ति। रामः सीतां कथयति यत् यथा स एतानि प्राप्तवान् तथैव तयोः सन्ततिः अपि एतानि दिव्यास्त्राणि प्राप्स्यति। सीता रामं वदति यत् - सा तस्य वचनेन अनुगृहीता अस्ति इति।

तदनु लक्ष्मणः मिथिलावृत्तान्तात्मकं चित्रं प्रदर्शयति। तत्र श्रीरामस्य चित्रम् अवलोक्य सीता तस्य देहादिसौन्दर्यं वर्णयति। ततः स कथं अनायासेन हरशरासनम् अखण्डयत् इति कथयति। ततः तेषां विवाहकालीनानि चित्राणि आगतानि यत्र विवाहात् पूर्वं चत्वारः भातरः रामलक्ष्मणभरतशत्रुघ्नाः केशदानरूपं मङ्गलकार्यं कुर्वन्तः सन्ति। तत्र एकत्र स्वयं जनकः तस्य पुरोहितः शतानन्दः च वसिष्ठादीनां वरपक्षीयाणां सत्काररतौ आस्ताम्। ततः श्रीरामः तयोः विवाहस्य माहात्म्यम् वर्णयति। सः कथयति यत् जनकरघुवंशयोः च मध्ये सम्बन्धः कस्य न अभीष्टः इति। पुनश्च यस्मिन् विवाहे कन्यादाता कन्याग्राहकः च स्वयं विश्वामित्रः। पुरोहितः सीतायाः कङ्कणशोभितं हस्तं तस्य हस्तस्य उपरि स्थापनान्तरं श्रीरामः आनन्दितः अभवत्।

ततः ते क्रमेण भरतपत्नीं माण्डवीं शत्रुघ्नपत्नीं श्रुतकीर्तिं लक्ष्मणपत्नीम् ऊर्मिलां च पश्यन्ति। तदनन्तरम् एकस्मिन् चित्रे ते परशुरामम् पश्यन्ति। ततः यावत् लक्ष्मणः श्रीरामेण महावीरः परशुरामः पराजितः इति रामपराक्रमं वर्णयितुं प्रारभते तावत् श्रीरामः तं बाधित्वा प्रसङ्गम् एव परिवर्तयति। रामस्य एवंविधं विनयम् अवलोक्य सीता मुग्धा भवति। परस्मिन् चित्रे ते पश्यन्ति यत् ते सर्वे भातरः विवाहानन्तरं सपत्नीका अयोध्यां प्राप्ताः। श्रीरामः - मातृषु पितृषु सततं तेषां सुखादिविषये चिन्तयत्सु

कथं सुखेन तेषां दिनानि गच्छन्ति स्म, कथं सीतायाः अपरिसीमं सौन्दर्यम् अवलोक्य तस्य मातरः स्वयं स च कौतुकाक्रान्ताः सञ्जाताः इत्यादिकं सर्वं मनोरमरीत्या वर्णयति।

ततः रामो मन्थरावृत्तान्तं त्यक्त्वा चित्रालिखितम् इङ्गुदीपादपं दृष्ट्वा कथयति अत्रैव तस्य निषादराजेन गुहेन सह साक्षात्कारः सम्पन्नः। एवं समासेनास्य पाठस्य सारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. दिव्यास्त्रवृत्तान्तं ब्रह्मादयो ब्रह्महिताय इत्यादिश्लोकव्याख्यानपुरःसरं वर्णयत।

२. सीतया कृतं रामवर्णनं यथामति लिख्यताम्।

३. समयः स वर्तते इति श्लोकं व्याख्यात।

४. विवाहवृत्तान्तं वर्णयत।

५. प्रतनुविरलैः इत्यादिश्लोकं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. दिव्यास्त्राणि कृशाश्वाद् विश्वामित्रेण सम्प्राप्तानि।

२. रामचन्द्रेण ताटकावधसमये विश्वामित्राद् दिव्यास्त्राणि आप्तानि।

३. ब्रह्मादयः वेदस्य संरक्षणाय तपः कृतवन्तः।

४. ब्रह्मादयः शरदां परःसहस्रं तपः कृतवन्तः।

५. ते स्वकीयानि तेजांसि इव दिव्यास्त्राणि अपश्यन्।

६. उपजातिच्छन्दसः लक्षणं तावद् -

"अनन्तरिदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ते।"

७. अप्रसादानि प्रसादानि कृतानि इति प्रसादशब्दाद् च्विप्रत्यये करोतेरनुप्रयोगे क्तप्रत्यये प्रथमाबहुवचने प्रसादीकृतानि इति रूपम्।

८. आर्यपुत्रः प्रस्फुटन्नवनीलोत्पलसदृशश्यामलेन स्निग्धेन मसृणेन बलवता शरीरसौन्दर्येण विस्मयस्तिमितजनकदृश्यमानसुन्दरश्रीः हेलया खण्डितशङ्करशरासनः शिखण्डमुग्धमुखमण्डलः आलिखितः।

९. अनादरेण खण्डितम् अनादरखण्डितमिति तृतीयातत्पुरुषसमासः। शङ्करस्य शरासनं शङ्करशरासनमिति षष्ठीतत्पुरुषसमासः। अनादरखण्डितं शङ्करशरासनं येन सः अनादरखण्डितशङ्करशरासनः इति बहुव्रीहिसमासः।।

१०. सीतायाः तातः वसिष्ठादीन् सम्बन्धिनः अर्चति।

११. जनकस्य पुरोहितः गौतमः शतानन्दः।

१२. जनकेन सह गोतमसुतः शतानन्दः वसिष्ठादीन् अर्चति।

१३. जनकवंशस्य रघुवंशस्य च सम्बन्धः समेषां प्रियः।

१४. सम्बन्धे दाता ग्रहीता च कुशिकनन्दनः विश्वामित्रः।

१५. रामादयः भ्रातरः चित्रे विवाहकालकृतगोदानमङ्गलाः विवाहदीक्षिता दृश्यन्ते।

१६. तस्मिन्नेव काले इत्यनेन विवाहकालः अभिप्रेतः।

१७. सीतायाः करः शतानन्देन रामस्य हस्ते अर्पितः।

१८. आगृहीतकमनीयकङ्कणः मूर्तिमान् महोत्सव इव सीतायाः करः।

१९. सीतायाः हस्तः मूर्तिमान् महोत्सव इव रामम् आनन्दितम् अकरोत्।

२०. मञ्जुभाषिणीवृत्तस्य लक्षणम् - "सहसा जगौ भवति मञ्जुभाषिणी" इति।

२१. रामः विनयमाहात्म्येन शोभते।

२२. श्रीरामस्य विवाहात्परं राज्यादिविषये तज्जनकः दशरथः चिन्तनं करोति स्म।

२३. दशरथे जीविते नवदारपरिग्रहात्परं मातृभिः परिपाल्यमानानां रामादीनां दिवसाः सानन्दं गताः।

२४. सीतायाः केशाः प्रतनुविरलाः कपालप्रान्ते विकसन्तः मनोहराः सन्ति।

२५. सीतायाः दन्ताः कुसुमसदृशाः भवन्ति।

२६. सीतायाः मुखं मुग्धालोकम्।

सीताया ललितादपि ललिताः चन्द्रिकासदृशाः स्वाभाविकविलासाः मधुराः अवयवाः।

२७. शृङ्गवेरपुरे इङ्गुदीपादपस्य समीपे निषादराजेन सह रामस्य साक्षात्कारः सम्पन्नः।

॥ इति चतुर्दशः पाठः ॥

348sk15

१५

उत्तररामचरितम् - चित्रदर्शनम् - २

प्रस्तावना

पूर्वस्मिन् पाठे अस्माभिः रामसीतालक्ष्मणाः विवाहात् परम् अयोध्यायां कथं स्थिताः इति आलोचितम्। विराधवृत्तान्तः मन्थरावृत्तान्तः गुहसाक्षात्कारः इत्यपि वयम् आलोचितवन्तः। अस्मिन् पाठे प्रथमतः सीता चित्रमध्ये रामलक्ष्मणयोः जटासंयमनवृत्तान्तं पश्यति। तदनु वनमार्गेण गमनकाले तैः यत् प्राकृतिकसौन्दर्यम् अवलोकितं तस्य चित्राणि ते पश्यन्ति। प्रसङ्गेऽस्मिन् भागीरथीनदी , श्यामनामकः वटवृक्षः, प्रस्रवणनामकः पर्वतः, विन्ध्यारण्यम् इत्येतेषां चित्रदर्शनम् अस्मिन् पाठे आलोचितम्।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामस्य सीतायाः च कांश्चन विशेषगुणान् ज्ञातुं शक्नुयात्।
- भागरथीं श्यामवृक्षं प्रस्रवणपर्वतं विन्ध्यारण्यं च जानीयात्।
- सीतारामयोः सुदृढं प्रेम जानीयात्।
- छन्दसां लक्षणानि अवगच्छेत्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।

१५.१) सम्पूर्णः मूलपाठः

सीता - **अह्मो एसो जडासंजमणवुत्तन्तो। (अहो एष जटासंयमनवृत्तान्तः।)**

लक्ष्मणः -

पुत्रसङ्क्रान्तलक्ष्मीकैर्यद् वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥२२॥

सीता - **एषा पषण्णपुण्णसलिला भअवदी भाईरही। (एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।)**

रामः - रघुकुलदेवते ! नमस्ते।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसा रोषात्प्लुष्टान् पितुश्च पितामहान्।
अगणिततनूतापस्तप्त्वा तपांसि भगीरथो
भगवति! तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥२३॥
सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।

लक्ष्मणः - एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम।

(रामः सस्पृहमवलोकयति।)

सीता - सुमेरदि वा तं पदेसं अज्जउत्तो? (स्मरति वा तं प्रदेशमार्यपुत्रः?)

रामः - अयि कथं विस्मर्यते ?

अलसललितमुग्धान्यध्वसम्पातखेदा-
दशिथिलपरिम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।।२४।।

लक्ष्मणः - एष विन्ध्याटवीमुखे विराधसंवादः।

सीता - अलंदाव एदिणा। पेक्खम्मि दाव अज्जउत्तसहत्तधरिदतालबुन्तादवत्त-निवारिदादपं दक्खिणारण्णप्पवेशारम्भम्। (अलं तावदेतेन। पश्यामि
तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपमात्मनो
दक्षिणारण्यप्रवेशारम्भम्।)

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥२५॥

लक्ष्मणः - अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्ध-
गोदावरीमुखरकन्दरः सन्ततमभिष्यन्दमानमेघमेदुरितनीलिमाजनस्थानमध्यगो
गिरिः प्रस्रवणो नाम।

स्मरसि सुतनु तस्मिन्पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि।
स्मरसि सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि।। २६।।

किं च,

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्।। २७।।

लक्ष्मणः - एषा पञ्चवट्यां शूर्पणखा।

सीता - हा अज्जउत्त, एत्तिअं दे दंसणं। (हा आर्यपुत्र, एतावत् ते दर्शनम्।)

रामः - अयि विप्रयोगत्रस्ते, चित्रमेतत्।

सीता- जहा तहा होदु। दुज्जणो असुहं उप्पदेइ। (यथा तथा भवतु। दुर्जनः असुखमपुत्पादयति।)

रामः - हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्मणः - अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।२८।।

१५.२) साम्प्रतं मूलपाठम् अवगच्छाम - २०

सीता - अह्यो एसो जडासंजमणवुत्तन्तो। (अहो एष जटासंयमनवृत्तान्तः।)

लक्ष्मणः - पुत्रसङ्क्रान्तलक्ष्मीकैर्यद् वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥२२॥

सीता - एषा पषण्णपुण्णसलिला भअवदी भाईरही। (एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।)

रामः - रघुकुलदेवते ! नमस्ते।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसा रोषात्प्लुष्टान् पितुश्च पितामहान्।
अगणिततनूतापस्तप्त्वा तपांसि भगीरथो
भगवति! तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥२३॥
सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव।

अन्वयः -

सीता - अहो एष जटासंयमनवृत्तान्तः।

लक्ष्मणः - पुत्रसङ्क्रान्तलक्ष्मीकैः वृद्धेक्ष्वाकुभिः यत् (व्रतं) धृतं तत्पुण्यम् आरण्यकव्रतम् आर्येण बाल्ये धृतम्॥२२॥

सीता - एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

रामः - रघुकुलदेवते! नमस्ते।

हे भगवति, भगीरथः अगणिततनूतापः सन् तपांसि तप्त्वा तव अद्भिः स्पृष्टान् सगराध्वरे तुरगविचयव्यग्रान् उर्वीभिदः रोषाद् कपिलमहसा प्लुष्टान् च पितुः पितामहान् चिरात् उदतीतरत्॥२३॥

सा त्वम् अम्ब! स्नुषायां सीतायाम् अरुन्धती इव शिवानुध्याना भव।

अन्वयार्थः -

सीता - अहो आश्चर्यम् एषः अयं जटासंयमनवृत्तान्तः जटाबन्धनस्य वृत्तान्तः।

लक्ष्मणः - पुत्रसङ्क्रान्तलक्ष्मीकैः पुत्रान् आश्रिता लक्ष्मीः श्रीः येषां तैः वृद्धेक्ष्वाकुभिः वृद्धैः इक्ष्वाकुवंशोत्पन्नैः नृपैः यद् धृतं यद् आरण्यकव्रतं वानप्रस्थव्रतं गृहीतम् तत्पुण्यं पवित्रं वानप्रस्थव्रतम् आर्येण रामेण बाल्ये बाल्यकाले धृतम् अङ्गीकृतम्।॥२२॥

सीता - एषा इयं प्रसन्नपुण्यसलिला निर्मलपवित्रजलपूर्णा भगवती देवी भागीरथी गङ्गा।

रामः - रघुकुलदेवते भागीरथि नमः नमस्कारः तुभ्यम्।

हे भगवति देवि, भगीरथः अस्मत्पूर्वजः अगणिततनुतापः उपेक्षितदेहदुःखः सन् तपांसि तप्त्वा तपस्याः कृत्वा तव भवत्याः अद्भिः जलैः स्पृष्टान् आमृष्टान् सगराध्वरे सगरयज्ञे तुरगविचयव्यग्रान् तुरगस्य अश्वस्य विचये अन्वेषणे व्यग्रान् व्याकुलान् उर्वीभिदः पृथिवीविदारकान् रोषात् क्रोधात् कपिलमहसा कपिलमुनितेजसा प्लुष्टान् दग्धान् पितुः जनकस्य पितामहान् सगरात्मजान् चिराद् बहुसमयाद् अनन्तरम् उदतीतरत् उद्धारयामास॥२३॥

सा त्वं भवती अम्ब हे मातः, स्नुषायां वध्वां सीतायाम् अरुन्धती वसिष्ठपत्नी इव शिवानुध्याना मङ्गलचिन्तनपरा भव।

व्याख्यानम् -

सीता जटाबन्धनवृत्तान्तम् अपश्यत्। रामः लक्ष्मणः च शृङ्गवेरपुरे एव जटाबन्धनम् अकरोत्। अत्र लक्ष्मणः श्रीरामस्य व्रतपालनरूपेन गुणेन इक्ष्वाकुवंशीयेभ्यः नृपेभ्यः उत्कृष्टतां वर्णयति। इक्ष्वाकुवंशस्य राजानः सम्पूर्णं जीवनं व्याप्य राज्यसमृद्ध्यादिसुखम् अनुभवन्ति। यदा वार्धक्यकालः समापतति तदा ते राज्यस्य भारं पुत्रेभ्यः समर्प्य वानप्रस्थव्रतम् आश्रयन्ति। अर्थात् सर्वविधानि सुखानि लब्ध्वा ते अन्ते व्रतम् आश्रयन्ति। किन्तु श्रीरामः शैशवे एव एतद् दुष्करं व्रतं समाचरत्। व्रतपालनाय स वार्धक्यकालपर्यन्तम् अपेक्षां न अकरोत्। एवं श्रीरामः बाल्ये एव पवित्रं वानप्रस्थाश्रमम् आचरितवान्।

सीता चित्रे भागीरथीनदीं पश्यति यस्याः जलं निर्मलं पवित्रं च वर्तते। एषा च नदी रघुवंशस्य पूर्वजेन भगीरथेन तपसा स्वर्गतः पृथिवीलोकं प्रति आनीता। अतः सा भागीरथी रघुवंशस्य कुलदेवता अस्ति। अतः तां नदीं श्रीरामः नमस्करोति।

अत्र श्रीरामः गङ्गायाः स्वर्गलोकतः भूलोकागमनवृत्तान्तं वर्णयति। प्राचीनकाले सगरनामकः नृपः अश्वमेधनामकं यज्ञम् अकरोत्। अश्वमेधयज्ञे अश्वः एव प्रधानः भवति। तं च अश्वम् इन्द्र कपटताम् आश्रित्य अचोरयत् किञ्च गुप्तस्थाने अस्थापयत्। अश्वं विना यज्ञसमाप्तिः न भविष्यति। अतः सगरस्य षष्टिसहस्रं पुत्राः अश्वम् अनुसन्दधानाः पृथिवीं भिन्दन्ति स्म। तस्मिन् एव महर्षिः कपिलः केनचित् कारणेन कुपितः सन् तान् सर्वान् अपि पुत्रान् भस्मावशेषान् अकुर्वन्। भागीरथीजलस्पर्शेन एव ते पुत्राः उद्धारं प्राप्तुं समर्थाः। किन्तु भागीरथी तदा स्वर्गे आसन्। बहुकालात् परं सगरस्य प्रपौत्रः भगीरथः कठोरतपसा भागीरथीं भूलोकम् आनीय तस्याः जलेन षष्टिसहस्रपुत्राणाम् उद्धारं कृतवान्।

रामः भागीरथीम् अम्ब इति उक्त्वा सम्बोधयति किञ्च सीतायाः मङ्गलविधानाय प्रार्थयति।

विशेषटिप्पणी -

शिवानुध्याना भवेत्यत्र बीजार्थस्य प्ररोहत्वाद् उद्भेदनामकं सन्ध्यङ्गम्। तल्लक्षणं तावत् - "बीजार्थस्य प्ररोहः स्यादुद्भेदः" इति।

व्याकरणविमर्शः -

१. पुत्रसङ्क्रान्तलक्ष्मीकैः- पुत्रेषु सङ्क्रान्ता पुत्रसङ्क्रान्ता इति सप्तमीतत्पुरुषः। पुत्रसङ्क्रान्ता लक्ष्मीः येषां तैः इति बहुव्रीहिसमासः।

२. आरण्यकम् - अरण्ये भवा इत्यर्थे अरण्यशब्दाद् वुञ्प्रत्यये आरण्यकाः इति निष्पद्यते। आरण्यकानामिदम् इति विग्रहे आरण्यकशब्दाद् अणि आरण्यकम् इति रूपम्।

३. तुरगविचयव्यग्रान्- तुरेण गच्छतीति तुरगः। तस्य विचयः तुरगविचयः इति षष्ठीतत्पुरुषः। तस्मिन् व्यग्रान् तुरगविचयव्यग्रान् इति सप्तमीतत्पुरुषः।

४. उदतीतरत्– उत्पूर्वकात् तृधातोः णिचि लुङि उदतीतरत् इति रूपम्।

छन्दः - तुरगविचयव्यग्रान् इत्यस्मिन् श्लोके हरिणीच्छन्दः। तल्लक्षणं-

"रसयुगहयैर्न्सौम्रौस्लौ गौ यदा हरिणी तदा।" इति।

पाठगतप्रश्नाः - १

१. रामलक्ष्मणयोः जटाबन्धनं कुत्र सञ्जातम्।

२. इक्ष्वाकुवंशीयाः कदा वानप्रस्थाश्रमं पालयति।

३. भागीरथी कीदृशी वर्तते।

४. कः भागीरथीं स्वर्गतः मर्त्यलोकम् आनीतवान्।

५. सा सीतायां कीदृशी भवेदिति रामस्य प्रार्थना।

१५.३) साम्प्रतं मूलपाठम् अवगच्छाम - २१

लक्ष्मणः - **एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम।**

(रामः सस्पृहमवलोकयति।)

सीता - **सुमेरदि वा तं पदेसं अज्जउत्तो? (स्मरति वा तं प्रदेशमार्यपुत्रः?)**

रामः - **अयि कथं विस्मर्यते ?**

अलसललितमुग्धान्यध्वसम्पातखेदा-
दशिथिलपरिम्भैर्दत्तसंवाहनानि।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।।२४।।

अन्वयः -

लक्ष्मणः - एष भरद्वाजावेदितः चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे श्यामो नाम वटः।

(रामः सस्पृहम् अवलोकयति।)

सीता - आर्यपुत्र, तं प्रदेशं स्मरति वा?

रामः - अयि कथं विस्मर्यते ?

यत्र त्वम् अध्वसम्पातखेदात् अलसललितमुग्धानि अशिथिलपरिरम्भैः दत्तसंवाहनानि परिमृदितमृणालीदुर्बलानि अङ्गकानि मम उरसि कृत्वा निद्राम् अवाप्ता।।२४।।

अन्वयार्थः -

लक्ष्मणः - एषः अयं भरद्वाजावेदितः मुनिना भरद्वाजेन विज्ञापितः चित्रकूटयायिनि चित्रकूटपर्वताभिगामिनि वर्त्मनि मार्गे वनस्पतिः वृक्षः कालिन्दीतटे कालिन्दीनद्याः तीरे वटः श्यामो नाम श्यामनामकः वटवृक्षः।

(रामः सस्पृहम् सोत्कण्ठम् अवलोकयति पश्यति)

सीता - आर्यपुत्र, तं प्रदेशं स्थानं स्मरति वा।

रामः - अयि कथं केन प्रकारेण विस्मर्यते विस्मरामि।

यत्र यस्मिन् प्रदेशे त्वं सीता अध्वसम्पातखेदात् मार्गगमनपरिश्रमात् अलसललितमुग्धानि अलसानि आलस्ययुक्तानि ललितानि कोमलानि मुग्धानि सुन्दराणि अशिथिलपरिरम्भैः गाढालिङ्गनैः दत्तसंवाहनानि कृतमर्दनानि परिमृदितमृणालीदुर्बलानि परिमृदिताश्च ताः मृणाल्यः ता इव दुर्बलानि कृशानि अङ्गकानि शरीरावयवान् मम रामस्य उरसि वक्षःस्थले कृत्वा निधाय निद्रां स्वापम् अवाप्ता प्राप्ता।।२४।।

व्याख्यानम् -

वनवासकाले महर्षिः भरद्वाजः तेभ्यः चित्रकूटवनं प्रति गमनमार्गं ज्ञापितवान्। तस्मिन् गमनमार्गे यमुनानद्याः तीरे ते श्यामनामकं वटवृक्षं चित्रे पश्यति सीता। तदा सीता रामं - स्मरति वा एतं प्रदेशम् इति पृच्छति। तदा रामः वदति यत् तस्य प्रदेशस्य स्मरणम् असम्भवम्। ततः रामः अविस्मरणहेतुं कथयति - सीता मार्गपरिश्रमात् अतीव श्रान्ता आसीत्। सीतायाः अङ्गानि आलस्ययुक्तानि परिश्रान्तानि च आसन् किन्तु तानि तेषां सौन्दर्यं न अत्यजन्त। तां च श्रान्ताम् अवलोक्य श्रीरामः तां दृढतया आलिङ्गितवान्। तेन आलिङ्गनेन सीताया पद्मदण्डानि इव कोमलानि अङ्गानि विदलितानि। अतीव परिश्रान्ता सीता तदा रामस्य दृढालिङ्गनं प्राप्य तस्य वक्षस उपरि एव स्थित्वा स्वापं कृतवती। एवं रामसीतयोः मध्ये प्रेमप्राचुर्यं प्रस्तुतेन श्लोकेन वर्णयति कविः।

व्याकरणविमर्शः -

१. भरद्वाजावेदितः- भरद्वाजेन आवेदितः भरद्वाजावेदितः इति तृतीयातत्पुरुषसमासः।

२. चित्रकूटयायिनि- चित्रकूटं याति इति चित्रकूटयायि, तस्मिन् चित्रकूटयायिनि।

३. वनस्पतिः– वनस्य पतिः, पास्करादित्वात् सुट्।

छन्दः -

१. अलसललितेत्यस्मिन् श्लोके मालिनीछन्दः। तल्लक्षणं तावत् - "ननमयययुतेयं मालिनी भोगिलोकैः" इति।

अलङ्कारविमर्शः -

१. अलसललितेत्यस्मिन् श्लोके आदौ अध्वखेदः, ततः ललितत्वसौकुमार्यभावः, ततः दर्शनाद् अशिथिलालिङ्गनबाहुल्यम्, ततः तत्संवाहनता, ततः दौर्बल्यम्, ततः रामवक्षसि लग्नता, ततो निद्रावाप्तिरिति परं परं प्रति पूर्वपूर्वस्य हेतुतया कारणमालालङ्कारः। तल्लक्षणं दर्पणे -

"परं परं प्रति यदा पूर्वपूर्वस्य हेतुता।

तदा कारणमाला स्यात्" इति।

पाठगतप्रश्नाः - २

६. भरद्वाजावेदितस्य वनस्पतेः किं नाम।

७. वटवृक्षः कस्याः नद्याः तीरे वर्तते।

८. सीताया अङ्गानि कथम् आलस्ययुक्तानि।

९. सीता कुत्र कथं शेते।

१५.४) साम्प्रतं मूलपाठम् अवगच्छाम - २२

लक्ष्मणः - **एष विन्ध्याटवीमुखे विराधसंवादः।**

सीता - **अलंदाव एदिणा। पेक्खम्मि दाव अज्जउत्तसहत्तधरिदतालबुन्तादवत्त-निवारिदादपं दक्खिणारण्णप्पवेशारम्भम्। (अलं तावदेतेन। पश्यामि तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपमात्मनो दक्षिणारण्यप्रवेशारम्भम्।)**

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥२५॥

अन्वयः -

लक्ष्मणः - एष विन्ध्याटवीमुखे विराधसंवादः।

सीता - अलं तावद् एतेन। पश्यामि तावद् आर्यपुत्रस्वहस्तधृतताल-वृन्तातपत्रनिवारितातपम् आत्मनो दक्षिणारण्यप्रवेशारम्भम्।

गिरिनिर्झरिणीतटेषु वैखानसाश्रिततरूणि एतानि तानि तपोवनानि (सन्ति) येषु आतिथेयपरमाः नीवारमुष्टिपचना यमिनो गृहिणः गृहाणि भजन्ते॥२५॥

अन्वयार्थः -

लक्ष्मणः - एषः अयं विन्ध्याटवीमुखे विन्ध्यारण्यस्य प्रारम्भे विराधसंवादः विराधराक्षसस्य वृत्तान्तः।

सीता - अलं पर्याप्तं तावत् एतेन अनेन। तावत् आर्यपुत्रस्वहस्तधृततालवृन्तातपत्रनिवारितातपम् आर्यपुत्रेण स्वामिना श्रीरामेण स्वहस्तेन निजकरेण धृतं गृहीतं तालवृन्तं तालपत्ररूपम् आतपत्रं छत्रं तेन निवारितः आतपः निदाघः यस्मिन् तम् आत्मनः स्वस्य दक्षिणारण्यप्रवेशारम्भम् दक्षिणारण्ये प्रवेशस्य आरम्भं पश्यामि अवलोकयामि।

गिरिनिर्झरिणीतटेषु पर्वतनदीतीरेषु वैखानसाश्रिततरूणि वानप्रस्थाश्रमसेवितानि एतानि पुरोदृश्यमानानि तानि प्रसिद्धानि तपोवनानि सन्ति। येषु तपोवनेषु आतिथेयपरमाः अतिथिसत्कारप्रधानाः नीवारमुष्टिपचना मुष्टिपरिमितान्नपाचकाः यमिनः संयमिनः मुनयः गृहिणः गृहस्थाः सपत्नीकाः गृहाणि वासस्थानानि भजन्ते सेवन्ते॥२५॥

व्याख्यानम् -

लक्ष्मणः तौ विराधराक्षससंवादं दर्शितवान्। विन्ध्यारण्यप्रवेशमुखे विराधनामकः राक्षसः रामं लक्ष्मणं च भक्षितुं प्रयत्नं कृतवान्। किन्तु तदा रामः तं राक्षसं निहतवान्। अस्य वृत्तान्तस्य अनिष्टत्वात्

सीता तत् चित्रं द्रष्टुम् अनिच्छां प्रदर्शितवती। अतः सा दक्षिणारण्यप्रवेशं पश्यति यत्र श्रीरामः तालवृन्तम् आतपत्रं कृत्वा आतपं निवारयितुं चेष्टमानः वर्तते।

अस्मिन् चित्रे रामसीतालक्ष्मणाः विन्ध्यारण्यं प्रविष्टाः। चित्रम् अवलोक्य श्रीरामः मुग्धः सन् विन्ध्यारण्यं वर्णयितुं प्रवृत्तः। विन्ध्यपर्वते अरण्यम् इदं वर्तते। अतः अरण्यस्य पार्श्वे एव पार्वत्यनद्यः सच्छन्दं प्रवहन्ति। इदम् अरण्यं न मनुष्यहीनम्। यतो हि अस्य वृक्षाणाम् अधः वार्धक्यकाले वानप्रस्थाश्रमम् आश्रयन्तः जनाः निवसन्ति। अस्मिन् च वने बहवः मुनयः सपरिवाराः तिष्ठन्ति। ते मुनयः मुष्टिपरिमितं नीवारधान्यं भुक्त्वा एव जीवनधारणं कुर्वन्ति। अपि च वनं प्रति आगतानां सर्वेषां जनानां अतिथिज्ञानेन सम्यक् सत्कारादिकं करोति। एवं ते अतिथिदेवो भव इति उपनिषद्वाक्यं सम्यक् पालयन्ति इति वक्तुम् इच्छति रामः। एतादृशानां पुण्यवतां मुनीनां तपः कुर्वतां वानप्रस्थिनां च सम्बन्धात् विन्ध्यारण्यमिदं तपोवनं सञ्जातम्। अतः तत्र गत्वा ते धन्याः एव अभवन् इति रामस्य आकूतम्।

व्याकरणविमर्शः -

१. निर्झरिणी- निर्झरशब्दात् इनिप्रत्यये ङीपि च निर्झरिणी इति रूपम्।

२. वैखानसाश्रिततरूणि- वैखानसैः आश्रिताः तरवः येषु तथोक्तानि इति बहुव्रीहिसमासः।

छन्दः -

१. एतानि तानि इत्यस्मिन् श्लोके वसन्ततिलकं छन्दः।

पाठगतप्रश्नाः - ३

१०. विन्ध्याटवीमुखे कः संवादः अभवत्।

११. विन्ध्यारण्ये वृक्षाः कथम् आसन्।

१२. मुनयः किं खादन्ति स्म।

१५.५) साम्प्रतं मूलपाठम् अवगच्छाम - २३

लक्ष्मणः - अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्ध-गोदावरीमुखरकन्दरः सन्ततमभिष्यन्दमानमेघमेदुरितनीलिमाजनस्थानमध्यगो गिरिः प्रस्रवणो नाम।

स्मरसि सुतनु तस्मिन्पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि।
स्मरसि सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि।। २६।।

किं च,

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्।। २७।।

अन्वयः -

लक्ष्मणः - अयम् अविरलानोकहनिवहनिरन्तरस्निग्धनील-परिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सन्ततम् अभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो प्रस्रवणो नाम गिरिः।

सुतनु तस्मिन् पर्वते लक्ष्मणेन प्रतिविहितसपर्यासुस्थयोः (आवयोः) तानि अहानि स्मरसि (अथवा) तत्र सरसनीरां गोदावरीं स्मरसि (तथा च) तदुपान्तेषु आवयोः वर्तनानि च स्मरसि।।२६।।

किं च, आसत्तियोगात् किमपि किमपि मन्दम् अविरलितकपोलम् अक्रमेण जल्पतोः, अशिथिलपरिरम्भव्यापृतैकदोष्णोः अविदितगतयामा रात्रिः एव व्यरंसीत्।।२७।।

अन्वयार्थः -

लक्ष्मणः - अयम् एषः अविरलानोकहनिवहनिरन्तरस्निग्ध-नीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः अविरलाः निबिडाः ये अनोकहाः वृक्षाः तेषां निवहाः समूहाः तैः निरन्तराः घनीभूताः स्निग्धाः चिक्कणाः नीलाः श्यामलाश्च परिसराः प्रान्तभागाः यस्य, तेन अरण्येन वनेन परिणद्धा परिवेष्टिता या गोदावरी नदी, तया मुखराणि गोदावरीकलपूरितानि कन्दराणि गुहाः यस्य तादृशः, सन्ततम् अनवरतम् अभिष्यन्दमानमेघदुरितनीलिमा अभिष्यन्दमानैः स्वयं वर्षद्भिः मेघैः जलधरैः दुरितः स्निग्धीकृतः नीलिमा श्यामलत्वं यस्य तादृशः जनस्थानमध्यगः जनस्थाननामकस्य अरण्यस्य मध्यगः मध्ये स्थितः प्रस्रवणो नाम प्रस्रवणनामकः गिरिः पर्वतः।

हे सुतनु! सुन्दरि ! तस्मिन् पर्वते प्रस्रवणाख्ये अद्रौ लक्ष्मणेन सौमित्रिणा प्रतिविहितसपर्यासुस्थयोः प्रतिविहितया कृतया सेवया सुस्थयोः आवयोः तानि सुखमनुभूतानि अहानि दिनानि स्मरसि अथवा तत्र तस्मिन् स्थाने सरसनीरां सरसजलां गोदावरीं तन्नामिकां नदीं स्मरसि तथा तदुपान्तेषु गोदावरीप्रान्तेषु आवयोः सीतारामयोः वर्तनानि निवास–क्रीडा–भ्रमरादीनि च स्मरसि।।२६।।

किं च, आसत्तियोगात् किमपि किमपि मन्दम् अविरलितकपोलम् अक्रमेण जल्पतोः, अशिथिलपरिरम्भव्यापृतैकदोष्णोः अविदितगतयामा रात्रिः एव व्यरंसीत्

आसत्तियोगात् अनुरागात् अतिसान्निध्यात् किमपि किमपि मन्दं शनैः शनैः अविरलितकपोलं परस्परसंमिलितगण्डम् अन्यैरश्राव्यम् अक्रमेण क्रमरहितेन जल्पतोः वदतोः अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः एकैकभुजेन सुदृढतया समालिङ्गने व्यस्तहस्तयोः आवयोः अविदितगतयामा अज्ञातेन गतप्रहरा रात्रिरेव रजन्येव व्यरंसीत् विरता।। परन्तु आवयोः परस्परजल्पनं न विरतमिति सूचितं भवति।।२७।।

व्याख्यानम् -

लक्ष्मणः चित्रे जनस्थाननामके अरण्ये स्थितं प्रस्रवणनामकं पर्वतं दृष्ट्वा तस्य प्राकृतिकसौन्दर्यं वर्णयति। अयं पर्वतः घनारण्येन परिपूरितः। अस्मिन् पर्वते गोदावरी नदी प्रवहति स्म। तस्याः तटप्रदेशः श्यामलवनराजिना शोभमानः आसीत्। पर्वतस्य कन्दराणि अपि नद्याः कलकलरवेण मुखरितानि आसन्। मेघाः सततं वर्षन्तः पर्वतं तदुपरि विद्यमानं पादपसमूहं च स्निग्धीकरोति स्म।

अत्र रामः चित्रम् अवलोक्य प्रस्रवणपर्वते तेषां जीवनं कथम् आसीत् इति स्मरति। यदा तौ तस्मिन् पर्वते आस्तां तदा भ्राता लक्ष्मणः निरन्तरं तयोः सेवां कृतवान्। निवासे तयोः कोऽपि क्लेशः न अभवत्। तौ सुखेन तत्र दिनानि यापितवन्तौ। तस्मिन् पर्वते सलिलपूर्णा सरित् गोदावरी प्रवहति। रामः सीता च प्रायः एव तस्याः नद्याः तीरे भ्रमितवन्तौ कदापि तत्र उपविश्य वार्तालापं कृतवन्तौ। चित्रे तं पर्वतम् अवलोक्य रामः इदं सर्वं स्मरति। किञ्च सीता तत् सर्वं स्मरति न वा इति तां पृच्छति। एवं कथोपकथनेन तेषां चित्रदर्शनं प्रवर्तते।

एवं कदाचित् तौ गोदानद्याः तीरे आगत्य वार्तालापं कर्तुम् आरभेताम्। वार्तालापकाले तिष्ठतोः तयोः रात्रिकालः शीघ्रमेव निर्गतः। अर्थात् तौ परस्परं वार्तालापे तथा मग्नौ आसन् यत् तयोः समयज्ञानं नासीत्। एवम्प्रकारेण वनवासकाले तेषां दिनानि अतिवाहितानि इति वर्णयति सीतापतिः श्रीरामः।

व्याकरणविमर्शः -

१. परिणद्धः- परिपूर्वकात् नह्धातोः क्तप्रत्यये परिणद्धः इति रूपम्।

२. मुखरः- मुखशब्दात् रप्रत्यये मुखरः इति रूपम्, स्वमुखकुञ्जेभ्यो वक्तव्यम् इति वार्तिकेन रप्रत्ययः।

३. अभिष्यन्दमानः- अभिपूर्वकात् स्यन्द्धातोः शानच्प्रत्यये अभिष्यन्दमानः इति रूपम्।

४. नीलिमा- नीलस्य भावः, नीलशब्दात् इमनिच्प्रत्यये नीलिमा इति रूपम्।

५. प्रतिविहितसपर्यासुस्थयोः - प्रतिविहितसपर्यया सुस्थयोः प्रतिविहितसपर्यासुस्थयोः इति तृतीयातत्पुरुषः।

६. आसत्तियोगात् - आङ्पूर्वकात् सद्-धातोः क्तिन्प्रत्यये विभक्त्यादिकार्ये आसत्तिः इति रूपम्। आसत्तेः योगः आसक्तियोगः, तस्मात् आसक्तियोगात् इति षष्ठीतत्पुरुषः।

७. व्यरंसीत् - विपूर्वकात् रम्-धातोः लुङ्लकारे प्रथमपुरुषैकवचने व्यरंसीत् इति रूपम्।

छन्दः-

१. स्मरसि सुतनु इति श्लोके मालिनीछन्दः।

२. किमपि किमपि इति श्लोके मालिनीछन्दः।

अलङ्कारविमर्शः -

१. स्मरसि सुतनु इति श्लोके एकस्य त्वमिति कर्तुः स्मरसि इति क्रियात्रयेण सम्बन्धाद् दीपकालङ्कारः। तल्लक्षणं दर्पणे -

"अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" इति।

पाठगतप्रश्नाः - ४

१३. प्रस्रवणो नाम गिरिः कुत्र आसीत्।

१४. तौ कस्याः नद्याः तीरे भ्रमितवन्तौ।

१५. रात्रिः कथं व्यरंसीत्।

१६. तौ कथं जल्पन्तौ आस्ताम्।

१७. व्यरंसीत् इति कस्य धातोः कस्मिन् लकारे भवति।

१५.६) साम्प्रतं मूलपाठम् अवगच्छाम - २४

लक्ष्मणः - एषा पञ्चवट्यां शूर्पणखा।

सीता - हा अज्जउत्त, एत्तिअं दे दंसणं। (हा आर्यपुत्र, एतावत् ते दर्शनम्।)

रामः - अयि विप्रयोगत्रस्ते, चित्रमेतत्।

सीता- जहा तहा होदु। दुज्जणो असुहं उप्पदेइ। (यथा तथा भवतु। दुर्जनः असुखमपुत्पादयति।)

रामः - हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्मणः - अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।२८।।

अन्वयः -

लक्ष्मणः - एषा पञ्चवट्यां शूर्पणखा।

सीता - हा आर्यपुत्र, एतावत् ते दर्शनम्।

रामः - अयि विप्रयोगत्रस्ते, एतत् चित्रम्।

सीता- यथा तथा भवतु। दुर्जनः असुखमुत्पादयति।

रामः - हन्त, वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्मणः -अथ पापैः रक्षोभिः कनकहरिणच्छद्मविधिना इदं तथा वृत्तं यथा क्षालितम् अपि व्यथयति। शून्ये जनस्थाने विकलकरणैः आर्यचरितैः ग्रावा अपि रोदिति वज्रस्य (अपि) दलति हृदयम्।। २८।।

अन्वयार्थः -

लक्ष्मणः - एषा चित्रालिखिता पञ्चवट्यां शूर्पणखा तन्नामिका राक्षसी रावणभगिनी।

सीता - हा आर्यपुत्र, एतावत् एतावत्पर्यन्तं ते तव दर्शनम् ईक्षणम्।

रामः - अयि विप्रयोगत्रस्ते वियोगभीते, एतत् चित्रम्।

सीता- यथा तथा भवतु कथमपि भवतु। दुर्जनः खलः असुखं दुःखम् उत्पादयति।

रामः - हन्त, वर्तमान इव प्रत्यक्षीभूत इव मे मम जनस्थानवृत्तान्तः जनस्थानस्य वृत्तान्तः प्रतिभाति।

लक्ष्मणः - अथ शूर्पणखावृत्तान्ताद् अनन्तरं पापैः पापाचारैः रक्षोभिः राक्षसैः कनकहरिणच्छद्मविधिना स्वर्णमृगव्याजकरणेन इदं चित्रनिर्दिष्टं सीताहरणं तथा तादृशं वृत्तं निष्पन्नं यथा यादृशं क्षालितम् प्रतिकृतम् अपि व्यथयति दुःखं जनयति। शून्ये निर्जने जनस्थाने दण्डकारण्ये विकलकरणैः स्वस्वव्यापारशून्यानि इन्द्रियाणि येषु तादृशैः आर्यचरितैः आर्यस्य रामस्य मूर्च्छाप्रभृतिव्यापारैः ग्रावा अपि शिला अपि रोदिति रोदनं करोति वज्रस्य कुलिशस्य (अपि) दलति विदारयति हृदयं मध्यप्रदेशम्।।२८।।

व्याख्यानम् -

लक्ष्मणः चित्रे पञ्चवट्यां शूर्पणखां दर्शयति। तदा सीता अशुभं द्रष्टुम् अनिच्छन्ती रामं कथयति एतावत्पर्यन्तमेव चित्रदर्शनम् अस्तु इति। तदा रामः सीतां कथयति चित्रमेतद् वास्तविकः वियोगः नास्ति, चिन्ता मास्तु इति। तदा सीता कथयति यथा कथञ्चिद् दुर्जनः दुःखकारणं भवति। ततः लक्ष्मणः चित्रं दृष्ट्वा वर्णयति यदा स्वमृगव्याजेन सीताहरणं रावणेन कृतं तदा रामस्य व्यापारं दृष्ट्वा ग्रावा अपि रोदितवती। किञ्च तस्य क्रन्दनादिकं श्रुत्वा वज्रस्य कठोरस्यापि हृदयं भिन्नम्।

व्याकरणविमर्शः -

१. पञ्चवटी – पञ्चानां वटानां समाहारः इति विग्रहे निष्पन्नस्य द्विगुसंज्ञकस्य पञ्चवटशब्दस्य अकारान्तत्वाद् "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः" इति वार्तिकेन स्त्रीलिङ्गे ततः ङीप्।

छन्दः -

१. अथेदमिति श्लोके शिखरिणीछन्दः। तस्य लक्षणं तावत्– "रसै रुद्रैश्छिन्ना यमनभसलाः गः शिखरिणी" इति।

पाठगतप्रश्नाः - ५

१८. दुर्जनः किमुत्पादयति।

१९. सीतापहरणं कथं राक्षसेन कृतम्।

२०. रामचरितैः किं किं भवति।

पाठसारः

इतः परं सीता शृङ्गवेरपुरे रामलक्ष्मणयोः जटाबन्धनस्य चित्रं दर्शयति। ततः लक्ष्मणः रामं प्रशंसन् कथयति - इक्ष्वाकुवंशीयाः राजानः वार्धक्यकाले सम्पत्त्यादिकं पुत्रेभ्यः समर्प्य यद् वानप्रस्थव्रतम् आचरति तत् श्रीरामः बाल्यकाले एव आचरत्। तदनन्तरं सीता चित्रे पुण्यसलिलां भागीरथीं पश्यति। रामः कथयति यत् बहुकालात् पूर्वं सगरनामकः एकः नृपः अश्वमेधनामकं यज्ञम् अकरोत्। तस्य अश्वमेधयज्ञस्य अश्वम् इन्द्रः कपटेन उपायेन चोरयित्वा गुप्तस्थाने अस्थापयत्। अश्वं विना यज्ञसमाप्तिः न भविष्यति। अतः सगरस्य षष्टिसहस्रं पुत्राः अश्वम् अनुसन्दधानाः पृथिवीं भिन्दन्तः महर्षेः कपिलस्य कोपात् भस्मीभूताः। भागीरथीजलस्पर्शेन एव ते पुनः उद्धारं प्राप्स्यन्तीति ज्ञात्वा बहुकालात् परं सगरस्य प्रपौत्रः भगीरथः कठोरतपसा भागीरथीं भूलोकम् आनीय तस्याः जलेन तेषाम् उद्धारं विहितवान्। इयं एव भागीरथी रघुवंशस्य देवता वर्तते। अतः रामः ताम् उद्दिश्य प्रणामं निवेदयति।

ततः लक्ष्मणः चित्रे यमुनानद्याः तटे अवस्थितं श्यामनामकं वटवृक्षम् दर्शयति यं वृक्षं ते चित्रकूटवनगमनमार्गे प्राप्तवन्तः। रामः तस्य वृक्षस्य अधः घटितं वृत्तान्तं वर्णयति। मार्गपरिश्रमेण श्रान्ता सीता रामस्य उरसि रामेण दृढालिङ्गिता सती शयनं कृतवती।

ततः लक्ष्मणः विराधराक्षसवृत्तान्तं दर्शयति। किन्तु सीता तत् चित्रम् अदृष्ट्वा दक्षिणारण्ये तेषां प्रवेशात्मकं चित्रम् द्रष्टुम् आरभते यत्र श्रीरामः तेषां निदाघं दूरीकर्तुं तालवृन्तम् एव आतपत्रीकृतवान्। ततः रामः विन्ध्यारण्यं वर्णयति। तस्मिन् तपोवने वृक्षाणाम् अधः वानप्रस्थाश्रमिणः गृहेषु च मुष्टिपरिमितम् अन्नं भुञ्जानाः अतिथिसत्कारपरायणाः मुनयः पत्न्या सह निवसन्ति स्म।

ततः लक्ष्मणः प्रस्रवणनामकं पर्वतम् दर्शयति यः पर्वतः जनस्थाननामके अरण्ये आसीत्। अयं पर्वतः घनारण्येन परिपूरितः आसीत्। अस्मिन् पर्वते गोदावरी नदी प्रवहति स्म। तस्याः तटप्रदेशः श्यामलवनराजिना शोभमानः आसीत्। पर्वतस्य कन्दराणि अपि नद्याः कलकलरवेण मुखरितानि आसन्। मेघाः सततं वर्षन्तः पर्वतं तदुपरि विद्यमानं पादपसमूहं च स्निग्धीकुर्वन्ति स्म। ततः रामः गोदावरीनदीं तस्याः तटे तयोः भ्रमणं लक्ष्मणेन विहितां तयोः सेवां च स्मरति। कथं तौ वार्तालापरतौ गोदातीरे सम्पूर्णाम् अपि रात्रिं यापितवन्तौ इति अपि स्मरति। एवम् एष गोदावरीवृत्तान्तः समाप्यते।

ततः पञ्चवट्यां शूर्पणखावृत्तान्तं लक्ष्मणः पश्यति। परन्तु तत्र सीताया आग्रहो नास्ति। यतो हि चित्रं दृष्ट्वा अपि सीता खिन्ना भवति। दुर्जनः कथञ्चिद् दुःखम् उत्पादयति एव। ततः सीताहरणात्परं रामस्य क्रन्दनादिव्यापारैः ग्रावा अपि रोदिति वज्रस्य हृदयं च भवति विदीर्णम्। एवं समासतः पाठसारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. गङ्गानयनवृत्तान्तं सविस्तारं वर्णयत।

२. अलसलुलित इत्यादिश्लोकं यथामति वर्णयत।

३. तेषां दक्षिणारण्यप्रवेशः कथम् आसीत्।

४. प्रस्रवणगिरेः यथाग्रन्थं वर्णनं प्रदीयताम्।

५. मुनयः विन्ध्यारण्ये कथं जीवनं यापयन्ति स्म।

६. रामः सीता च गोदावरीतीरे कथं रात्रियापनं कृतवन्तौ।

७. किमपि किमपि इति श्लोकं व्याख्यात।

८. अथेदं रक्षोभिरिति श्लोकं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. रामलक्ष्मणयोः जटाबन्धनं शृङ्गवेरपुरे सञ्जातम्।

२. इक्ष्वाकुवंशीयाः वार्धक्यकाले वानप्रस्थाश्रमं पालयन्ति।

३. भागीरथी प्रसन्नपुण्यसलिला भगवती वर्तते।

४. भगीरथः भागीरथीं स्वर्गतः मर्त्यलोकम् आनीतवान्।

५. सा सीतायां अरुन्धती इव शिवानुध्याना भवेदिति रामस्य प्रार्थना।

६. भरद्वाजावेदितस्य वनस्पतेः श्याम इति नाम।

७. वटवृक्षः कालिन्दीनद्याः तीरे वर्तते।

८. सीताया अङ्गानि कथम् मार्गगमनपरिश्रमाद् आलस्ययुक्तानि।

९. सीता स्वस्य अवयवान् रामस्य वक्षसि कृत्वा शेते।

१०. विन्ध्याटवीमुखे विराधसंवादः अभवत्।

११. विन्ध्यारण्ये वृक्षाः वैखानसाश्रिताः आसन्।

१२. मुनयः मुष्टिपरिमितं नीवारधान्यं खादन्ति स्म।

१३. प्रस्रवणो नाम गिरिः जनस्थाननामके अरण्ये आसीत्।

१४. तौ कस्याः गोदावरीनद्याः तीरे भ्रमितवन्तौ।

१५. जल्पतोः सीतारामयोः रात्रिः अविदितगतयामा व्यरंसीत्।

१६. तौ अक्रमेण जल्पन्तौ आस्ताम्।

१७. विपूर्वकात् रम्-धातोः लुङ्लकारे प्रथमपुरुषैकवचने व्यरंसीत् इति रूपम्।

१८. दुर्जनः असुखमुत्पादयति।

१९. सीतापहरणं स्वर्णमृगच्छलेन राक्षसेन कृतम्।

२०. रामचरितैः ग्रावा अपि रोदिति वज्रस्य हृदयं च भिन्नं भवति।

॥ इति पञ्चदशः पाठः ॥

कादम्बर्याः शुकनासोपदेशः

भूमिका

कविकर्म भवति काव्यम्। तच्च काव्यं जनानां श्रोत्रेषु सुधाधारां प्रवाहयति, वर्णनीयेन सह ऐकात्म्यम् अनुभवतां सहृदयानां मनसि कमपि आनन्दोल्लासं जनयति। काव्यं कान्तासम्मितोपदेशप्रदानेन सर्वेषां जनानां मनस आह्लादकं भवति। तत् काव्यं ध्वनिकाव्यं गुणीभूतकाव्यं चेति द्विविधं भवति। तच्च पुनः दृश्यश्रव्यभेदेन द्विविधं भवति। तत्र दृश्यं नाम दर्शनयोग्यं नाटकादिकं श्रव्यं च महाकाव्यादिकम्। श्रव्यकाव्यं पुनः गद्यपद्यभेदेन द्विविधम्। तत्र छन्दोबद्धमयं पद्यम्, वृत्तबन्धोज्झितं च गद्यम्।

पद्यकाव्यस्यैव उद्भवः इति केषाञ्चिद् विदुषां मतम्। गद्यकाव्यस्य परमुत्पत्तिः भवतु किन्तु गद्यकाव्यसंरचने दार्ढ्यम् अत्यावश्यकम्। तस्मात् प्रसिद्धा इयं - "गद्यं कवीनां निकषं वदन्ति" इति। गद्यकाव्यस्यापि आख्यायिका कथा इति भेदद्वयम्। तयोः लक्षणं तावत् - "कथा कल्पितवृत्तान्ता सत्यमाख्यायिका स्मृता" इति।

गद्यकाव्यनिर्माणपरम्परायां बाणभट्ट एव प्रधानाचार्य इत्यत्र नास्ति संशयः। तद्विरचितं कादम्बरी इति गद्यकाव्यं गद्यकाव्येषु महत् स्थानं बिभर्ति। कवेः वर्णनसौन्दर्यम् अनुपमम् अत्र। अत्र सर्वत्रैव अलङ्काराणां मधुरझङ्काराः सहृदयानां मनसि परमोल्लासं जनयन्ति हृदयं च विकासयन्ति। कादम्बरी नाम मदिरा। रससमास्वादकानां सहृदयानां आनन्दोल्लासविधायिनी सुमधुरा कादम्बरी मदिरा एव। अतः सार्थकम् अस्य ग्रन्थस्य अभिधानम्। अत एव बाणभट्टपुत्रस्य पुलिनभट्टस्योक्तिः- "कादम्बरीरसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्" इति। एतस्य ग्रन्थस्य पूर्वभागं निर्माय कविः बाणभट्टः दिवं गतः। तदा तत्पुत्रः पुलिनभट्टः एतस्य उत्तरभागं रचयामास।

कादम्बरी इत्याख्यं गद्यकाव्यं कथा आख्यायिका वा इति विषये विदग्धानां वैमत्यम् अस्ति। तन्मध्ये बहूनां विदुषां मतानुसारेण काव्यमिदं कथा इति।

कादम्बर्याः कथाभागस्य एकः अंशः शुकनासोपदेशः अत्र प्रतिपाद्यमानविषयः। शुकनासोपदेशः इति भागात्पूर्वं काव्यस्यास्य कथाप्रवाहः संक्षेपेण तावद् एवम् - विदिशानगर्याः राज्ञे शूद्रकाय एका चण्डालकन्या विशिष्टम् एकं शुकपक्षिणम् आनीय अयच्छत्। तस्य पक्षिणः वाक्कौशलेन विस्मितः राजा तस्मै पक्षिणे तस्य परिचयादिकम् अपृच्छत्। सः पक्षी अपि राज्ञे तस्य सर्वं जन्मादिवृत्तान्तम् अकथयत्। ततः स राज्ञे निवेदितवान् यत् कस्यचित् व्याधस्य आक्रमेण तस्य पिता हतः स च आहतः सन् भूमौ पतितः। तदनन्तरं महर्षेः जवालस्य पुत्रेण सः दृष्टः स्वाश्रमम् आनीय सेवितश्च। ततः महर्षिजावालिः तं विहगं दृष्ट्वा 'एष स्वदुष्कर्मणः फलभोगं करोति' इत्युक्तवान्। तदा तत्र उपस्थिता मुनिबालकाः समुत्सुकाः सन्तः महर्षिजाबालिं पक्षिणः विषये पृष्टवन्तः। तदा मुनिजावालिः पक्षिणः जन्मादिवृत्तान्तं वक्तुमारभत यत् - अवन्तीनगर्याम् उज्जयिनीनामकः एकः प्रदेशः आसीत्। तत्र विद्यमानस्य राज्ञः तारापीडस्य विलासवतीनामिका भार्या शुकनासनामकः अमात्यश्चासीत्। शुकनासस्य भार्याया मनोरमायाः किञ्च राज्ञ्याः विलासवत्याश्च सन्तानः नासीत्। सन्तानलाभाय राज्ञी विलासवती मनोरमा च व्रतम् आचरितवत्यौ। ततः राज्ञ्याः विलासवत्याः शुकनासपत्न्याः मनोरमायाश्च पुत्रौ संवृत्तौ। राज्ञ्याः पुत्रस्य नाम चन्द्रापीड इति मनोरमायाः च वैशम्पायन इति। ततः अध्ययनाय चन्द्रापीडः मित्रेण वैशम्पायनेन सह गुरुगृहं गतः। तत्र स शस्त्रविद्यां शास्त्रविद्यां च अलभत। अध्ययनाद् अनन्तरं गुरुगृहाद् आगतस्य राजकुमारस्य चन्द्रापीडस्य यौवराज्याभिषेकसमयः आगतः। तदा अमात्यः शुकनासः कथं राजकार्यादिकं परिचालनीयम् इत्यस्मिन् विषये सारगर्भम् उपदेशं दत्तवान्। स एव उपदेशः कादम्बर्याः शुकनासोपदेशः इति नाम्ना प्रसिद्धः। स हि शुकनासोपदेशः 'एवं समतिक्रामत्सु' इत्यतः आरभ्य 'इत्येतावदभिधायोपशशाम' इति पर्यन्तम्।

१६

348sk16

शुकनासोपदेशः - यौवनस्वभावः

प्रस्तावना

अस्मिन् पाठे शुकनासोपदेशस्य 'एवं समतिक्रामत्सु' इत्यतः आरभ्य 'तन्द्राप्रदा लक्ष्मीः' इत्यन्तः अंशः वर्ण्यते। अत्र शुकनासः चन्द्रापीडम् उपदेष्टुमारभते। स यौवनस्य विकारः, सम्पदः अहङ्कारः इत्यादीन् बहून् विषयान् चन्द्रापीडं प्रति उपदिशति। स भागः अत्राध आलोच्यते -

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- बाणभट्टस्य गद्यकाव्यरचनाशैलीं जानीयात्।
- चन्द्रापीडराज्याभिषेकवृत्तान्तं जानीयात्।
- यौवनस्य प्रभावं लक्ष्मीमदम् अनर्थपरम्परां च जानीयात्।
- सज्जनस्य दुर्जनस्य च व्यवहारं जानीयात्।
- अत्र पाठे स्थितानां पदानाम् अन्वयार्थं जानीयात्।
- दीर्घाणां पदानां समासान् बोद्धुं समर्थः भवेत्।

१६.१) साम्प्रतं मूलपाठम् अवगच्छाम–१

एवं समतिक्रामत्सु दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरणसम्भारसङ्ग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकञ्च तं कदाचिद्वर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनासः सविस्तरमुवाच।

व्याख्यानम् -

एवं पूर्वोक्तविधिना पूर्वोक्तविधया दिवसेषु दिनेषु समतिक्रामत्सु समतिक्रान्तेषु गच्छत्सु व्यतीतेषु राजा नृपः तारापीडः चन्द्रापीडस्य आत्मजस्य स्वपुत्रस्य यौवराज्याभिषेकं यौवराज्ये युवराजकर्मणि अभिषेकम् अभिषेचनं युवराजपदप्रतिष्ठां वा चिकीर्षुः कर्तुमिच्छुः प्रतीहारान् द्वारपालान् उपकरणसंभारसंग्रहार्थम् उपकरणम् अभिषेकसामग्री तस्य यः सम्भारः समूहः तस्य संग्रहार्थं सञ्चयार्थम् आदिदेश आज्ञापयामास आज्ञां दत्तवान्।

समुपस्थितयौवराज्याभिषेकं समुपस्थितः सम्प्राप्तः विद्यमानः यौवराज्याभिषेकः यौवराज्यस्य युवराजकर्मणः अभिषेकः अभिषेचनं युवराजपदप्रतिष्ठा यस्य तादृशं तं चन्द्रापीडं कदाचित् जातुचित् कस्मिंश्चित् समये दर्शनार्थम् अवलोकनार्थम् आगतम् आयातम् आरूढविनयं सञ्जातविनयम् अपि विनीततरम् अतिशयेन विनयिनम् इच्छन् वाञ्छन् अभिलषन् शुकनासः प्रधानामात्यः सविस्तरं सव्यासम् उवाच जगाद।

सरलार्थः -

इत्थं समुचिते काले समागते राजा तारापीडः स्वपुत्रस्य चन्द्रापीडस्य युवराजपदप्रतिष्ठां कर्तुम् इष्टवान्। अतः अभिषेकस्य सामग्रीसंग्रहणाय सेवकान् स आदिष्टवान्। यौवराज्याभिषेककात्पूर्वं शुकनासं द्रष्टुम् चन्द्रापीडः गतवान्। तदा शुकनासः चन्द्रापीडः अतीव विनयसम्पन्नः इति दृष्ट्वा इतोऽपि तस्य विनयवर्धनाय विस्तरेण उक्तवान्।

व्याकरणविमर्शः -

क) समासः

१. यौवराज्याभिषेकम्- यौवराज्यस्य अभिषेकः यौवराज्याभिषेकः, तम् इति षष्ठीतत्पुरुषसमासः।

२. समुपस्थितयौवराज्याभिषेकम् - यौवराज्यस्य अभिषेकः यौवराज्याभिषेकः इति षष्ठीतत्पुरुषसमासः। समुपस्थितः यौवराज्याभिषेकः यस्य स समुपस्थितयौवराज्याभिषेकः, तं समुपस्थितयौवराज्याभिषेकम् इति बहुव्रीहिसमासः।

३. आरूढविनयम् - आरूढः विनयः यम् स आरूढविनयः, तमिति बहुव्रीहिसमासः।

ख) सन्धिविच्छेदः

समुपस्थितयौवराज्याभिषेकञ्च - समुपस्थितयौवराज्याभिषेकम् च।

कोशः -

१. "राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः।" इत्यमरवचनात् राजन्-शब्दस्य राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षित् इत्येते पर्यायाः।

२. "प्रतीहारो द्वारपालद्वास्थद्वास्थितदर्शकाः।" इत्यमरवचनात् प्रतीहारशब्दस्य द्वारपालः, द्वास्थः, द्वास्थितः, दर्शकः इत्येते पर्यायाः। को नाम प्रतीहार इति चाणक्यसंग्रहे -

"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः।

अप्रमादी सदा दक्षः प्रतीहारः स उच्यते।।" इति।

पाठगतप्रश्नाः- १

१. चन्द्रापीडः कस्य पुत्रः?

२. कः कस्य यौवराज्याभिषेकं चिकीर्षुः आसीत्?

३. राजा उपकरणसंग्रहार्थं कान् आदिष्टवान्?

४. चन्द्रापीडः कदा आगतवान्?

५. तारापीडस्य प्रधानमन्त्रिणः नाम किमासीत्?

६. शुकनासः किमर्थम् उपदेशं दत्तवान्?

७. कादम्बरी कथा उत आख्यायिका?

१६.२) साम्प्रतं मूलपाठम् अवगच्छाम – २

"तात, चन्द्रापीड, विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एव अभानुभेद्यमरत्नालोकोच्छेद्यम् अप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणमोपशमो दारुणो लक्ष्मीमदः।कष्टमनङ्गनवर्त्तिसाध्यमपरम् ऐश्वर्यतिमिरान्धत्वम्। अशिशिरोपचारहार्योऽतितीव्रो दर्पदाहज्वरोष्मा। सततममूलमन्त्रगम्यो विषमो विषयविषास्वादमोहः। नित्यमस्नानशौचवध्यो बलवान् रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति, इत्यतः विस्तरेणाभिधीयसे।

व्याख्यानम् -

तात वत्स! पुत्र! चन्द्रापीड! विदितवेदितव्यस्य विदितं ज्ञातं वेदितव्यं ज्ञातव्यं समस्तो ज्ञातव्यविषयो येन तस्य तादृशस्य, अधीतसर्वशास्त्रस्य अधीतानि पठितानि सर्वशास्त्राणि वेदादिसकलशास्त्राणि येन तस्य तादृशस्य, ते तव, अल्पं स्तोकम् अपि उपदेष्टव्यम् उपदेष्टुं योग्यं वक्तव्यं शास्त्रतत्त्वमिति शेषः न अस्ति नो विद्यते।

तर्हि उपदेशस्य आरम्भः किमर्थः इति प्रश्न उदेति। तदा कथयति - केवलञ्च इति। केवलञ्च किञ्च उपदेष्टव्यत्वाभावेऽपि उपदेशप्रयोजनमुपपादयति निसर्गतः स्वभावतः एव यौवनप्रभवं यौवनं प्रभवः यस्य तत् यौवनप्रभवं तारुण्योत्पन्नं, तमः अन्धकारम् अतिदुर्दमनीयम्, अभानुभेद्यम् न भानुना सूर्येण भेद्यम् उच्छेद्यम्, अरत्नालोकच्छेद्यं न रत्नानां मणीनाम् आलोकेन प्रकाशेन कान्त्या उच्छेद्यम् उच्छेत्तुं योग्यं छेद्यं विनाशयितुं शक्यम्, अप्रदीपप्रभापनेयं प्रदीपप्रभया प्रदीपप्रकाशेन अपि न अपनेयम् अपनेतुम् अशक्यम् इति भावः। अत एव - अतिगहनं दुःखहेतुत्वाद् अतिशयदुःखस्वरूपमिति भावः।

लक्ष्मीमदः लक्ष्म्याः धनसम्पदः मदः उन्मत्तता धनमत्तता, अपरिणामोपशमः अविद्यमानः परिणामे वयःपरिणतौ अन्तिमावस्थायाम् उपशमः निवृत्तिः यस्य सः तादृशः। अर्थात् मादकपदार्थसेवनजनिता मत्तता तु औषधादिना कालपरिणतौ च निवर्तते परं लक्ष्मीमदः कथमपि न निवर्तत इति भावः। तथा च तारुण्यमदस्य वयःपरिणामेऽपगमो भवति, सुरापानोत्पन्नमदश्च चान्यसमये स्वयमेव निवर्तते। किन्तु धनसम्पत्तिमदः जीवनान्तं यावत् तिष्ठति अत इतरमदापेक्षया अयं भिन्नः अपरिणामोपशमः। अत एव दारुणः भीषणः।

कष्टमनञ्जनवर्त्तिसाध्यमपरम् ऐश्वर्यतिमिरान्धत्वम्। अपरं प्रसिद्धात् अन्धत्वरोगाद् भिन्नम्, ऐश्वर्यतिमिरान्धत्वम् ऐश्वर्यं सम्पद् एव तिमिरं तिमिरसंज्ञकः नयनरोगः ऐश्वर्यतिमिरः, तेन अन्धत्वं दर्शनराहित्यम् दर्शनशून्यत्वम् इति भावः। अनञ्जनवर्तिसाध्यं न अञ्जनवर्त्या चन्द्रोदयाद्यञ्जनवर्त्या विडालादिवसाकज्जलदशया, नेत्रौषधोविशेषेण साध्यं निवारणीयं विद्यते। अतः कष्टं दुःखस्वरूपम्। तिमिराख्यनयनरोगस्तु अञ्जनवर्त्या उपशाम्यति। अत एव कष्टं नितान्तक्लेशकरं भवति। तिमिरव्याधिना उत्पन्नं दृष्टिराहित्यम् अञ्जनवर्त्यादिना प्रतिकर्तुं योग्यं, किन्तु सदसद्विवेकशून्यत्वरूपधनसम्पत्तितिमिरान्धत्वं केनापि प्रकारेण प्रतिकर्तुं न योग्यमिति द्वयोः महद् वैषम्यम् अस्ति इत्याशायः। यथाष्टाङ्गहृदये -

"रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यमथाञ्जनम्।

ईषत्कर्पूरसंयुक्तमञ्जनं तिमिरापहम्।।" इति।

दर्पदारज्वरोष्मा दर्पः सम्पत्त्यहंकारः अभिमान एव दाहज्वरः तीव्रतापः तस्य ऊष्मा उष्णत्वम् अशिशिरोपचारहार्यः न शिशिरैः शीतलैः उपचारैः स्रक्चन्दनादिभिः पदार्थैः व्यापारैः वा हार्यः परिहर्तुं योग्य इति तादृशः। अत एव अतितीव्र अतितीक्ष्णः। अन्यविधः ज्वरस्तु शीतलोपचारैः निवारणयोग्यो भवति परन्तु दर्पदाहज्वरोष्मा न तथेति तात्पर्यम्।

विसिन्वति बध्नाति विषयिणमनुबध्नतीति विषयाः स्रक्चन्दनवनितादयः पदार्थाः। ते एव अनर्थहेतुत्वाद् विषाणि गरलानि, तेषां य आस्वादः सम्भोगः उपभोगः तेन यः मोहः मूर्च्छा स विषयविषास्वादमोहः स्रक्चन्दनादिगरलसम्भोगमूर्च्छा सततं निरन्तरम् अमूलमन्त्रगम्यः न मूलैः औषधमूलैः मन्त्रैः विषविनाशकमन्त्रैः गम्यः साध्यः निवर्तयितुं शक्य इति सः तादृशः विषमः अतीव तीव्रः कठिनः निवारयितुम् अशक्यः।

रागमलावलेपः रागः विषयस्याभिलाषः, स एव मलः पङ्कः, तस्य अवलेपः अवलेपनम् अस्नानशौचवध्यः न स्नानेन मज्जनेन शौचेन शुचिक्रियया च वध्यः विनाश्यः, परिहार्य इति भावः। स नित्यं बलवान् नितान्तः शक्तिशाली। अन्यः अवलेपः स्नानादिना अपनेतुं शक्यते, अयं रागमलावलेपः स्नानादिना न अपनेतुं शक्यः।

अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति, इत्यतः विस्तरेणाभिधीयसे। राज्यसुखसन्निपातनिद्रा राज्यसुखं राष्ट्रशासनस्य आनन्दः एव संनिपातनिद्रा सुषुप्तिरूपा। अक्षपावसानप्रबोधा न क्षपाऽवसाने रात्र्यन्ते प्रबोधः जागरणं यस्यां सा तादृशी। अन्यस्या निद्रायाः निशान्ते जागरणं भवति परन्तु राज्यसुखसंनिपातनिद्रायास्तु प्रबोधो न भवति। अत इयं निद्रा अजस्रं निरन्तरं घोरा भीषणा भवति। इति एवं विस्तरेण व्यासरूपेण अभिधीयसे कथ्यसे। त्वयि सम्भाव्यमानानां तारुण्योत्पन्नाज्ञानादीनां निवृत्त्यर्थमिति योज्यम्।

सरलार्थः -

शुकनासः चन्द्रापीडं प्रति कथयति यत् सर्वाणि शास्त्राणि चन्द्रापीडः अधीतवनान्, अतः तस्मै उपदेष्टव्यं किमपि नास्ति। परन्तु यौवनदशायां स्वभावतः एव यत् तमः उत्पद्यते, तत् सूर्येण न विनाशयितुं शक्यते। मणेः आलोकः अपि तत् न उच्छेत्तुं समर्थः। प्रदीपप्रभापि तत् न दूरीकर्तुं समर्था। एतत् तमः अतिगहनम् अतिशयदुःखस्वरूपम्। धनसम्पत्तिमदः हि उपशमनयोग्यो नास्ति। मादकपदार्थसेवनजनिता मत्तता तु औषधादिना कालपरिणतौ च निवर्तते परं लक्ष्मीमदः कथमपि न निवर्तत। ऐश्वर्येण यद् अन्धत्वम् आयाति तस्य निवारणं सुदुष्करम्। धनस्य अभिमानाद् जाता या उष्णता तस्या उपशमः चन्दनलेपनादिभिः न भवति। सा हि उष्णता अस्ति अतितीव्रा। स्रक्चन्दनवनितादिभिः विषयसम्भोगैः यो मोहः उत्पद्यते, तस्यापि मोहस्य केनापि औषधमूल्येण विनाशकमन्त्रेण वा न उपशमः भवति। तस्मात् स मोहः अपि भयङ्करः। विषयासक्तिरूपमलस्य अवलेपः गुरुतरः स शुचिक्रियया अपि दूरीकर्तुं न शक्यते। किञ्च राज्यसुखस्य यः अनुभवः सा महती निद्रा। अन्या निद्रा रात्र्यवसाने अपगता भवति, किन्तु सा निद्रा न सारल्येन अपगच्छति। एवम्प्रकारेण राज्यसुखस्य लक्ष्मीमदस्य यौवनमदस्य च वर्णनं शुकनासेन कृतम्। यथा एतेषु दोषेषु चन्द्रापीडस्य रुचिर्न स्याद् अतः शुकनासः विस्तरेण एतेषां विषये वर्णयन्नस्ति।

व्याकरणविमर्शः -

क) समासः -

१. विदितवेदितव्यस्य – विदितं वेदितव्यं येन स इति बहुव्रीहिसमासः, तस्य विदितवेदितव्यस्य।

२. अधीतसर्वशास्त्रस्य – अधीतानि सर्वशास्त्राणि येन स इति बहुव्रीहिसमासः, तस्य अधीतसर्वशास्त्रस्य।

३. अभानुभेद्यम् - भानुना भेद्यं भानुभेद्यम् इति तृतीयातत्पुरुषः। न भानुभेद्यम् अभानुभेद्यम् इति नञ्तत्पुरुषसमासः।

४. अरत्नालोकोच्छेद्यम् - रत्नानाम् आलोकः रत्नालोकः इति षष्ठीतत्पुरुषसमासः। रत्नालोकेन उच्छेद्यं रत्नालोकोच्छेद्यम् इति तृतीयातत्पुरुषसमासः। न रत्नालोकोच्छेद्यम् अरत्नालोकोच्छेद्यम् इति नञ्तत्पुरुषसमासः

५. अप्रदीपप्रभापनेयम् - प्रदीपस्य प्रभा प्रदीपप्रभा इति षष्ठीतत्पुरुषः। प्रदीपप्रभया अपनेयं प्रदीपप्रभापनेयम् इति तृतीयातत्पुरुषः। न प्रदीपप्रभापनेयम् अप्रदीपप्रभापनेयम् इति नञ्तत्पुरुषः।

६. अक्षपावसानप्रबोधा - क्षपायाः अवसानं क्षपावसानम् इति षष्ठीतत्पुरुषः। नास्ति क्षपावसाने प्रबोधः यस्यां सा अक्षपावसानप्रबोधा इति बहुव्रीहिसमासः।

ख) सन्धिविच्छेदः -

१. नाल्पमप्युपदेष्टव्यम् - न अल्पमपि उपदेष्टव्यम्।

२. एवाभानुभेद्यम्- एव अभानुभेद्यम्।

३. अशिशिरोपचारहार्योऽतितीव्रः - अशिशिरोपचारहार्यः अतितीव्रः।

अलङ्कारविमर्शः

१. तात इत्यादिवाक्ये काव्यलिङ्गम् अलङ्कारः। अत्र उपदेष्टव्यत्वाभावं प्रति विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य इति पदद्वयस्य अर्थस्य हेतोः वर्णनात् काव्यलिङ्गम्। तथाहि तल्लक्षणं दर्पणे - "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" इति।

२. केवलञ्च इत्यादिवाक्ये अतिशयोक्तिः, समुच्चयः, काव्यलिङ्गम् इत्यलङ्कारत्रयस्य अङ्गाङ्गिभावेन सत्त्वात्सङ्करालङ्कारः। तल्लक्षणं दर्पणे-

"अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ।

सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः।।" इति।

कोशः

१. "तातशब्दं प्रयुञ्जन्ति पूज्ये पितरि चात्मजे।" इति नारदवचनात् तातशब्दस्य पूज्यार्थे जनकार्थे पुत्रार्थे च प्रयोगो भवति।

२. "गहनं वनदुःखयोः। गह्वरं कलिले चाऽपि" इति विश्वकोषात् गहनशब्दस्य वनार्थे दुःखार्थे च प्रयोगो भवति।

पाठगतप्रश्नाः- २

८. किमर्थं चन्द्रापीडः उपदेष्टव्यः नास्ति?

९. यौवनदशायाम् उत्पन्नं तमः कीदृशम् अस्ति?

१०. धनेन उत्पन्नः नेत्ररोगः कीदृशः?

११. धनस्य अभिमानरूपात् जाता उष्णता कीदृशी?

१२. स्रगादीनां विषयसम्भोगजातः मोहः कीदृशः?

१३. अरत्नालोकोच्छेद्यम् इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

१४. नाल्पमप्युपदेष्टव्यम् इत्यस्य सन्धिविच्छेदः कार्यः।

१६.३) साम्प्रतं मूलपाठम् अवगच्छाम - ३

गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खलु अनर्थपरम्परा सर्वा। अविनयानामेकैकम् अप्येषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्म्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रम् समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयम् उपभोगमृगतृष्णिका

नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु।

व्याख्यानम् -

गर्भेश्वरत्वं गर्भाद् शैशवाद् आरभ्य ईश्वरत्वं धनशालित्वं प्रभुत्वम्, अभिनवयौवनत्वम् अभिनवं नूतनं यौवनं तारुण्यं यस्य स अभिनवयौवनः नूतनतरुणः तस्य भावः नूतनतारुण्यम्, अप्रतिमरूपत्वं अप्रतिमं निरुपमं रूपं सौन्दर्यः यस्य सः अप्रतिमरूपः निरुपमसौन्दर्यः तस्य भावः निरुपमसौन्दर्यत्वम् , अमानुषशक्तिम् अमानुषी अमानवी शक्तिः अलौकिकशक्तिः वा शारीरिकसामर्थ्यं यस्य तस्य भावः अमानुषशक्तित्वम् अमानवसामर्थ्यम् अलौकिकशक्तिसम्पन्नत्वमिति भावः। इयं वर्ण्यमाना महती दुरपनेयत्वाद् गरीयसी अनर्थपरम्परा अनिष्टपरम्परा सर्वा समस्ता। यथोक्तं विष्णुशर्मारचिते हितोपदेशे-

"यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।

एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।" इति।

एषां सम्प्रति वर्णितानां गर्भेश्वरत्वादीनां मध्ये एकैकम् अपि प्रत्येकम् अपि अविनयानां दुश्चेष्टानाम् आयतनं स्थानम्, समवायः एषां समूहः अस्ति चेत् किमुत किं वक्तव्यम्।

योवनारम्भे तारुण्यारम्भे शास्त्रजलप्रक्षालननिर्म्मला शास्त्रम् आन्वीक्षिक्यादिविद्या एव जलं सलिलं तेन प्रक्षालनं धावनं शास्त्रजलप्रक्षालनम् आन्वीक्षिक्यादिविद्यासलिलधावनं, तेन निर्मला स्वच्छा अपि बुद्धिः मतिः प्रायः बहुशः कालुष्यम् कलुषभावम् उपयाति प्राप्नोति।

अनुज्झितधवलता अनुज्झिता अत्यक्ता धवलता शुक्लता यया सा तादृशी अपि यूनां तरुणानां दृष्टिः दृक् अवलोकनं सरागा रागेण सहिता सौन्दर्यादौ अनुरागसहिता एव भवति।

यौवनसमये तारुण्यकाले समुद्भूतरजोभ्रान्तिः समुद्भूता समुत्पन्ना रजसा रजोगुणेन भ्रान्तिः भ्रमणं यस्यां तादृशी समुद्भूतरजोभ्रान्तिः वात्या बालकलिका इव प्रकृतिः स्वभावः आत्मेच्छया स्वेच्छया पुरुषं मनुष्यम् अतिदूरम् अतिशयविप्रकृष्टं अपहरति नयति।

इन्द्रियाणि हृषीकाणि एव हरिणाः मृगाः तान् हरति आकर्षति इति इन्द्रियहरिणहारिणी इयं सन्निकृष्टस्था, उपभोगमृगतृष्णिका उपभोगः रमण्यादिभोगाभिलाषा सा एव मृगतृष्णिका मरीचिका, सततम् सर्वदा अतिदुरन्ता अत्यन्तदुष्परिणामा च। हरिणानां रविकिरणोत्तप्तवालुकासु जलबुद्ध्या धावनेन इव पुरुषाणामपि विषयोपभोगतृष्णया दुष्परिणामो भवतीति भावः। नवयौवनकषायितात्मनः नवयौवनेन नूतनतारुण्येन कषायितः विकृतः आत्मा स्वरूपं यस्य तस्य तादृशस्य मनसः चित्तस्य तानि एव पूर्वमनुभूतानि एव विषयस्वरूपाणि शब्दस्पर्शादिभोग्यरूपाणि वस्तूनि, सलिलानि इव हरीतक्यादिकषायद्रव्येण जलानि इव आस्वाद्यमानानि उपभुज्यमानानि, मधुरतराणि अतिशयेन स्वादूनि आपतन्ति समुत्पद्यन्ते।

मधुरतराणि मनसः आपतन्ति चेत् कः क्लेशः इति वर्णयति - नाशयति इति। च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु। दिङ्मोहः दिग्विषयकम् अज्ञानम् इव उन्मार्गप्रवर्तकः मार्गाद्

उत्कान्तः उन्मार्गः कुमार्गः इत्यर्थः, तस्य प्रवर्तकः कुमार्गपरिचालकः विषयेषु भोग्यवस्तुषु अत्यासङ्गः अत्यन्तासक्तिः पुरुषम् आत्मानं नाशयति अधः पातयति।

सरलार्थः -

गर्भवासकालात् प्रभुत्वं, नूतनयौवनं, निरुपमरूपत्वम् अमानुषिकशक्तिः च अनिष्टस्य महत् मूलम्। एतेषाम् एकैकमपि अविनयस्य निवासस्थानं, समवायस्य का कथा? यौवनस्य आरम्भे बुद्धिः शास्त्ररूपेण जलेन प्रक्षालिता भूत्वा अपि कालुष्यं प्राप्नोति। युवकानां दृष्टिः रागान्विता भवति। यौवनकाले रजोगुणकारणात् नराणां स्वभावे भ्रमाः उत्पद्यन्ते। कुमार्गेषु प्रवर्तिका भवति विषयेषु अत्यासक्तिः। इन्द्रियरूपं मृगं सर्वदा हृत्वा दूरं नयति। नवयौवनवशात् धनस्त्र्यादीनां भोग्यवस्तूनाम् आस्वादनं मधुरं मन्यते। धनस्त्र्यादौ आसक्तिः अपि मनुष्यान् कुमार्गे चालयित्वा विनाशयति। एतत्सर्वं हेयम् इति शुकनासस्य तात्पर्यम्।

व्याकरणविमर्शः -

क) समासः -

१. शास्त्रजलप्रक्षालननिर्म्मला - शास्त्रमेव जलं शास्त्रजलम् इति कर्मधारयसमासः। तेन प्रक्षालनं शास्त्रजलप्रक्षालनमिति तृतीया-तत्पुरुषसमासः। शास्त्रजलप्रक्षालनेन निर्म्मला शास्त्रजलप्रक्षालन-निर्म्मला इति तृतीयातत्पुरुषसमासः।

२. अनुज्झितधवलता - न उज्झिता अनुज्झिता इति नञ्तत्पुरुषः। अनुज्झिता धवलता यया सा अनुज्झितधवलता इति तृतीयातत्पुरुषसमासः।

३. नवयौवनकषायितात्मनः – नवयौवनेन कषायितः नवयौवनकषायितः इति तृतीयातत्पुरुषसमासः। नवयौवनकषायितः आत्मा यस्य सः नवयौवनकषायितात्मा इति बहुव्रीहिसमासः, तस्य नवयौवनकषायितात्मनः।

ख) सन्धिविच्छेदः

१. अमानुषशक्तित्वञ्च – अमानुषशक्तित्वम् च।

२. खल्वनर्थपरम्परा– खलु अन्वर्थपरम्परा।

३. एकैकमप्येषाम् – एकैकम् अपि एषाम्।

अलङ्कारविमर्शः

१. गर्भेश्वरत्वमित्यादिवाक्ये गर्भेश्वरत्वादिभिः हेतुभिः सह हेतुमतः कार्यस्य विपत्तेः अभेदेन वर्णनाद् हेत्वलङ्कारः। तल्लक्षणं दर्पणे - "अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह।" इति।

२. शास्त्रजलप्रक्षालननिर्म्मला अपि कालुष्यमुपयाति इत्यत्र शास्त्रमेव जलमिति शास्त्रजलयोः साक्षाद् ऐकरूप्यकथनाद् रूपकम्। तल्लक्षणं दर्पणे - "रूपकं रूपितारोपाद्विषये निरपह्नवे" इति। अत्र शास्त्रजलप्रक्षालननिर्मलत्वे अपि कालुष्यप्राप्तिः विरुद्धमिव प्रतीयते, अतः विरोधालङ्कारः।

तल्लक्षणं "विरुद्धमिव भासेत विरोधः" इति। रूपकविरोधालङ्कारयोः अङ्गाङ्गिभावेन सत्त्वात् सङ्करालङ्कारः।

३. नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाणि इत्यत्र उपमेयेन विषयस्वरूपाणि इत्यनेन उपमानस्य सलिलानि इत्यस्य अवैधर्म्यस्य साम्यस्य कथनाद् उपमालङ्कारः। तल्लक्षणं दर्पणे "साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः" इति।

कोशः

१. "स्वादुप्रियौ च मधुरौ" इत्यमरवचनात् स्वाद्वर्थकः मधुरशब्दः।

२. "आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्।" इत्याद्यमरवचनात् सलिलस्य आपः, वाः, वारि, कमलम्, जलम् इत्यादयः पर्यायशब्दाः।

पाठगतप्रश्नाः- ३

१५. महती सर्वा अनर्थपरम्परा का ?

१६. केषु आसक्तिः मनुष्यान् कुमार्गे चालयित्वा नाशयति?

१७. अनुज्झितधवलता इत्यस्य विग्रहवाक्यं लिखित्वा समासानां नाम लिखत।

१८. खल्वनर्थपरम्परा इत्यस्य सन्धिविच्छेदं दर्शयत।

१९. रजसाम् इति पदस्य कः अर्थः का च विभक्तिः?

१६.४) साम्प्रतं मूलपाठम् अवगच्छाम – ४

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति। हरति च अतिमलिनमन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव। गुरूपदेशः प्रशमहेतुर्वयःपरिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।

व्याख्यानम् -

भवादृशाः भवत्सदृशाः एव उपदेशानां शिक्षाणां भाजनानि पात्राणि भवन्ति सन्ति, नान्ये।

हि यस्मात् कारणात् अपगतमले अपगतः निर्गतः मलः कालुष्यं यस्मात् तस्मिन् निर्गतकालुष्ये स्फटिकमणौ सूर्यकान्तरत्ने रजनिकरगभस्तयः रजनिकरस्य चन्द्रस्य इव अपगतमले निर्गतसंशयविपर्ययादिरूपमले मनसि चित्ते उपदेशगुणाः शिक्षाया फलानि सुखेन अनायासेन विशन्ति प्रविशन्ति।

गुरुवचनम् गुरोः हिताहितज्ञानप्रदातुः उपदेशवाक्यम् अमलं निर्मलं कल्याणकरम् अपि अभव्यस्य अशिष्टजनस्य श्रवणस्थितं कर्णस्थितं सलिलं जलम् इव महत् शूलं असह्यां व्यथाम् उपजनयति उत्पादयति।

इतरस्य अन्यस्य अभव्येतरस्य शिष्टजनस्य गुरुवचनं करिणः गजस्य शङ्खाभरणं कम्बूभूषणम् इव अधिकतरं प्रचुरतरम् आननशोभासमुदयं वदनसौन्दर्योत्पत्तिं मुखकान्त्युत्पत्तिम् उपजनयति उत्पादयति। कर्णस्थशङ्खालङ्कारेण यथा करिणो मुखशोभा तथैव गुरुवचसा साधोर्मुखशोभा, सश्रद्धं गुरुवचनाकर्णनेन तस्याानने हर्षोदयादिति तात्पर्यम्।

गुरुवचनमिति पदं पूर्ववाक्यादनुवर्तते। गुरुवाक्यं प्रदोषसमयनिशाकरः प्रदोषसमये रात्र्यारम्भकाले निशाकरः चन्द्रः अर्थात् सूर्यास्ताद् अनन्तरकालिकः चन्द्रः इव अतिमलिनम् अतिशयमलीमसम् अन्धकारं तिमिरं दोषजातं दूषणसमूहं हरति अपनयति। गुरूपदेशः प्रशमहेतुर्वयःपरिमाण इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।

प्रशमहेतुः प्रशमस्य कामादिविकारप्रशमनस्य हेतुः कारणीभूतः गुरूपदेशः आचार्योपदेशः, पलितरूपेण जरसा शौक्ल्यरूपेण शिरसिजजालं केशसमूहम् अमलीकुर्वन् निर्मलीकुर्वन् वयःपरिणाम इव अवस्थापरिणतिः इव तदेव दोषजातं कामक्रोधादिकं परिणमयति गुणरूपेण दयादाक्षिण्यादिगुणस्वरूपेण परिवर्तयति।

सरलार्थः -

भवान् एव उपदेशग्रहणायार्हः। निर्मलस्फटिकमणौ यथा चन्द्रकिरणः साधु निविशति एवं भवतः अपि निर्मलचित्तसत्त्वात् भवान् उपदेशान् सम्यक्तया बोद्धुं शक्नुयात्। परन्तु सज्जनानां वचसि समेषां रुचिः न भवति। यथा जलं निर्मलं जीवनदं परन्तु तत् कर्णाभ्यन्तरे प्रविशति चेत् पीडां जनयति तथा इयम् अमृतवाणी दुर्जनानां कर्णपीडां जनयति। शङ्खावल्या यथा गजस्य मुखशोभा वर्धते एवमेव गुरुवचनात् सज्जनानां मुखशोभा वर्धते। रात्रेः प्रारम्भे चन्द्रकिरणेन यथा तमः अतितरां पलायते तद्वदेव गुरोः वचनेन कामक्रोधादिदोषसमूहः अपह्रियते। वृद्धावस्थायां केशाः शुक्लाः भवन्ति, तेन शुक्लतया केशाः स्वच्छाः सम्पादिताः इति यथा अनुमीयते एवं शान्तिहेतुकेन गुरूपदेशेन मनुष्यः निर्मलीभूय सद्गुणैः तथैव सम्पूर्णतया परिणतः भवतीति अवगम्यते।

व्याकरणविमर्शः

क) समासः -

१. रजनिकरगभस्तयः - रजनिकरस्य गभस्तयः रजनिकरगभस्तयः इति षष्ठीतत्पुरुषसमासः।

२. शिरसिजजालम् – शिरसि जातं शिरसिजम् इति उपपदतत्पुरुष-समासः। शिरसिजस्य जालं शिरसिजजालमिति षष्ठीतत्पुरुषसमासः।

३. आननशोभासमुदयम् - आननस्य शोभा आननशोभा इति षष्ठीतत्पुरुषः। तस्याः समुदयः आनन्दशोभासमुदयः, तम् इति षष्ठीतत्पुरुषसमासः।

४. प्रदोषसमयनिशाकरः - प्रदोषसमये निशाकरः प्रदोषसमयनिशाकरः इति सप्तमीतत्पुरुषसमासः।

ख) सन्धिविच्छेदः

१. स्फटिकमणाविव – स्फटिकमणौ इव।

२. सुखेनोपदेशगुणाः– सुखेन उपदेशगुणाः।

३. हरत्यतिमलिनम् – हरति अतिमलिनम्।

४. प्रशमहेतुर्वयःपरिणाम इव – प्रशमहेतुः वयःपरिणामः इव।

अलङ्कारविमर्शः

१. अपगतमले इत्यस्मिन् वाक्ये मनसि इत्युपमेयेन सह स्फटिकमणौ इत्युपमानस्य अवैधर्म्यस्य साम्यस्य कथनाद् उपमालङ्कारः।

२. गुरुवचनम् इत्यस्मिन् वाक्ये गुरुवचनम् इत्युपमेयेन सह सलिलम् इत्युपमानस्य अवैधर्म्यस्य साम्यस्य कथनाद् उपमालङ्कारः।

३. इतरस्य इत्यस्मिन् वाक्ये इतरस्य इत्युपमेयेन सह करिणः इत्युपमानस्य अवैधर्म्यस्य साम्यस्य कथनादुपमालङ्कारः।

४. एवमेव हरतीत्यस्मिन् गुरूपदेशेत्यस्मिन् च वाक्ये उपमालङ्कारः।

कोशः

१. "किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः।" इत्यमरवचनाद् किरणम्, उस्रः, मयूखः, अंशुः, गभस्तिः, घृणिः, रश्मिः इत्येते समार्थकाः।

२. "प्रदोषो रजनीमुखम्" इत्यमरवचनात् रजनीमुखम् इति प्रदोषसमार्थकः।

पाठगतप्रश्नाः- ४

२०. कीदृशे मनसि सुखेन उपदेशगुणाः विशन्ति?

२१. किम् अमलम्?

२२. कीदृशः निशाकरः दोषजातं हरति?

२३. निशाकरः कीदृशं दोषजातं हरति?

२४. सर्वव्याधिप्रशमनहेतुः कः?

१६.५) साम्प्रतं मूलपाठम् अवगच्छाम – ५

अयमेव चानास्वादित–विषय–रसस्य ते काल उपदेशस्य। कुसुमशर–शर–प्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं चाविनयस्य। चन्दनप्रभवो न दहति किमनलः? किंवा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा? गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलस्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः। विशेषेण राज्ञाम्। विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्। उद्दामदर्पश्वयथुस्थगित–श्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति। शृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्। अहङ्कार–दाहज्वर–मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमानोन्मादकारीणि धनानि, राज्यविषविकार–तन्द्राप्रदा राजलक्ष्मीः।

व्याख्यानम् -

अयम् एव एष एव अनास्वादितविषयरसस्य अनास्वादितः अननुभूतः विषयाणां रूपशब्दादीनां रसः गुणः येन तादृशस्य अननुभूतसुन्दरीसुवर्णादिभोग्यगुणस्य, ते तव, उपदेशस्य शिक्षायाः, कालः समयः। आस्वादितविषयरसाय पुरुषाय उपदेशः तथा सुफलं न जनयति।

हि यस्मात्करणात् कुसुमशर-शर-प्रहारजर्जरिते कुसुमशरस्य कामदेवस्य ये शराः बाणाः तैः प्रहाराः अभिघाताः, तैः जर्जरिते कामदेवबाणाभिघाताक्रान्ते हृदये चित्ते उपदिष्टं गुरूपदेशो जलम् इव सलिलम् इव गलति क्षरति।

अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं चाविनयस्य। दुष्प्रकृतेः दुष्टस्वभावस्य अविनयस्य नम्रतारहितस्य पुरुषस्य, अन्वयः वंशः, श्रुतं शास्त्रश्रवणं च अकारणम् अहेतुः सत्कर्माचरणस्य हेतुर्न भवति। उक्तं च हितोपदेशे-

"न धर्मशास्त्रं पठतीति कारणं
न चाऽपि वेदाऽध्ययनं दुरात्मनः।
स्वभाव एवाऽत्र तथाऽतिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः।।" इति।

उक्तमर्थं समर्थयति कविः - चन्दनप्रभवः इति। चन्दनप्रभवः शैत्यहेतुभूतात् चन्दनात् मलयजतरोः उत्पन्नः अनलः अग्निः किं न दहति न भस्मीरोति, अपि तु भस्मीकरोत्येव। किंवा अथवा प्रशमहेतुना अपि शैत्यकारणेन अपि वारिणा सागरसलिलेन वडवानलो वडवाग्निः प्रचण्डतरीभवति समुद्दीप्तो भवति, समुद्दीप्तो भवत्येव इत्याशयः। "स्वभावो दुरतिक्रम" इति न्यायात् शैत्यकारणं यथा न अनलोपशमस्य हेतुः एवमेव शास्त्रज्ञानं न विनयस्य हेतुः।

गुरूपदेशं बाहुल्येन प्रशंसति- गुरूपदेशः इति। गुरूपदेशः आचार्यशिक्षा नाम पुरुषाणां जनानाम् अखिलमलप्रक्षालनक्षमम् अखिलमलानां समस्तकामक्रोधादीनां कर्दमादीनां च प्रक्षालनक्षमं शोधनसमर्थम् अजलस्नानं सलिलरहितस्नानस्वरूपः। स्नानान्तरं तु सलिलसहितम् इदं च स्नानं सलिलरहितम् इति विशेषः।

गुरूपदेशः अनुपजातपलितादिवैरूप्यम् अनुपजातम् अनुत्पन्नं पलितादि जरसा केशादौ शौक्ल्यादि वैरुण्यं विरूपता यस्मिन् तत् तादृशम् अजरं जरारहितं वृद्धत्वं वृद्धभावः। गुरूपदेशः तादृशं वृद्धत्वं यत्र पलितादि विरूपता जरा च न भवतीति भावः। यथा आह भगवान् मनुः मनुसंहितायां-

"न तेन वृद्धो भवति येनाऽस्य पलितं शिरः।

यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः।।" इति (२-१५६)।

गुरूपदेशः अनारोपितमेदोदोषं अनारोपितः अकारितः मेदोदोषः पृथुलत्वोत्पादकमेदोनामकधातुवृद्धिदोषो येन तत् तादृशं तादृशं गुरूकरणं गौरवहेतुस्वरूपः। अन्यत्र गौरवे मेदोदोषः भवति, गुरूपदेशेन गुरुत्वे तु न तादृशो मेदोदोष इति तात्पर्यम्।

गुरूपदेशः असुवर्णविरचनम् न सुवर्णेन कनकेन विरचना निर्मितिः यस्य तत्तादृश्यम् अग्राम्यं ग्राम्यभण्डादिवाक्यातिरिक्तम् अतिरमणीयम्। गुरूपदेशः सुवर्णसंघटनरहितो अपि विदग्धोक्तत्वाद् अतिरमणीयः।

गुरूपदेशः अतीतज्योतिः अतीतं गतं ज्योतिः तेजः यस्मात् स तादृशः आलोकः प्रकाशः। गुरूपदेशः सर्वप्रकाशाऽभिभावि अपूर्वम् अन्तर्ज्योतिः भवति।

गुरूपदेशः नोद्वेगकरः न व्याकुलचित्ततोत्पादकः प्रजागरः प्रबोधः। अन्यस्मिन् प्रबोधे तु चित्तं व्याकुलं भवति अस्मिन् गुरूपदेशाख्ये प्रबोधे तु चित्तव्याकुलता न भवतीति तात्पर्यम्।

विशेषेण आधिक्येन राज्ञां भूपालानां गुरूपदेशः तत्तद्गुणविशिष्टो भवति। हि यतः तेषां राज्ञाम् उपदेष्टारः उपदेशकाः विरलाः अल्पाः भवन्ति। प्रायः सर्वे राजनिर्देशस्य अनुवर्तिनो भवन्ति। अतः राजोपदेशका विरला भवन्ति।

जनः लोकः भयात् त्रासात् राजवचनं भूव पभाषितं प्रतिशब्दकः प्रतिध्वनिः इव अनुगच्छति अनुसरति।

उद्दामदर्पाः उद्दामा विस्तृता दर्पा गर्वाः एव श्वयथवः, तैः स्थगितानि आच्छादितानि श्रवणविवराणि कर्णच्छिद्राणि येषां ते उद्दामदर्पश्वयथु-स्थगितश्रवणविवराः राजानः उपदिश्यमानम् अपि कथ्यमानम् अपि न शृण्वन्ति श्रवणयोग्यत्वेन न स्वीकुर्वन्ति।

शृण्वन्तः आकर्णयन्तः अपि ते राजानः गजनिमीलितेन गजस्य हस्तिनः इव यत् निमीलितं नयनसङ्कोचनं तेन अवधीरयन्तः अवहेलयन्तः हितोपदेशदायिनः शिक्षाप्रदायकान् गुरून् आचार्यान् खेदयन्ति क्लेशयन्ति।

हि यस्मात् कारणात् राजप्रकृतिः नृपस्वभावः अहङ्कारदाहज्वरमूर्च्छान्धकारिता अहङ्कारः दर्पः एव यो दाहज्वरः तीव्रतापः तेन या मूर्च्छा मोहः तया अन्धकारिता सञ्जाताऽन्धकारा लुप्तचेतना। अत एव

विह्वला विक्लवा। धनानि सम्पत्तयः अलीकाभिमानोन्मादकारीणि अलीकः मिथ्यारूपः योऽभिमानः अहङ्कारः स एव उन्मादः चित्तविभ्रमः रोगविशेषः, तं कुर्वन्तीति तच्छीलानि तादृशानि भवन्ति। राजलक्ष्मीः भूपश्रीः आधिपत्यश्रीः राज्यविषविकारतन्द्राप्रदा राज्यं राष्ट्रम् एव विषं गरलं तस्माद् यो विकारः विकृतिः तेन या तन्द्रा अलसता, तां प्रददाति।

सरलार्थः -

न हि भोगः भोगेन उपशाम्यति। अतः चन्द्रापीडेन अधुनापि शब्दस्पर्शादीनां भोगानां भोगः न कृतः, तस्माद् उपदेशाय अयम् उचितः कालः। यतो हि विषयासक्ते हृदये उपदेशः जलमिव गलति। अर्थात् सत्प्रभावं न विस्तारयति। यथा अग्निः जलेन शाम्यति तथैव कामदेवस्य कामबाणदग्धं हृदयम् उपशमयितुं जलं सिञ्चति उपदेशः। परन्तु ये दुष्टस्वभावसम्पन्नाः अपि च येषां विनयः नास्ति तेषां शास्त्रश्रवणेन मनसः शान्तिः न जायते। चन्दनकाष्ठादुत्पन्नः अग्निः किं न दहति? जलेन तु अग्निः शाम्यति परन्तु वडवाग्निः नाम प्रबलः अग्निः जलेन किं शाम्यति? नैव, अपि तु पूर्वापेक्षया प्रबलः भवति। स्नानकाले जलेन शरीरस्थमलानां प्रक्षालनं भवति। गुरोः उपदेशः तु सर्वविधमानसिकमालिन्यं प्रक्षालयति। तद् हि जलं विना स्नानम्।अपि च गुरूपदेशः यत्र केशाः विरूपाः न भवन्ति तथा वृद्धभावः, सुवर्णनिर्मिताभावे सत्यपि रम्यः, आलोकादपि अधिकः प्रकाशः, अनुद्वेगकारकः प्रबोधः। अयमुपदेशः राज्ञां हितकारकः। यतो हि राज्ञाम् उपदेष्टारः अल्पा भवन्ति अधिकास्तु राजाज्ञानुपालकाः। केचन अहङ्काराच्छन्ना राजान उपदेशं न स्वीकुर्वन्ति, ते शृण्वन्तः अपि नेत्रसङ्कोचद्वारा तिरस्कुर्वन्ति। ते अहङ्कारिणः, धनरत्नादिषु च अभिमानिनः भवन्ति। तस्मात् तेषां राजलक्ष्मीः राज्यस्य हानिमेव प्रददाति। अतः चन्द्रापीडः विषयासक्तो न भूत्वा गुरूपदेशं श्रुत्वा च राज्यं पालयेत्, तेन राज्यस्य राजलक्ष्मीः प्रसन्ना सती राज्यस्य अभ्युन्नतिं विधास्यति इति शुकनासस्य आशयः।

व्याकरणविमर्शः

क) समासः -

१. अनास्वादितविषयरसस्य - न आस्वादितः अनास्वादितः इति नञ्तत्पुरुषः। विषयस्य रसः विषयरसः इति षष्ठीतत्पुरुषः। अनास्वादितः विषयरसः येन सः अनास्वादितविषयरसः इति बहुव्रीहिसमासः, तस्य अनास्वादितविषयरसस्य।

२. कुसुमशरशरजर्जरिते - कुसुमशरस्य शरः कुसुमशरशरः इति षष्ठीतत्पुरुषः। तेन जर्जरिते कुसुमशरशरजर्जरिते इति तृतीयातत्पुरुषः।

३. उद्दामदर्पाश्वयथुस्थगितश्रवणविवराः - उद्दामा दर्पा उद्दामदर्पा इति कर्मधारयसमासः, उद्दामदर्पा एव अश्वयथवः उद्दामदर्पाश्वयथवः इति कर्माधारयसमासः, तैः स्थगितानि श्रवणविवराणि येषां ते उद्दामदर्पाश्वयथुस्थगितश्रवणविवराः इति बहुव्रीहिसमासः।

४. अहङ्कारदाहज्वरमूर्च्छान्धकारिता - अहङ्कारः एव दाहज्वरः अहङ्कारदाहज्वरः इति कर्मधारयः। तेन मूर्च्छा अहङ्कारदाहज्वरमूर्च्छा इति तृतीयातत्पुरुषः। तया अन्धकारिता अहङ्कारदाहज्वरमूर्च्छान्ध-कारिता इति तृतीयातत्पुरुषः।

ख) सन्धिविच्छेदः

१. गलत्युपदिष्टम् - गलति उपदिष्टम्।

२. अकारणञ्च – अकारणम् च।

३. अतीतज्योतिरालोकः - अतीतज्योतिः आलोकः।

अलङ्कारविमर्शः

१. कुसुमेत्यस्मिन् वाक्ये उपमेयेन उपदिष्टम् इत्यनेन उपमानस्य जलम् इत्यस्य अवैधर्म्यस्य साम्यस्य कथनाद् उपमालङ्कारः।

२. नेत्यस्मिन् वाक्ये गुरूपदेशरूपे उपमेये स्नानादीनामुपमानानां तत्तद्वैशिष्ट्यारूढत्वाद् अधिकाररूढवैशिष्ट्यरूपकम् अलङ्कारः। तदुक्तं दर्पणे - "अधिकाररूढवैशिष्ट्यं रूपकं यत्तदेव तत्।" इति।

कोशः

३. "दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः।

मतङ्गजो गजो नागः कुञ्जरो वारणः करी।।" इत्यमरवचनात् गजशब्दस्य दन्ती, दन्तावलः, हस्ती, द्विरदः, अनेकपः, द्विपः, मतङ्गजः, नागः, कुञ्जरः, वारणः, करी इत्येते पर्यायाः।

४. "विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्।

समग्रं सकलं पूर्णमखण्डं स्यादनूनके।।" इत्यमरवचनात् अनूनकम्, विश्वम्, अशेषम्, कृत्स्नम्, समस्तम्, निखिलम्, अखिलम्, निःशेषम्, समग्रम्, सकलम्, पूर्णम्, अखण्डम् इत्येते पर्यायवाचकाः शब्दाः।

पाठगतप्रश्नाः- ५

२५. गुरोः उपदेशेन कीदृशं हृदयं शान्तं भवति?

२६. गुरोः उपदेशः केषाम् अकारणं भवति?

२७. गुरूपदेशेन कीदृशं वृद्धत्वं भवति?

२८. अयम् उपदेशः विशेषेण केषां प्रति युक्तम्?

२९. राजप्रकृतिः कीदृशी?

३०. अहङ्कारिणः राज्ञः राजलक्ष्मीः कीदृशी?

पाठसारः

आज्ञा गुरूणाम् ह्यविचारणीया। गुरूपदेशो हि नद्यां कैवर्तकः इव। तस्य उपदेशः एव सर्वदा सर्वथा च नः रक्षकः। उज्जयिनीनरेशः तारापीडः स्वपुत्रस्य चन्द्रपीडस्य यौवराज्याभिषेकम् इष्टवान्। अतः स सेवकान् सामग्रीसंग्रहाय आदिष्टवान्। चन्द्रापीडः यौवराज्याभिषेकात् पूर्वमेव प्रधानामात्येन शुकनासेन सह साक्षात्काराय गतः। तदा राज्यशासनाय उपयुक्तं विनयिनं शुकनासं विनयितरं विधातुं शुकनास उपदेशम् अयच्छत्।

योग्यगुणविशिष्टः एव चन्द्रापीडः युवराजपदे अभिषेकाय युक्तः। परन्तु गुणसत्त्वेऽपि यौवनसत्त्वात् धनादिप्रभावेण च तमः-अहङ्कार-अभिमानादीनि आयान्ति। किञ्च, तेभ्यः औद्धत्यम् अविवेकता मदमत्तता च जायन्ते। ततः अशास्त्रीये नीतिविरुद्धे च मार्गे प्रवर्तते जनः। धनप्रभावाद् यः अभिमानरूपः ज्वरः भवति तद् औषधेनापि न निवार्यते। वनितादिविषयसंसर्गाद् या आसक्तिः उत्पद्यते सा दुरपनेया भवति। राज्यप्राप्त्यनन्तरं बहवः राजानः आत्मानं सर्वेश्वरत्वेन मन्यन्ते। ते भोगनिद्रात उत्थातुम् असमर्था भवन्ति। इत्थं राज्यप्राप्त्यनन्तरं चन्द्रापीडः मा कुर्यात् इति बोधयितुं शुकनासः धनस्य दुष्प्रभावं कथितवान्।

गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्, अमानुषशक्तित्वम् - एते चत्वारः अनर्थस्य मूलभूताः। तेषु एकः एव मानवम् अधः पातयितुं समर्थः। तेषां समुदायस्य सत्त्वे तु विनाशः अवश्यम्भाव्यः। यौवनारम्भे बुद्धिः भ्रान्ता भवति। तीव्रः वायुः यथा शुष्कपत्राणि बहुदूरं नीत्वा गच्छति एवं इन्द्रियाणि बुद्धिं बहुदूरं नयन्ति। धनयुवत्यादिविषये चित्तम् अत्यन्तम् आकृष्टं भवति। तेषु संस्पृष्टं चित्तं नान्यं ततो वाञ्छति किञ्चित्। तेन नृपाणां बलं प्रतिदिनं क्षीणं भवति। एवञ्च एतेषां दुष्प्रभाववर्णनेन एतेषु आसक्तिः न कार्या इति चन्द्रापीडं प्रति शुकनासस्योपदेशः।

निर्मलमणौ यथा चन्द्रकिरणः साधु निपपति एवमेव चन्द्रापीडादीनां शुद्धचित्तानां हृदये गुरोः उपदेशः सुष्ठु प्रविशति। साधु वस्त्वपि क्वापि दुःखाय भवति केषाञ्चित्। यथा जलं जीवनदं परन्तु कर्णे प्रविष्टे सति पीडां जनयति एवमेव दुर्जनानां समीपे गुरूपदेशः क्लेशाय कल्पते। चन्द्रस्य प्रकाशेन तमो यथा निरस्यते एवमेव गुरूपदेशेन लोभमोहादिदोषाः अपह्रियन्ते। समीचीना राजानः ये भवन्ति ते हितोपदेशं शृण्वन्ति। गुरूपदेशो हि जलं विना स्नानं भवति। तेन मनः अमलं भवति। गुरूपदेशो हि आनन्ददायकः रम्यः सज्जनानाम्। गुरूपदेशश्रवणेन सज्जनानां मनसि प्रसन्नता उदेति।

अन्ये अहङ्काराच्छन्नाः तु हितोपदेशम् अशृण्वन्तः तिरस्कुर्वन्तः च विषयभोगेन विनाशं यान्ति। तेषां राज्यलक्ष्मी अहर्निशं तम् अधो निपातयति। तेषां राज्यस्य हानिः भवति। तस्मात् श्रियः स्वभावः ज्ञेयः, साधु स्मृत्वा स्वकर्मसु प्रवर्तनीयम्। गुरूणाम् आशिषा तेषाम् उपदेशेन च राज्ञां विपद् दूरीभवति। ततो गुरूणाम् आदेशः उपदेशश्च सततं पालनीय इति प्रधानामात्यः शुकनासः राजकुमारं चन्द्रापीडं प्रति उपदिदेश।

पाठान्तप्रश्नाः

१. आज्ञा गुरूणां ह्यविचारणीया इति सूक्तिं समर्थयत।

२. धनातिशयभोगः कुतो न कार्यः सयुक्ति प्रमाणयत।

३. गुरुभ्यः श्रद्धा आनुगत्यञ्च कुतः अपेक्षते?

४. कुतः अयं गुरूपदेशः अनन्यः?

५. गुरूणाम् आदेशम् उपेक्ष्यमाणानाम् अवस्थां वर्णयत।

६. के चत्वारः विषयाः मनुष्यान् विनाशयन्ति, कुतः?

७. कथं गुरूणाम् उपदेशानुसारं राज्यं परिपालनीयम्?

८. गुरूपदेशः विशेषेण राज्ञः प्रति कुतः युक्तः इति प्रतिपादयत।

९. यौवनकाले नराणां स्वभावे किमर्थं भ्रमाः उत्पद्यन्ते?

१०. कादम्बरीं परिचाययत।

पाठगतप्रश्नोत्तराणि

१. चन्द्रापीडः तारापीडस्य पुत्रः।

२. राजा तारापीडः चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः आसीत्।

३. राजा उपकरणसंग्रहार्थं प्रतीहारान् आदिष्टवान्।

४. चन्द्रापीडः यौवराज्याभिषेकात् पूर्वम् आगतवान्।

५. तारापीडस्य प्रधानमन्त्रिणः शुकनासः नाम आसीत्।

६. शुकनासः आरूढविनयं चन्द्रापीडं विनीततरं कर्तुम् उपदेशं दत्तवान्।।

७. कादम्बरी एका कथा।

८. सर्वशास्त्राणि तेन अधीतानि ज्ञातानि च तस्मात् चन्द्रापीडः न उपदेष्टव्यः।

९. यौवनदशायाम् उत्पन्नं तमः अभानुभेद्यम् अरत्नालोकोच्छेद्यम् अप्रदीपप्रभा-पनेयम् अतिगहनं च अस्ति।

१०. धनेन उत्पन्नः नेत्ररोगः अञ्जनवर्त्या निवारणयोग्यः नास्ति।

११. धनस्य अभिमानरूपात् जाता उष्णता अशिशिरोपचारहार्या।

१२. स्रगादीनां विषयसम्भोगजातः मोहः अमूलमन्त्रगम्यः।

१३. रत्नानाम् आलोकः रत्नालोकः इति षष्ठीतत्पुरुषः। रत्नालोकेन उच्छेद्यं रत्नालोकोच्छेद्यम् इति तृतीयातत्पुरुषः। न रत्नालोकोच्छेद्यम् अरत्नालोकोच्छेद्यम् इति नञ्तत्पुरुषः।

१४. न अल्पमपि उपदेष्टव्यम् इति सन्धिविच्छेदः।

१५. गर्भेश्वरत्वम् अभिनवयौवनत्वम् अप्रतिमरूपत्वम् अमानुषशक्तित्वम् इति महती सर्वा अनर्थपरम्परा।

१६. स्रक्चन्दनवनितादिषु आसक्तिः मनुष्यान् कुमार्गे चालयित्वा नाशयति।

१७. न उज्झिता अनुज्झिता इति नञ्तत्पुरुषः। अनुज्झिता धवलता यया सा अनुज्झितधवलता इति तृतीयातत्पुरुषः।

१८. खलु अन्वर्थपरम्परा इति सन्धिविच्छेदः।

१९. रजसाम् इत्यस्य रजोगुणानाम् इत्यर्थः, अत्र षष्ठी विभक्तिः।

२०. अपगतमले मनसि सुखेन उपदेशगुणाः विशन्ति।

२१. गुरुवचनम् अमलम्।

२२. प्रदोषसमयनिशाकरः निशाकरः दोषजातं हरति।

२३. निशाकरः अतिमलिनम् अन्धकारमिव दोषजातं हरति।

२४. सर्वव्याधिप्रशमनहेतुः गुरूपदेशः।

२५. गुरोः उपदेशेन कामबाणजर्जरितं हृदयं शान्तं भवति।

२६. गुरोः उपदेशः दुष्प्रकृतेः अकारणं भवति।

२७. गुरूपदेशेन अनुपजातपलितादिवैरूप्यजरं वृद्धत्वं भवति।

२८. गुरूपदेशः विशेषेण राज्ञां युक्तम्।

२९. अहङ्कारदाहज्वरमूर्च्छान्धकारिता विह्वला च राजप्रकृतिः।

३०. अहङ्कारिणः राज्ञः राज्यविषविकारतन्द्राप्रदा राजलक्ष्मीः।

॥ इति षोडशः पाठः ॥

१७

348sk17

शुकनासोपदेशः - लक्ष्मीचापल्यम्

प्रस्तावना

अस्मिन् पाठे शुकनासोपदेशस्य 'आलोकयतु तावत्' इत्यतः आरभ्य 'चिन्तितापि वञ्चयति' इत्यन्तः अंशः वर्ण्यते। जलबुद्बुदसमाना क्षणस्थिरा श्रीः सहसैव उदेति नाशमेति च। सा क्षणाय भासते क्षणाय च विलीयते। परन्तु अहो, अस्याः लीलावशात् नराः धनापगमने क्षीणाः पीडिताः दुःखिताश्च सन्तः अपि पुनः तामेव प्रार्थयन्ति। इत्थं मोहिनीयं श्रीः। सा श्रीः यौवनावस्थायां चाञ्चल्यं वर्धयति येन वयं सद्गुणेभ्यः विसृष्टाः स्याम। परन्तु गुरूपदेशो हि लोकोपकाराय। ततः अमात्यः शुकनासः उपदिशति यद् यौवनस्य चञ्चलता यत्नेन परिहर्तव्या। तदा एव राजलक्ष्मीः अभ्युन्नतिं साधयति। सा अपकर्मणां तत्प्रवृत्तानाञ्च कथं सहायिका इति ध्यात्वा लोभाविष्टः मा भूत्वा सविचारं जीवनं परिपालनीयं तथा उन्नत्यै यतनीयमित्यमयमत्र चन्द्रापीडाय उपदेशः पाठे अस्मिन् आलोच्यते -

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- राजलक्ष्म्याः प्रभावं जानीयात्।
- राजलक्ष्म्याः स्वरूपं जानीयात्।
- राजलक्ष्म्याः स्वभावं जानीयात्।
- मानवजीवने राजलक्ष्म्याः प्रभावं जानीयात्।
- वाक्यानाम् अन्वयार्थान् पदानां सरलार्थान् समासान् च जानीयात्।

१७.१) साम्प्रतं मूलपाठम् अवगच्छाम-६

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभट-खड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलतां, कालकूटान्मोहनशक्तिं, मदिराया मदं, कौस्तुभमणेर्नैष्ठुर्यम् इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता।

व्याख्यानम् -

कल्याणाभिनिवेशी कल्याणे मङ्गले अभिनिवेशी आग्रहान्वितो भवान् प्रथमम् आदौ लक्ष्मीं श्रियमेव तावद् आलोकयतु वस्तुतो विचारयतु।

हि तथाहि, सुभट-खड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः सुभटा निपुणयोद्धारः तेषां खड्गमण्डलम् असिसमुदाय एव उत्पलवनं कमलारण्यं तत्र विभ्रमे विचरणे भ्रमरी मधुकरस्त्रीस्वभावा इयं लक्ष्मीः राजश्रीः। इयम् एषा लक्ष्मीः श्रीः पारिजातपल्लवेभ्यः उत्पद्यमानेभ्यः देववृक्षविशेषेभ्यः पारिजातकिसलयेभ्यः रागम् आरुण्यं आत्मनि लोकानुरागं गृहीत्वा स्वीकृत्य इव क्षीरसागरात् दुग्धसमुद्राद् उद्गता मन्थनकाले समुत्थिता। यथा कश्चित्स्थानान्तरं गन्तुं प्रवर्तते तदा स्वकीयमुपकरणं गृहीत्वा गच्छति तथैवायं लक्ष्मीरपि रागादिकमादाय आगता। इयं राजलक्ष्मीः इन्दुशकलात् चन्द्रखण्डात् एकान्तवक्रतां नितान्तं कौटिल्यम्, उच्चैःश्रवसः अश्वेषु प्रधानस्य ऐन्द्रस्य अश्वस्य चञ्चलतां चापल्यम्, कालकूटात् कालकूटसंज्ञकविषात् मोहनशक्तिं मूर्च्छनशक्तिम्, मदिरायाः सुरायाः मदम् औद्धत्यम्, कौस्तुभमणेः भगवतः श्रीविष्णोः कण्ठस्थस्य विशेषरत्नस्य नैष्ठुर्यं निष्ठुरताम् इत्येतानि रागप्रभृतीनि सहवासपरिचयवशाद् एकत्रावस्थितिप्रणयवशाद् विरहविनोदचिह्नानि वियोगदुःखापनोदनलक्ष्माणि गृहीत्वा आदाय, इव, उद्गता प्रादुर्भूता।

सरलार्थः -

चन्द्रापीडस्य यौवराज्याभिषेकं भविष्यति। तस्य च राजकार्यचालनाय राजलक्ष्मीज्ञानम् अपेक्षते। अतः शुभर्थी शुकनासः तस्मै राजलक्ष्मीज्ञानं ददाति -

चन्द्रापीडः कल्याणे आग्रही अस्ति अतः तेनादौ लक्ष्मीः विचार्या। इयं लक्ष्मीः खड्गमङ्गलनामके वने भ्रमन्ती भ्रमरी। न केवलम् एतदेव, इयं तु क्षीरसमुद्रे जातात् पारिजातवृक्षात् रागम्, चन्द्रमण्डलात् वक्रताम्, उच्चैशश्रवसः चञ्चलताम्, कालकूटनामकात् विषात् मोहिनीं शक्तिम्, मदिरायाः अहङ्कारम्, कौस्तुभमणेः निष्ठुरतां च स्वीकृत्य विनोदवियोगचिह्नसहिता इयं लक्ष्मीः आविर्भूता।

व्याकरणविमर्शः -

क) समासः

१. सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी - खड्गानां मण्डलं खड्गमण्डलमिति षष्ठीतत्पुरुषः। सुभटानां खड्गमण्डलं सुभटखड्गमण्डलमिति षष्ठीतत्पुरुषः। सुभटखड्गमण्डलमेव उत्पलवनं सुभटखड्गमण्डलोत्पलवनम् इति कर्मधारयसमासः। सुभटखड्गमण्डलानाम् उत्पलवनमिति इति वा षष्ठीतत्पुरुषः। सुभटखड्गमण्डलोत्पलवने विभ्रमः सुभटखड्गमण्डलोत्पलवनविभ्रमः इति सप्तमीतत्पुरुषः। सुभटखड्गमण्डलोत्पलवनविभ्रमे भ्रमरी सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी इति सप्तमीतत्पुरुषसमासः।

२. पारिजातपल्लवेभ्यः- पारिजातस्य पल्लवानि पारिजातपल्लवानि इति षष्ठीतत्पुरुषः। तेभ्यः पारिजातपल्लवेभ्यः इति पञ्चमीतत्पुरुषः।

ख) सन्धिविच्छेदः

१. इन्दुशकलादेकान्तवक्रताम् – इन्दुशकलात् एकान्तवक्रताम्।

२. कालकूटान्मोहनशक्तिम् – कालकूटात् मोहनशक्तिम्।

३. गृहीत्वैवोद्गता – गृहीत्वा एव उद्गता।

अलङ्कारविमर्शः

१. इयम् इत्यस्मिन् वाक्ये गृहीत्वा इव इत्यत्र लक्ष्म्याः स्वयमेव वक्रादिमत्त्वे सत्यपि वक्रादिग्रहणक्रियोत्प्रेक्षणात् क्रियोत्प्रेक्षा। उत्प्रेक्षायाः सामान्यलक्षणं - "भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।" इति। अत्र रागाद्यर्थस्य रक्तिमादेः अनुरागादेश्च भिन्नत्वे सत्यपि श्लेषेणाभेदारोपाद् अतिशयोक्तिः। तल्लक्षणं दर्पणे - "सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।" इति।

कोशः

१. "हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः" इत्याद्यमरवचनात् इन्दुशब्दस्य हिमांशुः, चन्द्रमाः, चन्द्रः, कुमुदबान्धवः इत्यादयः पर्यायाः।

पाठगतप्रश्नाः- १

१. लक्ष्मीः कस्मात् रागं स्वीकृतवती?

२. श्रीः कस्मात् चञ्चलतां शिक्षितवती?

३. लक्ष्मीः कस्मात् नैष्ठुर्यं ज्ञातवती?

४. मोहनशक्तिः श्रिया कुतः शिक्षिता?

५. लक्ष्मीः ..... पारिजातपल्लवेभ्यः रागं गृहीत्वैवोद्गता।

६. आलोकयतु तावत् ..... लक्ष्मीरेव प्रथमम्।

७. स्तम्भमेलनं कुरुत।

स्तम्भः - १	स्तम्भः - २
क) रागम्	कालकूटात्
ख) वक्रताम्	उच्चैःश्रवसः
ग) चञ्चलताम्	कौस्तुभमणेः
घ) मोहनशक्तिम्	मदिरायाः
ङ) मदम्	इन्दुशकलात्
च) नैष्ठुर्यम्	पारिजातपल्लवेभ्यः

८. कालकूटान्मोहनशक्तिम् इत्यस्य सन्धिविच्छेदं कुरुत।

१७.२) साम्प्रतं मूलपाठम् अवगच्छाम - ७

न ह्येवंविधम् अपरिचितमिह जगति किञ्चिदस्ति, यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणपाश-सन्दान-निष्पन्दीकृतापि नश्यति, उद्दाम-दर्प-भटसहस्रोल्लासितासिलता-पञ्जर-विधृताप्यपक्रामति। मदजल-दुर्दिनान्धकारगज-घन-घटा-परिपालितापि प्रपलायते, न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोकयते, न कुलक्रममनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति, न धर्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमनुबुध्यते, न लक्षणं प्रमाणीकरोति। गन्धर्वनगरलेखेव पश्यत एव नश्यति। अद्याप्यारूढ-मन्दर-परिवर्तावर्त-भ्रान्ति-जनित-संस्कारेव परिभ्रमति। कमलिनी-सञ्चरणव्यतिकर-लग्न-नलिन-नाल-कण्टकक्षतेव न क्वचिदपि निर्भरमाबध्नाति पदम्। अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविध-गन्धगज-गण्ड-मधुपान-मत्तेव परिस्खलयति। पारुष्यमिव उपशिक्षितुम् असिधारासु निवसति। विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्त्तिम्। अप्रत्ययबहुला च दिवसान्त-कमलमिव समुपचित-मूल-दण्ड-कोशमण्डलमपि भूभुजम्। लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटित-विविध-सङ्क्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति।

व्याख्यानम् -

इह जगति अस्मिन् संसारे, एवंविधम् एतादृशम्, अपरिचितं परिचयनिबन्धनप्रेमनिरासक्तम् अपरम् अन्यत् किञ्चिद् वस्तु नास्ति न वर्तते, यथा येन प्रकारेण, इयम् अनार्या नीचस्वभावोपेता राजलक्ष्मीः। लब्धा अपि प्राप्ता अपि खलु निश्चयेन महता क्लेशेन दुःखेन परिपाल्यते पोषणं क्रियते। अर्थात्प्राप्तापि अप्राप्ता इव।

दृढगुणपाश-सन्दान-निष्पन्दीकृता दृढा गुणा सन्धिविग्रहयानद्वैधीभावा एव पाशः रज्जुः तेन यत् सन्दानं बन्धनं तेन निस्पन्दीकृता निश्चलीकृता अपि लक्ष्मीः नश्यति विनाशं याति।

उद्दाम-दर्प-भटसहस्रोल्लासितासिलता-पञ्जर-विधृता उद्दामो विपुलो दर्पः अहङ्कारो यस्य, तेन तादृशेन, भटसहस्रेण योद्धृसमूहेन, उल्लासिता ऊर्ध्वीकृता असिलता लम्बितखड्गा एवं पञ्जरं पक्ष्यादिबन्धनगृहं तत्र विधृतापि आबद्धापि लक्ष्मीः अपक्रामति अपसरति पक्षान्तरमाश्रयति।

मदजल-दुर्दिनान्धकारगज-घन-घटा-परिपालिता मदजलानि दानसलिलानि एव श्यामत्वसाम्यात् दुर्दिनानि मेघाच्छन्नदिनानि तैः अन्धकारः तमः येभ्यः ते मदजलदुर्दिनान्धकाराः तादृशा गजाः ते एव घनाः मेघाः, तेषां घटाः समूहाः, ताभिः परिपालिता अपि प्रपलायते प्रकर्षेण पलायनं करोति। सा परिचयाद्यनुरोधेन नैकत्र तिष्ठति स्वातन्त्र्येणानुवर्तते। सा गजसमूहेन रक्षितापि पक्षान्तरं याति।

सा लक्ष्मीः परिचयं परिचितं न रक्षति पालयति। सा लक्ष्मीः अभिजनं सद्वंशं न ईक्षते न पश्यति नाभिजनमीक्षते, अर्थात् सद्वंशं परित्यज्य नीचकुलमपि आश्रयति। सा लक्ष्मीः रूपं सौन्दर्यं न आलोकयते न ईक्षते, अर्थात् सुन्दरं परित्यज्य क्वचिद् दुश्चरितम् अपि आश्रयति। सा लक्ष्मीः कुलक्रमं वंशपरम्परां न अनुवर्तते न पालयति, अर्थाद् वंशपरम्परया एकत्र न तिष्ठति। सा लक्ष्मीः शीलं सच्चरितं न पश्यति न अवलोकयति, कुजनमपि सज्जनं परित्यज्य व्रजति। सा लक्ष्मीः वैदग्ध्यं पाण्डित्यं न गणयति न विचारयति, मूर्खमपि क्वचिद् अवलम्बते सा। सा लक्ष्मीः श्रुतं शास्त्रज्ञानं न आकर्णयति न शृणोति, शास्त्रज्ञं परित्यज्य शास्त्रज्ञानहीनमतः गच्छति। सा लक्ष्मीः न धर्मं पुण्यं न अनुरुध्यते पुण्यवत्त्वेन धार्मिकं न आलम्बते, पापिनमेव बहुधा सा आलम्बते। सा लक्ष्मीः त्यागं न आद्रियते दातृत्वगुणसम्पन्नत्वेन दातारं न याति, कृपणालम्बनात् बहुत्र तस्याः। सा लक्ष्मीः विशेषज्ञतां विशेषज्ञानवत्तां न विचारयति न गणयति, आचारं शिष्टसम्मतं व्यवहारं न पालयति। सा हि बहुधा विशेषज्ञं विहाय व्यापारिणं शिष्टं च विहाय दुर्जनमाश्रयते इत्यत्र तात्पर्यम्। सा लक्ष्मीः सत्यं तथ्यं न अनुबुध्यते नो जानाति, वञ्चकम् आश्रित्य एव प्रायः तिष्ठति। सा हि लक्षणं सामुद्रिकशास्त्रप्रतिपादितं शरीरगतं चिह्नं तिलकादिकं न प्रमाणीकरोति न प्रमाणयति। अत एव सुलक्षणानामपि जनानां दारिद्रता भवति।

गन्धर्वनगरलेखा भूतयोनिविशेषाणां रात्रौ अवलोक्यमानं यन्नगरं तत्पङ्क्तिः इव सा लक्ष्मीः पश्यत एव अवलोकयन्तम् अनादृत्य एव नश्यति विलयं याति। गन्धर्वनगरलेखा गन्धर्वनगरम् तच्च शास्त्रकारा अशुभसूचका मन्यन्ते। यथोक्तं बृहत्संहितायाम्-

"गन्धर्वनगरमुत्थितमापाण्डुरमशनिपातवातकरम्।

दीप्ते नगेन्द्रमृत्युर्वामेरिभयं जयः सव्ये।।" इति।

सा लक्ष्मीः अद्यापि अधुनापि आरूढ-मन्दर-परिवर्तावर्त-भ्रान्ति-जनित-संस्कारा आरूढः मन्दरस्य मन्दरपर्वतस्य परिवर्तेन य आवर्तः, तस्मिन् या भ्रान्तिः, तया जनितः उत्पन्नः य संस्कारः यस्याः सा इव तादृशी भूत्वा परिभ्रमति मुहुर्मुहुः परिभ्रमणं करोति। अर्थात् लक्ष्मीर्न कुत्राऽपि स्थैर्यमवलम्ब्य तिष्ठति।

कमलिनी-सञ्चरणव्यतिकर-लग्न-नलिन-नाल-कण्टकक्षता इव कमलिनीषु पङ्कजवल्लरीषु सञ्चरणव्यतिरेकेण भ्रमणसम्पर्केण लग्नाः नलिनानां पङ्कजानां नालकण्टकानि तैः क्षता विदीर्णा इव क्वचिदपि कुत्रापि पदं प्रतिष्ठां निर्भरं निश्चलं न आबध्नाति स्थापयति।

परमेश्वरगृहेषु राजप्रासादेषु अतिशयधनिकसदनेषु वा अतिप्रयत्नविधृता अपि अतिप्रयत्नेन अत्यन्तेन प्रयासेन विधृता स्थापिता अपि विविध-गन्धगज-गण्ड-मधुपान-मत्ता विविधाः अनेकप्रकाराः ये गन्धगजाः तेषां गण्डेषु कपालेषु मधूनि दानवारिणी एव मद्यानि तेषां पानेन आस्वादनेन मत्ता क्षिप्रा इव परिस्खलति नृपान्तरं व्रजति।

पारुष्यं कठोरताम् उपशिक्षितुम् अभ्यसितुम् इव असिधारासु खड्गाग्रभागेषु निवसति निवासं करोति। सा लक्ष्मीः विश्वरूपं विराट्स्वरूपं ग्रहीतुं स्वीकर्तुम् इव नारायणमूर्तिं विष्णुविग्रहम् आश्रिता अधिगता।

सा लक्ष्मीः अप्रत्ययबहुला अप्रत्ययः अविश्वासः बहुलः प्रचुरः यस्याः सा समुपचित-मूल-दण्ड-कोशमण्डलं समुपचितानि सुष्ठुतया वर्धितानि मूलं विजयनिमित्तं सैन्यं, दण्डः उपायविशेषः, कोशः धनं, मण्डलं राष्ट्रं च इत्येतानि यस्य तादृशं भूभुजं नृपम् अपि मुञ्चति परित्यजति, नृपान्तरम् आलम्बते।

सा लक्ष्मीः, लता वल्ली, इव, विटपकान् वृक्षशाखाः निन्दितान् कामुकान्, अध्यारोहति अवलम्बते। अर्थात् लता यथा वृक्षशाखाम् अवलम्बते तथा इयं निन्दितान् कामुकान् अवलम्बते। सा लक्ष्मीः गङ्गा भागीरथी इव वसुजननी वसोः वस्ववतारस्य भीष्मस्य जननी माता अपि तरङ्गबुद्बुदचञ्चला तरङ्गबुद्बुदौ भङ्गजलस्फोटौ ताभ्यां चञ्चला चपला। दिवसकरगतिरिव प्रकटित-विविध-सङ्क्रान्तिः।

दिवसकरगतिः सूर्यस्य गमनम् इव प्रकटित-विविध-सङ्क्रान्तिः प्रकटिता प्रकाशिता विविधा अनेकप्रकारा संक्रान्तिः मेषवृषादिसंक्रान्तिः यया सा तादृशी इव सा लक्ष्मीः अपि प्रकटिता प्रकाशिता विविधेषु अनेकप्रकारेषु जनेषु संक्रान्तिः संचारः यया सा। पातालगुहा रसातलदरी तमोबहूला तमः अन्धकारः बहूलम् अधिकं यस्यां सा इव सा लक्ष्मीः अपि तमः तमोगुणः बहुलम् अधिकं यस्यां सा तादृशी। सा लक्ष्मीः हिडिम्बा घटोत्कटचजननी इव भीमसाहसैकहार्यहृदया भीमस्य भीमसेनस्य साहसेन बलकृतकर्मणा एकं केवलम् हार्यं हर्तुं योग्यं हृदयं चित्तं यस्याः सा। लक्ष्मीरपि भीमसाहसैकहार्यहृदया भीमसाहसैकेन परराज्याक्रमणादिहठकारेण हार्यं हर्तुं शक्यं हृदयं चेतो यस्याः तादृशी भवति। सा लक्ष्मीः प्रावृट् वर्षासमयः इव अचिरद्युतिकारिणी अचिरद्युतिं कर्तुं शीलं यस्याः सा। प्रावृट् वर्षर्तुः इव, अचिरद्युतिकारिणी अचिरद्युतिः विद्युत्, तां करोति विदधाति इति। लक्ष्मीरपि अचिरद्युतिः स्वल्पप्रकाशं करोतीति तादृशी भवति।

दुष्टपिशाची दुष्टा तमोगुणरूपदोषयुक्ता पिशिताशिनी देवयोनिविशेषस्त्री इव दर्शितानेकपुरुषोच्छ्राया दर्शितः प्रकाशितः अनेकां बहूनां पुरुषाणाम् उच्छायः औन्नत्यं यया सा, लक्ष्मीरपि दर्शितः अनेकपुरुषाणां बहूजनानाम् उच्छायः औन्नत्यं यया सा, तादृशी सती पिशाचीव स्वल्पसत्त्वम् अधीरस्वभावं नरम् उन्मत्तीकरोति उन्मादयति।

सरलार्थः -

कीदृशी इयं लक्ष्मीः इति शुकनासः चन्द्रापीडम बोधयति यद् यथा इयं दुर्जना लक्ष्मी, तथा कापि अपरिचिता नास्ति अस्मिन् संसारे। यतो हि प्राप्ता अपि दुःखेन इयं परिपाल्यते। शौर्यादिद्वारा सुदृढतया इयं स्थाप्यते चेदपि शीघ्रमेव इयं नश्यति। बहुभिः योद्धृभिः नृपैः बद्धा अपि पलायते। मदोन्मत्तगजरूपमेघैः रक्षिता अपि विमुच्यते। केवलम् एतदेव न, सा परिचितान् न रक्षति, आत्मीयान् न पश्यति, न रूपवन्तं रक्षति, न आचारक्रमम् अनुसरति, न वा पवित्रतां परिपालयति, न विदग्धतां स्वीकरोति, न शास्त्रनीतिं शृणोति, न धर्मनियमान् अङ्गीकरोति, न त्यागम् अङ्गीकरोति, विशेषज्ञानन्तं न सम्मानयति, आचारान् न पालयति, न सत्यं वेत्ति, शरीरगतचिह्नादिकं प्रमाणरूपेण नाङ्गीकरोति। गन्धर्वनगरस्य पङ्क्तिः इव क्षणाय भासते क्षणाय च विलीयते। मन्दरपर्वतस्य भ्रमणाद् उत्पन्ना सा लक्ष्मीः स्वभाववशात् भवनात् भवनान्तरं भ्रमति। पद्मकानने विहारसमये तस्याः चरणयोः कण्टकाकीर्णत्वात् सा क्वापि चिराय पादं स्थापयितुं न समर्था। बहुभिः राज्ञैः धनकैः वा स्वभवने अतियत्नेन सा संरक्षितापि

गजकपोलस्थं मधु पीत्वा उन्मत्तेव भूत्वा अधः परिस्खलति। मन्ये सा कठोरतां शिक्षितुं खड्गधारायां निवसति। सा विश्वरूपत्वं ग्रहीतुं भगवतः श्रीविष्णोः शरीरं प्रविष्टा इति प्रतीयते। सा मध्ये मध्ये अविश्वासयुक्ता सती सन्ध्याकालीनं पद्ममिव विशालभूमण्डलाधिपं राजानमपि परित्यजति। लता यथा वृक्षम् आलम्बते तथा इयं धूर्तमपि जनम् आरोहति। देवी गङ्गा भीष्मस्य माता परन्तु तरङ्गैः बुद्बुदैश्च चञ्चला तद्वदेव लक्ष्मीः धनाधिष्ठात्री परन्तु तरङ्गः इव अस्थिरा। यथा सूर्यस्य गत्या मेषवृषादिसंक्रान्तिः भवति एवमेव इयमपि बहुषु जनेषु संक्रामति। पाताललोकस्य बिलं यथा अन्धकारमयं तथा इयमपि तमोगुणसम्पन्ना। हिडिम्बा यथा भीमस्य अत्यन्तसाहसं दृष्ट्वा अभिभूता सती तेन आकृष्टा भवति एवमेव अत्यन्तसाहसिकं पुरुषं दृष्ट्वा तेन आकृष्टा भवति। वर्षर्तुः यथा अचिरद्युतिं नाम विद्युतम् उत्पादयति तद्वदेव इयमपि अचिरद्युतिं नाम क्षणस्थायिनीं कान्तिमुत्पादयति। दुष्टा पिशाची यथा स्वशरीरं वर्धयित्वा सर्वान् भाययते एवमेव इयमपि लक्ष्मीः विविधानां पुरुषाणाम् उन्नतिं दर्शयित्वा माम् अधिगच्छन्तु इत्युक्त्वा सर्वेषाम् उन्मत्ततां जनयति।

व्याकरणविमर्शः -

क) समासः -

१. दृढगुणपाशसन्दाननिष्पन्दीकृता - दृढा च ते गुणाः दृढगुणाः इति कर्मधारयसमासः। दृढगुणाः एव पाशः इति दृढगुणपाशः इति कर्मधारयसमासः। तेन सन्दानं दृढगुणपाशसन्दानम् इति तृतीयातत्पुरुषः। तेन निष्पन्दीकृता दृढगुणसन्दाननिष्पन्दीकृता इति तृतीयातत्पुरुषसमासः।

२. उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृता - उद्दामः दर्पः यस्य स उद्दामदर्पः इति बहुव्रीहिसमासः। भटानां सहस्रं भटसहस्रम् इति षष्ठीतत्पुरुषः। उद्दामदर्पः भटसहस्रम् उद्दामदर्पभटसहस्रम् कर्मधारयः। तेन उल्लासिता उद्दामदर्पभटसहस्रोल्लासिता इति तृतीयातत्पुरुषः। सा एव असिलता उद्दामदर्पभटसहस्रोल्लासिता-सिलता इति कर्मधारयः। सा एव पञ्जरम् उद्दामदर्पभट-सहस्रोल्लासितासिलतापिञ्जरम् इति कर्मधारयसमासः। तत्र विधृता उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृता इति सप्तमीतत्पुरुषः।

३. समुपचित-मूल-दण्ड-कोशमण्डलम् - मूलं च दण्डश्च कोशश्च मण्डलं च मूलदण्डकोशमण्डलानि इति इतरेतरयोगद्वन्द्वः। समुपचितानि मूलदण्डकोशमण्डलानि यस्य स समुपचितमूलदण्डकोशमण्डलः, तम् इति बहुव्रीहिसमासः।

सन्धिविच्छेदः

१. **यथेयम् - यथा इयम्।**

२. **वसुजनन्यपि - वसुजननी अपि।**

३. **प्रावृडिवाचरिताद्युतिकारिणी - प्रावृडिवाचरितात् अतिकारिणी।**

अलङ्कारविमर्शः

१. मदजल-दुर्दिनान्धकारगज-घन-घटा-परिपालिता इत्यत्र गजेषु मेघत्वारोपे मदजलेषु दुर्दिनत्वारोपो निमित्तमिति परम्परितं रूपकम्। तथाहि तल्लक्षणं दर्पणे -

"यत्र कस्यचिदारोपः परारोपणकारणम्।

तत्परम्परितम्" इति।

२. कमलिनीतीत्यस्मिन् वाक्ये, अतिप्रयत्नेतीत्यस्मिन् वाक्ये, पारुष्यमीत्यस्मिन् वाक्ये च उत्प्रेक्षालङ्कारः।

३. पातालगुहेवेतीत्यस्मिन् वाक्ये, हिडिम्बेव इत्यस्मिन् वाक्ये, प्रावृडिवेतीत्यस्मिन् वाक्ये, दुष्टपिशाचीवेत्यस्मिन् वाक्ये च उपमालङ्कारः।

कोशः

१. "विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः" इत्याद्यमरोक्तेः विष्णुः, नारायणः, कृष्णः, वैकुण्ठः, विष्टरश्रवाः इत्यादयः समार्थकशब्दाः।

२. "अधोभुवनपातालं बलिसद्म रसातलम्। नागलोकः" इत्यमरवचनात् अधोभुवनम्, पातालम्, बलिसद्म, रसातलम्, नागलोकः इत्येते समार्थकाः शब्दाः।

३. "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः"इत्यमरवचनात् चित्तम्, चेतः, हृदयम्, स्वान्तम्, हृत्, मानसम्, मनः इत्येते समार्थकाः।

पाठगतप्रश्नाः- २

९. लक्ष्मीः कथं परिपाल्यते?

१०. किंभूतापि उपक्रामति?

११. श्रीः किं न रक्षति?

१२. सम्पत् किं नानुवर्तते?

१३. किं न अनुरुध्यते?

१४. किं न विचारयति लक्ष्मीः?

१५. कीदृशी इव परिस्खलति श्रीः?

१६. श्रिया किं ग्रहीतुं नारायणमूर्तिः आश्रिता?

१७. श्रीः किमिव तमोबहुला?

१८. किमिव अपरपुरुषान् उन्मत्तीकरोति?

१९. स्तम्भमेलनं कुरुत।

स्तम्भः - १	स्तम्भः - २
क) न रक्षति	क) वैदग्ध्यम्

ख) न ईक्षते	ख) लक्षणम्
ग) न आलोकयते	ग) अभिजनम्
घ) न अनुवर्तते	घ) श्रुतम्
ङ) न पश्यति	ङ) त्यागम्
च) न गणयति	च) विशेषज्ञताम्
छ) न आकर्णयति	छ) आचारम्
ज) न अनुरुध्यते	ज) कुलक्रमम्
झ) न आद्रियते	झ) शीलम्
ञ) न विचारयति	ञ) रूपम्
ट) न पालयति	ट) परिचयम्
ठ) न प्रमाणीकरोति	ठ) धर्मम्

१७.३) साम्प्रतं मूलपाठम् अवगच्छाम – ८

सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्, गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति, अभिजातमहिमिव लङ्घयति, शूरं कण्टकमिव परिहरति, दातारं दुःस्वप्नमिव न स्मरति, विनीतं पातकिनमिव नोपसर्पति, मनस्विनमुन्मत्तमिवोपहसति। परस्परविरुद्धश्चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथाहि – सततम् ऊष्माणमुपजनयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावताम् आविष्करोति। तोयराशिसंभवापि तृष्णां सम्वर्धयति। ईश्वरतामादधानाप्यशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुकविपाका। विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खल–जन–प्रिया। रेणुमयीव स्वच्छमपि कलुषीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्गमति।

व्याख्यानम् -

सा लक्ष्मीः सरस्वतीपरिगृहीतं सरस्वत्या वाग्देव्या परिगृहीतं स्वीकृतं जनं विद्यावन्तम् अपि ईर्ष्यया अक्षान्त्या इव न आलिङ्गति न आश्लिष्यति। अनेन सपत्नीभावः प्रदर्शितः। सा लक्ष्मीः गुणवन्तं शौर्यादिगुणसम्पन्नं पुरुषम् अपवित्रम् अप्रयतं जनं अस्पृश्यम् इव न स्पृशति, उदारसत्त्वम् उदारस्वभावं पुरुषम् अमङ्गलम् अकल्याणम् इव न बहु मन्यते न आद्रियते, सुजनं सज्जनम् अनिमित्तम् इव लक्षणरहितम् इव न पश्यति नो विलोकयति, अभिजातं कुलीनम् अहिं सर्पम् इव लङ्घयति अतिक्रामति,

शूरं शौर्ययुक्तं जनं कण्टकं द्रुमाङ्गम् इव परिहरति परित्यजति, दातारं बहुप्रदं जनं दुःस्वप्नम् अशुभस्वप्नम् इव न स्मरति न ध्यायति, विनीतं विनयसंपन्नं जनं पातकिनं पापकारिणं जनम् इव न उपसर्पति न समीपं गच्छति, मनस्विनं प्रशस्तमनस्कं जनम् उन्मत्तम् उन्मादयुक्तं जनम् इव उपहसति उपहासं करोति।

सा लक्ष्मीः इन्द्रजालं कुहकं दर्शयन्ती प्रकाशयन्ती इव जगति लोके परम्परविरुद्धम् अन्योन्यविरोधयुक्तं निजं स्वकीयं चरितं वृत्तं प्रकटयति आविष्करोति। तथाहि - सततं निरन्तरम् ऊष्माणं तापम् उपजनयन्ती उत्पादयन्ती अपि जाड्यं जडतां उपजनयति उत्पादयति। सा लक्ष्मीः उन्नतिम् उच्छ्रायम् आदधाना धारयन्ती अपि नीचस्वभावतां निम्नप्रकृतित्वम् आविष्करोति प्रकाशयति। तोयराशिसम्भवा अपि तोयराशेः समुद्रात् संभवः उत्पत्तिः यस्याः सा तादृशी लक्ष्मीः तृष्णां पिपासां संवर्धयति समेधयति। ईश्वरतां शिवत्वम् आदधाना धारयन्ती अपि अशिवप्रकृतित्वं शिवभिन्नस्वभावत्वम् आतनोति। बलोपचयं शक्तिवृद्धिम् आहरन्ती आनयन्ती अपि लघिमानं लघुत्वम् आपादयति निष्पादयति।

अमृतसहोदरापि कटुकविपाका। अमृतसहोदरा अमृतस्य पीयूषस्य सहोदरा सोदर्या अपि कटुकविपाका कटुकः जिह्वाकटुः विपाकः रसः यस्याः सा। लक्ष्म्याः समुद्रादुत्पत्या अमृतसोदसत्वेऽपि कथं कटुकविपाकत्वमिति विरोधः, कटुकः दुःखदायकः, विपाकः परिणामः, यस्याः सा इति परिहारः। अत एवोक्तं च -

"अर्थानामर्जने दुःखमर्जितानां च रक्षणे।

आये दःखं व्यये दुःखं धिगर्थात्कष्टसंश्रयात्।।"इति।

सा लक्ष्मीः विग्रहवती अपि मूर्तिमती अपि अप्रत्यक्षदर्शना अप्रत्यक्षम् निरिन्द्रियागोचरम् दर्शनं विलोकनं यस्याः सा। सा लक्ष्मीः पुरुषोत्तमरता पुरुषोत्तमेषु उत्तमपुरुषेषु रता आसक्ता अपि खलजनप्रिया खलजनाः दुर्जनमानवाः प्रियाः अभीष्टाः यस्याः सा तथा भवति। अत्रापि विरोधः। लक्ष्मीः पुरुषोत्तमे श्रीविष्णौ, रता आसक्ता खलजनप्रिया इति परिहारः। सा लक्ष्मीः रेणुमयी इव धूलिमयी इव रजोगुणमयी इव वा स्वच्छं निर्मलम् अपि कलुषीकरोति मलिनीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्गमति। चपला चञ्चला इयं लक्ष्मीः यथा यथा येन येन प्रकारेण दीप्यते प्रस्फुरति, तथा तथा तेन तेन प्रकारेण दीपशिखा प्रदीपज्वाला इव कज्जलमलिनं कज्जलम् अञ्जनम् इव मलिनं मलीमसं कर्म क्रियाम् अभक्ष्यभक्षणादिकं वा उद्गमति उद्गिरति। यथा दीपशिखा कज्जलमेव मलिनं वस्तु वमति तथैवेयं लक्ष्मीः कज्जलमलिनं दुष्कर्मादिकमुत्पादयतीति तात्पर्यम्।

सरलार्थः -

देव्या सरस्वत्या स्वीकृतान् विदुषः ईर्ष्यया लक्ष्मीः न स्वीकरोति। सा च पुनः गुणसम्पन्नम् अपवित्रमिव न स्पृशति, उदारस्वभावसम्पन्नं जनं अमाङ्गलिकमिव अधिकतया न मन्यते, सज्जनं लक्षणरहितमिव न पश्यति, कुलीनं पुरुषं सर्पमिव त्यजति, शूरं जनं कण्टकमिव परित्यज्य गच्छति, ये दातारः भवन्ति तान् दुःस्वप्नमिव न कदापि स्मरति। यः मनुष्यः विनययुक्तः सः पापी इति मत्वा तस्य

समीपं लक्ष्मीः न याति। सा मनस्विनं पुरुषम् उन्मत्तमिव मत्वा हसति। इन्द्रजालं यथा वास्तविकजगतः भिन्नम्। एवमेव लक्ष्मीः अपि इन्द्रजालमिव जगति परस्परविरुद्धं स्वं चरित्रं प्रदर्शयति। धनतेजः मूर्खता च अत्यन्तं विरुद्धम्। सा प्रतिक्षणं ऊष्माणं नाम धनतेजः जनयन्ती परन्तु सममेव अत्यन्तविरुद्धं जाड्यमपि उत्पादयति। उन्नत्या मनसि उदारता आगच्छति। परन्तु अनया उन्नतिः लभ्यते परन्तु विरुद्धस्वभावयुता नीचस्वभावतापि प्राप्यते। इयं लक्ष्मीः समुद्रात् समुत्थिता परन्तु तृष्णां वर्धयति। ईश्वरभावं नाम मङ्गलपरिसरं विस्तारयति परन्तु सममेव अमाङ्गलिकीं प्रकृतिमपि प्रसारयति। शक्तेः वर्धनाय शिक्षयति, परन्तु सममेव तुच्छत्वमपि वर्धयति। सा अमृतस्य सहोदरा परन्तु कटु नाम अनिष्टस्य कारणस्वरूपा। इयं विग्रहसम्पन्ना नाम कलहयुता परन्तु अस्याः प्रत्यक्षं न भवति। सा लक्ष्मीः पुरुषोत्तमे नाम भगवति वासुदेवे आसक्ता परन्तु दुर्जनानां प्रिया। सा रेणुमयी नाम रजोगुणसम्पन्ना परन्तु निर्मलमपि जनं मलिनीकरोति। सा यथा यथा प्रकाशिता भवति तथा तथा दीपस्य शिखा यथा अञ्जनं प्रकाशयति एवमेव मलिनं कर्म प्रकटयति।

व्याकरणविमर्शः -

क) समासः -

१. सरस्वतीपरिगृहीतम् - सरस्वत्या परिगृहीतं सरस्वतीपरिगृहीतम् इति तृतीयातत्पुरुषसमासः।

२. अमृतसहोदरा - अमृतस्य सहोदरा अमृतसहोदरा इति षष्ठीत्पुरुषसमासः।

अलङ्कारविमर्शः

१. सरस्वतीपरिगृहीतम् इत्यस्मिन् वाक्ये लक्ष्म्याः ईर्ष्यागुणसम्भावनाद् गुणोत्प्रेक्षालङ्कारः। किञ्च, स्त्रीलिङ्गद्वारा सपत्नीव्यवहारसमारोपात् समासोक्तिः अलङ्कारः। तल्लक्षणं दर्पणे -

"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।" इति। अत्र गुणोत्प्रेक्षायाः समासोक्तेश्च अङ्गाङ्गिभावेन सङ्करालङ्कारः।

२. मनस्विनमित्यस्मिन् वाक्ये परस्परविरुद्धम् इत्यस्मिन् च वाक्ये उत्प्रेक्षालङ्कारः।

३. उन्नतिमित्यस्मिन् वाक्ये औनत्ये अपि नीचस्वभावताया विरुद्धत्वावभासाद् विरोधाभासाऽलङ्कारः। एवमेव ईश्वरतामित्यस्मिन् वाक्ये, बलोपचयमित्यस्मिन् वाक्येऽपि च विरोधाभासाऽलङ्कारः।

पाठगतप्रश्नाः- ३

२०. लक्ष्मीः कम् ईर्ष्यया नालिङ्गति?

२१. श्रीः कम् अमङ्गलमिव मन्यते?

२२. लक्ष्मीः कम् अनिमित्तमिव न पश्यति?

२३. श्रीः कम् अपवित्रमिव न स्पृशति?

२४. लक्ष्मीः कं दुःस्वप्नमिव न स्मरति?

२५. श्रीः जगति कीदृशं निजं चरितं दर्शयति?

२६. उन्नतिमादधानापि लक्ष्मीः किम् आविष्करोति?

२७. लक्ष्मीः किंप्रकृतित्वम् आतनोति?

२८. श्रीः केषां प्रिया?

२९. किमिव मलिनं कर्म उद्वमति?

३०. श्रीः किं वर्धयति?

१७.४) साम्प्रतं मूलपाठम् अवगच्छाम – ९

तथाहि इयं संवर्धनवारिधारा तृष्णाविषवल्लीनाम्, व्याधगीतिरिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरितचित्राणाम्, विभ्रमशय्या मोहदीर्घनिद्राणाम्, निवासजीर्णवलभी धनमदपिशाचिकानाम्, तिमिरोद्गतिः शास्त्रदृष्टीनाम्, पुरःपताका सर्वाविनयानाम्, उत्पत्तिनिम्नगा क्रोधावेगग्राहाणाम्, आपानभूमिर्विषयमधूनाम्, सङ्गीतशाला भ्रूविकारनाट्यानाम्, आवासदरी दोषाशीविषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्, अकालप्रावृड् गुणकलहंसकानाम्, विसर्पणभूमिर्लोकापवादविस्फोटकानाम्, प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणः, वध्यशाला साधुभावस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य। न हि तं पश्यामि, यो ह्यपरिचितया अनया न निर्भरमुपगूढः। यो वा न विप्रलब्धः। नियतमियमालेख्यगतापि चलति, पुस्तमय्यपीन्द्रजालमाचरति, उत्कीर्णापि विप्रलभते, श्रुताप्यभिसंधत्ते, चिन्तितापि वञ्चयति।

व्याख्यानम् -

इयं लक्ष्मीः तृष्णाविषवल्लीनां तृष्णाः विषयस्पृहाः एव विषवल्ल्यः गरललताः तासां संवर्द्धनवारिधारा विस्तारणजलसन्ततिः। लक्ष्मीः हि उत्तरोत्तरं विषयस्पृहां वर्धयति।

इयं लक्ष्मीः इन्द्रियमृगाणाम् इन्द्रियाणि हृषीकाणि एव मृगाः हरिणाः तेषां व्याधगीतिः लुब्धकगानम्। यथा व्याधो गीतेन मृगान् वशमानीय तान् नाशयति तथैव इयमपि इन्द्रियाणि विषयाभिमुखानि विधाय जनान् नाशयति।

इयं लक्ष्मीः सच्चरितचित्राणां सच्चरितानि सुवृत्तानि एव चित्राणि आलेख्यानि तेषां परामर्शधूमलेखा परामर्शाय प्रोञ्छनाय धूमलेखा वह्निध्वजपङ्क्तिः। यथा धूमलेखा चित्रं मलिनीकरोति, तथैव लक्ष्मीरपि चरितं कलुषयति।

इयं लक्ष्मीः मोहदीर्घनिद्राणां मोहाः विवेकराहित्यानि एव दीर्घनिद्राः तासां विभ्रमशय्या विलासशय्या। एषा हि मोहं परिवर्धयति।

इयं लक्ष्मीः धनमदपिशाचिकानां धनमदाः अर्थोन्मत्तताः एव पिशाचिकाः पिशाचजतीयाः स्त्रियः तासां निवास-जीर्णवलभी निवासाय अवस्थानाय जीर्णवलभी पुरातनं भवनम्। यथा जीर्णगृहेष्वेव पिशाचानाम् अवस्थानं तथा लक्ष्म्याः सत्त्वे धनमदो भवत्येव।

इयं लक्ष्मीः शास्त्रदृष्टीनां शास्त्राणि वेदादिशास्त्राणि एव दृष्टयः लोचनानि येषां तेषां शास्त्रैकचक्षुष्काणां तिमिरोद्गतिः तिमिरस्य नयनरोगविशेषस्य उद्गतिः उद्गमः। तिमिररोगः नेत्रयोर्दर्शनशक्तिः यथा नाशयति लक्ष्मीः अपि शास्त्रज्ञानं नाशयति।

इयं लक्ष्मीः सर्वाऽविनयानां सर्वेषां समस्तानाम् अविनयानाम् औद्धत्यानां पुरःपताका अग्रवैजयन्ती ध्वजा। लक्ष्मीरेव सर्वेषाम् अविनयानां कारणम्।

इयं लक्ष्मीः क्रोधावेगग्राहाणां क्रोधस्य कोपस्य आवेगाः संभ्रमाः एव ग्राहाः अवहाराः तेषाम् उत्पत्ति-निम्नगा नदी। यथा नद्यां ग्राहा उत्पद्यन्ते, तथैव कोपसंभ्रमान् लक्ष्मीः जनयति।

इयं लक्ष्मीः विषयमधूनां विषयाः स्रक्चन्दनवनितादिभोग्यपदार्थाः एव मधूनि मद्यानि, तेषाम् आपानभूमिः पानगोष्ठीस्थलम्। यदा लक्ष्मीः तिष्ठति तदा एव विषयभोगासक्तिः भवति।

इयं लक्ष्मीः भ्रूविकारनाट्यानां भ्रूविकाराः भ्रूभङ्गाः एव नाट्यानि नर्तनानि तेषां संगीतशाला रङ्गशाला।

इयं लक्ष्मीः दोषाशीविषाणां दोषाः कामक्रोधादयः एव आशीविषाः भुजङ्गमाः, तेषाम् आवासदरी निवासगुहा। लक्ष्म्यां सत्यामेव कामक्रोधादयो दोषा उत्पद्यन्ते।

इयं लक्ष्मीः सत्पुरुषव्यवहाराणां सत्पुरुषाः शिष्टजनाः तेषां व्यवहाराणाम् आचरणानाम् उत्सारणवेत्रलता उत्सारणे अपसारणे दूरीकरणे वेत्रलता वेतसयष्टिः। यदा लक्ष्मीः तिष्ठति तदा शिष्टाचाराः विनष्टा भवन्ति।

इयं लक्ष्मीः गुणकलहंसकानां गुणाः दयादाक्षिण्यादयः एव कलहंसकाः कादम्बाः तेषाम्, अकालप्रावृट् अकाले असमये एव प्रावृट् वर्षा। वर्षासु हंसा नश्यन्तीति प्रायोवादः। एवमेव लक्ष्मीः दयादाक्षिण्यादीन् गुणान् नाशयति।

इयं लक्ष्मीः लोकापवादविस्फोटकानां लोकापवादाः जनाक्षेपाः एव विस्फोटकाः पिटकाः तेषां विसर्पणभूमिः विस्तरणस्थलम्। लक्ष्मीसत्त्वे एव कुकर्मवशाद् अनेके अपवादा जायन्ते।

इयं लक्ष्मीः कपटनाटकस्य कपटं छद्माचरणम् एव नाटकं रूपकविशेषः तस्य प्रस्तावना आमुखम्। लक्ष्म्यां स्थितायामेव नानाविधं कपटाचरणं कुर्वन्ति जनाः।

इयं लक्ष्मीः कामकारिणः कामः मन्मथः मदः मदनः वा एव करी हस्ती तस्य कदलिका रम्भा। यथा कदलीसमूहे गजाः सानन्दं विहरन्ति एवमेव लक्ष्मीः तिष्ठति चेद् अनेकविधा मन्मथविकारा जनानां जायन्ते।

इयं लक्ष्मीः साधुभावस्य सज्जनत्वस्य वध्यशाला हननशाला। लक्ष्मीः तिष्ठति चेत् मनुष्याः साधुत्वं त्यजन्ति।

इयं लक्ष्मीः धर्मेन्दुमण्डलस्य धर्मः पुराणम् एव इन्दुमण्डलं चन्द्रबिम्बं तस्य, राहुजिह्वा सिंहीकागर्भसम्भूतस्य राहोः रसना। लक्ष्मीः भवति चेदेव सुकृताचरणस्य लोपो भवति।

हि निश्चितं तं तादृशं नरं पश्यामि नो विलोकयामि, यः नरः अपरिचितया परिचयरहितया अनया लक्ष्म्या निर्भरं गाढं न उपगूढः न आलिङ्गितः। यो वा नरः अनया लक्ष्म्या न विप्रलब्धः नो वञ्चितः। लक्ष्मीः कुलटेव सर्वत्र सम्बन्धं विदधाति सर्वान् च प्रतारयति।

इयं लक्ष्मीः नियतं निश्चितम् आलेख्यगता चित्रस्थिता अपि चलति गच्छति स्थिरा न भवति। पुस्तमयी मृदादिविनिर्मितपुत्तलिकारूपा अपि इन्द्रजालं कुहकम् आचरति विदधाति।

इयं लक्ष्मीः उत्कीर्णा प्रस्तरादौ उल्लिखिता अपि विप्रलभते विसंवदति, श्रुता आकर्णिता अपि अभिसन्धत्ते अनुसन्दधाति, चिन्तिता ध्याता अपि वञ्चयति प्रतारयति।

सरलार्थः -

सा लक्ष्मीः यथा तृष्णारूपविषलतानां वर्धनकर्त्री जलधारा एवमेव इन्द्रियरूपमृगानाम् आकर्षणकर्त्री व्याधगीतिरिव। धूमो यथा आदर्शम् आवृणोति मलिनीकरोति वा, एवमेव सा अपि उत्तमचरित्रसम्पन्नं जनम् आवृणोति कलुषयति वा। मोहरूपदीर्घनिद्रासम्पन्नानां कृते विलासशय्या इव। धनमदलोलुपानां पिशाचिनां कृते सा निवासक्षमा गुहा इव। येषां दृष्टिः शास्त्रानुसारं प्रवर्तते तेषां कृते तिमिरनामकः नेत्ररोगः। सा एव समेषाम् औद्धत्यानाम् अग्रवैजयन्ती नाम हेतुः। यथा नद्यां ग्राहाः नाम अवहाराः उत्पद्यन्ते एवमेव ये कोपावेगविष्टाः ते लक्ष्म्यामेव जायन्ते। सा शब्दस्पर्शादिविषयमदिरायाः पानभूमिः। अर्थात् लक्ष्म्यां विषयभोगासक्तिः भवति। इयं भ्रूभङ्गनाट्यस्य सङ्गीतशाला। दोषरूपभुजङ्गस्य इयम् आवासगुहा। सताम् आचरणम् अपसारयितुम् इयं वेत्रयष्टिः। अर्थात् लक्ष्म्यां शिष्टाचाराः नश्यन्ति। इयं गुणराजहंसस्य अकालवृष्टिः इव। अर्थाद् इयं गुणानां विनाशकारणम्। एषैव लोकापवादस्य विस्तरणस्थलम्। अर्थात् अत्रैव कुकर्माचरणं वर्तते। अस्यामेव कपटाचरणं भवति। कदली गजाय अत्यन्तं रोचते। कामदेवगजस्य इयं कदलीस्वरूपा। अर्थात् अस्यां बहुविधाः कामविकाराः जायन्ते। सताम् इयं वध्यभूमिः। राहोः प्रभावेण चन्द्रस्य ग्रहणं जायते। इयं धर्मचन्द्रस्य राहुजिह्वा इव। अर्थात् एनया सतां सदाचरणं लुप्यते। पुंश्चली यथा समैः सह सम्बन्धं स्थापयति, सर्वान् आलिङ्गति, न कमपि वञ्चयति। एवं लोके न कश्चन तथाविधः वर्तते यः लक्ष्म्या न आलिङ्गितः, न वा कश्चन तथा यः एनया वञ्चितः। इयं चित्रस्थितापि चलति नाम अस्थिरा। ऐन्द्रजालिका इव सहसा विलीयते। प्रस्तरादौ लिखितापि सा विसंवदति। इयं श्रुता परन्तु पुनरपि अनुसन्दधाति। सा आराधिता सती अपि आराधकं प्रतारयति।

व्याकरणविमर्शः

१. व्याधगीतिः- व्याधस्य गीतिः व्याधगीतिः इति षष्ठीतत्पुरुषसमासः।

२. इन्द्रियमृगाणाम्- इन्द्रियाणि एव मृगाणि इन्द्रियमृगाणि इति कर्मधारयसमासः, तेषाम् इन्द्रियमृगाणाम्।

३. धनमदपिशाचिकानाम्- धनमदाः एव पिशाचिकाः इति कर्मधारयसमासः, तासाम् धनमदपिशाचिकानाम् इति षष्ठीतत्पुरुषसमासः।

४. शास्त्रदृष्टीनाम् - शास्त्राणि एव दृष्टयः येषां ते शास्त्रदृष्टयः इति बहुव्रीहिसमासः, तेषाम् इति।

अलङ्कारविमर्शः

१. पुरःपताका सर्वाविनयानाम् इत्यत्र उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम् इत्यत्र च केवलं रूपकम्।

२. न हि तं पश्यामीत्यादिवाक्ये लक्ष्मीः कुलटेव सर्वत्र सम्बन्धं विदधाति इत्यतः लक्ष्म्यां कुलटाव्यवहारसमारोपात् समासोक्त्यलङ्कारः।

३. चिन्तितापि वञ्चयतीत्यत्र परस्परविरुद्धस्य युगपत् आभासेन विरोधाभासालङ्कारः।

कोशः

१. "वल्ली तु व्रततिर्लता" इत्यमरवचनाद् वल्ली, व्रततिः, लता इत्येते समार्थकाः।

२. "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा" इत्यमरोक्तेः दरी, कन्दरः, देवखातम्, बिलम्, गुहा इत्येते समार्थकाः शब्दाः।

पाठगतप्रश्नाः- ४

१. तृष्णाविषवल्लीनां श्रीः कीदृशी?

२. सच्चरितचित्राणां लक्ष्मीः कीदृशी?

३. महादीर्घनिद्राणां श्रीः किम्भूता?

४. शास्त्रदृष्टीनां लक्ष्मीः कीदृशी?

५. भ्रूविकारनाट्यानां श्रीः किंरूपा?

६. गुणकलहंसकानां लक्ष्मीः कीदृशी?

७. साधुभावस्य श्रीः कीदृशी?

८. राहुजिह्वा इव लक्ष्मीः कस्य नाशिका?

९. श्रीः किम्भूतापि विप्रलभते?

१०. लक्ष्मीः चिन्तितापि किं करोति?

पाठसारः

श्रियः कामये हि यतन्ते समे लोकाः। परन्तु तस्याः दुश्चरितम् अस्माभिः अवश्यमेव आदौ ज्ञेयम्। शुकनासः प्रस्तुतेऽस्मिन् तथाभूतायाः श्रियः स्वरूपं प्रकाशयति। बहुविधं चाञ्चल्यं मोहिनी शक्तिश्च अस्यां वर्तते। सा क्षणाभ्यन्तरे पुरुषात् पुरुषान्तरं व्रजति। सा पुरुषमेकं प्रीयमाणा पुरुषान्तरम् आलिङ्गति। कस्यापि समीपे चिराय न तिष्ठति। तिष्ठन्ती अपि सा दुःखेन रक्षणीया। बहुविधबलसहायेनापि तस्याः बन्धनम् असम्भवम्। तस्याः एवं मोहिनी शक्तिः यत् तस्याः प्रभावेण जनः स्वस्य परिचयं विस्मरति, कुलपरम्पराम् अन्यथाकरोति, स्वीयः आत्मीयः परकीयः इति प्रतीयते। अस्याः माहात्म्येन धर्मानुचरणं नश्यति, त्यागदयादाक्षिण्यादिसद्गुणाः विलीयन्ते, सत्यभाषणं कथामात्रावशेषं तिष्ठति। कदापि सा धनरत्नादिभिः समृद्धं करोति कदापि असिधारायां स्थित्वा समूलम् उन्मूलयति। अविश्वासनीया इयं लक्ष्मीः। गङ्गा इवेयं समस्तलोकानां जननी पालयित्री परन्तु जलबुद्बुदचञ्चला अर्थात् प्रतिपदम् अस्थिरा।

बलवन्तः धूर्ताः कपटाश्च तस्याः प्रियाः अप्रियाश्च सज्जनाः। हिडिम्बा यथा बलं वीक्ष्य भीमं वृतवती एवं यः साहसिकः तम् आत्मीयं करोति। प्रतिपदम् अन्यं पुरुषम् उन्मादयति तां ग्रहीतुम्। विद्यते च तस्याः विद्वेषः गुणवतः विदुषः प्रति। उदारचरितं सा अमङ्गलम् इव मन्यते, सज्जनम् अप्रयोजनमिति कृत्वा स्वीकरोति। पद्मस्य कण्टकं यथा अस्माभिः परिह्रियते एवं सापि वीरहृदयं पुरुषं कण्टकमिव परित्यजति। दुःस्वप्नः यथा अस्माभिः पुनः न इष्यते तथा ये दातारः वर्तन्ते न ते तया आद्रियन्ते।

अवर्णनीयेयं श्रीः। ऐन्द्रजालिकः यथा परस्परविरुद्धम् इन्द्रजालद्वारा दर्शयति एवम् इयमपि परस्परविरुद्धं विषयं युगपत् सम्बध्नाति। सा उन्नत्यै प्रचोदयति परन्तु सममेव आलस्यं दीर्घसूत्रतां निद्रादितमोगुणं जनयति। विषयभोगस्य आकाङ्क्षां निवारयितुं धनादिकं ददाति परन्तु पुनः प्राप्तये तृष्णामपि वर्धयति। श्रीविष्णौ रता परन्तु तां खलाः कपटाः प्रार्थयन्ति। अन्धकारप्रकोष्ठे दीपशिखा प्रज्वाल्यते चेत् सा तत्रस्थं वस्तु यथावभासयति श्रीः अपि स्वकीयं कुकर्म प्रकटयति।

विलक्षणस्वभावेयं लक्ष्मीः। पयस्सिञ्चनेन वृक्षस्य वर्धनं भवति। इयं विषयरूपान् विषवृक्षान् वर्धयन्ती जलधारा इव। धूमः यथा दर्पणम् आवृणोति एवम् इयमपि सज्जनानां चरितम् आवृणोति। धनमदलोलुपान् सा प्रबोधयति प्रबाधयति च शास्त्रविधिमनुसृत्य प्रवर्तितान्।

सतां नाशयित्री इयम्। यथा अकाले वृष्टिपतनेन राजहंसः म्रियते एवमेव अस्याः प्रभावेण गुणवन्तः नाशं प्राप्नुवन्ति। वेत्राघातैः यथा कस्यापि निःसरणं भवति, इत्थम् इयं वेदविहितव्यवहारान् अपसारयति। राहुजिह्वा यथा चन्द्रम् उदरीकरोति, इयमपि धर्मचन्द्रं लोपयति। गणिका यथा सर्वान् पुरुषान् प्रीणाति आलिङ्गति च परन्तु न कमपि परित्यजति एवमेव श्रीः अपि सर्वान् मोहयति न कमपि स्वमोहबन्धात् दूरं निक्षिपति।

श्रीः मनुष्यान् जाड्यमान्द्यादिगुणविशिष्टान् विदधाति। सा मानवान् प्रतिपदम् अधो पातयति। अतः अस्याः श्रियः सावधानं स्थेयम्। भोगवासनादिकं परित्यज्य राज्यस्य रक्षणं विधेयमिति मन्त्री उपदिशति पाठेऽस्मिन्।

पाठान्तप्रश्नाः

१. श्रियः उत्पत्तिरहस्यं वर्णयत।

२. श्रियः स्वभावं सविस्तारं प्रतिपादयत।

३. जगति श्रियः परस्परविरुद्धं चरितं सविस्तारं ग्रन्थमाधारीकृत्य प्रमाणीकुरुत।

४. लक्ष्म्याः असत्प्रियत्वं सद्द्वेष्यत्वञ्च प्रतिपादयत।

५. कान् प्रति लक्ष्म्याः स्नेहादरादिकं नास्ति वर्णयत।

६. श्रियः दुश्चरितं वर्णयत।

पाठगतप्रश्नोत्तराणि

१. लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यः रागं स्वीकृतवती।

२. श्रीः उच्चैःश्रवसः चञ्चलतां शिक्षितवती?

३. लक्ष्मीः कौस्तुभमणेः नैष्ठुर्यं ज्ञातवती?

४. मोहनशक्तिः श्रिया कालकूटात् शिक्षिता?

५. लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यः रागं गृहीत्वैवोद्गता।

६. आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्।

७. स्तम्भमेलनम् -

स्तम्भः - १	स्तम्भः - २
क) रागम्	पारिजातपल्लवेभ्यः
ख) वक्रताम्	इन्दुशकलात्
ग) चञ्चलताम्	उच्चैःश्रवसः
घ) मोहनशक्तिम्	कालकूटात्
ङ) मदम्	मदिरायाः
च) नैष्ठुर्यम्	कौस्तुभमणेः

८. कालकूटात् मोहनशक्तिम् इति सन्धिविच्छेदः।

९. लक्ष्मीः दुःखेन परिपाल्यते।

१०. पिञ्जरविधृतापि उपक्रामति।

११. श्रीः परिचयं न रक्षति।

१२. सम्पत् कुलक्रमं न अनुवर्तते।

१३. धर्मं न अनुरुध्यते।

१४. विशेषज्ञतां न विचारयति लक्ष्मीः।

१५. विविधगन्धगजगण्डमधुपानमत्ता इव परिस्खलति श्रीः।

१६. श्रिया विश्वरूपं ग्रहीतुं नारायणमूर्तिः आश्रिता।

१७. श्रीः पातालगुहा इव तमोबहुला।

१८. दुष्टपिशाची इव अपरपुरुषान् उन्मत्तीकरोति।

१९. स्तम्भमेलनम् -

स्तम्भः - १	**स्तम्भः - २**
क) न रक्षति	परिचयम्
ख) न ईक्षते	अभिजनम्
ग) न आलोकयते	रूपम्
घ) न अनुवर्तते	कुलक्रमम्
ङ) न पश्यति	शीलम्
च) न गणयति	वैदग्ध्यम्
छ) न आकर्णयति	श्रुतम्
ज) न अनुरुध्यते	धर्मम्
झ) न आद्रियते	त्यागम्
ञ) न विचारयति	विशेषज्ञताम्
ट) न पालयति	आचारम्
ठ) न प्रमाणीकरोति	लक्षणम्

२०. लक्ष्मीः सरस्वतीपरिगृहीतम् ईर्ष्यया नालिङ्गति।

२१. श्रीः उदारसत्त्वम् अमङ्गलमिव मन्यते।

२२. लक्ष्मीः सुजनम् अनिमित्तमिव न पश्यति।

२३. श्रीः गुणवन्तम् अपवित्रमिव न स्पृशति।

२४. लक्ष्मीः दातारं दुःस्वप्नमिव न स्मरति।

२५. श्रीः जगति परस्परविरुद्धं निजं चरितं दर्शयति।

२६. उन्नतिमादधानापि लक्ष्मीः नीचस्वभावताम् आविष्करोति।

२७. लक्ष्मीः अशिवप्रकृतित्वम् आतनोति।

२८. श्रीः खलजनानां प्रिया।

२९. दीपशिखा इव मलिनं कर्म उद्वमति।

३०. श्रीः तृष्णां वर्धयति।

३१. तृष्णाविषवल्लीनां श्रीः संवर्द्धनवारिधारा।

३२. सच्चरितचित्राणां लक्ष्मीः परामर्शधूमलेखा।

३३. महादीर्घनिद्राणां श्रीः विभ्रमशय्या।

३४. शास्त्रदृष्टीनां लक्ष्मीः तिमिरोद्गतिः?

३५. भ्रूविकारनाट्यानां श्रीः सङ्गीतशाला।

३६. गुणकलहंसकानां लक्ष्मीः अकालप्रावृट् इव।

३७. साधुभावस्य श्रीः वध्यशाला।

३८. राहुजिह्वा इव लक्ष्मीः धर्मेन्दुमण्डलस्य नाशिका।

३९. श्रीः उत्कीर्णा अपि विप्रलभते।

४०. लक्ष्मीः चिन्तितापि वञ्चयति।

॥ इति सप्तदशः पाठः ॥

348sk18

१८

शुकनासोपदेशः - लक्ष्मीदुष्प्रभावः- १

प्रस्तावना

अस्मिन् पाठे शुकनासोपदेशस्य 'एवंविधयापि चानया' इत्यतः आरभ्य 'सर्वजनस्योपहास्यतामुपयान्ति' इत्यन्तः अंशः वर्ण्यते। लोभः पापस्य कारणम्। दुर्लभा इयं श्रीः इति भावयन्तः राजानः प्रतिपदं तस्याः प्राप्तये यतन्ते। जीर्णवेगाः अपि ते भोगविलासम् अतिक्रामितुम् अलम्। तदुपरि दुर्जनैः सह साङ्गत्यं तान् ततोऽधिकं पातयति। सदुपदेशाग्राहिणां राज्ञां स्वार्थैकमनाः कुटिलाः मन्त्रिणः तान् अनैतिके कर्मणि प्रचोदयन्ति। ते परानुकरणपरस्त्रीगमनाद्यसदाचरणमेव सदाचरणमिति मन्यन्ते। तेन ते राजानः प्रजानां सुखदुःखादिकं न पश्यति परन्तु स्वेषामेव भोगसुखादिकं परिलक्षयन्ति। एवम्भूतेन आचरणेन ते विपद्गामिनः विपथगामिनश्च भवन्तीति मन्त्रिणः उपदेशः प्रतिपाद्यते प्रस्तुतेऽस्मिन् पाठे।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- राजसभायां स्थितानां कुटिलजनानां मनोभावनां ज्ञातुं शक्नुयात्।
- कुटिलाः कथं राजानं वशीकुर्वन्ति इति जानीयात्।
- खलवाक्यानाम् अनुसरणेन राज्ञां हानिं जानीयात्।
- विमूढानां राज्ञां खलानुसारेण गुरोरुपेक्षादिकं निन्दनीयं कर्म जानीयात्।
- पाठस्थानां पदानाम् अन्वयार्थान् समासान् च जानीयात्।

१८.१) साम्प्रतं मूलपाठम् अवगच्छाम–१०

एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथाहि अभिषेकसमय एष चैषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्य्यधूमेनेव मलिनीक्रियते हृदयम्, पुरोहितकुशाग्रसम्मार्जनीभिरिव अपनीयते क्षान्तिः, उष्णीषपट्टबन्धेनेवावच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापसार्य्यते परलोकदर्शनम्, चामरपवनैरिवापह्रियते सत्यवादिता, वेत्रदण्डैरिवोत्सार्य्यन्ते गुणाः, जयशब्दकलकलरवैरिव तिरस्क्रियन्ते साधुवादाः ध्वजपटपल्लवैरिव परामृश्यते यशः।

व्याख्यानम् -

एवंविधया एतादृशया पूर्वमनेकप्रकारैर्वर्णितया अपि दुराचारया दुष्टाचरणया अनया लक्ष्म्या कथमपि केनापि प्रकारेण महता कष्टेन दैववशेन भाग्यवशेन परिगृहीताः स्वीकृताः राजानः भूपाः विक्लवाः विह्वलाः भवन्ति, ते च सर्वाऽविनयाधिष्ठानतां सर्वेषां सकलानाम्, अविनयानां दुर्मतीनाम्, अधिष्ठानताम् आश्रयतां च, गच्छन्ति प्राप्नुवन्ति।

अभिषेकसमये राज्याऽभिषेककाले एव मङ्गलकलशजलैः भद्रकुम्भसलिलैः इव एतेषां राज्ञां दाक्षिण्यं सर्वत्र समवर्तित्वं प्रक्षाल्यते विनाश्यते। अग्निकार्यधूमेन अग्निकार्यं हवनादि तस्य धूमेन वह्निध्वजेन हृदयं राज्ञश्चित्तं मलिनीक्रियते इव कलुषीक्रियते इव। पुरोहितकुशाग्रसम्मार्जनीभिः पुरोहितस्य पुरोधसः कुशाग्राणि दर्भाग्राणि एव सम्मार्जन्यः ताभिः क्षान्तिः राज्ञां क्षमा अपह्रियते इव अपनीयते इव। उष्णीषपट्टबन्धेन इव उष्णीषस्य मुकुटस्य पट्टबन्धः क्षौमवस्त्रबन्धनं तेन जरागमनस्मरणं राज्ञां वार्द्धक्यागतेः, स्मरणं स्मृतिः, आच्छाद्यते आव्रियते इव।

आतपत्रमण्डलेन छत्रमण्डलेन परलोकदर्शनं राज्ञां लोकान्तरज्ञानम् अपसार्यते दूरीक्रियते इव, चामरपवनैः प्रकीर्णकवातैः सत्यवादिता राज्ञां तथ्यभाषकत्वम् अपह्रियते विनाश्यते इव। वेत्रदण्डैः वेतसयष्टिभिः गुणाः शौर्यधैर्यादयः उत्सार्यन्ते दूरीक्रियन्ते इव। साधुवादाः हितवचनानि जयशब्दकलकलरवैः जयशब्दस्य राज्ञां जयपदस्य कलकलरवैः कोलाहलशब्दैः तिरस्क्रयन्ते अभिभूयन्त इव। यशः कीर्तिः ध्वजपटपल्लवैः राज्ञां ध्वजपटाः वैजयन्तीवस्त्राणि पल्लवानि किशलयानि तैः परामृश्यते अपमृज्यते इव।

सरलार्थः -

इयं दुराचारिणी लक्ष्मीः यदि राजभिः कदापि दैवात् स्वीक्रियते तर्हि सर्वाः दुर्मतयः तान् आश्रयन्ति। तथाहि अभिषेकसमये मङ्गलकलशजलैः एषां राज्ञाम् उदारता प्रक्षाल्यते, हवनधूमेन चित्तं मलिनीक्रियते, पुरोहितस्य कुशाग्रभागरूपसम्मार्जन्या दयादाक्षिण्यक्षमासन्तोषादिगुणाः दूरीक्रियन्ते, मुकुटस्य पट्टबन्धनेन राज्ञां वार्धक्यगतेः स्मृतिः आच्छाद्यते, छत्रमण्डलेन तेषां परलोकज्ञानम् अपसार्यते, चामरैः सत्यकथनं निवर्त्यते, वेत्रदण्डैः धैर्यशौर्यादयः दूरं संस्थाप्यन्ते, जयशब्दादिकलरवैः हितवचनानि न श्रूयन्ते। यानि यशांसि नामानि राजस्तुतयः वर्तन्ते यथा राज्ञा इदं कार्यम्, इत्थं स्थेयम् इत्थमाचरणीयमित्यादीनि उत्तमराजचरितवर्णनरूपाः स्तुतयः यथा पत्रैः मलम् अपसार्यते तथैव राज्ञां ध्वजायाः वस्त्ररूपपत्रैः ते स्तुतयः अपसार्यन्ते। एवम्प्रकारेण लक्ष्मीः राजानं पीडयतीति शुकनासस्याशयः।

व्याकरणविमर्शः -

क) समासः

१. उष्णीषपट्टबन्धेन - उष्णीषस्य पट्टबन्धः उष्णीषपट्टबन्धः इति षष्ठीतत्पुरुषसमासः, तेन उष्णीषपट्टबन्धेन इति।

२. चामरपवनैः - चामरस्य पवनैः चामरपवनैः इति षष्ठीतत्पुरुषः।

३. जयशब्दकलकलरवैः - जयशब्दस्य कलकलरवाः जयकलकलरवाः इति षष्ठीतत्पुरुषः, तैः जयशब्दकलकलरवैः इति।

ख) सन्धिविच्छेदः

१. मङ्गलकलशजलैरिव – मङ्गलकलसजलैः इव।

२. सम्मार्जनीभिरिवापह्रियते - सम्मार्जनीभिः इव अपह्रियते।

३. उष्णीषपट्टबन्धेनेवावच्छाद्यते - उष्णीषपट्टबन्धेन इव अवच्छाद्यते।

अलङ्कारविमर्शः

१. एवंविधया इत्यस्मिन् वाक्ये कार्यद्वारा लक्ष्म्यां पिशाचीत्वसमावेशात् समासोक्तिः अलङ्कारः।

२. अभिषेकसमये इत्यतः परामृश्यते इव इत्यस्मिन् वाक्ये प्रक्षालनादिक्रियाणाम् उत्प्रेक्षणात् क्रियोत्प्रेक्षालङ्कारः।

३. पुरोहितकुशाग्रसम्मार्जनीभिः इत्यस्मिन् वाक्ये पुरोहितकुशाग्रादीनां सम्मार्जन्यादिभिः अभेदप्रतिपादनाद् रूपकालङ्कारः। एवमत्र वाक्ये रूपकोत्प्रेक्षयोः सङ्करः।

कोशः

१. "हैमं छत्रं त्वातपत्रम्" इत्यमरवचनात् हैमम्, छत्रम्, आतपत्रम् इत्येते समार्थकाः शब्दाः।

२. "पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्" इत्यमरवचनात् पताका, वैजयन्ती, केतनम्, ध्वजम् इत्येते समार्थकाः शब्दाः।

३. "कलशस्तु त्रिषु द्वयोः। घटः कुटनिपावस्त्री" इत्यमरवचनात् कलशः, घटः, कुटः, निपः इत्येते समार्थकाः।

पाठगतप्रश्नाः-१

१. दुराचारया लक्ष्म्या परिगृहीताः राजानः कीदृशाः भवन्ति?

२. अभिषेककाले केन इव राज्ञां दाक्षिण्यं प्रक्षाल्यते?

३. तेषां राज्ञां हृदयं केन मलिनीभवति?

४. राज्ञां क्षमागुणः केन अपसार्यते?

५. अभिषेकसमये राज्ञां वार्धक्यबुद्धिः केन दूरीभवति?

६. राज्ञां यशः अभिषेककाले केन परिमार्ज्यते?

१८.२) साम्प्रतं मूलपाठम् अवगच्छाम - ११

केचिच्छ्रम–वश–शिथिल–शकुनि–गल–पुट–चपलाभिः खद्योतोन्मेष–मुहूर्त–मनोहराभिर्मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमानाः, धन–लवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन दुष्टासृजेव रागावेशेन बाध्यमानाः, विविधविषय–ग्रास–लालसैः पञ्चभिरप्यनेकसहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि सहस्रतामिवोपगतेन मनसा आकुलीक्रियमाणा विह्वलतामुपयान्ति। ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते। मदनशरैर्मर्म्माहिता इव मुखभङ्गसहस्राणि कुर्वते, धनोष्मणा पच्यमाना इव विचेष्टन्ते, गाढप्रहाराहता इवाङ्गानि न धारयन्ति, कुलीरा इव तिर्य्यक् परिभ्रमन्ति, अधर्म्म–भग्नगतयः पङ्गव इव परेण सञ्चार्य्यन्ते, मृषावाद–विष–विपाक–सञ्जात–मुखरोगा इवातिकृच्छ्रेण जल्पन्ति, सप्तच्छद–तरव इव कुसुमरजोविकारैः पार्श्ववर्तिनां शिरःशूलमुत्पादयन्ति, आसन्नमृत्यव इव बन्धुजनम् अपि नाभिजानन्ति, उत्कुपित–लोचना इव तेजस्विनो नेक्षन्ते, कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषाभरणानीव सोष्माणं न सहन्ते, दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता न गृह्णन्त्युपदेशम्, तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति, इषव इव पानवर्द्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति, दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति, अकालकुसुमप्रसवा इव मनोहरकृतयोऽपि लोकविनाशहेतवः, श्मशानाग्नय इवातिरौद्रभूतयः, तैमिरिका इवादूरदर्शिनः, उपसृष्टा इव क्षुद्राधिष्ठितभवनाः, श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति, चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति, अनुदिवसमापूर्य्यमाणाः पापेनेवाध्मातमूर्त्तयो भवन्ति, तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थिताः जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

व्याख्यानम् -

केचिद् इत्यस्य विह्वलतामुपयान्ति इत्यन्तेन भागेन सह सम्बन्धः। केचिद् राजानः श्रम-वश-शिथिल-शकुनि-गल-पुट-चपलाभिः श्रमवशाद् आयासहेतोः शिथिलं श्लथं शकुनेः मयूरादिविहगस्य यत् गलपुटं कण्ठपुटं तद्वत् चपलाभिः चञ्चलाभिः, खद्योतोन्मेष-मुहूर्त-मनोहराभिर्मनस्विजनगर्हिताभिः खद्योतः ज्योतिरिङ्गणः तस्य उन्मेषः प्रकाशः स इव मुहूर्तं मनोहारिणीभिः चित्तहारिणीभिः मनस्विजनगर्हिताभिः ज्ञानिजननिन्दिताभिः सम्पद्भिः धनसम्पत्तिभिः प्रलोभ्यमानाः लोभं प्राप्यमाणाः विह्वलतां विक्लवताम् उपयान्ति उपगच्छन्तीति अन्वयः।

एवमेव केचिद् राजानः धनलवलाभावलेपविस्मृतजन्मानः धनलवस्य द्रव्यलेशस्य यो लाभः प्राप्तिः तेन यः अवलेपः अहङ्कारः, तेन विस्मृत विस्मरणं प्राप्तं जन्म जनुः येषां ते अत्यल्पधनावाप्त्यहङ्कारविस्मृतजनवः अनेकदोषोपचितेन अनेकदोषैः वातकफविकारैः उपचितेन वृद्धिं

प्राप्तेन दुष्टासृजा दुष्टेन रक्तेन यथा बाध्यमानाः पीड्यमानाः जनाः इव तथा रागावेशेन कामक्रोधादिना बाध्यमानाः पीड्यमाना विह्वलताम् उपयान्तीति अन्वयः।

विविधविषय-ग्रास-लालसैः विविधा अनेकप्रकारा ये विषयाः शब्दस्पर्शादयः तेषाम् उपभोगे लालसैः लोलुपैः पञ्चभिः पञ्चसंख्यकैः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यैः इन्द्रियैः अपि अनेकसहस्रसंख्यैः विषयाणां बहुत्वाद् बहुसंख्यकैः इव इन्द्रियैः हृषीकैः आयास्यमानाः परिपीड्यमानाः केचिद् राजानः विह्वलताम् उपयान्ति इत्यन्वयः।

प्रकृतिचञ्चलतया प्रकृत्या स्वभावेन एव चञ्चलता चपलतया लब्धप्रसरेण प्राप्तावकाशेन एकेनापि एकसंख्यकेन अपि सहस्रता इव सहस्रभावम् इव उपगतेन प्राप्तेन मनसा चित्तेन आकुलीक्रियमाणाः व्यग्रीक्रियमाणाः सन्तः केचिद् राजानः विह्वलतां विक्लवताम् उपयान्ति उपगच्छन्ति।

राज्ञाम् अवस्थान्तराणि प्रतिपादयति कविः – ग्रहैरेव इव इति। केचिद् राजानः ग्रहैः शनैश्चरादिभिः गृह्यन्ते इव अनेकविकारावलोकनाद् आकृष्यन्ते इव, भूतैः देवयोनिविशेषैः अभिभूयन्ते इव तिरस्क्रियन्ते इव, मन्त्रैः वैदिकैः तान्त्रिकैर्वा आवेश्यन्ते इव वशीक्रियन्ते इव, सत्त्वैः शार्दूलप्रभृतिभिः हिंस्रप्राणिभिः वेदनावगमाद् अवष्टभ्यन्ते इव हठाद् गृह्यन्ते इव, वायुना वातव्याधिना विडम्ब्यन्ते इव इतस्ततो विक्षिप्यन्ते इव, पिशाचैः राक्षसादिभिः ग्रस्यते इव भक्ष्यन्त इव।

एवमेव राज्ञां स्थित्यन्तराणि वर्णयति - मदनेति। मदनशरैः कामबाणैः मर्म्माहता इव सन्धिस्थानेषु ताडिता इव मुखभङ्गसहस्राणि विवधप्रकारान् मुखभङ्गीन् कुर्वते विदधते, धनोष्मणा अर्थाभिमानसन्तापेन पच्यमानाः पाकविषयीक्रियमाणाः इव विचेष्टन्ते अनेकव्यापारान् कुर्वते, गाढप्रहाराहताः इव गाढप्रहारेण यष्ट्यादिकृतेन तीव्रीघातेन आहता ताडिता दृढाघाततताडिताः इव अङ्गानि कायस्य अवयवान् हस्तपादादीन् न धारयन्ति न दृढं स्वयं वहन्ति केचिद् राजानः इत्यन्वयः।

कुलीराः कर्कटाः इव तिर्यक् कुटिलं परिभ्रमन्ति परिभ्रमणं कुर्वन्ति। अर्थाद् व्यवहारे कौटिल्यमाचरन्ति। अधर्म्मभग्नगतयः अधर्म्मेण पापाचारेण भग्ना विनाशं सम्प्राप्ता गतिः गमनं येषां ते तादृशाः सन्तः पङ्गवः पादेन खञ्जाः इव परेण अन्यजनेन सचिवादिना सञ्चार्यन्ते राजशासने प्रवर्त्यन्ते। पङ्गुपक्षे अधर्म्मगतयः इत्यस्य पापेन विनष्टगमनसामर्थ्याः इति, सञ्चार्यन्ते इत्यस्य च मित्रेण करग्रहणादिना गमनं कार्यन्ते इत्यर्थः। मृषावाद-विष-विपाक-सञ्जात-मुखरोगा मृषावादविपाकेन असत्यभाषण-परिणामेन सञ्जातः समुत्पन्नः मुखरोगः वदनव्याधिः येषां ते, तादृशा इव अतिकृच्छ्रेण अतिशयेन कष्टेन जल्पन्ति भाषन्ते। सप्तच्छदतरव इव सप्तपर्णवृक्षाः इव कुसुमरजोविकारैः पुष्परागविकृतिभिः राजपक्षे कुसुमानि नेत्ररोगाः ते एव रजोविकाराः रजोगुणपरिणामाः तैः पार्श्ववर्तिनां सन्निकृष्टानां जनानां शिरःशूलं मस्तकपीडाम् उत्पादयन्ति जनयन्ति। अर्थात् सप्तपर्णद्रुमा यथा पुष्परागविकारैः शिरःपीडां कारयन्ति तथैव केचिद् राजानः दुर्व्यवहारैः समीपस्थानां शिरःपीडां विदधति इति तात्पर्यम्।

आसन्नमृत्यव इव आसन्नः समीपवर्ती मृत्युः मरणं येषां तादृशा समासन्नमरणा इव बन्धुजनम् अपि स्वजनम् अपि न अभिजानन्ति न स्मरन्ति। आसन्नमृत्युजनपक्षे बुद्धिलोपात् स्वजनज्ञानं न भवति राजपक्षे अहङ्कारात् स्वजनज्ञानं न भवति।

उत्कुपितलोचना इव उत्कुपिते रुग्णे लोचने नयने येषां ते रुग्णनयनाः इव राजानः तेजस्विनः प्रतापवतः जनान् न ईक्षन्ते न पश्यन्ति। यथा नेत्ररोगो यस्यास्ति स जनः तेजस्विनः सूर्यादीन् न द्रष्टुं समर्थो भवति, तथा एते राजानः अहङ्कारवशात् ईर्ष्यया वा तेजस्विनः पुरषान् न पश्यन्ति। कालदष्टाः इव कालेन महाविषभुजङ्गमेन दष्टा लोका इव महामन्त्रैः षाड्गुण्यादिभिः अपि न प्रतिबुध्यन्ते बोधं न प्राप्नुवन्ति। यथा कालसर्पेण दष्टा जना गारुडादिमहामन्त्रैः प्रबोधं न यान्ति तथैव महाकालेन दष्टा षाङ्गुण्यादिविषयैर्महामन्त्रैरपि बोधं न प्राप्नुवन्तीति तात्पर्यम्।

केचिद् राजानः जातुषाभरणानि लाक्षानिर्मितभूषणानि इव सोष्माणम् अग्निम् इव प्रतापशालिनं न सहन्ते नो मृष्यन्ति। यथा लाक्षानिर्मितानि द्रव्याणि अग्निसन्निधौ न तिष्ठन्ति द्रवीभावं गच्छन्ति तथैव राजानः अपि सोष्माणम् प्रतापवन्तं जनम् ईर्ष्यया न सहन्ते।

दुष्टवारणाः मन्दोन्मत्तगजाः इव महामानस्तम्भनिश्चलीकृताः महत् विशालम् मानं प्रमाणं यस्य सः तादृशो यः स्तम्भः आलानस्तम्भः तेन निश्चलीकृताः स्तब्धतां प्रापिताः सन्तः केचिद् राजानः उपदेशं हितैषिणाम् उपदिष्टं न गृह्णन्ति न स्वीकुर्वन्ति। अत्र महामानस्तम्भनिश्चली इति पदस्य राजपक्षे अर्थस्तावत् - महान् प्रचुरः मानः अहङ्कारः स एव स्तम्भः, तेन निश्चलीकृताः स्थिरीकृताः सन्तः इति। यथा मत्ता हस्तिनः हस्तिपकवचनं शृण्वन्ति तथैव राजानोऽपि हितैषिवचनं न गृह्णति।

तृष्णाविषमूर्च्छिताः तृष्णा अर्थस्पृहा इव विषं गरलं तेन मूर्च्छिताः मूर्च्छां प्राप्ताः इव राजानः सर्वं सकलं पदार्थं कनकमयं सुवर्णमयम् इव पश्यन्ति विलोकयन्ति।

इषवः बाणाः इव पानवर्द्धिततैक्ष्ण्याः पानेन मदिरासेवनेन वर्द्धितं वृद्धिं प्राप्तं तैक्ष्ण्यम् उग्रता येषां ते सुरासेवनवर्द्धितोग्रभावाः परप्रेरिताः परेण अन्येन प्रेरिताः प्रोत्साहताः सन्त विनाशयन्ति प्रजादीन् पीडयन्ति। परप्रेरिता इति पदस्य इषुपक्षे कामुकप्रेरिताः इति राजपक्षे धूर्तप्रोत्साहिताः सन्तः इत्यर्थः, एवमेव विनाशयन्ति इति पदस्य इषुपक्षे लक्ष्याणि नाशयन्ति इति राजपक्षे च प्रजादीन् पीडयन्ति इत्यर्थः।

दण्डविक्षेपैः यष्टिप्रहारैः दूरस्थितानि फलानि दूरे विद्यमानानि फलानि इव राजानः दण्डविक्षेपैः सामादिप्रयोगैः महाकुलानि प्रशस्तान् वंशान् शातयन्ति पीडयन्ति। शातयन्तीत्यस्य फलपक्षे पातयन्तीत्यर्थः।

राजानः अकाले अनवसरे कुसुमप्रसवाः इव पुष्पोद्गमाः इव मनोहरकृतयः सुन्दराकाराः अपि लोकविनाशहेतवः जनक्षयकारणभूताः, श्मशानाग्नयः इव प्रेतवनानलाः इव अतिरौद्रभूतयः अतिरौद्राः अत्यन्तभीषणाः भूतयः सम्पदः येषां ते तादृशाः, तैमिरिका इव तिमिरसंज्ञकेन नेत्ररोगेण आकान्ता इव अदूरदर्शिनः भाविदोषानवलोकिनः, उपसृष्टा इव उत्पादयुक्ता जना इव क्षुद्राधिष्ठितभवनाः क्षुद्रैः नीचजनैः अधिष्ठितम् आश्रितं भवनं निवसस्थानं येषां ते तादृशाः भवन्ति।

श्रूयमाणाः अपि आकर्ण्यमानसंज्ञका अपि प्रेतपटहाः मृतौ वाद्यमानढक्काशब्दा इव उद्वेजयन्ति उद्वेगं जनयन्ति। मृतशरीराणां पुरस्तात् पटहा इति वाद्यविशेषस्य वादनं भवति।

चिन्त्यमानाः अपि संयोगादौ का कथा चेतसि स्मर्यमाणाः अपि महापातकाध्यवसाया महापातकानां ब्रह्महत्यादीनाम् अध्यवसाया उद्योगा इव उपद्रवं चित्तस्य अशान्तिम् उपजनयन्ति उत्पादयन्ति।

राजानः अनुदिवसम् प्रतिदिनम् पापेन कल्मषेण आपूर्य्यमाणाः संभ्रियमाणाः इव आध्मातमूर्त्तयः स्फीतशरीरा भवन्ति।

तदवस्थाश्च ताः पूर्वोक्ताः अवस्थाः दशाः येषां ते तादृशाः, व्यसनशतशरव्यतां व्यसनस्य मृगयाक्षादिबहूलव्यसनस्य शरव्यतां लक्ष्यताम् उपगताः प्राप्ताः, वल्मीकतृणाग्रावस्थिताः वल्मीकं पिपीलिकादिकृतमृत्पुञ्जं तत्र तृणाग्रे तृणाग्रभागे अवस्थिताः विद्यमानाः स्थिताः जलबिन्दवः सलिलबिन्दव इव, पतितम् भ्रष्टम् अपि आत्मानं स्वं न अवगच्छन्ति नो जानन्ति। यथा वल्मीकतृणाग्राभागे अवस्थिता जलबिन्दवः अचेतनत्वात् पतितमात्मानं नावगच्छन्ति तथैव मृगयाक्षाद्यनेकव्यसनासक्ताः राजानः स्वकर्मविच्युतमपि आत्मानं न जानन्तीति भावः।

सरलार्थः -

परिश्रमवशात् पक्षिणः शिथिलीभूतस्य गलदेशस्य इव तथा खद्योतस्य प्रकाशः इव क्षणिकसुन्दरदर्शना इयं सम्पद्। अत एव ज्ञानिभिः निन्दितया एतया सम्पदा प्रलुब्धाः सन्तः केचन राजानः तु ज्ञानिनां निन्दाभाजनाः भवन्ति। एते किञ्चिद्धनलाभस्य अहङ्कारेण स्वस्वजन्मवृतान्तं विस्मरन्ति। वात-पित्त-कफैः दूषितं रुधिरमिव बहुविधैः दोषैः वर्धितां विषयासक्तियन्त्रणां भुञ्जन्ते। शब्दस्पर्शादिविषयाणां ग्रहणे लोलुपैः विषयाणां बाहुल्यात् सहस्रसंख्यकैः इन्द्रियैः कष्टम् अनुभवन्ति। प्रकृत्या मनः विविधेषु विषयेषु प्रधावति। अत एकमपि मनः सहस्रत्वेन प्रतीयते। तेनापि मनसा राजानः चञ्चलताम् उपयन्ति। ते च राजानः पुनः दुष्टग्रहैः आविष्टाः इव, प्रेतैः गृहीताः इव, मन्त्रशक्तिभिः वशीभूताः इव, वन्यपशुभिः आक्रान्ताः इव, पिशाचग्रस्ताः इव च दृश्यन्ते। ते वदनानि वक्रीकुर्वन्ति कामदेवस्य कुसुमशरैः प्रतिहताः इव, आचरन्ति धनस्य अहङ्काररूपाग्निना पच्यमाना इव, कर्कटवत् कौटिल्यं व्यवहरन्ति। पापेन कर्तव्यमार्गम् अनुसर्तुं शक्तिः राज्ञां विनष्टा भवति। तस्मात् ते राजानः खञ्जवत् अन्यैः परिचाल्यन्ते। मृषाकथनरूपस्य अभ्यासस्य विषेण विकृतमुखाः ते कष्टेन कथयन्ति। सप्तच्छदपुष्पाणां रजःस्पर्शेन यथा शिरोवेदना समुत्पद्यते तथैव तेषां रजोगुणसम्भूतं रक्तनयनयुगलं प्रजानां दुःखं समुत्पादयति। ते भूपाः मुमूर्षवः इव बान्धवान् न परिचिन्वन्ति, अक्षिरोगैः आक्रान्ताः इव ते प्रताववतः जनान् न पश्यन्ति, कालसर्पेण दष्टाः यथा विषवैद्यस्य उत्कृष्टैः महामन्त्रैः अपि चैतन्यं न प्राप्नुवन्ति, तथैव ते राजानः उत्कृष्टमन्त्रणाभिः अपि स्वविधेयम् न अनुजानन्ति, लाक्षानिर्मिताभूषणानि इव अन्यप्रतापं न सहन्ते, स्तम्भबद्धगजाः इव हितोक्तिम् अपि न आकर्णयन्ति।

धनलिप्सारूपविषेण मूर्च्छिताः ते सर्वम् एव धनमयम् इति पश्यन्ति। प्रस्तरैः शाणिताः बाणाः यथा धनुर्मुक्ताः सन्तः निर्दिष्टं लक्ष्यं भिनत्ति, तथैव सुरासेवनेन वर्धितोग्रस्वभावाः राजानः अन्येन प्रेरिताः

सन्तः प्रजाः पीडयन्ति। यष्टिनिक्षेपेण फलाहरणवत् दूरस्थितान् सद्वंशजान् अपि नाशयन्ति। अकालविकसितानि मनोहराणि पुष्पाणि यथा सुन्दराणि सन्त्यपि जनानां विनाशं सूचयन्ति। तथैव मनोरमाकृतयस्ते राजानः जनानां विनाशस्य कारणानि भवन्ति। श्मशानस्थस्य अग्नेः भस्मवत् अत्यन्तं भयङ्कराः भवन्ति राज्ञां सम्पत्तयः। नेत्ररोगाक्रान्ताः यथा दूरस्थं वस्तु द्रष्टुं न शक्नुवन्ति तथैव राजानः कृतस्य परिणामं द्रष्टुं न पारयन्ति। राजभवनं तावत् कामुकानां वारवनितागृहम् इव नीचस्वभावानां सदनम्। मृतव्यक्तेः दाहकालीनस्य ढक्कानादस्य इव राजगणस्य नामानि श्रुत्वापि उद्वेगः जन्यते। ब्रह्महत्यादिरूपाणां पापानुष्ठानानाम् उद्योगवत् तस्य ध्यानमात्रेणैव मनसि अशान्तिः उत्पद्यते। मन्ये पापेन प्रतिदिनं पूर्यमाणाः राजानः स्फीतशरीराः भवन्ति। तदवस्थायां कामादिदोषैः दुष्टास्ते वल्मीकमृत्तिकया उत्पन्नानां तृणानाम् अग्रपतितजलविन्दुवत् आत्मनां पतनमपि बोद्धुं समर्थाः न भवन्ति।

व्याकरणविमर्शः -

क) समासः -

१. धनलवलाभावलेपविस्मृतजन्मानः - धनस्य लवः धनलवः इति षष्ठीतत्पुरुषः। धनलवस्य लाभः धनलवलाभः इति षष्ठीतत्पुरुषः। धनलवलाभेन अवलेपः धनलवलाभावलेपः इति तृतीयातत्पुरुषः। तेन विस्मृतं धनलवलाभावलेपविस्मृतम् इति तृतीयातत्पुरुषः। धनलवलाभावलेपविस्मृतं जन्म येषां ते धनलवलाभावलेपविस्मृतजन्मानः इति बहुव्रीहिसमासः।

२. उत्कुपितलोचनाः- उत्कुपिते लोचने येषां ते उत्कुपितलोचनाः इति बहुव्रीहिसमासः।

३. मृषावादविषविपाकसञ्जातमुखरोगाः - मृषावाद एव विषम् मृषावादविषम् इति कर्मधारयसमासः। तस्य विपाकः मृषावादविषविपाकः इति षष्ठीतत्पुरुषः। मृषावादविषविपाकेन सञ्जातः मृषावादविषविपाकसञ्जातः इति तृतीयातत्पुरुषः। मृषावादविपाकसञ्जातः मुखरोगः येषां ते मृषावादविषविपाकसञ्जातमुखरोगाः इति बहुव्रीहिसमासः।

४. महामानस्तम्भनिश्चलीकृताः - महत् मानं यस्य स महामानः इति बहुव्रीहिः। महामान एव स्तम्भः महामानस्तम्भः इति कर्मधारयः। महामानस्तम्भेन निश्चलीकृताः महामानस्तम्भनिश्चलीकृताः इति तृतीयातत्पुरुषः।

ख) सन्धिविच्छेदः

१. पञ्चभिरप्यनेकैः - पञ्चभिः अपि अनेकैः।

२. भूतैरिवाभिभूयन्ते - भूतैः इव अभिभूयन्ते।

३. मन्त्रैरिवावेश्यन्ते - मन्त्रैः इव आवेश्यन्ते।

४. सहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः - सहस्रसंख्यैः इव इन्द्रियैः आयास्यमानाः।

अलङ्कारविमर्शः

१. धनलाभेत्यस्माद् बाध्यमानाः इत्यंशभूते वाक्ये दूषितरक्तेन उपमानेन सह रागावेशस्य अवैधर्म्यस्य साम्यस्य कथनाद् उपमालङ्कारः। अत्र उपमानम् , उपमेयम्, साधारणधर्मः सादृश्यवाचकः इत्यंशचतुष्कस्य सत्त्वात् पूर्णोपमा। तल्लक्षणं दर्पणे -

"सा पूर्णा सामान्यधर्म औपम्यवाचि च।

उपमेयं चोपमानं भवेद्वाच्यम्" इति।

२. विविधेतीत्यारभ्य आयास्यमानाः इत्यन्ते वाक्ये गुणस्य सम्भावनाद् गुणोत्प्रेक्षालङ्कारः।

३. एवमेव प्रकृतीतीत्यस्मिन् वाक्ये, मन्त्रैरित्यस्मिन् वाक्ये, मदनशरैरित्यस्मिन् वाक्ये च उत्प्रेक्षालङ्कारः।

४. कुलीराः इत्यस्मिन् वाक्ये, अधर्मभग्नगतयः इत्यस्मिन् वाक्ये च उपमानोपमेययोः अवैधर्म्यस्य साम्यस्य कथनाद् अंशचतुष्कस्य सत्त्वाच्च पूर्णोपमालङ्कारः।

५. मृषावादविषविपाकसञ्जातमुखरोगाः इत्यत्र मृषावाद एव विषमिति निरङ्गं रूपकम्।

६. उत्कुपितलोचनाः इत्यस्मिन् वाक्ये उपमाऽलङ्कारः।

७. कालदष्टाः इत्यस्मिन् वाक्ये उपमाकाव्यलिङ्गयोस्तिलतण्डुलन्यायेन संसृष्टिरलङ्कारः।

८. तृष्णाविषमूर्च्छिताः इत्यस्मिन् वाक्ये रूपकोत्प्रेक्षयोरङ्गाङ्गिभावेन संकरः।

९. इषव इत्यस्मिन् वाक्ये, दूरस्थितानीत्यस्मिन् वाक्ये, अकालेतीत्यस्मिन् वाक्ये, श्मशानाग्नयः इत्यस्मिन् वाक्ये उपमाऽलङ्कारः, तैमिरिका इत्यस्मिन् वाक्ये, उपसृष्टा इत्यम्मिन् वाक्ये, श्रूयमाणा इत्यस्मिन वाक्ये, चिन्त्यमाना इत्यस्मिन् वाक्ये अनुदिवसमित्यस्मिन् च उपमाऽलङ्कारः।

कोशः

१. "कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः" इति मेदिन्युक्तेः कुसुमशब्दस्य स्त्रीरजः, नेत्ररोगः, फलम्, पुष्पम् इत्येतेषु अर्थेषु व्यवहारो भवति।

२. "भूतिर्भस्मनि सम्पत्तिहस्तिशृङ्गारयोः स्त्रियाम्" इति मेदिनीकोशाद् भूतिशब्दस्य सम्पत्तिः हस्तिशृङ्गारम् इत्यनयोः अर्थयोः प्रयोगः।

पाठगतप्रश्नाः- २

७. क्षणस्थायिन्या सम्पदा लुब्धाः राजानः केषां निन्दाभाजनानि भवन्ति?

८. राज्ञां तेषाम् इन्द्रियाणाम् आधिक्यस्य कारणं किम्?

९. मनः कथं विविधेषु विषयेषु प्रधावति?

१०. मदनशरैः प्रतिहताः ते राजानः किं कुर्वन्ति?

११. राजानः किमिव वक्रगत्या व्रजन्ति?

१२. मुमूर्षूवत् ते राजानः किं परिचेतुम् असमर्थाः भवन्ति?

१३. राजसम्पत्तिः कीदृशी भवति?

१४. ते राजानः किमिव प्रजानां शिरोवेदनां जनयन्ति?

१८.३) साम्प्रतं मूलपाठम् अवगच्छाम – १२

अपरे तु स्वार्थनिष्पादनपरैर्धन–पिशित–ग्रास–गृध्रैरास्थाननलिनीबकैः, द्युतं विनोद इति, परादाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्य्यमिति, स्वदारपरित्यागोऽव्यसनितेति, गुरुवचनावधीरणम् अपरप्रणेयत्वमिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्य–गीत–वाद्य–वेश्याभिसक्ती रसिकतेति, महापराधाकर्णनं महानुभावतेति, पराभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति, देवावमाननं महासत्त्वतेति, वन्दितजनख्यातिर्यश इति, तरलता उत्साह इति, अविशेषज्ञता अपक्षपातित्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्त्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्य्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया तथैवेत्यन्यारोपितालीकाभिमाना मर्त्यधर्म्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्य उपहास्यतामुपयान्ति।

व्याख्यानम् -

अपरे तु दोषान् अपि गुणपक्षम् अध्यारोपयद्भिः धूर्तैः अमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यताम् उपयान्तीति मूलवाक्यस्यान्वयः। अत्र धूर्तैः इत्यस्य स्वार्थनिष्पादनपरैः, धनपिशितग्रासगृध्रैः, आस्थाननलिनीबकैः, दोषान् अपि गुणपक्षमध्यारोपयद्भिः, अन्तः स्वयमपि विहसद्भिः, प्रतारणकुशलैः इत्येतानि षड् विशेषणानि सन्ति। एवं वाक्यस्य धूर्तविशेषणसंयोगेन आकारो भवति - अपरे तु स्वार्थनिष्पादनपरैः, धनपिशितग्रासगृध्रैः, आस्थाननलिनीबकैः, गुणपक्षमध्यारोपयद्भिः, अन्तः स्वयमपि विहसद्भिः, प्रतारणकुशलैः, धूर्तैः अमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यताम् उपयान्ति इति।

अपरे इत्यस्य प्रतार्यमाणाः, वित्तमदमत्तचित्ताः, निश्चेतनतया तथैव इत्यन्यारोपितालीकाभिमानाः मर्त्यधर्माणः, दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषम् आत्मानमुत्प्रेक्षमाणाः, प्रारब्धदिव्योचितचेष्टानुभावाः इत्येतानि पञ्च विशेषणानि। एवं धूर्तैः इत्यस्य अपरे इत्यस्य विशेषणानां संयोजनेन जातस्य वाक्यस्यान्वयार्थः तावत् - अपरे तु अन्ये राजानः तु स्वार्थनिष्पादनपरैः स्वार्थस्य निजप्रयोजनस्य यत् निष्पादनम् साधनं वञ्चनादिकं तत्परैः स्वार्थनिष्पादकवञ्चनादिपरैः, धनपिशितग्रासगृध्रैः धनं द्रव्यं तदेव पिशितं मांसं तस्य ग्रासे भक्षणे गृध्रैः दूरदृष्टिभिः विहगविशेषैः इव, आस्थाननलिनीबकैः आस्थानं राजसभामण्डपः, एव नलिनी कमलिनी

तस्यां बकैः कङ्कैः, यथा बका नलिनीमवलम्ब्य तिरोहिता भूत्वा मीनान् भक्षयन्ति तथैव बकव्रतिका धूर्ता अपि राजानमाश्रित्य लोकान्प्रतार्य तदीयं धनमात्मसात्कुर्वन्तीति भावः। दोषान् अपि अपराधान् अपि गुणपक्षम् गुणत्वेन आरोपयद्भिः प्रशंसद्भिः, अन्तः अन्तःकरणेषु स्वयमपि आत्मना अपि विहसद्भिः हासं कुर्वद्भिः, प्रतारणकुशलैः वञ्चननिपुणैः, धूर्तैः प्रतारकैः अमानुषोचिताभिः देवयोग्याभिः स्तुतिभिः प्रशंसावाग्भिः प्रतार्यमाणाः वञ्च्यमानाः वित्तमदमत्तचित्ताः वित्तमदेन धनगर्वेण मत्तम् उन्मत्तं चित्तं मानसं येषां ते धनगर्वोन्मत्तमानसाः, निश्चेतनतया बुद्धिजाड्यात् तथैव 'एते यथा वदन्ति तथा एव अहम् अस्मि' इति एवम्प्रकारेण अन्यारोपितालीकाभिमानाः अन्येन आरोपितः अध्यस्तः अलीकाभिमानः असत्यमदः येषां ते अन्याध्यस्तासत्यमदाः, मर्त्यधर्माणः मरणशीलाः सन्तः अपि दिव्यांशावतीर्णम् इव अलौकिकदेवांशसम्भूतम् इव सदैवतम् इव देवताश्रितम् इव अतिमानुषम् मानवमतिक्रम्य वर्तमानम् आत्मानं स्वम् उत्प्रेक्षमाणाः सम्भावयन्तः, प्रारब्धदिव्योचितचेष्टानुभावाः प्रारब्धाः समारब्धाः दिव्योचिताः देवयोग्याः चेष्टानुभावाः शापमात्रेण अरिप्रणाशादिप्रभावाः यैस्ते सर्वजनस्य सकललोकस्य उपहास्यताम् उपहासविषयताम् उपयान्ति प्राप्नुवन्ति।

इति दोषानपि गुणपक्षमध्यारोपयद्भिः इत्यत्र दोषाणां वर्णनमस्ति। अत्र षोडश दोषाः वर्णिताः। दोषप्रतिपादकांशस्य व्याख्यानं तावद् - द्यूतं दुरोदरम् अक्षक्रीडा विनोद क्रीडासाधनम् इति, परादाराभिगमनं परदाराणाम् अन्यभार्याणाम् अभिगमनं सङ्गमः वैदग्ध्यं रसिकत्वम् इति, मृगया आखेटः श्रमः व्यायामः इति, पानं सुरापानं विलास विलमनम् इति, प्रमत्तता उन्मादना शौर्य्यं शूरस्वभावः इति, स्वदारपरित्यागः निजपत्नीत्यागः अव्यसनिता व्यसनाभावः इति, गुरुवचनावधीरणम् गुरवचनस्य आचार्यवचस अवधीरणं स्वीकारः परप्रणेयत्वं अन्यप्रभावितत्वम् इति, अजितभृत्यता अस्वायत्तीकृतसेवकता सुखोपसेव्यत्वं सुखेन अनायासेन उपसेव्यत्वम् उपसेवनीयत्वम् इति। अर्थाद् मदीयाः सेवका न मदधीनाः, अतः तैः अहम् सुखेन उपसेवनीयः, मदीया ख्यातिर्भविष्यति इति तात्पर्यम्। नृत्य-गीत-वाद्य-वेश्याभिसक्तिः नृत्यं नाट्यम् गीतं गानं वाद्यं वादित्रं वेश्या गणिका तासु अभिसक्तिः आसक्तिः रसिकता रसाभिज्ञता इति, महापराधाकर्णनं महताम् अपराधानां नरवधादीनां श्रवणं महानुभावता महाप्रभावत्वम् इति, पराभवसहत्वं पराभवस्य पराजयस्य सहत्वं सहनशीलत्वं क्षमा क्षान्तिः इति, स्वच्छन्दता स्वेच्छावर्तनं प्रभुत्वम् ऐश्वर्यम् इति, देवावमाननं देवानां नारायणादीनाम् अवमाननम् अपमानं महासत्त्वता महाशक्तिशालित्वम् इति, वन्दितजनख्यातिः वन्दितजनाः स्तुतिपाठकजनाः तैः कृता ख्यातिः स्वप्रसिद्धिः यश इति, तरलता चञ्चलता उत्साहः अध्यवसाय इति, अविशेषज्ञता विशेषस्यानभिज्ञता अपक्षपातित्वं पक्षपातराहित्यम् समवर्तित्वम् इति। एवं दोषान् गुणपक्षमध्यारोपयद्भिः धूर्तैः अन्ये राजानः वञ्च्यमानाः भवन्ति।

द्यूतस्य विनोदत्वस्वीकारो दोषाय एव भवति। विनोदपक्षे शाकुन्तलभणितिः लभ्यते - "मिथ्यैव व्यसनं वदन्ति मृगयामोदृग् विनोदः कुतः"इति। सर्वेण प्रयत्नेन राजा व्यसनेषु अनासक्तो भवेदिति कथयति मनुस्मृतिः। द्यूतक्रीडा, परस्त्रीगमनम्, मृगया सुरापानञ्च कामजेषु व्यसनेषु चत्वारि भवन्ति। तथाह्युक्तं मनुसंहितायां सप्तमाध्याये राजधर्मप्रकरणे -

"मृगयाक्षो दिवास्वप्नो परिवादः स्त्रियो मदः।

तौर्यत्रिकं वृथाट्या च कामजो दशको गणः।।"इति। कामजेषु व्यसनेषु च एतच्चतुष्टयं कष्टतमम्। तथाह्युक्तम् -

"पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्।

एतत्कष्टतमं विद्याच्चतुष्के कामजे गणे।।"इति।

परदारैः सह सङ्गमो न कार्यः इति स्मृतयः। अतः स्वदारान् परित्यज्य परदाराभिसक्तिः राज्ञः दुश्चरितमेव प्रकटयति। अजितभृत्यता हि उपसेव्यत्वम् इति राज्ञः क्लीबत्वमेव प्रतिपादयति। नृत्यगीतवेश्याभसक्तिः राज्ञः नैव उचिता। यतो हि इदं कामजव्यसनं भवति। महापराधानां सामान्यबुद्ध्या उपेक्षणं राज्ञः दोषाय भवति। यतो हि राजा यदि एवं करोति तदा मात्स्यन्यायः प्रवर्तते। तदा दुर्बलान् बलवत्तराः ग्रसन्ते। एवम् अविचारमूलकम् इदं राज्ञ आचरणं भवति।

स्वेच्छाचरणं न हि राज्ञ ऐश्वर्यम्। "यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति गीतोक्तेः राज्ञः स्वेच्छाचरणं प्रजानाम् अनियन्त्रिताचरणस्य कारणं स्यात्। अतः राजा कदापि स्वेच्छाचारी न भवेत्। स हि शास्त्रानुसारेण एव राजधर्मं परिपालयेत्।

देवावमाननं राज्ञः नास्तिक्यस्य परिचायकम्। न हि तद् महासत्त्वतां प्रतिपादयति। तद् हि निन्दनीयमेव। महासत्त्वता इत्यत्र व्यवहृतः सत्त्वशब्दः गुणपरकः - "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति मेदिनीकोशात्। महाशक्तिशालित्वं इत्यत्र शक्तिशालित्वं तु गुणपरकमेव।

अविशेषज्ञता कदापि अपक्षपतित्वं न भवति। तद् हि विवेकराहित्यमेव।

सरलार्थः -

एवं नैके राजानः सन्ति, येषां सभायां स्वार्थसम्पादने रताः, धनरूपिमांसग्रहणे गृध्रसदृशाः, सभामण्डपरूपपद्मवने स्थिताः बकपक्षिस्वरूपाः, प्रवञ्चने कुशलाः केचन धूर्ताः तिष्ठन्ति। ये च राज्ञाम् एवं बोधनं कुर्वन्ति यत् - अक्षक्रीडा भवति विनोदः, परस्त्रीसङ्गमः चातुर्यम्, मृगया व्यायामः, मद्यपानं विलासिता, कस्मिंश्चिदपि विषये असावधानता हि वीरता, तथा स्वस्य धर्मपत्न्याः त्यागः अनासक्तिः, गुरूपदेशस्य अवमानना हि स्वाधीनता, स्वेच्छानुसारं विद्यमानानां सेवकानां कृते दण्डस्य अभावो हि सुखपूर्विका शुश्रूषा, नृत्य-गीत-वाद्यादिषु गणिकासु च आसक्तिः रसिकता, महत्सु अपराधेषु अनवधानं स्वस्य महानुभवतायाः परिचयः, परकृतस्य अपमानस्य सहनं हि क्षमा,स्वेच्छाचारित्वं हि प्रभुत्वम्, देवतानां तिरस्कारः महाबलस्य परिचयः, वन्दिजनैः कृता प्रशंसा यशः, मनसः चञ्चलता हि उत्साहः, सूक्ष्मरूपेण कार्याणाम् अपर्यालोचनं भवति निष्पक्षपातः। एवम्प्रकारेण प्रतारणनिपुणाः धूर्ताः गुणेषु दोषाणाम् अपि आरोपं कुर्वन्ति। किन्तु ते मनसि स्वयमेव उपहासं कुर्वन्तः देवतानां यथायोग्यं स्तुतिभिः राज्ञां प्रतारणां कुर्वन्ति। अन्यपक्षे तु राजानः धनस्य अहङ्कारवशात् उन्मत्ताः सन्तः जनानाम् एवंभूतैः स्तुतिभिः चैतन्यविहीनाः भवन्ति, अत एव "एते यथा वदन्ति, अहं तथैव अस्मि" इति चिन्तयन्ति। किञ्च, तत्सर्वं यथार्थं मत्वा मिथ्या अभिमानं कुर्वन्ति। मनुष्याः सन्तोऽपि ते राजानः आत्मानं देवानाम् अंशतः अवतीर्णान् अथवा देवताभिः अधिष्ठितान् मन्यन्ते। किञ्च स्वकार्यं ते राजानः देवानुग्रहं मन्यन्ते।

एवं ते राजानः समस्तलोकस्य उपहासयोग्यत्वं व्रजन्ति। एवं राजा मा भूत् चन्द्रापीड इति शुकनासस्याशयः।

व्याकरणविमर्शः -

क) समासः -

१. आस्थाननलिनीबकैः- आस्थानम् एव नलिनी आस्थाननलिनी इति कर्मधारयसमासः। आस्थाननलिन्यां बकः आस्थाननलिनीबकः, तैः इति सप्तमीतत्पुरुषसमासः।

२. प्रारब्धदिव्योचितचेष्टानुभावाः- दिव्योचिताः चेष्टानिभावाः दिव्योचितचेष्टानुभवाः इति कर्मधारयसमासः। प्रारब्धाः दिव्योचितचेष्टानुभवा यैः ते प्रारब्धदिव्योचितचेष्टानुभावाः इति बहुव्रीहिसमासः।

ख) सन्धिविच्छेदः

१. प्रतारणकुशलैर्धूर्त्तैरमानुषोपचिताभिः - प्रतारणकुशलैः धूर्तैः अमानुषोपचिताभिः।

२. देवाधिष्ठितोऽहम् - देवाधिष्ठितः अहम्।

अलङ्कारविमर्शः

१. अपर इत्यस्मिन् वाक्ये परम्परितरूपकमलङ्कारः।

२. इतीत्यस्मिन् वाक्ये उत्प्रेक्षालङ्कारः।

३. सदैवतमित्यस्मिन् वाक्येऽपि उत्प्रेक्षालङ्कारः।

कोशः

१. "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति मेदिनी।

पाठगतप्रश्नाः- ३

१५. राजसभायां स्थिताः स्वार्थनिष्पादनपराः धूर्ताः कीदृशाः भवन्ति?

१६. धूर्ताणां तेषां मते अक्षक्रीडा नाम का?

१७. राजसभास्थानां धूर्ताणां नये प्रभुत्वं किम्?

१८. कीदृशाः जनाः निश्चेतनाः भवन्ति?

१९. ते राजानः कस्मात् कारणात् हास्यास्पदानि भवन्ति?

पाठसारः

यौवनम्, धनसम्पत्तिः, प्रभुत्वम्, अविवेकिता – एतेषु एकैकमपि महत् अनर्थं जनयति। यत्र तु एतत् चतुष्टयं वर्तते तत्र किमपि वक्तव्यमेव नास्ति। एषा दुराचारिणी लक्ष्मीः यं राजानम् आश्रयति सः अज्ञानेनैव दुराचारपरायणो भवति। अस्मिन् पाठे महाकविना बाणेन शुकनासमुखेन चन्द्रापीडोपदेशव्याजेन तस्याः लक्ष्म्याः कुप्रभावः सकारणं वर्णितः। तथाहि सा लक्ष्मीरेव राज्याभिषेकसमये एव मङ्गलकलशजलैः राज्ञां दुर्गुणापसारणम् अकृत्वा उदारतां प्रक्षालयन्ति, होमाग्निना चित्तं मलिनीकरोति, पुरोहितस्य कुशाग्रभागरूपसम्मार्जन्या दयादाक्षिण्यक्षमासन्तोषादिगुणान् दूरीकरोति, मुकुटस्य पट्टबन्धनेन राज्ञां वार्धक्यगतेः स्मृतिम् आच्छादयति, छत्रमण्डलेन तेषां परलोकज्ञानम् अपसारयति, चामरैः सत्यकथनं निवर्तयति, वेत्रदण्डैः धैर्यशौर्यादीन् सद्गुणान् दूरं संस्थापयति,जयशब्दादिकलरवैः हितवचनानि न श्रावयति। यानि यशांसि नामानि राजस्तुतयः वर्तन्ते यथा राज्ञा इदं कार्यम्, इत्थं स्थेयम् इत्थमाचरणीयमित्यादीनि उत्तमराजचरितवर्णनरूपाः स्तुतयः यथा पत्रैः मलम् अपसार्यते तथैव राज्ञां ध्वजायाः वस्त्ररूपपत्रैः तानि सर्वाणि अपसारयति इयं लक्ष्मीः।

परिश्रमेण क्लान्तस्य पक्षिणः शिथिलीभूतः गलदेशः यथा क्षणस्य कृते चञ्चलताम् उपैति, खद्योतस्य प्रकाशः यथा क्षणाय सुन्दरः भवति तथैव सुन्दरदर्शना इयं सम्पद्। अस्याः सम्पदः चञ्चलत्वे अपि ज्ञानिभिः निन्दितया एतया सम्पदा प्रलुब्धाः सन्तः केचन राजानः तु ज्ञानिनां निन्दाभाजनानि एव भवन्ति। एते किञ्चिद्धनलाभस्य अहङ्कारेण स्वस्वजन्मवृतान्तं विस्मरन्ति। अपि च वात-पित्त-कफैः दूषितं रुधिरमिव बहुविधैः दोषैः वर्धितां विषयासक्तियन्त्रणां भुञ्जन्ते। शब्दस्पर्शादिविषयाणां ग्रहणे लोलुपैः विषयाणां बाहुल्यात् पञ्चाधिकसहस्रसंख्यकैः इन्द्रियैः कष्टम् अनुभवन्ति। प्रकृत्या एव मनः विविधेषु विषयेषु प्रधावति। तस्मादेव एकमपि मनः सहस्रत्वेन प्रतीयते। तेनैव मनसा राजानः चञ्चलताम् उपयन्ति। तेन ते च राजानः पुनः दुष्टग्रहैः गृहीता इव, प्रेतैः गृहीताः इव, मन्त्रशक्तिभिः वशीभूताः इव, वन्यपशुभिः आक्रान्ताः इव, पिशाचग्रस्ताः इव च दृश्यन्ते। ते वदनानि तथा वक्रीकुर्वन्ति यथा कामदेवस्य कुसुमशरैः प्रतिहताः प्राणिनः प्रकटयन्ति, धनस्य अहङ्काररूपाग्निना दग्धाः यथा आचरन्ति तथैव ते आचरन्ति, कर्कटवत् कौटिल्यं व्यवहरन्ति। पापेन कर्तव्याणां पथिषु चलितुं राज्ञां तेषां शक्तिः विनष्टा भवति। तस्मात् कारणात् ते राजानः खञ्जवत् अन्यैः परिचाल्यन्ते। मृषाकथनस्य अभ्यासवशात् ते कष्टेनैव सर्वं तथा कथयन्ति यथा विषेण विकृतमुखाः कथयन्ति। सप्तच्छदपुष्पाणां रजःस्पर्शेन यथा शिरोवेदना समुत्पद्यते तथैव तेषां लक्ष्मीमदेन रजोगुणसम्भूतं रक्तनयनयुगलं प्रजानां दुःखं समुत्पादयति। ते भूपाः मुमूर्षवः इव बान्धवान् न परिचिन्वन्ति, अक्षिरोगैः आक्रान्ताः इव ते प्रतावतः जनान् अपि न पश्यन्ति, कालसर्पेण दष्टाः यथा विषवैद्यस्य उत्कृष्टैः महामन्त्रैः अपि चैतन्यं न प्राप्नुवन्ति, तथैव ते राजानः उत्कृष्टमन्त्रणाभिः अपि स्वविधेयम् न अनुजानन्ति। लाक्षानिर्मितं भूषणं यथा अग्निः न सहते तथैव ते राजानः अन्यप्रतापं न सहन्ते। स्तम्भबद्धगजाः इव हितोक्तिम् अपि न आकर्णयन्ति। धनलोभरूपविषेण मूर्च्छिताः ते सर्वम् एव धनमयम् इति पश्यन्ति। प्रस्तरैः शाणिताः बाणाः यथा धनुर्मुक्ताः निर्दिष्टलक्ष्यभेदकाः तथैव ते सुरासेवकाः वर्धितदर्पाः राजानः खलप्रेरिताः प्रजापीडकाः। ते हि दूरस्थानां सद्वंशानामपि यष्टिनिक्षेपेण

फलानाम् आहरणवत् नाशकाः। अकालविकसितानि मनोहराणि पुष्पाणि रम्याणि अपि जनसन्तापकानि एवमेव राजानाः रम्याः विनाशकारकाः। श्मशानस्थस्याग्नेः भस्मवत् अत्यन्तं भयङ्करं राजश्रीः। नेत्ररोगाक्रान्ताः इव ते दृश्यस्यापि अदर्शकाः। तषां राज्ञां भवनं कामुकानां वारवनितागृहवत् नीचस्वभावानाम् आश्रयः। ते राजानः पापपूर्णाः प्रत्यहं स्फीतकायाः भवन्ति। तदवस्थायां कामादिदोषैः दुष्टास्ते वल्मीकमृत्तिकया उत्पन्नानां तृणानाम् अग्रपतितजलविन्दुवत् आत्मनां पतनमपि बोद्धुं समर्थाः न भवन्ति।

एवं नैके राजानः सन्ति, येषां सभामण्डपरूपपद्मवने स्थिताः स्वार्थसम्पादने रताः गृध्रसदृशाः, प्रवञ्चने कुशलाः केचन धूर्ताः तिष्ठन्ति। ते दोषान् अपि गुणत्वेन भावयन्ति। यथा - अक्षक्रीडा भवति विनोदः, परस्त्रीयाः अभिगमनं चातुर्यम्, मृगयणं व्यायामः, मद्यपानं विलासिता, असावधानता हि वीरता, स्वस्य धर्मपत्न्याः त्यागः अनासक्तिः इत्यादिप्रकारेण ते प्रतारणनिपुणाः धूर्ताः बोधयित्वा राजानं वञ्चयन्ति। ते राजानः धनोन्मत्ताः सन्तः जनस्तुतिभिः विवेकहीनाः भवन्ति। ते आत्मानं देवांशं मन्यन्ते। एवं ते समेषां उपहासास्पदानि भवन्ति।

पाठान्तप्रश्नाः

१. दुराचारिण्या लक्ष्म्या वशीभूतानां राज्ञां दशा कीदृशी भवतीति वर्णयत।

२. अभिषेककाले राज्ञां सुगुणाः कैः कथञ्च अपनीयन्ते।

३. राजानः इन्द्रियैः केन प्रकारेण कष्टभोगं कुर्वन्ति।

४. राजानः आत्मकर्तव्यं यथा आत्मपतनं बोद्धुम् असमर्था भवन्ति तत्र सोदाहरणं कारणानि प्रदर्शयत।

५. राज्ञां सभायां कीदृशा धूर्ताः तिष्ठन्तीति वर्णयत।

६. स्वार्थनिष्पादनपराः धूर्ताः केन प्रकारेण दोषेषु गुणानाम् आरोपं कुर्वन्ति।

७. अहङ्कारेण उन्मत्ताः राजानः केन प्रकारेण जनानां हास्यास्पदानि भवन्ति।

पाठगतप्रश्नोत्तराणि

१. दुराचारया लक्ष्म्या परिगृहीताः राजानः विक्लवा दुर्मतयश्च भवन्ति।

२. अभिषेककाले मङ्गलकलशजलैः राज्ञां दाक्षिण्यं प्रक्षाल्यते इव ।

३. दुष्टानां राज्ञां हृदयं होमाग्निधूमेन मलिनीभवति।

४. राज्ञां क्षमागुणः पुरोहितानां कुशाग्रसम्मार्जनीभिः अपसार्यते।

५. अभिषेकसमये राज्ञां वार्धक्यबुद्धिः मुकुटस्य बन्धनेन दूरीभवति।

६. राज्ञां यशः अभिषेककाले ध्वजपत्रसंलग्नैः पल्लवैः परिमार्ज्यते।

७. क्षणस्थायिन्या सम्पदा लुब्धाः राजानः मनस्विजनानां निन्दाभाजनानि।

८. राज्ञां तेषाम् इन्द्रियाणाम् आधिक्ये कारणं विविधविषयाणां ग्रासस्य लालसा।

९. मनः स्वभावतः चञ्चलम् अतः विविधेषु विषयेषु प्रधावति।

१०. मदनशरैः प्रतिहताः ते राजानः मुखभङ्गसहस्राणि कुर्वन्ति।

११. राजानः कर्कटवद् वक्रगत्या व्रजन्ति।

१२. मुमूर्षूवत् ते राजानः बान्धवान् परिचेतुम् असमर्थाः भवन्ति।

१३. राजसम्पत्तिः श्मशाग्निजन्यं भस्मवद् भयङ्करं भवति।

१४. ते राजानः सप्तच्छदतरव इव प्रजानां शिरोवेदनां जनयन्ति।

१५. राजसभायां स्थिताः स्वार्थनिष्पादनपराः धूर्ताः प्रतारणकुशलाः दोषेषु गुणान् आरोपयन्तः स्वयमपि विहसन्तः भवन्ति।

१६. धूर्ताणां तेषां मते अक्षक्रीडा नाम विनोदः।

१७. राजसभास्थानां धूर्ताणां नये प्रभुत्वं स्वेच्छाचारित्वम्।

१८. वित्तमदमत्तचित्ताः जनाः निश्चेतनाः भवन्ति।

१९. ते राजानः दिव्योचितचेष्टादर्शनात् हास्यास्पदानि भवन्ति।

॥ इति अष्टादशः पाठः ॥

348sk19

१९

शुकनासोपदेशः - लक्ष्मीदुष्प्रभावः- २

प्रस्तावना

अस्मिन् पाठे शुकनासोपदेशस्य 'आत्मविडम्बनञ्च' इत्यतः आरभ्य 'स्वभवनमाजगाम' इत्यन्तः अंशः वर्ण्यते। विद्या विनोदाय धनं मदाय, खलस्य वित्तं परपीडनाय। श्रियः प्रभावेण ते राजानः आत्मानम् ईश्वररूपेण मन्यन्ते। ते चिन्तयन्ति यत् ते साक्षात् शिवस्वरूपाः इति। ते गुरूणां ज्येष्ठानां शिष्टानां वा उपदेशं न स्वकुर्वन्ति। ये तेषां गुणकीर्तनं कुर्वन्ति, सम्पदः लुण्ठनेन राजानं वञ्चयन्ति, तान् एव राजानः धनादिना पोषयन्ति, सर्वविधं प्रयोजनं पूरयन्ति च। एतेन राजानः कदापि स्वाभ्युन्नतिं स्वराज्योन्नतिञ्च विदधातुं न शक्नुवन्ति। तस्मात् प्रधानामात्यः शुकनासः चन्द्रपीडं प्रबोधयति यत् अनेन मार्गेण न प्रवर्तनीयम्। स्वराज्यस्य पितुश्च उन्नत्यै चिन्तनीयम्। यानि राज्यानि जितानि तानि पुनर्जेयानि, स्वायत्तीकरणीयानि च नवीनानि राज्यानि। राज्यस्य राज्यस्थस्य राजाश्रितस्य च मङ्गलाय यतनीयम्।

अत्र महाकविः वस्तुतः उपदेशप्रदानादनन्तरं कथं तेन प्रजाः प्रति आचरणीयं कथं प्रजाः शासनीयाः कथं भृत्यादिभिः सह व्यवहरणीयम् इत्यादिकं शुकनासमुखेन वर्णयति।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- उपदेशानां पालनेन कथं राजव्यवस्था सम्यक् परिचाल्यते इति जानीयात्।
- भूपैः कथं प्रजायै आचरणीयम् इति जानीयात्।
- भूपानां सदाचरणेन प्रजाः राजाज्ञां सम्यक् परिपालयन्ति इति जानीयात्।
- पाठस्थानां पदानाम् अन्वयार्थं समासान् च जानीयात्।

१९.१) साम्प्रतं मूलपाठम् अवगच्छाम–१३

आत्मविडम्बनाश्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति। मनसा देवताध्यारोपणविप्रतारणासम्भूतसम्भावनोपहताश्चान्तःप्रविष्टापरभुजद्वयमिव आत्म-बाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति, दृष्टिपातमप्युपकारपक्षे स्थापयन्ति, सम्भाषणमपि संविभागमध्ये कुर्वन्ति, आज्ञामपि वरप्रदानं मन्यन्ते, स्पर्शमपि पावनमाकलयन्ति। मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न

पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्च्चयन्त्यर्च्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्। अनर्थकायासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम्, जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम्, आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवादिने।

व्याख्यानम् -

अनुजीविना सेवकेन जनेन सेवकेन क्रियमाणां विधीयमानाम् आत्मविडम्बनां स्वस्मिन् अविद्यमानगुणारोपणरूपां वञ्चनाम् अभिनन्दन्ति साधुवादेन प्रशंसन्ति।

देवताध्यारोपणविप्रतारणासम्भूतसम्भावनोपहताः धूर्तैः देवताध्यारोपणं हरिहर्याद्यारोपणम् एव विप्रतारणा प्रवञ्चना तया सम्भूता समुत्पन्ना स्वस्मिन् सम्भावना हरिहर्यादिकल्पना तया उपहताः आच्छन्नाः ये तादृशाः विनाशमतयः सन्तः आत्मबाहुयुगलं स्वभुजयुग्मम् अन्तःप्रविष्टाऽपरभुजद्वयम् अन्तः अभ्यन्तरे प्रविष्टम् अपरम् अन्यद् भुजद्वयं बाहुयुगलं यस्य तादृशम् इव संभावयन्ति उत्प्रेक्षन्ते। बाहुयुगलं बाहुयुगलं चान्तः अस्ति कथनात् स्वस्य विष्णुरूपताम् आमनन्ति इति सिद्धम्।

ते नृपा इति योज्यम्। त्वगन्तरिततृतीयलोचनं त्वचा चर्मणा अन्तरितं व्यवहितं तृतीयं विषमं लोचनं नयनं यस्मिन् तादृशं स्वललाटं निजभालम् आशङ्कन्ते मन्यन्ते। महेश्वरस्य त्रिनेत्रत्वात् स्वस्मिन् महेश्वरत्वं सम्भावयन्तीति तात्पर्यम्।

दर्शनप्रदानं निजसाक्षात्कारम् अपि अनुग्रहं प्रसादं, गणयन्ति मन्यन्ते। दृष्टिपातम् चक्षुषा ईक्षणम् अपि उपकारपक्षे उपकारकत्वे स्थापयन्ति निदधति। सम्भाषणं आलपनम् अपि संविभागमध्ये दातव्यद्रव्यदानत्वेन कुर्वन्ति विदधति। आज्ञां स्वनिर्देशम् अपि वरप्रदानम् अभीष्टप्रदानं मन्यन्ते जानन्ति। स्पर्शं स्वस्य संश्लेषम् अपि पावनं पवित्रताकरणम् आकलयन्ति विचारयन्ति।

मिथ्यामाहात्म्यगर्वनिर्भराः मिथ्या असत्यं यत् माहात्म्यं महिमा तेन यो गर्वः अभिमानः मिथ्यामाहात्म्यगर्वः असत्यमहिमाभिमानः तेन निर्भराः परिपूर्णाः सन्तः देवताभ्यः न प्रणमन्ति नारायणादिदेवान् अनुकूलयितुं न स्तुवन्ति। ते द्विजातीन् ब्राह्मणान् न पूजयन्ति न अर्चयन्ति। ते मान्यान् सम्मानयोग्यान् न मानयन्ति श्वसुरादीनां सम्मानं कुर्वन्ति। ते अचर्नीयान् पूजनीयान् उपाध्यायप्रभृतीन् न अर्चयन्ति न पूजयन्ति। ते अभिवादार्हान् अभिवादनयोग्यान् पुरोहितादीन् न अभिवादयन्ति तेषां पादग्रहणं न कुर्वन्ति। ते गुरून् आचार्यादीन् न अभ्युत्तिष्ठन्ति अभ्युत्थानपूर्वकं सत्कारं न कुर्वन्ति।

इति अत एव अनर्थकायासान्तरितविषयोपभोगसुखम् अनर्थकः निष्फलः य आयासः परिश्रमः तेन निष्फलपरिश्रमेण विद्यार्जनपरिश्रमेण होमाद्यनुष्ठानेन वा अन्तरितं व्यवहितं विषयोपभोगसुखं कामिन्यादिभोगसुखं येन तादृशं भोगसुखरहितम् अनासक्तं विद्वज्जनम् विबुधम् उपहसन्ति जडत्वबुद्ध्या हासपात्रं मन्यन्ते। ते वृद्धजनोपदेशं स्थविरजनशिक्षां जरावैक्लब्यप्रलपितं जरया परिणतवयसा यद् वैक्लब्यं बुद्धिचाञ्चल्यम्, तेन प्रलपितं जल्पितम् इति एवं विचार्य पश्यन्ति जानन्ति। आत्मप्रज्ञापरिभवः आत्मप्रज्ञायाः स्वमतेः परिभवः पराजयः अयम् इति विचिन्त्य सचिवोपदेशाय प्रधानामात्यवचनाय

असूयन्ति गुणेषु दोषारोपपूर्वकं कुप्यन्ति। हितवादिने कल्याणभाषिणे कल्याणाय भणति यः तस्मै जनाय कुप्यन्ति क्रुध्यन्ति।

सरलार्थः -

किन्तु तथापि अनुचरैः कृतायामपि विडम्बनायां ते राजानः तान् एव सादरम् अभिनन्दन्ति। स्वस्य मनसि देवत्वसंस्थापनात् विवेकहीनत्वात् च प्रतारितानां तेषां राज्ञां या धारणा समुत्पन्ना, तया तेषां बुद्धिः नष्टा। अत एव "मम बाहुद्वयमध्ये इतोऽपि बाहुयुगलमेकं गुप्तं वर्तते" इति भावयन्तः आत्मनः विष्णुसदृशान् आमनन्ति। अपि च "स्वललाटदेशे अपरं नेत्रमेकं त्वचा आवृतम् अस्ति" इति शङ्कमानाः ते आत्मनः शिवसदृशान् मनन्ति। ते च स्वस्य दर्शनं तेषामेव अनुग्रहः इति भावयन्ति। स्वेषां दृष्टिपातम् अपि उपकाररूपेण गणयन्ति ते। केनापि सह सम्भाषणम् अपि ते दानरूपेण गृह्णन्ति। तेषाम् आदेशाः वरप्रदानतुल्याः इति चिन्तयन्ति। स्वेषां स्पर्शनं पवित्रतासम्पादकम् इति अवबोधः तेषाम्। मिथ्यामाहात्म्यस्य गर्वेण गर्वितास्ते राजानः देवान् न नमन्ति। ब्राह्मणानां पूजनं न कुर्वन्ति, मान्यानां कृते सम्मानं न प्रदर्शयन्ति, पूजनीयान् न पूजयन्ति, नमस्करणीयान् न नमस्कुर्वन्ति। किञ्च गुरून् दृष्ट्वापि न उत्तिष्ठन्ति। अपि च ते विद्योपार्जनादीनां परिश्रमः निरर्थकः इति भावयन्तः पण्डितानाम् उपहासं विदधति। वृद्धाः वार्धक्यकारणात् बुद्धेः अस्थिरतावशात् अधिकं प्रलपन्ति इति स्वीकुर्वाणाः ते राजानः वृद्धानाम् उपदेशं निष्प्रयोजनकम् इति भावयन्ति। अयं स्वबुद्धेः तिरस्कारः भवति इति मन्वानाः ते राजानः मन्त्रिणाम् उपदेशेषु दोषान् आविष्कुर्वन्ति। किञ्च, हितवाक्यं वदताम् उपरि क्रोधं प्रकटयन्ति।

व्याकरणविमर्शः

क) समासः

१. देवताध्यारोपणविप्रतारणासम्भूतसम्भावनोपहताः - देवता-ध्यारोपणं एव विप्रतारणा देवताध्यारोपणप्रतारणा इति कर्मधारयः। तया सम्भूता देवताध्यारोपणप्रतारणासम्भूता इति तृतीयातत्पुरुषः। तया उपहताः देवताध्यारोपणप्रतारणासम्भूतोपहताः इति तृतीयातत्पुरुषसमासः।

२. अन्तःप्रविष्टापरभुजद्वयम्- अन्तः प्रविष्टम् अन्तःप्रविष्टम् इति कर्मधारयः। अपरं भुजद्वयम् अपरभुजद्वयं इति कर्मधारयसमासः, अन्तःप्रविष्टम् अपरभुजद्वयम् अन्तःप्रविष्टापरभुजद्वयमिति कर्मधारयसमासः।

३. मिथ्यामाहात्म्यगर्वनिर्भराः- मिथ्या एव माहात्म्यं मिथ्यामाहात्म्यम् इति कर्मधारयः। तेन गर्वः मिथ्यामाहात्म्यगर्वः इति तृतीयातत्पुरुषः। तेन निर्भराः मिथ्यामाहात्म्यगर्वनिर्भराः इति तृतीयातत्पुरुषसमासः।

४. त्वगन्तरिततृतीयलोचनम् - त्वचा अन्तरितं त्वगन्तरितम् इति तृतीयातत्पुरुषः। त्वगन्तरितं तृतीयलोचनं यस्मिन् स त्वगन्तरिततृतीयलोचनः, तमिति बहुव्रीहिसमासः।

५. अनर्थकायासान्तरितविषयोपभोगसुखम् - अनर्थकः आयासः अनर्थकायासः इति कर्मधारयः। तेन अन्तरितम् अनर्थकायासान्तरितम् इति तृतीयातत्पुरुषः। अनर्थकायासान्तरितं विषयोपभोगसुखं येन स, तम् इति बहुव्रीहिसमासः।

६. जरावैक्लब्यप्रलपितम् - जरया वैक्लब्यं जरावैक्लब्यम् इति तृतीयातत्पुरुषः। तेन प्रलपितः जरावैक्लब्यप्रलपितः, तम् इति तृतीयातत्पुरुषसमासः।

ख) सन्धिविच्छेदः

१. अप्युपकारपक्षे - अपि उपकारपक्षे।

२. इत्युपहसन्ति - इति उपहसन्ति।

अलङ्कारविमर्शः

१. मनसेत्यस्मिन् वाक्ये बाहुयुगलस्य अन्तःप्रवेशक्रियाया उत्प्रेक्षणात् क्रियोत्प्रक्षालङ्कारः।

२. आज्ञामित्यस्मिन् वाक्ये इवाद्यभावात् वरप्रदानक्रियोत्प्रेक्षणात् प्रतीयमाना क्रियोत्प्रेक्षा।

पाठगतप्रश्नाः- १

१. राजानः केषाम् अभिनन्दनं कुर्वन्ति?

२. केन राज्ञां बुद्धिः नश्यते?

३. ते राजानः स्वाम् आज्ञां किं मन्यन्ते?

४. अविवेकिनः राजानः कान् न अभिवादयन्ति?

५. राजा केषाम् उपरि क्रोधं प्रकटयन्ति

१९.२) साम्प्रतं मूलपाठम् अवगच्छाम – १४

सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्द्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्तामापादयन्ति, योऽहर्निशमनवरतम् उपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्त्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति। किंवा तेषां साम्प्रतम्, येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेष्वभियोगः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातरः उच्छेद्याः।

व्याख्यानम् -

तं पुरुषं सर्वथा सर्वप्रकारेण अभिनन्दति प्रशंसन्ति। सर्वथा इत्यस्य प्रत्येकं क्रियायामन्वयः। तं पुरुषं सर्वथा सर्वप्रकारेण आलपन्ति आभाषन्ते। तं पुरुषं सर्वथा पार्श्वे समीपे कुर्वन्ति रक्षन्ति। तं पुरुषं सर्वथा संवर्द्धयन्ति विविधसाहाय्येन संवृद्धिं प्रापयन्ति। तेन पुरुषेण सह सर्वथा समं सुखं सानन्दम् अवतिष्ठन्ते तिष्ठन्ति। तस्मै पुरुषाय सर्वथा ददाति वितरन्ति, धनादिकं इति योज्यम्। तं पुरुषं सर्वथा मित्रतां सख्यतां सख्यं वा उपनयन्ति प्रापयन्ति। तस्य जनस्य वचनं वचः सर्वथा शृण्वन्ति आकर्णयन्ति। तत्र तस्मिन्पुरुषे सर्वथा वर्षन्ति सततं धनानि यच्छन्ति। तं पुरुषं सर्वथा बहु अधिकं मन्यन्ते आद्रियन्ते, अत्युकष्टं विचारयन्ति इत्यर्थः। तं जनं सर्वथा आप्ततां यथार्थवक्तृभावम् आपादयन्ति प्रापयन्ति। यः पुरुषः अहर्निशम् अहोरात्रम् अनवरतं निरन्तरम् उपचिताञ्जलिः उपचितः कृतः अञ्जलिः करपुटः येन सः तथा च विगतान्यकर्तव्यः विगतम् अपगतम् अन्यत् अपरं कर्तव्यं करणीयं यस्य सः तादृशः सन् अधिदैवतम् आराध्यदेवम् इष्टदेवम् इव तं स्तौति नमति। यो वा चाटुकरी जनः माहात्म्यं राज्ञो महत्त्वम् उद्भावयति प्रकाशयति।

एवम्भूता ये नृपतयो भवन्ति तेषां सकलमेव अनुचितमिति कथयति - किंवा इति। तेषां नृपाणां किंवा साम्प्रतं युक्तं न्यायसङ्गतं भवितुं शक्नोति। न किमपि न्यायसङ्गतं तेषां नृपाणाम् इति भावः। "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरवचनाद् असाम्प्रतम् इत्यस्य युक्तम् इत्यर्थः। येषां नृपाणाम् अतिनृशंसप्रायोपदेशनिर्घृणम् अतिनृशंसप्रायेण अतिक्रूरप्रचुरेण उपदेशेन शिक्षया निर्घृणं निष्करुणं कौटिल्यशास्त्रं चाणक्यप्रणीतम् अर्थशास्त्रं प्रमाणम्। अभिचारक्रियाक्रूरैकप्रकृतयः अभिचारक्रिया हिंसाकर्म श्येनयागादिकं तया क्रूरा कठोरा एका मुख्या प्रकृतिः स्वभावः येषां ते तादृशाः पुरोधसः पुरोहिताः गुरवः उपदेष्टारः भवन्ति, येषां नृपाणाम् इत्यत्र योज्यम्। येषां नृपाणाम् पराभिसन्धानपराः अन्यप्रतारणतत्पराः मन्त्रिणः अमात्याः उपदेष्टारः उपदेशकर्तारः भवन्ति। येषां नृपाणां नरपतिसहस्रभुक्तोज्झितायां नरपतिसहस्रेण राजसमूहेन प्राक् भुक्ता उपयुक्ता पश्चात् उज्झिता त्यक्ता तस्यां तादृश्यां लक्ष्म्यां राजश्रियाम् आसक्तिः प्रेमातिशयः भवति। येषां नृपाणां मारणात्मकेषु व्यापादनस्वरूपेषु शास्त्रेषु आयुधेषु अभियोगः आग्रहः अस्ति। येषां नृपाणां सहजप्रेमार्द्रहृदयानुरक्ताः सहजप्रेम्णा स्वाभाविकप्रणयेन आर्द्रं क्लिन्नं हृदयं चित्तं येषां ते सहजप्रमहृदयाः तादृशा अनुरक्ताः अनुरागयुक्ताः भ्रातरः सहोदराः उच्छेद्याः उच्छेत्तुं योग्याः उच्छेदनीयाः।

सरलार्थः -

एते राजानः सर्वथा तान् एव पार्श्वे स्थापयन्ति, तैः सह एव सुखेन निवसन्ति, तेभ्यः एव ददति, तैः सह मित्रतां कुर्वन्ति, तेषामेव वाक्यानि शृण्वन्ति, तेभ्यः एव सर्वदा धनं वितरन्ति, तेषामेव सम्माननां कुर्वन्ति, तान् एव विश्वसनीयान् मनन्ति - ये जनाः नक्तन्दिवं निरन्तरम् अञ्जलिबद्धाः सन्तः कर्तव्यानि कर्माणि अन्यत्र स्थापयित्वा देवतावत् राज्ञां स्तुतिं कुर्वन्ति अथवा तेषां माहात्म्यस्य कीर्तनं कुर्वन्ति।

तादृशानां राज्ञां किमपि कार्यं न्यायसङ्गतं भवति वा? येषां समीपे अत्यन्तनृशंसैः उपदेशैः परिपूर्णं तथा नितान्तनिर्दयं चाणक्यप्रणीतं नीतिशास्त्रम् एव प्रमाणं भवति। अभिचारक्रियायाः अनुष्ठानाय

नितान्तं क्रूरस्वभावविशिष्टाः पुरोहिताः येषां शिक्षकाः सन्ति। परप्रतारणापरायणः मन्त्रिगणः येषाम् उपदेष्टा भवति। सहस्रराजानः यां लक्ष्मीं यथेच्छं भुक्त्वा परित्यक्तवन्तः तां प्रति येषाम् आसक्तिः अस्ति। मारणोपदेशैः परिपूर्णे तन्त्रशास्त्रे येषाम् आग्रहः विद्यते। प्रकृत्या स्नेहवशात् सदयचित्तः अनुरक्तश्च भ्रातृगणः येषाम् उच्छेदपात्रं भवति।

व्याकरणविमर्शः -

क) समासः -

१. उपचिताञ्जलिः - उपचिता अञ्जलिः येन सः उपचिताञ्जलिः इति बहुव्रीहिसमासः।

२. विगतान्यकर्तव्यः- विगतम् अन्यत् कर्तव्यं यस्य सः विगतान्यकर्तव्यः इति बहुव्रीहिसमासः।

३. कौटिल्यशाास्त्रम्- कौटिलस्य शास्त्रं कौटिल्यशास्त्रम् इति षष्ठीतत्पुरुषसमासः।

ख) सन्धिविच्छेदः

१. शास्त्रेष्वभियोगः- शास्त्रेषु+अभियोगः।

अलङ्कारविमर्शः

१. सर्वथा इत्यादिना वाक्येन दुष्टानां राज्ञां सर्वकार्ययौक्तिकत्वनिरूपणकार्यं प्रति अनेकहेतूपन्यासात् समुच्चयालङ्कारः। तल्लक्षणं दर्पणे -

"समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके।

खले कपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत्।।" इति।

कोशः

१. "युक्तं द्वे साम्प्रतं स्थाने" इत्यमरवचनात् साम्प्रतमित्यस्य युक्तम् इत्यर्थः।" इति विश्वः।

पाठगतप्रश्नाः- २

६. मोहग्रस्ताः राजानः सर्वथा कं पार्श्वे कुर्वन्ति?

७. ते राजानः केन सह सुखम् अवतिष्ठन्ते?

८. अन्यायकारिणः राज्ञः उपदेष्टारः के?

१९.३) साम्प्रतं मूलपाठम् अवगच्छाम – १५

तदेवं प्रायातिकुटिल–कष्ट–चेष्टा–सहस्रदारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने, कुमार! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः। यथा च न प्रकाश्यसे विटैः, न प्रहस्यसे कुशलैः, नास्वाद्यते भुजङ्गैः, नावलुप्यसे सेवकवृकैः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः,

न विडम्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे रागेण, नापह्रियसे सुखेन। कामं भवान् प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः, तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्। इदमेव च पुनः पुनरभिधीयसे, विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति।

व्याख्यानम् -

हे कुमार हे राज्यपुत्र चन्द्रापीड!, तत् तस्मात्कारणात्, एवं प्रायातिकुटिल-कष्ट-चेष्टा-सहस्रदारुणे प्रायाः एतादृशबाहुल्याः अतिकुटिलाः अतिशयवक्राः कष्टचेष्टाः दुःखदायिका ईहाः तासां सहस्रं प्रचुरसंख्या ततः दारुणे भीषणे, राज्यतन्त्रे राष्ट्रशासनव्यापारे, महामोहकारिणि अतिशायाज्ञानविधायिनि, यौवने तारुण्ये, तथा तेन प्रकारेण, प्रयतेथाः प्रयत्नं कुर्याः, यथा येन प्रकारेण, जनैः लोकैः न उपहस्यसे न उपहासपात्रं करिष्यसे, साधुभिः सज्जनैः न निन्द्यसे नो विगीयसे। गुरुभिः पूज्यजनैः न धिक्क्रियसे नो धिक्कारपात्रं विधीयसे। सुहृद्भिः मित्रैः बन्धुजनैः वा न उपलभ्यसे न तिरस्क्रियसे। विद्वद्भिः पण्डितैः, न शोच्यसे न शोकविषयीक्रियसे। यथा च, विटैः कामुकैः न प्रकाश्यसे स्वसमानतया न वर्ण्यसे। अर्थात् कामिजनैः सह मिलित्वा तत्पक्षपाती मा भव इति भावः। कुशलैः व्यवहारनिपुणैः न प्रहस्यसे व्यवहारकौशलाभावात् न उपहस्यसे। भुजङ्गैः धूर्तैः न आस्वाद्यसे न उपभुज्यसे द्रव्याऽपहरणद्वारेति योज्यम्। सेवकवृकैः सेवकाः परिचारकाः एव वृकाः हिंस्रप्राणिविशेषाः तैः न अवलुप्यसे गूढरूपेण प्रविश्य न विनाश्यसे। वनिताभिः स्त्रीभिः न प्रलोभ्यसे न आकृष्यसे। लक्ष्म्या श्रिया न बिडम्ब्यसे विडम्बनायुक्तः क्रियसे, न परित्यज्यस इत्यर्थः। मदेन आधिपत्यजनिताऽभिमानेन न नर्त्यसे नो नृत्यं कार्यसे। मदनेन कामेन न उन्मत्तीक्रियसे उन्माद इव आचर्यसे। विषयैः इन्द्रियार्थैः शब्दस्पर्शादिभिः न आक्षिप्यसे न आकृष्यसे। रागेण जरया कस्मिन्नपि जने विषये प्ररूढेन अनुरागेण वा न अवकृष्यसे न आकृष्यसे। सुखेन आनन्देन न अपह्रियसे न परित्यज्यसे।

भवान् त्वं प्रकृत्या स्वभावेन कामम् अत्यर्थं धीरः धैर्यसम्पन्नः असि। तत्राऽपि पित्रा जनकेन तारापीडेन महता प्रयत्नेन अत्यन्तचेष्टया समारोपितसंस्कारः समारोपितः संस्थापितः संस्कारः सर्वविषयज्ञानं यत्र तादृशः संस्थापितसर्वविषयबुद्धिः असि। यद्यपि - धनानि सम्पदः तरलहृदयं चञ्चलचित्तम् अप्रतिबुद्धं बोधरहितं च जनं मदयन्ति मत्तं कुर्वन्ति, तथापि एवं स्थितेऽपि भवद्गुणसन्तोषः भवद्गुणैः विद्याविनयशौर्यादिभिः यः सन्तोषः परितोषः स मां शुकनासं मुखरीकृतवान् वादितवान्।

इदम् एतत् पूर्वोक्तम् एव च पुनः पुनः भूयो भूयः अभिधीयसे कथ्यसे।

इयम् एषा दुर्विनीता विनयरहिता लक्ष्मीः श्रीः विद्वांसं पण्डितम् अपि सचेतनं बुद्धिमन्तम् अपि महासत्त्वम् अत्यन्तशक्तिसम्पन्नम् अपि अभिजातं कुलीनम् अपि धीरं धैर्ययुक्तम् अपि प्रयत्नवन्तम् उद्योगिनम् अपि पुरुषं जनं खलीकरोति अधमं करोति सन्मार्गाद् विच्युतं विदधाति।

सरलार्थः -

अस्माद् एव कारणात् हे राजकुमार! चन्द्रपीड! एवम् अत्यन्तजटिले कष्टप्रदे कार्यबहुले भीषणे राजशासनरूपे कर्तव्ये तथा विवेकशून्यकारिणि यौवनसमये च तेन प्रकारेण कर्म त्वया करणीयं येन जनाः तव उपहासं न कुर्युः, सन्तः निन्दां न कुर्युः, आचार्याः न धिग्वचनं दद्युः, मित्राणि न तिरस्कुर्युः, पण्डिताः न शोचेयुः। किञ्च, यथा कामिजनाः स्वसमानतया न प्रकटयेयुः, कार्यनिपुणाः न उपहासं कुर्युः, लम्पटाः सम्पदां भोगं न कुर्युः, भृत्याः न धनं हरेयुः, धूर्ताः न वञ्चयेयुः, स्त्रियः स्वविलासेन न मुग्धं कुर्युः, श्रीः त्वां न परित्यजेत्, अभिमानः त्वां न ग्रसेत्, कन्दर्पः स्वबाणैः त्वां न हन्युः, विषयाः न अत्यन्तम् आकर्षयेयुः, कस्यापि वस्तुनः उत्कटभोगेच्छया त्वं प्रवर्तितः न भवेः, आनन्दः त्वां न परित्यजेत् तथा वर्तितव्यम्।

स्वभावेन एव त्वं धीरप्रकृतिविशिष्टः। पित्रा तारापीडेन भवति राजकुमारे अत्यन्तयत्नेन शुभसंस्काराः संस्थापिताः। सम्पत्तयो हि तारुण्यात् चञ्चलचित्तं राज्यशास्त्ररिपुविजयादिदुःखविषये अनभिज्ञं च जनं स्वभावत एव उन्मत्तं कुर्वन्ति। तथापि तव विद्याविनयशौर्यादिगुणैः जनिता तुष्टिः मां तोषयति। अतः भूयो भूयस्ते कथयामि यत्, गुणवन्तं, सावधानं, नितान्तशक्तिमन्तं, सद्वंशजं, धीरस्वभावम्, उद्योगयुक्तं जनम् अपि दुर्जनं करोति इयं दुश्चरित्रा लक्ष्मीः।

व्याकरणविमर्शः -

क) समासः -

१. सेवकवृकैः - सेवकाः वृकाः सेवकवृकाः इति कर्मधारयसमासः, तैः सेवकवृकैः इति तृतीयातत्पुरुषसमासः।

२. प्रायातिकुटिल-कष्ट-चेष्टा-सहस्रदारुणे - प्रायाः अतिकुटिलाः प्रायातिकुटिलाः इति कर्मधारयः। प्रायातिकुटिलाः कष्टचेष्टाः प्रायातिकुटिलकष्टचेष्टाः इति कर्मधारयः। तासां सहस्रं प्रायातिकुटिलकष्टचेष्टासहस्रम् इति षष्ठीतत्पुरुषः। ततः दारुणं प्रायातिकुटिलकष्टचेष्टासहस्रदारुणम्, तस्मिन् इति पञ्चमीतत्पुरुषः।

३. महासत्त्वम् - महत् सत्त्वं यस्य स महासत्त्वः, तम् इति बहुव्रीहिः।

ख) सन्धिविच्छेदः

१. नास्वाद्यते - न आस्वाद्यते।

२. नोन्मत्तीक्रियसे- न उन्मत्तीक्रियसे।

३. नावकृष्यसे - न अवकृष्यसे।

४. पुनरभिधीयसे - पुनः अभिधीयसे।

अलङ्कारविमर्शः

१. तदेवम् इत्यस्मिन् वाक्ये रूपकमलंकारः।

पाठगतप्रश्नाः- ३

९. कीदृशे राज्यतन्त्रे राजा प्रलुब्धो न भवेत्?

१०. शुकनासनये राजकुमारः चन्द्रापीडः कीदृशः?

११. शुकनासमते कैः राजकुमारः नैव निन्द्यः?

१२. राजकुमारे चन्द्रापीडे संस्काराः केन आरोपिताः?

१३. राजकुमारस्य गुणाः कं मुखरीकृतवन्तः?

१४. कया सज्जनः दुर्जनायते?

१९.४) साम्प्रतं मूलपाठम् अवगच्छाम – १६

सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम्, कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय स्वबन्धुवर्गम्। अभिषेकानन्तरञ्च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्। अयञ्च ते कालः प्रतापमारोपयितुम्। आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति' इत्येतावदभिधायोपशशाम।

व्याख्यानम् -

भवान् त्वं, सर्वथा सर्वप्रकारेण, पित्रा जनकेन, कल्याणैः नानाविघमङ्गलैः सह, क्रियमाणं विधीयमानं, नवयौवराज्याभिषेकमङ्गलम् नवः नूतनः यो यौवराज्याभिषेकः युवराजपदप्रतिष्ठा, तदेव, यत् मङ्गलं कल्याणं, तत्, अनुभवतु अनुभवविषयीकरोतु। कुलक्रमागतां वंशपरम्परया सम्प्राप्तां, पूर्वपुरुषैः पूर्वजनैः, ऊढां धृतां, धुरं राज्यशासनभारम्, उद्वह धारय। द्विषतां शत्रूणां, शिरांसि मस्तकान् अवनमय अवनतानि कुरु। बन्धुवर्गम् स्वज्ञातिसमुदायम्, उन्नमय सत्कारादिभिः उन्नतं कुरु।

अभिषेकानन्तरं च यौवनराज्याऽभिषेकात् परम्, प्रारब्धदिग्विजयः प्रारब्धः उपक्रान्तः दिग्विजयः येन स उपक्रान्तविजयः, परिभ्रमन् परिभ्रमणं कुर्वन्, तव पित्रा भवतः जनकेन राज्ञा तारापीडेन, विजितां स्वायत्तीकृताम्, अपि, सप्तद्वीपभूषणां सप्तद्वीपाः भूषणानि यस्याः तां जम्बुप्रभृतिदीपालङ्काराम्, तां वसुन्धरां पृथिवीं, पुनः भूयः, विजयस्व स्वायत्तीकुरु।

प्रतापं कोषदण्डजं तेजः, आरोपयितुं शत्रुषु प्रवर्तयितुम् ते तव अयम् एष कालः समयः।

आरूढः आरोहणविषयीकृतः, प्रतापः कोषदण्डजं तेजः, येन सः, तादृशो राजा भूपः नृपः वा, त्रैलोक्यदर्शी त्रिलोकद्रष्टा योगी इव, सिद्धादेशः सिद्ध आदेशो यस्य सः अप्रतिहताज्ञः सिद्धः सफलः, भवति विद्यते। इति, एतावत् एतत्परिमाणम्, अभिधाय उक्त्वा, उपशशाम उपशान्तः बभूव विरतः अभवत्।

सरलार्थः -

भवान् मङ्गलैः सह पित्रा विधीयमानं युवराजपदाभिषेकस्य सुखम् अनुभवतु, परम्परया प्राप्तं पूर्वपुरुषैः धृतञ्च राज्यशासनस्य भारं च उद्वहतु, शत्रूणां शिरांसि अधः करोतु, स्वजनसमुदायञ्च उन्नमयतु। अभिषेकानन्तरं भवतः पित्रा जितां जम्बुप्रभृतिसप्तद्वीपैः भूषितां वसुमतीं दिग्विजयाय बहिः गच्छन् भवान् पुनः स्वायत्तीकरोतु। अयमेव रिपुषु पराक्रमप्रदर्शनस्य कालः। शत्रुषु राज्ञः प्रतापे उत्पन्ने सति तस्य आदेशः सर्वज्ञः इव अप्रतिहतः भवति इति एतावत्पर्यन्तम् उक्त्वैव शुकनाशः विरतः अभूत्।

व्याकरणविमर्शः -

क) समासः -

१. नवयौवराज्याभिषेकमङ्गलम्- नवं यौवराज्यं नवयौवराज्यमिति कर्मधारयसमासः, तस्मिन् अभिषेकः नवयौवराज्याभिषेकः इति सप्तमीतत्पुरुषसमासः, तस्य मङ्गलम् नवयौवराज्याभिषेकमङ्गलम् इति षष्ठीतत्पुरुषसमासः।

२. स्वबन्धुवर्गम्- स्वस्य बन्धुः स्वबन्धुः इति षष्ठीतत्पुरुषसमासः, स्वबन्धोः गर्वः स्वबन्धुगर्वः इति षष्ठीतत्पुरुषसमासः, तं स्वबन्धुवर्गम्।

३. सप्तद्वीपभूषणां - सप्त द्वीपानि सप्तद्वीपानि इति कर्मधारयसमासः, सप्तद्वीपानि एव भूषणं यस्याः सा सप्तद्वीपभूषणा इति बहुव्रीहिसमासः, तां सप्तद्वीपभूषणाम्।

४. आरूढप्रतापः- आरूढः प्रतापः येन सः आरूढप्रतापः इति बहुव्रीहिसमासः।

ख) सन्धिविच्छेदः

१. इत्येतावत् - इति एतावत्।

२. अभिधायोपशशाम - अभिधाय उपशशाम।

कोशः

१. "स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम्।" इत्यमरवचनात् प्रतापः, प्रभावः, कोषदण्डजं तेजः इत्येते पर्यायाः।

पाठगतप्रश्नाः-४

१५. मन्त्रिमते राजकुमारः किम् अनुभवेत्।

१६. राजकुमारः मन्त्रीच्छानुसारं किम् अवनमयेत्।

१७. राजकुमारः कस्याः पुनर्विजयं कुर्यात्।

१८. कीदृशस्य राज्ञः आदेशः देववत् सिद्धो भवति।

१९.५) साम्प्रतं मूलपाठम् अवगच्छाम – १७

उपशान्तवचसि शुकनासे चन्द्रापीडस्ताभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो मुहूर्त्तं स्थित्वा स्वभवनमाजगाम।

व्याख्यानम् -

शुकनासे प्रधानाऽमात्ये उपशान्तवचसि उपशान्तं वचः यस्य तस्मिन् निवृत्तवचने तूष्णीम्भावम् आपन्ने सति चन्द्रापीडः राजपुत्रः ताभिः पूर्वप्रोक्ताभिः उपदेशवाग्भिः शिक्षावचनैः प्रक्षालितः धौत इव, उन्मीलितः विकसितः इव, स्वच्छीकृतः अतिशयेन निर्मलीकृतः इव, निर्मृष्टः संस्कृत इव, अभिषिक्तः स्नातः इव, अभिलिप्तः उद्दीपितः इव, अलङ्कृतः सज्जीकृत इव, पवित्रीकृतः पवित्रतां प्राप्त इव, उद्भासितः समुज्ज्वलीकृत इव, प्रीतहृदयः प्रसन्नचेताः सन्, मुहूर्तं कञ्चित्कालं, स्थित्वा अवस्थानं कृत्वा, स्वभवनं निजप्रासादम्, आजगाम आगतः।

सरलार्थः -

शुकनासस्य उपदेशानन्तरं चन्द्रापीडः तैः विमलैः उपदेशवचनैः धौत इव, प्रबोधित इव, मसृणीकृत इव, अभिषिक्त इव, अभिलिप्त इव, भूषित इव, पवित्रीकृत इव, उज्ज्वलीकृत इव सञ्जातः इत्यनुभूय प्रीतहृदयः सन् क्षणम् अवस्थाय निजगृहं प्रति आगतवान्।

व्याकरणविमर्शः -

समासः -

१. उपशान्तवचसि - उपशान्तं वचः यस्य स उपशान्तवचाः, तस्मिन् इति बहुव्रीहिसमासः।

२. प्रीतहृदयः- प्रीतं हृदयं यस्य स प्रीतहृदयः इति बहुव्रीहिसमासः।

३. स्वभवनम्- स्वस्य भवनं स्वभवनम् इति षष्ठीतत्पुरुषसमासः।

सन्धिविच्छेदः

१. चन्द्रापीडस्ताभिरुपदेशवाग्भिः- चन्द्रापीडः ताभिः उपदेशवाग्भिः।

अलङ्कारविमर्शः

१. उपशान्तेति वाक्ये नवानामुत्प्रेक्षाणामनपेक्षया स्थितेः संसृष्टिरलङ्कारः। तल्लक्षणं तावद् विद्यानाथेनोक्तम् -

"तिलतण्डुलसंश्लेषन्यायाद् यत्र परस्परम्।

संश्लिष्येयुरलङ्काराः सा संसृष्टिर्निगद्यते।।" इति।

पाठगतप्रश्नाः- ५

१९. राजकुमारः चन्द्रापीडः कदा गृहं प्रत्याजगाम?

२०. राजकुमारः केन पवित्रीकृतः इव गृहं प्रत्यागतः?

२१. चन्द्रापीडः कथं गृहं प्रत्यागतः?

२२. स च राजकुमारः किं कृत्वा गृहं प्रत्याजगाम?

पाठसारः

मृषास्तुतिवचनैः विह्वलाः राजानः अनुचरैः कृतायामपि विडम्बनायां धूर्तान् तान् एव अन्धवत् सादरम् अभिनन्दन्ति। आत्मानं देवं मन्वानाः ते अविवेकिनः सञ्जाताः, अतः तेषां राज्ञां मनसि या धारणा समुत्पन्ना, तया तेषां बुद्धिः नष्टा। अत एव "मम बाहुद्वयमध्ये इतोऽपि बाहुयुगलमेकं गुप्तं वर्तते" इति भावयन्तः आत्मनः विष्णुसदृशान् आमनन्ति। अपि च "स्वललाटदेशे अपरं नेत्रमेकं त्वचा आवृतम् अस्ति" इति शङ्कमानाः ते स्वयं शिवसदृशान् मनन्ति। ते च तेषां दर्शनं तेषामेव अनुग्रहः इति भावयन्ति। स्वेषां दृष्टिपातम् अपि उपकाररूपेण गणयन्ति ते। केनापि सह सम्भाषणम् अपि दानवत्, तेषाम् आदेशाः वरप्रदानतुल्याः इति चिन्तयन्ति। स्वेषां स्पर्शनं पवित्रतासम्पादकम् इति अवबोधः तेषाम्। मिथ्यामाहात्म्यस्य गर्वेण गर्वितास्ते राजानः देवान् न नमन्ति, ब्राह्मणानां पूजनं न कुर्वन्ति, मान्यानां कृते सम्मानं न प्रदर्शयन्ति, पूजनीयान् न पूजयन्ति, नमस्करणीयान् न नमस्कुर्वन्ति। किञ्च गुरून् दृष्ट्वापि न उत्तिष्ठन्ति। अपि च ते विद्योपार्जनादीनां परिश्रमः निरर्थकः इति भावयन्तः पण्डितानाम् उपहासं कुर्वन्ति। वृद्धाः वार्धक्यकारणात् बुद्धेः अस्थिरतावशात् अधिकं प्रलपन्ति इति स्वीकुर्वाणाः ते राजानः वृद्धानाम् उपदेशं निष्प्रयोजनकम् इति भावयन्ति। स्वबुद्धेः तिरस्कारः भवति इति मन्वानाः ते राजानः मन्त्रिणाम् उपदेशेषु दोषान् आविष्कुर्वन्ति। किञ्च, हितवाक्यं वदताम् उपरि क्रोधं प्रकटयन्ति।

एते राजानः सर्वथा तान् एव पार्श्वे स्थापयन्ति, तैः सह एव सुखेन निवसन्ति, तेभ्यः एव ददति, तैः सह मित्रतां कुर्वन्ति, तेषामेव वाक्यानि शृण्वन्ति, तेभ्यः एव सर्वदा धनं वितरन्ति, तेषामेव सम्माननां कुर्वन्ति, तान् एव विश्वसनीयान् मनन्ति - ये जनाः नक्तन्दिवं निरन्तरम् अञ्जलिबद्धाः सन्तः कर्तव्यानि कर्माणि अन्यत्र स्थापयित्वा देवतावत् राज्ञां स्तुतिं कुर्वन्ति अथवा तेषां माहात्म्यस्य कीर्तनं कुर्वन्ति। येषां समीपे अत्यन्तनृशंसैः उपदेशैः परिपूर्णं तथा नितान्तनिर्दयं चाणक्यप्रणीतं नीतिशास्त्रम् एव प्रमाणं भवति। अभिचारक्रियायाः अनुष्ठानाय नितान्तं क्रूरस्वभावविशिष्टाः पुरोहिताः येषां शिक्षकाः सन्ति। परप्रतारणापरायणः मन्त्रिगणः येषाम् उपदेष्टा भवति। सहस्रराजानः यां लक्ष्मीं यथेच्छं भुक्त्वा परित्यक्तवन्तः तां प्रति येषाम् आसक्तिः अस्ति। मारणोपदेशैः परिपूर्णे तन्त्रशास्त्रे येषाम् आग्रहः विद्यते।

प्रकृत्या स्नेहवशात् सदयचित्तः अनुरक्तश्च भ्रतृगणः येषाम् उच्छेदपात्रं भवति। तादृशानां राज्ञां किमपि कार्यं न्यायसङ्गतं नैव भवति।

अस्माद् एव कारणात् शुकनासः राजकुमारं चन्द्रपीडं प्रति कथयति यत् – एवं कष्टप्रदे भयङ्करे राजशासनकर्तव्ये तथा विवेकहारिणि यौवनसमये च तेन प्रकारेण कर्म त्वया करणीयं येन जनाः तव उपहासं न कुर्युः, सन्तः निन्दां न कुर्युः, आचार्याः न धिग्वचनं दद्युः, मित्राणि न तिरस्कुर्युः, पण्डिताः न शोचेयुः। किञ्च, यथा कामिजनाः स्वसमानतया न प्रकटयेयुः, कार्यनिपुणाः न उपहासं कुर्युः, लम्पटाः सम्पदां भोगं न कुर्युः, भृत्याः न धनं हरेयुः, धूर्ताः न वञ्चयेयुः, स्त्रियः स्वविलासेन न मुग्धं कुर्युः, श्रीः त्वां न परित्यजेत्, अभिमानः त्वां न ग्रसेत्, कन्दर्पः स्वबाणैः त्वां न हन्युः, विषयाः न अत्यन्तम् आकर्षयेयुः, कस्यापि वस्तुनः उत्कटभोगेच्छया त्वं प्रवर्तितः न भवेः, आनन्दः त्वां न परित्यजेत् तथा वर्तितव्यम्। स्वभावेन एव त्वं धीरप्रकृतिविशिष्टः। पित्रा तारापीडेन भवति राजकुमारे अत्यन्तयत्नेन शुभसंस्काराः संस्थापिताः। सम्पत्तयो हि स्वभाविकतया चञ्चलचित्तं राज्यशासने अनभिज्ञं च जनम् एव उन्मत्तं कुर्वन्ति। तथापि तव विद्याविनयशौर्यादिगुणैः जनिता तुष्टिः मां तोषयति। अतः भूयो भूयस्ते कथयामि यत्, गुणवन्तं, सावधानं, नितान्तशक्तिमन्तं, सद्वंशजं, धीरस्वभावम्, उद्योगयुक्तं जनम् अपि दुर्जनं करोति इयं दुश्चरित्रा लक्ष्मीः।

शुकनासस्य मतानुसारं मङ्गलैः सह पित्रा तारापीडेन विधीयमानं युवराजपदाभिषेकस्य सुखं चन्द्रापीडः अनुभवेत्, परम्परया प्राप्तं पूर्वपुरुषैः धृतञ्च राज्यशासनस्य भारं च उद्वहेत्, शत्रूणां शिरांसि अधः कुर्यात्, स्वजनसमुदायञ्च उन्नमयेत्। अभिषेकानन्तरं तस्य पित्रा जितां जम्बुप्रभृतिसप्तद्वीपैः भूषितां वसुमतीं दिग्विजयाय बहिः गच्छन् चन्द्रापीडः पुनः स्वायत्तीकुर्यात्। अयमेव रिपुषु पराक्रमप्रदर्शनस्य कालः। तथाहि शत्रुषु राज्ञः प्रतापे उत्पन्ने सति तस्य आदेशः सर्वज्ञः इव अप्रतिहतः भवति इति एतावत्पर्यन्तम् उक्त्वैव शुकनाशः विरतः अभूत्।

शुकनासस्य उपदेशानन्तरं चन्द्रापीडः तैः विमलैः उपदेशवचनैः परिष्कृतः इव, प्रबोधितः इव, मसृणीकृतः इव, अभिषिक्तः इव, अभिलिप्तः इव, भूषितःइव,पवित्रीकृत इव, उज्ज्वलीकृत इव च सञ्जातः इत्यनुभूय प्रीतहृदयः सन् निजगृहं प्रत्यागतवान्।

पाठान्तप्रश्नाः

१. कस्माद् हेतोः राजानः प्रवञ्चकानामेव सादरम् अभिनन्दन्ति इति वर्णयत।

२. विवेकहीनाः सन्तः राजानः किं किं कुर्वन्ति सर्वं पाठदिशा वर्णयत।

३. मिथ्यामोहग्रस्ताः राजानः कान् कान् पार्श्वे स्थापयन्ति।

४. कीदृशानां राज्ञां कार्यं न्यायसङ्गतं न भवति।

५. शुकनासस्य मते राजकुमारेण कथम् आचरणीयम्।

६. कदा राज्ञः आदेशाः सर्वज्ञवत् अप्रतिहताः भवन्ति।

पाठगतप्रश्नोत्तराणि

१. राजानः आत्मविडम्बनां कृतवताम् अभिनन्दनं कुर्वन्ति।

२. स्वस्मिन् देवत्वारोपधारणया दुष्टानां राज्ञां बुद्धिः नश्यते।

३. अविवेकिनः राजानः स्वाम् आज्ञां वरप्रदानं मन्यन्ते।

४. अविवेकिनः राजानः अभिवादार्हान् न अभिवादयन्ति।

५. अविवेकी राजा हितवादिनाम् उपरि क्रोधं प्रकटयति।

६. मोहग्रस्ताः राजानः सर्वथा यः अहर्निशम् अञ्जलिबद्धः सन् स्तौति तं पार्श्वे कुर्वन्ति।

७. ते राजानः यः तस्य माहात्म्यम् उद्भावयति तेन सह सुखम् अवतिष्ठन्ते।

८. अन्यायकारिणः राज्ञः उपदेष्टारः पराभिसन्धानपराः मन्त्रिणः।

९. अत्यन्तभयङ्करकष्टप्रदे कुटिले च राज्यतन्त्रे राजा प्रलुब्धो न भवेत्।

१०. शुकनासनये राजकुमारः चन्द्रापीडः प्रकृत्या एव धीरः।

११. शुकनासमते साधुभिः राजकुमारः नैव निन्द्यः।

१२. राजकुमारे चन्द्रापीडे संस्काराः पित्रा तारापीडेन आरोपिताः।

१३. राजकुमारस्य गुणाः मन्त्रिणं शुकनासं मुखरीकृतवन्तः।

१४. दुर्विनीतया लक्ष्म्या सज्जनः दुर्जनायते।

१५. मन्त्रिमते राजकुमारः राज्याभिषेकमङ्गलम् अनुभवेत्।

१६. राजकुमारः मन्त्रीच्छानुसारं द्विषतां शिरांसि अवनमयेत्।

१७. राजकुमारः सप्तद्वीपभूषणायाः वसुमत्याः पुनर्विजयं कुर्यात्।

१८. आरूढप्रतापस्य राज्ञः आदेशः देववत् सिद्धो भवति।

१९. राजकुमारः चन्द्रापीडः शुकनासस्य उपदेशाद् अनन्तरं गृहं प्रत्याजगाम।

२०. राजकुमारः निर्मलाभिः उपदेशवाग्भिः पवित्रीकृतः इव गृहं प्रत्यागतः।

२१. चन्द्रापीडः प्रीतहृदयः सन् गृहं प्रत्यागतः।

२२. स च राजकुमारः मुहूर्तं स्थित्वा गृहं प्रत्याजगाम।

योग्यताविस्तारः

१९.६) कविपरिचयः

भूमिका - महाकविः बाणभट्टः गद्यकाव्यजगतः चक्रवर्ती । पद्यं वद्यं गद्यं हृद्यम् इति उक्तिः बाणस्य गद्यकाव्यस्य रचनादनन्तरमेव भणितिपदवीम् अधिगता इति भाति। कविराजः इति नामा

गद्यकविरेकः वदति यत् – "सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः" इति श्लेषार्थचमत्कारे वयं त्रय एव गद्यकवयः इति। बाणभट्टस्य कवितासामर्थ्यविचारे गोवर्धनाचार्यस्य प्रशंसावचनम् एवमस्ति –

"जाता शिखण्डिनी प्राक् यथा शिखण्डी तथाऽवगच्छामि।

प्रागल्भ्यमधिकमास्तुं वाणी बाणे बभूवे"ति॥

महाकविः जयदेवः ब्रूते, यथा –

"हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः" इति।

देशकालौ - महाकविना स्वेतिवृत्तं स्वविरचिते हर्षचरिते विस्तरशः प्रतिपादितम्। हिरण्यबाह्वपरनामिकायाः शोणानद्याः पश्चिमतटे स्थितः प्रीतिकूटाख्यः ग्रामः बाणस्य जन्मभूमिः आसीत्। सम्प्रति स्थानमिदं बिहारराज्यस्य आरामण्डलान्तर्गतम्। बाणभट्टस्य वंशः विद्याभ्यासे धर्माचरणे च अतीव सुप्रसिद्ध आसीत्। वात्स्यायनवंशजः चित्रभानुः बाणभट्टस्य पिता माता च राज्यदेवी। उक्तिरेवमस्ति लभ्यते - "अलभत च चित्रभानुस्तेषां मध्ये राजदेव्यभिधानायां ब्राह्मण्यां बाणमात्मजम्।" इति। अतोऽयं ब्राह्मण आसीदिति निश्चप्रचम्। बाणस्य जन्मस्थानस्य समीप एव यष्टिगृहम् नाम ग्रामः, ततोऽपि अनतिदूरे श्रीहर्षवर्धनस्य द्वितीयशिलादित्यस्य राज्यम् श्रीकण्ठदेशः आसीत्। हर्षवर्धनशिलादित्यस्य कालः ६०६-६४७ ख्रिष्टाब्दाभ्यन्तरे इति हर्षचरिते उल्लिखितम् । अतः बाणभट्टोऽपि सप्तमशतकस्य कविः इति स्पष्टम्।

जीवनचरितम् - शैशवे एव बाणस्य मातृवियोगः अभवत्। ततः पिता एव बालस्य रक्षणपोषणभारम् ऊढवान्। ततः समुचिते वयसि तस्य विधिवत् उपनयनादिसंस्काराः सम्पन्नाः। तेन च जनकात् सकलविद्या अधिगता। बाणस्य चतुर्दशे वयसि पितापि दिवं गतः। तदा खिन्नः बाणः मित्रैः सह ग्रामाद् ग्रामान्तरं पर्यटन् अन्तिमे प्रीतिकूटं प्रति गतः। तत्र एव तस्य कवित्वविकाशः संवृत्तः। चन्द्रसेनमातृषेणौ तस्य भ्रातरौ इति प्रसिद्धिः। ततः कवित्वप्रतिभा तस्य कर्णाकर्णिकया बहुत्र प्रसृता। तदा तत्कवित्वप्रतिभां श्रुत्वा चक्रवर्तिनः हर्षवर्धनस्य मातुलः चित्रभानोः मित्रं च कृष्णराजः मुग्धः। तस्य कृपया स हर्षवर्धनस्य आस्थानपण्डितमण्डल्यां स्थानं लब्धवान्। ततः किञ्चित्कालानन्तरं बाणभट्टः हर्षवर्धनस्य अतीव प्रियमित्रम् अभवत्। तदा बाणः हर्षवर्धनस्य जीवनचरितम् आश्रित्य हर्षचरितम् इति नामकं ग्रन्थं रचयामास। भूषणभट्टः बाणभट्टस्य पुत्रः।

कविकृतयः - महाकविः बाणभट्टः गद्यकाव्यद्वयविनिर्माणेन सहृदयानां हृदये अमरं स्थानं प्राप्तवान्। अत एव काव्यरसिकानाम् अयम् उद्घोषः "बाणोच्छिष्टम् जगत् सर्वम्" इति। तस्य गद्यकाव्यद्वयं तावत् हर्षचरितम् कादम्बरी चेति।

तत्र हर्षचरितम् इति आख्यायिकाग्रन्थः। वास्तविकम् इतिहासम् आश्रित्य अयं ग्रन्थः बाणभट्टेन विरचितः। एतस्य ग्रन्थस्य आख्यायिकात्वं स्वयमेव कथयति - "करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम्" इति। नेदं साधारणं चरितपुस्तकमपि तु सरसं काव्यम्। "ओजःसमासभूयस्त्वम् एतद् गद्यस्य जीवितम्" इति गद्यविषये आलङ्कारिकाणामुक्तिः। समेषामेव आलङ्कारिकाणां मते

ओजःसमासभूयोगद्यकाव्यसंरचने मूर्धन्यो बाणः। तस्य च ओजःसमासबहुलं गद्यकाव्यं भवति हर्षचरितम्। अस्मिन् ग्रन्थे अष्टौ उच्छ्वासाः सन्ति। तेषु आद्ये उच्छ्वासत्रये बाणः स्वीयां कथां लिखितवान्। तत्रैव तस्य वंशपरिचयादिकं निबद्धम्। चतुर्थोच्छ्वासात् समाप्तिपर्यन्तं राज्ञः हर्षवर्धनस्य चरितम् उपन्यस्तम्।

बाणभट्टस्य द्वितीयं प्रसिद्धं गद्यकाव्यं भवति कादम्बरी। कादम्बरी स्वीयकल्पनया रचितः कथाग्रन्थ इति बाणस्य स्वीयया "धिया निबद्धेयमतिद्वयी कथा" इत्युक्त्या एव ज्ञायते। कादम्बर्यामुक्ता कथा गुणाढ्यविरचिताया बृहत्कथायाः संगृहीता। बृहत्कथातः कथामादाय स्वकीयकवित्ववैभव्येन काव्यकलानैपुण्येन कथायां वैशिष्ट्यम् उत्पाद्य कादम्बरीं निबद्धवान् महाकविर्बाणः। अत एव रसिकजनोक्तिः - "कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते" इति। कादम्बरी स्ववैभवेन अन्वर्थनाम्नी कादम्बरी एव सम्पन्ना। कादम्बरी नाम मदिरा। मदिरा यथा मदमुत्पादयति तथैव इयं कथा अपि जनयति काव्यास्वादमदम्। बाणस्य कादम्बर्याः महती प्रशंसा विद्वद्भिः आलङ्कारिकैः कृता। यथा तत्र राजशेखरः –

"सहर्षचरितारब्धाद्भुतकादम्बरीकथा।

बाणस्य वाण्यनार्येव स्वच्छन्दा भ्रमति क्षितौ।।" इति। तथैव कीर्तिकौमुदीकारः भणति –

"युक्तं कादम्बरी श्रुत्वा कवयो मौनमाश्रिताः।

बाणध्वनावनध्यायो भवतीति स्मृतिर्यतः।।" इति।

एवं समासतः कविपरिचयः प्रस्तुतः।

१९.७) विशेषज्ञानाय अध्येतव्या ग्रन्थाः

बाणभट्टप्रणीतोऽयं कादम्बरीकथाग्रन्थः भारतीयसंस्कृतसाहित्ये अत्युत्कृष्टं पदम् अलङ्करोति। बहुभिः परमादरेण श्लाघ्यमानः अयं ग्रन्थः। अत्र शुकनासोपदेशः इत्यंशः अध्येयः अस्माकम्। तत्र अध्येतारः यदि इतः अपि दृढं ज्ञानम् तर्हि अधोलिखितान् ग्रन्थान् द्रष्टुं शक्नुयुः -

- **कादम्बरी** - चन्द्रकलासंस्कृतहिन्दीव्याख्योपेता
  व्याख्याकारः - आचार्य शेषराजशर्मा रेग्मीः
  प्रकाशकः - चौखम्बा सुरभारती प्रकाशन, वाराणसी
- **कादम्बरी** - चन्द्रकलाविद्योतिनीव्याख्याद्वयोपेता
  व्याख्याकारः - पण्डित कृष्णमोहनशास्त्री
  प्रकाशकः - चौखम्बा संस्कृत संस्थान, वाराणसी
- **कादम्बरी** - (वङ्गभाषायाम्)
  सम्पादकः - श्रीनीरदवरणभट्टाचार्यः
  प्रकाशकः - संस्कृत पुस्तक भाण्डारः, कोलकाता

१९.८) भाषाविस्तारः

शुकनासोपदेशः इत्यंशस्य पाठेन संस्कृतभाषायां ज्ञानवर्धनं निश्चप्रचम्। अध्येयांशस्य अध्ययनेन ज्ञानवर्धनस्य केचन उपायाः सामान्येन निर्दिश्यन्ते -

शुकनासोपदेश इति पाठ्यांशस्य अध्ययनेन भवान् -

१. संस्कृते गद्यसाहित्यरचनाकौशलं बोद्धुं शक्नोति।

२. नवीनपदानां तालिकानिर्माणं कर्तुं शक्नोति।

३. समासनामानि तत्प्रयोगकौशलं च ज्ञातुं शक्नोति।

४. नवीनधातूनां प्रकृतिप्रत्ययानां च प्रयोगं कोष्ठकं च कर्तुं शक्नोति।

५. नवीनपदानाम् अर्थानां च ज्ञानेन भाषासमृद्धिं कर्तुं शक्नोति।

१९.९) भावविस्तारः

१. कथामिमां गद्यरूपेण पठितुं पाठयितुं च भवन्तः शक्नुवन्ति।

२. नाटकरूपेण इयं कथा प्रस्तोतुं शक्यते।

३. धनपिपासा मरणस्य बीजमित्युपदेशं मनसि संस्थाप्य जीवने प्रवर्तनीयम्।

४. आज्ञा गुरूणां ह्यविचारणीया।

५. गुरूणां सज्जनानां च सर्वदा सम्मानं विधेयम्।

६. गुरूणाम् आज्ञाम् उपदेशं च स्वीकृत्यैव कार्ये प्रवर्तनीयम्।

७. मन्त्रिणः शुकनासस्य उपदेशं मनसि निधाय जीवनपरिपालनेन जीवनं सुष्ठु स्यात्।

८. कदापि धनयौवनादिकम् आश्रित्य अहङ्कारः न करणीयः।

॥ इति नवदशः पाठः ॥

२०

348sk20

आलंकारिकपरिचयः-१

प्रस्तावना

आधुनिकेषु सर्वप्रथमः अलङ्कारशास्त्रग्रन्थः भामहप्रणीतः काव्यालङ्कारः इति। अत एव अस्य शास्त्रस्य अलङ्कारशास्त्रनाम्ना प्रसिद्धिः। काव्यशास्त्रस्य वास्तविकं नाम अलङ्कारशास्त्रम्। तच्च अलङ्कारशास्त्रं काव्यस्य दर्शनशास्त्रम्। अलङ्कार इति पदे अलम्, कार इति पदद्वयम् अस्ति। "अक्षरं परमं ब्रह्म सनातनमलं विभुम्... वदन्ति" इति अग्निपुराणवचनानुसारेण अलम् इत्यस्य अर्थः परब्रह्म। अत एव अलङ्कारशास्त्रस्य अर्थः भवति ब्रह्मविद्याशास्त्रम्। कटककुण्डलादयः यथा शरीरस्य शोभां वर्धयन्ति तथैव अलङ्कारः अपि शब्दार्थमयस्य काव्यशरीरस्य शोभां वर्धयति। साधारणतया अलङ्कार इत्युक्ते शोभासम्पादक उपकरणविशेषः। अर्थात् अलङ्कारः सौन्दर्यपदवाच्यो भवति इति वामनस्य मतम्। यथा शरीरात् लावण्यं पृथक् न भवति तथा शब्दार्थमयात् काव्यशरीरात् अपि सौन्दर्यं पृथक् न भवति। काव्यस्य स्वरूपविषये उपादानविषये च आलङ्कारिकाणां मतवैसादृश्यं भवति। केचित् अलङ्कारम्, केचित् रीतिम्, केचित् रसम्, केचित् ध्वनिम्, केचित् वक्रोक्तिञ्च काव्यस्य प्राणभूतेन अङ्गीकृतवन्तः। पुराकाले आलङ्कारिकाः स्वपरिचयविषये स्वकीयग्रन्थे न किमपि लिखन्ति स्म। तस्माद् आलङ्कारिकाणां देशकालकृतिविषये पण्डितानां मतपार्थक्यं भूयशो दृश्यते। विविधेषु ग्रन्थेषु स्थितानि उद्धृतवाक्यानि परिपश्य प्राचीनालङ्कारिकाणां देशकालवंशपरिचयादीनाम् अनुमानं क्रियते। आलङ्कारिकाणां परम्पराविषयं देशकालकृतिं च समाश्रित्य पाठोऽयम्।

उद्देश्यानि

पाठस्यास्याध्ययनेन-

- आलङ्कारिकाणां विषये ज्ञानं भवेत्।
- आलङ्कारिकः तस्य देशः कालः कृतयः इति विषये ज्ञानं भवेत्।
- आलङ्कारिकस्य वंशविषयकं ज्ञानं भवेत्।
- कः आलङ्कारिकः कस्य सम्प्रदायस्य प्रवर्त्तकः इति ज्ञानं प्रभवेत्।

२०.१) भरतः

प्राचीनेषु आलङ्कारिकेषु नाट्यशास्त्रस्य प्रणेता महर्षिः भरतः अन्यतमः भवति। रससम्प्रदायस्य जनकः भरतमुनिः। तदीयम् - "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति सूत्रमेव

रसस्वरूपनिर्णायकेषु आदिमं प्रसिद्धम्। भरतमुनिः काव्ये रसस्य प्राधान्यं स्वीकृतवान्। अत एव आह – "न हि रसादृते कश्चिदर्थः प्रवर्तते" इति। अलङ्कारशास्त्रे नाट्याधिकरणम् अधिकृत्य द्वौ भरतौ उपस्थाप्येते। वृद्धभरतो भरतमुनिः च। सामान्यतस्तु मनुयाज्ञवल्क्यादीनां नामसु अपि वृद्धविशेषणं प्रयुङ्क्ते। तथैव भरतेन सहापि व्यवहृतं स्यात्। कथ्यते नाट्यशास्त्रं हि मूलतो द्वादशसाहस्री संहिता आसीत्। तस्य प्रणेता वृद्धभरतशब्देन संकेतितः भवति। भरतनामसम्बद्धं नाट्यशास्त्रं शतसाहस्री कृतिः मन्यते। भरतः स्वकीये नाट्यशास्त्रग्रन्थे स्वकीयपरिचयं न किम् अपि प्रदत्तवान्। अतः रससम्प्रदायकस्य जनकस्य महामुनेः भरतस्य देशकालादिविषये विदुषां मतवैसादृश्यं भूयशः परिलक्ष्यते।

देशः- प्राचीनशास्त्रकारैः स्वकीये ग्रन्थे स्वविषये किम् अपि न लिख्यते। तस्मात् भरतमुनेः अपि देशविषये न कुत्रापि किम् अपि प्राप्यते। अत एव विदुषां तु भरतमुनेः देशविषये मतवैसादृश्यम् अस्ति। प्रायः पुस्तके भरतमुनेः वासस्थानविषये न किमपि लिखति। केषाञ्चन मते तु काश्मीरवासी भरतमुनिः। केषाञ्चन मते तु उत्तरभारतीयः भरतमुनिः।

कालः - पौराणिकवंशक्रमानुसारेण भरतो व्यासवाल्मीकिभ्यां पश्चाद्वर्ती भवन् अपि इतरेभ्यः समेभ्यः संस्कृतभाषायां लेखकेभ्यः प्राचीनः प्रतीयते। भरतकृतस्य नाट्यशास्त्रस्य राहुलककृता टीका अभिनवगुप्तेन स्मर्यते। राहुलकस्य नाम तामिलमहाकाव्ये मणिमेकलये समायातम्। मणिमेकलये नामकस्य तस्य तामिलग्रन्थस्य रचनाकालः चतुर्थः ई. पू. मन्यते, अतो भरतस्य तत्पूर्वकालिकता समायाति। कालिदासोऽपि भरतं स्मरति। अतः कालिदासात् पूर्ववर्ती भरतमुनिः अयम्। अपरञ्च म्याकडोनेलमहोदयस्य मते तु भरतमुनिः षष्ठशताब्दीयः आलङ्कारिकः। महामहोपाध्यायस्य हरप्रसादशास्त्रिमहोदयस्य मते भरतमुनेः कालः द्वितीयशताब्दी। कालिदासस्य विक्रमोर्वशीये नाटके भरतमुनेः नाम प्राप्यते। एतेन ज्ञायते अष्टमशताब्द्याः पूर्वं नाट्यशास्त्रं प्रसिद्धम् आसीत्। अतः भरतमुनेः स्थितिकालः चतुर्थशतकात् पूर्वं मन्यते।

कृतिः- सम्प्रति उपलभ्यमानं नाट्यशास्त्रं भरतस्य कृतिः। इदं क्वचित् ३६ अध्यायात्मकम्, क्वचित् ३७ अध्यायात्मकं कथ्यते। मन्ये लेखकप्रमादात् कोऽपि अध्यायः विभक्तः स्यात्। अभिनवगुप्तः स्वीयायां भरतसूत्रस्य टीकायां सप्तत्रिंशतः अध्यायान् लिखति। प्रति अध्यायस्य प्रारम्भावसरे श्लोकम् एकम् शिवनमस्कारात्मकं लिखति, येन काश्मीरकशैवप्रत्यभिज्ञाशास्त्रीयषट्त्रिंशत्तत्त्वानि निदर्शितानि भवन्ति। इदम् अपि सम्भवति यत् अभिनवगुप्त एव तत्त्वानि अनुत्तरं च निर्देष्टुम् इच्छुः कमपि अध्यायं विभज्य अध्यायसंख्यां वर्धितवान्। प्राप्ते भरतसूत्रे ५००० श्लोकाः सन्ति। तथा कियद्गद्यमपि विद्यते। षष्ठसप्तमाष्टाविंशतितमाध्यायेषु केवलं गद्यभाग एव अस्ति। इतिहासविदः कथयन्ति यत् नाट्यशास्त्रं न एकस्मिन् काले रचितम् अपि तु दीर्घकालिकस्य साहित्यतत्त्वनिर्णयप्रयासस्य फलम् इदम् शास्त्रम्। नाट्यशास्त्रे त्रयः अंशाः विद्यन्ते- १. सूत्रं भाष्यम् च, अयमंशः प्राचीनतमः २. कारिका, मूलाभिप्रायं बोधयितुं कारिका रचिता ३. अनुवंश्यश्लोकाः, इमे श्लोकाः भरतादपि प्राचीनैः आचार्यैः रचिताः सन्ति। स्वमतं प्रमाणयितुं भरतेन अपि इमे श्लोकाः उपन्यस्ताः सन्ति। अत एव आह अभिनवगुप्तः- "ता एता ह्यार्या एकप्रघट्टकतया, पूर्वाचार्यैर्लक्षणत्वेन पठिता, मुनिना तु सुखसंग्रहाय यथास्थानं निवेशिताः" इति।

रससम्प्रदायकस्य प्रवर्तकः अयं भरतमुनिः। तदीयम्- "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति सूत्रमेव रससिद्धान्तं प्रतिपादयति। भरतमुनेः मते तु काव्ये रसः एव प्रधानः भवति। रसं विना न कदापि काव्यं सम्भवति। इतः परं विश्वनाथः अपि काव्ये रसस्य प्राधान्यतां स्वीकृतवान्। भरतमुनिः रससम्प्रदायस्य आदिमः आचार्यः भवति। भरतेन स्वीयनाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये रसस्य विषये स्वमतं प्रकाशितम्।

पाठगतप्रश्नाः-१

केचित् प्रश्नाः अधः प्रदीयन्ते-

१. रससम्प्रदायस्य प्रवर्तकः कः।

२. नाट्यशास्त्रस्य प्रणेता कः।

३. नाट्यशास्त्रस्य कस्मिन् कस्मिन् अध्याये रसस्य उल्लेखः लभ्यते।

४. नाट्यशास्त्रे कति अध्यायाः सन्ति।

५. भरतमुनेः कालः कः।

६. नाट्यशास्त्रे कति श्लोकाः सन्ति।

२०.२) भामहः

महर्षेः भरतात् परं प्राचीनेषु आलङ्कारिकेषु अन्यतमः भामहः आसीत्। अलङ्कारसम्प्रदायः भामहेन प्रवर्तितः। तस्य मते- "काव्यं ग्राह्यमलङ्कारात्"इति। अलङ्कारहीनं वनितावदनं यथा असुन्दरं तथैव शब्दार्थमयं निरलङ्कारं काव्यशरीरम् असुन्दरम्। अत एव आह- "न कान्तमपि निभूषं विभाति वनिताननम्"इति। भामहस्य मते तु काव्ये अलङ्कारः एव प्रधानो भवति। इदमेव मतं प्रमाणयितुं भामहः काव्यालङ्कारग्रन्थं लिखितवान्।

वंशपरिचयः - भामहः रक्रिलगोमिनः पुत्रः आसीत्। गोमिनपदं बौद्धेषु प्रयुज्यते, यथा चन्द्रगोमीत्यादि, अतोऽयं बौद्ध इति। अपरञ्च स्वीयस्य काव्यालङ्कारस्य प्रारम्भे अयं भामहः सार्वसर्वज्ञस्य स्तुतिं कृतवान्, अतः अयं बौद्धः इति बहुभिः सन्दिह्यते। वस्तुतस्तु अयं हिन्दुधर्मावलम्बी आसीत्। यतो हि यागादीनां सोमपानस्य च रामायणीयपात्राणां च प्रशंसां कृतवान्। न एतावत् अस्ति। भामहः अपोहवादस्य आलोचनं कृतवान्। अतः अयं भामहः हिन्दुधर्मावलम्बी आसीत्।

देशः- भामहस्य देशः काश्मीरः भवति। काश्मीरदेशवासी अयं भामहः इति सर्वैः पण्डितैः अङ्गीकृतम्।

कालः- भामहस्य समयः कः इति अस्मिन् विषये महान् मतभेदो भवति। भामहस्य स्थितिकालश्च सर्वाधिकविवादविषयः। सम्प्रति अपि अनिर्णीतः अस्ति। भामहदण्डिनोः पौवापर्यम्

आदाय अपि पण्डिताः विवदन्ते। केचित् भामहं दण्डिपूर्ववर्तिनं मन्यन्ते। अपरे तु तद्विपरीतम् एव। सौभाग्येन अधुना दण्डी भामहात् परवर्त्ती स्वीकृत एव, अतो यदि दण्डी सप्तमशतकप्रारम्भकालिकः तदा अयं भामहः षष्ठशतकवर्त्ती इति वक्तव्यम्।

अष्टमशतकोत्पन्नः भट्टोद्भटः भामहकृतं काव्यालङ्कारं व्याख्यातवान्। अतः भामहः तत्पूर्वकालिकः भवति। एतेन आगतं यत् भामहस्य कालः अष्टमशतकात् पूर्ववर्त्ती।।

भामहो हि भासं समीक्षते, कालिदासो हि भासं स्मरति, भामहस्तु कालिदासं न स्मरति। अतः भामहः भासकालिदासयोः अन्तर्वर्तिकालिकः। एतेन अपि आगतं यत् भामहस्य कालः षष्ठशतकम्।

केचन पाश्चात्याः विद्वांसः भामहकृतौ न्यासपदप्रयोगं दृष्ट्वा भामहं जिनेन्द्रबुद्धेः न्यासकारात् परवर्त्तिनं मत्वा सप्तमशतकपरवर्तित्वम् आतिष्ठन्ते। परन्तु मतम् इदम् निर्मूलम्। यतो हि जिनेन्द्रबुद्धिभिन्नस्य न्यासग्रन्थकारस्य भामहेन स्मरणं कृतम्। धर्मकीर्ति-दिङ्नागयोः मध्यकालिकः भामहः इति तदीयप्रत्यक्षलक्षणं दृष्ट्वा कथयन्तः अपि षष्ठशतकमध्यवर्तित्वम् आहुः। सप्तमशतकस्थभट्टिना भामहस्य श्लोकः अनुकृतः। अतः षष्ठशतकात् पूर्ववर्त्ती भामहः।

कृतिः- भामहः काव्यालङ्कारः इति नाम्ना एकं ग्रन्थं रचितवान्। वृत्तरत्नाकरे भामहनाम्ना केचित् श्लोकाः सन्ति। भामहः एकं छन्दोग्रन्थम् अपि लिखितवान् इति केचित्। परन्तु छन्दोग्रन्थस्तु सम्प्रति न उपलभ्यते। काव्यालङ्कारे षट् परिच्छेदाः सन्ति। प्रथमे परिच्छेदे काव्यसाधनतल्लक्षणतद्भेदाः वर्णिताः। द्वितीये तृतीये च परिच्छेदे अलङ्काराः आलोचिताः। चतुर्थे परिच्छेदे भरतोक्ताः दश दोषाः वर्णिताः। पञ्चमे न्यायविरोधिदोषाः वर्णिताः। षष्ठे विवादास्पदपदशुद्धिः विचारिता। प्रायः काव्यालङ्कारग्रन्थे ४०० श्लोकाः सन्ति। भरताद् अनन्तरम् अयम् एव ग्रन्थः अलङ्कारशास्त्रस्य सर्वमान्यः भवति। एतत्पूर्ववर्तितया मेधाविरुद्रस्य एकः ग्रन्थः आसीत्। परन्तु सः ग्रन्थः इदानीं नैव प्राप्यते। काव्यालङ्कारे शब्दार्थयुगलस्य काव्यत्वम्, भरतेन उक्तानां दशगुणानां माधुर्यौजप्रसादेषु अन्तर्भावः, वक्रोक्तेः सकलालङ्कारमूलत्वम् इति विशिष्टसिद्धान्ताः। भामहः रसं काव्यमूलत्वेन न स्वीकरोति। काव्यस्य प्राणस्वरूपत्वेन अलङ्कारम् एव स्वीकरोति। परन्तु भामहस्य मते सर्वः अपि अलङ्कारः वक्रोक्तिमूलकः भवति। अत एव प्राह – "सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते" इति। परवर्तिकाले वक्रोक्तिः पृथक् अलङ्कारः भवति। भामहस्य एव वक्रोक्तिम् आश्रित्य कुन्तकेन वक्रोक्तिजीवितम् इति ग्रन्थः रचितः। भामहः पृथक्तया रसं न स्वीकृतवान्। तथापि रसवत् अलङ्कारः भवति इति स्वीकृतवान्। अप्रस्तुतप्रशंसा वक्रोक्तिः इत्याद्यलङ्कारलक्षणविचारवेलायां व्यङ्ग्यार्थं स्वीकृतवान्।

अलङ्कारसम्प्रदायो भामहेन प्रवर्तितः। एतत्सम्प्रदायानुसारिणां मते अलङ्कारा एव काव्यस्य प्राणभूताः। शब्दार्थौ काव्यम् इति लक्षणेन शब्दार्थौ काव्यस्य शरीरम् इति स्वीकरणात् अलङ्कारः द्विविधः भवति। तौ शब्दालङ्कारः अर्थालङ्कारः चेति। सामान्यतया अनुप्रासः, उपमा, दीपकः, रूपकम् इति चत्वारः अलङ्काराः इति भरतमतम्। ते एव अलङ्काराः अनुदिनं वर्धमानाः कुवलयानन्दे १२५ सञ्जाताः। भामहः तस्य ग्रन्थे ३९ अलङ्कारान् स्वीकृतवान्। अलङ्कारसम्प्रदायप्रवर्त्तकाः रसतत्त्वं जानन्ति स्म, अत

एव ते रसादिवत् अलङ्कारः भवति इति उक्तवन्तः। रसा अपि अलङ्कारा एव न पृथक् तत्त्वान्तरम् इति तेषां मतम्।

पाठगतप्रश्नाः-२

केचित् प्रश्नाः अधः प्रदीयन्ते-

७. अलङ्कारसम्प्रदायस्य प्रवर्तकः कः।

८. काव्यालङ्कारग्रन्थस्य रचयिता कः।

९. भामहस्य देशः कः।

१०. भामहस्य पितुः नाम किम्।

११. भामहस्य स्थितिकालः कः।

१२. काव्यालङ्कारे कति अलङ्काराः स्वीकृताः।

२०.३) दण्डी

संस्कृतजगति काव्यशास्त्रस्य द्वितीयाचार्यत्वेन दण्डी स्मृतः भवति।

जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।

इत्येवमादिभिः प्राचीनसहृदयवचनैः संस्कृतसाहित्ये दण्डिनो महती प्रतिष्ठा अनुमीयते। "दण्डिनः पदलालित्यम्" इति उक्तिः अपि दण्डिनः प्रसिद्धौ प्रमाणम्। दण्डिनः वास्तविकं नाम न ज्ञायते। यथा भवभूतेः माघस्य च नामविषये श्रूयते तथैव ब्रह्माण्डच्छत्रदण्डः इत्यादिदशकुमारस्य मङ्गलाचरणे दण्डपदप्रयोगेण दण्डी इति नाम।

देशः - दण्डिनः वासदेशस्य निर्णये अवन्तिसुन्दरीकथा प्रमाणम्। तदनुसारेण दण्डिनः पूर्वपुरुषाः गुर्जरप्रान्तस्थिते आनन्दपुरे तिष्ठन्ति स्म। ततः ते दक्षिणदेशावस्थितं सम्प्रति एलिचपुरसंज्ञया प्रथमानमचलपुरं नाम स्थानम् आगताः। तदेवं कवेः दाक्षिणात्यभावः सिद्ध्यति। काञ्ची - कावेरी - चोल – कलिङ्ग – मलयानिल – प्रभृतिदक्षिणप्रसिद्धस्थानादीनां दण्डिना कृतो भूयसोल्लेख एव प्रमाणम्।

दण्डिनो दाक्षिणात्यत्वे इदम् अपि प्रमाणान्तरम् अनुमीयते यत् काश्मीरदेशभवा आलङ्कारिकाः दण्डिनः मतं प्रायशः न कथयन्ति। अतः दण्डिनः सुदूरदक्षिणवासित्वं सिद्ध्यति।

कालः- यद्यपि दण्डिनः स्थितिकालः न अद्यापि निर्णीतः तथापि तस्य प्रेयोऽलङ्कारोदाहरणे-

"इति साक्षात् कृते देवे राज्ञो यद्राजवर्मणः।
प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यताम्।।"

इति कथनात् राजवर्मणः समकालिकत्वं सिद्ध्यति। राजवर्मा हि नरसिंहापराभिधानः काञ्चीनरेशः ७३७-७७९ मितवैक्रमाब्दानभितः सिंहासनारूढः इति ऐतिहासिकाः प्रवदन्ति। अयम् एव कालः दण्डिनः भवति।

दण्डी हि बाणभट्टं मयूरञ्च स्मरति अवन्तिसुन्दरीकथायाम्। तत् च अभिनवगुप्तः लोचने समुद्धरति इति दण्डिनः स्थितिकालस्य इयम् एव पूर्वापरसीमा। अतो हि सामान्यतः ७१५-७९० मितवैक्रमाब्दानभितो दण्डिनः स्थितिकालः।

ख्रीष्टदशमशतकोत्पन्नः अभिनवगुप्तः लोचनग्रन्थे लिखति- "यथाह दण्डी - 'गद्यपद्यमयी चम्पूः' "इति।

ख्रीष्टदशमशतकपूर्वार्द्धसमुद्भूतः प्रतीहारेन्दुराजः उद्भटरचितस्य काव्यालङ्कारसारसंग्रहस्य लघुवृत्तौ लिखितवान् "अत एव दण्डिना 'लिम्पतीव' इत्यादि"।

कन्नड्भाषायां 'कविराजमार्ग'इति ग्रन्थम् एकम् अमोघवर्षः लिखितवान्। स स्पष्टभावेन काव्यादर्शम् आधारीकृत्य प्रणीत इति प्रतीयते। कविराजमार्ग इति नामकस्य तस्य ग्रन्थस्य रचनाकालः ८१५ ख्रीष्टाब्दतः - ८७५ ख्रीष्टाब्दमध्यवर्त्ती मन्यते।

दण्डी काव्यादर्शे यस्याः रीतेः वर्णनं कृतवान्। ताम् एव रीतिम् आश्रित्य वामनः काव्यालङ्कारसूत्रं रचितवान्। अतः दण्डी वामनपूर्ववर्त्तितया स्वीकर्तव्यः भवति। वामनस्य कालश्च ७७९ख्रीष्टाब्दतः ८१३ख्रीष्टाब्दो मन्यते।

एभिः प्रमाणैः दण्डिनः समयस्य परिसीमा अष्टमशतकम् इति मन्तव्यं भवति।

कृतिः - "त्रयो दण्डिप्रबन्धाश्च" एतदनुसृत्य काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति त्रयो ग्रन्थाः दण्डिनः कथ्यन्ते। केचित् - "छन्दोविचित्यां सकलस्तत्प्रपञ्चः प्रदर्शितः" इति दण्डिवचनेन छन्दोविचिति नामकम् अपि दण्डिनः ग्रन्थम् एकं कल्पयन्ति। अलङ्कारग्रन्थेषु काव्यादर्शः इति ग्रन्थस्य अन्तर्भावः। गद्यग्रन्थेषु दशकुमारचरितम्, अवन्तिसुन्दरीकथा इति ग्रन्थद्वयम्।

दण्डिनः काव्यादर्शः परमलोकप्रियः भवति। यतो हि कन्नड्भाषायां कविराजमार्ग इति नाम्ना अस्य ग्रन्थस्य अनुवादः कृतो भवति। अपरञ्च सिंहलभाषायां "सिय बसलकर" इति नाम्ना अनुवादः कृतो भवति। अस्मिन् ग्रन्थे ४ परिच्छेदाः सन्ति। अत्र ६६० श्लोकाः सन्ति। प्रथमे परिच्छेदे काव्यलक्षणम्, काव्यभेदाः, वैदर्भ्यादयः रीतयः, दश गुणाश्च वर्णिताः सन्ति। द्वितीये परिच्छेदे ३५ अलङ्काराः, तेषां लक्षणम्, तेषाम् उदाहरणम्, तेषाम् उपभेदाः कथिताः सन्ति। तृतीये परिच्छेदे शब्दालङ्कारस्य विवेचना यत्र यमकप्रपञ्चः, चतुर्थे परिच्छेदे दोषाणां गवेषणा कृता अस्ति।

दण्डी रीतिप्रस्थानं समर्थितवान्। तथापि दण्डी अलङ्कारप्रस्थानस्य अपि समर्थकः आसीत्। दण्डिनः मते उपमाद्यलङ्कारः श्लेषादिगुणः इति एते अलङ्कारपदवाच्याः भवन्ति। दण्डी माधुर्यगुणवर्णनवेलायां रसस्थितिविषये अपि प्राह यत् कदाचित् वर्णस्य अर्थस्य वा उत्कर्षसाधनाय माधुर्यगुणः रसं परिपोषयति। सर्वप्रथमं दण्डी एव काव्ये शब्दस्य प्राध्यान्यम् उक्तवान्। काव्यस्य संज्ञां

प्राह- "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इति। ततः परं जगन्नाथाचार्यः इदम् एव मतम् आश्रित्य ग्रन्थं लिखितवान्।

पाठगतप्रश्नाः-३

केचित् प्रश्नाः अधः प्रदीयन्ते-

१३. काव्यादर्शस्य रचयिता कः।

१४. दण्डिनः कालः कः।

१५. दण्डी कुत्रत्यः।

१६. काव्यादर्शे कति परिच्छेदाः सन्ति।

१७. काव्यादर्शे कति श्लोकाः सन्ति।

१८. काव्यादर्शस्य अनुवादग्रन्थः कः।

२०.४) वामनः

आलङ्कारिकसूच्यां वामनस्य महत्त्वपूर्णं स्थानम् अस्ति। तस्य हि काव्यालङ्कारसूत्राणि विषयप्रतिपादनदृष्ट्या अत्यन्तं महत्त्वपूर्णम् अस्ति। अयम् एव वामनाचार्यः रीतिसम्प्रदायस्य जनकः अस्ति। आलङ्कारिकः वामनः वैयाकरणात् काशिकारात् वामनात् भिन्नः भवति। आलङ्कारिकः वामनः काव्ये रीतेः एव प्राधान्यं स्वीकृतवान्। अत एव रीतिसम्प्रदायेषु अग्रगण्यः वामनाचार्यः भवति। वामनाचार्यस्य देशकालकृतिविषये सामान्यः परिचयः दीयते।

देशः - वामनः जयापीडनाम्नः काश्मीरराजस्य राष्ट्रकूटवंशस्य गोविन्दतृतीयस्य च सभापण्डितः सचिवः च आसीत्। राजतरङ्गिणीकारस्य "वामनाद्याश्च मन्त्रिणः"इति वचनात् ज्ञायते। अत एव काश्मीरदेशः वामनस्य वासस्थानम् आसीत्।

कालः - वामनः जयापीडनाम्नः काश्मीरराजस्य राष्ट्रकूटवंशस्य गोविन्दतृतीयस्य च सभापण्डितः सचिवश्च आसीत्। जयापीडस्य शासनकालः ७७९-८१९ ई.। गोविन्दस्य शासनकालः च ७९४ – ८१३ ई. मन्यते। अतः वामनस्य समयः अष्टमशतकस्य चरमभागः नवमशतकस्य आदिभागश्च निश्चीयते।

अभिनवगुप्तः वामनं स्वग्रन्थे लोचने "वामनाभिप्रायेणायमाक्षेपः" इति स्मरति। अतः वामनस्य अभिनवगुप्तपूर्ववर्तित्वं सिद्ध्यति। वामनश्च कादम्बरीम्, उत्तररामचरितम्, शिशुपालवधञ्च उदाहरति। अत एव वामनस्य बाण – भवभूति - माघपरवर्तिता सिद्ध्यति। एतेन अपि समायाति यत् वामनस्य समयः अष्टमशतकस्य चरमभागः नवमशतकस्य आदिभागश्च निश्चीयते।

कृतिः - वामनः काव्यालङ्कारसूत्रग्रन्थस्य रचयिता। वामनस्य काव्यालङ्कारसूत्रनाम्ना ग्रन्थः स्वोपज्ञवृत्तिसहितः प्रसिद्धः। अत्र ग्रन्थे अलङ्कारशास्त्रस्य सर्वे अपि विषयाः सूत्रैः निरूपिताः सन्ति। ग्रन्थे अस्मिन् पञ्च अध्यायाः सन्ति। अत्र ३१९ सूत्राणि सन्ति। अत्र अध्यायाः अधिकरणशब्देन व्यवहृताः सन्ति। प्रथमे अधिकरणे काव्यतत्प्रयोजनरीतयः निरूपिताः सन्ति। द्वितीये अधिकरणे पदवाक्यवाक्यार्थदोषाः निरूपिताः सन्ति। तृतीये अधिकरणे गुणविवेचना कृता यत्र दशगुणानां शब्दार्थवृत्तितया विंशतिविधता उक्ता, चतुर्थे अधिकरणे शब्दार्थालङ्काराः, पञ्चमे अधिकरणे कतिचन अशुद्धयः निर्दिष्टाः सन्ति। काव्यालङ्कारस्य प्राचीनः टीकाकारः सहदेवः कथितवान् यद् वामनस्य कृतिः नष्टा। तस्याः कृतेः उद्धारः मुकुलभट्टेन कृतः। स ग्रन्थः सम्प्रति प्राप्यते। वामनस्य केचन विशिष्टसिद्धान्ताः सन्ति। ते यथा - १. गुणालङ्कारयोः भिन्नता, २. रीतेस्त्रैविध्यम्, ३. वक्रोक्तेर्लक्षणारूपता, ४. विशेषोक्तेर्लक्षणवैचित्र्यम्, ५. समग्रस्य अपि अर्थालङ्कारप्रपञ्चस्य उपमारूपता। वामनो रीतिम् आत्मानं काव्यस्य अभिधत्ते। यद्यपि प्राचीना अपि विद्वांसः रीतिं निरूपितवन्तः। तथापि रीतिः काव्यस्य आत्मा इति तु वामनः सर्वप्रथमं प्रोक्तवान्।

रीतिसम्प्रदायस्य प्रवर्त्तकः वामनः, तन्मते रीतिः आत्मा काव्यस्य। का नाम रीतिः। पदसङ्घटना रीतिः। सेयं पदसङ्घटना गुणेषु आयत्तेति गुणसम्प्रदायात्मना परिणमते। रीतिभेदानां व्यवस्थितं वर्णनं दण्डी अपि कृतवान्। गुणालङ्कारयोः असङ्कीर्णं रूपं प्रकाश्य गुणानां शब्दार्थगतत्वेन विंशतिप्रकारता निरूपिता। काव्यशोभायाः कर्तारः धर्माः गुणाः। तदतिशयहेतवः तु अलङ्काराः सन्ति इति वामनमतम्। भामहादयः अपि रसम् अलङ्कारं च स्वीकृतवन्तः। वामनः रसं कान्तिगुणस्वरूपम् आख्याय तस्य आवश्यकतां स्वीकृतवान्।

पाठगतप्रश्नाः-४

केचित् प्रश्नाः अधः प्रदीयन्ते-

१९. रीतिसम्प्रदायस्य प्रवर्त्तकः कः।

२०. वामनस्य रचितग्रन्थस्य नाम किम्।

२१. वामनस्य देशः कः।

२२. वामनस्य कालः कः।

२३. वामनस्य मते काव्यस्य आत्मा कः।

२४. काव्यालङ्कारसूत्रे कति अधिकरणानि सन्ति।

२५. काव्यालङ्कारसूत्रे कति सूत्राणि सन्ति।

२०.५) रुद्रटः

आलङ्कारिकेषु अग्रगण्यः अयं रुद्रटाचार्यः। रुद्रटाचार्यस्य अपरं नाम रुद्रभट्टः। आलङ्कारिकसम्प्रदायेषु रुद्रटः इति नामकः आलङ्कारिकस्तु अत्यन्तं सुप्रसिद्धः अस्ति। भट्टवामुकस्य पुत्रः रुद्रटः आसीत्। रुद्रटः शतानन्दः इति नाम्ना परिचितः अस्ति।

देशः- रुद्रटाचार्यः काश्मीरवासी आसीत्। काश्मीरप्रान्ते एव शास्त्रचर्चाम् अकरोत्। अतः अस्य रुद्रटाचार्यस्य वासस्थानं काश्मीरदेशः आसीत्।

कालः - रुद्रटेन विरचितस्य काव्यालङ्कारस्य उद्धरणानि राजशेखरः भोजराजः प्रतिहारेन्दुराजश्च स्वकीये ग्रन्थे लिखन्ति। अतः राजशेखरादिभ्यः पूर्ववर्त्ती अयं रुद्रटाचार्यः। अत एव नवमशतकस्य उत्तरभागे रुद्रटः आसीत्।

दशमशताब्दीयः वल्लभदेवः रुद्रटस्य ग्रन्थस्य उपरि टीकां रचितवान्। एतेन आगतं यत् दशमशताब्द्याः पूर्वकालिकः रुद्रटाचार्यः भवति।

जैकोवीमहोदयः रुद्रटं शङ्करवर्मनाम्नः अवन्तिवर्मपुत्रस्य समसामयिकं मन्यते। अतोऽपि पूर्वोक्तः समय एव सिद्ध्यति।

कृतिः - काव्यालङ्कारः इति नामकं ग्रन्थं लिखितवान् रुद्रटः। शृङ्गारतिलकम् इत्यस्य प्रणेता रुद्रभट्टः। काव्यालङ्कारस्य प्रणेता रुद्रटः। अत्र रुद्रभट्टः रुद्रटः च समानः इति केषाञ्चित् मतम्। रुद्रटात् भिन्नः रुद्रभट्टः इति अपि एकः पक्षः। अधिकतया रुद्रटस्य कृतयः तिस्त्रः इति केचित्। ताः यथा- १. काव्यालङ्कारः, २. शृङ्गारतिलकम्, ३. त्रिपुरवधकाव्यम् चेति।

रुद्रटस्य काव्यालङ्कारः विषयविवेचनदृष्ट्या अतीव व्यापकः। काव्यप्रयोजनम्, काव्यस्य उद्देश्यम्, कवितासामग्री, अलङ्कारः, भाषा, रीतिः, रसाः, वृत्तयः सर्वे अपि विषयाः अत्र आलोचिताः। अलङ्कारसम्प्रदायस्य आचार्यः रुद्रटः। अतः काव्ये अलङ्काराः एव प्रधानाः। ग्रन्थे अस्मिन् षोडश अध्यायाः सन्ति। अत्र पद्यानि ७३४ मितानि सन्ति। अलङ्काराणां विभाजनं वर्गीकरणं च सर्वं प्रथमम् अयं कृतवान्। अलङ्काराणां मूलतत्त्वानि चत्वारि सन्ति। तानि च – वास्तवम्, औपम्यम्, अतिशयः, श्लेषः चेति। प्राचीनाः आलङ्कारिकाः अलङ्कारान् प्रोक्तवन्तः। तेषु काञ्चित् अलङ्कारान् त्यक्तवान्। नूतनतया केचित् अलङ्काराः स्वीकृताः। केषाञ्चित् अलङ्काराणां नामपरिवर्तितम् अस्ति। तदेवं सर्वथा अलङ्कारमार्गः परिष्कृतः। वस्तुतस्तु अलङ्काराणाम् समीक्षणम् आसीत् रुद्रटग्रन्थस्य उद्देश्यम्। नवरसातिरिक्तं प्रेयः वात्सल्यं वा रसः इति मन्यते।

पाठगतप्रश्नाः-५

केचित् प्रश्नाः अधः प्रदीयन्ते-

२६. रुद्रटस्य अपरं नाम किम् अस्ति।

२७. रुद्रटस्य कालः कः।

२८. रुद्रटस्य देशः कः।

२९. काव्यालङ्कारग्रन्थस्य रचयिता कः।

३०. काव्यालङ्कारे कति पद्यानि सन्ति।

३१. काव्यालङ्कारे कति अध्यायाः सन्ति।

२०.६) अभिनवगुप्तः

ध्वनिप्रस्थानस्य विशिष्टः आलङ्कारिकः अभिनवगुप्तः आसीत्। अयम् अभिनवगुप्तः न केवलम् आलङ्कारिकः आसीत् अपि तु शैवदर्शनाचार्यः तन्त्ररहस्यज्ञः च आसीत्। प्रायः कथा श्रूयते यत् स्वयं आनन्दवर्धनः अभिनवगुप्तात्मना प्रकटीभूतः अभवत्। ततः ध्वन्यालोकस्य लोचनम् इति टीकां लिखितवान्। अयम् अभिनवगुप्तः काश्मीरदेशस्य शारदाधामस्य अत्यन्तं प्रतिष्ठितः सिद्धः महापुरुषश्च आसीत्। अभिनवगुप्तः शिवस्य अवतारः इति जनश्रुतिः आसीत्।

देशः- अभिनवगुप्तस्य पूर्वपुरुषः अत्रिगुप्तः गङ्गायमुनयोः मध्यवर्तिस्थानं परित्यज्य ललितादित्यस्य निर्देशेन काश्मीरदेशः आगतः आसीत्। अत एव अभिनवगुप्तस्य वासस्थानं काश्मीरदेशः आसीत् इति विदुषां मतम्।

कालः - आनन्दवर्धनस्य ध्वन्यालोकग्रन्थस्य उपरि लोचनम् इति टीकां रचितवान्। एतेन आगतं यत् अभिनवगुप्तः आनन्दवर्धनपरवर्त्ती। अभिनवगुप्तस्य समयः दशमशताब्द्याः चरमभागः एकादशशताब्द्याः आदिभागः वा इति निश्चीयते।

वंशपरिचयः - अभिनवगुप्तस्य पितुः नाम चुखलः। चुखलस्य अपरं नाम नरसिंहगुप्तः। स शिवस्य परमो भक्तः आसीत्। तस्य मातुः नाम विमला। तस्य पितामहस्य नाम वराहगुप्तः। तस्य कनिष्ठभ्रातुः नाम मनोरथगुप्तः। उत्पलाचार्यः, प्रतीहारेन्दुराजः, लक्षणगुप्तः इति एते अभिनवगुप्तस्य गुरवः आसन्। कर्णः, मन्द्रः इति एतौ शिष्यौ।

कृतिः - अभिनवगुप्तस्य कृतिषु ध्वन्यालोकस्य लोचनटीका, भरतकृतनाट्यशास्त्रस्य अभिनवभारती नाम टीका, तन्त्रालोकः चेति त्रयो ग्रन्थाः नितान्तप्रसिद्धाः सन्ति। रससिद्धान्तप्रवर्त्तकतया अयं साहित्यशास्त्रस्य महोपकारकः भवति। भरतमुनिः अष्टौ रसान् स्वीकृतवान्। परन्तु नाट्यशास्त्रस्य उपरि अभिनवभारती इति टीकायाम् अभिनवगुप्तः नव रसान् प्रतिपादितवान्। शान्तः अपि रसः इति अभिनवगुप्तस्य मतम्। सम्प्रति नाट्यशास्त्रस्य कियत् माहात्म्यम् अस्ति इति ज्ञानं तु अभिनवभारती इति टीकां विना न सम्भवति। ध्वन्यालोकस्य उपरि लोचनटीका अपि मूलग्रन्थापेक्षया अधिका प्रशस्तिः प्राप्ता। विना लोचनं ध्वन्यालोकस्य एतावत् माहात्म्यं न स्यात्। आनन्दवर्धनः स्वकीये ध्वन्यालोके वस्तुध्वनेः, रसध्वनेः, अलङ्कारध्वनेः च समं प्राधान्यं दर्शितवान्। परन्तु अभिनवगुप्तः रसध्वनेः अधिकं प्राधान्यं स्वीकरोति तस्य लोचनटीकायाम्। तथैव जगति रसध्वनेः प्राधान्यता सर्वैः स्वीक्रियते। तदेव आह – "रसेनैव सर्वं जीवति काव्यम् .... न हि तच्छून्यं काव्यं किञ्चिदस्ति" इति।

इदम् एव मतम् आश्रित्य विश्वनाथः साहित्यदर्पणः इति ग्रन्थं रचितवान्। तत्र काव्यस्य लक्षणं प्राह- "वाक्यं रसात्मकं काव्यम्"इति। भैरवस्तवः, क्रमस्तोत्रः, बोधपञ्चदशिका, मालिनीविजयवार्तिकम, ईश्वरप्रत्यभिज्ञाविमर्शिनी, ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी इति एताः कृतयः अपि अभिनवगुप्तस्य आसन्।

अभिनवगुप्तस्य विषये काचित् जनश्रुतिः श्रूयते। भैरवस्त्रोत्रस्य आवृत्तिं कुर्वन् शिष्येण साकम् अभिनवगुप्तः गुहायाः अभ्यन्तरे प्रविष्टवान्। ततः परं स अदृश्यः अभवत्। अत एव अभिनवगुप्तः सिद्धः महापुरुषः इति जनाः मन्यन्ते।

पाठगतप्रश्नाः-६

केचित् प्रश्नाः अधः प्रदीयन्ते-

३२. अभिनवगुप्तस्य देशः कः।

३३. अभिनवगुप्तस्य कालः कः।

३४. लोचनटीकायाः कर्ता कः।

३५. अभिनवभारती कस्य ग्रन्थस्य टीका।

३६. अभिनवगुप्तस्य मातुः नाम किम्।

३७. अभिनवगुप्तस्य पितुः नाम किम्।

२०.७) कुन्तकः

आलङ्कारिकसम्प्रदायेषु कुन्तकाचार्यः अपि अग्रगण्यः भवति। वक्रोक्तिजीवितम् इति ग्रन्थस्य रचयिता कुन्तकाचार्यः। वक्रोक्तिकारः कुन्तकाचार्यः ध्वनिकारात् परवर्त्ती भवति। ध्वनिप्रस्थानस्य ध्वन्यालोकेन ध्वन्यालोकस्य लोचनम् इति टीकया च परिष्कृते अपि ध्वनिप्रस्थानस्य विरोधार्थं कुन्तकः वक्रोक्तिजीवितम् इति ग्रन्थं रचितवान्। वक्रोक्तिसम्प्रदायस्य प्रवर्त्तकः कुन्तकः। अयम् एव ग्रन्थः वक्रोक्तिसम्प्रदायस्य मुख्यः ग्रन्थः भवति।

देशः - कुन्तकस्य वासस्थानं काश्मीरदेशः आसीत्। कुन्तकाचार्यस्य शास्त्रचर्चा काश्मीरे एव संजाता। कुन्तकः काश्मीरवासी इति तु विदुषां न मतपार्थक्यं विद्यते।

कालः - वक्रोक्तिकारः ध्वनिप्रस्थानस्य विरोधाय वक्रोक्तिसम्प्रदायम् आरब्धवान्। अतः ध्वनिकारात् परवर्त्ती भवति कुन्तकः। ध्वनिकारस्य कालः नवमशतकम् आसीत्। अतः नवमशतकात् परवर्त्ती भवति कुन्तकः।

अभिनवगुप्तस्य समसामयिकः भवति इति जनश्रुतिः विद्यते। अभिनवगुप्तस्य कालः दशमशतकस्य चरमभागः एकादशशतकस्य आदिभागः वा।

अत एव कुन्तकस्य अपि स एव कालः भवति इति ऐतिहासिकाः प्रवदन्ति।

महिमभट्टस्य व्यक्तिविवेकग्रन्थे कुन्तकविरचितस्य वक्रोक्तिजीवितस्य उद्धृतं समालोचनं च विद्यते। वक्रोक्तिजीवितस्य सारः अलङ्कारसर्वस्वे विद्यते। एतेन आगतं यत् महिमभट्टस्य समकालिकः पूर्ववर्त्ती वा कुन्तकाचार्यः। कुन्तकाचार्यस्य समयः एकादशशतकम्।

कृतिः - वक्रोक्तिजीवितम् इति ग्रन्थस्य रचयिता कुन्तकाचार्यः। सम्प्रति प्रायः पूर्णः ग्रन्थः न उपलभ्यते। ग्रन्थे अस्मिन् चत्वारः उन्मेषाः सन्ति। येषु वक्रोक्तेः प्रभेदानां साङ्गोपाङ्गानां वर्णनं कृतम्। कुन्तकाचार्यः ध्वनिवादं न कदापि समर्थितवान्। वक्रोक्तिमाध्यमेन एव शब्दार्थस्य चमत्कारः भवति। व्यञ्जनाध्वनिः वक्रोक्तेः एकः भागः। कुन्तकाचार्यस्य मते वक्रोक्तिः एव काव्यस्य प्राणभूतः भवति। वक्रोक्तिजीवितग्रन्थे भामहस्य दण्डिनः उद्भटस्य वा उल्लेखं कृतवान्। किन्तु न कदापि आनन्दवर्धनस्य उल्लेखं कृतवान्। एवञ्च अभिनवगुप्तस्य अपि नामोच्चारणं नैव करोति स्वकीये ग्रन्थे कुन्तकाचार्यः। अभिनवगुप्तः अपि कुन्तकस्य नाम न लिखति तस्य टीकाग्रन्थे। एतेन अपि आयाति यत् ध्वनिप्रस्थानस्य विरोधं कृतवान् कुन्तकः। अथवा अभिनवगुप्तस्य समसामयिकः भवति कुन्तकाचार्यः। ध्वनिप्रस्थानं खण्डयित्वा वक्रोक्तिसम्प्रदायम् आरब्धवान्।

वक्रोक्तिः काव्यजीवितम् इति अवदन् कुन्तकादयः। वक्रोक्तिः नाम प्रसिद्धाभिधानव्यतिरिक्ता विचित्रैवाभिधा। भामहेन अतिशयोक्तिः एव वक्रोक्तिनाम्ना उक्ता। कुन्तकाचार्यः ध्वनेः अन्तर्भावं वक्रोक्तौ दर्शितवान्। सः अयं वक्रोक्तिसम्प्रदायः अनन्तरभाविभिः आचार्यैः न आदृतः। वक्रोक्तिः अपि कश्चित् अलङ्कारः इति रुद्रटः मन्यते। एवं प्रकारेण वक्रोक्तिसम्प्रदायस्य खण्डनं पूर्वाचार्याः कृतवन्तः।

पाठगतप्रश्नाः-७

केचित् प्रश्नाः अधः प्रदीयन्ते-

३८. कुन्तकस्य कालः कः।

३९. कुन्तकस्य देशः कः।

४०. कुन्तकस्य ग्रन्थस्य नाम किम्।

४१. वक्रोक्तिसम्प्रदायस्य जनकः कः।

४२. वक्रोक्तिजीवितग्रन्थे कति उन्मेषाः सन्ति।

४३. कुन्तकस्य मते काव्यस्य प्राणः कः।

पाठसारः

साहित्यग्रन्थेषु आनन्दः एव लभ्यते। तत्रापि अस्माकम् आनन्दः काव्यपठनेन भवति। काव्येषु दोषाणां विवेचनम्, काव्येषु रसादीनां प्राधान्यताविचारः इत्यादिकं तु अलङ्कारशास्त्रे जायते। तत्रापि केषाञ्चित् आलङ्कारिकाणां मते रसः एव काव्ये प्रधानः, केषाञ्चित् मते रीतिः एव प्रधाना, केषाञ्चित् मते काव्ये अलङ्कारः प्रधानः इति बहुधा मतानि आगतानि। अत एव रीतिप्रस्थानस्य, ध्वनिप्रस्थानस्य, अलङ्कारप्रस्थानस्य रसप्रस्थानस्य च आविर्भावः जातः। अत्र आलङ्कारिकाणां देशकालकृतिविषये चर्चा विद्यते। भरतमुनिः नाट्यशास्त्रस्य प्रवर्त्तकः भवति। चतुर्थः ईशवीयः पूर्वकालिकः भरतमुनिः काव्ये रसः एव प्रधानः इति मतम् आश्रित्य रसप्रस्थानस्य प्रारम्भम् अकरोत्। षष्ठशतकवर्त्ती काश्मीरवासी भामहः काव्यालङ्कारग्रन्थं रचितवान्। भामहस्य मते तु काव्ये अलङ्कारः एव प्रधानः भवति। अतः अलङ्कारप्रस्थानस्य प्रवर्त्तकः भामहः। अष्टमशतकवर्त्ती दाक्षिणात्यः आलङ्कारिकः दण्डी काव्यादर्शः इति ग्रन्थं लिखितवान्। दण्डी अलङ्कारसम्प्रदायस्य कश्चन प्रमुख्यः आचार्यः भवति। तथापि दण्डी रीतिविवेचकतया प्रख्यातः आसीत्। नवमशतकवर्त्ती काश्मीरवासी वामनः काव्यालङ्कारसूत्रं विरचितवान्। वामनस्य मते काव्ये अलङ्कारः एव प्रधानः भवति। अलङ्कारप्रस्थानस्य प्रवर्त्तकः वामनः। काश्मीरवासी रुद्रटः काव्यालङ्कारग्रन्थं लिखितवान्। अस्य मते अपि काव्ये अलङ्कारः एव प्रधानः भवति। अभिनवगुप्तः काश्मीरवासी आसीत्। तस्य स्थितिकालः तु दशमशतकोत्तरभागः भवति। अभिनवगुप्तः नाट्यशास्त्रस्य उपरि अभिनवभारती इति टीकां ध्वन्यालोकस्य उपरि लोचनम् इति टीकां च रचितवान्। अभिनवगुप्तः अपि रसप्रस्थानस्य एकः आचार्यः भवति। काव्ये रसः एव प्रधानः इति अभिनवगुप्तस्य मतम्। काश्मीरवासी कुन्तकाचार्यः वक्रोक्तिजीवितम् इति ग्रन्थं विरचितवान्। अस्य कालः भवति एकादशशतकम्। कुन्तकस्य मते तु काव्ये वक्रोक्तिः एव प्रधाना। अत एव ध्वनिप्रस्थानस्य विरोधं कृत्वा वक्रोक्तिसम्प्रदायं प्रारम्भितवान्। एवञ्च प्रकृतपाठे आलङ्कारिकाणां देशकालम् उक्त्वा तेषां कृतिविषये अपि किञ्चित् आलोचनं कृतम् अस्ति।

पाठान्तप्रश्नाः

१. भरतमुनेः देशकालकृतिविषये लघुटिप्पणीं लिखत।

२. नाट्यशास्त्रस्य संक्षिप्तं परिचयं लिखत।

३. भरतमुनेः सामान्यं परिचयं लिखत।

४. भामहस्य देशकालविषये लघुटिप्पणीं लिखत।

५. काव्यालङ्कारस्य संक्षिप्तं परिचयं लिखत।

६. भामहस्य कालविषये संक्षिप्तं परिचयं लिखत।

७. दण्डिनः देशकालकृतिविषये लघुटिप्पणीं लिखत।

८. दण्डिनः कालविषये संक्षिप्तं परिचयं प्रददातु।

९. काव्यादर्शस्य संक्षिप्तं परिचयं लिखत।

१०. वामनस्य संक्षिप्तं परिचयं प्रददातु।

११. वामनस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

१२. काव्यालङ्कारसूत्रस्य संक्षिप्तं परिचयं प्रददातु।

१३. रुद्रटस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

१४. काव्यालङ्कारग्रन्थस्य सामान्यं परिचयं प्रददातु।

१५. अभिनवगुप्तस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

१६. अभिनवगुप्तस्य कृतिविषये लघुटिप्पणीं लिखत।

१७. अभिनवगुप्तस्य सामान्यं परिचयं लिखत।

१८. कुन्तकस्य देशकालकृतिविषये प्रबन्धं लिखत।

१९. वक्रोक्तिजीवितम् इति ग्रन्थम् आश्रित्य प्रबन्धं लिखत।

पाठगतप्रश्नानाम् उत्तराणि

उपरि विद्यमानानां प्रश्नानाम् उत्तराणि प्रदीयन्ते-

१. भरतमुनिः।

२. भरतमुनिः।

३. षष्ठे सप्तमे च अध्याये।

४. ३६, ३७ वा अध्यायाः।

५. तामिलग्रन्थस्य रचनाकालः चतुर्थः ई. पू. मन्यते, ततः पूर्ववर्ती भरतः।

६. ५००० श्लोकाः।

७. भामहः।

८. भामहः।

९. काश्मीरः।

१०. रक्रिलगोमिनः।

११. षष्ठशतकवर्त्ती

१२. ३९।

१३. दण्डी

१४. अष्टमशतकम्।

१५. दाक्षिणात्यः

१६. चत्वारः।

१७. ६६० श्लोकाः।

१८. कविराजमार्ग इति।

१९. वामनः।

२०. काव्यालङ्कारसूत्रम्।

२१. काश्मीरदेशः।

२२. अष्टमशतकस्य चरमभागः नवमशतकस्य आदिभागश्च।

२३. रीतिः।

२४. पञ्च।

२५. ३१९ सूत्राणि।

२६. रुद्रभट्टः।

२७. नवमशतकस्य उत्तरभागः।

२८. काश्मीरः।

२९. रुद्रटः।

३०. ७३४ पद्यानि।

३१. षोडश अध्यायाः।

३२. काश्मीरः।

३३. दशमशताब्द्याः आदिभागः
एकादशशताब्द्याः चरमभागो वा।

३४. अभिनवगुप्तः।

३५. नाट्यशास्त्रस्य।

३६. विमला।

३७. नरसिंहगुप्तः।

३८. एकादशशतकम्।

३९. काश्मीरदेशः।

४०. वक्रोक्तिजीवितम्।

४१. कुन्तकाचार्यः।

४२. चत्वारः उन्मेषाः।

४३. वक्रोक्तिः काव्यस्य प्राणः।

छात्राणां बोधसौकर्याय आलङ्कारिकाणां देशकालकृतिविषये तालिका प्रदीयते।

नाम	देशः	कालः	कृतिः
भरतः	काश्मीरः	चतुर्थशतकात् पूर्वम्	नाट्यशास्त्रम्
भामहः	काश्मीरः	षष्ठशतकम्	काव्यालङ्कारः
दण्डी	दाक्षिणात्यः	अष्टमशतकम्	काव्यादर्शः
वामनः	काश्मीरः	नवमशतकम्	काव्यालङ्कारसूत्रम्
रुद्रटः	काश्मीरः	नवमशतकम्	काव्यालङ्कारः
अभिनवगुप्तः	काश्मीरः	दशमशतकम्	अभिनवभारती, लोचनटीका,तन्त्रालोकः
कुन्तकः	काश्मीरः	एकादशशतकम्	वक्रोक्तिजीवितम्

॥ इति विंशः पाठः ॥

348sk21

२१

आलंकारिकपरिचयः-२

प्रस्तावना

कवयः साहित्यस्य निर्माणाय प्रयतन्ते। परन्तु अज्ञातपूर्वतया एव साहित्ये अलङ्काराणाम् आत्मप्रकाशो भवति। यथा विश्वस्य प्राचीनतमऋग्संहितायाम् ऋषयः अज्ञातपूर्वतया एव अलङ्काराणां प्रयोगं कृतवन्तः।

ऋग्वेदे उपमा, रूपकम्, अतिशयोक्तिः, अनुप्रासः इत्यादीनाम् अलङ्काराणां प्रयोगः अस्ति। अग्निपुराणे काव्यविभागः, काव्यस्य रीतयः, काव्यस्य गुणाः, इति एते विषयाः चर्चिताः सन्ति। इतःपरं साहित्यशास्त्रस्य विवेचनाय अलङ्कारशास्त्रम् अपि समागतम्। प्राचीनाः आलङ्कारिकाः काव्यविषये बहूनि मतानि प्रदत्तवन्तः। काव्ये कः प्राणभूतः भवति इति विषयं स्वीकृत्य आलङ्कारिकाणां मतसाम्यं मतवैसाम्यं च उभयधा दृश्यते। ध्वनिकारः आनन्दवर्धनः स्वकीये ध्वन्यालोकग्रन्थे ध्वनिः एव प्राणभूतः इति मतं दर्शितवान्। अत्र एव काव्ये ध्वनिविरोधिनां मतम् उपस्थाप्य खण्डितवान्। ततः परं मम्मटाचार्यादयः काव्यप्रकाशग्रन्थं लिखितवन्तः। तत्र काव्यलक्षणं प्राह- "तददोषौ शब्दार्थौ सगुणौ सावनलङ्कृती पुनः क्वापि" इति। इदम् एव काव्यलक्षणं खण्डयित्वा विश्वनाथः साहित्यदर्पणग्रन्थं लिखितवान्। तत्र वाक्यलक्षणं प्राह - "काव्यं रसात्मकं वाक्यम् "इति। ततःपरं जगन्नाथः वाक्यलक्षणम् इदम् खण्डयित्वा रसगङ्गाधरग्रन्थं लिखितवान्। तत्र वाक्यलक्षणं प्राह - "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति। एवम् आलङ्कारिकाः काव्यविषये स्वस्वसिद्धान्तं प्रतिपादितवन्तः।

भारतीयपरम्परायां विद्वांसः स्वकीये ग्रन्थे न कदापि स्वकीयपरिचयादिकं स्थापयन्ति। तस्मात् एतादृशानां विदुषां देशकालादिविचारः तु दुष्करः भवति। परन्तु ध्वनिकारस्य मतं मम्मटः स्वीकृतवान्, मम्मटस्य मतम् खण्डितवान् विश्वनाथः, विश्वनाथस्य मतं जगन्नाथः खण्डितवान्। एतेन आनन्दवर्धनमम्मटविश्वनाथादीनां मध्ये पौर्वापर्यं ज्ञातुं शक्यते। कदाचित् ग्रन्थे तत्तत्कालवर्त्तिनः राज्ञः नाम उपलभ्यते। एतैः प्रमाणैः आनन्दवर्धन – मम्मट- विश्वनाथ - जगन्नाथ इति एतेषां देशकालादिकम् अनुमीयते। ध्वनिकारादीनां देशकालकृतिविषये सामान्यः परिचयः इति एव अस्य पाठस्य विषयः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् वा -

- ध्वनिकारस्य परिचयं ज्ञातुं प्रभवेत्।
- ध्वनिकारस्य कृतिं ज्ञातुं शक्नुयात्।

- कः आलङ्कारिकः ध्वनिसम्प्रदायस्य प्रवर्तकः इति ज्ञातुं प्रभवेत्।
- आलङ्कारिकः तस्य देशः कालः कृतयः इति विषये ज्ञानं भवेत्।
- आलङ्कारिकस्य वंशविषयकं ज्ञानं भवेत्।
- कः आलङ्कारिकः कस्य सम्प्रदायस्य प्रवर्त्तकः इति ज्ञानं प्रभवेत्।

२१.१) आनन्दवर्धनः

आनन्दवर्धनो हि काव्यशास्त्राकाशे सर्वसमुज्ज्वलं नक्षत्रम्। अलङ्कारसाहित्यस्य इतिहासे आनन्दवर्धनः एकम् उज्ज्वलपूर्णम् अध्यायं रचितवान्। अलङ्कारसाहित्ये आनन्दवर्धनं विना अलङ्कारशास्त्रं न कदापि पूर्णताम् एति। काव्यजगति तस्य ध्वन्यालोकस्य प्रवेशः सुमहत् सौभाग्यम् आधत्ते। ध्वनिशास्त्रस्य व्याख्यातृत्वेन स हि सर्वान् एव आचार्यान् अतिशेते। आनन्दवर्धनः काव्ये ध्वनिः एव प्रधानः इति मत्वा ध्वनिसम्प्रदायम् आरब्धवान्। ध्वन्यालोके ग्रन्थे ध्वनेः अभाववादिनः लक्षणावादिनः अनिर्वचनीयतावादिनः च मतं खण्डयित्वा सर्वप्रथमं ध्वनिं प्रतिपादितवान्। इदानीं तादृशस्य ध्वनिकारस्य देशकालकृतिविषये आलोच्यते।

देशः - आनन्दवर्धनः काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डितः आसीत्। तत्र प्रमाणम् एकः श्लोकः वर्तते-

"मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।

प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः"।। इति

एतेन आगतं यत् आनन्दवर्धनः काश्मीरवासी आसीत्।

कालः - आनन्दवर्धनः काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डितः आसीत्। अत एव अवन्तिवर्मणः कालः एव आनन्दवर्धनस्य अपि कालः भवति। अवन्तिवर्मणः समयः ८५५ – ८८३ ई. विद्यते, अत आनन्दवर्धनः अपि तत्कालिकः भवति।

वंशपरिचयः - आनन्दवर्धनस्य पितुः नाम नोणभट्टः इति आसीत्। केषाञ्चित् मते ध्वनिकारः ध्वन्यालोककारः च समानः जनः इति। स च आनन्दवर्धनः। तत्र प्रमाणं राजशेखरस्य एकः श्लोकः -

"ध्वनिनातिगम्भीरेण काव्यतत्त्वनिवेशिना।

आनन्दवर्धनः कस्य नासीदानन्दवर्धनः।। "इति

परन्तु ध्वन्यालोकस्य लोचनटीकाकारः अभिनवगुप्तः कथयति यत् ध्वनिकारः ध्वन्यालोककारश्च न समानः जनः। ध्वनिकारिकायाः उपरि रचितायाः वृत्तेः नाम ध्वन्यालोकः। तत्र कारिकाः ध्वनिकारिकाः उच्यन्ते। वृत्तेः नाम आलोकः इति। केषाञ्चित् मते तु ध्वनिकारस्य अपरं नाम सहृदयः।

कृतिः - अयम् आचार्यः ध्वनिप्रस्थानस्य प्रवर्त्तनाय ध्वन्यालोकं ग्रन्थं रचितवान्। ध्वन्यालोकस्य अपरं नाम सहृदयालोकः, काव्यालोकः। आनन्दवर्धनस्य ध्वन्यालोकातिरिक्ताः

विषमबाणलीला, अर्जुनचरितम्, देवीशतकम्, इति त्रयः कविताग्रन्थाः प्राप्यन्ते। ध्वन्यालोके त्रयः अंशाः सन्ति। ते च कारिका, वृत्तयः, उदाहरणानि इति। अनेककविकृतिभ्यः आनन्दवर्धनः उदाहरणानि स्वीकृतवान्। परन्तु स कारिकां वृत्तिं च स्वयम् एव रचितवान्। केचन कथयन्ति यत् आनन्दवर्धनः कस्यचित् अन्यस्य अज्ञातनाम्नः कृतिभ्यः कारिकाम् अपि स्वीकृतवान्। केवलं वृत्तिम् एव आनन्दवर्धनः रचितवान्। अत्र ग्रन्थे १२९ कारिकाः सन्ति। अत्र चत्वारः उद्योताः सन्ति। प्रथमे उद्योते ध्वनिविरोधिमतं निराकृत्य काव्यस्य आत्मानं ध्वनिम् उपस्थापितवान्। ततःपरं वस्तुध्वनिम्, अलङ्कारध्वनिम्, रसध्वनिं च प्रतिपादितवान्। पुनश्च ध्वनिः द्विविधः भवति। यथा- विवक्षितान्यपरवाच्यध्वनिः, अविवक्षितवाच्यध्वनिः इति। अत्र ध्वनेः विभागद्वयम् उदाहरणमाध्यमेन प्रतिपादितवान्। द्वितीये उद्योते अविवक्षितवाच्यध्वनेः भेदः, प्रेयसः रसध्वनेः भेदः, गुणालङ्कारयोः भेदः इति एते विषयाः आलोचिताः सन्ति। तृतीये उद्योते रीतिवृत्त्योः आलोचनं कृतम्। चतुर्थे उद्योते कविप्रतिभायाः गुणीभूतव्यङ्ग्यकाव्यस्य च आलोचनम्।

ध्वनिप्रस्थानस्य प्रथमः आचार्यः आनन्दवर्धनः। अयम् एव आचार्यः ध्वनिसम्प्रदायम् आरब्धवान्। ध्वन्यालोककारात् पूर्ववर्त्तिनः आचार्याः अलङ्कारम्, रीतिम्, गुणम् काव्यस्य आत्मानम् उक्तवन्तः। तेषु प्रथमः ध्वन्यालोककारः ध्वनिं काव्यस्य आत्मानं मन्यते। तिसृभिः शक्तिभिः शब्दः अर्थं प्रतिपादयति। ताश्च अभिधा, लक्षणा, तात्पर्यम् इति। एषा शक्तित्रयव्यतिरिक्ता काचित् व्यञ्जना वृत्तिः भवति। ध्वनिवादे व्याकरणप्रसिद्धस्य स्फोटतत्त्वस्य स्वीकारः अस्ति। काव्ये रीतिगुणालङ्काराणां स्थाननिर्णयं कृत्वा ध्वनिं प्रतिपादितवान्। आनन्दवर्धनस्य मते गुणादिकं केवलं वाच्यवाचकचारुत्वहेतुं व्यतिरिक्तं न किमपि अस्ति। काव्ये शब्दस्य अर्थस्य च स्वकीयप्राधान्यतां परित्यज्य वाच्यातिरिक्तं व्यङ्ग्यार्थं प्रतिपादयति, स ध्वनिः। तदुक्तम्-

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्ग्यः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।। "इति

ध्वनिवादे गुणरीत्यलङ्कारादयः सर्वे एव रसपर्यावसायिनः। ध्वन्यालोककारस्य मतेन प्रभावितः अभिनवगुप्तः लोचनटीकां लिखितवान्।

पाठगतप्रश्नाः-१

१. ध्वन्यालोककारस्य समयः कः।

२. ध्वन्यालोककारस्य देशः कः।

३. ध्वन्यालोककारस्य पितुः नाम किम्।

४. आनन्दवर्धनः कं ग्रन्थं लिखितवान्।

५. ध्वनिसम्प्रदायस्य प्रवर्त्तकः कः।

६. ध्वन्यालोके कति कारिकाः सन्ति।

२१.२) अप्पयदीक्षितः

अलङ्काराकाशे आलङ्कारिकेषु अग्रगण्यः अप्पयदीक्षितः भवति। अयम् आचार्यः न केवलम् अलङ्कारशास्त्रे निपुणः भवति अपि तु इतरशास्त्रे अपि अस्य नैपुण्यं नितरां विद्यते। प्रायः सर्वस्मिन् शास्त्रे अस्य महाभागस्य ग्रन्थाः विद्यन्ते। अप्पयदीक्षितः साहित्यिकः, अद्वैती, विशिष्टाद्वैती, वैयाकरणः, आलङ्कारिकः, कविश्च आसीत्। प्रायः आचार्येण शतं ग्रन्थाः लिखिताः। तेषु अलङ्कारसम्बन्धिग्रन्थत्रयं विद्यते। अप्पयदीक्षितः, अप्पदीक्षितः, अप्पय्यदीक्षितः इति त्रिविधैः नामभिः संस्कृतजगति परिचितो भवति। जगन्नाथस्य रसगङ्गाधरग्रन्थे अपि त्रिविधं नाम एव श्रूयते।

देशः - अप्पयदीक्षितस्य जन्म दक्षिणभारते संजातम्। अयम् अप्पयदीक्षितः तामिळनाडु - अन्तर्गत-आर्काड्मण्डलस्थिते अडयप्पलं नाम्नि ग्रामे जन्म प्राप्तवान्। अप्यदीक्षितस्य देशः तामिळनाडुप्रदेशः आसीत्।

कालः - अप्पयदीक्षितस्य कालस्तु सप्तदशशतकम् आसीत्। आलङ्कारिकः जगन्नाथः अप्पयदीक्षितविरचितस्य चित्रमीमांसाग्रन्थस्य खण्डनं कृतवान्। एतेन ज्ञायते यत् अप्पयदीक्षितस्य जगन्नाथपूर्ववर्त्तिता आसीत्। अप्पयदीक्षितः प्रथमस्य वेङ्कटस्य निर्देशेन कुवलयानन्दनामकग्रन्थं रचितवान्। प्रथमवेङ्कटस्य कालस्तु १५८६- १६१३ख्रीष्टाब्दः। स एव कालः अप्पयदीक्षितस्य इति अनुमीयते। परन्तु तस्मिन् वंशे अप्पय इति नाम्ना बहवः आसन्। तस्मात् प्रकृताप्पयदीक्षितस्य कालनिर्धारणं तु दुष्करम्।

वंशपरिचयः - रङ्गराजाध्वरीन्दस्य पुत्रः अप्पयदीक्षितः। अयं भारद्वाजवंशोत्पन्नः आसीत्। स्वयमेव लिखति कुवलयानन्दे -

"इति श्रीमदद्वैतविद्याचार्य-श्रीमद्भरद्वाजकुल-जलधिकौस्तुभ-श्रीरङ्गराजाध्वरीन्द्र-वरसूनोः श्रीमदप्पयदीक्षितस्य कृतिः कुवलयानन्दः समाप्तः।" इति। अप्पयदीक्षितस्य सर्वे पितृपितामहादयः श्रोत्रियाः ज्योतिष्टोमादियागानाम् आहर्तारः सामवेदिनः आसन्। अद्वैतिनः अपि भूत्वा प्रायः शिवभक्तिपरायणाः आसन्। अप्पयदीक्षितस्य पितामहः आचार्यदीक्षितः आसीत्। अप्ययदीक्षितस्य आश्रयदाता वेङ्कटराजः आसीत्।

कृतिः - बहुभिः विश्वसनीयैः प्रमाणैः प्रतीयते यत् अप्पयदीक्षितस्य प्रायः शतं ग्रन्थाः विद्यन्ते। इतोऽपि अधिकसंख्याका एव ग्रन्थाः विद्यन्ते इति केचित् मन्यन्ते। अप्पयदीक्षितस्य वेदान्तसम्बन्धिग्रन्थाः, मीमांसासम्बन्धिग्रन्थाः, व्याकरणसम्बन्धिग्रन्थाः, शिवाद्वैतसम्बन्धिग्रन्थाः, स्तोत्रसम्बन्धिग्रन्थाः, अलङ्कारसम्बन्धिग्रन्थाः, काव्यसम्बन्धिग्रन्थाः च विद्यन्ते।

वेदान्तविषयकग्रन्थाः - १. सिद्धान्तलेशसंग्रहः, २. न्यायरक्षामणिः, ३. कल्पतरुपरिमलः, ४. न्यायमुक्तावली, ५. न्यायमणिमाला, ६. न्यायमञ्जरी, ७. अधिकरणपञ्चिका ८. तत्त्वमुक्तावली, ९. मणिमालिका इत्यादयः।

शिवाद्वैतपरायणाः ग्रन्थाः - १. शिखरिणी, २.रामायणतात्पर्यसङ्ग्रहः, ३. भारततात्पर्यसङ्ग्रहः, ४.शिवपूजाविधिः, ५.आनन्दलहरी, ६. शिवार्चनचन्द्रिका, ७. शिवाद्वैतनिर्णयः इत्यादयः ग्रन्थाः।

मीमांसाशास्त्रपरकग्रन्थाः - १. विधिरसायनम्, २. सुखोपयोजिनी, ३. उक्रपराक्रमः, ४. चित्रापटम्, ५. तान्त्रिकमीमांसा, ६. धर्ममीमांसापरिभाषा इत्यादयः।

व्याकरणे एकः ग्रन्थः विद्यते। तच्च पाणिनीयतन्त्रवादनक्षत्रमाला इति। काव्यशास्त्रे यादवाभ्युदयव्याख्या इति ग्रन्थः विद्यते। अलङ्कारशास्त्रे प्रायः चत्वारः ग्रन्थाः विद्यन्ते। ते च १. कुवलयानन्दः, २. चित्रमीमांसा, ३. वृत्तिवार्तिकम्, ४. लक्षणरत्नावली इति।

स्तोत्रसम्बन्धिग्रन्थाः - १. वरदराजस्तवः, २. इदंस्तवव्याख्या, ३. आत्मार्पणस्तुतिः, ४. मानसोल्लासः, ५. आदित्यस्तोत्रम्, ६. गङ्गाधराष्टकम् इत्यादयः। अत्र केषाञ्चित् प्रसिद्धग्रन्थानां नामोल्लेखः कृतः। प्रकृतपाठे आलङ्कारिकाणां विषये चर्चा भवति। अतः अलङ्कारशास्त्रसम्बद्धग्रन्थानां किञ्चित् सामान्येन परिचयः प्रदीयते। अप्पयदीक्षितः जयदेवविरचितं चन्द्रालोकग्रन्थं समाश्रित्य कुवलयानन्दनामकग्रन्थं प्रणीतवान्। अलङ्कारस्य उपरि टीकाविशेषः अयं ग्रन्थः। प्रायः ग्रन्थे २७३ श्लोकाः सन्ति। ग्रन्थकारः स्वयं कथयति यत् कुवलयानन्दग्रन्थे चन्द्रालोके विद्यमानान् अलङ्कारान् गृहीत्वा केचित् नवीनाः अलङ्काराः अपि प्रतिपाद्यन्ते। चन्द्रालोके शतम् अलङ्काराः विद्यन्ते। तैः अलङ्कारैः सह पञ्चदश नवीनाः अलङ्काराः प्रतिपादिताः सन्ति। तच्च प्राह-

"येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।

प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते।।" इति

अत्र अर्थालङ्कारस्य उपरि चर्चा विद्यते। राज्ञः वेङ्कटस्य निर्देशेन एव कुवलयानन्दग्रन्थं लिखितवान्।

चित्रमीमांसा इति अयम् उत्कृष्टग्रन्थः विद्यते। अत्र केवलं द्वादशानाम् अलङ्काराणां वर्णनं विद्यते। अत्र कारिकायाः रचनायाः परं गद्यवृत्त्या अन्येषां प्राक्तनानाम् आचार्याणां मतानि उपस्थापितवान्। क्वचित् क्वचित् मतानां खण्डनमपि कृतम् अस्ति। काव्यस्य ध्वनिः, गुणीभूतव्यङ्ग्यम्, चित्रम् इति त्रिविधः विभागः विद्यते। इतः परम् उपमालङ्कारस्य विचारं कृतवान्। द्वादश अलङ्काराः उपमान्तर्गताः इति दर्शितम्। परन्तु जगन्नाथः रसगङ्गाधरे चित्रमीमांसायाः खण्डनं कृतवान्। पुनश्च जगन्नाथः चित्रमीमांसाखण्डनम् इति पुस्तकं विरच्य दीक्षितस्य मतं खण्डितवान्।

वृत्तवार्तिकम् इत्यपि अपरः अलङ्कारग्रन्थः विद्यते। अस्मिन् ग्रन्थे परिच्छेदद्वयम् अस्ति। अत्र अभिधालक्षणयोः विषये चर्चा भवति। अत्र व्यञ्जनाविषये तु न किमपि प्रोक्तम् अस्ति।

केचन प्रातिपादयन्ति यत् लक्षणरत्नावली इति अपरः अलङ्कारग्रन्थः विद्यते। अत्र नान्दीपाठः, सूत्रधारः, पूर्वरङ्गम्, प्रस्तावना इति एते विषयाः चर्चिताः।

पाठगतप्रश्नाः-२

७. अप्पयदीक्षितस्य कालः कः।

८. अप्पयदीक्षितस्य देशः कः।

९. अप्पयदीक्षितस्य पितुः नाम किम्।

१०. अप्पयदीक्षितस्य एकस्य अलङ्कारग्रन्थस्य नाम लिखत।

११. किम् आधारीकृत्य कुवलयानन्दः रचितः।

१२. कुवलयानन्दे कति श्लोकाः सन्ति।

१३. वृत्तवार्तिके कति परिच्छेदाः सन्ति।

१४. चित्रमीमांसा इति ग्रन्थस्य खण्डनपरकग्रन्थः कः।

१५. अप्पयदीक्षितस्य आश्रयदाता कः।

२१.३) मम्मटः

आलङ्कारिकेषु अग्रगण्यः आचार्यः अयम्। भारतीयसंस्कृतसाहित्येषु एकोऽपि छात्रः न विद्यते, यः मम्मटं न जानाति। ध्वनिकारात् परम् अयम् आचार्यः भवति। अलङ्कारसाहित्ये यावन्मम्मटस्य उदयो न जातः तावत्काले ध्वनिविरोधिनः ध्वनिविरोधिग्रन्थान् लिखितवन्तः। परं मम्मटेन ध्वनिविरोधिनः तथा अधिक्षिप्ताः यथा पुनस्ते ध्वनिं विरोद्धुं साहसं न अकुर्वन्। अत एव तु अयम् काव्यप्रकाशकर्ता मम्मटः वाग्देवतावतारः ध्वनिप्रस्थानस्य परमाचार्यः उच्यते। संस्कृतजगति राजानक इति उपाधिना परिचितः भवति। मम्मटस्य देशकालकृतिविषये किञ्चित् आलोच्यते।

देशः- अयं मम्मटाचार्यः काश्मीरवासी भोजराजात् परवर्त्ती च भवति। मम्मट इति नाम राजानक इति उपाधिश्च प्रमाणयति यत् मम्मटाचार्यः काश्मीरवासी आसीत्।

कालः- ध्वनिकारस्य आनन्दवर्धनस्य ध्वनिप्रस्थानं सुदृढतया उपस्थापयितुं मम्मटः काव्यप्रकाशग्रन्थं लिखति स्म। एतेन आगतं यत् आनन्दवर्धनात् परवर्त्ती मम्मटाचार्यः। मम्मटाचार्यः स्वग्रन्थे अभिनवगुप्तस्य मतानि उल्लिखितवान्। अभिनवगुप्तः एकादशशतके आसीत्। अतः ततः अपि परवर्त्ती मम्मटाचार्यः। पद्मगुप्तस्य नवसाहसांकचम्पूकाव्ये स्थितस्य भोजराजप्रंशसाश्लोकस्य उद्धरणं काव्यप्रकाशे कृतम् अस्ति। नवसाहसाङ्कचम्पूकाव्यस्य रचनाकालः एकादशशतकम्। अयम् एव कालः मम्मटाचार्यस्य अपि। भोजराजात् परवर्त्ती अयम् आचार्यः। भोजराजस्य शासनकालः ९९६ ई. - १०५१ ई. आसीत्। अत एव मम्मटाचार्यस्य कालः एकादशशतकम्।

वंशपरिचयः - मम्मटस्य पितुः नाम जैयटः इति। मम्मटस्य अनुजौ कैयटोव्वटौ। अयं मम्मटाचार्यः नैषधीयचरितग्रन्थस्य रचयितुः मातुलः आसीत्। मूलतः मम्मटार्चार्यः काश्मीरवासी आसीत्।

परन्तु संस्कृतशिक्षायाः प्राप्त्यर्थं संस्कृतशिक्षायाः पीठस्थानं वाराणसीम् आगतवान्। एवञ्च वाराणस्याम् उपविश्य एव काव्यप्रकाशग्रन्थं रचितवान्।

कृतिः - मम्मटस्य काव्यप्रकाशः इति एका एव कृतिः विद्यते। तत्रापि मम्मटः सम्पूर्णकाव्यप्रकाशग्रन्थं न रचितवान्। काव्यप्रकाशः दशमपरिच्छेदगतपरिकरालङ्कारावधिः मम्मटेन कृतः, ततः अवशिष्टभागः अल्लटनाम्ना केनचित् विदुषा कृतः अस्ति। तदेव आह-

"कृतोऽयं मम्मटाचार्यैर्ग्रन्थः परिकरावधिः।

प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा"॥ इति

मम्मटस्य विद्वत्तां प्रमाणयितुं तत्काव्यप्रकाश एव अलम्। मम्मटस्य अपरा कृतिः शब्दव्यापारवृत्तिः इति ग्रन्थः। मम्मटाचार्यः सङ्गीतरत्नमाला इत्यपि एकं ग्रन्थं रचितवान्। परन्तु एतौ द्वौ ग्रन्थौ सम्प्रति न एव उपलभ्येते। पुनश्च ग्रन्थद्वयस्य रचयिता न मम्मटः इत्यपि ऐतिहासिकाः प्रवदन्ति। काव्यप्रकाशे दश उल्लासाः सन्ति। अस्मिन् ग्रन्थे प्रायः १४३ कारिकाः सन्ति। वस्तुतस्तु मम्मटाचार्यः ध्वनिवादस्य समर्थनाय काव्यप्रकाशग्रन्थं रचितवान्। काव्यप्रकाशस्य त्रयः अंशाः सन्ति। यथा- कारिका, वृत्तिः, उदाहरणम् इति। भरतस्य काश्चित् कारिकाः स्वकीयग्रन्थे निवेशितवान्। अवशिष्टाः कारिकाः स्वयम् एव लिखितवान्। वृत्तिस्तु मम्मटेन स्वयम् एव रचिता। उदाहरणानि परेषां पुस्तकात् स्वीकृतानि सन्ति। प्रायः षट् कारिकाः भरतस्य नाट्यशास्त्रात् स्वीकृतवान्। अतः काव्यप्रकाशस्थकारिकाः भरतेन रचिताः सन्ति इति ऐतिहासिकाः विवदन्ते। परन्तु मतमिदं भ्रान्तम् अस्ति। मम्मटाचार्यः आनन्दवर्धनस्य अभिनवगुप्तस्य च मतेन प्रभावितः सन् ध्वनिसिद्धान्तस्य सुदृढकरणाय ग्रन्थम् एकं रचितवान्। मम्मटमतेन काव्यस्य मूलं व्यञ्जना भवति। काव्यप्रकाशस्य प्रथमोल्लासे काव्यरचनायाः उद्देश्यम्, काव्यलक्षणम्, काव्यभेदः इति एते विषयाः चर्चिताः। द्वितीयोल्लासे शब्दवृत्तेः अर्थवृत्तेः च वर्णनम् अस्ति। तृतीयोल्लासे व्यञ्जनावृत्तेः सुविस्तृतं वर्णनम् अस्ति। चतुर्थोल्लासे ध्वनिभेदः रसस्वरूपालोचनम् इति एते विषयाः चर्चिताः सन्ति। पञ्चमोल्लासे ध्वनिगुणीभूतव्यङ्गकाव्ययोः वर्णनम्, तत्तद्भेदाः वर्णिताः सन्ति। षष्ठोल्लासे चित्रकाव्यस्य वर्णनम् अस्ति। सप्तमोल्लासे दोषाणां वर्णनम्, अष्टमोल्लासे गुणानां वर्णनम्, नवमोल्लासे शब्दालङ्काराणां वर्णनम्, दशमोल्लासे अर्थालङ्काराणां वर्णनम् अस्ति। काव्यप्रकाशस्य प्रसिद्धिः महती विद्यते। संस्कृतजगति श्रीमद्भगवद्गीतायाः अधिकाः टीकाः उपलभ्यन्ते। ततः परं मम्मटविरचितस्य काव्यप्रकाशस्य अधिकाः टीकाः विद्यन्ते। प्रायः संस्कृतेन ७५ टीकाः सन्ति। संस्कृतेतरभाषायाम् अपि बह्व्यः टीकाः सन्ति। एतेन काव्यप्रकाशस्य लोकप्रसिद्धिं ज्ञातुं शक्यते।

पाठगतप्रश्नाः-३

१६. मम्मटस्य उपाधिः का वर्तते।

१७. मम्मटस्य कालः कः।

१८. मम्मटस्य देशः कः।

१९. मम्मटस्य पितुः नाम किम्।

२०. मम्मटस्य ग्रन्थस्य नाम किम्।

२१. काव्यप्रकाशे कति उल्लासाः सन्ति।

२२. काव्यप्रकाशे कति कारिकाः सन्ति।

२३. मम्मटः कुत्र अध्ययनं कृतवान्।

२१.४) भोजराजः

अलङ्काराकाशे भोजराजः इति नाम तु अतीव प्रसिद्धम्। महाराजः भोजः धारानगरशासकः आसीत्। राजकार्येण सह शास्त्रस्य चर्चाम् अकुर्वन् इमे महाभागाः। महाराजस्य भोजस्य कविजनप्रियत्वं तु सर्वजनप्रसिद्धं विद्यते। महाराजभोजस्य शास्त्रेषु महती प्रीतिः आसीत्। अत एव स्वकीयराजसभायां विदुषः आह्वानं सदा भवति स्म। सर्वदा एव राजसभायां शास्त्रचर्चा भवति स्म। एतैः कर्मभिः साकं स्वयम् अपि शास्त्राध्ययनम् अकरोत्। एवञ्च सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः, रामायणचम्पूः इति एते ग्रन्थाः रचिताः आसन्। अत एव संस्कृतनभसि अयं महापण्डितः एकम् उज्ज्वलपूर्णं नक्षत्रम्।

देशः - प्राचीनकाले शिलाखण्डादिषु महाराजानां शासनकालः वंशपरिचयादयः च स्पष्टतया लिख्यन्ते। अयं राजा सन् कविः भवति। अतः महापण्डितस्य भोजस्य देशकालनिर्णये क्लेशः न विद्यते। महाराजः भोजः मालवदेशस्य धारानगरशासकः परमारवंश्यश्च आसीत्। अतः महाराजभोजस्य देशः मालवदेशः आसीत् इति निश्चप्रचम्।

कालः - अयं राजा १०१८ ईशवीये सिंहासनारूढो भूत्वा १०६३ पर्यन्तं शासनकार्यं चालितवान्। अतः भोजस्य समयः एकादशशतकम् आसीत्। मालवेशः स काश्मीरकानन्तराजसमकालिक इति।

"स च भोजनरेन्द्रश्च दानोत्कर्ष विश्रुतौ।

सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ।"

इति राजतरङ्गिणीवचनात् ज्ञायते। अनन्तराजश्च १०२० – ११५८ मितवैक्रमाब्दानभितः स्थितिमान् इति राजतरङ्गिणीतः ज्ञायते। एतदतिरिक्तं १०७८ मितवैक्रमाब्दे कृतं भोजस्य दानपत्रम् अपि लभ्यते इति तस्य अपि स्थितिकालः १०३० – १११० मितवैक्रमाब्दान्तरालवर्त्ती इति समम् अनुमीयते।

कृतिः - जगति राजकार्यं कुर्वन्तः शास्त्राध्ययनं कृत्वा शास्त्रादिरचनां कृतवन्तः इति एतादृशाः मानवाः दुर्लभाः सन्ति। भोजराजस्य सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशश्च काव्यसम्बन्धौ ग्रन्थौ। सरस्वतीकण्ठाभरणे हि पञ्च परिच्छेदाः सन्ति। तत्र प्रथमे परिच्छेदे दोषगुणयोः विवेचनम् अस्ति। तत्र पदगताः षोडश, वाक्यगताः षोडश, वाक्यार्थगताः षोडश इति अष्टाचत्वारिंशद्दोषाः विवेचिताः सन्ति। एवमेव शब्दगताः चतुर्विंशतिः अर्थगताः चतुर्विंशतिः इति अष्टाचत्वारिंशद्गुणाः सन्ति। द्वितीये परिच्छेदे

चतुर्विंशतिः शब्दालङ्काराः, तृतीये परिच्छेदे अर्थालङ्काराः, चतुर्थे उभयालङ्काराः, पञ्चमे हि रस-भाव-सन्धि-वृत्तीनां निरूपणम्। रत्नेश्वरः सरस्वतीकण्ठाभरणस्य रत्नदर्पणाख्यां व्याख्यां रचितवान्। एषा व्याख्या तृतीयपरिच्छेदपर्यन्तम् अस्ति। चतुर्थस्य हि परिच्छेदस्य टीका जगद्धरविरचिता, चतुर्थपञ्चमयोः जीवानन्दप्रणीता व्याख्या च लभन्ते।

शृङ्गारप्रकाशः अस्य अपरः ग्रन्थः विद्यते। अत्र हि षट्त्रिंशत्प्रकाशाः सन्ति। तत्र हि आद्याष्टप्रकाशेषु शब्दार्थविषयकवैयाकरणमतानि निरूपितानि सन्ति। नवमे गुणाः, दशमे दोषाः, एकादशे महाकाव्यम्, द्वादशे नाट्यञ्च सप्रपञ्चं निरूपितानि। शेषेषु चतुर्विंशतिप्रकाशेषु साङ्गोपाङ्गं रसाः विवेचिताः सन्ति। भोजमते तु शृङ्गार एव सर्वरसेश्वरः। यथोक्तम्-

"शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनाम्नः।

अम्नासिषुर्दश रसान् सुधियो वयं तु शृङ्गारमेव रसनाद्रसनाम नाम।।" इति।

किन्तु यः शृङ्गारः स न केवलं युनोः परस्पराकाङ्क्षात्मा अपि तु धर्मार्थकाममोक्षाख्यचतुर्विधभेदात्मकः अस्ति। काव्यशास्त्रकानने हि शृङ्गारप्रकाशः सर्वाधिकदीर्घकायं पुष्पं सर्वोत्कृष्टम्। भोजराजस्य चम्पूरामायणम् इति काव्यम् अपि विद्यते। परन्तु अलङ्कारसम्बन्धग्रन्थो न भवति। अतः तस्य चर्चादिकं प्रकृतपाठे न क्रियते।

पाठगतप्रश्नाः-४

२४. भोजराजस्य देशः कः।

२५. भोजराजस्य स्थितिकालः कः।

२६. सरस्वतीकण्ठाभरणम् इत्यस्य ग्रन्थस्य रचयिता कः।

२७. सरस्वतीकण्ठाभरणे कति परिच्छेदाः सन्ति।

२८. शृङ्गारप्रकाशे कति प्रकाशाः सन्ति।

२९. भोजमते काव्ये कः रसः प्रधानो भवति।

३०. चम्पूरामायणस्य कर्ता कः।

२१.५) विश्वनाथः

संस्कृतालङ्कारसाहित्ये मम्मटभट्टात् परं कविराजः विश्वनाथः एव अत्यन्तं प्रसिद्धः आसीत्। एवञ्च मम्मटस्य काव्यप्रकाशात् परम् अलङ्कारसाहित्ये कविराजविश्वनाथस्य साहित्यदर्पणः सर्वाधिकः लोकप्रियः ग्रन्थः भवति। सर्वशास्त्रस्वतन्त्रस्य कविराजविश्वनाथस्य जन्मसमयादिनिरूपणे स्फुटतरं तादृशं किम् अपि प्रमाणं न उपलभ्यते तथापि तन्निरूपणं न अतीव कठिनम् इव प्रतिभाति। अत एव सम्प्रति विश्वनाथस्य देशकालकृतिविषयकं किञ्चित् आलोचनं क्रियते।

देशः - कविराजः विश्वनाथः उत्कलदेशीयः आसीत्। यतो हि विश्वनाथः श्रीनरसिंहस्य सभापण्डितः सन्धिविग्रहकश्च आसीत्। अस्य पितामहोऽपि श्रीनरसिंहाख्यस्य नृपतेः मुख्यसभास्थः आसीत्। श्रीनरसिंहस्य राज्यम् उत्कलदेशः आसीत्। अत एव विश्वनाथस्य वासस्थानम् उत्कलप्रान्तम् इति।

कालः - कविराजः विश्वनाथः मम्मटात् अर्वाचीनः आसीत्। यतो हि विश्वनाथविरचिते साहित्यदर्पणनामकग्रन्थे मम्मटोक्तकाव्यलक्षण्स्य खण्डनं दृश्यते। विश्वनाथः जगन्नाथात् प्राचीनः आसीत्। यतो हि जगन्नाथः स्वकीयरसगङ्गाधरनामकग्रन्थे लिखति -" यत्तु रसवदेव काव्यमिति साहित्यदर्पणे निर्णीतं तन्न" इति। मम्मटजगन्नाथयोः मध्यवर्ती कालः विश्वनाथस्य भवति। साहित्यदर्पणस्य चतुर्थपरिच्छेदे यवनाधिपतेः अलावुद्दीनस्य स्मारकः श्लोकः -

"सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।

अल्लावुद्दीननृपतौ न सन्धिर्न च विग्रहः॥"

इति एवं श्लोकः विलसति। अनेन श्लोकेन अल्लाउद्दीनखिलजी स्मृतः भवति। अयं नृपतिः १३१० ईशवीये मृतः भवति। इत्थञ्च यदि निष्कर्षरूपेण विविच्यते तदा एकादशद्वादशत्रयोदशशताब्दीसम्भूताः मम्मट-श्रीहर्ष-जयदेवप्रभृतयः। तेषां वाक्यानि साहित्यदर्पणे "तददोषौ शब्दार्थौ" "धन्यासि वैदर्भि" "कदली कदली" इत्यादिना स्पष्टमेव उद्धृतानि सन्ति। पञ्चदशसमुद्भूतेन काव्यप्रदीपकृता गोविन्दठाक्कुरेण तददोषौ शब्दार्थौ इति विचारवेलायां "अर्वाचीनास्तु" इत्यादिना विश्वनाथमतम् एव उपस्थापितम् आसीत्। एभिः विचार्यमाणैः विश्वनाथकविराजस्य समयः चतुर्दशशतकं मन्यते।

वंशपरिचयः - विश्वनाथः समृद्धकुलसम्भवश्च आसीत्। अस्य कुलं पाण्डित्ये प्रसिद्धम्। विश्वनाथस्य पितुः नाम चन्द्रशेखरः आसीत्। विश्वनाथस्य पिता चन्द्रशेखरः पुष्पमाला, भाषार्णवश्च इति पुस्तकद्वयं रचितवान्। स्वयम् एव विश्वनाथः साहित्यदर्पणग्रन्थे कथयति -

"श्रीचन्द्रशेखरमहाकविचन्द्रसूनुश्रीविश्वनाथकविराजकुलं प्रबन्धम्।

साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेव वित्त।। "इति। चन्द्रशेखरस्य पुत्रः विश्वनाथः इति तु अयं श्लोकः एव प्रमाणम्। विश्वनाथस्य पितामहः नारायणदासः आसीत्। नारायणदासस्य पितामहत्वम् अपि साहित्यदर्पणस्थश्लोकतः अवगम्यते। तथा हि - " यदाहुः - श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां धर्मदत्तं स्थगयन्तः सकलहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्रीनारायणदासपादाः" इति। विश्वनाथस्य पितामहस्य भ्राता चण्डीदासः आसीत्। चण्डीदासः काव्यप्रकाशस्य दीपिकानामटीकां रचितवान्। सन्धिविग्रहकः इति विशेषणं विश्वनाथस्य आसीत्। एतेन अवगम्यते यत् जात्या ब्राह्मणः अयम् आसीत्।

कृतिः - प्रकाण्डविद्वत्कुले समुत्पन्नः विश्वनाथः अपि सर्वशास्त्रस्वतन्त्रः महान् विद्वान् च आसीत्। अयं पण्डितप्रवरः न केवलं संस्कृतभाषां जानाति स्म, अपि तु अष्टादश भाषाः जानाति स्म। अस्य "अष्टादशभाषावारविलासिनीभुजङ्ग" इति उपाधिः नानाभाषाभिज्ञत्वं समर्थयति। विश्वनाथस्य

कृतयः हि साहित्यदर्पणः, काव्यप्रकाशदर्पणः, राघवविलासमहाकाव्यम्, कुवलयाश्वचरितकाव्यम्, प्रभावतीपरिणयनाटिका, चन्द्रकलानाटिका, नरसिंहविजयकाव्यम्, प्रशस्तिरत्नावली च इति।

अस्य कृतिषु प्रसिद्धो ग्रन्थः साहित्यदर्पणः। अत्र काव्यस्य नाट्यस्य च सर्वाङ्गीणं विवेचनम् अस्ति। साहित्यदर्पणो हि काव्यशास्त्रस्य रत्नभूतः ग्रन्थः भवति। अत्र हि ग्रन्थे दश परिच्छेदाः सन्ति। तत्र प्रथमे परिच्छेदे काव्यविवेकः, द्वितीये परिच्छेदे शब्दशक्तयः, तृतीये परिच्छेदे रसनिरूपणम्, चतुर्थे परिच्छेदे ध्वनिविवेकः, पञ्चमे परिच्छेदे व्यञ्जनावृत्तिनिरूपणम्, षष्ठे काव्यविभागः, सप्तमे परिच्छेदे दोषप्रपञ्चः, अष्टमे परिच्छेदे गुणनिरूपणम्, नवमे परिच्छेदे रीतिनिरूपणम्, दशमे परिच्छेदे शब्दार्थालङ्कारविचार इति विवेच्यविषयाः सन्ति। काव्यशास्त्रविषये वस्तुतस्तु विश्वनाथो मम्मटम् एव अनुसरति किन्तु मम्मटं यत्र तत्र दूषयति अपि। विशेषतः काव्यप्रकाशकारोक्तकाव्यलक्षणं खण्डयित्वा "वाक्यं रसात्मकं काव्यम्" इति स्वमतं लक्षणं स्थापयति। साहित्यदर्पणस्य उपरि बहव्यः टीकाः समागताः सन्ति। यथा- आनन्ददासस्य लोचनाख्या टीका, महेश्वराख्यस्य विज्ञप्रिया टीका, जीवानन्दविद्यासागरस्य विमला टीका, कृष्णमोहनस्य लक्ष्मीः टीका, लोकमणिदाहालाख्यस्य कला टीका। साहित्यदर्पणस्य परवर्तिग्रन्थेषु प्रभावः सुतरां स्पष्टः। रसविवेचने अलङ्कारनिरूपणे काव्यभेदविवेके च तत्पश्चाद्वर्त्तिनः साहित्यदर्पणम् एव उपजीवन्ति।

पाठगतप्रश्नाः-५

३१. विश्वनाथः कुत्रत्यः।

३२. विश्वनाथस्य स्थितिकालः कः।

३३. साहित्यदर्पणग्रन्थस्य रचयिता कः।

३४. विश्वनाथस्य पितुः नाम किम्।

३५. विश्वनाथस्य पितामहस्य नाम किम्।

३६. साहित्यदर्पणे कति परिच्छेदाः सन्ति।

३७. विश्वनाथस्य पिता कं ग्रन्थं रचितवान्।

३८. चण्डीदासः कं ग्रन्थं रचितवान्।

२१.६) जगन्नाथः

संस्कृतजगति आलङ्कारिकेषु अन्यतमः अयम् आचार्यः। संस्कृतसाहित्ये बहुविधाः ग्रन्थाः जगन्नाथेन विरचिताः सन्ति। रसगङ्गाधरनामकग्रन्थं विरच्य जगन्नाथः आलङ्कारिकेषु अग्रगण्यः भवति। अयं जगन्नाथः आचार्यः विविधविषयेषु महान् पण्डितः आसीत्। पण्डितराजस्य जगन्नाथस्य अभ्युदयः

काव्यशास्त्रे नव्यपरम्परोद्द्योतकः। तस्य हि रसगङ्गाधरः काव्यसिद्धान्तान् नव्यन्यायपरम्परया व्याख्याति।

देशः -पण्डितराजः कुत्र जातः, कदा वा जात इति यथातथ्येन वक्तुं न शक्यते। अयं कोणसीमास्थानस्य त्रिलिङ्गब्राह्मणः आसीत्। आन्ध्रप्रदेशस्य पूर्वगोदावरीजनपदे इदं स्थानं समापतति। केचित् वदन्ति यत् पण्डितराजः गुण्टूरजनपदस्य तेनालीप्रखण्डे दाउनूरुग्रामे आसीत्। इदम् अनुमानं तदीयां कुलपरम्पराम् आश्रित्य सम्भवति। प्रतीयते गुण्टूरजनपदात् पूर्वगोदावरीजनपदं पण्डितराजपूर्वजाः गोदावरीं गताः भवेयुः। किन्तु जगन्नाथस्य रसगङ्गाधरे पण्डितराजस्य पितुः वाराणस्याम् अवस्थितिः प्रमाणिता भवति। एवं पण्डितराजस्य जन्मभूमिः अथ च विद्याभूमिः वाराणसी तथा च कर्मभूमिः जयपुरम्, दिल्लीनगरम्, मधुपुरी, असमप्रदेशः, अन्ते पुनः वाराणसी इति।

कालः - स हि शाहजहानस्य सभापण्डित आसीत् इति तस्य शाहजहानसमकालिकत्वं भवति। उक्तञ्च -

"दिल्लीवल्लभापाणिपल्लवतले नीतं नवीनं वयः।

दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः।

अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात्। "इति।

शाहजाहांसम्राजस्य शासनकालः १६२८ – १६५८ ई. मन्यते। पण्डितराजजीवितमु इति अस्ति एकः तेलेगुग्रन्थः। तद्दिशा पण्डितराजस्य जन्मसमयः १६०० ई. वर्ष आसीत्। स स्वयमेव "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः" इति कथयति इति मुगलप्रासादप्रवेशकाले स न्यूनम् अपि त्रिंशद्वर्षवयस्कस्तु आसीत्। तत्र तेन पञ्चदशवर्षाणि व्यतीतानि। यदा स देहलीं त्यक्तवान् तदा स पञ्चचत्वारिंशद्वर्षवयस्क आसीत् इति तस्य जन्म १६५५ मितवैक्रमाब्दम् इति अभितोऽनुमानं शक्यते। अत एव अयं जगन्नाथः सप्तदशशतकवर्त्ती आसीत्।

वंशपरिचयः - पण्डितराजो हि तैलङ्गो ब्राह्मणः आसीत्। अस्य पिता पेरुभट्टः आसीत्। अस्य माता लक्ष्मीदेवी।

विद्यावैभवम् - पण्डितराजपितुः गुरवः आसन् ज्ञानेन्द्रभिक्षुः, श्रीमहेन्द्रः, श्रीखण्डदेवः, अथ च शेषवीरेश्वरः।

"श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः

काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।। "

जगन्नाथः पितुः पेरुभट्टात् ज्ञानेन्द्रभिक्षोः सकलविद्यां पठितवान्। अस्य पिता पेरुभट्टः सर्वविद्याधरः आसीत्। पण्डितराजः अपि सर्वथा पितरम् एव अनुसरति स्म। अयं चापि पितुः आशिषा सर्वविद्याधरत्वम् आप्तवान्। प्रायः सर्वस्मिन् शास्त्रे जगन्नाथस्य पाण्डित्यम् अभावनीयं विद्यते।

कृतिः - संस्कृतजगति जगन्नाथस्य कृतिः अधिकाम् एव प्रशस्तिं प्राप्तवती। प्रायः सर्वस्मिन् शास्त्रे जगन्नाथस्य परिश्रमो विद्यते। जगन्नाथस्य कृतीनां विवरणं प्रस्तूयते।

१. गङ्गालहरी - द्विपञ्चाशत्पद्यबद्धा गङ्गास्तुतिः।

२. सुधालहरी - द्वात्रिंशत्पद्यात्मिका सूर्यस्तुतिः।

३. अमृतलहरी - एकादशश्लोककाया यमुनाप्रशस्तिः।

४. करुणालहरी - चतुष्षष्टिश्लोकमिता विष्णुस्तुतिः।

५. लक्ष्मीलहरी - एकचत्वारिंशत्पद्यात्मिका लक्ष्मीस्तुतिः।

६.यमुनावर्णनचम्पूः - चम्पूकाव्यविशेषः।

७. आसफविलासः - आसफखाँमहोदयस्य प्रशस्तिः।

८. प्राणाभरणम् - कामरूपाधीशस्य प्राणनारायणस्य प्रशस्तिः।

९. जगदाभरणम् - उदयपुराधीशराणाकर्णसिंहसूनोर्जगत्सिंहस्य प्रशस्तिः।

१०. चित्रमीमांसाखण्डनम् - अप्पयदीक्षितकृतस्य चित्रमीमांसाग्रन्थस्य खण्डनात्मकम् आलोचनम्।

११. मनोरमाकुचमर्दनम् - सिद्धान्तकौमुदीटीकायाः मनोरमायाः खण्डनम्।

१२. रसगङ्गाधरः - अपूर्णः अतिप्रौढः अलङ्कारशास्त्रग्रन्थः।

१३. भामिनीविलासः - कवितासङ्ग्रहविशेषः ग्रन्थः।

अत्र रसागङ्गाधरनामकस्य अलङ्कारग्रन्थस्य किञ्चित् आलोचनं क्रियते। रसगङ्गाधरग्रन्थे द्वे एव आनने दृश्येते। ग्रन्थश्च अयम् असम्पूर्णः अस्ति। अत्र हि काव्यस्वरूपम्, काव्यभेदाः, रसविवेकः, शब्दगुणानां लक्षणम्, अर्थगुणानां लक्षणम्, भावलक्षणम्, ध्वनिविवेकः, शक्तिविवेकः, अलङ्कारनिरूपणम्, इति एते विषयाः प्रतिपादिताः सन्ति।

जगन्नाथः कस्याञ्चन यवनयुवत्याम् आसक्तः जातिच्युतो भूत्वा ताम् उपमेये। तस्यां यवनयुवत्यां मृतायां जगन्नाथः राजाश्रयं परित्यज्य मथुराम् आयातः। तत्र तस्य १६७४ ई. मृत्युः अभवत्। मृत्योः पूर्वं प्रायश्चित्तं कर्त्तुम् अपि सन्नद्ध आसीत् परं तत्कालप्रसिद्धौ पण्डितौ भट्टजीदीक्षिताप्पय्यदीक्षितौ नानुमेनाते। तत्र कारणं तयोः जगन्नाथेन सह शास्त्रमतभेद एव उच्यते।

पाठगतप्रश्नाः-६

३९. जगन्नाथस्य समयः कः।

४०. जगन्नाथस्य देशः कः।

४१. कः रसगङ्गाधरं रचितवान्।

४२. रसगङ्गाधरे कति आननानि।

४३. जगन्नाथस्य पितुः नाम किम्।

४४. जगन्नाथस्य मातुः नाम किम्।

पाठान्तप्रश्नाः

१. आनन्दवर्धनस्य विषये लघुटिप्पणीं लिखत।

२. आनन्दवर्धनस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

३. ध्वन्यालोकस्य विषये लघुटिप्पणीं लिखत।

४. अप्पयदीक्षितस्य विषये लघुटिप्पणीं रचयत।

५. अप्पयदीक्षितस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

६. कुवलयानन्दस्य विषये लघुटिप्पणीं लिखत।

७. मम्मटाचार्यस्य विषये लघुटिप्पणीं रचयत।

८. मम्मटाचार्यस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

९. काव्यप्रकाशस्य विषये लघुटिप्पणीं रचयत।

१०. भोजराजस्य सम्बन्धे लघुटिप्पणीं लिखत।

११. भोजराजस्य देशकालकृतिविषये लघुटिप्पणीं लिखत।

१२. भोजराजस्य कृतिविषये लघुटिप्पणीं लिखत।

१३. विश्वनाथस्य देशकालकृतिविषये लघुप्रबन्धं लिखत।

१४. विश्वनाथस्य कृतिविषये लघुटिप्पणीं लिखत।

१५. विश्वनाथस्य विषये लघुटिप्पणीं रचयत।

१६. जगन्नाथस्य देशकालकृतिविषये लघुप्रबन्धं लिखत।

१७. जगन्नाथस्य कृतिविषये लघुटिप्पणीं रचयत।

पाठसारः

यस्मिन् खलु अवगते काव्यस्य निर्माणे स्वरूपदोषगुणालङ्कारादीनाम् अवधारणे च शक्तिः उन्मिषति तद् अलङ्कारशास्त्रम्। यथा च व्याकरणं भाषायां व्युत्पत्त्यै अपेक्ष्यते तथा अलङ्कारशास्त्रम् अपि काव्ये नैपुण्याय अपेक्ष्यते। पाठे अस्मिन् आलङ्कारिकाणां देशकालकृतिविषयिणी चर्चा क्रियते। नवमशतकवर्त्ती काश्मीरवासी आनन्दवर्धनः ध्वन्यालोकग्रन्थं रचितवान्। आनन्दवर्धनः अनेन ग्रन्थेन ध्वनिप्रस्थानम् आरब्धवान्। आनन्दवर्धनमते तु काव्ये ध्वनिः एव प्रधानः भवति। सप्तदश शतकवर्त्ती तामिळनाडुप्रदेशीयः अप्पयदीक्षितः कुवलयानन्दग्रन्थं विलिख्य आलङ्कारिकेषु अग्रस्थानं लब्धवान्। एकादशशतकवर्त्ती काश्मीरीयः मम्मटाचार्यः काव्यप्रकाशं विरच्य अलङ्कारसाहित्ये महतीं ख्यातिम्

अर्जितवान्। प्रायः द्वादशशतकवर्त्ती मालवदेशीयः भोजराजः सरस्वतीकण्ठाभरणम् इति ग्रन्थं विरचितवान्। चतुर्दशशतकीयः उत्कलदेशीयः पण्डितप्रवरः विश्वनाथः साहित्यदर्पणं रचितवान्। स च ग्रन्थः सम्प्रति अतीव जनप्रियः विद्यते। वाराणसीस्थः सप्तदशशतकवर्त्ती पण्डितराजः जगन्नाथः रसगङ्गाधरं रचितवान्। प्रायः अयम् एव अलङ्कारग्रन्थः अन्तिमः वर्तते। जगन्नाथस्य ग्रन्थं न कोऽपि खण्डयितुं समर्थः भवति।

पाठगतप्रश्नानाम् उत्तराणि

१. ८५५ – ८८३ ई.।
२. काश्मीरदेशः।
३. नोणभट्टः।
४. ध्वन्यालोकग्रन्थम्।
५. आनन्दवर्धनः।
६. १२९।
७. सप्तदश शतकम्।
८. तामिळनाडुप्रदेशः।
९. रङ्गराजाध्वरीन्द्रः।
१०. कुवलयानन्दः।
११. चन्द्रालोकम्।
१२. २७३।
१३. द्वौ परिच्छेदौ।
१४. चित्रमीमांसाखण्डनम्।
१५. प्रथमवेङ्कटः।
१६. राजानकः।
१७. एकादशशतकम्।
१८. काश्मीरदेशः।
१९. जैयटः।
२०. काव्यप्रकाशः।
२१. दश उल्लासाः।
२२. १४३ कारिकाः।
२३. वाराणस्याम्।
२४. मालवदेशः।
२५. एकादशशतकम्।
२६. भोजराजः।
२७. पञ्च परिच्छेदाः।
२८. षट्त्रिंशत् प्रकाशाः।
२९. शृङ्गाररसः।
३०. भोजराजः।
३१. उत्कलदेशीयः।
३२. चतुर्दश शतकम्।
३३. श्रीचन्द्रशेखरः।
३४. नारायणदासः।
३५. दश परिच्छेदाः।
३६. पुष्पमालाम्, भाषार्णवम्।
३७. काव्यप्रकाशस्य दीपिकां टीकाम्।
३८. सप्तदशशतकम्।
३९. वाराणसी।
४०. जगन्नाथः।
४१. द्वे आनने।
४२. पेरुभट्टः।
४३. लक्ष्मीदेवी।

छात्राणां बोधसौकर्याय आलङ्कारिकाणां देशकालकृतिविषये काचित् तालिका प्रदीयते।

नाम	देशः	कालः	कृतिः
आनन्दवर्धनः	काश्मीरः	नवमशतकम्	ध्वन्यालोकः
अप्पयदीक्षितः	तामिळनाडुप्रदेशः	सप्तदशशतकम्	कुवलयानन्दः
मम्मटाचार्यः	काश्मीरः	एकादशशतकम्	काव्यप्रकाशः
भोजराजः	मालवप्रदेशः	द्वादशशतकम्	सरस्वतीकण्ठाभरणम्
विश्वनाथः	उत्कलप्रदेशः	चतुर्दशशतकम्	साहित्यदर्पणः
जगन्नाथः	वाराणसी	सप्तदशशतकम्	रसगङ्गाधरः

॥ इति एकविंशः पाठः ॥



348sk22

२२

वृत्तिपरिचयः

प्रस्तावना

संस्कृतसाहित्ये वृत्ति इति शब्दः बहुषु शास्त्रेषु दृश्यते। परन्तु शास्त्रस्य भेदे सति वृत्तिशब्दस्यापि अर्थभेदः जायते। यथा- परार्थाभिधानं वृत्तिः इति व्याकरणशास्त्रे सुप्रसिद्धम्। साहित्यशास्त्रे तु अर्थबोधं प्रति अनुकूलः कश्चित् व्यापारः वृत्ति इति नाम्ना सुख्यातः वर्तते। तत्रापि वेदवेदान्तादिशास्त्रेषु यत् शास्त्रवाक्यं वर्तते, तेन शास्त्रवाक्येन तु साक्षात् शास्त्रार्थः प्रतिपाद्यते। साहित्यशास्त्रे तु प्रायः साक्षात् न कमपि अर्थं प्रतिपादयति। तत्र तु लक्षणावृत्तेः व्यञ्जनावृत्तेः च प्रयोगं करोति। यथा- भवतः क्व गृहम् इति प्रश्नः। उत्तरकर्ता तु ग्रामस्य शीतत्वपावनत्वादिधर्मस्य कथनाय गङ्गायां घोषः इति उत्तरति। अर्थात् साक्षात् उत्तरम् अदत्त्वा लक्षणावृत्त्या उत्तरति। एवञ्च सन्ध्यावन्दनं कुरु इति साक्षात् माता पुत्रं न कथयति। अपि तु गतोऽस्तमर्कः इति कथनेन व्यञ्जनावृत्त्या सन्ध्यावन्दनं कुरु इत्यर्थः गम्यते। काव्यादिषु लक्षणावृत्तेः व्यञ्जनावृत्तेश्च प्रयोगः भूयशः दरीदृश्यते। मूलार्थः गुप्ततया विद्यते। तस्मात् काचित् चमत्कृतिः दृश्यते। आदौ किञ्चित् वाक्यं श्रुतम्। ततःपरम् अभिधावृत्त्या शब्दस्य सङ्केतितार्थं स्मरति। ततः तात्पर्यवृत्त्या परस्परं पदार्थानाम् अन्वयेन शाब्दबोधः जायते। शब्दानां सङ्केतितार्थस्मरणात् परं कश्चित् बाधः भवति चेत् लक्षणावृत्तिः आश्रीयते। यथा- गङ्गायां घोषः इत्यस्य जलप्रवाहे ग्रामस्य अवस्थानासम्भवात् लक्षणावृत्त्या गङ्गाशब्दस्य गङ्गातीरम् इति अर्थः प्रतिपाद्यते। एवञ्च गतोऽस्तमर्कः इत्यत्र सूर्यः अस्तं गतः इत्यर्थे तात्पर्यं नास्ति। अत एव व्यञ्जनावृत्त्या सन्ध्यावन्दनं कुरु इत्यर्थः प्रतिपाद्यते। तात्पर्यवृत्त्या शब्दानाम् अन्वयमुखेन शाब्दबोधः प्रतिपाद्यते। प्रकृतपाठे अस्मिन् वृत्तिचतुष्टयं संक्षेपेण आलोच्यते।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- वृत्तीनां लक्षणादिकं ज्ञातुं समर्थो भवेत्।
- शाब्दबोधप्रक्रियां ज्ञातुं योग्यो भवेत्।
- लक्षणावृत्तिं ज्ञातुं समर्थो भवेत्।
- लक्षणावृत्तेः प्रयोगं कर्तुं शक्नुयात्।
- कुत्र लक्षणा प्रवर्तते इति विषये बोद्धुं शक्नुयात्।

- वाक्ये स्वयं लक्षणायाः प्रयोगं कर्तुं प्रभवेत्।
- लक्षणायाः प्रयोजनं ज्ञातुं शक्नुयात्।
- व्यञ्जनावृत्तिं ज्ञातुं समर्थो प्रभवेत्।
- व्यञ्जनावृत्त्या प्रतिपादितार्थं बोद्धुं पारयेत्।
- व्यञ्जनावृत्तेः व्यवहारं कर्तुं पारयेत्।
- का तात्पर्यवृत्तिः इति ज्ञातुं प्रभवेत्।
- तात्पर्यवृत्तेः स्वरूपं बोद्धुं शक्नुयात्।
- कुतः न अभिधया वाक्यार्थावबोधः इति ज्ञातुं शक्नुयात्।
- तात्पर्यवृत्तेः प्रयोजनं ज्ञातुं शक्नुयात्।

२२.१) वृत्तिलक्षणम्

शब्दश्रवणजन्यार्थबोधं प्रति शब्द एव कारणम्। कारणे सति कार्यं सम्भवेत्। अतोऽत्रापि अर्थबोधं प्रति अनुकूलः कश्चिद् व्यापारो वर्तते। प्राचीनभारतीयाचार्याणां नये अयं व्यापार एव वृत्तिरित्युच्यते। अर्थात् शब्दो हि कारणं, तत्कारणं प्रति व्यापारो हि वृत्तिः। साहित्यशास्त्रे वृत्ति इति शब्दः पारिभाषिकः। अत्र शक्तिः एव वृत्तिः। यया शक्त्या अर्थः प्रतिपाद्यते, सा वृत्तिः।

२२.२) वृत्तेः प्रकारभेदः

वृत्तिः प्रधानतः त्रिविधा अभिधा-लक्षणा-व्यञ्जनाभेदेन। केचित्तु तात्पर्यम् अपि वृत्तेः भेदत्वेन स्वीकुर्वन्ति। अतः वृत्तिः चतुर्धा अभिधा-लक्षणा-व्यञ्जना-तात्पर्यभेदेन। वृत्तेः प्रकारम् अवलम्ब्य पण्डितानां मतपार्थक्यं दरीदृश्यते।

केचन आचार्याः वदन्ति यदभिधावृत्त्या एव सर्वे एव अर्थाः प्रतिपादिताः भवन्ति। अतो लक्षणादिवृत्तीनां स्वीकारे नास्ति किमपि प्रयोजनम्। यथा मुकुलभट्टेन तस्य अभिधावृत्तिमातृकायाम् उक्तं यत् लक्षणा अभिधान्तर्गता एव।

महिमभट्टेन शब्दस्य एका एव अभिधावृत्तिः स्वीकृता। तन्मते यत्र अभिधाम् अन्तरेणैव अर्थबोधो भवति। तत्र अनुमितिसाहाय्येन एव भवति। अर्थात् लक्ष्यार्थस्तु अनुमितिगम्यः। स्वकीये व्यक्तिविवेकग्रन्थे लक्षणायाः पृथगस्तित्वं न स्वीकृतम्।

आचार्येण नागेशभट्टेन विरचिते परमलघुमञ्जूषानामकग्रन्थे पृथक्तया लक्षणावृत्तिस्तथा व्यञ्जनावृत्तिः स्वीकृता। तथापि अभिधावृत्तिस्तथा लक्षणावृत्तिः एकस्याः शक्तेरेव प्रकारभेदतया उल्लिखिता।

प्रसङ्गेऽस्मिन् नैयायिकानां मतमपि गुरुत्वपूर्णम्। ते अपि अभिधावृत्तिं लक्षणावृत्तिञ्च स्वीकुर्वन्ति। तन्नये व्यञ्जनावृत्तिस्वीकारेण नास्ति प्रयोजनम्। नैयायिकाः व्यञ्जनावृत्तिं खण्डयितुं विविधमूलग्रन्थान् तथा टीकाग्रन्थान् प्रणीतवन्तः। तन्मध्ये महिमभट्टविरचितः व्यक्तिविवेक इति तथा माधवतर्कसिद्धान्तविरचिता शक्तिवादस्य टीका अतीव गुरुत्वपूर्णा। आचार्यजयन्तभट्टेनापि तस्य

न्यायमञ्जरीग्रन्थे व्यञ्जनावृत्तिं खण्डयितुं प्रयत्नः विहितः। यतो हि वैशेषिकदर्शनं न्यायदर्शनस्याङ्गतया गण्यते। अतो बहवो वैशेषिकदार्शनिकाः अपि व्यञ्जनावृत्तेरस्वीकारे सममेव मतं पोषयन्ति। मीमांसका अपि व्यञ्जनावृत्तिं न स्वीकुर्वन्ति। तन्नये अभिधां लक्षणां च व्यतिरिच्य योऽर्थः प्राप्यते स तु अर्थापत्तिप्रमाणेनैव भवतीति। किन्तु परवर्तिकाले कोऽपि अर्थापत्तिं वृत्तिरूपेण न स्वीकृतवान्। वस्तुतः अर्थापत्तिप्रमाणं न्यायसम्मतम् अनुमानवदेव तुलनीयम्।

किन्तु अपरतः वैयाकरणैः सह अन्यालङ्कारिकाः अपि व्यञ्जनावृत्तेः प्रयोजनीयताम् उपलब्धवन्तः। प्रसङ्गेऽस्मिन् नागेशभट्टस्य मतं गुरूत्वपूर्णम्। तेन लघुमञ्जूषाग्रन्थे उक्तम्– सा वृत्तिस्त्रिधा शक्तिर्लक्षणा व्यञ्जना च इति। मुख्यार्थो बाधितो भवतु न भवतु वा, मुख्यार्थेन सह सम्बन्धः अस्तु मास्तु वा, मुख्यार्थः प्रसिद्धो भवतु अप्रसिद्धो वा भवतु, वाच्यादिव्यतिरिक्तो योऽर्थ उपलब्धो भवति, तस्योद्बोधकसंस्कारविशेष एव व्यञ्जना इति नागेशसिद्धान्तः। आचार्य आनन्दवर्धन एव प्रथमं व्यञ्जनावृत्तेरुपरि गुरुत्वमास्थाय ध्वनिप्रस्थानं प्रतिष्ठापयितुं ध्वन्यालोकनामकग्रन्थं प्रणीतवान्। टीकाकारोऽभिनवगुप्तोऽपि वृत्तिमिमां स्वीकृतवान्। अभिधालक्षणतात्पर्यैः सह व्यञ्जनापि स्वीक्रियते।

व्यञ्जनावृत्तिस्वीकारे मम्मटाचार्यस्य मतमपि उल्लेखयोग्यम्। अतः परं केचिद् आलङ्कारिकास्तथा आचार्या मन्यन्ते यत् अभिधा-लक्षणा-व्यञ्जनावृत्तिं व्यतिरिच्य तात्पर्यनामिका वृत्तिरपि वाक्यार्थप्रतिपादने सहायिका भवति। किन्तु केचन आलङ्कारिका वदन्ति यद् यद्यपि तात्पर्यवृत्तिः वाक्यार्थनिर्णये साहाय्यं करोति नैषा वृत्तिः। पुनः केषाञ्चिन्नये वक्तुरिच्छा एव तात्पर्यवृत्तिरिति तदुच्यते भाषापरिच्छेदे – "वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्"इति। अन्येषां केषाञ्चन मते पुनः ईश्वरेच्छा एव तात्पर्यवृत्तिः। प्रसङ्गेऽस्मिन् एतद् वक्तुं शक्यते यत् नवीननैयायिकानां ग्रन्थेषु तात्पर्यवृत्तेः पृथक्तया उल्लेखो नास्ति। वैयाकरणानां मतमपि नैयायिकानां मतमिव। वेदान्तिनोऽपि तात्पर्यं पृथक्तया न स्वीकुर्वन्ति।

किन्तु सन्ति केचन आलङ्कारिकास्तथा आचार्या ये तात्पर्यवृत्तिं गुरुत्वपूर्णवृत्तिरूपेण स्वीकुर्वन्ति। आचार्यधनिकेन तस्य काव्यनिर्णयग्रन्थे उक्तम्– 'यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्' इति। अर्थात् तन्मते अभिधावृत्तिं लक्षणावृत्तिञ्च व्यतिरिच्य ये तावद् रसादयोऽर्थाः वर्तन्ते, तात्पर्यवृत्तिसाहाय्येन तेषां ज्ञानं भवति। प्रयोजनानुसारं तात्पर्यवृत्तिः सर्वविधमर्थं प्रकाशयितुं समर्था भवति। धनिक इव मम्मटविश्वनाथाद्यालङ्कारिका अपि वृत्तिचतुष्टयं स्वीकुर्वन्ति अर्थात् तेऽपि तात्पर्यवृत्तिं स्वीकुर्वन्ति। मम्मटः तात्पर्यवृत्तेरस्तित्वं समर्थयन् काव्यप्रकाशे उक्तम् –" अभिधा-तात्पर्य-लक्षणात्मक-व्यापारत्रयातिवर्ती ध्वननादिव्यापारोऽनपह्नवनीय एव" इति। परवर्ती आचार्यो विश्वनाथोऽपि तात्पर्यस्वीकारविषये मम्मटपन्थी। सिद्धान्तमुक्तावलीकृता विश्वनाथन्यायपञ्चाननेन उक्तम् आसत्त्यादिवत् तात्पर्योऽपि शाब्दबोधं प्रति कारणमात्रमिति। काव्यजगति अभिधा, लक्षणा, व्यञ्जना, तात्पर्यमिति वृत्तिचतुष्टयम् अभिलसति।

२२.३) अभिधा

अभिपूर्वकाद् धा-धातोः अङ्-प्रत्ययेन अभिधाशब्दोऽयं निष्पन्नः। प्रत्येकं शब्दानां सर्वजनप्रसिद्धः कश्चिद् मुख्याऽर्थो वर्तते। सूर्यचन्द्रादीनामुच्चारणेन तेषां स्वकीयार्थप्रतीतिर्भवति। शब्दो

येन व्यापारेण वृत्त्या वा लोकप्रसिद्धम् अर्थं बोधयति स व्यापारो वृत्तिर्वा अभिधा इत्युच्यते। आचार्यमम्मटेन तस्य काव्यप्रकाशग्रन्थे अभिधालक्षणं निरूपितं– "स मुख्याऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते" इति। शब्दस्य येन व्यापारेण शक्त्या वा शब्दस्य सङ्केतितार्थबोधो जायते साभिधा इत्युच्यते। इयम् अभिधा शक्तिरिति सङ्केत इति वा उच्यते। शक्तिविषयकालोचनायां सिद्धान्तमुक्तावलीकृता विश्वानाथेन उक्तम् - 'यत् पदेन सह पदार्थस्य सम्बन्ध एव शक्तिः' इति। अस्मात् शब्दाद् अयमर्थो बोध्यव्य इति या ईश्वरेच्छा सैव शक्तिरित्युच्यते – शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। "सा चास्माच्छब्दादयमर्थो बोधव्य इतीश्वरेच्छारूपा" इति सिद्धान्तमुक्तावली। अयं सङ्केतः शब्दस्य शक्तिग्राहकः। अर्थाद् एकस्माद् निर्दिष्टशब्दात् एको निर्दिष्टोऽर्थ एव बोद्धव्यः। यथा घटशब्दात् कम्बुग्रीवादिमान् पिण्डः इति अयमर्थ एव बोद्धव्यः, नान्यः कश्चिदर्थः। यथा घटमानय इति एकं वाक्यं श्रुतम्। ततः परम् अभिधावृत्त्या घटशब्दस्य कम्बुग्रीवादिमान् पिण्डः बोध्यते। प्रकृते घटशब्दस्य सङ्केतितार्थः कम्बुग्रीवादिमान् पिण्डः। यतो हि अस्मात् घटशब्दात् कम्बुग्रीवादिमान् पिण्डः इति अयम् अर्थः बोद्धव्यः इति ईश्वरेच्छा वर्तते। एवमेव आनय इत्यस्य अपि अभिधावृत्त्या आनयनरूपक्रियां बोधयति। घटशब्दात् अभिधावृत्त्या कम्बुग्रीवादिमान् पिण्डः इति आयाति। स च वाच्यार्थः भवति। दर्पणकारः विश्वनाथः स्वकीये साहित्यदर्पणनामके ग्रन्थे अभिधायाः लक्षणं प्रोक्तम् - "तत्र सङ्केतितार्थस्य बोधनात् अग्रिमाभिधा" इति। अर्थात् साक्षात् सङ्केतिते अर्थे शब्दस्य यः मुख्यः वृत्यन्तरानुजीवकः व्यापारः वृत्तिः साभिधा। शब्दस्य सङ्केतितार्थः यया वृत्त्या बोध्यते, सा अभिधावृत्तिः। इयञ्च मुख्या वृत्तिः वर्तते। अर्थबोधनाय इयं वृत्तिः सर्वदा आदौ प्रवर्तते। लक्षणाव्यञ्जनावृत्त्योः प्रवृत्तेः पूर्वम् अभिधावृत्तिः प्रवर्तते। तस्मात् लक्षणाव्यञ्जनावृत्ती अभिधावृत्त्याश्रिते। अभिधावृत्तिस्तु अन्याम् वृत्तिं न आश्रयति। शक्त्यपरपर्यायसङ्केतितार्थबोधजनको व्यापारः अभिधा। सङ्केतश्च शक्तिग्राहकः समयः। स चास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकः इत्युक्तं सङ्गच्छते। घटमानय इत्यत्र अभिधावृत्त्या घटशब्दस्य कम्बुग्रीवादिमान् पिण्डः इति सङ्केतितार्थः बोध्यते। घटम् इति शब्देन सह कम्बुग्रीवादिमतः पदार्थस्य सम्बन्धः अस्तीति ज्ञानम् अभिधावृत्त्या सम्भवति। यतो हि अस्मात् घटशब्दात् कम्बुग्रीवादिमतः पदार्थस्य ज्ञानं भवतु इति ईश्वरेच्छा वर्तते। स च सङ्केतितार्थः अभिधावृत्त्या एव बोध्यते। येन शब्देन सङ्केतितार्थः प्रतिपाद्यते, स वाचकः इत्युच्यते। यथा घटशब्दः वाचकः भवति। अभिधावृत्त्या यः अर्थः प्रतिपाद्यते, स वाच्यः। यथा - कम्बुग्रीवादिमान् पदार्थः इति वाच्यार्थः।

२२.४) अभिधाप्रक्रिया/सङ्केतग्रहोपायः

कश्चित् समुत्पन्नसङ्केतज्ञानविशिष्टः जनः द्वितीयं कञ्चन समुत्पन्नसङ्केतज्ञानविशिष्टं जनं लक्षीकृत्य गामानय इति वाक्यं प्रयुङ्क्ते। ततः द्वितीयः जनः गोः आनयनरूपं कर्म करोति। तृतीयः कश्चित् सङ्केतज्ञानहीनः बालः एतत् सर्वं पश्यति। ततः अश्वमानय इति वाक्यं प्रयुङ्क्ते। तदा अश्वस्य आनयनरूपं कर्म करोति। एतदपि तृतीयः जनः पश्यति। द्वितीयवाक्ये अश्वपदसन्निधानात् गोभिन्नस्य वस्तुनः आनयनं सम्भवति। एतेन ज्ञायते यत् गोशब्दस्य सङ्केतः सास्नालङ्गूलमति प्राणिनि वर्तते, अश्वशब्दस्य च घोटके सङ्केतः वर्तते इति जानाति। ततः परं गां बधान इति वाक्यस्य श्रवणात् परं गोः बन्धनरूपकार्यं करोति। बधान इति भिन्नक्रियापदसन्निवेशात् भिन्नं कार्यं जायते। एतेन आनयनपदस्य

आनयनक्रियायां बधानपदस्य बन्धनक्रियायां सङ्केतः विद्यते इति ज्ञानं जायते। पदानां त्यागसंयोगाभ्यां सङ्केतरहितस्य जनस्य सङ्केतज्ञानं जायते।

क्वचिच्च प्रसिद्धार्थपदसाहचर्यात् बालः सन्दिग्धसङ्केतस्य शब्दस्य सङ्केतम् अवधारयति। यथा 'इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यत्र मधु करोतीति व्युत्पत्त्या मधुकरशब्दस्य भ्रमरे सङ्केतः मधुमक्षिकायां वेति। तदा भ्रमरः पङ्कजे पूर्वं मधुपानं करोति इति दृश्यं तु अस्माभिः दृष्टम्। एतेन कमलपदसमभिहारात् मधुकरशब्दस्य भ्रमर एव सङ्केतः।

क्वचिच्च केवलशब्दप्रमाणेन सङ्केतज्ञानं भवति। तदुक्तं साहित्यदर्पणकारेण 'आप्तोपदेशात्' इति। यथा 'अयम् अश्वशब्दवाच्यः' इति आप्तेनोक्ते तत्र प्रामाणिकत्वनिश्चयात् बालः अश्वशब्दस्य घोटके सङ्केतमवधारयति। एतत् त्रयं प्रदर्शनमात्रम्। व्याकरणादयः अप्यन्ये सङ्केतग्रहोपायाः ग्राह्याः। तदुक्तम् -

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।
वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।। " इति।

पाठगतप्रश्नाः-१

१. व्याकरणशास्त्रे प्रसिद्धस्य वृत्तिशब्दस्य लक्षणं किम्।

२. वृत्तिशब्दस्य अपरं नाम किम्।

३. वृत्तिः कतिविधा।

४. वृत्तयः काः।

५. वृत्तेः लक्षणं किम्।

६. अभिधाशब्दस्य व्युत्पत्तिं लिखत।

७. अभिधावृत्तेः लक्षणं लिखत।

८. दर्पणकारमते अभिधावृत्तेः लक्षणं लिखत।

९. सङ्केतः कः।

१०. अभिधावृत्त्याः किं प्रतिपाद्यते।

२२.५) लक्षणावृत्तिः

आलङ्कारिकैः तिस्रः वृत्तयः स्वीकृताः। तासु लक्षणावृत्तिः अन्यतमा। मुख्यार्थस्य अर्थात् वाच्यार्थस्य बाधे तात्पर्यानुपपत्तौ वा इयं वृत्तिः प्रवर्तते। सा च लक्षणा रूढेः प्रयोजनाच्च द्विविधा। प्रस्तुतेऽस्मिन् पाठे दर्पणकारः पण्डितविश्वनाथकविराजः स्वकृतग्रन्थौ लक्षणावृत्तिं यथा प्रतिपादितवान् तथा वयं ज्ञास्यामः।

२२.६) लक्षणायाः लक्षणम्

कस्मिन्नपि वाक्ये उच्चारिते आदौ अभिधावृत्तिः प्रवर्तते। तत्र अभिधया यदि वाक्यार्थः न ज्ञायते तर्हि मुख्यार्थसम्बन्धिनं कमपि आश्रित्य यया वृत्त्या अर्थावबोधः जायते सा वृत्तिः लक्षणा इति विदग्धानाम् अभिप्रायः। लक्षणं लक्षणेति वा प्रतीतिविषयीक्रियते स्वाभिमतार्थसम्पत्तिः यया इति निर्वचनेन लक्षणाशब्दः निष्पद्यते। तस्मादुक्तं पण्डितविश्वनाथकविराजेन स्वकृतसाहित्यदर्पणे -

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।। इति।

अत्र लक्षणे उक्तस्य बाधशब्दस्य तात्पर्यानुपपत्तिः इत्यर्थः। मुख्यार्थस्य अर्थात् अभिधेयार्थस्य तात्पर्यानुपपत्तौ रूढेः अर्थात् प्रसिद्धिवशात् प्रयोजनाद् अर्थात् उद्देश्यविशेषाद् च यया वृत्त्या मुख्यार्थेन सह सम्बद्धः अन्योऽर्थः प्रतीयते बुद्ध्यते, सा शब्दोपरि अर्पिता आरोपिता वृत्तिः लक्षणा इत्यभिधीयते। "यया अन्योऽर्थः प्रतीयतेऽसौ लक्षणा" इति लक्षणायाः लक्षणम्।

२२.६.१) प्रयोजनवती लक्षणा

उदाहरणं यथा - गङ्गायां घोषः इति। तथाहि गङ्गायां घोषः इति वाक्ये आदौ अभिधावृत्तिः प्रवर्तते। गङ्गाशब्दस्य अभिधया जलप्रवाहः इत्यर्थः प्राप्यते। तेन वाक्यस्यास्य अर्थो भवति यत् गङ्गाजलप्रवाहे घोषः प्रतिवसति इति। तत्र जले तु केवलं मीनभुजङ्गादयः प्रतिवसन्ति न मनुष्याः इति अभिधालब्धार्थस्य बाधः भवति। तन्नाम एतेन वाक्येन अर्थबोधः न जायते। तस्मादत्र अनया वृत्त्या मुख्यार्थसम्बन्धिनः ग्रहणं भवति। तत्र गङ्गायां घोषः इत्यत्र गङ्गया सह सामीप्यसम्बन्धेन युक्तत्वात् गङ्गातीरः लक्षणावृत्त्या स्वीक्रियते। तेन एनया लक्षणया मुख्यार्थस्य बाधे सति गङ्गातीरे घोषः प्रतिवसति इति मुख्यार्थाद् भिन्नः अर्थः प्रतीयते। ननु किं फलमस्याः लक्षणायाः प्रवर्तमाने इति चेदुच्यते यत् रूढेः प्रयोजनाद् वा इति। अत्र प्रकृते गङ्गायां घोषः इत्यत्र गङ्गातीरे घोषः प्रतिवसति इत्यर्थप्रतीतौ गङ्गायाः धर्माः घोषे अर्थाद् आभीरपल्लौ आरोप्यन्ते। तेन गङ्गायाः शीतत्वपावनत्वातिशयरूपाः धर्माः आभीरपल्लौ अस्तीति प्रतीयते। तेनात्र घोषाणां निवासप्रदेशः शीतत्वपावनत्वादिधर्मवान् इति प्रयोजनं फलति। अत्र इदं प्रयोजनं प्रतिपादयितुमेव इयं लक्षणा आश्रियते। अत्र प्रयोजनवती लक्षणा।

अस्याः अन्यदुदाहरणं तावत् - सिंहो माणवकः इति। अत्र माणवकः चतुष्पात्त्वविशिष्टः सिंहो न भवतीति सिंहशब्दस्य मुख्यार्थस्य बाधः। शौर्यतीक्ष्णत्वादिधर्मैः सादृश्यं सम्बन्धमाश्रित्य लक्षणावृत्तिः सिंहसदृशो माणवकः इत्यर्थं बोधयति। अत्र तीक्ष्णत्वादिधर्मः प्रयोजनम्।

२२.६.२) रूढिमूला लक्षणा

कलिङ्गः साहसिकः इत्यत्र या लक्षणा प्रवर्तते सा रूढिवशादेव। अत्र कलिङ्गशब्दे अभिधावृत्त्या तदभिधः देशः गम्यते। तेन अभिधया कलिङ्गनामको देशः साहसिकः इति अर्थः प्रतीयते। स च अनर्थकः एव। यतो हि साहसिकत्ववीरत्वादिधर्माः अचेतने देशगते वस्तुनि नैव तिष्ठन्ति। न हि अचेतने वस्तुनि चेतनधर्माः स्थातुं प्रभवेयुः, चैतन्यधर्माणां चेतने एव उपलक्षणत्वात्। तस्माद् न देशः तथाविधः

साहसिकत्वधर्मवान् स्यात् अचेतनत्वात्। तेनात्र मुख्यार्थस्य बाधः भवति। मुख्यार्थस्य बाधे कलिङ्गपदे लक्षणा प्रवर्तते। तेन तया लक्षणया तद्देशसंयुक्ताः कलिङ्गजनाः लक्ष्यन्ते। यतो हि देशग्रहणेन संयोगसम्बन्धेन तत्स्थानामपि ग्रहणं जायते। ततः कलिङ्गदेशवासी साहसिकः इति लक्ष्यार्थः प्रतीयते। देशग्रहणेन रूढेः एव तत्र वर्तमानानां बोधो जायते। तेन अत्र प्रसिद्धवशादेव लक्षणा प्रवर्तते, न तु कस्मैचित् प्रयोजनाय। तस्मादत्र रूढिमूला लक्षणा।

दर्पणकारः स्वकृतग्रन्थौ एकां शङ्काम् उत्थापयति। तद्धि - ननु काव्यप्रकाशकारः कर्मणि कुशलः इत्यत्र रूढिः वर्तते। तथाहि कुशलः शब्दस्य अभिधया कुशाल्लाति इत्यर्थः आयाति। तादृशस्यार्थस्य मुख्यार्थस्य प्रकृते बाधत्वात् दक्षरूपार्थः लक्षणया बोध्यते। तेनात्र रूढिवशादेव अयमर्थः आगतः इत्यतः अत्र रूढिमूला लक्षणा इति चेन्न, कुशग्रहणरूपार्थे व्युत्पत्या प्राप्तेऽपि दक्षरूपस्यैव मुख्यार्थत्वम्। यमर्थं सर्वे स्वीकुर्वन्ति शब्दस्योच्चारिते एव स एवार्थः वाच्यार्थो भवितुम् अर्हति। ततः अत्र कर्मणि कुशलः इति वाक्ये न लक्षणा प्रवर्तिता, मुख्यार्थस्य बाधाभावात् इति साहित्यदर्पणकाराभिमतम्।

२२.६.३) काव्यप्रकाशकारमतम्

काव्यप्रकाशकारः मम्मटाचार्यः स्वकीयग्रन्थे लक्षणायाः स्वरूपं प्रकाशितवान्। तल्लक्षणं तावत् -

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।। इति।

रूढितः प्रयोजनात् वा मुख्यार्थस्य बाधे तद्योगे यया लक्षणया अन्यः अर्थः लक्ष्यते सा एव शब्दोपरि आरोपिता क्रिया एव लक्षणा इति लक्षणसमन्वयः।

पाठगतप्रश्नाः-२

११. दर्पणकारोक्तं लक्षणालक्षणश्लोकं लिखत।
१२. काव्यप्रकाशकारमते लक्षणालक्षणश्लोकं लिखत।
१३. लक्षणा कतिविधा।
१४. काव्यप्रकाशकारः कः।
१५. साहित्यदर्पणं कः विरचितवान्।
१६. लक्षणा कस्य उपरि आरोपिता वृत्तिः।
१७. कस्य बाधे लक्षणा प्रवर्तते।
१८. लक्षणया लब्धार्थः किमुच्यते।

२२.७) दर्पणकारमते लक्षणाभेदाः

साहित्यदर्पणकारः पण्डितविश्वनाथकविराजः स्वकृतग्रन्थौ लक्षणायाः षोडशमुख्यभेदान् प्रदर्शितवान्। अत्र वयं तस्मिन् विषये ज्ञास्यामः। इयं लक्षणा द्विधा विभज्यते - उपादानलक्षणा लक्षणलक्षणा चेति।

२२.७.१) उपादानलक्षणा

इयं प्रतिपाद्यमाना लक्षणा मुख्यार्थस्य लक्ष्यार्थस्य चोभयस्य उपादानाद् उपादानलक्षणा। तेन रूढौ उपादानलक्षणा, प्रयोजने उपादानलक्षणा चेति भेदद्वयं प्राप्तम्। तस्मादुक्तं दर्पणे -

मुख्यार्थस्येतराक्षेपे वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोऽपादानलक्षणा।। इति।

वाक्ये पदार्थप्रतिपादनावसरे अन्वयसिद्ध्यर्थं यया शक्त्या इतरस्य मुख्यार्थभिन्नस्य वा आक्षेपः उपस्थापनं वा विधीयते, यया च आत्मनः अर्थात् मुख्यार्थस्य इतरस्य तद्भिन्नस्य च बोधः भवति, सा उपादानलक्षणा इत्युच्यते। तत्र रूढौ उपादानलक्षणायाः उदाहरणं तावत् - श्वेतः धावति इति। अत्र श्वेतस्य अचेतनत्वात् तस्मिन् धावनरूपव्यापारः न सम्भवति। तस्मात् मुख्यार्थस्य बाधे लक्षणया अश्वादयः अर्थाः लक्ष्यन्ते। तेन अत्र यथा श्वेतरूपस्य मुख्यार्थस्य ग्रहणं तथा तदितरस्य अश्वार्थस्यापि उपादानं भवति। तस्मादत्र उपादानलक्षणा। प्रयोजने उदाहरणं तावत् - कुन्ताः प्रविशन्ति। कुन्तशब्दस्य वस्तु इति अभिधया लब्धः अर्थः। देशस्य प्रवेशनरूपचेतनधर्मवत्त्वं न सम्भवति। तस्मादत्र तादृशस्यार्थस्य बाधे पुरुषरूपो लक्ष्यार्थः लभ्यते। अत्रापि उभयोः ग्रहणात् उपादानलक्षणा। अत्र कुन्तादीनाम् अतिगहनत्वं प्रयोजनम्।

इयञ्च उपादानलक्षणा आरोपाध्यवसानाभ्यां द्वेधा भिद्यते। सारोपा उपादानलक्षणा साध्यवसाना उपादानलक्षणा चेति। तत्र किं नाम सारोपत्वं साध्यवसानत्वं वा इति चेदुच्यते -

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका।। इति।

यत्र विषयविषयिणोः मध्ये विषयिणः उच्चारणं नाम पदेन उपस्थापनं भवति सा सारोपा इत्युच्यते। तस्मादुक्तं दर्पणे -

"विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत्सारोपा। इयमेव रूपकालङ्कारस्य बीजम्" इति। तत्र रूढौ उपादानलक्षणा सारोपा यथा - अश्वः श्वेतः धावति इति। अत्र मुख्यार्थस्य श्वेतस्य इतरस्य अश्वस्य च ग्रहणं भवति। अत्र विषयिणः अश्वस्य उच्चारणाद् उल्लेखाद्वा सारोपा उपादानलक्षणा। प्रयोजने उपादानलक्षणा सारोपा यथा - एते कुन्ताः प्रविशन्ति इति। अत्र सर्वनाम्ना विषयिणः ग्रहणं भवति। अत्र द्वयोः उच्चारणाद् विषयिणः उल्लेखाच्च सारोपा उपादानलक्षणा। अत्र प्रयोजनं तावत् कुन्तादीनाम् अतिगहनत्वम्।

यत्र विषयिणः उच्चारणम् उल्लेखो वा न भवति सा साध्यवसाना इत्युच्यते। तस्मादुक्तं साहित्यदर्पणे -

"निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत्साध्यवसाना" इति।

सा च साध्यवसाना उपादानलक्षणा रूढिप्रयोजनवशाद् द्विविधा। तत्र रूढौ उपादानलक्षणा साध्यवसाना यथा - श्वेतो धावति इति। अत्र अश्वरूपविषयिणः अनुच्चारणात् साध्यवसाना उपादानलक्षणा। प्रयोजने उपादानलक्षणा साध्यवसाना यथा - कुन्ताः प्रविशन्ति इति। अत्रापि पूर्ववद् विषयिणः सर्वनाम्नः ग्रहणाभावात् साध्यवसाना।

सा च उपादानलक्षणा सारोपा शुद्धागौणीभेदात् द्विविधा। तस्मादुक्तं साहित्यदर्पणे –

सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।

सादृश्यात्तु मता गौण्यस्तेन षोडशभेदिताः।। इति।

तत्र रूढौ उपादानलक्षणा सारोपा शुद्धा यथा – अश्वः श्वेतो धावतीति। तत्रैव उपादानलक्षणा सारोपा गौणी यथा – एतानि तैलानि हेमन्ते सुखानीति। अत्र तैलशब्दस्य तिलस्थस्नेहरूपः अर्थः मुख्यार्थः। तं सहायीकृत्य उपादाय वा लक्ष्यार्थरूपं सर्षपादिरूपम् अर्थं बोधयति तैलशब्दः। तस्मादत्र उपादानलक्षणा। तत्र रूढौ उपादानलक्षणा साध्यवसाना शुद्धा यथा – श्वेतो धावतीति। तत्रैव उपादानलक्षणा साध्यवसाना गौणी यथा – तैलानि हेमन्ते सुखानि इति। प्रयोजने तु उपादानलक्षणा सारोपा शुद्धा यथा – एते कुन्ता प्रविशन्ति इति। तत्रैव गौणी यथा – एते राजकुमाराः गच्छन्ति इति। तत्रैव प्रयोजने उपादानलक्षणा साध्यवसाना शुद्धा यथा – कुन्ताः प्रविशन्ति इति। गौण्यां तु – राजकुमाराः गच्छन्तीति। एवंप्रकारेण उपादानलक्षणा अष्टविधा इति विदग्धाभिप्रायः।

२२.८) लक्षणलक्षणा

यस्यां लक्षणायां मुख्यार्थेतरस्यैव उपलक्षणम्, न वा केवलं मुख्यार्थस्य तदुभयस्य वा। इयमेव जहत्स्वार्था इत्युच्यते। अस्याः लक्षणं तावत् साहित्यदर्पणे-

अर्पणं स्वस्य वाक्यार्थे परस्यान्वसिद्धये।

उपलक्षणहेतुत्वादेषा लक्षणलक्षणा।। इति।

यत्र परस्य मुख्यार्थभिन्नार्थस्य लक्ष्यार्थस्य वा अन्वयसिद्धये अर्थोपपत्तौ वा यया शक्त्या स्वस्य नाम मुख्यार्थस्य अर्पणं त्यागो वा उपलक्ष्यते सा लक्षणलक्षणावृत्तिः इत्युच्यते। सा च रूढिप्रमाणाभ्यां द्वेधा विभज्यते। तत्र रूढौ लक्षणलक्षणा यथा – कलिङ्गः साहसिक इति। अत्र कलिङ्गशब्देन न तु तद्देशस्य अपि तु तद्देशस्थस्य मुख्यार्थभिन्नस्य परस्य वा लक्षणया ग्रहणं भवति। तत्र प्रयोजने लक्षणलक्षणा यथा - गङ्गायां घोषः इति। अत्र न गङ्गाप्रवाहरूपस्य मुख्यार्थस्य परन्तु तीररूपमर्थम् एव बुद्ध्यते। तस्मादत्र लक्षणलक्षणा। लक्षणलक्षणायाः उदाहरणं तावत् -

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।

विदधदीदृशमेव सदा सखे, सुखितमास्स्व ततः शरदां शतम्।। इति।

अत्र श्लोकेऽस्मिन् उपकृतम् इति मुख्यार्थस्य त्यागेन वैपरीत्यलक्षणया अपकृतमिति लक्ष्यार्थः बुद्ध्यते। अत्र लक्षणलक्षणा स्पष्टा प्रकाशिता।

सा च लक्षणलक्षणा आरोपाध्यवसानाभ्यां द्विविधा। तत्र लक्षणं तावत् -

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।। इति।

श्लोकस्यास्य उपरि व्याख्यासत्त्वात् पुनरुक्तिभयात् न पुनः उल्लिख्यते। तत्र रूढौ लक्षणलक्षणा सारोपा यथा - कलिङ्गः पुरुषो युध्यते इति। अत्र कलिङ्गपुरुषयोः आधाराधेयभावः सम्बन्धः। अत्र विषयिणः पुरुषशब्दस्य उल्लेखाद् इयं सारोपा। तत्रैव लक्षणलक्षणा साध्यवसाना यथा - कलिङ्गः साहसिकः इति। प्रयोजने लक्षणलक्षणा सारोपा यथा - आयुर्घृतम् इति। अत्र कार्यकारणसम्बन्धः वर्तते। प्रस्तुते घृतम् आयुतादात्म्येन गृह्यते। अत्र अव्यभिचारेण आयुष्करत्वं प्रयोजनम्। तत्रैव लक्षणलक्षणा साध्यवसाना यथा - आयुः पिबति इति।

सा च लक्षणलक्षणा सारोपा साध्यवसाना च प्रत्येकं शुद्धागौणीभेदमापाद्य द्वेधा विभज्यते। तत्र लक्षणं तावत् -

सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यस्तेन षोडशभेदिताः।। इति।

तत्र रूढौ लक्षणलक्षणा सारोपा शुद्धा यथा - कलिङ्गः पुरुषो युध्यते इति। रूढौ सारोपायामेव गौण्याम् उदाहरणं यथा - राजा गौडेन्द्रं कण्टकं शोधयति इति। राजा गौडनाम्ना प्रसिद्धस्य देशस्य इन्द्रं राजानं वा उद्धारयति इत्यर्थः। अत्र विषयिणः गौडेन्द्रपदस्य उल्लेखाद् इयं सारोपा। तत्र रूढौ लक्षणलक्षणा साध्यवसाना शुद्धा यथा - कलिङ्गः साहसिकः इति। गौण्यां तु - राजा कण्टकं शोधयति इति। प्रयोजने लक्षणलक्षणा सारोपा शुद्धा यथा - आयुर्घृतम् इति। गौणी च – गौर्वाहीकः इति। अत्र वाहीकशब्दस्य मुख्यार्थः यद्यपि पञ्जाबदेशः। तथापि अत्र तादृशार्थे मुख्यार्थबाधात् तत्रस्थः पुरुषः पदेनानेन ज्ञाप्यते। तत्र प्रयोजने लक्षणलक्षणा साध्यवसाना शुद्धा यथा - आयुः पिबति इति। गौण्यां तु उदाहरणम् - गौर्जल्पति इति। एवमेव लक्षणलक्षणा अष्टसु भेदेषु विभक्ता।

उपादानलक्षणा अष्टधा लक्षणलक्षणा च अष्टधा विभज्यते। एवम्प्रकारेण लक्षणा षोडिशभेदिता इति पण्डितविश्वनाथकविराजः स्वकृतसाहित्यदर्पणे लक्षणायाः भेदं विस्तरेण प्रतिपादितवान् इति शिवम्।

पाठगतप्रश्नाः-३

१९. लक्षणा कतिविधा।

२०. उपादानलक्षणा कतिप्रकारिका।

२१. रूढौ उपादानलक्षणायाः साध्यवसानायाः शुद्धायाः उदाहरणं किम्।

२२. प्रयोजने लक्षणलक्षणायाः सारोपायाः गौण्याः उदाहरणं किम्।

२३. रूढौ उपादानलक्षणायाः सारोपायाः गौण्याः उदाहरणं किम्।

२४. प्रयोजने उपादानलक्षणायाः साध्यवसानायाः शुद्धायाः उदाहरणं किम्।

२५. रूढौ लक्षणलक्षणायाः साध्यवसानायाः गौण्याः उदाहरणं किम्।

२६. प्रयोजने उपादानलक्षणायाः साध्यवसानायाः गौण्याः उदाहरणं किम्।

२७. रूढौ लक्षणलक्षणायाः साध्यवसानायाः शुद्धायाः उदाहरणं किम्।

२८. प्रयोजने लक्षणलक्षणायाः साध्यवसानायाः शुद्धायाः उदाहरणं किम्।

२२.९) व्यञ्जना

आलङ्कारिकसम्प्रदाये प्रसिद्धासु वृत्तिषु व्यञ्जना इति प्रसिद्धा वृत्तिः शब्दव्यापारो वा। वि-इत्युपसर्गपूर्वकात् अञ्ज्धातोः णिच्प्रत्यये युच्प्रत्यये वा स्त्रियां टापि व्यञ्जना इति शब्दः निष्पद्यते। अञ्ज्धातुः प्रकाशनार्थकः। वि-इत्युपसर्गः विशेषरूपस्य अर्थस्य द्योतकः। तस्मात् येन व्यापारेण विशेषरूपस्य अर्थस्य प्रकाशः भवति सः व्यापारः व्यञ्जना इत्युच्यते। अयं विशेषरूपः अर्थः रमणीयः सहृदयश्लाघ्यः प्रतीयमानश्च भवति। अयमेव व्यङ्ग्यार्थः इत्युच्यते। यथा मुख्यार्थस्य बोधिका अभिधा, लक्ष्यार्थस्य च लक्षणा तथैव व्यङ्ग्यार्थस्य बोधिका भवति व्यञ्जना। अतः उच्यते साहित्यदर्पणे –

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥ इति। (२/३)

यथा अङ्गनासु अवयवाद्यतिरिक्तत्वेन किञ्चिद् अन्यदेव लावण्यं सहृदयनयनामृतसमं तिष्ठति तथैव वाणीषु वाच्यार्थाद् कश्चिद् भिन्नः एव व्यङ्ग्यार्थो भवति। तथाहि उच्यते ध्वन्यालोके प्रथमोद्योते आनन्दवर्धनाचार्येण -

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं बिभाति लावण्यमिवाङ्गनासु॥ इति। (१/४)

अयमेव व्यङ्ग्यार्थः व्यञ्जनया वृत्त्या बुध्यते। ननु का नाम व्यञ्जना इति चेदुच्यते साहित्यदर्पणकारेण विश्वनाथकविराजेन –

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥ इति। (२/१२)

अर्थः – अभिधा, लक्षणा तात्पर्यं चेति याः तिस्रः वृत्तयः वर्तन्ते ताः यदा स्वं स्वम् अर्थं बोधयित्वा क्षीणशक्तयः भवन्ति तदा यया वृत्त्या वाच्यलक्ष्यार्थापेक्षया कश्चिद् भिन्नः अर्थः बोध्यते सा वृत्तिः व्यञ्जना इत्युच्यते। इयं व्यञ्जना शब्दनिष्ठा, अर्थनिष्ठा, प्रकृतिनिष्ठा, प्रत्ययनिष्ठा निपातादिनिष्ठा च भवति।

यथा गतोऽस्तम् अर्कः इति एकं वाक्यम्। अत्र अभिधावृत्त्या सूर्यः अस्ताचलं प्राप्तः इति अर्थः आगच्छति। परन्तु प्रकरणभेदात् व्यञ्जनया बहवः व्यङ्ग्यार्थाः बोध्यन्ते। तथाहि क्रीडन्तं बालकं प्रति पित्रा उक्ते सति बालकः गच्छ गच्छ इति व्यङ्ग्यार्थं गृहीत्वा गृहं गच्छति। एवमेव अभिसारिकां प्रति इदम् उक्तं चेत् अभिसरणं कुरु इति व्यङ्ग्यार्थः, ब्रह्मचारिणं प्रत्युक्तं चेत् सन्ध्यावन्दनं कुरु इति व्यङ्ग्यार्थः,

चौरं प्रति उक्तं चेत् चौर्यं कुरु इति व्यङ्ग्यार्थः, आपणिकं प्रति उक्तं चेत् पण्यानि अपसार्यन्ताम् इति व्यङ्ग्यार्थः, गोपालकं प्रति उक्तं चेत् गावो निरुध्यन्ताम् इति प्रकरणभेदात् विविधाः व्यङ्ग्यार्थाः एकस्मात् एव वाक्यात् बुध्यन्ते।

प्रसिद्धः साहित्यिकः जयदेवः चन्द्रालोकस्य सप्तमे मयूखे व्यञ्जनायाः स्वरूपम् इत्थं कथयति –

वृत्तिभेदैस्त्रिभिर्युक्ता स्त्रोतोभिरिव जाह्नवी।
भारती भाति गम्भीरा कुटिला सरला क्वचित्॥ इति।

यथा गम्भीर-कुटिल-सरलैः त्रिभिः प्रवाहैः युक्ता गङ्गा शोभिता भवति तथैव तिसृभिःवृत्तिभिः युक्ता वाणी कदाचित् गम्भीरा कुटिला सरला च भवति। अत्र गम्भीरपदेन व्यञ्जना, कुटिलपदेन लक्षणा, सरलपदेन च अभिधा स्वीक्रियते। व्यञ्जना गम्भीरा भवति इत्यस्य तात्पर्यं तावत् – यथा वाच्यार्थः स्पष्टतया प्रतीयते व्यङ्ग्यार्थः न तथा स्पष्टतया भासते। यथा गम्भीरस्य पुरुषस्य मनोगतं सारल्येन सर्वैः अवगन्तुं न शक्यते तथैव व्यङ्ग्यार्थस्य ज्ञानमपि न साधारणानाम्, अपि तु सहृदयानामेव भवति। अतः एतादृशस्य गम्भीरस्य व्यङ्ग्यार्थस्य बोधिका व्यञ्जना अपि गम्भीरा एव भवति।

आशाधरभट्टः पुनः अभिधायाः गङ्गानद्या सह, लक्षणायाः यमुनानद्या सह व्यञ्जनायाश्च सरस्वतीनद्या सह साम्यम् उक्त्वा वाणीं त्रिवेणीरूपेण प्रदर्शयति। यथा सरस्वती भूम्यन्तरस्था जनानाम् अगोचरा भवति, तथैव व्यञ्जना अपि साधारणानाम् अगोचरा सहृदयैकगम्या भवति। इयं च व्यञ्जना निपुणैरेव अवगम्यते। तथाहि अस्ति प्रसिद्धिः –

शक्तिं भजन्ति सरला लक्षणां चतुरा जनाः।
व्यञ्जनां नर्ममर्मज्ञाः कवयः कमना जनाः॥ इति।

२२.९.१) व्यञ्जनायाः भेदाः

व्यञ्जनावृत्तेः नैके भेदाः विश्वनाथकविराजेन साहित्यदर्पणग्रन्थस्य द्वितीये परिच्छेदे निरूपिताः। तथाहि तन्मते व्यञ्जना प्राधान्येन द्विविधा – शाब्दीमूला आर्थीमूला चेति।

शाब्दीमूला व्यञ्जना

शाब्दीमूला व्यञ्जना पुनः द्विविधा – अभिधामूला लक्षणामूला चेति।

अभिधामूला व्यञ्जना –

अभिधामूलायाः व्यञ्जनायाः लक्षणं तावत् प्रतिपादितं साहित्यदर्पणे –

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।

एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया॥ इति। (२/१४)

अर्थः – एकस्य शब्दस्य बहवः अर्थाः भवन्ति चेत् संयोगादिभिः एकस्मिन् अर्थे अभिधया नियन्त्रिते या शब्दस्य अन्यार्थबोधे कारणीभूता वृत्तिः सा अभिधामूला व्यञ्जना इत्युच्यते।

उदाहरणम् –

दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा

प्रोद्योद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।

नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्

गामाक्रम्य विभूतिभूषिततनू राजत्यूमावल्लभः॥ इति।

अर्थः – अयं श्लोकः उमानामिकायाः राजमहिष्याः पत्युः भानुदेवस्य स्तुतिपरकः। अतः प्रकरणवशात् अभिधावृत्त्या अयं श्लोकः भानुदेवस्यैव प्रशंसाबोधकः। परन्तु अत्र शब्दसन्निवेशः कविना तथा कृतः येन उमापतेः महादेवस्यापि बोधः भवति। अन्तिमे महादेवभानुदेवयोः मध्ये उपमानोपमेयभावः ध्वनितः भवति। तथाहि दुर्गालङ्कितविग्रहः रिपूणां दुर्गं भित्त्वा अपि तैः सह सङ्ग्रामकारी अथवा दुर्गव्यवधानं विनैव युद्धकारी, मनसिजं कामं तेजसा कान्त्या सम्मीलयन् भस्मीकुर्वन्, कामदेवात् अपि सुन्दरः इति तदर्थः, प्रोद्यद्राजकलः अधीनीकृतसर्वमहाराजः, गृहीतगरिमा प्राप्तगौरवः, भोगिभिः पुरुषैः, विष्वग्वृतः सर्वतः परिवेष्टितः नक्षत्रेशकृतेक्षणः क्षत्रियश्रेष्ठेषु अपि तुच्छबुद्धिः, गिरिगुरौ महादेवे, गाढां प्रबलां, रुचिं भक्तिं, धारयन् पृथिवीं पराक्रमेण आयत्तीकृत्य, विभूतिभूषिततनुः ऐश्वर्यादिभिः अलङ्कृतशरीरः, उमावल्लभः उमानाम्न्या राज्ञ्याः वल्लभः भानुदेवः राजति दीप्यते इति एतादृशः प्राकरणिकः अर्थः प्रथमम् अभिधया एव प्रतिपाद्यते।

परन्तु अस्य श्लोकस्य दुर्गालङ्कितविग्रहः, सम्मीलयन्, राजकलः, भोगि, नक्षत्रेशः, गिरिगुरुः, गाम्, विभूतिः, उमा चेति पदैः शङ्करस्तुतिपरकः अर्थः अपि बुध्यते। तथाहि दुर्गालङ्कितविग्रहः अर्धनारीश्वरत्वेन पार्वत्याः शरीरार्द्धशरीरः मनसिजं कामं तेजसा तृतीयनयनोत्थज्योतिषा सम्मीलयन् नाशयन् प्रोद्योद्राजकलः चन्द्रशेखरः गृहीतगरिमा ईश्वरत्वेन जगत्सु प्राप्तगौरवः, भोगिभिः सर्पैः विष्वक् सर्वतः वृतः परिवेष्टितः नक्षत्रेशकृतेक्षणः चन्द्रचक्षुः हिमालयनामके श्वशुरे अत्यन्तमनुरागम् आश्रयन् भस्मभूषितशरीरः उमापतिः शिवः गां वृषभम् आक्रम्य आरुह्य राजते शोभते इति शिवपरकः अर्थः व्यञ्जनया बुध्यते। एवम् अत्र प्रकरणेन अभिधेये उमावल्लभशब्दस्य उमानामकमहादेवीवल्लभभानुदेवनृपतिरूपे अर्थे नियन्त्रिते व्यञ्जनया गौरीवल्लभरूपः अर्थः बोध्यते इति अभिधामूला शाब्दीव्यञ्जना।

लक्षणमूला शाब्दीव्यञ्जना –

लक्षणमूलायाः शाब्दीव्यञ्जनायाः लक्षणं तावत् साहित्यदर्पणे –

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।

यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया॥इति।

अर्थः – यस्य प्रयोजनस्य कृते लक्षणा आश्रीयते, तत्प्रयोजनं यया वृत्त्या प्रतीयते सा व्यञ्जना लक्षणामूला भवति।

उदाहरणम् – यथा गङ्गायां घोषः इति। अत्र शीतत्वपावनत्वयोः आतिशय्यं प्रयोजनम्। तच्च प्रयोजनं व्यञ्जनया वृत्त्या साध्यते। तथाहि अत्र गङ्गापदस्य प्रवाहरूपार्थं बोधयित्वा अभिधा विरता भवति। ततः गङ्गापदस्य प्रवाहरूपार्थेन घोषपदस्य अन्वयानुपपत्त्या लक्षणया वृत्त्या गङ्गापदेन तटरूपार्थस्य बोधः

भवति। एवं गङ्गापदस्य तटरूपार्थं बोधयित्वा लक्षणा अपि उपक्षीणा भवति। ततः शीतत्वस्य पावनत्वस्य च आधिक्यं यया वृत्त्या बोध्यते सा वृत्तिः भवति लक्षणमूला व्यञ्जना।

आर्थी व्यञ्जना

वक्तुः, बोद्धव्यस्य, वाक्यस्य, प्रकरणस्य, देशस्य, कालस्य, काकोः, अङ्गभङ्ग्यादिचेष्टादीनां च वैशिष्ट्यात् यया शब्दशक्त्या अन्यस्य अर्थस्य बोधः भवति सा आर्थी व्यञ्जना इत्युच्यते। तथाहि उच्यते साहित्यदर्पणे –

वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः।

प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च।

वैशिष्ट्यादन्यमर्थं या बोधयेत्साऽर्थसम्भवा॥ इति।

उदाहरणम् –

कालो मधुः कुपित एष च पुष्पधन्वा धीरा वहन्ति रतिखेदहराः समीराः।

केलीवनीयमपि वञ्जुलकुञ्जमञ्जुर्दूरे पतिः कथय किं करणीयमद्य॥ इति।

अर्थः – एषः अनुभूयमानः कालो मधुः वसन्तकालः, पुष्पधन्वा मदनश्च कुपितः, धीरा मन्दा अत एव रमणजनितश्रमोपशमनसमर्थाः समीराः वायवः वहन्ति वान्ति। इयमपि केलिवनी अल्पोद्यानं वञ्जुलकुञ्जेन अशोकशाखावृतस्थानेन मञ्जुर्मनोज्ञा। दूरे च पतिर्भर्ता न तु प्रियः। तस्माद् अद्य किं करणीयं तत् त्वं कथय भण। अत्र वक्त्र्याः नायिकायाः मदनविह्वलत्वादिवैशिष्ट्ययोगात् एतं देशं प्रति शीघ्रं प्रच्छन्नकामुकम् एकं प्रेषय इति अर्थः व्यज्यते।

इदं दिङ्मात्रमुदाहरणम्। अन्यानि उदाहरणानि साहित्यदर्पणादिग्रन्थान्तरेषु अन्वेष्टव्यानि।

इयम् आर्थी व्यञ्जना पुनः अर्थस्य वाच्यलक्ष्यव्यङ्ग्यरूपेण त्रिविधतया प्रत्येकमुक्तानां मध्ये एकैका एव त्रिविधा। तस्मात् असङ्ख्यप्रकारा इयम् आर्थीव्यञ्जना।

शङ्का - शाब्द्यां व्यञ्जनायाम् अर्थस्य, आर्थ्यामपि व्यञ्जनायां शब्दस्य उपयोगिता अस्ति। अतः किमर्थं तयोः पृथक्तया निर्देशः इति चेदुच्यते शब्दस्य अर्थस्य च व्यञ्जकत्वे अन्यस्य सहकारिकारणत्वं स्वीकरणीयम्।

इयं व्यञ्जना प्रकृति-प्रत्यय-उपसर्ग-निपात-वर्णरचनादिषु अपि तिष्ठति। यथा -

चलापाङ्गां दृष्टिं स्पशसि बहुशो वेपथुमतीं

रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।

करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं

वयं तत्त्वान्वेषान्मधुकर, हतास्त्वं खलु कृती॥ इति।

अर्थः – अभिज्ञानशाकुन्तले शकुन्तलां व्याकुलयन्तं भ्रमरं प्रति दुष्यन्तस्योक्तिरियम्। हे मधुकर भ्रमर त्वं तव दंशनभयात् चलौ चञ्चलौ अपाङ्गौ नेत्रप्रान्तभागौ यस्यास्ताम्, अत एव वेपथुमतीं कम्पमानाम् अतिचपलां दृष्टिं स्पृशसि, रहस्याख्यायी इव गुप्तविषयभाषी इव कर्णान्तिकचरः श्रवणेन्द्रियसमीपचारी सन्

मृदु कोमलम् अस्फुटं वा यथा स्यात् तथा स्वनसि शब्दं करोषि, तथा करं हस्तं व्याधुन्वत्याः तवापसारणाय इत्स्ततो विलोकयन्त्याः शकुन्तलायाः रतिसर्वस्वं रतेः सुरतेच्छायाः सर्वस्वं प्रधानकारणम् अधरं दन्तच्छन्दं पिबसि दशसि अत एव वयम् अहं राजा इत्यर्थः, तत्त्वान्वेषात् किं ब्राह्मणस्य औरसकन्यात्वेन मम परिणयस्य अयोग्या अथवा तस्य क्षत्रियकन्यात्वेन मम परिणययोग्या इत्येवं तत्त्वस्य अन्वेषणात् हताः अत्यन्तम् आकुलतया मृतप्रायाः इत्यर्थः। अत्र श्लोके हताः इति प्रयुक्तम्, न तु दुःखं प्राप्तवन्तः इति प्रयुक्तम्। हताः इत्यस्य प्रयोगात् एव दुःखातिशयरूपः व्यङ्ग्यार्थः प्रतीयते। अत्र हन्धातुरूपा या प्रकृतिः तत्रैव व्यञ्जना तिष्ठति।

एवम् अन्यानि अपि उदाहरणानि ज्ञातव्यानि।

व्यञ्जनासिद्धिः – व्यञ्जना हि अभिधालक्षणादिसकलवृत्तिभ्यः भिन्ना कवि-आलङ्कारिकसम्प्रदायप्रसिद्धा अभिनवा एव वृत्तिः। इयं व्यञ्जना रस-रसाभास-भाव-भावाभासादीनां बोधाय अवश्यमेव आलङ्कारिकैः स्वीकर्तव्या। इयं च वृत्तिः प्रथमतः आनन्दवर्धनाचार्येण ध्वन्यालोकग्रन्थे प्रतिपादिता। तथाहि ईश्वरसङ्केतेन शब्दे स्थिता स्वाभाविकी वृत्तिः भवति अभिधा। इयं च अभिधा शब्दस्य वाच्यार्थमेव कथयति। लक्षणा तु प्रयोजनादिनिमित्तात् मुख्यार्थबाधमुत्पाद्य वक्त्रा एव शब्दोपरि समारोपिता कृत्रिमा वृत्तिः। व्यञ्जना तु प्रकरणवक्तृबोद्धव्यादिनिमित्तमाश्रित्य समुन्मीलिता वृत्तिः।

नियमः अस्ति शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति। शब्दस्य, बुद्धेः, कर्मणः च व्यापारः समाप्तश्चेत् पुनः तस्य व्यापारः न भवति इति तदर्थः। यथा देवदत्तः ग्रामं गच्छति इत्यत्र अभिधावृत्त्या आदौ सर्वेषां पदानां पृथक् पृथक् अर्थबोधः भवति। ततः वाच्यार्थमुक्त्वा अभिधा विरता भवति। ततः तात्पर्यवृत्त्या कर्तृत्वकर्मत्वादिरूपेण सर्वेषाम् अन्वये सति एकवाक्यार्थः सम्पद्यते। तात्पर्यानुपपत्तिश्चेत् लक्षणा स्वीक्रियते। यथा गङ्गायां घोषः इत्यत्र अभिधावृत्त्या गङ्गाशब्देन जलप्रवाहरूपस्य अर्थस्य बोधः भवति। घोषशब्देन च आभीरपल्लीरूपार्थस्य बोधः। एवं मुख्यार्थे ज्ञाते तात्पर्यस्य अनुपपत्तिः भवति, जलप्रवाहे आभीरपल्ल्याः अवस्थानं कदापि न सम्भवति इति कारणात्। अतः लक्षणावृत्त्या गङ्गापदं सामीप्यसम्बन्धेन स्वसम्बन्धिनं तटरूपार्थं बोधयति। ततः लक्षणया गङ्गातटे घोषः इति अर्थः भवति। एवम् अभिधा-तात्पर्य-लक्षणाख्यानां तिसृणां शक्तीनां स्वार्थबोधनेन विरमात् रसादीनां बोधनाय तुरीया काचित् वृत्तिः सर्वैः अवश्यम् अङ्गीकर्तव्या।

अभिधा न व्यङ्ग्यार्थबोधिका - अभिधा हि सङ्केतितार्थं बोधयित्वा विरता भवति। अतः तस्य रसादिव्यङ्ग्यार्थबोधने नास्ति पुनः सामर्थ्यम्। अत्र केचन आक्षिपन्ति - सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः इति। एतस्य तात्पर्यं तावत् केनचित् बलवता सैनिकेन प्रेरित एक एव बाणः एकेनैव वेगाख्येन व्यापारेण रिपोर्वर्मच्छेदं मर्मभेदं प्राणहरणञ्च विधत्ते, तथा सुकविप्रयुक्तः एक एव शब्दः एकेन एव अभिधाव्यापारेण पदार्थोपस्थितिम् अन्वयबोधं व्यङ्ग्यार्थप्रतीतिं च विधत्ते। अतः व्यङ्ग्यः अर्थः तेषां मते वाच्यः एव। किञ्च, विवक्षितार्थं बोधयित्वा एव अभिधा विरता भवति न ततः पूर्वम्। अतः व्यञ्जना न स्वीकर्तव्या इति केषाञ्चित् अभिमतम्। अत्र समाधानं – शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः

इति। अर्थात् वाचकस्य शब्दस्य सकृच्छाब्दबोधमुत्पाद्य पुनरभिधा अर्थान्तरबोधने असमर्था भवति इति। तेन सङ्केतितार्थमेव बोधयित्वा विरता अभिधा पुनः अर्थान्तरं न प्रकाशयति इति भावः।

तात्पर्यवृत्तिः न व्यङ्ग्यबोधिका – दशरूपककर्तुः धनिकस्य मते व्यञ्जना तात्पर्यवृत्तौ एव अन्तर्भवति। किञ्च तात्पर्यवृत्तिप्रतिपाद्यः एव व्यङ्ग्यः। ननु तात्पर्याख्या वृत्तिः पदानां सम्बन्धमात्रबोधनेन उपक्षीणा भवति। अतः सा कथं व्यङ्ग्यार्थान् बोधयेत्, कथं वा अतिरिक्तस्वरूपा च व्यञ्जना तदन्तर्गता भवति इति चेत् तेन उच्यते तात्पर्यं हि यावत्कार्यप्रसारि भवति। अर्थात् धनिकमते तात्पर्यवृत्तेः सीमा न निर्धारितः। अतः सा वृत्तिः अधिकं व्यङ्ग्यादिकमपि बोधयति इति मन्तव्यम्। अतः व्यञ्जना न स्वीकर्तव्या इति चेत् अत्रापि शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति समाधानम्। तथाहि तात्पर्यवृत्तिरपि वाक्यघटकपदानां संसर्गमात्रं जनयित्वा नष्टसामर्थ्या सती व्यङ्ग्यार्थमुत्पादयितुं न समर्था इति भावः।

ननु शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति न्यायस्वीकारे नास्ति काचित् राजाज्ञा। अयं न्यायः मीमांसकमतमात्रपरः। अतः अप्रामाणिकः अयं न्यायः न सर्वैः अभ्युपगन्तव्यः इति चेत् अत्रोच्यते – यदि दीर्घदीर्घतराभिधाव्यापारेण अभीष्टार्थसिद्धिः सम्भवति तदा लक्षणा अपि न स्वीकर्तव्या भवति। किञ्च, ब्राह्मण कन्या ते गर्भिणी इति वाक्यश्रवणानन्तरम् अविवाहितायाः कन्यायाः पुत्रोत्पत्तिवार्ताश्रवणेन शोकः, पुत्रस्ते जातः इति वाक्यश्रवणेन ब्राह्मणस्य हर्षः उत्पद्यते। एवं हर्षशोकादिप्रतीतिः हर्षशोकादिबोधक-मुखप्रसादमालिन्यादिभिः अनुमानात् प्रतीयते। परन्तु अभिधा दीर्घदीर्घतरव्यापारात्मिका इति स्वीकारे हर्षशोकादीनामपि वाच्यत्वं स्वीकरणीयम्। परन्तु हर्षशोकादिभावानां वाच्यत्वं केनापि न स्वीकृतम्। अतः सोऽयम् इषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः इति न्यायः न स्वीकरणीयः।

लक्षणा न व्यङ्ग्यार्थबोधिका –

शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः इति नियमेन गङ्गायां घोषः इत्यादौ लक्षणा तटाद्यर्थमात्रं बोधयित्वा विरता न पुनः अपि शीतत्वपावनत्वादिव्यङ्ग्यार्थबोधने न सक्षमा भवति।

अतः व्यञ्जनानामिका चतुर्थी वृत्तिः अवश्यं स्वीकर्तव्या इति आयाति।

२२.९.२) व्यञ्जनावृत्तेः माहात्म्यम्

व्यङ्ग्यार्थः वाच्यार्थात् सर्वथा भिन्नः एव भवति। अधस्तात् ध्वन्यालोकग्रन्थे निरूपिताः केचन श्लोकाः उदाहरणरूपेण उपस्थाप्यन्ते।

१. कदाचित् वाच्ये विधिरूपे प्रतिषेधरूपः –

भ्रम धार्मिक विश्रब्ध सः शुनकोऽद्य मारितस्तेन।

गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥ इति।

अर्थः – हालककविकृतगाथासप्तशत्यां द्वितीये शतके गोदावरीनदीतीरे कुञ्जे कृतसङ्केतायाः कुलटायाः तत्रैव प्रतिदिनपुष्पावचयनेन तत् सङ्केतभञ्जकं स्वपोषितकुक्कुरोपद्रवेणापि अनिवृत्तं धार्मिकं

प्रति तस्या एव दिनान्तरे उक्तिरियम्। हे धार्मिक अद्य विश्वस्तः कुक्कुरोत्पाताभावेन आश्वस्तहृदयः सन् भ्रम पुष्पावचयनाय पर्यट। येन गोदावरीनद्याः यः कच्छः जलप्रायदेशः तटस्तत्र यत्कुञ्जं लतावृतस्थानं तत्र निवासिना विख्यातेन दृप्तसिंहेन यो दिनान्तरे त्वामुद्वेजयति स श्वा तव उपद्रावकः कुक्कुरः मारितः इति श्लोकार्थः। एतावद्दिनपर्यन्तं तव कुक्कुरोपद्रव एवासीत्, अद्य तु साक्षात् दृप्तः सिंह एव उपस्थितः, एवं स्थितौ यदि अद्यापि तत्र भ्रमणं करिष्यसि तदा मरणमेव भावि इति कथमपि तत्र मा भ्रम इति व्यज्यते। वस्तुतः अत्र अभिधावृत्त्या भ्रम इति विधिरेव बोध्यते। परन्तु व्यञ्जनावृत्त्या मा भ्रम इति निषेध एव व्यक्तः भवति।

२. क्वचिद् वाच्ये प्रतिषेधरूपे विधिरूपो यथा –

श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।

म पथिक रात्र्यन्ध शय्यायामावयोः शयिष्ठाः॥ इति।

अर्थः – हालकविकृतायां गाथासप्तशत्यां सप्तमशतके ६३-तमं पद्यमिदम्। पूर्वरात्रौ सुरताय निजभ्रमेण एकास्तरणशयनविधायिनीं श्वश्रूं विधृत्य अनर्थविधायिनं प्रोषितं रात्र्यन्धत्वेन परिचायितस्वरूपम् उपपतिं प्रति स्वयं दूत्याः कुलटायाः उक्तिरियम्। अत्र शय्याया अस्मिन् पार्श्वे श्वश्रूः निमज्जति जरत्तरत्वेन निष्पन्दा शेते, अत एव ततो न किञ्चिदाशङ्कनीयम् इत्याशयः। अत्र अस्मिन् पार्श्वे अहं स्वपिमि इति शेषः। अत्र स्वापबोधकपदस्य अप्रयोगात् कुलटायाः मन्मथपीडया निद्राराहित्यं द्योत्यते। हे पथिक प्रवासिन् मम शय्यायाम् अस्मदीयास्तरणे मा निमङ्क्ष्यसि पार्श्वपरिवर्तनादिभिः इतस्ततो न विलुण्ठिष्यसि। अत्र मा शयिष्ठाः इति निषेधरूपार्थः वाच्यः, परन्तु शयिष्ठाः इति विधिरूपार्थः व्यङ्ग्यः।

३. क्वचिद्वाच्याद् विभिन्नविषयत्वेन व्यवस्थापितो यथा –

कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।

सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्॥ इति।

अर्थः – स्वकान्ताया उपपतिदष्टमधरं वीक्ष्य रुष्टे प्रोषितागते पत्यौ निरपराधत्वबोधनाय प्रतारयन्त्याः सख्याः उक्तिरियम्। प्रियायाः स्वप्रियतमायाः सव्रणं व्रणसहितम् अधरम् अधरोष्ठं दृष्ट्वा कस्य वा पत्युः रोषो न भवति अपि तु सर्वस्यापि रोषो भवत्येव इति भावः। एतेन अस्याः न कोऽपि दोष इति व्यज्यते। हे भ्रमरसहितपद्माघ्राणशीले प्रतीपाचरणात् प्रतिकूले त्वम् इदानीं पत्युः तर्जनां भ्रमरदंशनजन्यवेदनां च सहस्व इति श्लोकार्थः। अत्र वाच्यार्थबोधे सखी उद्देश्या तथा भ्रमरेणास्य अधरो दष्टः न पुनरुपपतिना इति व्यङ्ग्यार्थबोधे कान्त उद्देश्य इति विषयभेद इत्यर्थः। किञ्च अत्र ममैवं वैदग्ध्यम् इति प्रतिवेशिनी विषयः, इदं मया समाहितं पुनरेवं चेत् त्वया एव समाधेयम् इति उपपतिः विषयः, भ्रमरेण अस्याः अधरः खण्डितः, न तु भर्त्रा इति त्वया ईर्ष्या न विधेया इति सपत्नी विषयः, सरलतरेयं न किञ्चित्प्रपञ्चं जानाति इत्यस्य साध्वीविषयः, नान्यथा शङ्कनीया इत्यस्य श्वश्रूः विषयः इत्येवं विषयभेदेन व्यङ्ग्यार्थाः अपि भिन्ना भिन्नाः भवन्ति।

एवं वाच्यार्थात् सर्वथा भिन्नस्य व्यङ्ग्यार्थस्य प्रतिपादनाय व्यञ्जना नाम तुरीया वृत्तिः अवश्यम् आलङ्कारिकैः अङ्गीकर्तव्या इत्येव आयाति।

पाठगतप्रश्नाः-४

२९. व्यञ्जनायाः लक्षणं लिखत।

३०. व्यञ्जना मूलतः कतिविधा।

३१. शाब्दीमूला व्यञ्जना कतिविधा। ताः काः।

३२. लक्षणा व्यङ्ग्यार्थबोधिका अस्ति न वा।

३३. अभिधा व्यङ्ग्यार्थबोधिका अस्ति न वा।

२२.१०) तात्पर्यवृत्तिः

आलङ्कारिकैः मुख्यतया तिस्रः एव वृत्तयः अङ्गीकृताः। परन्तु तात्पर्याख्या अन्यैका वृत्तिः वर्तते इति केषाञ्चन विदुषाम् अभिप्रायः। तत्र साहित्यदर्पणकारः पण्डितविश्वनाथकविराजः अन्यतमत्वं भजते। साहित्यदर्पणकारः तात्पर्यवृत्यङ्गीकरणे किं ब्रूते इति वयम् अस्मिन् पाठे पश्यामः।

२२.१०.१) तात्पर्यवृत्तेः लक्षणम्

साहित्यदर्पणकारमते अभिधया लब्धः अर्थः वाच्यार्थः इत्युच्यते। अत्र कश्चन संशयः ग्रन्थकारैः उच्यते। ननु अभिधया अस्मात् शब्दाद् अयमर्थो बोद्धव्यः इत्याकारकं ज्ञानं भवति। तेन अभिधावृत्त्या प्रतिपदम् अर्थस्तु ज्ञायते परन्तु वाक्ये पदसमूहत्वात् पदानां परस्परम् अर्थावगते सति तेषां पदार्थानाम् अन्वयेन पूर्णवाक्यार्थज्ञानं तु न सम्भवति। यतो हि अभिधावृत्तिः पदस्य अर्थं प्रतिपाद्य एव विरता भवति। न हि विरतः कश्चित् पुनः कार्ये प्रवर्तेत। शब्दबुद्धिकर्मणां विरम्यव्यापाराभावः इति न्यायेन न हि विरतया अभिधया पुनः वाक्यार्थावबोधः सम्भवेत्। ननु पदार्थानां ज्ञान जाते सति कथं वाक्यार्थप्रतीतिः इति चेदुच्यते यत् तात्पर्याख्यया वृत्त्या एव पदार्थानां मध्ये अन्वयसम्पादनेन पूर्णवाक्यता सिद्ध्यति। तस्मात् इयं विलक्षणा वृत्तिः तात्पर्याख्या अङ्गीकार्या एव।

तात्पर्यवृत्तेः दर्पणग्रन्थोक्तं लक्षणं तावत् -

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे॥ इति।

परे भाट्टमीमांसकाः प्राचीननैयायिकाश्च, पदार्थानाम् अभिधया लक्षणया वा उपस्थितानाम् अर्थानाम्, अन्वयबोधने परस्परं यथासम्भवं सम्बन्धबोधने,तात्पर्यार्थं तात्पर्याख्यां वृत्तिं आहुः उक्तवन्तः विचक्षणाः इति श्लोकस्यास्य सरलार्थः।

उदाहरणं तावत् - शरीरमाद्यं खलु धर्मसाधनम् इति। अत्र शरीरपदे अभिधया स्थूलदेहः इत्यर्थः लभ्यते, आद्यम् इत्यस्य प्रथमम् इत्यर्थः, खलु इति निश्चयार्थकम् अव्ययपदम्। धर्मसाधनम् इत्यस्य अभिधया धर्मस्य प्राप्तये उपायीभूतम् इत्यर्थः आगच्छति। एवं सति न अर्थविवेकः जायेत। तस्मात् अत्र तात्पर्यवृत्त्या पदार्थानाम् अन्वयेन एकवाक्यार्थः आगच्छति - शरीरमेव धर्मस्य प्राप्तये प्रथमं उपायभूतम् इति। इत्थम् अर्थप्रतीतौ इयं वृत्तिः अपेक्षते। तस्मात् इयं तात्पर्यार्थवृत्तिः स्वीकार्या।

२२.१०.२) तात्पर्यवृत्त्याः अङ्गीकरणे सम्प्रदायभेदाः

अत्र विद्यते वैमत्यं मीमांसकानां मध्ये अस्याः वृत्तेः स्वीकारप्रसङ्गे। अत्र पक्षद्वयं समापतति। तच्च – अन्विताभिधानवादिनः अभिहितान्वयवादिनः च।

अन्विताभिधानवादः

प्राभाकराः गुरवो वा अन्विताभिधानवादिनः इत्युच्यन्ते। तथाहि एतेषां नये तात्पर्यवृत्तेः प्रयोजनं नास्ति। तथाहि "सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः" इति न्यायेन अभिधायाः यावत्कार्यप्रसारित्वात् तया एव अभिधावृत्त्या पदार्थाः परस्परम् अन्विताः भूत्वा एव अभिहिताः भवन्ति। तेन तेषां पदानाम् अन्वयपूर्वकमेव अर्थप्रतीतौ पुनः अन्वयबोधनं नापेक्षते। तन्मते आदौ क्रियाकारकयोः मध्ये अन्वयबोधो जायते। तत्पश्चात् पदविशेषसमभिव्याहारात् विशेषस्मृतिः उत्पद्यते। तथाहि अन्वितघटे एव घटपदस्य शक्तिः। शाब्दबोधे तु आकाङ्क्षादिवशात् वृत्तितादिविशेषरूपमेव भासते। अतः तात्पर्या वृत्तिः नापेक्षते इति तेषाम् अभिप्रायः।

अभिहितान्वयवादः

भाट्टाः अभिहितान्वयवादिनः इत्युच्यन्ते। तेषां नये अभिधया केवलं पदार्थाः एव उपलभ्यन्ते, न तु पदार्थानाम् अन्वयबोधने अभिधायाः क्षमत्वम्, तस्याः अर्थप्रतिपादनानन्तरं विरमणात्। तस्मात् अन्वयबोधने तात्पर्या वृत्तिः अपेक्षिता एवेति तेषामभिप्रायः। अतः तात्पर्यवृत्तिः अङ्गीकार्या एव।

दर्पणकाराभिमतम्

साहित्यदर्पणकारः पण्डितविश्वनाथकविराजः भाट्टानाम् अर्थात् अभिहितान्वयवादिनां मतमेव स्वीकरोति। तन्नये पदार्थबोधः नाम क्रियाकारकयोः मध्ये सम्बन्धः इति तु सत्यम्। परन्तु केवलम् अन्विते एव शक्तिः कुतः, क्रियाकारकयोः मध्ये सम्बन्धज्ञानसमयेऽपि अन्वयो जायते। तेन तत्र अन्वयसम्भवात् तत्र अभिधा प्रवर्तिता एव। अभिधा तथाविधम् अर्थं प्रतिपाद्य विरता। पुनः अन्वितेऽपि सा न प्रवर्तेत। ततः विशेषरूपं न अवभास्यते पुनः अभिधायाः प्रवृत्त्यनसम्भवात्। तदा तात्पर्यवृत्त्या एव वाक्यार्थः अवगम्यते। तस्मात् तात्पर्या वृत्तिः अङ्गीकार्या इति साहित्यदर्पणकारस्य पण्डितविश्वनाथकविराजस्य मतम् इति शिवम्॥

पाठगतप्रश्नाः-६

३४. साहित्यदर्पणस्थं तात्पर्यवृत्तिलक्षणं लिखत।

३५. तात्पर्यवृत्तिप्रसङ्गे उक्तस्य पक्षद्वयस्य नाम किम्।

३६. दर्पणकारः कं मतम् अङ्गीकरोति।

३७. के अन्विताभिधानवादिनः।

३८. के अभिहितान्वयवादिनः।

पाठसारः

साहित्यशास्त्रे वृत्तिः अत्यन्तं सुप्रसिद्धा विद्यते। वृत्तेः भेदम् अवलम्ब्य विदुषां मतपार्थक्यं दरीदृश्यते। सा च वृत्तिः त्रिविधा चतुर्विधा वा। अभिधा, लक्षणा, व्यञ्जना, तात्पर्यम् इति भेदात्। का नाम अभिधा। शब्दो येन व्यापारेण वृत्त्या वा लोकप्रसिद्धम् अर्थं बोधयति स व्यापारो वृत्तिर्वा अभिधा इत्युच्यते। आचार्यमम्मटेन तस्य काव्यप्रकाशग्रन्थे अभिधालक्षणं निरूपितं– "स मुख्याऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते" इति। यथा घटमानय इति एकं वाक्यं श्रुतम्। ततः परम् अभिधावृत्त्या घटशब्दस्य कम्बुग्रीवादिमान् पिण्डः इति अर्थः बोध्यते। प्रकृते घटशब्दस्य सङ्केतितार्थः कम्बुग्रीवादिमान् पिण्डः। यतो हि अस्मात् घटशब्दात् कम्बुग्रीवादिमान् पिण्डः इति अर्थः बोद्धव्यः इति ईश्वरेच्छा वर्तते। एवमेव आनय इत्यस्य अपि अभिधावृत्त्या आनयनरूपक्रियां बोधयति। एवञ्च मुख्यार्थप्रतिपादिकां वृत्तिम् आलोच्य लक्षणावृत्तिः आलोच्यते। आलङ्कारिकैः बहुधा आद्रियमानेषु विषयेषु अन्यतमा इयं वृत्तिः, तत्रापि च लक्षणा वृत्तिः। यदा अभिधया मुख्यार्थे प्रतिपादितेऽपि वाक्यस्य अर्थावगमः न भवति तदा इयं लक्षणा वृत्तिः प्रवर्तते। सा मुख्यार्थेन सह केनापि सम्बन्धेन सम्बद्धं कमपि भिन्नम् अर्थं लक्षयति। सः एव लक्ष्यार्थः इत्युच्यते। सा च लक्षणा पुनः अशीतिप्रकारा। तन्मध्ये षोडशभेदाः एव मुख्याः। पण्डितविश्वनाथकविराजः स्वकृतसाहित्यदर्पणे लक्षणायाः षोडशभेदान् विस्तरशः प्रतिपादितवान्। प्रस्तुतपाठेऽस्मिन् तन्मतानुसारेण लक्षणायाः भेदाः प्रदर्शिताः। साहित्यशास्त्रे व्यञ्जना अत्यन्तं प्रसिद्धा वृत्तिः। अभिधा, लक्षणा तात्पर्यं चेति याः तिस्रः वृत्तयः वर्तन्ते ताः यदा स्वं स्वम् अर्थं बोधयित्वा क्षीणशक्तयः भवन्ति तदा यया वृत्त्या वाच्यलक्ष्यार्थापेक्षया कश्चिद् भिन्नः अर्थः बोध्यते सा वृत्तिः व्यञ्जना इत्युच्यते। इयं व्यञ्जना शब्दनिष्ठा, अर्थनिष्ठा, प्रकृतिनिष्ठा, प्रत्ययनिष्ठा निपातादिनिष्ठा च भवति। आलङ्कारिकैः यद्यपि तिस्रः एव वृत्तयः स्वीकृताः तथापि इयं तात्पर्याख्या वृत्तिः अवश्यम् अङ्गीकरणीया इति साहित्यदर्पणकारस्य मतम्। तत्र कारणं तावत् - अभिधावृत्त्या पदानाम् अर्थाः ज्ञायन्ते। परन्तु केवलं पदार्थाः ज्ञाताश्चेदेव न पूर्णावाक्यार्थावबोधो जायेत। तस्मात् पूर्णवाक्यार्थप्राप्तये या वृत्तिः अपेक्षते सा तात्पर्याख्या। प्रकृते पाठे तु वृत्तिचतुष्टयं समाश्रित्य आलोचना विहिता।

पाठान्तप्रश्नाः

१. अभिधावृत्तिम् अवलम्ब्य लघुप्रबन्धं लिखत।

२. वृत्तिम् अवलम्ब्य लघुप्रबन्धं लिखत।

३. अभिधावृत्तेः लक्षणं संक्षेपेण विवृणोतु।

४. वृत्तेः प्रकारभेदम् अवलम्ब्य लघुप्रबन्धं लिखत।

५. सङ्केतग्रहणं कथं सम्भवति।

६. लक्षणां वर्णयत।

७. रूढिमूलां प्रयोजनवतीं च लक्षणां प्रतिपादयत।

८. लक्षणायाः षोडशभेदान् विस्तरेण वर्णयत।

९. उपादानलक्षणां सभेदं सोदाहरणञ्च प्रतिपादयत।

१०. लक्षणलक्षणां तद्भेदांश्च विस्तरेण सोदाहरणं वर्णयत।

११. व्यञ्जनावृत्तिं संक्षेपेण विवृणोतु।

१२. आर्थीव्यञ्जनां संक्षेपेण विवृणोतु।

१३. शाब्दीव्यञ्जनां संक्षेपेण विवृणोतु।

१४. तात्पर्यवृत्तिं सोदाहरणं परिचाययत।

१५. दर्पणस्थं तात्पर्यवृत्तिलक्षणं सोदाहरणं व्याख्यात।

१६. तात्पर्यवृत्त्यङ्गीकारे पक्षद्वयं तन्मतञ्च प्रतिपादयत।

१७. साहित्यदर्पणकारमतं स्पष्टीकुरुत।

१८. तात्पर्यवृत्तिः किम् अङ्गीकार्या उत न इति सप्रमाणं विवृणुत।

१९. अन्विताभिधानवादं विस्तरेण प्रतिपाद्य कथं तात्पर्यवृत्तिः न अङ्गीकार्या इति व्याख्यात।

२०. अभिहितान्वयवादं विस्तरेण प्रतिपाद्य कथं तात्पर्यवृत्तिः स्वीकार्या एव इति प्रतिपादयत।

पाठगतप्रश्नानाम् उत्तराणि

१. परार्थाभिधानं वृत्तिः।

२. शक्तिः।

३. चतुर्विधा।

४. अभिधा, लक्षणा, व्यञ्जना, तात्पर्यः चेति।

५. अर्थबोधं प्रति अनुकूलः कश्चिद् व्यापारो वर्तते, स व्यापारः वृत्तिः।

६. अभिपूर्वकाद् धा-धातोः अङ्-प्रत्ययेन अभिधाशब्दोऽयम् निष्पन्नः।

७. "स मुख्याऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते" इति।

८. "तत्र सङ्केतितार्थस्य बोधनात् अग्रिमाभिधा"इति।

९. अस्माच्छब्दादयमर्थः बोद्धव्यः इतीश्वरेच्छा सङ्केतः।

१०. वाच्यार्थः।

११. मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।

१२. मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।

१३. द्विविधः।

१४. मम्मटाचार्यः।

१५. पण्डितविश्वनाथकविराजः।

१६. शब्दस्य उपरि।

१७. मुख्यार्थस्य।

१८. लक्ष्यार्थः।

१९. द्विविधा, उपादानलक्षणा लक्षणलक्षणा च।

२०. अष्टप्रकारिका।

२१. श्वेतः धावति इति।

२२. गौर्वाहीकः इति।

२३. एतानि तैलानि हेमन्ते सुखानि इति।

२४. कुन्ताः प्रविशन्ति इति।

२५. राजा कण्टकं शोधयति इति।

२६. राजकुमाराः गच्छन्ति इति।

२७. कलिङ्गः साहसिकः इति।

२८. आयुः पिबति इति।

२९. विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।

३०. सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥ इति।

३१. द्विविधा।

३२. द्विविधा। अभिधामूला लक्षणामूला चेति।

३३. नास्ति

३४. नास्ति।

३५. तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे॥

३६. अभिहितान्वयवादपक्षः, अन्विताभिधानवादपक्षः च।

३७. अभिहितान्वयवादमतम्।

३८. प्राभाकराः।

३९. भाट्टाः।

॥ इति द्वाविंशः पाठः ॥



२३

348sk23

छन्दसां मात्रागणयतिभेदाः

प्रस्तावना

मन्त्राः छन्दोबद्धाः भवन्ति। केवलं यजुर्वेदं परित्यज्य संहितात्रयं छन्दोमयं भवति। अतः छन्दसां ज्ञानं विना वेदमन्त्राः साधु उच्चारयितुं न शक्यन्ते। अतः षट्सु वेदाङ्गेषु छन्दसः अन्तर्भावः भवति। वेदपुरुषस्य पादत्वेन छन्दसः कल्पना क्रियते। तथाहि प्रोक्तम् - "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते" इति। शौनकविरचिते ऋक्प्रातिशाख्ये अन्तिमभागे छन्दसां पर्याप्तं विवेचनं विद्यते। अस्य छन्दःशास्त्रस्य पिङ्गलच्छन्दःसूत्रनामा ग्रन्थः प्रथितः विद्यते। केनचित् पिङ्गलाचार्येण ग्रन्थः अयं विरचितः। अत्र वैदिकानि लौकिकानि च छन्दांसि विवेचितानि सन्ति। छन्दःशास्त्रम् अत्यन्तं प्राचीनम्। यास्काचार्यविरचिते निरुक्तग्रन्थे ब्राह्मणग्रन्थे च छन्दःशब्दस्य बहुधा निर्वचनं प्रदर्शितम्। ऐतरेयारण्यके आम्नातम् - "मानवान् पापकर्मभ्यः छादयन्ति छन्दांसि इति छन्दः" इति। तैत्तिरीयसंहितायाम् आम्नातम्- "देवा छन्दोभिरात्मानं छादयित्वा उपायन् प्रजापतिरग्निं चिनुत" इति। व्याकरणाचार्यस्य महर्षेः पाणिनेः मते तु छन्द्-धातोः छन्दःशब्दस्य व्युत्पत्तिः। प्रकृतपाठे अस्मिन् किञ्चित् छन्दोसम्बन्धिचर्चा प्रस्तूयते।

उद्देश्यानि

इमं पाठं पठित्वा भवन्तः भवत्यः वा-

- अमुं पाठं पठित्वा भवान् -
  - छन्दसः सामान्यपरिचयं ज्ञातुं शक्नुयात्।
  - छन्दसां लक्षणानि ज्ञातुं प्रभवेत्।
  - छन्दसां वैशिष्ट्यानि वक्तुं शक्नुयात्।
  - छन्दसः भेदान् ज्ञातुं शक्नुयात्।
  - पद्यस्य लक्षणं ज्ञातुं शक्नुयात्।
  - वृत्तस्य लक्षणं प्रभेदान् च ज्ञातुं प्रभवेत्।
  - छन्दःशास्त्रस्य पारिभाषिकशब्दान् (गणान्, यतिं, दण्डकं च) ज्ञातुं शक्नुयात्।
  - गुरुस्वरस्य लक्षणादिकं ज्ञातुं प्रभवेत्।
  - छन्दसा श्लोकं रचयितुं योग्यो भवेत्।
  - श्लोकं वीक्ष्य किं छन्दः अस्ति इति ज्ञातुं प्रभवेत्।

२३.१) छन्दसः लक्षणम्

छादयति आच्छादयति वा इति छन्दः। वैयाकरणपाणिनेः मते तु अभिप्रायार्थबोधकात् आनन्दपर्यायभुक्तार्थात् वा छदि-धातोः छन्दःशब्दस्य उत्पत्तिः जाता। यत् पापम् आच्छादयति, तत् छन्दः। अथवा यत् पापात् यजमानस्य पुरोहितस्य च आच्छादनं करोति, तत् छन्दः। तैत्तिरीयसंहितायां छन्दसः उत्पत्तिविषये एका आख्यायिका समुपलभ्यते। प्रजापतिः अग्निं चितवान्। स च अग्निः भयङ्करं रूपं धृतवान्। तम् अग्निं निधाय प्रजापतिः देवगणस्य सकाशे गतवान्। तत् भयङ्करं रूपं च वीक्ष्य देवाः अग्नेः सकाशं गन्तुं साहसं न कृतवन्तः। तदा देवाः छन्दसा शरीरम् आच्छाद्य अग्नेः सकाशं गत्वा अक्षततया पुनरागतवन्तः। छन्दसा शरीरम् आच्छादितवन्तः। अतः छन्दः इति नाम्ना सुप्रसिद्धम् अस्ति। ऐतरेयारण्यके कथयति - "मानवान् पापकर्मभ्यः छादयन्ति छन्दांसि इति छन्दः" इति। तैत्तिरीयसंहितायां प्रोक्तम्- "देवा छन्दोभिरात्मानं छादयित्वा उपायन् प्रजापतिरग्निं चिनुत" इति।

२३.२) छन्दसः प्रकाराः

छन्दः वस्तुतस्तु लौकिकवैदिकभेदेन द्विविधं भवति। लौकिकच्छन्दस्तु पिङ्गलादीनाम् आचार्याणां मते मात्रावर्णविभेदेन द्विविधम्। तथाहि वृत्तरत्नाकरे प्रोक्तम्-

"पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।
मात्रावर्णविभेदेन च्छन्दस्तदिह कथ्यते॥" इति

अर्थात् पिङ्गलाचार्यः छन्दः द्विविधम् अस्ति इति प्रोक्तवान्। ते च वैदिकम्, लौकिकञ्च इति। तत्रापि लौकिकं छन्दः मात्राभेदेन वर्णभेदेन पुनः द्विधा अस्ति।

२३.३) पद्यस्य लक्षणम्

छन्दोमञ्जरीग्रन्थे पद्यलक्षणम् उक्तवान् - 'पद्यं चतुष्पदी' इति। चतुर्णां पादानां समाहारः चतुष्पदी इति। अत्र समाहारे ईप्रत्ययः। अर्थात् चतुष्पादात्मकं पद्यं भवति इति।

तेन छन्दःशास्त्र-पारिभाषिक-पाद-चतुष्टय-समाहारात्मक-वाङ्मयत्वं पद्यत्वमिति गङ्गादासस्य आशयः। इदञ्च पद्यं द्विविधं भवति। यथा - १) वृत्तपद्यम्, २) जातिपद्यम्।

तत्र अक्षरगणघटितं पद्यं वृत्तं, मात्रिकगणघटितं पद्यञ्च जातिः इत्युच्यते। वृत्तपद्यस्य उदाहरणानि भवन्ति वसन्ततिलकादयः। जातिच्छन्दस्य उदाहरणानि भवन्ति आर्यादयः इति तदुक्तं हि छन्दोमञ्जर्याम्-

"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्।। " इति।

अर्थात् छन्दोबद्धं पद्यं भवति इति तु सामान्यलक्षणम्। छन्दोमञ्जर्यां प्रोच्यते यत् पादचतुष्टयात्मकं पद्यं भवति इति। तच्च पद्यम् द्विविधं भवति। यथा वृत्तपद्यम्, जातिपद्यम् इति। अक्षराणां निर्दिष्टसंख्यया नियमितं निबद्धं च पद्यं वृत्तपद्यम्। अक्षरसंख्यातम् अक्षरैः एकद्व्यादिवर्णैः संख्यातं परिगणितं यत् तत् वृत्तं नाम भवेत्। अस्य उदाहरणं भवति-

"धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥"इति

अस्मिन् श्लोके अक्षरसंख्यया पद्यं निर्धारितं भवति। संख्याम् आश्रित्य एव पद्यस्य गणना भवति। यथा - प्रकृतश्लोके अस्मिन् प्रत्येकं पादे अष्टौ वर्णाः सन्ति। तत्र जातिः नाम नियतमात्रिका। तदुक्तं छन्दोमञ्जर्यां - जातिर्मात्राकृता भवेत् इति। याः मात्राः अक्षरावयवरूपाः ताभिः कृता निवद्ध्या सा जातिः नाम भवेत्। यथा-

"तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि।

अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति"॥ इति।

इति जातिरूपस्य पद्यस्य एतत् एकम् उदाहरणम्। मात्राम् आश्रित्य एव पद्यस्य गणना भवति। चरणस्य पादस्य वा मात्रासादृशतया पद्यस्य गणना भवति। वामकरतलेन एकवारं जानुमण्डलं परिक्रमणाय य समयः अपेक्षते, स मात्रापदवाच्यः भवति इति कविभिः प्रोक्तम्। मात्रा त्रिविधा भवति। ताश्च ह्रस्वमात्रा, दीर्घमात्रा, प्लुतमात्रा इति। यस्य उच्चारणाय एकमात्रिकः कालः अपेक्षते, स ह्रस्वः भवति। यस्य उच्चारणाय द्विमात्रिकः कालः अपेक्षते, स दीर्घः भवति। यस्य उच्चारणाय त्रिमात्रिकः कालः अपेक्षते, स प्लुतः भवति। व्यञ्जनवर्णस्य उच्चारणाय अर्धमात्रिककालः अपेक्षते। तथाहि प्रोक्तम्-

"एकमात्रो भवेद् ह्रस्वः, द्विमात्रो दीर्घ उच्यते।

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥"इति।

तथाहि वृत्तं नाम नियतगुरुलघुविन्यासम्। गुरुलघुविन्यासनियमनञ्च गणसाध्यम्। तथाहि म-य-र-स-त-ज-भ-ना अष्टौ गणाः। ते गणा ह्यक्षरगुरुलघुविन्यासभेदाद् विभिन्नाः भवन्ति।

पाठगतप्रश्नाः-१

१. छन्दःशब्दस्य व्युत्पत्तिः का।

२. छन्दः वेदपुरुषस्य किम् अङ्गं भवति।

३. छन्दः कतिविधम्। तानि च कानि।

४. लौकिकं छन्दः कतिविधम्। तानि च कानि

५. पद्यस्य लक्षणं किम् अस्ति।

६. पद्यं कतिविधम्। तानि च कानि।

२३.४) वृत्तस्य प्रकाराः

वृत्तम् त्रिविधम् अस्ति। यथा - १) समवृत्तम्, २) अर्धसमवृत्तम्, ३) विषमवृत्तम्। तथाहि छन्दोमञ्जर्यां प्रोक्तम्- "सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा॥" इति। एवञ्च वृत्तरत्नाकरे अपि वृत्तभेदकथनम् - "सममर्धसमं वृत्तं विषमं च तथापरम्॥" इति।

२३.४.१) समवृत्तम्

यस्य वृत्तस्य पादचतुष्टये गुरुलघुक्रमेण समानसंख्यकम् अक्षरं विद्यते, तत् समवृत्तम्। तथाहि प्रोक्तं छन्दोमञ्जर्याम् - "समं समचतुष्टयम्"इति। अर्थात् चतुर्षु पादेषु समानसंख्यकानि अक्षराणि विद्यन्ते। तथाहि वृत्तरत्नाकरे प्रोक्तम्-

"अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते॥"इति।

अङ्घ्रयः नाम पादाः। यस्य वृत्तस्य चत्वारः अपि पादाः समानेन लक्षणेन युक्ताः भवन्ति। अर्थात् यस्मिन् वृत्ते चत्वारः एव पादाः समानाक्षरसंख्याविशिष्टाः भवन्ति, तत् समवृत्तम् इति उच्यते। यथा- इन्द्रवज्रा, शालिनी, मालिनी, रथोद्धता, वंशस्थविलः इत्यादीनि। एकम् उदाहरणं भवति-

"इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति॥"इति।

चतुर्षु पादेषु १२ अक्षराणि सन्ति। अत एव समवृत्तस्य उदाहरणम् एतत् अस्ति।

२३.४.२) अर्धसमवृत्तम्

यस्य वृत्तस्य प्रथमः पादः तृतीयपादतुल्य एवं चतुर्थः पादः द्वितीयपादतुल्यः भवति। तत् अर्धसमं नाम वृत्तम्। तदुक्तं केदारभट्टेन वृत्तरत्नाकरे -

"प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते॥" इति।

छन्दोमञ्जर्यां प्रोक्तम्- " आदिस्तृतीयवद् यस्य पादस्तुर्यो द्वितीयवत्। "इति।

तथाहि यस्य वृत्तस्य आदिः प्रथमः पादः तृतीयवत् तृतीयपादतुल्य एवं तुर्यः चतुर्थः पादो द्वितीयवद् द्वितीयपादतुल्यस्तत् हि अर्धसमं नाम वृत्तम्। तथा च अर्धं समं यस्य तद् अर्धसमम् इत्यन्वर्थसंज्ञा भवति। यथा - पुष्पिताग्रा, सुन्दरी, मालभारिणी इत्यादीनि। अर्धवृत्तस्य उदाहरणम् -

"क्व वयं क्व परोक्षमन्मथः
मृगशावैः सममेधितो जनः।
परिहासविजल्पितं सखे
परमार्थेन न गृह्यतां वचः॥"इति।

अत्र प्रथमपादे दश अक्षराणि सन्ति। तथैव तृतीयपादे अपि दश अक्षराणि सन्ति। अत एव प्रथमपादः तृतीयपादतुल्यः अस्ति। एवञ्च द्वितीयपादे एकादश अक्षराणि सन्ति। तथैव चतुर्थपादे अपि एकादश अक्षराणि सन्ति। अत एव द्वितीयपादः चतुर्थपादतुल्यः भवति। अत एव श्लोकः अयम् अर्धवृत्तस्य उदाहरणम् अस्ति।

२३.४.३) विषमवृत्तम्

यस्य वृत्तस्य चतुर्षु पादेषु प्रति पादं भिन्नसंख्यायुक्तं भवति, तत् विषमवृत्तम्। अर्थात् प्रत्येकं पादे भिन्नसंख्याविशिष्टम् अक्षरम् अस्ति। तथाहि छन्दोमञ्जर्यां प्रोक्तम् - " भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम्। "इति। विषमवृत्तस्य लक्षणं कथयति वृत्तरत्नाकरे केदारभट्टः -

"यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम्।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः॥" इति।

यस्य छन्दसः चतुर्षु अपि पादेषु परस्परं भिन्नसंख्याविशिष्टानि अक्षराणि विद्यन्ते, तत् विषमवृत्तम् इति छन्दःशास्त्राचार्याः प्रवदन्ति। यथा - उद्गता, सौरभकः इत्यादीनि। विषमवृत्तस्य उदाहरणम् एकम् उच्यते -

"मृगलोचना शशिमुखी च
रुचिरदशना नितम्बिनी।
हंसललितगमना ललना
परिणीयते यदि भवेत् कुलोद्गता॥"इति।

अत्र प्रथमपादे दश अक्षराणि सन्ति। द्वितीयपादे दश अक्षराणि सन्ति। तृतीयपादे एकादश अक्षराणि सन्ति। चतुर्थपादे त्रयोदश अक्षराणि सन्ति। प्रत्येकं पादे भिन्नसंख्यायुक्तानि अक्षराणि सन्ति। अत एव विषमवृत्तस्य उदाहरणम् एतत् अस्ति।

२३.५) गणः

गण्-धातोः कर्तरि कर्मणि वाचि प्रत्यये गणशब्दः निष्पन्नः। गणः समूहः। किन्तु अत्र गणः नाम पद्यपादघटकाक्षरत्रयसमुदायः। छन्दःशास्त्रे प्रायः अष्टौ गणाः विराजन्ते। तथाहि छन्दोमञ्जर्यां प्रोक्तम्

"म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥" इति।

मगणः, यगणः, रगणः, सगणः, तगणः, जगणः, भगणः, नगणः, इति एते अष्टौ गणाः विद्यन्ते। तथा च ग इत्यनेन गुरुः, ल इत्यनेन लघुः स्वीक्रियते। एतैः एव समस्तं छन्दःशास्त्रं परिव्याप्तम् अस्ति। यथा - भगवता विष्णुना समस्तं जगत् परिव्याप्तं भवति तद्वत्। संस्कृतजगति छन्दसः ज्ञानलाभाय सर्वापेक्षया प्रयोजनीयम् उपकरणं गणः भवति। पादस्य गुरुलघुक्रमेण अक्षरत्रयं गणः भवति। छन्दोमञ्जर्यां गणलक्षणानि क्रमेण प्रोच्यन्ते आचार्यैः -

"मस्त्रिगुरुस्त्रिलघुश्च नकारो,
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥" इति।
"गुरुरेको गकारस्तु लकारो लघुरेककः"। इति

वृत्तरत्नाकरे केदारभट्टेन गणलक्षणानि प्रोच्यन्ते -

"सर्वगुर्मो मुखान्तर्लौ यरावन्तगलौ सतौ।

ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः॥" इति।

मगणः त्रिगुरुः। यस्मिन् गणे सर्वाणि अक्षराणि गुरुसंज्ञकानि भवन्ति, स गणः मगणः भवति। तदुदाहरणं वागर्थाः इति। अस्मिन् गणे त्रीणि अक्षराणि गुरुसंज्ञकानि सन्ति। संयोगात् पूर्वम् अक्षरं गुरुसंज्ञकं भवति। अत एव रकारथकारयोः संयोगात् पूर्ववर्णः गकारः अस्ति। अत एव गकारोऽपि गुरुसंज्ञको भवति। ततः परं कथयति "त्रिलघुश्च नकारः" इति। यस्मिन् गणे त्रीणि अक्षराणि लघुसंज्ञकानि भवन्ति, स नगणः भवति। यथा रचय इति। अत्र त्रीणि अक्षराणि लघुसंज्ञकानि भवन्ति। अत एव नगणस्य उदाहरणम् इदम्। भगणस्य लक्षणं तु "भादिगुरुः"इति। अर्थात् यस्मिन् गणे आदि अक्षरं गुरुसंज्ञकं भवति। अवशिष्टं अक्षरद्वयं लघुसंज्ञकं भवति। यथा - श्रीमति इति। अत्र केवलं प्रथमाक्षरं गुरुसंज्ञकं भवति। म, ति इति अक्षरद्वयं लघुसंज्ञकं भवति। अत एव भगणस्य उदाहरणम् इदम् अस्ति। यगणस्य लक्षणं तु "आदिलघुः यः"इति। अर्थात् यस्मिन् गणे केवलं प्रथमाक्षरं लघुसंज्ञकं भवति। अवशिष्टञ्च अक्षरद्वयं गुरुसंज्ञकं भवति। स गणः यगणः इत्युच्यते। यथा - मनीषा इति। अत्र म इति केवलं लघु अक्षरं विद्यते। अवशिष्टं नी, षा इति अक्षरद्वयं गुरुसंज्ञकं भवति। अत एव यगणस्य उदाहरणम् इदम् अस्ति। जगणस्य लक्षणं तु " जो गुरुमध्यगतः"इति। अर्थात् जगणे केवलं मध्यमम् अक्षरं गुरुसंज्ञकं भवति। अवशिष्टं लघुसंज्ञकं भवति। अर्थात् प्रथमम् अक्षरं लघुसंज्ञकं भवति। अन्तिमम् अक्षरम् अपि लघुसंज्ञकं भवति। यथा - मधूनि इति। अत्र केवलं मध्यमम् अक्षरं धू इति गुरुसंज्ञकं भवति। अपरञ्च प्रथमम् अक्षरं म इति, अन्तिमम् अक्षरं नि इति लघुसंज्ञकं भवति। अत एव जगणस्य उदाहरणम् इदम् अस्ति। ततः रगणस्य लक्षणं प्रोक्तम्- "र लमध्यः"इति। अर्थात् यस्मिन् गणे मध्यमम् अक्षरं लघुसंज्ञकं भवति चेत् स रगणः इत्युच्यते। अवशिष्टं लघुसंज्ञकं अक्षरम् अस्ति। अर्थात् प्रथमम् अक्षरम् अन्तिमम् अक्षरं च गुरुसंज्ञकं भवति। यथा - कौमुदी इति। अत्र मु इति मध्यमम् अक्षरं केवलं लघुसंज्ञकं विद्यते। अपरं कौ, दी इति अक्षरद्वयं गुरुसंज्ञकं भवति। अत एव रगणस्य उदाहरणम् इदम् अस्ति। सगणस्य लक्षणं तु " सोऽन्तगुरुः"इति। अर्थात् यस्मिन् गणे केवलम् अन्तिमम् अक्षरं गुरुसंज्ञकं भवति चेत् स सगणः इत्युच्यते। अवशिष्टं अक्षरञ्च लघुसंज्ञकं भवति। अर्थात् प्रथमम् अक्षरं मध्यमम् अक्षरञ्च लघुसंज्ञकम् अस्ति। यथा - कमला इति। प्रकृते अन्तिमम् अक्षरं ला इति गुरुसंज्ञकम् अस्ति। क, म इति प्रथमम् अक्षरम् मध्यमम् अक्षरञ्च लघुसंज्ञकम् अस्ति। अत एव सगणस्य उदाहरणम् इदं विद्यते। ततः तगणस्य लक्षणं प्राह " अन्तलघुस्तः "इति। अर्थात् यस्मिन् गणे केवलम् अन्तिमम् अक्षरं लघुसंज्ञकम् अस्ति चेत् स तगणः इत्युच्यते। अवशिष्टम् अक्षरं गुरुसंज्ञकं विद्यते। अर्थात् प्रथमम् अक्षरं मध्यमम् अक्षरञ्च गुरुसंज्ञकं विद्यते। यथा - सर्वाणि इति। अत्र णि इति अन्तिमम् अक्षरं लघुसंज्ञकं विद्यते। अवशिष्टं स, र्वा इति गुरुसंज्ञकं विद्यते। यतो हि संयोगात् पूर्ववर्णः गुरुसंज्ञको भवति। र्वा इति संयोगात् पूर्वं सकारः गुरुसंज्ञको विद्यते। अत एव तगणस्य उदाहरणं विद्यते। अक्षरत्रयम् आधारीकृत्य अष्टौ गणाः भवन्ति। गकारः इत्युक्ते" गुरुरेको गकारस्तु"इति। गकारः इत्युक्ते केवलम् एकम् एव अक्षरम् अस्ति, तच्च अक्षरं गुरुसंज्ञकं भवति। यथा - सा इति। प्रकृते सा इति एकम् एव अक्षरं विद्यते। तच्च गुरुसंज्ञकं विद्यते। अपरस्तु लवर्णः विद्यते। लकारः इत्युक्ते " लकारो लघुरेकक:"इति। लकारः इत्युक्ते एकम् एव अक्षरं

विद्यते, तच्च अक्षरं लघुसंज्ञकं भवति। यथा- नु इति। अत्र केवलम् एकम् एव अक्षरं विद्यते। तच्च अक्षरं लघुसंज्ञकं विद्यते। अत्र अक्षरम् इत्युक्ते स्वरः स्वराश्रितः व्यञ्जनः वा।

पाठगतप्रश्नाः-२

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

७. वृत्तं कतिविधम्। तानि च कानि।

८. समवृत्तस्य लक्षणं लिखन्तु।

९. अर्धसमवृत्तस्य लक्षणं लिखन्तु।

१०. विषमवृत्तस्य लक्षणं लिखन्तु।

११. गणाः कतिविधाः सन्ति। तानि च कानि।

१२. मगणस्य लक्षणं लिखन्तु।

१३. यगणस्य लक्षणं लिखन्तु।

१४. रगणस्य लक्षणं लिखन्तु।

१५. सगणस्य लक्षणं लिखन्तु।

१६. तगणस्य लक्षणं लिखन्तु।

२३.६) अक्षराणां चिह्नानि

प्राच्यपण्डितप्रवराः गुरुवर्णानां कृते (ऽ) इति चिह्नं प्रयुज्यन्ते, लघुवर्णानां कृते च (।) इति चिह्नं प्रयुज्यन्ते। किन्तु पाश्चात्यपण्डितप्रवराः अन्यथा चिह्नं व्यवहरन्ति। पाश्चात्यपण्डिताः गुरुवर्णानां कृते (–) इति चिह्नं प्रयुज्यन्ते, लघुवर्णानां कृते च (U) इति चिह्नं प्रयुज्यन्ते।

छात्राणां बोधसौकर्याय स्मरणसौबिध्याय च काचित् तालिका प्रदीयते।

गणस्य नामानि	लक्षणानि	चिह्नानि	उदाहरणानि
मगणः	त्रिगुरुः	ऽऽऽ	श्रीदुर्गा
नगणः	त्रिलघुः	।।।	रचय
भगणः	आदिगुरुः	ऽ।।	श्रीमति
यगणः	आदिलघुः	। ऽऽ	मनीषा
जगणः	गुरुमध्यगतः	। ऽ।	मधूनि
रगणः	लमध्यः	ऽ। ऽ	कौमुदी

सगणः	अन्तगुरुः	।। ऽ	कमला
तगणः	अन्तलघुः	ऽऽ।	सर्वाणि

२३.७) मात्रिकच्छन्दसः उपयोगिनः गणाः

मात्रिकच्छन्दसः कृते उपयोगिनः गणाः आलोच्यन्ते। तच्च कारिकामाध्यमेन कथयति -

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः॥

आर्यादिमात्राच्छन्दसि चतुर्मात्रिकाः पञ्च गणाः विद्यन्ते। अर्थात् मात्रिकच्छन्दसि पञ्च गणाः विद्यन्ते। प्रत्येकं गणे प्रायः चत्वारः मात्राः विलसन्ति। ते च सर्वगुरुः, अन्तगुरुः, मध्यगुरुः, आदिगुरुः, सर्वलघुः इति। सर्वगुरुः इत्युक्ते सर्वे एव वर्णाः गुरुसंज्ञकाः भवन्ति। यथा- दुर्गा इति। अत्र दु, र्गा इति द्वयोः एव गुरुसंज्ञा विद्यते।

अन्तगुरुः इत्युक्ते केवलम् अन्तिमम् अक्षरं गुरुसंज्ञकं भवति। अवशिष्टं तु लघुसंज्ञकं भवति। यथा- रमणी इति। अत्र णी इति अन्तिमम् अक्षरम् एव गुरुसंज्ञकं विद्यते। अवशिष्टं र, म इति तु लघुसंज्ञकं विद्यते। मध्यगुरुः इत्युक्ते केवलं मध्यमम् अक्षरं गुरुसंज्ञकं भवति। अवशिष्टं तु लघुसंज्ञकं भवति। यथा - शिवाय इति। अत्र मध्यमम् अक्षरं वा इति गुरुसंज्ञकं भवति। अवशिष्टं शि, य इति तु लघुसंज्ञकं विद्यते। आदिगुरुः इत्युक्ते केवलम् आदि अक्षरम् एव गुरुसंज्ञकं भवति। अवशिष्टं तु लघुसंज्ञकं भवति। यथा - शङ्कर इति। अत्र तु केवलम् आदि अक्षरं श इति गुरुसंज्ञकं भवति। यतो हि ङ्क इति संयोगात् पूर्ववर्णः शकारः विद्यते। अवशिष्टं ङ्क, र इति तु लघुसंज्ञकं विद्यते। सर्वलघुः इत्युक्ते सर्वाणि अपि अक्षराणि लघुसंज्ञकानि भवन्ति। यथा - रचयति इति। अत्र सर्वाणि अपि अक्षराणि लघुसंज्ञकानि भवन्ति। अत्र एतद् अवधेयम् अस्ति यत् मात्रिकच्छन्दसि चतुर्मात्रिकः गणः भवति। तस्मात् प्रकृतगणे मात्राः चत्वारः इति तु अनिवार्यम्।

वामकरतलेन एकवारं जानुमण्डलं परिक्रमणाय य समयः अपेक्षते, स मात्रापदवाच्यः भवति इति कविभिः प्रोक्तम्। तथाहि प्रोक्तम् -

"वामजानुनि तद्धस्तभ्रमणं यावता भवेत्।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः॥"इति

मात्रा त्रिविधा भवति। ताश्च ह्रस्वः, दीर्घः, प्लुतः इति। यस्य उच्चारणाय एकमात्रिकः कालः अपेक्षते, स ह्रस्वः। यस्य उच्चारणाय द्विमात्रिकः कालः अपेक्षते, स दीर्घः भवति। यस्य उच्चारणाय त्रिमात्रिकः कालः अपेक्षते, स प्लुतः। व्यञ्जनवर्णस्य उच्चारणाय अर्धमात्रिककालः अपेक्षते। तथाहि प्रोक्तम्-

एकमात्रो भवेद् ह्रस्वः, द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥

अर्थात् लघुवर्णस्य एकमात्रा, गुरुवर्णस्य द्विमात्रा, प्लुतवर्णस्य त्रिमात्रा, व्यञ्जनवर्णस्य अर्धमात्रा भवति।

छात्राणां बोधसौकर्याय मात्रिकच्छन्दसां काचित् तालिका प्रस्तूयते -

गणः	चिह्नानि	उदाहरणानि	मात्राः
सर्वगुरुः	ऽऽ	दुर्गा	चत्वारः
अन्तगुरुः	।। ऽ	कमला	चत्वारः
मध्यगुरुः	। ऽ।	शिवाय	चत्वारः
आदिगुरुः	ऽ।।	शङ्कर	चत्वारः
सर्वलघुः	।।।।	रचयति	चत्वारः

२३.७.१) गुरुस्वरस्य वर्णनम्

छन्दसः प्राणभूताः गणाः तु निरूपिताः सन्ति। सम्प्रति शङ्का मनसि उदेति - गुरुवर्णः कः भवति, लघुवर्णश्च कः भवति इति। अस्य समाधानाय छन्दोमञ्जर्यां काचित् कारिका रचिता -

"सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा॥" इति।

उक्तञ्च वृत्तरत्नाकरे केदारभट्टपादैः -

"सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पादान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः"॥इति।

अनुस्वारेण युक्तः सानुस्वारः स्वरः ग इति संज्ञकः, गुरुरित्यर्थः। यथा - ग्रामं गच्छति इत्यत्र मकारोत्तरवर्तिनः अकारात् परम् अनुस्वारो वर्तते। अतोऽनुस्वारयुक्तत्वात् सः अकारः गुरुताम् आपद्यते। तत्र अनुस्वार इति उपलक्षणम्, तेन अवसाने व्यञ्जनसत्त्वेऽपि लघुः गुरुः भवेत्। एवं विसर्गः अन्ते यस्य वर्तते स विसर्गान्तः स्वरो गुरुर्भवति। यथा, रामः इत्यत्र मकारोत्तरवर्ती योऽकारः अस्ति। स गुरुतां भजते यतः तदन्ते विसर्गः वर्तते। एवं युक्तो वर्णः परो यस्मात् तादृशः युक्तपरः स्वरो गुरुः भवति। अञ्जिभिः अव्यवहिताः हलः संयोगसंज्ञां लभन्ते। तादृशसंयोगवान् वर्ण एव युक्तवर्णः। तथाहि रक्त इत्यत्र रकारोत्तरवर्ती योऽकारः स गुरुः। यतः तदुत्तरं वर्तते क्तेति संयोगः। श्लोके अपिशब्देन पादान्तस्थितः गुरुः अपि वर्णो विकल्पेन गुरुः भवेत्। अत्र वाशब्दस्य व्यवस्थावाचित्वाद् वृत्तेषु लघुवर्णः विकल्पेन गुरुः भवेत्, जातिषु तु लघुः गुरुश्च वर्णो विकल्पेन गुरुः भवेत् इति बोद्धव्यम्। पादस्य अन्ते लघुवर्णः वा विक्लपेन गुरुः भवति। यथा - "उपेन्द्रव्रजादपि दारुणोऽसि"इत्यत्र इदम् एकादशाक्षरात्मकस्य उपेन्द्रवज्रनाम्नः छन्दसः चरणम्। अस्य अन्ते "उपेन्द्रवज्रा जतजास्ततो गौ"इति वक्ष्यमाणलक्षणात् गुरुः

अपेक्षितः। परन्तु सि इति एकमात्रिकत्वात् लघुः इति छन्दोभङ्गस्य सम्भावना दृश्यते। तदा तु पादान्तस्थित्वात् लघोरपि विकल्पेन गुरुत्वं सम्भवम् अस्ति।

छन्दःशास्त्रे क्वचित् लघुत्वापेक्षायां गुरुरपि स्वरः लघुताम् आप्नोति। तत्र उदाहरणं तु -

"तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि।

अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति।। " इति। अत्र आर्या नाम वृत्तम्। अस्य लक्षणं तु प्रथमपादे द्वादशमात्राः, द्वितीयपादे अष्टादशमात्राः, तृतीयपादे पुनः द्वादशमात्राः, चतुर्थपादे पञ्चदशमात्राः इति। प्रस्तुतश्लोके द्वितीयपादचतुर्थपादयोः अन्तिमवर्णयोः लघोरपि गुरुत्वम् अत्यन्तम् आवश्यकम्। एवं तृतीये पादे सुन्दरि इति इकारस्य ग्राम्य इति संयुक्ताग्रवर्णात् पूर्ववर्तित्वेन गुरुत्वं सम्भवति। तेन तृतीयपादे त्रयोदशमात्राः भवन्ति। एतेन छन्दोभङ्गः भविष्यति।। अत एव काचित् कारिका प्रदीयते -

"पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः।
पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः"॥इति।

इति नियमाद् ग्रेति क्रमसंयोगपूर्वत्वात् गुरुरपि सुन्दरि इति इकारो व्यवस्थितविकल्पेन लघुतया परिणतो भवति। तेन पादान्तगुरोः लघुत्वेन स्वीकारो भवति। तेन एकमात्राह्रासात् तृतीयपादे द्वादशमात्रा एव ज्ञातव्याः, अतो न छन्दोभङ्गः।

'प्रह्वे वा' इति एतद् एकं विकल्पविधायकं सूत्रम्। अनेन प्र,ह्वे च इत्यनयोः शब्दयोः पूर्ववर्णस्य विकल्पेन ह्रस्वत्वं विधीयते। यथा -

"सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्यङ्गमनोपवस्त्रा।
निर्वृत्तपर्ज्जन्यजलप्राभिषेका प्रफुल्लकाशा वसुधेव रेजे॥"इति।

अत्र प्रवर्णस्य संयोगघटितत्वात् तस्मात् पूर्ववर्तिनः वर्णस्य तकारस्य गुरुत्वं भवति। परन्तु प्रकृतशास्त्रेण विकल्पेन लघुत्वं प्रतिपाद्यते इति शम्।

ह्रशब्दे परे गुरोः अपि लघुत्वं सम्भवति। तस्य उदाहरणं तावत्

"प्राप्य नाभिह्रदमज्जनमाशु प्रस्थितं निवसनग्रहणाय।
औपनिविकमरून्ध किल स्त्री बल्लभस्य करमात्मकराभ्याम्॥"इति।

अत्र ह्रवर्णस्य संयोगघटितत्वात् तस्मात् पूर्ववर्तिनः वर्णस्य भि इत्यस्य गुरुत्वं भवेत्। परन्तु प्रकृतशास्त्रेण विकल्पेन लघुत्वं प्रतिपाद्यते। तेन भि इत्यस्य लघुसंज्ञा एव भवति।

२३.७.२) यतिः

यम्धातोः भावे क्तिन्प्रत्यये यतिशब्दः निष्पद्यते। यतिः नाम विरामः। छन्दःशास्त्रे तु यतिशब्दः अयं यम्यते विश्राम्यते जिह्वा यत्र इति अधिकरणवाच्ये क्तिन्प्रत्ययस्य योगेन निष्पन्नः भवति। अतः जिह्वाविश्रामस्थानार्थे यतिशब्दः पारिभाषिकः भवति। तदुक्तं गङ्गादासकविराजेन -

"यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया।। " इति।

अर्थात् पद्यस्य उच्चारणसमये जिह्वा स्वत एव यत्र विश्रान्तिं लब्धुम् इच्छति तत्रैव यतिः भवति। विच्छेदः विरामः इत्यादिभिः पदैः यतिः बोध्यते। सा इयं यतिः पादमध्यगा पादान्ता चेति भेदात् द्विविधा। पादः नाम पद्यचरणम्। चतुष्पदात्मकस्य पद्यस्य प्रतिपादस्य अवसाने स्वभावत एव या यतिः भवति सा हि पादान्ता। तस्य उदाहरणं यथा 'न तज्जलं यन्न सुचारुपङ्कजं / न पङ्कजं तद् यदलीनषट्पदम्।। ' इति।

इति वंशस्थविलछन्दोबद्धपद्यस्य सुचारुपङ्कजम् इति प्रथमपादस्य अवसाने तथा षट्पदम् इति द्वितीयपादस्य अवसाने च पादान्ता यतिः विद्यते। किन्तु यत्र पद्यस्य पादमध्ये निर्दिष्टाक्षरानन्तरं यतिः भवति सा यतिः हि पादमध्यगा यतिः भवति। तथाहि 'सरसिजमनुविद्धं शैवलेनापि रम्यम्' इति मालिनीछन्दोबद्धपद्यपादे यथा रम्यम् इति पादस्य अवसाने पादान्ता यतिः वर्तते, तद्वत् प्रथमतः अष्टमात् अक्षरात् अनन्तरम् अनुविद्धम् इत्यत्र एका यतिः वर्तते, 'ननमययुतेयं मालिनी भगिलोकैः' इति निर्देशात्। अतः अनुविद्धम् इत्यत्र तु पादमध्यगा यतिः विद्यते। अत्र इदम् उल्लेख्यं यत् यस्मिन् अक्षरे यतिः निर्दिष्टा तदक्षरं पदस्य अन्तिमं भवेत्। यदि पदमध्ये यतिः भवति तर्हि सा यतिः श्रोतकार्कश्यात् रमणीयतां प्रजहाति। किन्तु स्वरसन्धेः पूर्वस्था पदमध्यस्था यतिस्तु न अरम्या। तथाहि 'कृष्णःपुष्णात्वतुलमहिमा मां करुणया' इत्यत्र पुष्णेत्यत्र यतिः पदमध्यगा। किन्तु 'त्वतुले'ति स्वरसन्धिना सा पदमध्यगा यतिः रमणीया एव संवृत्ता। वृत्तरत्नाकरे केदारभट्टेन यतिविषये एका कारिका प्रोक्ता - "यतिर्विच्छेदसंज्ञिका"इति। अर्थात् विच्छेदस्य यतिसंज्ञा भवति।

पाठगतप्रश्नाः-४

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

१७. गुरुवर्णः कः भवति।

१८. यतिः कतिविधा भवति।

१९. यतेः के प्रभेदाः सन्ति।

२०. यतिलक्षणं किम् अस्ति।

२३.८) दण्डकः

वृत्तरत्नाकरे दण्डकस्य लक्षणं प्रोक्तं - "यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः"इति। यत्र नगणद्वयं तदनन्तरं सप्तरगणाः विद्यन्ते, स चण्डवृष्टिप्रपातः नाम दण्डक भवति। "तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः"इति। अनेन श्लोकेन षड्विंशत्यधिकस्य अक्षरपादस्य छन्दसः संज्ञां कथितवान्। तदूर्ध्वम् - तस्मात् षड्विंशत्यक्षरपादात् छन्दसः, ऊर्ध्वम् - उपरि, सप्तविंशत्याद्यक्षरपादानि छन्दांसि, चण्डवृष्ट्यादिचण्डिकाः - चण्डवृष्ट्यादिविशेषनामानः, दण्डकसामान्यनामानः, परिकीर्तिताः - कथिताः सन्ति। अर्थात् षड्विंशत्यधिकस्य अक्षरपादस्य छन्दसः दण्डकः इति संज्ञा भवति। दण्डकशब्दस्य अर्थस्तु दण्डप्रदानम्। अस्मिन् छन्दसि अपि दीर्घाः पादाः

भवन्ति। एतादृशस्य पादस्य उच्चारणाय कष्टं जायते। तदेव कष्टं दण्डः अस्ति। दण्डकस्य अस्य चण्डवृष्टि इति विशेषभेदाः विद्यन्ते।

२३.९) गाथालक्षणम्

वृत्तरत्नाकरे केदारभट्टेन श्लोकाकारेण गाथालक्षणं प्रतिपादितम् –

विषमाक्षरपादं वा पादैरसमं दशधर्मवत्।

यच्छन्दो नोक्तमत्र गाथेति तत् सूरिभिः प्रोक्तम्।।

"शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः॥"इति। अनेन श्लोकेन विशेषलक्षणेन अलक्षितानां प्रयुज्यमानानां छन्दसां सामान्यसंज्ञा गाथा इति विदधाति। शेषः नाम उक्तादन्यः। अत्रापि चण्डवृष्ट्यादिविशेषात् भिन्नम् इत्यर्थः। त्रिभिः षड्भिः वा पादैः संलक्षिताः गाथाः भवन्ति। यस्मिन् छन्दसि चतुर्भिन्नसंख्यकाः पादाः सन्ति। यस्मिन् छन्दसि गुरुलघुक्रमः अपि भिन्नः विद्यते। यस्मिन् छन्दसि प्रति चरणेषु अक्षरसंख्या भिन्ना भवति। तादृशस्य छन्दसः गाथा इति साधारणसंज्ञा भवति। गाथायाः उदाहरणम्-

"यथा यथा वादयति प्रियस्तथा तथा नृत्यामि चञ्चले प्रेम्णि।

वल्ली वलयत्यङ्गं स्वभावस्तब्धेऽपि वृक्षे॥"इति।

अस्मिन् श्लोके तु त्रयः पादाः सन्ति। अत एव अस्य छन्दसः गाथा इति संज्ञा प्रदीयते।

२३.१०) छन्दसां सामान्यसंज्ञा

अत्र अक्षराणां ह्रासवृद्ध्यनुसारेण समवृत्तछन्दसः नामानि निर्दिश्यन्ते। एकाक्षरात् आरभ्य एकेन एकेन अक्षरेण वर्धितैः पादैः भिन्नं भिन्नं छन्दो भवेत्। एकस्मिन् पादे एकम् एव अक्षरं भवति चेत् अपि तत् छन्दो भवति। ततः एकम् अक्षरम् आरभ्य प्रति एकस्य एकस्य च अक्षरं योजयित्वा अन्यानि छन्दांसि निर्मीयन्ते। तदेव श्लोकाकारेण केदारभट्टेन वृत्तरत्नाकरे प्रोक्तम् -

"आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः।

पृथक् छन्दो भवेत् पादैर्यावत् षड्विंशतिं गतम्॥"इति।

अर्थात् एकाक्षरात् पादात् आरभ्य एकेन एकेन अक्षरेण वर्धितैः पादैः भिन्नं भिन्नं छन्दो भविष्यति। इयं वृद्धिः कियती भवति इति जिज्ञासा जायते। अत्र समाधानं प्रदीयते यत् षड्विंशतिसंख्याकं पादं पर्यन्तं वृद्धिः सम्भवति। अर्थात् समवर्णवृत्तेषु एकेन अक्षरेण पादम् एकं कृत्वा चतुर्षु पादेषु जातेषु छन्द एकं भवति। एकेन वर्धिताभ्यां द्वाभ्यां वर्णाभ्यां चतुर्णां पादानां निर्माणे अपि पृथक् छन्दो भवति। एवम् एकैकवर्धनेन षड्विंशतिपर्यन्तं पृथक् पृथक् छन्दांसि संभवन्ति। एतेषां पृथक् पृथक् संज्ञाः संभवन्ति। पूर्वप्रतिपादितानाम् एकाक्षरात् पादात् आरभ्य षड्विंशत्यक्षरपादावधिकानां छन्दसां पृथक् पृथक् उक्तादिसामान्यसंज्ञाः भवन्ति। श्लोकाकारेण वृत्तरत्नाकरे केदारभट्टेन प्रकथितम् -

"उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका।

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च॥
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता।
शक्वरी साऽतिपूर्वा स्यात् अष्ट्यत्यष्टी ततः स्मृते॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः सङ्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः॥"इति।

अर्थात् एकाक्षरस्य छन्दसः नाम उक्ता इति। द्व्यक्षरस्य छन्दसः नाम अत्युक्ता इति। त्र्यक्षरस्य छन्दसः नाम मध्या इति। चतुरक्षरस्य छन्दसः नाम प्रतिष्ठा इति। पञ्चाक्षरस्य छन्दसः नाम सुप्रतिष्ठा इति। षडक्षरस्य छन्दसः नाम गायत्री इति।

सप्ताक्षरस्य छन्दसः नाम उष्णिक् इति। अष्टाक्षरस्य छन्दसः नाम अनुष्टुप् इति। नवाक्षरस्य छन्दसः नाम बृहती इति। दशाक्षरस्य छन्दसः नाम पङ्क्तिः इति। एकादशाक्षरस्य छन्दसः नाम त्रिष्टुप् इति। द्वादशाक्षरस्य छन्दसः नाम जगती इति। त्रयोदशाक्षरस्य छन्दसः नाम अतिजगती इति। चतुर्दशाक्षरस्य छन्दसः नाम शक्वरी इति। पञ्चदशाक्षरस्य छन्दसः नाम अतिशक्वरी इति। षोडशाक्षरस्य छन्दसः नाम अष्टिः इति। सप्तदशाक्षरस्य छन्दसः नाम अत्यष्टिः इति। अष्टादशाक्षरस्य छन्दसः नाम धृतिः इति। उनविंशत्यक्षरस्य छन्दसः नाम अतिधृतिः इति। विंशत्यक्षरस्य छन्दसः नाम कृतिः इति। एकविंशत्यक्षरस्य छन्दसः नाम प्रकृतिः इति। द्वाविंशत्यक्षरस्य छन्दसः नाम आकृतिः इति। त्रयोविंशत्यक्षरस्य छन्दसः नाम विकृतिः इति। चतुर्विंशत्यक्षरस्य छन्दसः नाम संस्कृतिः इति। पञ्चविंशत्यक्षरस्य छन्दसः नाम अतिकृतिः इति। षड्विंशत्यक्षरस्य छन्दसः नाम उत्कृतिः इति। एकस्मिन् पादे एतावत्यः संख्याः भवितुम् अर्हन्ति।

छात्राणां बौधसौकर्याय काचित् तालिका प्रस्तूयते -

छन्दसः नामानि	पादगताक्षरसंख्या	श्लोकगताक्षरसंख्या
उक्ता	एकम्	चत्वारि
अत्युक्ता	द्वे	अष्टौ
मध्या	त्रीणि	द्वादश
प्रतिष्ठा	चत्वारि	षोडश
सुप्रतिष्ठा	पञ्च	विंशतिः
गायत्री	षड्	चतुर्विंशतिः
उष्णिक्	सप्त	अष्टाविंशतिः
अनुष्टुप्	अष्टौ	द्वात्रिंशत्
बृहती	नव	षड्त्रिंशत्
पङ्क्तिः	दश	चत्वारिंशत्

त्रिष्टुप्	एकादश	चतुश्चत्वारिंशत्
जगती	द्वादश	अष्टचत्वारिंशत्
अतिजगती	त्रयोदश	द्विपञ्चाशत्
शक्वरी	चतुर्दश	षट्पञ्चाशत्
अतिशक्वरी	पञ्चदश	षष्टिः
अष्टिः	षोडश	चतुःषष्टिः
अत्यष्टिः	सप्तदश	अष्टषष्टिः
धृतिः	अष्टादश	द्विसप्ततिः
अतिधृतिः	नवदश	षट्सप्ततिः
कृतिः	विंशतिः	अशीतिः
प्रकृतिः	एकविंशतिः	चतुरशीतिः
आकृतिः	द्वाविंशतिः	अष्टाशीतिः
विकृतिः	त्रयोविंशतिः	द्विनवतिः
संस्कृतिः	चतुर्विंशतिः	षण्णनवतिः
अतिकृतिः	पञ्चविंशतिः	शतम्
उत्कृतिः	षड्विंशतिः	चतुरधिकैकशतम्

पाठगतप्रश्नाः-५

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

२१. दण्डकस्य लक्षणं किम्।

२२. गाथायाः लक्षणं किम्।

२३. गायत्रीछन्दसि कति अक्षराणि विद्यन्ते।

२४. अनुष्टुप्-छन्दसि कति अक्षराणि विद्यन्ते।

२५. त्रिष्टुप्-छन्दसि कति अक्षराणि विद्यन्ते।

२६. जगतीछन्दसि कति अक्षराणि विद्यन्ते।

पाठसारः

छादयति आच्छादयति वा इति छन्दः। वैयाकरणपाणिनेः मते तु अभिप्रायार्थबोधकात् आनन्दपर्यायभुक्तार्थात् वा छन्द्- धातोः छन्दः शब्दस्य उत्पत्तिः जाता। यत् पापम् आच्छादयति, तत् छन्दः। अथवा यत् पापात् यजमानस्य पुरोहितस्य च आच्छादनं करोति, तत् छन्दः। छन्दः वस्तुतस्तु लौकिकवैदिकभेदेन द्विविधं भवति। लौकिकच्छन्दस्तु पिङ्गलादीनाम् आचार्याणां मते मात्रावर्णविभेदेन द्विविधम्। तत्र अक्षरगणघटितं पद्यं वृत्तं, मात्रिकगणघटितं पद्यञ्च जातिः इत्युच्यते। वृत्तपद्यस्य उदाहरणानि भवन्ति वसन्ततिलकादयः। जातिच्छन्दस्य उदाहरणानि भवन्ति आर्यादयः इति। वृत्तम् त्रिविधम् अस्ति। यथा - १) समवृत्तम्, २) अर्धसमवृत्तम्, ३) विषमवृत्तम्। तथाहि छन्दोमञ्जर्यां प्रोक्तम्- "सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा॥"इति। यस्य वृत्तस्य पादचतुष्टये गुरुलघुक्रमेण समानसंख्यकम् अक्षरं विद्यते, तत् समवृत्तम्। यथा - शालिनी, मालिनी इत्यादीनि। यस्य वृत्तस्य प्रथमः पादः तृतीयपादतुल्य एवं चतुर्थः पादः द्वितीयपादतुल्यः भवति। तत् अर्धसमं नाम वृत्तम्। यथा - पुष्पिताग्रा, सुन्दरी इत्यादीनि। यस्य वृत्तस्य चतुर्षु पादेषु प्रतिपादं भिन्नसंख्यायुक्तं भवति, तत् विषमवृत्तम्। यथा - उद्गाता, सौरभकः इत्यादीनि। प्रायः संस्कृतजगति दश गणाः विलसन्ति। यथा - मगणः, यगणः, रगणः, सगणः, तगणः, जगणः, भगणः, नगणः, इति एते अष्टौ गणाः विद्यन्ते। मात्रिकच्छन्दसि पञ्च गणाः विद्यन्ते। प्रत्येकं गणे प्रायः चतस्रः मात्राः विलसन्ति। ते च सर्वगुरुः, अन्तगुरुः, मध्यगुरुः, आदिगुरुः, सर्वलघुः च इति। सानुस्वारः दीर्घश्च विसर्गी च संयोगपूर्वश्च वर्णः गुरुः भवेत्। यतिः नाम विरामः। छन्दःशास्त्रे तु यतिशब्दः अयं यम्यते विश्राम्यते जिह्वा यत्र इति अधिकरणवाच्ये क्तिन्प्रत्ययस्य योगेन निष्पन्नः भवति। अतः जिह्वाविश्रामस्थानार्थे यतिशब्दः पारिभाषिकः भवति। पुनश्च षड्विंशत्यधिकस्य अक्षरपादस्य छन्दसः दण्डकः इति संज्ञा भवति। अत्र अक्षराणां ह्रासवृद्ध्यनुसारेण समवृत्तछन्दसः नामानि निर्दिश्यन्ते। एकाक्षरात् आरभ्य एकेन एकेन अक्षरेण वर्धितैः पादैः भिन्नं भिन्नं छन्दो भवेत्। एकस्मिन् पादे एकम् एव अक्षरं भवति चेत् अपि तत् छन्दो भवति। ततः एकम् अक्षरम् आरभ्य क्रमेण एकम् एकम् अक्षरं योजयित्वा अन्यानि छन्दांसि निर्मीयन्ते। तेषाम् उक्तादिसामान्यसंज्ञा अपि प्रदीयते।

पाठान्तप्रश्नाः

अत्र केचित् पाठान्तप्रश्नाः प्रदीयन्ते

१. छन्दसः लक्षणं प्रतिपादयन्तु।

२. छन्दसः भेदान् प्रतिपादयन्तु।

३. पद्यस्य लक्षणं प्रतिपाद्य तद्भेदान् प्रतिपादयन्तु।

४. वृत्तस्य भेदान् प्रतिपादयन्तु।

५. समवृत्तविषये लघुप्रबन्धं लिखन्तु।

६. अर्धसमवृत्तविषये लघुप्रबन्धं लिखन्तु।

७. विषमवृत्तविषये लघुप्रबन्धं लिखन्तु।

८. गणस्य विषये लघुप्रबन्धं लिखत।

९. गणाः कतिविधाः सन्ति। तेषां विवरणं प्रददातु।

१०. मात्रिकच्छन्दांसि वर्णयत।

११. गुरुस्वरान् प्रतिपादयतु।

१२. यतिलक्षणं प्रतिपाद्यताम्।

१३. गाथालक्षणं विवेचयन्तु।

१४. दण्डकलक्षणं लिखन्तु।

१५. छन्दसां सामान्यसंज्ञा निरूप्यताम्।

पाठगतप्रश्नानाम् उत्तराणि

अत्र पाठगतप्रश्नानाम् उत्तराणि प्रदीयन्ते -

१. छादयति आछादयति वा इति छन्दः।

२. पादौ।

३. द्विविधम्। लौकिकम्, वैदिकञ्चेति।

४. द्विविधम्। मात्रिकच्छन्दः, वार्णिकच्छन्दः।

५. पद्यं चतुष्पदी।

६. द्विविधम्। वृत्तपद्यम्, जातिपद्यञ्चेति।

७. वृत्तम् त्रिविधम् अस्ति। यथा - १) समवृत्तम्, २) अर्धसमवृत्तम्, ३) विषमवृत्तम्।

८. "अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते॥"इति।

९. "प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते॥" इति।

१०. "यस्य पादचतुष्केऽपि लक्ष्मं भिन्नं परस्परम्।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः॥"इति।

११. दश गणाः। यथा - मगणः, यगणः, रगणः, सगणः, तगणः, जगणः, भगणः, नगणः, गगणः, लगणः।

१२. त्रिगुरुः।

१३. आदिलघुः।

१४. लमध्यः।

१५. अन्तगुरुः।

१६. अन्तलघुः।

१७. सानुस्वारः दीर्घश्च विसर्गी च संयोगपूर्वश्च वर्णः गुरुः भवेत्।

१८. द्विविधा।

१९. पादान्ता, पादमध्यगा।

२०. "यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया।। " इति।

२१. "तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः"इति।

२२. "शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः॥"इति।

२३. चतुर्विंशतिः।

२४. द्वात्रिंशत्।

२५. चतुश्चत्वारिंशत्।

२६. अष्टचत्वारिंशत्।

॥ इति त्रयोविंशः पाठः ॥



348sk24

२४

छन्दांसि

प्रस्तावना

संस्कृतजगति प्रायः सर्वत्र एव छन्दसः प्रयोगः भूयशः दृश्यते। श्लोकादिनिर्माणं तु छन्दः विना प्रायः नैव सम्भवति। छन्दसा रचितं पद्यम् अधिकं सौन्दर्यं विदधाति। अत एव छन्दोमयं संस्कृतजगत् इत्यत्र नास्ति सन्देहावसरः। काव्यनाटकादिलौकिकशास्त्रेषु छन्दसः प्रचुरं प्रयोगः दरीदृश्यते। न केवलं लौकिकसाहित्ये छन्दसः प्रयोगः विद्यते। अपि तु वैदिकसाहित्ये अपि छन्दसः भूयशः प्रयोगः दृश्यते। केवलं यजुर्वेदः एव गद्यमयः वर्तते। अवशिष्टं संहितात्रयं तु पद्यमयम् अस्ति। सामवेदे अर्थववेदे ऋग्वेदे च त्रिष्टुभादिना छन्दसा एव मन्त्राः विरचिताः सन्ति। छन्दःसहितमन्त्रः अधिककालपर्यन्तं स्मरणे तिष्ठन् सौन्दर्यं विधत्ते। प्राचीनशास्त्राकारैः वेदान्तादिशास्त्रग्रन्थाः अपि अनुष्टुभादिना छन्दसा एव रचिताः आसन्। संस्कृतजगति सर्वप्रथमं तु पद्यमयम् एव सर्वम् आसीत्। लौकिककाव्यादिषु अपि लौकिकछन्दसः प्रयोगः दृश्यते। वसन्ततिलकादिना छन्दसा एव रचितः श्लोकः अधिकः मनोग्राही भवति। कालिदासादयः महाकवयस्तु छन्दसा पद्यनिर्माणे अतीव पटवः आसन्। केचन कवयस्तु किञ्चित् एकं छन्दः समाश्रित्य सम्पूर्णं ग्रन्थं रचितवन्तः। अत एव छन्दः विना संस्कृतजगत् अन्धकारमयम् अस्ति। अतः संस्कृतजगति छन्दसः नितराम् आवश्यकता अनुभूयते। प्रकृतपाठे अस्मिन् केषाञ्चित् प्रसिद्धानां छन्दसां लक्षणानि उदाहरणानि च आलोच्यन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

१. विविधानां छन्दसां लक्षणं ज्ञास्यति।
२. छन्दसाम् उदाहरणानि ज्ञास्यति।
३. लक्षणस्य छन्दउदाहरणेषु समन्वयं ज्ञास्यति।
४. काव्येषु विविधेषु स्थलेषु श्लोकानां छन्दोनिर्णयं कर्तुं प्रभवेत्।
५. स्वयम् एतैः छन्दोभिः श्लोकरचने योग्यो भवेत्।
६. छन्दसां भेदोपभेदज्ञानं भवेत्।

२४.१) मात्रिकच्छन्दांसि

मात्रिकच्छन्दः इत्युक्ते मात्राम् आश्रित्य एव गणाः भवन्ति। प्रति गणं चतस्रः मात्राः वर्तन्ते। अस्मिन् छन्दसि मात्रायाः माहात्म्यम् अधिकं दृश्यते। अत्र अक्षरम् आश्रित्य गणाः न भवन्ति। अत्रापि मात्रिकच्छन्दःसु केवलम् आर्याच्छन्दसः वर्णनं कृतम्।

२४.१.१) आर्याच्छन्दः

इदम् आर्याच्छन्दः मात्रिकच्छन्दः अस्ति। अर्थात् मात्राम् आधारीकृत्यैव गणस्य गणना भवति। प्रत्येकं गणेषु चतस्रः मात्राः भवन्ति। चतस्रः मात्राः सन्ति चेत् एव एकः गणः भवति।

आर्यासामान्यलक्षणम् - आर्याछन्दसः लक्षणम् -

"लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः।

षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः॥

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः।

चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥" इति।

अन्वयः- आर्यायाः प्रथमे अर्धे एतत् लक्ष्म नियतम् (अस्ति) गोपेताः सप्त गणाः (भवन्ति), इह विषमे जः न भवति, षष्ठः अयम् (जः भवति), वा नलघू (भवतः)। च षष्ठे न्ले द्वितीयलात् (पूर्वम्) परके (न्ले) मुखलात् (पूर्वम्) सयतिपदनियमः। चरमे अर्धे (एतत् लक्ष्म नियतम्) पञ्चमके (न्ले) तस्मात् (सयतिपदनियमः), इह षष्ठो लः भवति।

व्याख्यानम् - आर्याच्छन्दसः प्रथमार्धे प्रथमद्वितीययोः चरणयोः एतत् उच्यमानं लक्ष्म (लक्षणम्) निश्चितम् अस्ति। किं तत् लक्षणम्। तदा उच्यते - गुरुणा सहिताः सप्त संख्याकाः गणाः सन्ति। अस्याम् आर्यायां विषमे गणे (प्रथम-तृतीय-पञ्चम-सप्तमरूपे गणे) जगणः (मध्यगुरुः) न वर्तते। षष्ठस्थानवर्ती जगणः भवति। अथवा षष्ठे नगणेन साकं एकः लघुस्वरः वर्तते।

अधुना यतिनियमं कथयति - यदि षष्ठस्थानके गणे लघुस्वरेण साकं नगणः वर्तते तर्हि षष्ठस्थानके गणे चत्वारि लघुसंज्ञायुक्तानि अक्षराणि भवन्ति। तत्र चतुर्लघुरूपस्य षष्ठगणस्य तु द्वितीयलघोः पूर्वम् अर्थात् प्रथमलघौ यतिः भवति। एवञ्च षष्ठगणस्य प्रथमलघौ एव पदस्य समाप्तिः भवति। पुनश्च यदि सप्तमस्थानके गणे अपि चत्वारि लघुसंज्ञायुक्तानि अक्षराणि भवन्ति चेत् चतुर्लघुरूपस्य सप्तमगणस्य प्रथमात् लघोः पूर्वम् अर्थात् षष्ठगणस्य अन्तिमे अक्षरे यतिः पदसमाप्तिश्च भवति। सयतिः इति शब्दस्य अर्थः यतिः पदसमाप्तिश्च कार्यद्वयं भवति। एतावत् पूर्वार्धलक्षणं यतिपदनियमसहितम् आलोचितम्।

सम्प्रति द्वितीयार्धस्य लक्षणं कथयति - उत्तरार्धे तृतीयचतुर्थपादयोः पञ्चमस्थानके गणे चत्वारि लघुसंज्ञायुक्तानि अक्षराणि विद्यन्ते चेत् पञ्चमगणस्य प्रथमात् लघोः पूर्वम् अर्थात् चतुर्थगणस्य अन्तिमे अक्षरे यतिः पदसमाप्तिश्च भवेत्। पुनश्च षष्ठस्थानवर्ती गणः एकलघुरूपः भवति। षष्ठगणस्य एकलघुरूपता एव उत्तरार्धस्य पूर्वार्धात् विशेषता, अवशिष्टं सर्वं तु पूर्वार्धवत् भविष्यति। तदित्थं पूर्वार्धे

त्रिंशन्मात्राः, उत्तरार्धे च सप्तविंशतिः इति फलितम्। इदम् आर्याच्छन्दः मात्रिकेषु विषमवृत्तम्। प्रति चरणं भिन्नसंख्यायुक्तानि अक्षराणि विद्यन्ते।

उदाहरणम्- आर्याच्छन्दसः उदाहरणम् -

।।।। ,। ऽ। , ऽ ऽ, / ऽ।। , ऽऽ ,।।।। ,।। ऽ , ऽ

सुभगस-लिलाव-गाहा/ पाटल-संस -र्गसुरभि-वनवा-ताः।

ऽ ऽ , ।।।। , ऽ ऽ , /।। ऽ, ।। ऽ ,। ,।। ऽ , ऽ

प्रच्छा-यसुलभ-निद्रा/- दिवसाः- परिणा-म-रमणी-याः॥

उदाहरणे लक्षणसमन्वयः - प्रथमार्धस्य प्रथमद्वितीयचरणयोः अन्तःस्थितेन गुरुवर्णेन सह सप्त गणाः विद्यन्ते। एवञ्च विषमे गणे (प्रथमे तृतीये पञ्चमे सप्तमे च) जगणः न विद्यते। षष्ठे तु लघुस्वरेण सह नगणः वर्तते। अर्थात् षष्ठस्थानके चत्वारि लघुसंज्ञायुक्तानि अक्षराणि सन्ति। अत एव चतुर्लघुरूपस्य षष्ठगणस्य द्वितीयलघोः (सु इत्यस्य) पूर्वम् अर्थात् प्रथमलघौ (ग इत्यस्मिन्) यतिः भवति। एवञ्च षष्ठगणस्य प्रथमलघौ गकारे एव पदस्य समाप्तिः भवति। एवञ्च उत्तरार्धस्य अपि तृतीयचतुर्थचरणयोः अन्तःस्थितेन गुरुवर्णेन साकं सप्त गणाः विद्यन्ते। उत्तरार्धस्य अपि विषमे गणे (प्रथमे तृतीये पञ्चमे सप्तमे च) जगणः न विद्यते। षष्ठस्थानके गणे एकलघुरूपता विद्यते। सम्प्रति उत्तरार्धस्य यतिनियमं वक्ष्यामः। पञ्चमस्थानके तु चत्वारि लघुसंज्ञायुक्तानि अक्षराणि न विद्यन्ते। अतः प्रकृतश्लोके लक्षणोक्तयतिनियमः तु न प्रवर्तते। प्रकृतश्लोके पूर्वार्धे त्रिंशन्मात्राः, उत्तरार्धे च सप्तविंशतिः मात्राः वर्तन्ते। इदम् आर्याच्छन्दः मात्रिकेषु विषमवृत्तम्। प्रति चरणं भिन्नसंख्यायुक्तानि अक्षराणि विद्यन्ते।

पाठगतप्रश्नाः-१

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

१. आर्याच्छन्दः मात्रिकच्छन्दः उत वार्णिकच्छन्दः।

२. आर्याच्छन्दसः विषमे गणे कः गणः न वर्तते।

३. आर्याच्छन्दः मात्रिकेषु समवृत्तं विषमवृत्तं वा।

४. आर्याच्छन्दसा निर्मितस्य श्लोकस्य पूर्वार्धे कति मात्राः सन्ति।

५. आर्याच्छन्दसा निर्मितस्य श्लोकस्य उत्तरार्धे कति मात्राः सन्ति।

२४.२) वार्णिकच्छन्दांसि

मात्रिकच्छन्दांसि वर्णयित्वा सम्प्रति वार्णिकच्छन्दांसि वर्ण्यन्ते। अत्र तु गणनिर्माणं वर्णं समाश्रित्य भवति न तु मात्राम्। प्रत्येकं गणेषु त्रीणि अक्षराणि भवन्ति। तत्रापि प्रकृतपाठे अस्माभिः केवलं वार्णिकच्छन्दःसु केवलं समवृत्तच्छन्दसः चर्चा विधीयते। समवृत्तं नाम प्रति चरणं समलक्षणं समानम्

अक्षरं च वर्तते। अर्थात्प्रति चरणं सम्पूर्णं समानं भवति। पुनश्च पाठवृद्धिभयात् अर्धसमवृत्तस्य विषमवृत्तस्य च आलोचना न वर्तते।

२४.२.१) इन्द्रवज्रा

अनुष्टुप्-छन्दसा एव अधिकानि पद्यानि रचितानि इति नास्ति सन्देहावसरः। तथापि अनुष्टुभं विहाय अधिकानि पद्यानि तु इन्द्रवज्राच्छन्दसा एव रचितानि दरीदृश्यन्ते। अनेन छन्दसा श्लोकनिर्माणम् अत्यन्तं सरलम् अस्ति। पुनश्च वृत्तम् इदं श्रोतुः कर्णमाधुर्यं जनयति। अत एव कवयः भूयशः अनेन छन्दसा श्लोकान् रचयन्ति स्म।

लक्षणम् - इन्द्रवज्राच्छन्दसः लक्षणम्- "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति।

व्याख्यानम् - त्रिष्टुभः छन्दसः कश्चित् भागः अयम् इन्द्रवज्रा। समवृत्तं छन्दः इदम् अस्ति। यतो हि चतुर्षु पादेषु एव समानानि अक्षराणि समलक्षणानि च भवन्ति। प्रति चरणं तौ इत्युक्ते तगणद्वयम्, जगौ इत्युक्ते जगणेन साकं गुरुद्वयं च भवति।

उदाहरणे लक्षणसमन्वयः - अत्र इन्द्रवज्राच्छन्दसः यत् लक्षणं प्रोक्तं तदेव अस्य छन्दसः उदाहरणम् अपि विद्यते। सम्प्रति उदाहरणान्तरं प्रदर्श्यते -

ऽ ऽ ।, ऽ ऽ।,। ऽ।, ऽ ऽ/ ऽ ऽ।,ऽ ऽ।,। ऽ।, ऽ ऽ

गोष्ठे गि-रिं सव्य-करेण- धृत्वा /रुष्टेन्द्र-वज्राह-मिमुक्तवृष्टौ।

ऽ ऽ ।, ऽ ऽ।,। ऽ ।, ऽ ऽ /ऽ ऽ ।, ऽ ऽ।,। ऽ।, ऽ ऽ

यो गोकु-लं गोप-कुलं च- सुस्थं, चक्रे स- नो रक्षतु चक्र-पाणिः॥

अस्य प्रकृतश्लोकस्य चतुर्षु अपि प्रत्येकं चरणेषु क्रमशः तगणद्वयम्, एकः जगणः, गुरुवर्णद्वयं च वर्तते। अत एव इन्द्रवज्राछन्दसः उदाहरणम् इदं विद्यते। अक्षरसंख्याम् आश्रित्य एव गणनिर्धारणं क्रियते। प्रत्येकं गणेषु त्रीणि अक्षराणि वर्तन्ते। उदाहरणे अस्मिन् प्रति चरणं क्रमेण तगणः, तगणः, जगणः, गुरुवर्णद्वयं वर्तते। तथैव प्रति चरणं समगणः समक्रमश्च विद्यते। एवञ्च प्रति चरणम् एकादश अक्षराणि सन्ति। अस्य छन्दसः पादान्ते यतिः भवति। यतिः हि विरामः इति।

२४.२.२) उपेन्द्रवज्रा

लक्षणम् - उपेन्द्रवज्राच्छन्दसः लक्षणम् - "उपेन्द्रवज्रा जतजास्ततो गौ"इति।

व्याख्यानम् - उपेन्द्रवज्रा त्रिष्टुभः कश्चित् भेदः। अस्य वृत्तस्य जतजाः इत्युक्ते क्रमशः जगणः, तगणः, जगणः च वर्तन्ते। ततःपरं द्वौ गुरू च स्याताम् इति। तद् वृत्तम् उपेन्द्रवज्रा। अर्थात् उपेन्द्रवज्रावृत्ते प्रति चरणं क्रमशः जगणः, तगणः, जगणः च वर्तते। ततःपरं परं गुरुस्वरविशिष्टाक्षरद्वयं वर्तते। एवञ्च पादस्य अन्ते एव यतिः भवति।

उदाहरणे लक्षणसमन्वयः - उदाहरणं हि -

। ऽ । , ऽ ऽ।,। ऽ।, ऽ ऽ/ । ऽ।, ऽ ऽ ।,। ऽ ।,ऽ ऽ

जिता ज-गत्येष- भवभ्र-मस्तै/-र्गुरूदि-तं ये गि-रिशं स्म-रन्ति।

। ऽ । , ऽ ऽ। ,। ऽ। , ऽ ऽ/ । ऽ। , ऽ ऽ। ,। ऽ। ,ऽ ऽ

उपास्य-मानं क-मलास-नाद्यै/-रुपेन्द्र-वज्रायु-धवारि-नाथैः॥ इति।

उपेन्द्रवज्रानामके छन्दसि प्रति चरणं क्रमशः जगणः, तगणः, जगणः च वर्तते। ततःपरं गुरुवर्णद्वयं विलसति। प्रकृतश्लोके अपि तथैव प्रथमं जगणः ततःपरं तगणः ततःपरं जगणश्च वर्तते। ततःपरं गुरुवर्णद्वयं विलसति। एवञ्च प्रति चरणं एकादश अक्षराणि सन्ति। पुनश्च पादान्ते यतिः सम्भवति। अत एव उपेन्द्रवज्राच्छन्दसः उदाहरणत्वेन अयं श्लोकः गृहीतो भवति।

२४.२.३) शालिनी

लक्षणम्- शालिनीवृत्तस्य लक्षणम् - "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति।

व्याख्यानम् - शालिनी त्रिष्टुभ्भेदः। यस्य वृत्तस्यप्रति चरणं म्तौ - मगणतगणौ, तगौ- तगणगुरू, गः - गश्च भवति। अब्धिभिः नाम चतुर्भिः। लोकैः नाम सप्तभिः इति। अर्थात् शालिनीच्छन्दसःप्रति चरणं क्रमेण मगणः, तगणः, पुनः तगणः, गुरुवर्णः, ततःपरं पुनः गुरुवर्णः भवति चेत् तस्य वृत्तस्य शालिनीवृत्तम् इति नाम भवति। चतुर्भ्यः अक्षरेभ्यः परं ततः सप्तभ्यः अक्षरेभ्यः परं च यतिः भवति। यतिः इत्युक्ते विरामो भवति।

उदाहरणे लक्षणसमन्वयः - शालिनीच्छन्दसः उदाहरणं तावत् -

ऽ ऽ ऽ,ऽ ऽ। , ऽ ऽ । , ऽ ऽ/ ऽ ऽ ऽ,ऽ ऽ। , ऽ ऽ। , ऽ ऽ

अंहो ह-न्ति ज्ञान-वृद्धिं वि-धत्ते/, धर्मं द-त्ते, काम-मर्थं च- सूते।

ऽ ऽ ऽ,ऽ ऽ। , ऽ ऽ । , ऽ ऽ/ ऽ ऽ ऽ,ऽ ऽ। , ऽ ऽ। , ऽ ऽ

मुक्तिं द-त्ते सर्व-दोपास्य-माना, पुंसां श्र-द्धाशालि-नी विष्णु-भक्तिः॥

अस्मिन् श्लोके प्रति चरणम् एकादश अक्षराणि विद्यन्ते। एवञ्च प्रकृतश्लोकस्य अस्य आदौ मगणः ततःपरं तगणः ततश्च पुनः तगणः ततःपरं गुरुवर्णद्वयं वर्तते। एवञ्च चतुर्भ्यः अक्षरेभ्यः परं ततः सप्तभ्यः अक्षरेभ्यः परं च यतिः विद्यते। इदम् एव लक्षणं चतुर्षु चरणेषु च उपलभ्यते। अत एव श्लोकोऽयं शालिनीच्छन्दसः उदाहरणं भवति।

पाठगतप्रश्नाः-२

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

६. इन्द्रवज्रावृत्तस्य लक्षणं किम्।

७. इन्द्रवज्रावृत्तस्य एकस्मिन् पादे कति अक्षराणि सन्ति।

८. इन्द्रवज्रावृत्तं समवृत्तं विषमवृत्तं वा।

९. उपेन्द्रवज्रावृत्तस्य लक्षणं किम्।

१०. उपेन्द्रवज्रावृत्तस्य एकस्मिन् पादे कति अक्षराणि सन्ति।

११. शालिनीवृत्तस्य लक्षणं किम्।

१२. शालिनीवृत्तस्य एकस्मिन् पादे कति अक्षराणि सन्ति।

२४.२.४) रथोद्धता

लक्षणम्- रथोद्धतावृत्तस्य लक्षणम् -"रान्नराविह रथोद्धता लगौ"इति।

व्याख्यानम् - त्रिष्टुभः छन्दसः कश्चित् रथोद्धतानामकः भेदः वर्तते। यस्य वृत्तस्य पादे रात् (रगणात्) नरौ (नगणरगणौ), लगौ (लघुगुरू) च स्याताम् चेत् तत् वृत्तं रथोद्धता इति नाम्ना प्रख्यातं भवेत्। अत्र तु पादान्ते यतिव्यवस्था विद्यते। रथोद्धताच्छन्दसः प्रति पादं रगणात् परं नगणः ततःपरं पुनः रगणश्च वर्तते। एवञ्च लघुगरू च स्याताम्। एवञ्च पादस्य अन्ते एव यतिनियमो भवति।

उदाहरणे लक्षणसमन्वयः - रथोद्धताच्छन्दसः उदाहरणं तावत् -

ऽ ।ऽ,।।। , ऽ।ऽ,।ऽ/ ऽ।ऽ,।।। , ऽ।ऽ,।ऽ

किं त्वया- सुभट- दूरव-र्जितं, नात्मनो- न सुहृ-दां प्रियं- कृतम्।

ऽ।ऽ,।।। , ऽ।ऽ, ।ऽ/ ऽ।ऽ,।।। , ऽ।ऽ, ।ऽ

यत्पला-यनप-रायण-स्य ते, याति धू-लिरधु-ना रथो-द्धता॥ इति।

प्रकृतश्लोकस्य अस्य प्रत्येकं चरणेषु रगणात् परं नगणः अस्ति, ततःपरं पुनः रगणः विद्यते, ततःपरम् एकः लघुः एकः गुरुश्च विद्यन्ते। एवञ्च प्रकृतश्लोकस्य अस्य पादान्ते एव यतिः विद्यते। प्रकृतलक्षणेन साकं श्लोकः अयम् अन्वेति। अत एव श्लोकः अयं रथोद्धताच्छन्दसः उदाहरणत्वेन गृहीतो भवति। प्रथमचरणवत् अवशिष्टं चरणम् अपि तथा लक्षणयुक्तं विद्यते। रथोद्धता त्रिष्टुभः कश्चित् भागः अस्ति। अतः अस्य श्लोकस्य प्रत्येकं चरणेषु एकादश अक्षराणि विद्यन्ते। अर्थात् पादचतुष्टयम् आधारीकृत्य चतुश्चत्वारिंशत् अक्षराणि विलसन्ति।

२४.२.५) वंशस्थम्

संस्कृतसाहित्यजगति वंशस्थछन्दसः प्रचुरं प्रयोगः दृश्यते। एवञ्च छन्दः इदम् अत्यन्तं लोकप्रसिद्धं विद्यते। कालिदासादयः वंशस्थछन्दसा एव बहूनि पद्यानि रचितवन्तः आसन्। अनेन छन्दसा रचिताः श्लोकाः अधिकं चमत्कारं जनयन्ति।

लक्षणम्- वंशस्थच्छन्दसः लक्षणं कथयति - "जतौ तु वंशस्थमुदीरितं जरौ"इति।

व्याख्यानम् - जगतीच्छन्दसः कश्चन भागः वंशस्थवृत्तं भवति। यस्य वृत्तस्य प्रति पादं जतौ- जगणतगणौ भवतः, पुनश्च जरौ- जगणरगणौ च भवतः चेत् तत् वृत्तं वंशस्थम् इति नाम्ना प्रथितं भवति।

अर्थात् यस्य वृत्तस्य प्रति पादं क्रमेण जगणः, तगणः,ततश्च पुनः जगणः, ततःपरं रगणः च वर्तन्ते चेत् तद् वंशस्थम् इति नाम्ना ख्यातं भवति। छन्दः इदं समवृत्तम् अस्ति। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति एव। अस्य छन्दसः एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। अतः पादचतुष्टयम् आहृत्य अष्टचत्वारिंशत् अक्षराणि भवन्ति। अस्य वृत्तस्य पादान्ते एव यतिः भवति।

उदाहरणे लक्षणसमन्वयः - वंशस्थछन्दसः उदाहरणं तावत्-

। ऽ । , ऽ ऽ। , । ऽ। , ऽ। ऽ/। ऽ। , ऽ ऽ। , । ऽ। , ऽ। ऽ

नमोऽस्त्व-नन्ताय- सहस्र-मूर्तये-/ सहस्र-पादाक्षि-शिरोरु-बाहवे।

। ऽ। , ऽ ऽ । ,। ऽ। , ऽ। ऽ/ । ऽ। , ऽ ऽ। ,। ऽ। , ऽ। ऽ

सहस्र-नाम्ने पु-रुषाय- शाश्वते-/, सहस्र-कोटीयु-गधारि-णे नमः॥

प्रकृतश्लोकस्य अस्य प्रत्येकं पादेषु आदौ जगणः वर्तते, ततःपरं तगणः विद्यते, ततःपरं पुनः जगणः, ततःपरं रगणः क्रमेण वर्तन्ते। अत एव वंशस्थवृत्तस्य उदाहरणम् इदम् अस्ति। वंशस्थं समवृत्तम् अस्ति। अतः पादचतुष्टये अपि इदम् एव लक्षणं विद्यते। अत्र एकस्मिन् पादे एव द्वादश अक्षराणि सन्ति। पादचतुष्टयम् आहृत्य अष्टचत्वारिंशत् अक्षराणि विद्यन्ते। पादस्य अन्ते एव यतिः भवति। अत एव वंशस्थच्छन्दसः उदाहरणम् एतत् विद्यते।

२४.२.६) तोटकम्

संस्कृतजगति तोटकवृत्तस्य अत्यन्तं प्रसिद्धिः विद्यते। इदं च वृत्तं कवीनाम् अत्यन्तं प्रियं विद्यते।

लक्षणम्- तोटकवृत्तस्य लक्षणं प्रोच्यते - " इह तोटकमम्बुधिसैः प्रथितम्" इति।

व्याख्यानम् - तोटकवृत्तं जगत्याः कश्चित् भागः वर्तते। इदं वृत्तं समवृत्ते अन्तर्गतम् अस्ति। छन्दःशास्त्रे अम्बुधिः इत्युक्ते चत्वारः इत्यवगम्यते। इह – छन्दःशास्त्रे अम्बुधिसैः - चतुर्भिः सगणैः युक्तं भवति चेत् तोटकम् इति नाम्ना प्रख्यातं भवेत्। यस्य च वृत्तस्य प्रति पादं चत्वारः सगणाः वर्तन्ते चेत् तत् वृत्तं तोटकम् इति नाम्ना प्रथितम् अस्ति। तोटकवृत्तस्य पादान्ते यतिः भविष्यति। अस्य वृत्तस्य पादचतुष्टयम् एव समलक्षणघटितं भवेत्। अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि वर्तन्ते। पादचतुष्टयम् आहृत्य अष्टचत्वारिंशत् अक्षराणि विद्यन्ते।

उदाहरणे लक्षणसमन्वयः - तोटकवृत्तस्य उदाहरणं तावत्-

।। ऽ,।। ऽ, ।। ऽ,।। ऽ/।। ऽ,।। ऽ, ।। ऽ,।। ऽ

जय रा-म सदा- सुखधा-म हरे/ रघुना-यक सा-यक चा-प धरे।

।। ऽ,।। ऽ,।। ऽ,।। ऽ/ ।। ऽ,।। ऽ, ।। ऽ,।। ऽ

भववा-रणदा-रणसिं-ह प्रभो/ गुणसा-गर ना-गर ना-थ विभो॥

प्रकृतश्लोकस्य अस्य प्रति पादं सगणचतुष्टयं विद्यते। एवञ्च पादचतुष्टयम् एव समानलक्षणयुक्तं विद्यते। यतो हि समवृत्तं वर्तते। एवञ्च अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। यतो हि एकस्मिन् पादे चत्वारः गणाः वर्तन्ते। एकस्मिन् गणे च त्रीणि अक्षराणि विद्यन्ते। पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते।

२४.२.७) द्रुतविलम्बितम्

संस्कृतसाहित्यजगति द्रुतविलम्बितवृत्तम् अत्यन्तं प्रसिद्धं वर्तते। कालिदासादयः महाकवयः द्रुतविलम्बितं वृत्तं समाश्रित्य एव बहून् श्लोकान् रचितवन्तः आसन्। इदं च समवृत्तं विद्यते। इदं च वृत्तं श्रोतुः अत्यन्तं कर्णमार्धुर्यं जनयति।

लक्षणम् - तथाहि द्रुतविलम्बितवृत्तस्य लक्षणम् - "द्रुतविलम्बितमाह नभौ भरौ"इति।

व्याख्यानम् - इदं च वृत्तं जगत्याः कश्चित् भागः विद्यते। अत एव इदं समवृत्तं विद्यते। यस्य वृत्तस्य प्रत्येकं पादेषु नभौ - नगणः, भगणः च भवति, पुनश्च भरौ - भगणः रगणः च वर्तते चेत् तत् वृत्तं द्रुतविलम्बितम् इति नाम्ना प्रख्यातं भवति। अर्थात् यस्य वृत्तस्य प्रति पदं क्रमेण नगणः , भगणः, भगणः, रगणः भवति चेत् तत् वृत्तं द्रुतविलम्बितम् इति नाम्ना काव्यजगति प्रथितं भवति। इदं समवृत्तं विद्यते। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। एवञ्च अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। यतो हि एकस्मिन् पादे चत्वारः गणाः वर्तन्ते। एकस्मिन् गणे च त्रीणि अक्षराणि विद्यन्ते। पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते।

उदाहरणे लक्षणसमन्वयः - द्रुतविलम्बितवृत्तस्य उदाहरणं तावत्-

।।। , ऽ ।। , ऽ ।। , ऽ। ऽ/।।। , ऽ।। , ऽ ।। , ऽ। ऽ

द्रुतग-तिः पुरु-षो धनभाजनं, भवति- मन्दग-तिश्च सु-खोचितः।

।।। , ऽ ।। , ऽ।। , ऽ। ऽ/ ।।। , ऽ।। , ऽ।। , ऽ। ऽ

द्रुतवि-लम्बित-खेलग-तिर्नृपः, सकल-राज्यसु-खं प्रिय-मश्नुते॥ इति।

प्रकृतश्लोकस्य अस्य प्रत्येकं पादेषु आदौ नगणः अस्ति, ततःपरं भगणः विद्यते, ततःपरं पुनः भगणः विद्यते, ततःपरं रगणः विद्यते। अत एव श्लोकः अयं द्रुतविलम्बितस्य उदाहरणत्वेन गृहीतो भवति। इदं तु समवृत्तं वर्तते। एवञ्च श्लोकस्य अस्यप्रति चरणं चत्वारः गणाः विद्यन्ते। प्रतिगणं त्रीणि अक्षराणि विद्यन्ते। एवञ्च अस्य श्लोकस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। प्रकृतश्लोकस्य पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते। छन्दः इदम् अत्यन्तं सुन्दरमयं वर्तते। अत एव द्रुतविलम्बितवृत्तस्य अपरं नाम सुन्दरी इति। एवञ्च श्रूयते- "पादान्ते यतिः। अस्यैव 'सुन्दरी' इति नामान्तरम्"इति।

द्रुतविलम्बितस्य उदाहरणान्तरं विद्यते -

इतरपापफलानि यदृच्छया, वितर तानि सहे चतुरानन।

अरसिकेषु कवित्वनिवेदनं, शिरसि मा लिख मा लिख मा लिख॥ इति।

प्रकृतश्लोकस्य द्वितीयचतुर्थपादयोः अन्तिमम् अक्षरं लघुस्वरयुक्तम् अस्ति। परन्तु द्रुतविलम्बितच्छन्दसः तु अन्तिमः गणः भवति रगणः। तस्य तु ऽ। ऽ इति आकृतिः विद्यते। अर्थात् रगणस्य अन्तिमम् अक्षरं गुरुस्वरयुक्तं भवति। अत एव प्रकृतश्लोकस्य द्वितीयचतुर्थयोः पादयोः अन्तिमे अक्षरे गुरुस्वरः नास्ति। अतः प्रकृतश्लोकः अयम् द्रुतविलम्बितस्य उदाहरणत्वेन गण्यः कथं भवति। अस्य उत्तरं तु पादान्ते छन्दःपूरणाय प्रयोजनवशात् लघोः वर्णस्य गुरुत्वेन अपि स्वीकारः भवति। अर्थात् छन्दःपूरणाय लघुगुरुविपरिणामस्तु भवति एव। अत एव प्रकृतश्लोके अपि छन्दःपूरणाय पादान्तस्य वर्णस्य गुरुत्वेन ग्रहणं भवति। अत एव प्रकृतश्लोकः अयं द्रुतविलम्बितवृत्तस्य अपि उदाहरणं भवति।

पाठगतप्रश्नाः -३

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

१३. रथोद्धतावृत्तस्य लक्षणं किम् अस्ति।

१४. रथोद्धतावृत्तेन रचिते पूर्णश्लोके कति अक्षराणि विद्यन्ते।

१५. रथोद्धतावृत्तस्य यतिः कुत्र भवति।

१६. वंशस्थवृत्तस्य लक्षणं किम्।

१७. वंशस्थवृत्तस्य प्रत्येकं चरणेषु कति अक्षराणि सन्ति।

१८. तोटकवृत्तस्य लक्षणं किम्।

१९. तोटकवृत्तस्य प्रत्येकं चरणेषु कति अक्षराणि सन्ति।

२०. द्रुतविलम्बितवृत्तस्य लक्षणं किम्।

२१. द्रुतविलम्बितवृत्तस्य यतिः कुत्र भवति।

२२. द्रुतविलम्बितवृत्तस्य अपरं नाम किम्।

२४.२.८) भुजङ्गप्रयातम्

काव्यमार्गे इदं वृत्तम् अत्यन्तं लोकप्रियं विद्यते। यतो हि अनेन वृत्तेन श्लोकरचना अत्यन्तं सरला भवति। पुनश्च अस्मिन् वृत्ते समगणः वर्तते। अत एव श्रुतिमार्धुर्यम् अपि अधिकतया अनुभूयते। सरलतया सुन्दरश्लोकनिर्माणाय महाकवयः इदम् एव वृत्तम् आश्रितवन्तः। सम्प्रति तस्य वृत्तस्य लक्षणादिकं चर्च्यते।

लक्षणम् - भुजङ्गप्रयातस्य लक्षणं तावत् - "भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः। "इति।

व्याख्यानम् - इदं वृत्तं जगत्याः कश्चित् भागः वर्तते। यस्य वृत्तस्यप्रति चरणं चतुर्भिः यगणैः युक्तं स्यात्, तस्य वृत्तस्य भुजङ्गप्रयातम् इति नाम्ना प्रख्यातम्। अर्थात् भुजङ्गप्रयातस्य वृत्तस्य प्रति चरणं चत्वारः यगणाः भवन्ति। एवञ्च अस्य वृत्तस्य पादान्ते एव यतिः भवति। इदं समवृत्तं विद्यते। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। एवञ्च अस्य वृत्तस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। यतो हि एकस्मिन् पादे चत्वारः गणाः वर्तन्ते। एकस्मिन् गणे च त्रीणि अक्षराणि विद्यन्ते। पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति। पादस्य अन्ते एव यतिः भवति। यतिः इत्युक्ते विरामः। इदं छन्दः तु वार्णिकच्छन्दः वर्तते।

उदाहरणे लक्षणसमन्वयः - भुजङ्गप्रयातवृत्तस्य उदाहरणं तावत्-

। ऽ ऽ,। ऽ ऽ, । ऽ ऽ ,। ऽ ऽ/ । ऽ ऽ,। ऽ ऽ, । ऽ ऽ ,। ऽ ऽ

पुरः सा-धुवद्भा-ति मिथ्या विनीतः-/ परोक्षे- करोत्य-र्थनाशं- हताशः।

। ऽ ऽ,। ऽ ऽ, । ऽ ऽ ,। ऽ ऽ/ । ऽ ऽ,। ऽ ऽ, । ऽ ऽ ,। ऽ ऽ

भुजङ्ग-प्रयातो-पमं य-स्य चित्तं-/, त्यजेत्ता-दृशं दु-श्चरित्रं- कुमित्रम्॥ इति

प्रकृतश्लोकस्य अस्यप्रति चरणं चत्वारः यगणाः सन्ति। पादान्ते यतिः अपि वर्तते। अत एव श्लोकः अयं भुजङ्गप्रयातस्य उदाहरणत्वेन गण्यो भवति इति। इदं समवृत्तं विद्यते। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। एवञ्च अस्य श्लोकस्य एकस्मिन् पादे द्वादश अक्षराणि विद्यन्ते। प्रकृतश्लोकस्य पादचतुष्टयं समाहृत्य अष्टचत्वारिंशत् अक्षराणि सन्ति।

२४.२.९) वसन्ततिलका

काव्यजगति अत्यन्तं प्रसिद्धं वृत्तं वसन्ततिलका। प्रायः सर्वे एव कवयः अनेन वृत्तेन काव्यं रचयितुम् अधिकतया इच्छन्ति। इदं वृत्तं अत्यन्तं श्रुतिमधुरं भवति। वसन्ततिलकावृत्तेन रचिताः श्लोकाः काव्यस्य अधिकं सौन्दर्यं वर्धयन्ति।

लक्षणम् - वसन्ततिलकावृत्तस्य लक्षणम्- "उक्ता वसन्ततिलका तभजा जगौ गः" इति।

व्याख्यानम् - इयं च वसन्ततिलका शक्वर्याः कश्चित् भागः वर्तते। वसन्ततिलकानामकं वृत्तम् उक्तम् अस्ति। तत् कीदृशम् इति। यस्य वृत्तस्य प्रति चरणं तभजाः इत्युक्ते तगण-भगण-जगणाः, जगौ इत्युक्ते जगणः गुरुश्च, गः इत्युक्ते गुरुः अस्ति चेत् तद् वृत्तं वसन्ततिलका इति नाम्ना प्रख्यातम् अस्ति। अर्थात् यस्य वृत्तस्य प्रति चरणं क्रमेण तगणः, भगणः, जगणः , पुनः जगणः वर्तन्ते, ततःपरं गुरुवर्णः भवति, ततश्च पुनः गुरुवर्णः भवति चेत् तद् वृत्तं वसन्ततिलका इति नाम्ना कथितं भवति। अस्य च वृत्तस्य पादान्ते यतिः विद्यते। इदम् अपि समवृत्तं भवति। अतः अस्य अपि पादचतुष्टयं समलक्षणयुक्तं भवति। अस्य वृत्तस्य एकस्मिन् एव चरणे चतुर्दश अक्षराणि विद्यन्ते। एवञ्च पादचतुष्टयम् आहृत्य षट्पञ्चाशत् अक्षराणि विद्यन्ते। अस्य एव वृत्तस्य पादान्ते यतिः विद्यते। यतिः इत्युक्ते विरामः इत्यर्थः। अर्थात् अस्मिन् वृत्ते तु पादस्य अन्ते एव विरामो भवति।

उदाहरणे लक्षणसमन्वयः - वसन्ततिलकावृत्तस्य उदाहरणं तावत्-

ऽ ऽ ।, ऽ।।, । ऽ ।,। ऽ ।, ऽ ऽ/ ऽ ऽ।, ऽ।।, । ऽ ।,। ऽ।, ऽ ऽ

फुल्लं व-सन्तति-लकं ति-लकं व-नाल्याः, लीलाप-रं पिक-कुलं क-लमत्र रौति।

ऽ ऽ।, ऽ।।, । ऽ।,। ऽ।, ऽ ऽ/ ऽ ऽ ।, ऽ ।।,। ऽ ।, । ऽ ।, ऽ

वात्येष- पुष्पसु-रभिर्म-लयाद्रि-वातो, यातो ह- रिः स म-धुरां वि-धिना ह-ताः

ऽ

स्मः॥ इति।

प्रकृतश्लोकस्य अस्य प्रति चरणं क्रमेण तगणः, भगणः, जगणः, पुनः जगणः वर्तते। ततःपरं गुरुस्वरयुक्ताक्षरद्वयं वर्तते। अत एव प्रकृतश्लोकः वसन्ततिलकावृत्तस्य उदाहरणत्वेन गृहीतो भवति। इदम् अपि समवृत्तं भवति। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। श्लोकस्य अस्य प्रति चरणं चतुर्दश अक्षराणि विद्यन्ते। प्रकृतश्लोके षट्पञ्चाशत् अक्षराणि विद्यन्ते। एवञ्च अस्य श्लोकस्य पादान्ते यतिः विद्यते।

नामान्तरम् - वसन्ततिलकायाः बहु नामान्तरं विद्यते। अत्र काचित् कारिका उपलभ्यते -

"सिंहोन्नतेयमुदिता मुनिकाश्यपेन।

उद्धर्षिणीति गदिता मुनिसैतवेन।

रामेण सेयमुदिता मधुमाधवीति॥"इति।

अर्थात् वसन्ततिलकायाः काश्यपमते सिंहोन्नता इति नाम, सैवतस्य मते उद्धर्षिणी इति नाम, रामस्य मते तु माधवी इति नाम। वसन्ततिलकावृत्तस्य नामान्तरम् एव ज्ञात्वा अवगन्तुं शक्यते कियती प्रसिद्धिः आसीत्।

२४.२.१०) मालिनी

लक्षणम् - मालिनीच्छन्दसः लक्षणम्- "ननमयययुतेयं, मालिनी भोगिलोकैः" इति।

व्याख्यानम् - इदं च वृत्तम् अतिशक्वर्याः कश्चित् भागः वर्तते। ननमयययुता इत्युक्ते नगणद्वयेन, मगणेन, यगणद्वयेन, युता- युक्ता भवति चेत् सा मालिनी भवति इत्यर्थः। अर्थात् यस्य वृत्तस्य प्रति चरणं क्रमेण नगणः, पुनः नगणः वर्तते, ततःपरं सर्वगुरुः मगणः वर्तते, ततःपरं यगणः, ततःपरं पुनः यगणः भवति चेत् तत् वृत्तं मालिनी इति नाम्ना प्रख्यातम् अस्ति। एवञ्च भोगिः इत्युक्ते अष्टौ इत्यर्थः, लोकः इत्युक्ते सप्त इत्यर्थः। अत एव अष्टमे अक्षरे ततःपरं सप्तमे अक्षरे च यतिः भवति। इदम् अपि समवृत्तं भवति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य वृत्तस्य एकस्मिन् एव पादे पञ्चदश अक्षराणि विद्यन्ते। अतः श्लोके अस्मिन् षष्टिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - मालिनीवृत्तस्य उदाहरणं तावत्-

।।।, ।।।, ऽ ऽ ऽ,। ऽ ऽ,। ऽ ऽ/।।।, ।।।, ऽ ऽ ऽ,। ऽ ऽ, । ऽ ऽ

अतिवि-पुलल-लाटं, पी-वरोरः-कपाटं, सुधटि-तदश-नोष्ठं व्या-घ्रतुल्य-प्रकोष्ठम्।

।।। , ।।। , ऽ ऽ ऽ,। ऽ ऽ,। ऽ ऽ / ।।। , ।।। , ऽ ऽ ऽ,। ऽ ऽ, । ऽ ऽ

पुरुष-मशनि-लेखाल-क्ष्मणं वी-रलक्ष्मी-रतिसु-रभिय-शोभिर्मा-लिनी वाभ्युपैति॥ इति।

प्रकृतश्लोकस्य प्रत्येकं चरणेषु आदौ नगणः, ततःपरं पुनः नगणः वर्तते, ततःपरं सर्वगुरुः मगणः वर्तते, ततःपरं यगणः ततःपरं पुनः यगणः भवति। एवञ्च अष्टभ्यः अक्षरेभ्यः परं यतिः अस्ति। एवञ्च ततःपरम् अपि सप्तभ्यः अक्षरेभ्यः परं पुनः यतिः दृश्यते। अत एव श्लोकः अयं मालिनीवृत्तस्य उदाहरणत्वेन गण्यते। प्रकृतश्लोकस्य एकस्मिन् एव पादे पञ्चदश अक्षराणि विद्यन्ते। अतः श्लोके अस्मिन् षष्टिः अक्षराणि सन्ति। समवृत्तं छन्दः अस्ति। अत एव पादचतुष्टयम् अपि समलक्षणयुक्तं भवति।

२४.२.११) शिखरिणी

लक्षणम् - शिखरिणीवृत्तस्य लक्षणम् - "रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति।

व्याख्यानम् - अत्यष्ट्याः छन्दसः कश्चित् भागः शिखरिणी। यस्य वृत्तस्य प्रति चरणं यमनसभलाः इत्युक्ते यगणः, मगणः, नगणः, सगणः, भगणः, लघुश्च, गः - गुरुश्च वर्तन्ते चेत् तद् वृत्तं शिखरिणी इति नाम्ना प्रख्यातं भवति। रसैः इत्युक्ते षड्भिः, रुद्रैः इत्युक्ते एकादशभिः, छिन्ना - यतिमती सा शिखरिणी भवति। अर्थात् यस्य वृत्तस्यप्रति चरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुश्च वर्तन्ते चेत् तस्य वृत्तस्य शिखरिणी इति नाम भवति। एवञ्च षड्भ्यः अक्षरेभ्यः परम् एकादशभ्यः अक्षरेभ्यः परं च यतिः भवति। इदम् अपि समवृत्तम् अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य वृत्तस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः वृत्ते अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - शिखरिणीवृत्तस्य उदाहरणं तावत्-

। ऽ ऽ, ऽ ऽ ऽ, ।।। ,।। ऽ, ऽ ।। ,। ऽ

यदा कि-ञ्चिद्ज्ञोऽहं-, द्विप इ-व मदा-न्धः समभवम्।

। ऽ ऽ, ऽ ऽ ऽ, ।।। ,।। ऽ, ऽ।। ,। ऽ

तदा स-र्वज्ञोऽस्मी-, त्यभव-दवलि-प्तं मम मनः।

। ऽ ऽ, ऽ ऽ ऽ, ।।। , ।। ऽ, ऽ।। ,। ऽ

यदा किं-चित् किंचित्- बुधज-नसका-शादव-गतम्

। ऽ ऽ, ऽ ऽ ऽ,।।। ,।। ऽ, ऽ ।। ,। ऽ

तदा मू-र्खोऽस्मी-ति, ज्वर इ-व मदो- मे व्यप-गतः॥ इति।

प्रकृतश्लोकस्य अस्य प्रति चरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुश्च वर्तन्ते। अतः शिखरिणी इति वृत्तस्य उदाहरणत्वेन श्लोकः अयं गण्यो भवति। एवञ्च षड्भ्यः अक्षरेभ्यः परम् यतिः विद्यते। पुनश्च ततःपरं एकादशभ्यः अक्षरेभ्यः परं च यतिः भवति। इदम् अपि समवृत्तम्

अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। अस्य श्लोकस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः सम्पूर्णश्लोके अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

२४.२.१२) मन्दाक्रान्ता

लक्षणम् - मन्दाक्रान्ताच्छन्दसः लक्षणम्- "मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्॥"इति।

व्याख्यानम् - मन्दाक्रान्तावृत्तम् अत्यष्ट्याः छन्दसः कश्चित् भागः विद्यते। तस्य लक्षणं कथयति - यस्य वृत्तस्य प्रति चरणं क्रमेण म्भौ इत्युक्ते मगणः भगणः च भवतः, ततःपरं नतौ इत्युक्ते नगणः तगणश्च भवतः, ततःपरं तात् तगणात् परं गुरुवर्णद्वयं च भवेत् चेत् तदा मन्दाक्रान्ता इति नाम भवति। अर्थात् यस्य वृत्तस्य प्रति चरणं आदौ मगणः ततःपरं भगणः वर्तते, ततःपरं नगणः ततःपरं तगणः, ततःपरं पुनः तगणः वर्तते, तस्मात् द्वितीयतगणात् च परं गुरुस्वरयुक्ताक्षरद्वयं च वर्तते, तदा तस्य वृत्तस्य मन्दाक्रान्ता इति नाम। अधुना यतिनियमं कथयति - जलधिषडगैः इति। छन्दःशास्त्रे जलधिः इत्युक्ते चत्वारः, अगैः इत्युक्ते सप्तभिः इति। अर्थात् चतुर्भ्यः अक्षरेभ्यः परं यतिः भवति। ततः षड्भ्यः अक्षरेभ्यः परं यतिः वर्तते। ततः सप्तभ्यः अक्षरेभ्यः परं यतिनियमः विद्यते। इदम् अपि समवृत्तम् अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य वृत्तस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः वृत्ते अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - मन्दाक्रान्तावृत्तस्य उदाहरणं तावत्-

ऽ ऽ ऽ, ऽ ।। ,।।। , ऽ ऽ । , ऽ ऽ । , ऽ ऽ

कश्चित्का-न्ताविर-हगुरु-णा स्वाधि-कारात्प्र-मत्तः।

ऽ ऽ ऽ, ऽ।। ,।।। , ऽ ऽ। , ऽ ऽ। , ऽ ऽ

शापेना-स्तङ्गमि-तमहि-मा वर्ष-भोग्येण- भर्तुः।

ऽ ऽ ऽ, ऽ ।। ,।।। , ऽ ऽ । , ऽ ऽ। , ऽ ऽ

यक्षश्च-क्रे जन-कतन-यास्नान-पूर्णोद-केषु।

ऽ ऽ ऽ, ऽ।। ,।।। , ऽ ऽ। , ऽ ऽ। , ऽ ऽ

स्निग्धच्छा-यातरु-षु वस-तिं राम-गिर्याश्र-मेषु॥

प्रकृतश्लोकस्य अस्य प्रति चरणम् क्रमशः मगणः भगणः, नगणः, तगणः , पुनः तगणः च वर्तन्ते। तस्मात् च द्वितीयतगणात् च परं गुरुस्वरयुक्ताक्षरद्वयं च वर्तते। अत एव तस्य वृत्तस्य मन्दाक्रान्ता इति नाम। पुनश्च चतुर्भ्यः अक्षरेभ्यः परं यतिः भवति। पुनः ततः षड्भ्यः अक्षरेभ्यः परं यतिः विद्यते। ततः पुनः सप्तभ्यः अक्षरेभ्यः परं यतिः विद्यते। अत एव अयं श्लोकः मन्दाक्रान्तावृत्तस्य उदाहरणत्वेन गण्यो भवति। इदम् अपि समवृत्तम् अस्ति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य श्लोकस्य एकस्मिन् एव पादे सप्तदश अक्षराणि विद्यन्ते। अतः श्लोके अस्मिन् अष्टषष्टिः अक्षराणि सन्ति।

२४.२.१३) शार्दूलविक्रीडितम्

काव्यमार्गेषु अत्यन्तं प्रसिद्धतं छन्दः भवति शार्दूलविक्रीडितम्। संस्कृतजगति अनेन छन्दसा अगणिताः श्लोकाः सन्ति। सम्प्रति तस्य वृत्तस्य लक्षणादिकं विचार्यते।

लक्षणम्- शार्दूलविक्रीडितस्य वृत्तस्य लक्षणानि वक्ष्यन्ते- "सूर्याश्वैर्मसजस्ततताः सगुरवः शार्दूलविक्रीडितम्"इति।

व्याख्यानम् - इदं वृत्तम् अतिधृत्याः कश्चित् भागः विद्यते। यस्यप्रति चरणं सगुरवः इत्युक्ते गुरुणा एकेन सहिताः, मसजस्ततताः - मगणः, सगणः, जगणः, सगणः, तगणद्वयं च स्युः। पुनश्च सूर्यैः इत्युक्ते द्वादशभिः, अश्वैः इत्युक्ते सप्तभिः यतिः भवति। तस्य वृत्तस्य नाम शार्दूलविक्रीडितम् इति। अर्थात् यस्य च वृत्तस्यप्रति चरणं क्रमेण मगणः, सगणः, जगणः, पुनः सगणः, ततःपरं तगणद्वयं च स्युः। एवञ्च द्वादशभ्यः अक्षरेभ्यः परं यतिः भवति। पुनश्च ततः सप्तभ्यः अक्षरेभ्यः परं यतिः भवति। तस्य वृत्तस्य शार्दूलविक्रीडितम् इति नाम। इदम् अपि समवृत्तं भवति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवेत्। अस्य श्लोकस्य एकस्मिन् एव पादे नवदश अक्षराणि विद्यन्ते। अतः सम्पूर्णश्लोके अस्मिन् षट्सप्ततिः अक्षराणि सन्ति।

उदाहरणे लक्षणसमन्वयः - शार्दूलविक्रीडितवृत्तस्य उदाहरणं तावत्-

ऽ ऽ ऽ ,।। ऽ,। ऽ । ,।। ऽ, ऽ ऽ । ,ऽ ऽ। , ऽ

या कुन्दे-न्दुतुषा-रहार-धवला- या शुभ्र-वस्त्रावृ-ता।

ऽ ऽ ऽ ,।। ऽ, । ऽ । ,।। ऽ, ऽ ऽ । ,ऽ ऽ। , ऽ

या वीणा-वरद-ण्डमण्डि-तकरा- या श्वेत-पद्मास-ना।

ऽ ऽ ऽ ,।। ऽ,। ऽ। ,।। ऽ, ऽ ऽ। , ऽ ऽ । , ऽ

या ब्रह्मा-च्युतश-ङ्करप्र-भृतिभि-र्देवैः स-दा वन्दिता।

ऽ ऽ ऽ ,।। ऽ,। ऽ । ,।। ऽ, ऽ ऽ। , ऽ ऽ । , ऽ

सा मां पा-तु सर-स्वती भ-गवती- निःशेष-जाड्या-पहा॥ इति।

प्रकृतश्लोकस्य अस्यप्रति चरणं क्रमेण मगणः, सगणः, जगणः, पुनः सगणः, ततःपरं तगणद्वयं च सन्ति। एवञ्च द्वादशभ्यः अक्षरेभ्यः परं यतिः भवति। पुनश्च ततः सप्तभ्यः अक्षरेभ्यः परं यतिः भवति। अत एव अयम् एव श्लोकः शार्दूलविक्रीडितस्य वृत्तस्य उदाहरणत्वेन गृहीतो भवति। इदम् अपि समवृत्तं भवति। अतः पादचतुष्टयम् अपि समलक्षणयुक्तं भवति। अस्य श्लोकस्य एकस्मिन् एव पादे नवदश अक्षराणि विद्यन्ते। अतः सम्पूर्णश्लोके अस्मिन् षट्सप्ततिः अक्षराणि सन्ति। इदं च वार्णिकच्छन्दः भवति।

पाठगतप्रश्नाः-४

अत्र केचित् पाठगताः प्रश्नाः प्रदीयन्ते -

२३. भुजङ्गप्रयातवृत्तस्य लक्षणं किम् अस्ति।

२४. भुजङ्गप्रयातवृत्तेन रचिते श्लोके कति अक्षराणि सन्ति।

२५. वसन्ततिलकावृत्तस्य लक्षणं किम् अस्ति।

२६. वसन्ततिलकावृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति।

२७. काश्यपमते वसन्ततिलकायाः अपरं नाम किम् अस्ति।

२८. मालिनीवृत्तस्य लक्षणं किम् अस्ति।

२९. मालिनीवृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति।

३०. शिखरिणीवृत्तस्य लक्षणं किम् अस्ति।

३१. शिखरिणीवृत्तस्य प्रत्येकं पादेषु कति अक्षराणि सन्ति।

३२. मन्दाक्रान्तावृत्तस्य लक्षणं किम् अस्ति।

३३. शार्दूलविक्रीडितवृत्तस्य लक्षणं किम् अस्ति।

पाठसारः

संस्कृतसाहित्यजगति छन्दसः प्रचुरं प्रयोगः दृश्यते। शाकुन्तलादिलौकिककाव्ये वैदिकसाहित्ये च छन्दसः प्रयोगः अस्ति एव। अस्मिन् पाठे आर्यावृत्तरूपस्य मात्रिकच्छन्दसः वर्णना क्रियते। आर्याच्छन्दसः लक्षणविचारः, उदाहरणम्, यतिनियमश्च उच्यते। मात्रिकच्छन्दं वर्णयित्वा अत्यन्तं प्रसिद्धम् इन्द्रवज्रावृत्तम् उपेन्द्रवज्रावृत्तञ्च वर्णयति। यस्य वृत्तस्यप्रति चरणं तगणद्वयम्, जगणेन साकं गुरुद्वयं च भवति चेत् अस्य वृत्तस्य इन्द्रवज्रा इति नाम भविष्यति। अस्य पादान्ते यतिः भवति। एवञ्च उपेन्द्रवज्रावृत्ते प्रथमं जगणः वर्तते, ततःपरं तगणः वर्तते, ततःपरं पुनः जगणः वर्तते। ततःपरं परं गुरुस्वरविशिष्टाक्षरद्वयं वर्तते। एवञ्च पादस्य अन्ते एव यतिः भवति। शालिनीच्छन्दसः प्रत्येकं चरणेषु प्रथमं मगणः ततःपरं तगणः ततःपरं पुनः तगणः ततःपरं गुरुवर्णः ततःपरं पुनः गुरुवर्णः भवति चेत् शालिनीवृत्तम् इति नाम भवति। चतुर्भ्यः अक्षरेभ्यः परं सप्तभ्यः अक्षरेभ्यः परं च यतिः भवति। ततःपरं रथोद्धतावृत्तम् आलोचयति। रथोद्धताच्छन्दसः प्रत्येकं पादेषु रगणात् परं नगणः रगणश्च वर्तते। एवञ्च लघुगरू च स्याताम्। एवञ्च पादस्य अन्ते एव यतिनियमो भवति। पुनश्च वंशस्थस्य लक्षणं कथयति - यस्य वृत्तस्य प्रत्येकं पादेषु जगणः, ततःपरं तगणः,ततश्च पुनः जगणः, ततःपरं रगणः च क्रमेण वर्तन्ते चेत् तद् वंशस्थम्। तोटकवृत्तस्य लक्षणं भवति - यस्य च वृत्तस्य प्रत्येकं पादेषु चत्वारः सगणाः वर्तन्ते चेत् तत् वृत्तं तोटकम् इति नाम्ना प्रथितम्। तोटकवृत्तस्यापि पादान्ते यतिः भवति। सम्प्रति

द्रुतविलम्बितस्य लक्षणं कथयति - यस्य वृत्तस्य प्रतिपदे आदौ नगणः भवति, ततःपरं भगणः भवति, ततःपरं पुनः भगणः भवति, ततःपरं रगणः भवति चेत् तत् वृत्तं द्रुतविलम्बितम् इति नाम्ना काव्यजगति प्रथितं भवति। पुनः यस्य वृत्तस्यप्रति चरणं चतुर्भिः यगणैः युक्तं स्यात्, तस्य वृत्तस्य भुजङ्गप्रयातम् इति नाम्ना प्रख्यातम्। अस्य अपि वृत्तस्य पादान्ते यतिः भवति। पुनः यस्य वृत्तस्य प्रत्येकं चरणेषु आदौ तगणः वर्तते, ततःपरं भगणः वर्तते, ततःपरं जगणः अस्ति, ततश्च पुनः जगणः वर्तते, ततःपरं गुरुवर्णः भवति, ततश्च पुनः गुरुवर्णः भवति चेत् तद् वृत्तं वसन्ततिलका इति नाम्ना कथितं भवति। अस्य च वृत्तस्य पादान्ते यतिः विद्यते। ततःपरं मालिनीवृत्तस्य लक्षणं कथयति - यस्य वृत्तस्य प्रत्येकं चरणेषु आदौ नगणः, ततःपरं पुनः नगणः वर्तते, ततःपरं सर्वगुरुः मगणः वर्तते, ततःपरं यगणः ततःपरं पुनः यगणः भवति चेत् तत् वृत्तं मालिनी इति नाम्ना प्रख्यातम् अस्ति। यस्य वृत्तस्यप्रति चरणं क्रमेण यगणः, मगणः, नगणः, सगणः, भगणः, लघुः, गुरुश्च वर्तन्ते चेत् तस्य वृत्तस्य शिखरिणी इति नाम भवति। एवञ्च षड्भ्यः अक्षरेभ्यः परम् एकादशभ्यः अक्षरेभ्यः परं च यतिः भवति। एवञ्च यस्य वृत्तस्य प्रति चरणं आदौ मगणः ततःपरं भगणः वर्तते, ततःपरं नगणः ततःपरं तगणः, ततःपरं पुनः तगणः वर्तते, तस्मात् द्वितीयतगणात् च परं गुरुस्वरयुक्ताक्षरद्वयं च वर्तते, तदा तस्य वृत्तस्य मन्दाक्रान्ता इति नाम। यस्य च वृत्तस्यप्रति चरणं क्रमेण मगणः, सगणः, जगणः, पुनः सगणः, ततःपरं तगणद्वयं वा स्युः। एवञ्च द्वादशभ्यः अक्षरेभ्यः परं यतिः भवति। पुनश्च ततःपरं सप्तभ्यः अक्षरेभ्यः परं यतिः भवति। तस्य वृत्तस्य शार्दूलविक्रीडितम् इति नाम स्यात्। एवञ्च एतानि छन्दांसि समासेन प्रकृतपाठे चर्चितानि सन्ति।

पाठान्तप्रश्नाः

अत्र केचित् पाठान्तप्रश्नाः प्रदीयन्ते -

१. उदाहरणपुरःसरम् आर्याच्छन्दसं वर्णयत।

२. इन्द्रवज्रावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

३. उपेन्द्रवज्रावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

४. शालिनीवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

५. रथोद्धतावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

६. वंशस्थवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

७. तोटकवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

८. भुजङ्गप्रयातवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

९. वसन्ततिलकावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१०. द्रुतविलम्बितवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

११. मालिनीवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१२. शिखरिणीवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१३. मन्दाक्रान्तावृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

१४. शार्दूलविक्रीडितवृत्तस्य लक्षणम् उदाहरणञ्च लिखत।

पाठान्तप्रश्नानाम् उत्तराणि

अत्र पाठान्तप्रश्नानाम् उत्तराणि प्रदीयन्ते -

१. मात्रिकच्छन्दः।

२. जगणः।

३. विषमवृत्तम्।

४. त्रिंशत्।

५. सप्तविंशतिः।

६. "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति।

७. एकादश।

८. समवृत्तम्।

९. "उपेन्द्रवज्रा जतजास्ततो गौ"इति।

१०. एकादश।

११. "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति।

१२. एकादश।

१३. "रान्नराविह रथोद्धता लगौ"इति।

१४. चतुश्चत्वारिंशत्।

१५. पादान्ते।

१६. " जतौ तु वंशस्थमुदीरितं जरौ"इति।

१७. द्वादश।

१८. " इह तोटकमम्बुधिसैः प्रथितम्" इति।

१९. द्वादश।

२०. "द्रुतविलम्बितमाह नभौ भरौ"इति।

२१. पादान्ते।

२२. सुन्दरी।

२३. "भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः। "इति।

२४. अष्टचत्वारिंशत्।

२५. "उक्ता वसन्ततिलका तभजा जगौ गः" इति।

२६. चतुर्दश।

२७. सिंहोन्नता।

२८. "ननमयययुतेयं, मालिनी भोगिलोकैः" इति।

२९. पञ्चदश।

३०. "रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी" इति।

३१. सप्तदश।

३२. "मन्दाक्रान्ता जलधिषडगैम्भौ नतौ ताद् गुरू चेत्॥"इति।

३३. "सूर्याश्वैर्मसजस्ततागः सगुरवः शार्दूलविक्रीडितम्"इति।

॥ इति चतुर्विंशः पाठः ॥

348sk25

२५

शब्दार्थालङ्कारः शब्दालङ्कारश्च

प्रस्तावना -

मानवाः सदा एव सौन्दर्यस्य पूजकाः भवन्ति। अतिप्राचीनकालात् एव अलङ्कारादीनां प्रयोगं कृतवन्तः कवयः। इतिहासपुराणादिवत् अलङ्कारशास्त्रम् अपि अतिप्राचीनम् भवति। कवयः यदा पद्यादिकं सृजन्ति, तदा एव स्वतः अलङ्कारादयः कृतिषु समायान्ति। वैदिकवाङ्मये अपि अलङ्कारशास्त्रस्य प्रयोगः विद्यते। यथा- ऋग्वेदे औषससूक्तिषु उषादेव्याः वर्णनावसरे उपमाद्यलङ्काराणां प्रयोगः दृश्यते। ऋग्वेदे अतिशयोक्त्यलङ्कारस्य प्रयोगः दृश्यताम्।

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्याद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥" इति।

अयञ्च अलङ्कारः कविवाणीतः स्वतः एव आयाति, न तु बहुयत्नेन। शरीरात् लावण्यं पृथक् न कदापि भवति, तथैव शब्दार्थमयात् काव्यशरीरात् अलङ्कारः पृथक् न भवति। यथा खलु वलयकुण्डलादयः मानवदेहस्य शोभां सम्पादयन्तः अलङ्कारशब्देन व्यपदिश्यन्ते। तथैव अनुप्रासरूपकोपमादयः शब्दस्य अर्थस्य च शोभां सम्पादयन्तः रसम् उपकुर्वन्ति। अत एव अनुप्रासरूपकादयः अलङ्कारपदवाच्याः भवन्ति इति काव्यवेदिभिः। अलङ्कारः हि शब्दार्थमयस्य काव्यस्य शोभां वर्धयति। यथा वह्नेः उष्णत्वं धर्मः भवति, तथैव अलङ्कारस्य सौन्दर्यं धर्मः भवति। अत एव वामनेन प्रोक्तम् - "सौन्दर्यमलङ्कारः" इति। जयदेवः कथयति यत् वह्नेः उष्णताराहित्यं कदापि न सम्भवति। तथैव काव्यम् अपि अलङ्काररहितं कदापि न भवति। तथाहि प्रोक्तं जयदेवेन-

"अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मात् अनुष्णमनलङ्कृती॥" इति।

प्रकृते पाठे वयं केषाञ्चित् अलङ्काराणां लक्षणम्, किं प्रयोजनम्, अलङ्कारस्य प्रभेदः इति अस्मिन् विषये संक्षेपेण आलोचनां कुर्मः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् भवती वा-

- अलङ्कारस्य लक्षणं ज्ञातुं प्रभवेत्।
- अलङ्कारस्य प्रयोजनं ज्ञातुं शक्नुयात्।

- अलङ्कारस्य भेदोपभेदान् ज्ञातुं प्रभवेत्।
- शब्दार्थालङ्कारे विद्यमानम् अलङ्कारं ज्ञातुं प्रभवेत्।
- शब्दालङ्कारे विद्यमानम् अलङ्कारं ज्ञातुं प्रभवेत्।
- कवीनां निर्मिते श्लोकादौ अलङ्कारनिर्णयं कर्तुं योग्यो भवेत्।
- स्वयम् अपि अलङ्कारीदानां प्रयोगं कृत्वा श्लोकनिर्माणे समर्थो भवेत्।
- उदाहरणे लक्षणसमन्वयः कथं कार्यः इति ज्ञातुं शक्नुयात्।
- अलङ्कारयुक्ते श्लोकादौ अधिकां चमत्कृतिम् अवगन्तुं योग्यो भवेत्।

२५.१) अलङ्कारलक्षणम्

अथ अलंकारः परिचाय्यते। लोकप्रसिद्धः अयम् अलङ्कारशब्दः अलम् इति उपपदपूर्वकात् कृधातोः घञ्प्रत्ययेन निष्पन्नो भवति। अलङ्कारविषयकं शास्त्रं निगद्यते अलङ्कारशास्त्रम् इति। को नाम अलंकारः। "काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते" इति दण्डी प्रोक्तवान्। अलङ्क्रियते अनेन इत्यलंकारः इति वामनानन्दवर्धनादयः परिभावयन्ति। मम्मटाचार्यस्य मते शब्दार्थमयस्य काव्यशरीरस्य सौन्दर्यवर्धकाः उपमादयः अलङ्काराः भवन्ति। तदेव प्राह -

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥"इति।

अलङ्काराः प्रथमतया वाच्यलक्ष्यव्यङ्ग्यार्थस्य शोभां वर्धयन्ति। ततः वाच्यलक्ष्याद्यर्थातिशयमुखेन सम्भाविनं मुख्यरसम् उपकुर्वन्ति। लोकसमाजे अपि आदौ अलङ्कारः कण्ठाद्यङ्गानां शोभां वर्धयति। ततःपरम् अलङ्काराः कण्ठाद्यङ्गानाम् उत्कर्षाधानद्वारेण शरीरिणम् उपकुर्वन्ति। पण्डितराजः जगन्नाथः स्वकीये रसगङ्गाधरनामके ग्रन्थे अलङ्कारं निर्दिशति। तथाहि प्रोक्तम् - "अथास्य प्रागभिहितलक्षणस्य काव्यात्मनो व्यङ्ग्यस्य रमणीयताप्रयोजकाः निरूप्यन्ते।" इति। विश्वेश्वरस्य पण्डितस्य मते तु अलङ्कारः रसोपकारकः भवति। अलङ्कारः अर्थद्वारा रसम् उपकरोति। तथाहि प्रोक्तम् अलङ्कारकौस्तुभे- "तं विना शब्दसौन्दर्यमपि नास्ति मनोहरम्।

अर्थालङ्काररहिता विधेवेव सरस्वती॥" इति।

कविराजः विश्वनाथः साहित्यदर्पणनामकस्य ग्रन्थस्य दशमोल्लासे अलङ्कारान् विवृणोति। तथाहि अलङ्कारस्य लक्षणं प्राह-

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥ इति।

यथा केयूरादिकाः शरीरशोभातिशायिनः आत्मानम् उपकुर्वन्ति, तेनैव प्रकारेण अनुप्रासोपमादयः अलङ्काराः शब्दार्थशोभातिशायिनः काव्यात्मभूतस्य रसादेः उपकारकाः भवन्ति। अलङ्काराः अस्थिराः सन्ति अत एव तेषां गुणवत् आवश्यकी स्थितिः। अर्थात् गुणा अपि उत्कर्षकाः सन्ति, किन्तु ते गुणाः रसस्य स्थिराः धर्माः स्वरूपविशेषाः सन्ति। अलङ्काराः शब्दार्थयोः अस्थिराः धर्माः शब्दार्थद्वारेण च रसम् उत्कर्षयन्ति। इदम् एव अलङ्काराणां प्रयोजनं यत् शब्दार्थद्वारेण रसादेः उपकारकम् अस्ति।

अलङ्कारशब्दः द्विधा निष्पन्नो भवति। अलङ्कृतिः अलङ्कारः इति भावव्युत्पन्नः पक्षः। अलङ्क्रियते अनेन इति करणव्युत्पन्नः पक्षः भवति।

२५.२) अलङ्कारस्य प्रकारः

प्रायः अलङ्कारः द्विविधः भवति। शब्दालङ्कारः अर्थालङ्कारः च इति। केषाञ्चित् नये उभयालङ्कारः अपि भवति। अनुप्रासादयः शब्दालंकाराः उपमारूपकादयः अर्थालंकाराः। पुनरुक्तवदाभासालङ्कारः शब्दार्थालङ्कारः अर्थात् उभयालंकारः भवति। शब्दालङ्कारे शब्दस्य एव प्राधान्यता भवति। अर्थालङ्कारे अर्थस्य प्राधान्यता भवति।

येऽलङ्काराः शब्दाश्रिताः ते शब्दालङ्काराः कथ्यन्ते। ''शब्दपरिवृत्त्यसहत्वं'' यत्र विद्यते, अर्थात् येऽलङ्काराः शब्दपरिवर्तनं न सहन्ते, प्रयुक्तशब्दस्थाने पर्यायवाचकशब्दप्रयोगं न सहन्ते इत्यर्थः। यावत् शब्दः तावदलङ्कारस्य सत्ता वर्तते, यदा शब्दपरिवर्तनं स्यात् तदालङ्कारोऽपि नष्टः स्यात्। अतः एतादृशी स्थितिर्यत्र विद्यते ते शब्दालङ्काराः भवन्ति। येऽलङ्काराः अर्थाश्रिताः ते अर्थालङ्काराः कथ्यन्ते। ''शब्दपरिवृत्तिसहत्वं'' यत्र विद्यते, अर्थात् येऽलङ्काराः शब्दपरिवर्तनं सहन्ते, प्रयुक्तशब्दस्थाने पर्यायवाचकशब्दप्रयोगं सहन्ते इत्यर्थः। यावत् अर्थः तावदलङ्कारस्य सत्ता वर्तते, यदा अर्थपरिवर्तनं स्यात् तदालङ्कारोऽपि नष्टः स्यात्। अतः एतादृशी स्थितिर्यत्र विद्यते ते अर्थालङ्काराः भवन्ति।

वस्तुतस्तु शब्दालङ्कारः ध्वनेः अर्थात् नादस्य अलङ्कारः भवति तस्य श्रवणेन आनन्दो जायते। अर्थालङ्कारः अर्थस्य अलङ्कारः भवति। शब्दालङ्कारः भवति शरीरम्, अर्थालङ्कारः भवति तस्य चिदानन्दस्वरूपम्। शब्दालङ्कारः मानवानां मनसि रूपस्य आलोकं प्रददाति। अर्थालङ्कारः चिन्मयरूपेण चित्तम् आलोकयति। शब्दालङ्कारे शब्दस्य परिवर्तनं सम्भवम् नास्ति। परन्तु अर्थालङ्कारे तु शब्दस्य परिवर्तनं सम्भवम् अस्ति।

शब्दालङ्कारः अर्थालङ्कारः शब्दार्थालङ्कारः(उभयालङ्कारः) इति भेदेन अलङ्कारः प्रायः त्रिविधः

२५.३) अलङ्कारस्य प्रयोजनम्

अलङ्कारः सौन्दर्यम्। सुन्दरं वस्तु यत्र तिष्ठति, तत्रैव अस्माकं नेत्रं धावति। सौन्दर्यपूर्णस्य वस्तुनः दर्शनेन अस्माकं नेत्रम् आनन्दं लभते। सौन्दर्यपूर्णस्य भोजनस्य स्वीकारेण सदा एव मनसि आनन्दः जायते। तद्वत् सौन्दर्यपूर्णस्य काव्यस्य पठनेन अपि मनसि आनन्दः उत्पद्यते। परमार्थतः उक्तिवैचित्र्यम् अलङ्कारः भवति। वस्तुतस्तु यदि साक्षात् किमपि कथयति चेत् तत् कथामात्रम् अस्ति। ततः चमत्कृतिः अपि न उत्पद्यते। यथा - मम नाम देवदत्तः। अहं प्रतिदिनं प्रातः विद्यालयं गच्छामि। इति एतादृशानि वाक्यानि साक्षात् कञ्चित् अर्थं बोधयन्ति। अस्मिन् वाक्ये चमत्कारः न दृश्यते। तस्मात् चमत्कारविशिष्टं वाक्यं नास्ति चेत् तत् काव्यं न भवति। तत्र तु चमत्कारविशिष्टस्य वाक्यस्य अभावात् जनानाम् आनन्दः एव न भवति। उक्तिवैचित्र्यम् अस्ति चेत् ततः आनन्दः भवति। वामनेन स्वस्य काव्यालङ्कारसूत्रस्य आदिमसूत्रे प्रोक्तम् अस्ति यत् "काव्यं ग्राह्यमलङ्कारात्"इति। यत् किम् अपि काव्यम्

अस्माकं ग्राह्यं न भवति। काव्ये उक्तिवैचित्र्यम् अस्ति चेत् तत् काव्यम् अस्माकं ग्राह्यम् भवति। सालङ्कारस्य काव्यता भवति इति कुन्तकाचार्यस्य मतम्। तत एव खलु अलंकारो नाम काव्यशरीरभूतयोः शब्दार्थयोः लोकोत्तररमणीयत्वनिष्पादकः राजमार्गः भवति। तस्मात् तदतिशयमाहुः वामनभट्टाः काव्यं ग्राह्यमलंकारादिति। काचित् महिला अलङ्कारं गृह्णाति चेत् सा अतीव सुन्दरी प्रतिभाति। तथैव काव्ये अलङ्काराः सन्ति चेत् तत् काव्यम् अत्यन्तं प्रियं भवति। अलङ्कारः यथा देहस्य सौन्दर्यं वर्धयति तथैव शब्दालङ्कारः अर्थालङ्कारश्च काव्यशरीरस्य सौन्दर्यं वर्धयति। उक्तिवैचित्र्यं नास्ति चेत् तत् काव्यं ग्राह्यं न भवति। चन्द्रः इव मुखम् इति उपमालङ्कारस्य उदाहरणं भवति। सामान्यार्थः भवति यत् चन्द्रे यादृशं सौन्दर्यं तिष्ठति, तादृशं सौन्दर्यं मुखे अपि विद्यते। अस्मिन् वाक्ये साक्षात् वाक्यार्थः विद्यते। तस्मात् उक्तिवैचित्र्यस्य गूढार्थस्य च अभावात् अस्मिन् वाक्ये चमत्कारः नास्ति। अत एव काव्यत्वेन ग्राह्यं न भवति। चन्द्रः इव मुखम् इत्यत्र तु सौन्दर्यम् इत्यर्थः गुप्ततया विद्यते। अस्मिन् वाक्ये गूढार्थस्य उक्तिवैचित्र्यस्य च विद्यमानात् चमत्कारः विलसति। अत एव वाक्यम् इदं श्रुत्वा जनानां मनसि आनन्दः उत्पद्यते। वामनेन अलङ्कारवता काव्येन किं फलम्। तदोच्यते - "काव्यं सत् दृष्टार्थाऽदृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।"

सत्काव्यम् अस्माभिः आदरणीयम् अस्ति। यतो हि सतः काव्यस्य पठनेन प्रीतिः उत्पद्यते। तच्च दृष्टं प्रयोजनं भवति। पुनश्च सतः काव्यस्य पठनेन कीर्तिः उत्पद्यते। तच्च अदृष्टं प्रयोजनं भवति। भामहस्य मते काव्ये अलङ्कारः एव प्रधानः भवति। अलङ्कारः एव काव्यस्य आत्मा। आत्मानं विना शरीरं व्यर्थं भवति। तथैव अलङ्कारं विना काव्यम् अपि व्यर्थं भवति।

पाठगतप्रश्नाः-१

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते।

१. अलङ्कारशब्दस्य भावसाधनव्युत्पत्त्या कः विग्रहः भवति।

२. अलङ्कारशब्दस्य करणसाधनव्युत्पत्त्या कः विग्रहः भवति।

३. दण्डिनः मते अलङ्कारस्य लक्षणं किम् अस्ति।

४. प्रायः कतिविधः अलङ्कारः भवति।

५. शब्दालङ्कारस्य एकम् उदाहरणं लिखत

६. अर्थालङ्कारस्य एकम् उदाहरणं लिखत

७. कस्य मते काव्यस्य आत्मा अलङ्कारः।

८. भामहस्य मते काव्यस्य आत्मा कः।

९. मम्मटमते अलङ्कारस्य लक्षणं किम्।

१०. विश्वनाथमते अलङ्कारस्य लक्षणं किम्।

२५.४) शब्दार्थालङ्कारः

क्वचित् पुनः शब्दार्थयोः उभयोः एव सन्निवेशविशेषवैचित्र्येण चमत्कृतिः दृश्यते। तादृशस्थलेषु शब्दार्थयोः उभयोः एव चमत्कृतिविधायकत्वात् शब्दार्थोभयालङ्कारता स्वीक्रियते। अत एव शब्दार्थालङ्कारपदवाच्यं भवति। अत्र शब्दस्य अर्थस्य च प्राधान्यं भवति। शब्दस्य परिवर्तनं शक्यं भवति। काव्यमार्गे पुनरुक्तवदाभासनाम्ना एक एव तादृशः अलङ्कारः दृश्यते।

वैशिष्ट्यानि -

१. शब्दस्य अर्थस्य च प्राधान्यं दृश्यते।
२. अर्थस्य च परिवर्तनं न शक्यं भवति।
३. शब्दस्य परिवर्तनं शक्यं भवति।
४. काव्यमार्गे पुनरुक्तवदाभासनाम्ना एकः अलङ्कारः अस्ति।

२५.४.१) पुनरुक्तवदाभासः

लक्षणम्- साहित्यदर्पणग्रन्थे कविराजः विश्वनाथः पुनरुक्तवदाभासालङ्कारस्य लक्षणं कथयति-

"आपाततो यदर्थस्य पौनरुक्त्यावभासनम्।

पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥"इति।

अन्वयः - आपाततः यत् अर्थस्य पौनरुक्त्या अवभासनं भिन्नाकारशब्दगः स पुनरुक्तवदाभासः अलङ्कारः स्यात्।

शब्दार्थः - आपाततः - श्रवणमात्रेण, यत् - यत्, अर्थस्य – अर्थस्य, पौनरुक्त्या - पुनरुक्तिमाध्यमेन, अवभासनम्- प्रतीतिः, भिन्नाकारशब्दगः - भिन्नाकृत्याः शब्दगतः, सः - तत्पदवाच्यः, पुनरुक्तवदाभासः - पुनरुक्तवदाभासनामकः, अलङ्कारः भवति।

सामान्यार्थः - कस्मिन्चित् वाक्ये प्रयुक्तस्य भिन्नाकृतिशब्दसमूहस्य श्रवणमात्रेण कश्चित् समानः अर्थः प्रतिभासते। सा एव पुनरुक्तिः इति उच्यते। परन्तु सम्यग्तया वाक्यार्थस्य पर्यालोचनात् परं कस्यचित् भिन्नार्थस्य प्रतीतिः भवति। स एव पुनरुक्तवदाभासालङ्कारः इति उच्यते। पुनरुक्तवद् आभासते, न तु वस्तुगत्या पुनरुक्तिः। अर्थात् सामान्यतया भिन्नाकृतियुक्तस्य शब्दस्य दर्शनेन तु समानः अर्थः अस्ति इति प्रतिभाति। परन्तु यदा शब्दानाम् अर्थविषये सम्यग्तया आलोचना क्रियते तदा तु कश्चित् भिन्नार्थः प्रतीयते। अत एव पुनरुक्तिवद् आभासते, न तु वस्तुगत्या पुनरुक्तिदोषः विद्यते। एतादृशवाक्यकथनेन चमत्कारः उत्पद्यते। एतेन काव्यस्य सौन्दर्यम् अभिवर्धते। पुनरुक्तवदाभासः इति अन्वर्थसंज्ञा विद्यते। यतो हि अलङ्कारस्य नामानुसारेण एव लक्षणम् अपि दृश्यते।

उदाहरणे समन्वयः - अत्र उदाहरणं तावत्-

"भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः।

जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः।" इति

श्लोकार्थः - सर्पः यस्य अलङ्कारः, कर्पूरनिभः शुभ्रकिरणयुक्तः चन्द्रः यस्य आश्रये शोभमानः। तादृशः शिवः विपदः अस्मान् संसारान् च अवतु।

प्रकृतश्लोके अस्मिन् भुजङ्गकुण्डलादिशब्दानां भिन्नाकृतिः विद्यते। परन्तु भुजङ्गकुण्डलादिशब्दानां भिन्नाकृतित्वे सत्यपि आपातमात्रेण सर्पः इति समानः अर्थः आगच्छति। यतो हि उभयोः शब्दयोः सर्पः इति लोकप्रसिद्धार्थः अस्ति। अत एव शब्दस्य श्रवणमात्रं हि पुनरुक्तिभ्रमः आपद्यते। किन्तु सम्यग्तया वाक्यार्थस्य पर्यालोचनात् परं तु भिन्नार्थः प्रतिभासते। पर्यावसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्य इत्याद्यन्यार्थत्वम् आयाति। एवञ्च भुजङ्गकुण्डलादिशब्दस्य तु श्रवणमात्रेण सर्पः इति समानः अर्थः आयाति। परन्तु वाक्यार्थस्य पर्यालोचनेन ज्ञायते यत् भुजङ्गकुण्डलशब्दयोः भिन्नार्थत्वं विद्यते, इति लक्षणसमन्वयः भवति। एवञ्च अत्रैव शशी, शुभ्रांशुः, शीतगुः इति त्रयाणां शब्दानाम् चन्द्रः इत्येव समानः अर्थः श्रूयते। तस्मात् शब्दानां श्रवणमात्रेण भ्रमवशात् पुनरुक्तिदोषः भवति। परन्तु वाक्यार्थस्य पर्यालोचनेन ज्ञायते यत् शशीशब्दस्य कर्पूरम् इति अर्थः भवति, शुभ्रांशुशब्दस्य श्वेतकिरणम् इत्यर्थः भवति, शीतगुशब्दस्य चन्द्रः इत्यर्थः च भवति। अतः पुनरुक्तिदोषः नास्ति। (सदा) पायात् अव्यात् इति क्रियापदद्वयम् एव रक्षणार्थं प्रतिपादयति। तस्मात् श्रवणमात्रेण समानस्य अर्थस्य आभासात् पुनरुक्तिदोषः भवति। किन्तु सम्यग्तया वाक्यार्थालोचनावसरे अपायात् अव्यात् इति पदच्छेदः। अपायशब्दस्य अमङ्गलम् इति अर्थः भवति। अव्यात् इत्यस्य तु रक्षणम् इति अर्थः भवति। अतः पुनरुक्तिभ्रमः न भवति। अत्र आदौ आपातदृष्ट्या शब्दानां समानः अर्थः प्रतिभासते, अतः पुनरुक्तिदोषः भवति। परन्तु वाक्यार्थस्य सम्यग्तया पर्यालोचनेन भिन्नार्थत्वं प्रतिभासते। अत एव पुनरुक्तवदाभासालङ्कारः इति उच्यते। पुनः उक्तवत् आभासते, परन्तु वस्तुगत्या पुनरुक्तिः न भवति।

शब्दालङ्कारे शब्दस्य प्राधान्यं भवति। शब्दालङ्कारे शब्दस्य परिवर्तनं न शक्यं भवति। परन्तु शब्दार्थालङ्कारे तु शब्दस्य परिवर्तनं शक्यं भवति। यथा- भुजङ्गकुण्डलादिशब्दस्य स्थाने "हरः शिवः" इति शब्दप्रयोगः शक्यः अस्ति। शशिशुभ्रांश्वित्यादिशब्दस्य स्थाने शब्दपरिवर्तनं शक्यम् अस्ति। एवमेव अन्यत्र यथायोग्यः शब्दः कल्पनीयः भवति।

२५.५) शब्दालङ्कारः

यत्र सम्पाद्यते श्रुतिमाधुर्यं शब्दानाम् एव सन्निवेशविशेषेण तत्र स्वीक्रियते शब्दालङ्कारः। मूलतः शब्दालङ्कारे वर्णस्य पदस्य वाक्यस्य च प्राधान्यं दृश्यते। अत एव शब्दालङ्कारः वर्णध्वनिः पदध्वनिः वाक्यध्वनिः च भवति। तत्र मूलतया अनुप्रासे वर्णध्वनिः अस्ति। यमकवक्रोक्तिश्लेषादिषु अलङ्कारेषु पदध्वनिः विद्यते। सर्वयमके वाक्यध्वनिः विद्यते। शब्दालङ्कारे शब्दस्य एव प्राधान्यं दृश्यते।

वैशिष्ट्यानि -

१. शब्दालङ्कारे शब्दस्य प्राधान्यं विद्यते।
२. शब्दालङ्कारे वर्णस्य पदस्य च प्राधान्यं विद्यते।
३. शब्दालङ्कारे शब्दस्य परिवर्तनं न कदापि कर्तुं शक्यते।

४. शब्दालङ्कारे शब्दानाम् एव सन्निवेशेन चमत्कारः भवति।

५. शब्दालङ्कारः वर्णध्वनिः पदध्वनिः वाक्यध्वनिश्च भवति।

अधः सम्प्रति शब्दालङ्कारविषये आलोचना क्रियते-

२५.५.१) अनुप्रासः

लक्षणम् - अनुप्रासालङ्कारस्य लक्षणं प्राह साहित्यदर्पणे कविराजः विश्वनाथः-"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् "इति।

अन्वयः - स्वरस्य वैषम्ये अपि यत् शब्दसाम्यं सः अनुप्रासः।

सामान्यार्थः - स्वरस्य भेदे सत्यपि सदृशस्य व्यञ्जनवर्णस्य आवृत्तिः अनुप्रासालङ्कारपदवाच्या भवति। स्वरवर्णस्य साम्ये सति कोऽपि चमत्कारः न जायते। अत एव स्वरवर्णस्य साम्ये कश्चित् अलङ्कारः निर्दिष्टः नास्ति। परन्तु व्यञ्जनवर्णस्य साम्ये तु चमत्कारः भवति। अत एव अनुप्रासालङ्कारः निर्दिष्टः अस्ति। अत एव वर्णस्य वर्णसमूहस्य वा पौनःपुन्येन आवृत्तिः भवति चेत् अनुप्रासालङ्कारः उत्पद्यते। केवलं ध्वनिसाम्यं न अलङ्कारः भवति। परन्तु रसस्य, रसाभासस्य, भावस्य, भावाभासस्य च उपकारकत्वेन शब्दसाम्यं भवति चेत् अनुप्रासालङ्कारः उत्पद्यते।

अनुप्रासस्य भेदः-

अनुप्रासः पञ्चविधः भवति।

१. छेकानुप्रासः।

२. वृत्त्यनुप्रासः।

३. श्रुत्यनुप्रासः।

४. अन्त्यानुप्रासः।

५. लाटानुप्रासः।

छेकानुप्रासः -

लक्षणम्- अनुप्रासस्य अलङ्कारस्य एकः भागः छेकानुप्रासः अलङ्कारः। तस्य लक्षणं प्रोच्यते- " छेको व्यञ्जनसंघस्य सकृत्साम्यमनेकधा"इति।

अन्वयः - व्यञ्जनसङ्घस्य सकृत् अनेकधा साम्यं छेकः।

सामान्यार्थः - अनेकेषां व्यञ्जनवर्णानां स्वरूपतः क्रमतः च एकवारं सादृश्यं भवति चेत् छेकानुप्रासः अलङ्कारः उत्पद्यते। सङ्घः नाम बहूनां समूहः भवति। एकस्य द्वयोः वा वर्णयोः मेलनेन अनुप्रासः न भवति। यथा- धृतच्युताङ्कुरः इत्यत्र तकारद्वयस्य सादृश्ये अपि छेकानुप्रासः न भवति। छेकशब्दस्य सामान्यार्थः भवति रसिकः इति। रसिकजनस्य एव वाक्ये अयम् अलङ्कारः प्रयुक्तो भवति। अत एव छेकालङ्कारः इति नाम। अन्वर्थसंज्ञा इयम् अस्ति।

उदाहरणे लक्षणसमन्वयः - अस्य अलङ्कारस्य उदाहरणं तावत्-

"आदाय बकुलगन्धानन्धीकुर्वन्पदे पदे भ्रमरान्।

अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः॥" इति।

श्लोकार्थः - कावेर्याः जलस्पर्शेन पूतः बकुलस्य गन्धग्राही वायुः पदे पदे मोहग्रस्तं कृत्वा मन्दं मन्दम् अग्रे सरति।

अत्र गन्धान्धी इत्यत्र संयुक्तवर्णस्य न्ध इत्यस्य द्विरावृत्तिः संजाता। कावेरीवारि इत्यत्र वकारस्य रकारस्य च द्विरावृत्तिः अस्ति। पावनः पवनः इत्यत्र पकारस्य वकारस्य नकारस्य च द्विरावृत्तिः जाता। प्रकृतश्लोके स्वरूपतः क्रमतश्च उभयथा आवृत्तिः जाता। अत एव छेकानुप्रासः अलङ्कारः अस्ति।

वृत्त्यनुप्रासालङ्कारः

लक्षणम् - वृत्त्यनुप्रासालङ्कारस्य लक्षणम् उच्यते साहित्यदर्पणकारेण-

"अनेकस्यैकधा साम्यम् असकृद्वापि अनेकधा।
एकस्य सकृद् अप्येष वृत्त्यनुप्रास उच्यते॥" इति।

शब्दार्थः - काव्ये बहूनां व्यञ्जनानाम्, एकधा - केवलस्वरूपेण, असकृत् - पुनः पुनः, अनेकधा - स्वरूपानुसारेण क्रमानुसारेण च (वर्णस्य पौर्वापर्यानुसारेण), एकस्य – एकस्य व्यञ्जनस्य, सकृत् - एकवारम्, साम्यम् - सादृश्यम्, वृत्त्यनुप्रासः - वृत्त्यनुप्रासालङ्कारः, उच्यते - कथ्यते।

सामान्यार्थः - १) बहूनां व्यञ्जनानां स्वरूपतः एकवारम् एकाधिकवारम् वा आवृत्तिः भवति चेत् वृत्त्यनुप्रासालङ्कारः इति कथ्यते। २) व्यञ्जनानां स्वरूपतः क्रमतश्च पौनःपुन्येन आवृत्तिः भवति चेत् वृत्त्यनुप्रासालङ्कारः इति कथ्यते। ३) पुनश्च एकस्य व्यञ्जनवर्णस्य केवलम् एकवारम् आवृत्तिः भवति चेत् वृत्त्यनुप्रासालङ्कारः इति कथ्यते। ४) एकस्य वञ्जनवर्णस्य एकाधिकवारम् आवृत्तिः भवति चेत् वृत्त्यनुप्रासालङ्कारः इति कथ्यते।

उदाहरणे लक्षणसमन्वयः - अत्र उदाहरणं तावत्-

"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधाननक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥" इति।

श्लोकार्थः - चतुर्दिक् कुसुमसौरभेण विस्तृता अस्ति। तत्र कुसुमसौरभे भ्रमरः मधु लुब्धवान्। तेन भ्रमरेण आकम्पितः आम्रमुकुलः। तस्य समीपे कोकिलाः विचरन्ति। एतादृशानां कोकिलानां कण्ठरवेन कर्णसन्तापः उत्पद्यते। तादृशेषु वसन्तदिवसेषु प्रियतमायाः चिन्तायां मग्नः। एवञ्च प्राणसख्या दयितया सह मेलने उत्कण्ठिताः पथिकाः अत्यन्तं कष्टेन पन्थानम् अतिक्रामन्ति।

अत्र रसोल्लासैरमी इति पाठः अस्ति। अत्र रकारस्य सकारस्य च असकृत् सादृश्यम् अस्ति। अत्र साम्यं तु क्रमेण नास्ति। अपि तु पौर्वापर्यभेदेन अस्ति। यथा- रस इत्यत्र रकारात् परं सकारः अस्ति, सैर इत्यत्र सकारात् परं रकारः अस्ति। अत एव वृत्त्यनुप्रासालङ्कारः अस्ति। अत्र श्लोकस्य द्वितीयपादे ककारस्य लकारस्य क्रमतः स्वरूपस्य च असकृत् आवृत्तिः जाता। अत एव वृत्त्यनुप्रासालङ्कारः इति कथ्यते। प्रथमे पादे तकारस्य धकारस्य च असकृत् आवृत्तिः अस्ति। अत एव

वृत्त्यनुप्रासालङ्कारः वर्तते। कथं कथम् इत्यत्र बहूनां व्यञ्जनानाम् एकतया आवृत्तिः विद्यते। अत एव वृत्त्यनुप्रासालङ्कारः अस्ति।

श्रुत्यनुप्रासालङ्कारः

लक्षणम्- श्रुत्यनुप्रासालङ्कारस्य लक्षणं प्राह साहित्यदर्पणनामके ग्रन्थे कविराजः विश्वनाथः -

"उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते॥" इति।

अन्वयः - तालुरदादिके एकत्र स्थाने उच्चार्यत्वात् व्यञ्जनस्य एव यत् सादृश्यं तत् श्रुत्यनुप्रास उच्यते।

शब्दार्थः - एकत्र – एकस्मिन् एव स्थाने (उच्चारणस्थाने), तालुरदादिके - तालुदन्तादिके स्थाने, उच्चार्यत्वात् - उच्चारितत्वात्, व्यञ्जनस्यैव- केवलं व्यञ्जनवर्णस्य, सादृश्यम् - साम्यम्, श्रुत्यनुप्रासः - श्रुत्यनुप्रासपदवाच्यम्, उच्यते - कथ्यते।

सामान्यार्थः - तालुदन्तप्रभृतिभ्यः समोच्चारणस्थानेभ्यः उच्चारितानां व्यञ्जनवर्णानां यत् सादृश्यं भवति तत् श्रुत्यनुप्रासालङ्कारः इति कथ्यते।

उदाहरणे लक्षणसमन्वयः - अत्र श्रुत्यनुप्रासालङ्कारस्य उदाहरणं कथयति।

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः॥" इति।

श्लोकार्थः - शिवस्य दृष्टिपातेन मदनः भस्मीभूतः जातः। यस्याः दृष्ट्या भस्मीभूतः मदनः पुनः उज्जीवितः जातः। तस्याः त्रिनयनविजयिन्याः सुनयनायाः रमण्याः स्तुतिं कुर्मः।

जीवयन्ति, याः, जयिनीः इत्यत्र जकारस्य यकारस्य च एकाधिकवारं प्रयोगः अस्ति। द्वयोः वर्णयोः तालु उच्चारणस्थानम् अस्ति। "इचुयशानां तालु" इति। अत एव जकारयकारयोः तालु इति समानोच्चारणस्थानवशात् श्रुत्यनुप्रासः अलङ्कारः अस्ति।

पाठगतप्रश्नाः-२

अत्र केचित् पाठगतप्रश्नाः प्रदीयन्ते -

११. शब्दार्थालङ्कारे शब्दपरिवर्तनं शक्यम् अस्ति न वा।

१२. शब्दार्थालङ्कारस्य उदाहरणम् एकं लिखत।

१३. पुनरुक्तवदाभासालङ्कारस्य लक्षणं प्रतिपादयत।

१४. शब्दालङ्कारे शब्दस्य परिवर्तनं शक्यं न वा।

१५. शब्दालङ्कारस्य एकम् उदाहरणं लिखत।

१६. शब्दालङ्कारः वाक्यध्वनिः भवति न वा।

१७. अनुप्रासालङ्कारस्य लक्षणं लिखत।

१८. कतिविधः अनुप्रासालङ्कारः भवति।

१९. छेकानुप्रासस्य लक्षणं किम् अस्ति।

२०. छेकशब्दस्य अर्थः कः।

२१. वृत्त्यनुप्रासालङ्कारस्य लक्षणं किम् अस्ति।

२२. श्रुत्यनुप्रासालङ्कारस्य लक्षणं किम् अस्ति।

अन्त्यानुप्रासालङ्कारः

लक्षणम् - अन्त्यानुप्रासालङ्कारस्य लक्षणं कथयति साहित्यदर्पणग्रन्थे विश्वनाथः -

"व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत्॥" इति।

अन्वयः - यथावस्थं व्यञ्जनं चेत् आद्येन स्वरेण सह आवर्तते अन्त्ययोज्यत्वात् तत् अन्त्यानुप्रास उच्यते।

सामान्यार्थः - पदस्य पादस्य वा अन्ते स्थितः व्यञ्जनवर्णः, अनुस्वारेण विसर्गेण वा सह स्वरवर्णादिना युक्तः सन् यथा अवतिष्ठते। तथैव यथासम्भवं तस्य वर्णस्य आदिस्थितेन स्वरेण सह आवृत्तः भवति चेत् अन्त्यानुप्रासः अलङ्कारः भवति। पदस्य पादस्य अन्ते अलङ्कारः अयम् उत्पन्नः भवति। यथा –

केशः काशस्तबकविकासः कायः प्रकटितकरभविलासः।

चक्षुर्दग्धवराटककल्पं त्यजति नो चेतः काममनल्पम्।।

अत्र प्रथमपादस्य अन्त्ये आसः (विकासः) इति अस्ति। द्वितीयपादस्य अन्ते आसः (विलासः) इति अस्ति। एवञ्च तृतीयपादस्य अन्त्ये अल्पम् (कल्पम्)। चतुर्थपादस्य अन्त्ये अल्पम् इति अस्ति। अत एव आद्यस्वरेण सह यथावस्थितस्य व्यञ्जनस्य पुनः उच्चारणं जातम् अस्ति। अत एव अन्त्यानुप्रासालङ्कारः विद्यते। अस्मिन् श्लोके पादान्तः अन्त्यानुप्रासः विद्यते।

लाटानुप्रासः

लक्षणम् - लाटानुप्रासस्य लक्षणम् प्राह कविराजः विश्वनाथः -

"शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः।
लाटानुप्रास इत्युक्तः॥" इति

अन्वयः - तात्पर्यमात्रतः भेदे शब्दार्थयोः पौनरुक्त्यं स लाटानुप्रासः इति उक्तः अस्ति।

सामान्यार्थः - आपातमात्रेण शब्दस्य अर्थस्य च पुनरुक्तिः लक्षिता भवति। परन्तु वाक्यार्थबोधकाले तु अर्थभेदप्रतीतिः जायते, स लाटानुप्रासः भवति। पूर्वोक्तः वृत्त्यनुप्रासादिः

वर्णभित्तिकः अस्ति। अयं लाटानुप्रासः तु शब्दभित्तिकः अस्ति। शब्दगतसाम्यम् अस्मिन् अनुप्रासे दृश्यते। अत्र आपातमात्रेण अर्थस्य अपि साम्यं दृश्यते। परन्तु वाक्यार्थबोधकाले अर्थभेदस्तु जायते।

उदाहरणे लक्षणसमन्वयः - अत्र उदाहरणं तावत् -

"धन्यः स एव तरुणो नयने तस्यैव नयने।
युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी॥" इति।

श्लोकार्थः - युवजनानां सम्मोहनकारिणी विद्यास्वरूपिणी इयं कन्या यस्य सकाशे तिष्ठति। स तरुणः धन्यः भवति। तस्य नयनम् एव नयनम् (सार्थकम्) अस्ति।

अत्र नयनशब्दस्य आवृत्तिः कृता अस्ति। आपातमात्रेण भिन्नार्थत्वम् नास्ति। किन्तु वाक्यार्थबोधकाले अन्तिमनयनशब्दस्य तु सार्थकम् इति अर्थः अस्ति। अत्र आपातदृष्ट्या आवृत्तस्य नयनशब्दस्य समानः अर्थः अस्ति। परन्तु सम्यग्तया पर्यालोचनेन ज्ञायते यत् द्वयोः शब्दयोः भिन्नार्थत्वम् अस्ति इति लक्षणसमन्वयः।

यमकालङ्कारः

लक्षणम् - यमकालङ्कारस्य लक्षणं प्राह विश्वनाथः -

"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिः यमकं विनिगद्यते॥" इति।

अन्वयः - अर्थे सति पृथगर्थायाः स्वरव्यञ्जनसंहतेः तेन क्रमेण एव आवृत्तिः यमकं विनिगद्यते।

सामान्यार्थः - अर्थस्य विद्यमाने सति भिन्नार्थविशिष्टतया, अर्थस्य अविद्यमाने सति निरर्थकतया स्वरव्यञ्जनवर्णानाम् एकवारम् उच्चारणात् परं पूर्वक्रमानुसारेण पुनरुच्चारितः भवति चेत् यमकालङ्कारः भवति। अस्मिन् अलङ्कारे कुत्रचित् कुत्रचित् उच्चारितयोः पदयोः अर्थः तिष्ठति, कुत्रचित् कुत्रचित् अर्थः नास्ति, कुत्रचित् एकं पदम् अर्थवत् अपरं च निरर्थकम् अस्ति। अत एव सत्यर्थे इति पदं प्रयुक्तम् अस्ति। अस्मिन् अलङ्कारे कुत्रचित् एकदेशस्थितानां वर्णानाम्, कुत्रचित् पादस्थितवर्णानाम्, कुत्रचित् श्लोकार्धस्थितवर्णानाम् आवृत्तिः भवति।

उदाहरणेन साकं लक्षणसमन्वयः - अत्र उदाहरणं तावत् -

"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोहरैः॥" इति।

श्लोकार्थः - श्रीकृष्णः सम्मुखे पुष्पसमृद्धं सुरभिं वसन्तकालं दृष्टवान्। अस्मिन् वसन्ते पलाशवृक्षसमूहः नवीनपत्रेण सुसज्जितः अस्ति। विकसितं कमलं परागेण आकीर्णम् अस्ति। रौद्रस्य उत्तापेन सुकुमारः लताग्रभागः क्लान्तः अस्ति।

अस्मिन् श्लोके पलाशः, सुरभिः इति द्वयोः शब्दयोः आवृत्तिः जाता। भिन्नार्थकतया द्विरावृत्तिः जाता। अत्र प्रथमपलाशशब्दस्य पत्रम् इत्यर्थः, द्वितीयपलाशशब्दस्य पलाशवृक्षविशेषः इत्यर्थः। पुनश्च प्रथमसुरभिशब्दस्य सुगन्धः इत्यर्थः अस्ति। एवञ्च द्वितीयसुरभिशब्दस्य वसन्तकालः इत्यर्थः।

भिन्नार्थविशिष्टतया पलाश – सुरभि इति शब्दयोः आवृत्तिः जाता। लतान्त, पराग इति शब्दयोः पुनरावृत्तिः जाता। अस्मिन् श्लोके प्रथमः लतान्तशब्दः अन्तिमः परागशब्दः निरर्थकश्च अस्ति। अत एव अस्मिन् श्लोके यमकालङ्कारः विद्यते।

वक्रोक्त्यलङ्कारः

लक्षणम् - वक्रोक्त्यलङ्कारस्य लक्षणं प्राह विश्वनाथः साहित्यदर्पणे-

"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेत् यदि।

अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिः ततो द्विधा॥" इति।

अन्वयः - अन्यस्य अन्यार्थकं वाक्यम् अन्यः यदि श्लेषेण काक्वा वा अन्यथा योजयेत् तदा सा वक्रोक्तिः नाम अलङ्कारः स्यात्।

सामान्यार्थः - वाक्ये कञ्चित् अर्थम् उद्दिश्य वक्ता किञ्चित् वाक्यं वक्ति। परन्तु श्रोता वाक्यम् इदं श्रुत्वा श्लेषेण काक्वा वा भिन्नम् अर्थं गृह्णाति। तदा वक्रोक्तिः भवति। अर्थात् वक्तुः इष्टम् अर्थं परित्यज्य श्लेषेण काक्वा वा कञ्चित् भिन्नम् अर्थं गृह्णाति।

वक्रोक्तिः द्विविधा भवति। यथा श्लेषवक्रोक्तिः काकुवक्रोक्तिः चेति। श्लेषेण अर्थात् अनेकार्थस्य सहायेन या वक्रोक्तिः सा श्लेषवक्रोक्तिः। काक्वा अर्थात् स्वरादिविकृतेन या वक्रोक्तिः सा काकुवक्रोक्तिः अस्ति।

उदाहरणेन साकं लक्षणसमन्वयः - श्लेषवक्रोक्तेः उदाहरणम् -

"के यूयं, स्थल एव सम्प्रति वयम्, प्रश्नो विशेषाश्रयः,

किं ब्रूते विहगः, स वा फणिपतिर्यत्रास्ति सुप्तो हरिः॥" इति।

के यूयम् इति वक्ता प्रश्नम् अकरोत्। परन्तु श्रोता क इति शब्दस्य जलम् इति अर्थं गृह्णाति। यतो हि प्रश्नवाचकः जलवाचकः च कशब्दः अस्ति। जलवाचकस्य कशब्दस्य सप्तम्याः एकवचने के इति रूपम्। तदा श्रोता कथयति स्थले एव सम्प्रति वयम्। वक्ता अवगतवान् यत् श्रोता मम वाक्यस्य अर्थं न ज्ञातवान्। वक्ता स्पष्टतया कथयति यत् प्रश्नो विशेषाश्रयः इति। अर्थात् प्रश्नवाचकं कशब्दं स्वीकृत्य मम प्रश्नः अस्ति। श्रोता विशेषशब्दं भङ्क्त्वा श्लेषेण अर्थं प्रतिपादयति। विशब्दस्य पक्षी इति अर्थः, शेषः इति शब्दस्य सर्पः इत्यर्थः अस्ति। श्रोता श्लेषेण प्रश्नस्य अर्थम् अवगम्य उत्तरति यत् किं ब्रूते विहगः स वा फणिपतिः यत्र अस्ति सुप्तः हरिः। इति श्लेषवक्रोक्तेः उदाहरणम् अस्ति।

काकुवक्रोक्तेः उदाहरणं तावत् -

"काले कोकिलवाचाले सहकारमनोहरे।

कृतागसः परित्यागात् तस्याः चेतो न दूयते॥" इति

श्लोकार्थः - कोकिलः यदा वाचालः, आम्रमुकुलं यदा विकसितम्। तस्मिन् वसन्तकाले कृतापराधं पतिं त्यक्त्वा सख्याः चित्तं दुःखग्रस्तं न भवति इति सामान्यार्थः।

परन्तु काक्वा विपरीतः अर्थः आयाति। वसन्तकाले कोकिलः यदा उन्मत्तः,यदा आम्रमुकुलं विकसितम् अस्ति। तस्मिन् वसन्तकाले प्रियेण साकं प्रियतमायाः आलिङ्गने अत्यन्तम् आग्रहः भवति।

वसन्तकाले प्रियः कदापि अपराधं करोति चेत् अपि प्रियतमा तं प्रियं न त्यजति। अर्थात् वसन्तकाले प्रियविरहे प्रियतमायाः अत्यन्तं दुःखं भवति। अस्मिन् श्लोके किम् इति प्रश्नसूचकं पदम् अस्ति इति चिन्तयित्वा भिन्नस्वरेण श्लोकः अयं वक्तव्यः अस्ति।

श्लेषः नाम श्लिष्टैः पदैः अनेकार्थाभिधाने श्लेष इष्यते। अर्थात् अनेकार्थवाचकं पदं श्लिष्टपदम् अस्ति। एकवारम् उच्चारितं पदम् अनेकार्थस्य वाचकं भवति। अयञ्च श्लेषालङ्कारः अष्टविधः भवति। यथा- वर्णगतः, प्रत्ययगतः, लिङ्गगतः, प्रकृतिगतः, पदगतः, विभक्तिगतः, वचनगतः, भाषागतः च इति। साहित्यदर्पणे कविराजः विश्वनाथः कारिकाम् आह-

"श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।
वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि॥
श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः।" इति।

विश्वनाथः साहित्यदर्पणे अष्टौ भेदाः श्लेषालङ्कारान् प्रतिपादितवान्। प्रत्येकस्य उदाहरणपूर्वकम् आलोचनं कृतम् अस्ति। परन्तु अत्र सामान्यतया केवलं श्लेषालङ्कारस्य विषये चर्चा विहिता अस्ति।

पाठगतप्रश्नाः-३

अत्र अधः केचित् पाठगतप्रश्नाः प्रदीयन्ते -

२३. अन्त्यानुप्रासालङ्कारस्य लक्षणं किम् अस्ति।

२४. लाटानुप्रासालङ्कारस्य लक्षणं लिखत।

२५. यमकालङ्कारस्य लक्षणं लिखत।

२६. वक्रोक्त्यलङ्कारस्य लक्षणं लिखत।

२७. वक्रोक्तिः कतिविधा भवति।

२८. श्लेषः नाम कः।

२९. श्लेषालङ्कारः कतिविधः।

पाठसारः

पाठे अस्मिन् शब्दार्थमयस्य काव्यशरीरस्य शोभाकरान् अलङ्कारान् प्रतिपदितवान्। मूलतया अलङ्कारः त्रिविधः भवति। १) शब्दार्थालङ्कारः, २) शब्दालङ्कारः, ३) अर्थालङ्कारः इति। तत्र शब्दार्थालङ्कारे शब्दस्य अर्थस्य च प्राधान्यं भवति। शब्दालङ्कारे शब्दस्य एव प्राधान्यं भवति। अर्थालङ्कारे अर्थस्य प्राधान्यं भवति। काव्यमार्गे पुनरुक्तवदाभासनामकः एकः एव शब्दार्थालङ्कारः दृश्यते। अनुप्रासयमकवक्रोक्त्यादयः शब्दालङ्काराः भवन्ति। तत्रापि अनुप्रासालङ्कारः पञ्चविधः भवति। यथा- १)

छेकानुप्रासः, २) वृत्त्यनुप्रासः, ३) श्रुत्यनुप्रासः, ४) अन्त्यानुप्रासः, ५) लाटानुप्रासः च इति। पञ्चविधानाम् अनुप्रासालङ्काराणां लक्षणपूर्वकं उदाहरणानि प्रोक्तानि। वक्रोक्त्यलङ्कारः अपि द्विधा भवति। यथा - १)श्लेषवक्रोक्तिः, २) काकुवक्रोक्तिः चेति। काकुः नाम भिन्नकण्ठध्वनिना कथनम्। श्लेषः नाम श्लिष्टैः पदैः अनेकार्थाभिधाने श्लेष इष्यते। अर्थात् अनेकार्थवाचकं पदं श्लिष्टपदम् अस्ति। एकवारम् उच्चारितं पदम् अनेकार्थस्य वाचकं भवति। अयञ्च श्लेषालङ्कारः अष्टविधः भवति। एवञ्च वाक्ये अलङ्कारः अस्ति चेत् एव तत् काव्यं सुन्दरम् भवति। सौन्दर्यम् एव अलङ्कारः भवति। वामनेन प्रोक्तम् अस्ति - "काव्यं ग्राह्यमलङ्कारात्"इति। यथा लोके अलङ्काराः अङ्गादीनां शोभां वर्धयन्तः शरीरिणम् उपकुर्वन्ति तथैव शास्त्रे अपि अलङ्काराः शब्दार्थानां शोभां वर्धयन्तः रसादीन् उपकुर्वन्ति।

पाठान्तप्रश्नाः

१. अलङ्कारस्य विषये लघुप्रबन्धं लिखत।

२. अलङ्कारस्य लक्षणं लिखत।

३. अलङ्कारस्य प्रयोजनं लिखत।

४. अलङ्कारस्य प्रभेदान् विलिख्य तत्सम्बन्धिविचारः क्रियताम्।

५. पुनरुक्तवदाभासालङ्कारं वर्णयत।

६. शब्दालङ्कारस्य विषये लघुप्रबन्धं लिखत।

७. अनुप्रासालङ्कारस्य भेदान् प्रदर्श्य तद्विषये लघुप्रबन्धं लिखत।

८. छेकानुप्रासालङ्कारान् वर्णयत।

९. वृत्त्यनुप्रासालङ्कारान् वर्णयत।

१०. श्रुत्यनुप्रासालङ्कारान् वर्णयत।

११. अन्त्यानुप्रासालङ्कारान् वर्णयत।

१२. लाटानुप्रासालङ्कारान् वर्णयत।

१३. यमकालङ्कारान् प्रतिपादयत।

१४. वक्रोक्त्यलङ्कारान् वर्णयत।

पाठगतप्रश्नानाम् उत्तराणि

१. अलङ्कृतिः अलङ्कारः।

२. अलङ्क्रियते अनेन।

३. काव्यशोभाकरान् धर्मान् अलंकारान् प्रचक्षते।

४. द्विविधः।

५. अनुप्रासालङ्कारः।

६. उपमालङ्कारः।

७. भामहस्य।

८. अलङ्कारः।

९. उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥

१०. शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥

११. शक्यम्।

१२. पुनरुक्तवदाभासालङ्कारः।

१३. आपाततो यदर्थस्य पौनरुक्त्यावभासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥

१४. शक्यं नास्ति।

१५. अनुप्रासालङ्कारः।

१६. वाक्यध्वनिः भवति।

१७. अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।

१८. पञ्चविधः।

१९. "छेको व्यञ्जनसंघस्य सकृत्साम्यमनेकधा" इति।

२०. रसिकः।

२१. अनेकस्यैकधा साम्यम् असकृद्वापि अनेकधा।
एकस्य सकृद् अप्येष वृत्त्यनुप्रास उच्यते॥ इति

२२. उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते॥

२३. व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत्॥

२४. शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः।
लाटानुप्रास इत्युक्तः॥

२५. सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिः यमकं विनिगद्यते॥

२६. अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेत् यदि।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिः ततो द्विधा॥

२७. द्विविधा।

२८. श्लिष्टैः पदैः अनेकार्थाभिधाने श्लेष इष्यते।

२९. अष्टविधः।

॥ इति पञ्चविंशः पाठः ॥

348sk26

२६

अर्थालङ्कारः

प्रस्तावना

पूर्वतने पाठे शब्दालङ्कारः निरूपितः आसीत्। सम्प्रति अर्थालङ्कारं निरूपयितुं प्रकरणम् इदम् आरभ्यते। अस्माभिः पूर्वतने पाठे सौन्दर्यम् अलङ्कारः इति तु पठितम्। कः अलंक्रियते। शब्दः अर्थो वा। तदद्वारा काव्यात्मा रसः। अलंकारः कुत्र स्थितः। शब्दार्थयोः। सालंकारस्य काव्यता इति कुन्तकः। अतो यथा केयूरहारादयः शरीरसौन्दर्यजननद्वारा। पर्यन्ते आत्मनः सौन्दर्यं वर्धयन्ति तथा काव्यशरीरभूतयोः शब्दार्थयोः सौन्दर्यमुत्पादयन्तः तद्द्वारा काव्यात्मानं रसं परिपुष्णन्ति। परमार्थतः उक्तिवैचित्र्यं अलंकारः। किमर्थम् उक्तिवैचित्र्यम्। काव्ये लोकोत्तररमणीयत्वनिष्पत्तये। अथवा रसपोषणायेति स्वीकुर्वन्तु। शब्दवैचित्र्येण अर्थवैचित्र्येण च अलंकारः द्विविधः इति नयः। उभयालंकारः तृतीयोऽपि भवतीति केचित्। अर्थालङ्कारे अर्थस्य प्राधान्यं दृश्यते। यतो हि अर्थवशात् एव काव्ये लोकोत्तरचमत्कारः उत्पद्यते। तेन काव्यम् इदम् अत्यन्तं रमणीयं भवति। तत्रापि बहुविधः अर्थालङ्कारः विद्यते। तेषु अर्थालङ्कारेषु सादृश्यघटितस्य उपमालङ्कारस्य आदौ विचारः क्रियते। यतो हि अर्थालङ्कारेषु सादृश्यमूलकस्य अलङ्कारस्य च प्राधान्यात् तेषाम् अपि उपजीव्यत्वेन प्रथमम् उपमालङ्कारम् कथयति इति विश्वनाथमतम्। पुनश्च उपमालङ्कारः विशेषसौन्दर्यजनकः अस्ति। साहित्यादिषु उपमालङ्कारस्य बहु प्रयोगः अस्ति। पुनश्च उपमालङ्कारः अत्यन्तं प्राचीनः भवति। अत एव उपमालङ्कारं प्रथमं वर्णयित्वा ततः अन्येषाम् अर्थालङ्काराणां विवरणं कुर्मः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् भवती वा -

- अर्थालङ्कारस्य लक्षणं ज्ञातुं प्रभवेत्।
- अर्थालङ्कारस्य उदाहरणानि ज्ञातुं प्रभवेत्।
- अर्थालङ्कारस्य वैशिष्ट्यानि ज्ञातुं प्रभवेत्।
- उपमालङ्कारस्य सुविस्तरं ज्ञानं प्राप्तुं शक्नुयात्।
- श्लोकादौ अर्थालङ्कारस्य निर्णयं कर्तुं शक्नुयात्।
- स्वयमपि अर्थालङ्कारेण श्लोकनिर्माणं कर्तुं योग्यो भवेत्।
- उदाहरणे अर्थालङ्कारस्य लक्षणसमन्वयः कथं कार्यः इति ज्ञातुं प्रभवेत्।

२६.१) अर्थालङ्कारः

अर्थचमत्कृतिम् अवलम्ब्य स्वीक्रियते अर्थालङ्कारः। अर्थात् यस्मिन् अलङ्कारे अर्थम् आश्रित्य काचित् चमत्कृतिः भवति चेत् स अर्थालङ्कारः इति कथ्यते। अर्थालङ्कारे समार्थकशब्दः परिवर्त्यते चेत् अपि अलङ्कारः तथैव स्थिरतया तिष्ठति। अर्थात् अर्थालङ्कारे समार्थकस्य शब्दस्य प्रयोगः शक्यः अस्ति। परन्तु अर्थालङ्कारे अर्थस्य एव प्राधान्यता तिष्ठति। अर्थालङ्कारे अर्थस्य तु परिवर्तनं कदापि न शक्यम् अस्ति। उपमारूपकादयः अर्थालङ्काराः भवन्ति।

वैशिष्ट्यानि - अत्र अर्थालङ्कारस्य वैशिष्ट्यानि कथ्यन्ते। तथाहि -

१. अर्थालङ्कारे समार्थकशब्दस्य प्रयोगः शक्यः अस्ति।
२. अर्थालङ्कारे शब्दपरिवर्तनं शक्यम् अस्ति।
३. अर्थालङ्कारे अर्थपरिवर्तनं शक्यम् न अस्ति।
४. अर्थालङ्कारस्य उदाहरणं भवति -उपमारूपकादयः।

२६.२) उपमालङ्कारः

साहित्यदर्पणनामके ग्रन्थे ग्रन्थकारः विश्वनाथः आदौ उपमालङ्कारं विवृणोति, अतिप्राचीनत्वात् प्रचुरप्रयोगात् च। उपमालङ्कारस्य लक्षणं प्राह-

"साम्यं वाच्यमवैधर्म्यं वाक्यैक्य (ये) उपमा द्वयोः"॥ इति।

अन्वयः - वाक्यैक्ये द्वयोः अवैधर्म्यं वाच्यं साम्यम् उपमा अलङ्कारः।

शब्दार्थः - वाक्यैक्ये - एकस्मिन् वाक्ये, द्वयोः - उपमानोपमेययोः, अवैधर्म्यम् - विरुद्धधर्मरहितम्, वाच्यम् - कथितम्, साम्यम् - सादृश्यम्, उपमा - उपमालङ्कारः।

सामान्यार्थः - विजातीयवस्तुनोः विरुद्धधर्मम् अनुक्त्वा यदि गुणक्रियागतसादृश्यम् इवादिशब्देन प्रतिपादितं स्यात्, स उपमालङ्कारः भवति। साधारणतया द्वयोः वस्तुनोः मध्ये साधर्म्यं वैधर्म्यं च तिष्ठति। द्वयोः वस्तुनोः वैधर्म्यम् अनुक्त्वा इवादिशब्देन सादृश्यं कथ्यते। तत् च सादृश्यं गुणक्रियादिगतं भवति। अर्थात् उपमानोपमेययोः विजातीयवस्तुनोः मध्ये कस्यचित् सादृश्यस्य कल्पना क्रियते। तत्र उपमालङ्कारः भवति। एवञ्च इवादिशब्देन सादृश्यस्य स्पष्टतया प्रतीतिः भवति। द्वयोः वस्तुनोः मध्ये विरुद्धस्य धर्मस्य उल्लेखः न स्यात्। साम्यं साधारणधर्मसम्बन्धरूपसादृश्यम् उपमा नाम अलङ्कारः इति। उपमानोपमेयरूपेण कल्पितयोः द्वयोः पदार्थयोः समानधर्मेण साधर्म्यं साम्यं वा निरूप्यते। साम्यं साधर्म्यं गुणक्रियादिरूपम्। उपमानोपमेयोभयगतः धर्मः सधर्मः इति।

उदाहरणे लक्षणसमन्वयः - चन्द्र इव मुखं सुन्दरम् इति उदाहरणम् अस्ति। चन्द्रः मुखं च इति सम्पूर्णं भिन्नं वस्तुद्वयम् अस्ति। सौन्दर्यत्वम् आह्लादकत्वं च चन्द्रे मुखे च वर्तते। सौन्दर्यत्वादिगुणेन चन्द्रमुखयोः सादृश्यम् उक्तम् अस्ति। पुनश्च इवादिशब्देन चन्द्रमुखयोः सादृश्यं स्पष्टम् उक्तम् अस्ति इति लक्षणसमन्वयः। अतः प्रकृतवाक्ये उपमालङ्कारः विद्यते।

स च उपमालङ्कारः द्विविधः भवति। यथा - १) पूर्णोपमा, २) लुप्तोपमा।

२६.२.१) पूर्णोपमा

लक्षणम् - पूर्णोपमायाः लक्षणम् आह-

"सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च।

उपमेयं चोपमानं भवेत् वाच्यम्"॥ इति।

अन्वयः - यदि सामान्यधर्मः औपम्यवाचिशब्दः उपमेयं उपमानं च भवेत् सा पूर्णा उपमा इति वाच्यम्।

सामान्यार्थः - यस्मिन् उपमालङ्कारे सामान्यधर्मः, औपम्यवाचिशब्दः, उपमेयम्, उपमानम् भवेत् चेत् सा पूर्णोपमा इति वक्तव्यम्। पूर्णोपमायाः चत्वारि अङ्गानि सन्ति। तानि च – १) उपमेयम्, २) उपमानम्, ३) साधारणधर्मः, ४) सादृश्यवाचकशब्दः।

उदाहरणे लक्षणसमन्वयः - पूर्णोपमायाः लक्षणं भवति- कमलम् इव मुखं मनोज्ञम्। अर्थात् पद्मसदृशं सुन्दरं मुखम् इति वाक्यार्थः। अत्र उपमेये उपमाने च मनोज्ञत्वधर्मः विद्यते। अत एव मनोज्ञं साधारणधर्मः अस्ति। पुनश्च इवशब्देन कमलमुखयोः सादृश्यं स्पष्टतया प्रतीतिः भवति। अतः इवशब्दः औपम्यवाचकशब्दः। मुखम् उपमीयते (सदृशीक्रियते)। अतः मुखम् उपमेयम्। उपमीयते (सदृशीक्रियते) येन (कमलेन)। अतः कमलम् उपमानम् अस्ति। अस्मिन् अलङ्कारे चतुर्णाम् स्थितिः वर्तते। अत एव पूर्णोपमा इति उच्यते।

पूर्णोपमायाः पुनः द्विविधः भेदः अस्ति। ते च श्रौती आर्थी इति।

२६.२.२) लुप्तोपमा

लुप्ता उपमा यत्र सा लुप्तोपमा। अत्र उपमाशब्देन उपमाघटकपदार्थानां (उपमानोपमेयादीनाम्) ग्रहणं भवति। लुप्तः नाम अनुल्लिखितः। चतुर्षु उपमाघटकपदार्थेषु एकस्य द्वयोः त्रयाणां वा अनुल्लेखः स्यात्। लुप्तोपमायाः लक्षणम् -

"लुप्ता सामान्यधर्मादेः एकस्य यदि वा द्वयोः।

त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्॥"इति।

अन्वयः - यदि सामान्यधर्मादेः एकस्य द्वयोः त्रयाणां वा अनुपादाने लुप्ता। सापि पूर्ववत् श्रौत्यार्थी

सामान्यार्थः - सामान्यधर्मः, उपमेयम्, उपमानम्, औपम्यवाचकशब्दः इति एतेषु एकस्य द्वयोः त्रयाणां वा अनुपादानं भवति चेत् सा लुप्तोपमा इति कथ्यते। अर्थात् उपमायाः चतुर्ष्वंगेषु कस्यापि एकस्य, द्वयोः उत वा त्रयाणां अंगानां वा लोपः यत्र भवति चेत् सा लुप्तोपमा इति मन्तव्यम्। सा लुप्तोपमा द्विविधा भवति। ते च श्रौती, आर्थी इति। पूर्ववत् इत्यस्य अर्थस्तु पूर्णोपमावत् लुप्तोपमा अपि श्रौत्यार्थीभेदेन द्विविधा इति।

उदाहरणे लक्षणसमन्वयः - मुखं चन्द्र इव इति लुप्तोपमायाः उदाहरणम् अस्ति। यतो हि प्रकृते मुखचन्द्रयोः सादृश्ये मनोज्ञत्वम् एव कारणम्। उभयत्र मनोज्ञत्वम् अस्ति। प्रकृतोदाहरणे मनोज्ञत्वरूपः साधारणधर्मः नास्ति। अतः लुप्तोपमायाः उदाहरणम्। चन्द्र इव मनोज्ञम् इति वाक्ये मुखस्य उल्लेखः नास्ति। मुखम् उपमीयते। अतः उपमेयं मुखम्। प्रकृतवाक्ये उपमेयस्य अनुल्लेखः वर्तते। अतः लुप्तोपमायाः उदाहरणम् इदम् अस्ति।

२६.३) अनन्वयालङ्कारः

लक्षणम् - साहित्यदर्पणे अनन्वयालङ्कारस्य लक्षणं कथयति -

"उपमानोपमेयत्वम् एकस्यैव तु अनन्वयः"इति।

सामान्यार्थः - एकम् एव वस्तु युगपत् उपमेयत्वेन उपमानत्वेन च कल्पितं भवति चेत् स अनन्वयालङ्कारः भवति। अर्थात् उपमेयोपमानभावः एकवाक्यगतो भवति चेत् अनन्वयालङ्कारः भवति। यदि अनेकवाक्यगतः उपमेयोपमानभावः भवति तर्हि रसनोपमा उपमेयोपमा वा भवति। यथा - "चन्द्रायते शुक्लरुचापि हंसः" इति स्थले रसनोपमा वर्तते। पुनश्च "कमलेव मतिः मतिरिव कमला" इति स्थले उपमेयोपमा भवति। अत एव अनन्वयः एकवाक्यगतविषयः भवति इति तु अर्थतः सिद्धम्।

उदाहरणे लक्षणसमन्वयः - अत्र अनन्वयालङ्कारस्य उदाहरणं कथयति -

"राजीवमिव राजीवं जलं जलमिवाजनि।

चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे॥" इति।

श्लोकार्थः - शरतः आविर्भावे कमलं कमलवत्, जलं जलवत्, चन्द्रः चन्द्रवत्, निर्मलभावं धारयति।

राजीवम्, जलम्, चन्द्रश्च इति त्रीणि एव युगपत् उपमेयानि उपमानानि च भवन्ति। अर्थात् राजीवादिकम् उपमानम् उपमेयञ्च उभयम् अस्ति। अत्र राजीवादिरूपे एकस्मिन् वस्तुनि उपमेयोपमानभावकल्पना वर्तते इति लक्षणसमन्वयः। अनन्वयालङ्कारः सादृश्यमूलकालङ्कारः भवति। अयम् एव एकः अलङ्कारः वाक्यस्य सादृश्यमूलकः अलङ्कारः।

सादृश्यम् सर्वदा द्वयोः वस्तुनोः मध्ये सम्भवम् अस्ति। प्रकृते अनन्वयालङ्कारे एकम् एव वस्तु उपमानम् उपमेयञ्च अस्ति। अनन्वये द्वयोः वस्तुनोः अभावात् कथं सादृश्यमूलकः अलङ्कारः भवति।

अत्र समाधानं प्रदीयते यत् यद्यपि वस्तुदृष्ट्या उपमेयस्य उपमानत्वम्, उपमानस्य उपमेयत्वं न कदापि सम्भवम् अस्ति। तथापि कविकल्पनायां तत् सम्भवम् अस्ति। दृष्टिभेदे एकम् एव वस्तु एकवारम् उपमानत्वेन एकवारम् उपमेयत्वेन च ग्रहणं भवति।

२६.४) रूपकालङ्कारः

लक्षणम् - अलङ्कारनभसि रूपकालङ्कारः अत्यन्तं सुप्रसिद्धः वर्तते। कविराजः विश्वनाथः स्वकीये साहित्यदर्पणनामके ग्रन्थे रूपकालङ्कारस्य लक्षणं कथयति - "रूपकं रूपितारोपे विषये निरपह्नवे" इति।

अन्वयः - निरपह्नवे विषये रूपितारोपे रूपकं (अलङ्कारः) स्यात्।

शब्दार्थः - निरपह्नवे विषये - निषेधरहिते विषये, रूपितारोपे - उपमानपदार्थस्य तादात्म्ये अभेदे वा, रूपकम् - रूपकालङ्कारः स्यात्।

सामान्यार्थः - निषेधरहिते विषये उपमेये रूपितस्य उपमानपदार्थस्य आरोपः (अभेदतत्त्वेन प्रतीतिः) एव रूपकालङ्कारः। तात्पर्यं भवति - निषेधरहिते उपमेये उपमानेन साकम् उपमानपदार्थस्य अभेदकल्पना, स रूपकालङ्कारः भवति। उपमेयस्य उपमानात्मना प्रतीतिः भवति। उपमेयस्य उपमानेन साकम् अभेदप्रतीतिः जायते। अर्थात् विषयस्य उपरि विषयिणः अभेदारोपः क्रियते। अर्थात् उपमेयस्य उपरि उपमानस्य अभेदारोपः भवति। यथावस्थिते उपमेये उपमानस्य अभेदारोपः रूपकम् इत्यर्थः। रूपकम् उपमानोपमेययोः अभेदारोपं करोति। रूपयति अर्थात् अभेदारोपं करोति इति रूपकम्। विजातीयवस्तुनोः अत्यन्तं सादृश्यवशात् अभेदकल्पना सम्भवति। अत्र अत्यन्तं सादृश्यवशात् अभेदकल्पना जायते।

उदाहरणेन साकं लक्षणसमन्वयः - मुखचन्द्रः भाति इति रूपकालङ्कारस्य उदाहरणं भवति। अत्र उपमेयः निषेधरहितः अस्ति। उपमेयस्य (मुखस्य) उपमानेन (चन्द्रेण) साकम् अभेदकल्पना क्रियते। अत्र उपमेयस्य मुखस्य उपमानचन्द्रात्मना (चन्द्रत्वेन) प्रतीतिः भवति। मुखेन साकं चन्द्रस्य अभेदारोपः क्रियते। एतेन चन्द्राभिन्नं मुखं भाति। अत्र उपमेयस्य चन्द्रस्य उपमानेन चन्द्रेण साकम् अभेदारोपः भवति। प्रकृते अपि मुखचन्द्रयोः अत्यन्तं सादृश्यम् अस्ति। अत एव मुखचन्द्रयोः अभेदकल्पना जायते। अत एव रूपकालङ्कारः इति उच्यते।

पाठगतप्रश्नाः-४

अत्र केचित् अधः प्रश्नाः प्रदीयन्ते -

१. अर्थालङ्कारः कः।

२. अर्थालङ्कारस्य एकम् उदाहरणं कथयतु।

३. अर्थालङ्कारस्य एकं वैशिष्ट्यं लिखत।

४. उपमालङ्कारस्य लक्षणं लिखत।

५. उपमालङ्कारः कतिविधः।

६. पूर्णोपमायाः लक्षणं लिखत।

७. लुप्तोपमायाः लक्षणं लिखत।

८. अनन्वयालङ्कारस्य लक्षणं लिखत।

९. रूपकालङ्कारस्य लक्षणं लिखत।

१०. पूर्णोपमायाः चत्वारि अङ्गानि कानि सन्ति।

११. लुप्तोपमा कतिविधा भवति।

२६.५) उत्प्रेक्षालङ्कारः

सादृश्यमूलकः अलङ्कारः अयम्। काव्यमार्गे उत्पेक्षालङ्कारः कविजनस्य सकाशे अत्यन्तं प्रियः भवति। अलङ्कारशेखरे प्रोक्तम् - उत्प्रेक्षालङ्कारः एव श्रेष्ठः अलङ्कारः भवति। पुनश्च नववध्वाः हास्यवत् मनोरमः अयम् उत्प्रेक्षालङ्कारः।

लक्षणम् - साहित्यदर्पणे उत्प्रेक्षालङ्कारस्य लक्षणं प्रोक्तम् -

"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"इति।

अन्वयः - प्रकृतस्य परात्मना सम्भावना उत्प्रेक्षा भवेत्।

शब्दार्थः - प्रकृतस्य – उपमेयपदार्थस्य, परात्मना - उपमानपदार्थरूपेण, सम्भावना - संशयः, उत्प्रेक्षा - उत्प्रेक्षालङ्कारः स्यात्।

सामान्यार्थः - प्रकृतस्य (उपमेयस्य) परात्मना (उपमानात्मना) सम्भावना उत्प्रेक्षालङ्कारः इत्यर्थः। उपमेयस्य उपमानतादात्म्येन सम्भावनम् उत्प्रेक्षा इति भावः। अत्यन्तं सादृश्यवशात् उपमेयम् उपमानत्वेन आशङ्कते चेत् उत्प्रेक्षालङ्कारः भवति। उत्प्रेक्षा इत्यत्र उत् इत्यस्य ऊर्ध्वगामिनी, प्रेक्षा इत्यस्य दृष्टिः इत्यर्थः। यस्य कस्यचित् वस्तुनः भावनाकाले भावनाकारिणः दृष्टिः अत्यन्तम् ऊर्द्धगामिनी भवति। अत एव उत्प्रेक्षालङ्कारः इति नाम।

उपमेयोपमानयोः अत्यन्तं सादृश्यम् उत्प्रेक्षाघटकम् अस्ति। तथापि उपमेयोपमानयोः भेदज्ञानं तिरोहितं न भवति। भेदज्ञाने सत्यपि अभेदतया वर्णयितुम् अधिकतया कविः इच्छति। सम्भावनाशब्दस्य संशयः इति अर्थः भवति। तथापि शुद्धसंशयः न गृह्यते। स्थाणुर्वा पुरुषो वा इति ज्ञानं तु शुद्धसंशयात्मकं ज्ञानम्। अत्र स्थाणुरेव अयम् इति निश्चयात्मकं ज्ञानं तु सम्भावना पदवाच्या भवति।

उत्प्रेक्षालङ्कारस्य वैशिष्ट्यम्-

१. उपमावत् उत्प्रेक्षालङ्कारे अपि कविकल्पनायाः एका वास्तवभित्तिः विद्यते। यथा - तस्याः मुखं भाति पूर्णचन्द्र इवापरः"। इति।

२. उपमावत् उत्प्रेक्षालङ्कारे उपमानोपमेयभावः विद्यते। परन्तु अत्यन्तं सादृश्यवशात् उपमेयम् उपमानत्वेन शङ्कते। एतादृशं चिन्तनं भ्रमात्मकम् अस्ति, भ्रमात्मकं नास्ति इति उभयम् अपि वक्तुं शक्यते।

३. भ्रमः अयम् आहार्यः (ऐच्छिकः)। तस्मात् नूनं तव मुखं चन्द्रः इति स्थले नायकस्य ज्ञानं विद्यते यत् मुखं चन्द्रः च समानं वस्तु नास्ति।

४. सादृश्यमूलकः अयम् अलङ्कारः विद्यते।

उदाहरणे लक्षणसमन्वयः - अत्र उत्प्रेक्षालङ्कारस्य उदाहरणम् -

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।

गुणा गुणानुवन्धित्वात् तस्य सप्रसवा इव॥" इति।

श्लोकार्थः - ज्ञाने सत्यपि मौनं तिष्ठति, शक्तौ सत्याम् अपि क्षमा विद्यते, त्यागे सत्यपि गर्वभावः नास्ति। रघुवंशस्य नृपे परस्परविरोधिनः गुणाः एकत्र सहावस्थानं करोति। परस्परविरुद्धगुणाः सहोदरवत् तिष्ठन्ति।

अस्मिन् श्लोके ज्ञानादिगुणाः उपमेयं भवन्ति। सप्रसवाः उपमानं भवन्ति। ज्ञानादिगुणाः सप्रसवारूपेण उत्प्रेक्षन्ते। इवशब्देन तच्च सादृश्यम् अधिकतया स्फुट्यते। उपमेयम् (ज्ञानादिगुणान्) उपमानत्वेन (सप्रसवात्वेन) आशङ्कते। अत्यन्तं सादृश्यवशात् प्रकृतस्य (उपमेयस्य) ज्ञानादिगुणानां परात्मना (उपमानात्मना) सप्रसवात्मना सम्भावना क्रियते। अतः उत्प्रेक्षालङ्कारः विद्यते इति लक्षणसमन्वयः।

२६.६) अपह्नुतिः

अपह्नुतिः सादृश्यमूलकः अलङ्कारः अस्ति। उपमेयोपमानविषयकः अलङ्कारः अयम्। अपह्नवः इत्यस्य गोपनं करोति इत्यर्थः। आरोपविषयस्य (उपमेयस्य) अपह्नवनकरणम् भवति। अत एव अपह्नुत्यलङ्कारः इति कथ्यते।

लक्षणम् - कविराजः विश्वनाथः स्वकीये साहित्यदर्पणनामके ग्रन्थे अपह्नुत्यलङ्कारस्य लक्षणं प्राह-

"प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः॥"इति।

अन्वयः - प्रकृतं प्रतिषिध्य अन्यस्थापनं स्यात् अपह्नुतिः।

शब्दार्थः - प्रकृतम् - उपमेयम्, प्रतिषिध्य – साक्षात् परोक्षात् वा निषिध्य, अन्यस्य – उपमानस्य, स्थापनम् - प्रतिष्ठापनम्, अपह्नुतिः - अपह्नुत्यलङ्कारः, स्यात् - भवेत्।

सामान्यार्थः - उपमेयस्य निषेधपूर्वकम् उपमेयस्य उपमानतादात्म्येन उपपादनम् अपह्नुत्यलङ्कारः इत्यर्थः। प्रकृतस्य (उपमेयस्य) प्रतिषेधं कृत्वा अन्यस्य (उपमानस्य) स्थापनम् (आरोपकरणम्) अपह्नुत्यलङ्कारः इत्यर्थः। अत्र रुद्रटस्य मतेन अपह्नुत्यलङ्कारः चर्च्यते। उपमेयनिषेधपूर्वकम् उपमेये उपमानस्य सत्यरूपेण स्थापनं भवति। अस्य तु कारणं उपमानोपमेययोः अत्यन्तं सादृश्यम्। रुद्रटेन प्रोक्तम् - "अतिसाम्यात् उपमेयं यस्यामसदेव कथ्यते सदपि"॥ इति। वामनेन प्रोक्तम् - "समेन वस्तुना अन्यापलापोऽपह्नुतिः॥"इति। अर्थात् निषेध्यस्थाप्यवस्तुद्वययोः मध्ये सादृश्यम्

अत्यन्तम् आवश्यकम्। उपमेयस्य निषेधः द्विधा भवति। १) आदौ निषेधः पश्चात् आरोपः, २) आदौ आरोपः अनन्तरं निषेधः इति।

वैशिष्ट्यम् -

१. उपमेयस्य वस्तुनः निषेधः भवति।

२. उपमेयस्य स्थाने उपमानस्य स्थापनं भवति।

३. उपमेयस्य निषेधः उपमानस्य स्थापनम् (आहार्यः) ऐच्छिकः विद्यते।

४. अपह्नुत्यलङ्कारः सादृश्यमूलकः अलङ्कारः अस्ति।

५. उदाहरणे लक्षणसमन्वयः - उपमेयस्य निषेधः द्विधा भवति। १) आदौ निषेधः पश्चात् आरोपः, २) आदौ आरोपः अनन्तरं निषेधः इति।

उदाहरणे लक्षणसमन्वयः - अत्र अपह्नुवपूर्वकम् आरोपस्य उदाहरणं प्रोच्यते -

"नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।

नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः॥"

श्लोकार्थः - इदं गगनं नास्ति, अम्बोः राशिः अस्ति। एतानि नक्षत्राणि न सन्ति, एते तु नवफेनसमूहाः। नायं चन्द्रः वर्तते, अपि तु कुण्डलितः फणिः। नायं चन्द्रस्य कलङ्कः, अपि तु शयितः कृष्णः इति।

अस्मिन् श्लोके नभोमण्डलम्, तारा, शशी, कलङ्कः च इति एते उपमेयाः सन्ति। अत्र अम्बुराशिः, नवफेनभङ्गः, कुण्डलितः फणीन्द्रः, मुरारिः इति एतानि उपमानानि सन्ति। अत्र श्लोके आकाशम्, शशी, कलङ्कः इति सर्वं सत्यम् अस्ति। किन्तु आदौ नञा प्रकृतं गगनादिकं निषिध्य ततः परम् अप्रकृतस्य सागरस्य, फेनसमूहस्य, फणीन्द्रस्य च सत्यरूपेण स्थापनं क्रियते। अत्र निषेधस्थापनयोः हेतुः सादृश्यम्। नक्षत्रशोभितेन गगनेन साकं फेनराशिसमूहस्य अत्यन्तं सादृश्यम् अस्ति। नञ् - शब्देन उपमेयस्य निषेधपूर्वकम् उपमानस्य आरोपः क्रियते। अतः प्रकृते अपह्नुवपूर्वकम् आरोपरूपस्य अपह्नुत्यलङ्कारस्य वर्णनं क्रियते।

आरोपपूर्वकम् अपह्नुतेः दृष्टान्तः प्रदीयते। अस्य उदाहरणं भवति -

"विराजति व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभङ्गाः।

फणीश्वरोऽयं द्विजराजमूर्त्तिर्नवाम्बुदश्रीर्ननु तस्य लक्ष्म॥"इति।

नभःशरीरं सिन्धुः शोभमान्, तस्मिन् सिन्धौ नक्षत्ररूपी फेनसमूहः दृश्यते। अत्र वपुःशब्देन मयट्-प्रत्ययेन च यथाक्रमं व्योमस्य नक्षत्रस्य (उपमेयस्य) च निषेधं करोति। परन्तु निषेधवाचकं नञादिकं तु साक्षात् नास्ति। वस्तुतस्तु गगने नक्षत्रे च समुद्रस्य फेनसमूहस्य आरोपः क्रियते। स च निषेधः गगनादीनां निषेधं विना न कदापि सम्भवति। अत एव प्रकृते आदौ आरोपः ततः निषेधः अस्ति। अत्रापि तथा आरोपे सादृश्यम् एव कारणम्। अत एव आरोपपूर्वकम् अपह्नवमूलकम् अपह्नुत्यलङ्कारः वर्णितः।

२६.७) दृष्टान्तालङ्कारः

दृष्टान्तालङ्कारः तु बिम्बप्रतिबिम्बभावमूलकः अलङ्कारः। साधर्म्यवैधर्म्यभेदात् दृष्टान्तालंकारः अपि द्विविधं भवति।

लक्षणम् - साहित्यदर्पणे दृष्टान्तालङ्कारस्य लक्षणं प्राह-

"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥"इति।

अन्वयः - सधर्मस्य वस्तुनः प्रतिबिम्बनं दृष्टान्तः।

शब्दार्थः - सधर्मस्य – समानधर्मविशिष्टस्य, वस्तुनः - पदार्थस्य, प्रतिबिम्बम् - प्रतिबिम्बभावेन, स्थापनम् दृष्टान्तः अलङ्कारः भवति।

सामान्यार्थः - प्रस्तुतस्य समर्थने सदृशस्य वस्तुनः प्रतिबिम्बरूपेण उपस्थापनं दृष्टान्तालङ्कारः। दृष्टः अन्तः समर्थनीये समर्थकस्य स्वरूपं सादृश्यं यस्मिन् स दृष्टान्तः अलङ्कारः इत्यर्थः। अर्थात् समर्थनीये वस्तुनि समर्थकस्य वस्तुनः यत् सादृश्यं तत् दृष्टान्तालङ्कारः इत्यर्थः। एकं दृष्टान्तवाक्यम्। अपरं दार्ष्टान्तिकं वाक्यम्। प्रथमं समर्थकं वाक्यम्। अपरं समर्थ्यं वाक्यम्। अत्रापि बिम्बप्रतिबिम्बभावयोः मध्ये सादृश्यम् एव नियामकम्। पुनश्च अत्र सादृश्यं वाच्यलभ्यं न भवेत्। सादृश्यं तात्पर्येण गम्यम्। प्रणिधानगम्यं सादृश्यं बिम्बप्रतिबिम्बभावः एव। तथाहि - प्रतिबिम्बनं प्रणिधानगम्यसाम्यत्वम् इति। प्रतिबिम्बम् बिम्बात् भिन्नं भवति। तथापि प्रतिबिम्बं बिम्बसदृशम् एव भवति।

वैशिष्ट्यानि - अत्र दृष्टान्तालङ्कारस्य वैशिष्ट्यानि प्रोच्यन्ते।

१. स्वतन्त्रं वाक्यद्वयम् भवेत्।

२. एकस्य वाक्यस्य समर्थने अपरं वाक्यम् उपयोगि स्यात्। तयोः उपमेयोपमानभावसम्बन्धः अस्ति।

३. उपमानस्य उपमेयस्य च धर्मः पृथक्तया कथितो भवेत्।

४. धर्माणां मध्ये सादृश्यं स्यात्।

५. पुनश्च सादृश्यं वाच्यं न भवति। अपि तु सादृश्यं तात्पर्यगम्यं भवति।

उदाहरणे लक्षणसमन्वयः - अत्र दृष्टान्तालङ्कारस्य उदाहरणं प्राह दर्पणकारः साहित्यदर्पणे -

"अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।

अनधिगतपरिमलापि हि हरति दृशं मालतीमाला॥"इति।

सामान्यार्थः - अविदितगुणाऽपि - अर्थबोधरहिता अपि, भणितिः - वाणी, वसति - प्रकटयति, दृशं - नेत्रम्, हरति - आकर्षति। रसभासादिकाव्यगुणानाम् अविद्यमाने अपि उत्तमकवेः काव्यश्रवणेन श्रोतुः कर्णे मधुरधारां वर्षति। यथा- सौरभस्य आघ्राणं न भवति चेदपि मालतीपुष्पस्य माला नेत्रं हरति।

पद्ये अस्मिन् स्वतन्त्रं वाक्यद्वयम् अस्ति। किन्तु अर्थानुसन्धानकाले अवगम्यते यत् द्वितीयवाक्यं प्रथमवाक्यस्य समर्थकम् अस्ति। वाक्यद्वये वमनम् हरणञ्च इति साधारणधर्मद्वयम्। अत्र मधुधारावमनम् नेत्रहरणञ्च अभिन्नं नास्ति। तथापि उभयत्र आनन्दजनकत्वरूपं भावगतसादृश्यम् अस्ति। आनन्दजनकत्वरूपं सादृश्यं तात्पर्यगम्यम् अस्ति। रसभासादिकाव्यगुणानाम् अविद्यमाने अपि उत्तमकवेः वाणी मधुरधारां वर्षति इति प्रथमवाक्यस्य वर्णनाय अनधिगतपरिमालायाः अपि मालतीमालायाः नयनलोभनीयत्वम् इति अपरवाक्यस्य वर्णना क्रियते। अत्र बिम्बप्रतिबिम्बभावसम्बन्धः विद्यते। अत्रापि सादृश्यवशात् बिम्बप्रतिबिम्बभावः भवति इति दृष्टान्तालङ्कारस्य लक्षणसमन्वयः अस्ति।

पाठगतप्रश्नाः-२

अत्र केचित् प्रश्नाः अधः प्रदीयन्ते -

१२. उत्प्रेक्षालङ्कारः कीदृशः अलङ्कारः।

१३. उत्प्रेक्षालङ्कारस्य लक्षणं लिखतु।

१४. उत्प्रक्षालङ्कारस्य एकं वैशिष्ट्यं लिखतु।

१५. अपह्नुत्यलङ्कारस्य एकं वैशिष्ट्यं लिखतु।

१६. अपह्नुत्यलङ्कारस्य लक्षणं लिखत।

१७. अपह्नुत्यलङ्कारे उपमेयस्य निषेधः कतिधा भवति।

१८. दृष्टान्तालङ्कारस्य एकं वैशिष्ट्यं लिखतु।

१९. दृष्टान्तालङ्कारस्य लक्षणं लिखतु।

२६.८) समासोक्तिः

लक्षणम् - कविराजः विश्वनाथः साहित्यदर्पणनामके ग्रन्थे समासोक्त्यलङ्कारस्य लक्षणं प्राह -

"समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥"इति।

अन्वयः - समैः कार्यलिङ्गविशेषणैः प्रस्तुते अन्यस्य वस्तुनः यत्र व्यवहारसमारोपः सा समासोक्तिः। कार्याणि च लिङ्गानि च विशेषणानि च तैः कार्यलिङ्गविशेषणैः इति इतरेतरद्वन्द्वसमासः।

शब्दार्थः - समैः - समानैः (प्रस्तुते अप्रस्तुते च तुल्यरूपे विद्यमानम्, तैः), कार्यलिङ्गविशेषणैः - आलिङ्गनादिक्रियया, पुंस्त्वादिलिङ्गेन, नीलत्वादिव्यावर्तकधर्मैः, प्रस्तुते - उपमेयपदार्थे, अप्रस्तुतस्य – उपमानपदार्थस्य, व्यवहारस्य – आचरणस्य, समारोपः - सम्यक्तया आरोपः यत्र भवति, सा समासोक्तिः इति।

सामान्यार्थः - समानक्रियाभिः, समानलिङ्गैः, समानविशेषणैः वा उपमेये उपमानस्य व्यवहारसमारोपः भवति चेत् सा समासोक्तिः भवति। समासेन (संक्षेपेन) उक्तिः (अर्थद्वयकथनम्) सा समासोक्तिः। आरोपे सादृश्यम् एव कारणम्। पुनश्च अत्र लिङ्गं क्रिया विशेषणञ्च आश्रित्य सादृश्यं भवति। प्रस्तुतेन साकम् अप्रस्तुतस्य साक्षात् सादृश्यं न विद्यते। वस्तुतस्तु अत्र वाक्ये अप्रस्तुतस्य उल्लेखः न विद्यते। लिङ्गादीनां सादृश्यवशात् अप्रस्तुतस्य प्रतीतिः भवति। केषाञ्चित् मते तु केवलं विशेषणं सदृशस्य आश्रयः भवति। अर्थात् समानविशेषणवशात् उपमेये उपमानस्य व्यवहारसमारोपः भवति। अलङ्कारसर्वस्वकारः कथयति - "श्लिष्टविशेषणैरुपमानधीः समासोक्तिः। "इति। मम्मटः अपि कथयति - "परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः"इति।

उदाहरणे लक्षणसमन्वयः- अत्र समासोक्त्यलङ्कारस्य उदाहरणं तावत् -

"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः।

अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः॥"इति।

श्लोकार्थः - यस्य जयेच्छा पूर्णा न जाता। तादृशस्य नीतिज्ञस्य पुरुषस्य रमणीसम्भोगस्य स्पृहा कथं सम्भवति। सूर्यः अखिलं जगत् अनाक्रम्य सन्ध्यया साकं न मिलति। अत्र सूर्यः प्रस्तुतः, नायकः अप्रस्तुतः अस्ति। सन्ध्या प्रस्तुता, नायिका अप्रस्तुता भवति। अस्मिन् श्लोके सूर्ये नायकस्य सन्ध्यायां नायिकायाः च व्यवहारसमारोपः अस्ति। अस्मिन् समारोपे लिङ्गसाम्यं कारणं भवति। विश्वनाथः कथयति - "अत्र पुंस्त्रीलिङ्गमात्रेण रविसन्ध्ययोः नायकनायिकायाः व्यवहारः॥"इति। अत्र रविः तेजोमात्रं भवति। सन्ध्या कालविशेषः भवति। तथापि रविशब्दस्य पुंलिङ्गवशात् नायकस्य व्यवहारसमारोपः भवति। एवञ्च सन्ध्याशब्दस्य स्त्रीलिंङ्गवशात् नायिकायाः व्यवहारसमारोपः भवति। अत्र दृष्टान्तत्वेन अप्रकृतयोरपि रविसन्ध्ययोः प्रकृताङ्गत्वेन एव प्रकृतत्वम् अवधेयम्।

२६.९) अतिशयोक्तिः

भरतपरवर्तिनः प्रायः सर्वे एव अतिशयोक्त्यलङ्कारं स्वीकृतवन्तः। अतिशयेन सम्भवातिरेकेण योग्यतातिक्रमेण वा उक्तिः अतिशयोक्तिः। अत्युक्तिः अतिशयोक्तिः इति वाग्भट्टः।

लक्षणम् - अत्र दर्पणकारः अतिशयोक्त्यलङ्कारस्य लक्षणं कथितवान् -

"सिद्धत्वेऽध्यवसायस्य अतिशयोक्तिर्निगद्यते" इति।

अन्वयः - (प्रकृतस्य परात्मना) अध्यवसायस्य सिद्धत्वे अतिशयोक्तिः निगद्यते।

शब्दार्थः - अध्यवसायस्य – प्रकृतेन सह अप्रकृतस्य (यथार्थवस्तुना सह अयथार्थवस्तुना) अभेदप्रतीतेः, सिद्धत्वे - निश्चयात्मके अतिशयोक्तिः - अतिशयोक्त्यलङ्कारः भवति।

सामान्यार्थः - विषयेण साकं विषयिणः अभेदप्रतीतेः निश्चयात्मके सति अतिशयोक्त्यलङ्कारः स्यात्। अध्यवसायः नाम अयथार्थवस्तुना यथार्थवस्तुनः निगरणम्। अर्थात् उपमेयस्य निगरणपुरःसरम् उपमानेन सह तस्य अभेदज्ञानम् अध्यवसायः। विश्वनाथः कथयति - "विषयनिगरणेन अभेदप्रतिपत्तिः विषयिणः अध्यवसायः॥" इति। अर्थात् यथार्थवस्तुनः आच्छादनपूर्वकम् अयथार्थवस्तुनः अभेदप्रतीतिः

अतिशयोक्तिः भवति। उत्प्रेक्षालङ्कारे सम्भावना अनिश्चितरूपा। अतिशयोक्तौ कविप्रौढोक्तिवशात् सम्भावना निश्चितरूपा भवति।

उदाहरणे लक्षणसमन्वयः - अत्र विश्वनाथः अतिशयोक्त्यलङ्कारस्य उदाहरणं निरूयति-

"कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम्।

कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात्॥"इति।

श्लोकार्थः - नायिकायाः मस्तके मयूरपुच्छः, तस्य अधः अष्टमीन्दुखण्डः, तस्य अधः चञ्चलं नीलोत्पलयुगलम्, तस्य अधः तिलकुसुमम्, तस्य एकं प्रवालम् कथम्।

श्लोके "कथम्" इति पदं प्रश्नसूचकं नास्ति। अपि तु कथम् इति पदं सम्भावनासूचकम् अस्ति। अत्र नायिकाकेशकलापभालस्थलनेत्रयुगलनासिकाधरोष्ठानाम् उपमेयानां कलापिकलापादिभिः उपमानैः सह अभेदज्ञानात् अध्यवसायस्य सिद्धत्वम् इति अतिशयोक्तेः उदाहरणम्। केशपाशं मयूरकलापत्वेन, कपालम् अर्धचन्द्रत्वेन, नयनद्वयं नीलोत्पलत्वेन, नासिकाम् तिलकुसुमत्वेन, औष्ठं रक्तप्रवालत्वेन अध्यवसायः कृतः। अर्थात् केशपाशादेः प्रकृतस्य मयूरकलापादिना अप्रकृतेन सह अभेदनिश्चयः भवति। प्रकृते केशादिः उपमेयः कलापादिः उपमानञ्च परस्परं भिन्नम्। तथापि उपमानस्य उत्कटप्राधान्ये उपमेयस्य निगरणजनिता अभेदप्रतीतिः भवति। अतिशयोक्तेः बहवः विभागाः सन्ति। प्रकृते तु अतिशयोक्त्यलङ्कारस्य भेदाः नैव चर्चिताः।

पाठगतप्रश्नाः-३

२०. समासोक्त्यलङ्कारस्य लक्षणं लिखतु।

२१. समासोक्तिः इत्यस्य अर्थः कः।

२२. मम्मटमतेन समासोक्तेः लक्षणं किम्।

२३. समासोक्त्यलङ्कारे आरोपे किं कारणं भवति।

२४. अतिशयोक्त्यलङ्कारस्य लक्षणं किम्।

२५. वाग्भट्टमतने अतिशयोक्तिः नाम का।

२६. अध्यवसायः नाम कः।

पाठसारः

अस्मिन् पाठे अर्थालङ्कारः आलोच्यते। अर्थालङ्कारे शब्दपरिवर्तनं शक्यम्। अत्र अर्थवशात् चमत्कृतिः उत्पद्यते। उपमादयः अर्थालङ्कारः भवति। प्रायः सादृश्यमूलकः अलङ्कारः आलोच्यते। विजातीयवस्तुनोः विरुद्धधर्मम् अनुक्त्वा यदि गुणक्रियागतसादृश्यम् इवादिशब्देन प्रतिपादितं स्यात्, स

उपमालङ्कारः भवति। सा च पूर्णोपमा लुप्तोपमा इति भेदात् द्विविधा। ततः अनन्वयालङ्कारं प्रतिपादितवान्। एकम् एव वस्तु युगपत् उपमेयत्वेन उपमानत्वेन च कल्पितं भवति चेत् स अनन्वयालङ्कारः भवति। ततः रूपकालङ्कारम्, दृष्टान्तालङ्कारम्, उत्प्रेक्षालङ्कारम्, अपह्नुत्यलङ्कारान् प्रतिपादितवान्। प्रायः एते सर्वे एव अलङ्काराः सादृश्यमूलकाः सन्ति। रूपकाद्यलङ्काराणाम् उदाहरणपुरःसरं लक्षणानि वैशिष्ट्यानि च प्रोक्तानि। सादृश्ये सति एव एते अलङ्काराः भवन्ति। मम्मटाद्याचार्याणां मतानि अत्र प्रोक्तानि। किन्तु साहित्यदर्पणकारस्य निर्मितानि लक्षणानि पाठे अस्मिन् गृहीतानि सन्ति। काव्यमार्गे अलङ्काराः एव काव्यस्य सौन्दर्यं वर्धयन्ति। काव्ये अलङ्कारस्य विद्यमानात् काव्यम् अत्यन्तं ग्राह्यम् अस्ति। काव्यजगति अन्ये अपि अलङ्काराः सन्ति। परन्तु अस्मिन् पाठे केचित् प्रसिद्धाः अलङ्काराः गृहीताः।

पाठान्तप्रश्नाः

१. अर्थालङ्कारस्य विषये लघुटिप्पणीं रचयत।

२. उदाहरणपुरःसरम् उपमालङ्कारान् वर्णयत।

३. उपमालङ्कारस्य भेदान् प्रतिपाद्य तेषां परिचयं कारयतु।

४. उदाहरणपुरःसरम् उपमालङ्कारस्य प्रत्येकं भेदान् वर्णयत।

५. उदाहरणपुरःसरम् उत्प्रेक्षालङ्कारं वर्णयत।

६. उदाहरणपुरःसरम् दृष्टान्तालङ्कारं वर्णयत।

७. उत्प्रेक्षालङ्कारस्य वैशिष्ट्यानि लिखन्तु।

८. अपह्नुत्यलङ्कारस्य वैशिष्ट्यानि लिखन्तु।

९. उदाहरणपुरःसरम् अपह्नुत्यलङ्कारं वर्णयत।

१०. उदाहरणपुरःसरम् रूपकालङ्कारान् वर्णयत।

११. उदाहरणपुरःसरम् समासोक्त्यलङ्कारान् वर्णयत।

१२. उदाहरणपुरःसरम् अतिशयोक्त्यलङ्कारान् वर्णयत।

पाठगतप्रश्नानाम् उत्तराणि

१. यस्मिन् अलङ्कारे अर्थम् आश्रित्य काचित् चमत्कृतिः भवति चेत् स अर्थालङ्कारः।

२. उपमालङ्कारः।

३. अर्थालङ्कारे समार्थकशब्दस्य प्रयोगः शक्यः अस्ति।

४. "साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः"॥ इति।

५. द्विविधः।

६. "सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च।

७. उपमेयं चोपमानं भवेत् वाच्यम्" ॥इति।

८. "लुप्ता सामान्यधर्मादिः एकस्य यदि वा द्वयोः।

९. त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्॥"इति।

१०. "उपमानोपमेयत्वम् एकस्यैव तु अनन्वयः"इति।

११. "रूपकं रूपितारोपे विषये निरपह्नवे" इति।

१२. १) उपमेयम्, २) उपमानम्, ३) साधारणधर्मः, ४) सादृशवाचकशब्दः।

१३. द्विविधा।

१४. सादृश्यमूलकोपमा।

१५. "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना"इति।

१६. सादृश्यमूलकः अयम् अलङ्कारः विद्यते।

१७. उपमेयस्य निषेधः उपमानस्य निषेधश्च (आहार्यः) ऐच्छिकः विद्यते।

१८. "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥"इति।

१९. द्विविधा।

२०. अत्र सादृश्यं वाच्यं न भवति। अपि तु सादृश्यं तात्पर्यगम्यं भवति।

२१. "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥"इति।

२२. "समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।

२३. व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥"इति

२४. समासेन उक्तिः।

२५. परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः"इति।

२६. सादृश्यम्।

२७. "सिद्धत्वेऽध्यवसायस्य अतिशयोक्तिर्निगद्यते"। इति।

२८. अत्युक्तिः।

२९. विषयनिगरणेन अभेदप्रतिपत्तिः विषयिणः अध्यवसायः

विशेषशब्दावली

उपमेयम्

तत्र सादृश्यानुयोगि उपमेयम्। उपमीयते यत् तत् उपमेयम्। मि-धातोः परिमापः अर्थः। वर्णनीयः विषयः उपमेयम् अस्ति। यथा चन्द्र इव मुखम्। येन साकं यस्य तुलना क्रियते, तत् उपमेयम्। चन्द्रेण साकं मुखस्य तुलना क्रियते। अतः मुखम् उपमेयम् अस्ति। प्रायः तुलना तु महता साकं लघुनः वस्तुनः

क्रियते। अत्र प्रकृते चन्द्रः अधिकः सुन्दरवान् अस्ति। मुखस्य सुन्दरता तु चन्द्रापेक्षया न्यूनम् अस्ति। अतः लघु वस्तु उपमेयम् अस्ति।

उपमानम्

तत्र सादृश्यप्रतियोगि उपमानम्। उपमीयते सदृशीक्रियते येन तद् उपमानम्। वर्णनीयस्य उपमेयस्य उपकारकम् उपमानम् अस्ति। यस्य वस्तुनः येन साकं तुलना क्रियते, तत् उपमानम् भवति। यथा - चन्द्र इव मुखम् इति। अत्र तु मुखस्य चन्द्रेण साकं तुलना क्रियते। अतः चन्द्रः उपमानम् अस्ति। प्रायः तुलना तु महता साकं लघुनः वस्तुनः क्रियते। अत्र प्रकृते चन्द्रः अधिकः सुन्दरवान् अस्ति। मुखस्य सुन्दरता तु चन्द्रापेक्षया न्यूनम् अस्ति। अत महत् वस्तु उपमानम् अस्ति।

साधारणधर्मः

उपमेये उपमाने च सङ्गतधर्मः साधारणधर्मः। अर्थात् उपमेये उपमाने च उभयत्र यः समानः धर्मः तिष्ठति, स साधारणधर्मः भवति। यथा चन्द्र इव मुखं सुन्दरम् इति। अत्र चन्द्रे मुखे च समानः धर्मः सौन्दर्यत्वं च अस्ति। उभयत्र विद्यमानं सौन्दर्यत्वधर्मम् आधारीकृत्य एव तुलना क्रियते। अत एव उभयत्र विद्यमानः धर्मः साधारणधर्मः।

औपम्यवाचकशब्दः

उपामायाः भावः औपम्यम्। इवादिशब्दः उपमावाचकः भवति। अर्थात् येन शब्देन सादृश्यस्य स्पष्टप्रतीतिः जायते। यथा - चन्द्र इव मुखम् इति। अत्र चन्द्रेण साकं मुखस्य साधर्म्यम् अस्ति इति एतत् तु इवादिशब्देन स्पष्टं ज्ञायते। अत एव इवादिशब्दाः उपमावाचकशब्दाः भवन्ति।

बिम्बम्

साक्षात् यत् वस्तु तत् बिम्बम्। यथा - मुखम्। यथा दर्पणे वयं मुखं पश्यामः। एकं तु अस्माकं मुखम्। अपरं दर्पणनिष्ठं मुखम्। साक्षात् मानवानां यत् मुखं तत् बिम्बम् अस्ति। यस्य प्रतिच्छविः दर्पणे अस्ति, तत् बिम्बम्।

प्रतिबिम्बम्

कस्मिन्चित् वस्तुनि पतितः प्रतिच्छविः, तत् प्रतिबिम्बम्। यथा - दर्पणे स्थितं मुखम्। यदा वयं दर्पणे मुखं पश्यामः। तदा तु दर्पणे मुखस्य कश्चित् प्रतिच्छविः दृश्यते। तत् एव प्रतिबिम्बम् अस्ति।

प्रणिधानगम्यम्

प्रणिधानगम्यम् इत्यस्य अर्थः तु तात्पर्येण गम्यमानः अर्थः इति। साक्षात् वाच्यार्थः न भवति। परन्तु तात्पर्येण सः अर्थः गम्यते।

॥ इति षड्विंशः पाठः ॥

२७

348sk27

रसपरिचयः

प्रस्तावना

अयि प्रियच्छात्राः! अस्मिन् पाठे रसस्य विषये आलोचना वर्तते। प्रथमपाठात् आरभ्य विविधानां काव्यानाम् अध्ययनं युष्माभिः कृतम् अस्ति। तथैव छन्दोऽलङ्कारादीनामपि परिचयः युष्माभिः प्राप्तः अस्ति। तदनन्तरं रसस्य परिचयः प्राप्तव्यः। साहित्यशास्त्रस्य विषयेषु रसः सर्वप्रधानम् भवति। शब्द-अर्थ-अलङ्कारादयः रसतात्पर्येण एव काव्ये व्यवस्थिताः। अत्र रसविषये विभिन्नानि मतानि सङ्क्षेपेण प्रदर्श्यन्ते। एतस्य अध्ययनेन काव्यप्रकाश-रसगङ्गाधरादीनाम् अध्ययने महत् साहाय्यम् स्यात्। अत्र अत्यन्त- प्रधानस्थलेषु प्राचीनग्रन्थानां श्लोकाः उद्धृियन्ते। अन्यथा प्राचीनग्रन्थानाम् तात्पर्यम् एव सरलवाक्यैः प्रतिपाद्यते येन साहित्यशास्त्रेभ्यः इतरशास्त्राणां छात्राणामपि साहित्यशास्त्रविषयस्य बोधः सुष्ठु सम्पद्येत।

उद्देश्यानि

पाठस्यास्याध्ययनेन -

- प्रधानम् विषयः रसः ज्ञास्यते।
- रससूत्रं रसस्य समन्वयम् रसानुभवस्य स्वरूपम् च ज्ञास्यति।
- रसानुभवस्वरूपे काव्यस्य लोकोत्तरत्वम् साधारणीकरणसिद्धान्तञ्च बुध्यात्।
- रसविषये उत्पत्तिवादम् अनुमितिवादम् भुक्तिवादम् अभिव्यक्तिवादञ्चच ज्ञास्यति।
- करुणस्य आनन्दमयत्वसिद्धिः, रसानाम् अनुक्रमः, शान्तरसस्य महिमा च ज्ञातः भवेत्।
- रससिद्धान्तस्य समग्रः परिचयः सिद्ध्यति येन काव्यप्रकाशादिप्रौढग्रन्थेषु अध्ययनगतिः सुगमा भवति।

२७.१) भूमिका

काव्यस्य काव्यशास्त्रस्य च परमं फलम् भवति रसः इति विदुषाम् अभिप्रायः। आनन्दो हि रसस्वरूपम्। सर्वेषाम् प्राणिनाम् सर्वं कार्यम् आनन्दे सुखे वा पर्यवस्यति। तथा काव्यस्य सर्वे विषयाः रसे पर्यवस्यन्ति। रसस्तु स्वस्मिन् पर्यवस्यति, न पुनः स्वपूर्णतार्थम् अन्यत्र प्रवर्तते। एष रसः काव्यात्मा इति प्रतिष्ठितः। दुग्धाद् दधि, दध्नो नवनीतं, नवनीताद् घृतं, घृतात् परं न किमपि भवति। अर्थात् दुग्धादीनाम् अत्यन्तसाररूपि घृतम् भवति। तथैव काव्ये रसः शब्दार्थादीनाम् समेषां सारभूतः अस्ति। रसस्य

प्रकाशनाय कवयः काव्यानि विरचयन्ति। तेषाम् एव अनुभवाय सहृदयाः काव्ये अनुरक्ताः भवन्ति। "नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते" इति भरतमुनिः नाट्यशास्त्रे अवदत्। तेन न केवलं काव्यस्य अपितु गीतनृत्यादीनां सर्वेषां कलाप्रकाराणां रस एव आत्मा साररूप इति अवगन्तव्यम्। रस्यते इति रसः। रस्यते आस्वाद्यते इति अर्थः। तेन आनन्दरूपी स्वादो रस इति अवगम्यते। अस्य रसस्य प्रथमं निरूपणम् उपलभ्यते नाट्यशास्त्रे। तस्य रचयिता भरतमुनिः। नाट्यशास्त्रस्य षष्ठाध्याये रसस्य विषयो विस्तरेण प्रतिपादितः अस्ति। तत्र उक्तं विषयम् आधारीकृत्य ततः परकालीना आलङ्कारिका रसं निरूपितवन्तः। नाट्यशास्त्रस्य प्रसिद्धा प्रामाणिकी व्याख्या भवति अभिनवभारती। तस्या रचयिता अभिनवगुप्तपादः।

२७.२) रससूत्रस्य विवरणम्

"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" (नाट्यशास्त्रम्- ६) इति भवति रससूत्रम्। तच्च नाट्यशास्त्रे षष्ठाध्याये भवति। काव्येन नाट्येन वा उपस्थापितो रामसीतादिः समुद्रपर्वतमेघादिः वा विभाव इत्युच्यते। स सहृदयेषु रतिशोकादिभावान् अलौकिकरूपेण प्रबोधयति। तस्मात् तस्य विभाव इति नामधेयम्। विभावे विद्यमानाः कटाक्षप्रसार-स्मित-भाषणादि-चेष्टाविशेषः अनुभाव इत्युच्यते। तेन रामसीतादिषु विद्यामाना दर्शनभाषणादिक्रिया अनुभावा इति तात्पर्यम्। व्यभिचारी अर्थात् परिवर्तनशीलः अस्थिर इत्यर्थः। व्यभिचारिभावाः हि एकस्य रसानुभवस्य मध्ये आगच्छन्तः, किञ्चित् क्षणानन्तरं निर्गच्छन्तो मानसिका भावाः। ते च लज्जा-संशय-कुतूहलादयः।

२७.२.१) समन्वयः

काव्येन नाट्येन वा उपस्थापिता भवन्ति रामसीतादय विभावाः। तेषाम् स्मित-दर्शन-संभाषणादिक्रिया वर्ण्यन्ते। तेषाम् लज्जा-हास-संशयादयो व्यभिचारिभावा अपि भवन्ति। एवञ्च रामसीतादयो लज्जा-हास-कुतूहलादियुक्ताः स्मित-दर्शन-भाषणादिक्रियायुक्ताश्च काव्येन नाट्येन वा उपस्थाप्यन्ते इत्यर्थः। एवम् विभावादीनां समुचिते संयोगे जाते सहृदयानां हृदये यः अलौकिक आनन्दः अभिव्यक्तो भवति स रसः।

पाठगतप्रश्नाः-१

१. काव्यस्य आत्मा कः।

२. विभावः कः।

३. रससूत्रम् नाट्यशास्त्रे कस्मिन् अध्याये वर्तते।

४. कस्य प्रकाशनाय कवयः काव्यम् रचयन्ति।

५. रसपदनिर्वचनम् कथम्।

२७.३) रसानुभवस्य स्वरूपम्

रससूत्रे विभावादीनां संयोगे रसो निष्पद्यते इति पश्यामः। तत्र रसात्मना कः तिष्ठति इति विषये जायते जिज्ञासा। तत्र आलङ्कारिका वदन्ति -

"व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः" - इति (काव्यप्रकाशः ३/२)

अस्य वचनस्य अयम् अर्थः - विभावानुभावव्यभिचारिभावैः अभिव्यक्तः सहृदयेषु विद्यमानः रतिशोकादिः स्थायी भावः रसो भवति। सहृदयस्य मनसि अनादिवासनारूपेण अनेके भावाः सन्ति। ते च रति-हास-शोकादयः। ते रसत्वप्राप्तिपर्यन्तम् स्थिराः भवन्ति। अतः ते स्थायिभावाः इत्युच्यन्ते। ते च नव भवन्ति।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च।। (साहित्यदर्पणः. ३/१७५)

अस्मिन् श्लोके एते नव स्थायिभावाः सन्ति - रतिः हासः शोकः क्रोधः उत्साहः भयम् जुगुप्सा विस्मयः शमः इति।

तत्र रतिः हि अभीष्टे विषये मनसः अनुरागजः प्रमोदः। हासो नाम वागादीनाम् विकारात् जातः चित्तस्य विकासः। इष्टनाशादिकारणात् जातः मनसः दुःखविशेषः शोकः। इच्छाभङ्गादिषु प्रतिकूलेषु जातः मनसः तीक्ष्णतागुणः क्रोधः। उत्साहो नाम कार्यारम्भादिषु उत्कटः आवेशः। व्याघ्रादिदर्शनेन अत्यन्तानर्थविषयकम् चित्तस्य दौर्बल्यम् भयम् भवति। दोषादिदुर्विषयदर्शनात् जाता हेयबुद्धिः जुगुप्सा इत्युच्यते। लोकातीतेषु अत्यन्तम् अपूर्वेषु विषयेषु दृष्टेषु आश्चर्यरूपी चित्तविस्फारः विस्मयः। सकलतृष्णानाम् अभावे जातम् स्वात्मविश्रामसुखम् शमः भवति।

एतेषां भावानाम् अनिश्चयात्मकं ज्ञानम् भवति संशयज्ञानम्। यथा स्थाणुर्वा पुरुषो वा इति। अत्र इदं वस्तु स्थाणुः उत पुरुषः इति ग्रहणे अनिश्चयः विद्यते। ईदृशम् ग्रहणं संशयज्ञानम् इत्युच्यते।

लोके जीवनं सुखदुःखात्मकं भवति। तेषाम् एव काव्यमार्गेण अनुभवः लोकोत्तरः भूत्वा परमास्वादरूपी रसो भवति। एतेषां भावानाम् अनुभवः काव्ये कथम् अलौकिको भवति इति संदेहस्य समाधानम् अधुना क्रियते। तत्र प्रथमम्- तेषां लोकजीवने अनुभवः कथं लौकिकः इति प्रदर्श्यते। लोकजीवने सर्वे विषयाः मदीयाः अथवा मदीयाः न भवन्ति इति द्विविधाभ्याम् बुद्धिभ्याम् गृह्यन्ते। तेन लोके सर्वे पदार्थाः स्व-परसम्बन्धानाम् स्वीकारपुरस्सरम् अथवा परिहारपुरस्सरम् गृह्यन्ते इति। एवम् इदं वस्तु मम अस्ति, इदं वस्तु मम नास्ति, इदं वस्तु अन्यस्य अस्ति, इदं वस्तु अन्यस्य नास्ति इत्येवम् ग्रहणानि भवन्ति। अत्र सर्वत्र स्वस्य परस्य वा सम्बन्धस्य स्वीकारः परिहारो वा दृश्यते। इत्थं यत्किञ्चित् वस्तु गृह्यते चेत् तद्वस्तूनाम् ज्ञानम् अनुभवो वा लौकिकः इत्युच्यते। लौकिकः अनुभवः चतुर्विधैः ज्ञानैः भवति इति आलङ्कारिकाः वदन्ति। तानि च सम्यक् ज्ञानम्, मिथ्याज्ञानम्, संशयज्ञानम्, सादृश्यज्ञानम् इति चत्वारि ज्ञानानि। एतानि लोके व्यवहारसाधकानि भवन्ति।

सम्यक् ज्ञानम् - रामोऽयम् वृक्षोऽयम् इत्यादि ज्ञानम् यथार्थज्ञानम् इत्युच्यते। तच्च प्रत्यक्षादि-प्रमाणलब्धम् भवति।

मिथ्याज्ञानम् - मिथ्याज्ञानम् हि भ्रमात्मकं ज्ञानम्। यथा मन्दान्धकारे स्थितां रज्जुम् अदृष्ट्वा तत्स्थाने सर्पः इति प्रतीतिः, स्थाणुं दृष्ट्वा पुरुषः इति प्रतीतिः भवति। ईदृशम् अन्यथाग्रहणम् मिथ्याज्ञानम् इत्युच्यते।

संशयज्ञानम् - विषयस्य अनिश्चयात्मकं ज्ञानम् भवति संशयज्ञानम्। यथा स्थाणुर्वा पुरुषो वा इति। अत्र इदं वस्तु स्थाणुः उत पुरुषः इति ग्रहणे अनिश्चयः विद्यते। ईदृशम् ग्रहणं संशयज्ञानम् इत्युच्यते।

सादृश्यज्ञानम् - पूर्वम् ज्ञातस्य पदार्थस्य सादृश्यबलात् अज्ञाते विषये यादृशं ज्ञानम् भवति तत् सादृश्यज्ञानम्। यथा गौः इव गवयः अस्ति। अत्र गाम् जानन् कश्चित् पुरुषः पूर्वम् अदृष्टम् अपि गवयम् तत्-सादृश्यबलात् अवगच्छति। ईदृशम् ज्ञानम् सादृश्यज्ञानम् इत्युच्यते।

एभिः ज्ञानैः सर्वे व्यवहाराः सम्भवन्ति। किन्तु काव्यपदार्थस्य ग्रहणम् एभिः ज्ञानैः न भवति। चित्रतुरगन्यायेन काव्यस्य ग्रहणम् भवति। चित्रे लिखितः अश्वः न यथार्थरूपी, नापि अश्वभिन्नः, नापि अश्वसदृशः, नापि अश्वो वा तद्भिन्नो वा इति प्रतीयमानः। किन्तु अश्वोऽयम् इत्येव ज्ञायते। ईदृशं ज्ञानम् आहार्यज्ञानम् इति वदन्ति। यत्किञ्चित् प्रयोजनवशात् औचित्येन अतस्मिन् तद्बुद्धिः आहार्यज्ञानम् भवति। तच्च ज्ञानम् विवेकपूर्वकं भवति न तु रज्जुसर्पज्ञानवत्। रज्जौ सर्पज्ञानं यत् भवति तत् यथार्थस्य ग्रहणम् नास्ति। आहार्यज्ञाने तु यथार्थज्ञाने सत्यपि अन्य-प्रयोजनसिद्धये अनिदम् इदम् इति गृह्यते विवेकपूर्वकम् एव। यथा एकस्मिन् वने एकः सिंहः आसीत्। स वनराजो भवितुम् इच्छति स्म। तदर्थं प्राणिनाम् विश्वासलाभाय सभाम् आयोजितवान् इत्येवमादिः कथा प्रवर्तते। तत्र सिंहः वनराजत्वम् न इष्टवान्, प्राणिनाम् सभामपि न आयोजितवान्, यतः सिंहः कश्चित् प्राणी न तु विवेकी मनुष्यः। मनुष्यः चेत् तत्सर्वं कुर्यात्, न कदाचिदपि मृगः करोति इत्येवम् यथार्थः अस्माभिः ज्ञायते। तथापि सिंहस्य तादृशाः व्यवहाराः अङ्गीक्रियन्ते। अङ्गीकारश्च आहार्यज्ञानबलादेव। एवंविधेन ईदृशेन आहार्यज्ञानेन एव पञ्चतन्त्रादि-कथादिषु विस्तरेषु नीतिबोधः सिद्ध्यति। एवञ्च काव्यपदार्थाः विभावादयः वा आहार्यज्ञानेन विषयीक्रियन्ते इति तात्पर्यम्। तथा गृहीता विभावादयः साधारणा भवन्ति। साधारणीकरणेन विभावादीनाम् अलौकिकत्वम् सिद्धम् भवति।

२७.४) साधारणीकरणम् -

विभावादीनाम् विषये स्वस्य विषये च सहृदयस्य देशकालादिसम्बन्धानाम् स्वकीयपरकीयत्वरूपाणाम् सम्बन्धानाम् स्वीकारस्य परिहारस्य अभावः साधारणीकरणम् भवति। अतः साधारणाः विभावादयः नाम एते मम, एते मम न भवन्ति, एते परस्य, एते न परस्य भवन्ति इत्येवंविधम् स्वसम्बन्धम् परसम्बन्धं च विना एव ज्ञायन्ते इत्यर्थः। देश-काल-स्वकीयपरकीयत्वादयः सम्बन्धाः लोके पदार्थानाम् आवरणरूपेण तिष्ठन्ति। तादृशं आवरणं यदा न दृश्यते तदा पदार्थः साधारणः भवति। सम्बन्धावरणम् भवति चेत् असाधारणम् एव भवति। असाधारणो नाम विशेषरूपी परिमितः इत्यर्थः।

लोके प्रायः सर्वे पदार्थाः असाधारणाः एव प्रतीयन्ते। तस्मात् एकेन पुरुषेण सम्बद्धः पदार्थः अन्येन अनुभवितुम् आस्वादयितुं वा न शक्यते। न खलु एकस्य भार्या अन्येन द्रष्टुमपि युक्ता। एवं सर्वे पदार्थाः सम्बन्धावरणेन सहिताः विशेषाः च भवन्ति।

काव्ये तु विभावादयः विशेषधर्मं विना एव प्रतीयन्ते अर्थात् साधारणाः एव प्रकाशन्ते। अतः कस्यचिदपि सम्बन्धः तेषां न भवति। सम्बन्धरूपम् आवरणम् भग्नम् भवति। अत एव काव्ये सर्वे विभावादयः पति-पत्नी-पुत्रादिरूपाः सर्वैः द्रष्टुम् आस्वादयितुं च शक्याः। श्रीकृष्णराधिकादीनाम् चुम्बनालिङ्गनादिकम् अपि सर्वेषाम् अवलोकनयोग्यम् भवति। न कदाचिदपि जीवने एवं भवति। तथा विभावादीनाम् साधारणतया प्रतीतिः अलौकिकप्रतीतिः इति आलङ्कारिका वदन्ति। विभावादीनाम् विषये आहार्यज्ञानम्, ततः साधारणीकरणञ्च सहृदयत्वमहिम्ना सिध्यति। विभावादयः यदा साधारणतया प्रतीयन्ते तदा सहृदयाणाम् हृदयम् विभावादिषु तन्मयम् भवति। तदा चित्ते सत्त्वगुणः व्याप्तो भवति। रजोगुणः तमोगुणश्च अधो गच्छतः। ततः चित्तमलरूपम् अज्ञानम् तत्कालम् निवर्तते। शुद्धसत्त्वमात्रम् प्रकाशते। अज्ञानमेव आत्मनः स्वरूपानन्दानुभवे प्रतिबन्धकं भवति। अज्ञानम् अत्र मुख्यतया अन्यथाज्ञानमेव। तच्च अहम् मनुष्यः कर्ता, सन्ति मम नैकानि कर्तव्यानि, ततश्च सन्ति भोक्तव्यानि फलानि इत्यादिरूपम् भवति। तेन आनन्दात्मकम् आत्मनः मूलरूपम् आच्छादितम् अस्ति। अतः संसारः आरब्धः अस्ति। ईदृशम् अज्ञानं लौकिकसम्बन्धानाम् ग्रहणेन तिष्ठति, साधारणीकरणे जाते तु तत् अज्ञानम् तात्कालिकनिवृत्तिम् प्राप्नोति। यथा विभाविदीनां विषये साधारणीकरणम् भवति तथा सहृदयस्य स्वविषये अपि साधारणीकरणम् भवति तदा अज्ञानस्य तात्कालिकनिवृत्तिः भवति। तदा पूर्वमेव विभावादिभिः प्रबोधितः साधारणीकृतश्च रत्यादिः स्थायी भावः चिदानन्दोपहितः रसः इत्यभिधीयते। एवम् विभावादिभिः प्रबोधितः सहृदयत्वमहिम्ना साधारणीकृतः रत्यादिः स्थायी भावः रसः इति अभिनवगुप्त-मम्मटादीनाम् मतम्।

जगन्नाथमते तु सहृदयत्वमहिम्ना विभावादयः साधारणा भवन्ति। तैः प्रबोधितो रत्यादिः स्थायी भावोऽपि साधारणः भवति। तदा साधारणीकृतेन चित्तवृत्त्यात्मना स्थायिभावेन उपहितः आत्मापि साधारणः सम्पद्यते। अतः लौकिककर्तृत्वादिसम्बन्धावरणम् विना एव व्यवतिष्ठते। एवम् स्वरूपप्रतिबन्धकनिवृत्त्या आत्मा रत्यादि-स्थायिभावेन उपहितं चिदानन्दलक्षणम् आत्मानम् आत्मना संवेत्ति। तेन साधारणीकृतेन रत्यादिना संवलितः अज्ञानावरणरहितः आत्मैव रसः इति स्थितम्। वेदेऽपि आम्नातम् "रसो वै सः, “रसं ह्येवायं लब्ध्वा आनन्दी भवति" इति। (तैत उप.ब्रह्म.वल्ली) रसः एव आत्मा। सः रसम् अर्थात् आत्मानम् लब्ध्वा आनन्दी भवति इति अस्य मन्त्रस्य अर्थः।

पाठगतप्रश्नाः-२

६. रसः कः।

७. कति स्थायिभावाः सन्ति।

८. आहार्यज्ञानम् किम्।

९. अज्ञानम् किम्।

१०. व्यभिचारिभावः कः।

२७.५) रससूत्रविवरणे मतभेदाः

रससूत्रस्य विवरणे चत्वारः वादाः प्रसिद्धाः सन्ति। ते अभिनवभारत्याम् उपलभ्यन्ते। रस उत्पद्यते इति भट्टलोल्लटः। रसः अनुमीयते इति श्रीशङ्कुकः। रसो भुज्यते इति भट्टनायकः। रसः अभिव्यज्यते इति अभिनवगुप्तः। अधुना एतानि मतानि सङ्क्षेपेण अवलोक्यन्ते।

उत्पत्तिवादः -

विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः इति भरतमुनिकृतं रससूत्रम् भवति। अत्र निष्पत्तिः इति पदस्य उत्पत्तिः इति अर्थं प्रतिपादयति भट्टलोल्लटः। अस्य मते विभावादीनां स्थायिभावानां रसस्य च मध्ये उत्पाद्य-उत्पादकभावः सम्बन्धः। अस्य मते रसः अनुकार्ये भवति। नटेन अभिनयद्वारा यस्य अनुकरणम् क्रियते सः अनुकार्यः। यथा रामः कृष्णः इत्यादयः अनुकार्याः। अनुकार्ये स्थितो रसो नटे रामत्वाद्यनुसन्धानबलात् प्रतीयते। तेन मुख्यतया अनुकार्येषु रामादिषु रसो भवति। गौणतया च स रसो नटेषु भवति इति भट्टलोल्लटमतम्।

अनुमितिवादः -

अनुमितिवादम् प्रतिपादितवान् श्रीशङ्कुकः। एष भट्टलोल्लटमते दोषम् आविष्करोति। रसः अनुकार्ये रामादौ यदि अङ्गीक्रियेत तर्हि ते रामादयः अधुना न सन्ति, यदि स्युः, अथापि न स रङ्गमञ्चे तिष्ठति। तस्मात् अनुकार्ये रसो न युक्तः। अतो रसः अनुमीयते इति अङ्गीकरणीयम्। लोके पर्वते दृश्यमानम् धूमम् दृष्ट्वा तत्र पर्वते वह्निः भवति इति निश्चयः क्रियते। अर्थात् समुचितकारणम् पुरस्कृत्य वह्नेः अनुमानम् क्रियते इत्यर्थः। एवं रामसीतादीनाम् अनुकर्तृषु नटेषु चुम्बनालिङ्गनादीन् अभिनयरूपान् चेष्टाविशेषान् दृष्ट्वा तत्तत् चेष्टानुगुणम् रसं नटेषु अनुमिन्वन्ति सामाजिकाः। अत्र नटे रसम् अनुमाय सहृदयाः स्वस्मिन् आनन्दम् अनुभवन्ति। इत्थम् श्रीशङ्कुकमते रसः अनुमानेन उपलभ्यते इति स्थितम्। तस्मात् रससूत्रे निष्पत्तिपदस्य अनुमितिः इत्यर्थः सिध्यति तन्मते।

भुक्तिवादः-

भुक्तिवादं भट्टनायकः प्रतिष्ठापितवान्। एष प्रथमम् श्रीशङ्कुकमते दोषम् आविष्करोति। नटेषु रसो यदि अङ्गीक्रियेत तर्हि काव्यादिषु सहृदयानाम् आनन्दः कथम् भवितुम् अर्हति। काव्यादिषु आनन्दः यदि सहृदयस्य न भवति तर्हि सहृदयः काव्यादिषु किमर्थम् प्रवर्तेत। नटेषु अनुमितो रसो लौकिक एव भवति। तस्य साधारणीकरणम् नास्ति इति कारणात् शृङ्गारादिरसप्रधानम् काव्यम् सभ्यानां जुगुप्साकरम् भवेत्। अनुमानपक्षे तु हेतुः व्यभिचरितो भवति इति अन्योऽपि दोषः श्रीशङ्कुकमते तिष्ठति। तस्माद् भट्टनायको भुक्तिवादम् प्रतिपादयति। तन्मतं यत् काव्ये अभिधया काव्यार्थबोधः सम्पद्यते इति। तदनन्तरम् काव्यस्य भावकत्वव्यापारेण विभावादीनां साधारणीकरणम् भवति। ततः सहृदयस्य सत्त्वोद्रेको भवति यो

रसानुभवयोग्यताम् मनसि निष्पादयति। तदा चित्तविक्षेपकारकौ रजस्तमोगुणौ न तिष्ठतः। ततः परं चिदानन्दरूपी आत्मा स्वस्मिन् विश्रान्तो भवति। सा च विश्रान्तिः रत्यादिस्थायिभावसहिता भूत्वा भोगीकरणव्यापारेण भुज्यते। तस्मात् अस्मिन् मते निष्पत्तिः इत्यस्य भुक्तिः इत्यर्थः।

भट्टनायकमते दोषाः -

विभावादीनां साधारणीकरणार्थं काव्यशब्दानामेव भावकत्वव्यापारः अङ्गीकृतः। स च अयुक्तः। भावकत्वं च सहृदयहृदयधर्मो भवति, न तु शब्दधर्मः।

आत्मविश्रान्तिरूपं रसम् आस्वादयितुम् भोजकत्वव्यापारः तेन अङ्गीकृतः। स च न आवश्यकः। यतो हि घटेन आच्छादितं दीपं द्रष्टुं घटस्य अपसारणमात्रं कर्तव्यम् अस्ति। घटापसारणे कृते ज्वलन् दीपः स्वयमेव प्रकाशते। घटापसारणात् परं दीपप्रदर्शनम् इति अपरो व्यापारः अवशिष्टो न भवति। तथा आत्मनः चैतन्यरूपिणः आनन्दस्य अनुभवे प्रतिबन्धकनिवारणम् यदा भवति तदा स्वप्रकाशस्य आत्मनो विश्रान्तिसुखम् आत्मना एव अनुभूयते।

भट्टनायकमते गुणाः -

रसः सहृदयनिष्ठ इति तस्य मतम् अतीव समञ्जसम्। रसप्रक्रियायाम् प्रधानम् कीलकस्थानम् विभावादीनाम् साधारणीकरणम्। तस्य निरूपणे भट्टनायकस्य सुमहद् योगदानम् भवति।

अभिव्यक्तिवादः-

अभिव्यक्तिवादम् प्रतिष्ठापितवान् अभिनवगुप्तपादः। आनन्दवर्धनस्य मतम् आसीत् यत् काव्यरसयोर्मध्ये व्यङ्ग्य-व्यञ्जकभाव इति। तस्य सुष्ठु प्रतिष्ठाम् कृतवान् अभिनवगुप्तपादः। अस्य मते रसो निष्पद्यते इत्यस्यार्थो हि रसः अभिव्यज्यत इति। काव्येन नाट्येन वा विभावादीनाम् उपस्थापनम् भवति। सहृदयत्वमहिम्ना विभावादीनां साधारणीकरणम् भवति। साधारणीकृतैः विभावादिभिः सहृदयस्य रत्यादिस्थायिभावानां साधारणीकरणपूर्वकमेव प्रबोधनम् भवति। साधारणीकृते स्थायिभावे प्रमाता अपि साधारणो भवति, अर्थात् अज्ञानस्य तात्कालिकनिवृत्तिः भवति। अज्ञानञ्च अत्र लौकिकसम्बन्धरूपम् अहम् कर्ता, मम एते, मम न एते, इदम् अन्येषाम् इत्यादिलक्षणम् भवति। येन प्रमाता असाधारणः परिमितश्च भवति। तस्य तात्कालिकनिवृत्तौ सम्बन्धावरणरहितो रत्यादिस्थायिभावः आत्मस्वरूपेण चिदानन्देन विषयीकृतो भवति। एवं साधारणीकृतः अत एव चिदानन्दविषयीकृतः स्थायिभावः अभिव्यक्तः इत्युच्यते। स च आनन्दरूपी रसो भवति।

एतेन अभिव्यक्तिवादेन रससिद्धान्तः प्रतिष्ठितः। जगन्नाथः अस्य चरमपरिष्कारम् कृतवान्। अभिनवगुप्त-मम्मटादीनाम् मते चिदानन्दसंवलितः अज्ञानावरणरहितः स्थायी भावो रसो भवति। जगन्नाथमते तु रत्यादिस्थायिभावसहितः किन्तु अज्ञानावरणरहित आत्मा एव रसो भवति। अन्याः प्रक्रियाः जगन्नाथमते अभिनवगुप्तादीनाम् मते च समाना भवन्ति।

पाठगतप्रश्नाः-३

११. रसः अनुकार्ये अस्ति इति कः अवदत्।

१२. अनुकर्तरि रसः अस्ति इति कस्य मतम्।

१३. भोगीकरणव्यापारः कुतः स्वीकृत्ः।

१४. साधारणीकरणम् प्रथमतया केन निरूपितम्।

१५. अभिव्यक्तिवादस्य प्रतिष्ठा केन कृता।

१६. आनन्दवर्धनमते रसः कीदृशः।

१७. अभिनवगुप्तमते भोगीकरणम् कुतः नास्ति।

१८. अभिनवगुप्तमते साधारणीकरणम् कथम् सिद्ध्यति।

२७.६) करुणरसविषये आक्षेपः समाधानञ्च

शोकस्थायिभावात्मको भवति करुणरसः। शोकः तस्य स्थायिभावः चेत् अयम् आनन्दमयो न भवेत्। अतो रस्यते आस्वाद्यते इति रस इति रसपदव्यवहारः करुणे युक्तो न भवति इति आक्षेपः। तस्य समाधानम् एवं विद्यते - करुण आनन्दरूपी इत्यत्र सहृदयानाम् अनुभवः प्रमाणम्। यदि करुणरसो दुःखरूपी तर्हि करुणरसात्मके काव्ये कोऽपि न प्रवर्तेत। करुणप्रधानं रामायणादिकाव्यं लोके दुःखहेतुः स्यात्। किन्तु तेषु काव्येषु लोकस्य इच्छापूर्वक-प्रवृत्तिः दृश्यते। अतः करुण आनन्दरूपी एव। रसप्रक्रियायाम् अङ्गीकृतेन साधारणीकरणेन करुणो दुःखरूपी इति न सिद्ध्यति।

२७.७) रसानाम् क्रमः

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा पुनः।। (सा.द.३.७६)

अत्र रसानां क्रमो विद्यते। भरतमुनिः अपि इममेव क्रमम् अनुसृतवान्। शृङ्गारः हास्यः करुणः रौद्रः वीरः भयानकः बीभत्सः अद्भूतः शान्तः इति नव रसाः क्रमशो विद्यन्ते। एतस्य क्रमस्य महत्त्वं वर्णयति अभिनवगुप्तः अभिनवभारत्याम्।

तत्र रतिः सकलप्राणिनाम् स्वाभाविकी बलवती प्रिया च भवति। तस्माद् रतिस्थायिभावकः शृङ्गारः प्रथमः। स कामप्रधानः। हास्यः सर्वदा शृङ्गारानुगामी। तस्मात् स द्वितीयः। सुखस्य विरोधी शोकः। तस्मात् शोकस्थायिभावः करुणः तृतीयः। करुणस्य निमित्तभूतः क्रोधः। तस्मात् क्रोधस्थायिभावात्मको रौद्ररसः चतुर्थः। रौद्रः अर्थप्रधानः अर्थात् जीवनस्य साधनभूतानाम् द्रव्याणाम् कारणाद् जायते। जीवनसाधनभूतं सर्वं द्रव्यम् अर्थ इत्युच्यते। तस्य अर्थपुरुषार्थः इति नाम। कामस्य अर्थस्य च मूलं धर्मः। तस्माद् धर्मप्रधानो वीररसः पञ्चमः। उत्साहस्थायिभावात्मकः स भीतानाम्

अभयप्रदानपरः। अतो वीरानन्तरम् भयानकः। भयानकरसस्य विभावादीनां साधारण्यम् बीभत्सस्य भवति। तस्माद् भयानकानन्तरम् बीभत्सः। वीररसस्य अन्तिमपरिणामो विस्मयः। तस्माद् अन्ते विस्मयस्थायिभावः अद्भुतरसः। एवम् अष्टौ रसा धर्मार्थकामरूपस्य त्रिवर्गस्य प्रतिनिधित्वेन व्यवस्थापिताः। त्रिवर्गस्तु प्रवृत्तिधर्मेण सिद्धो भवति। तद्विरुद्धो निवृत्तिधर्मः। तेन अपवर्गः अर्थाद् मोक्षः सिद्ध्यति। तस्मात् सर्वान्ते मोक्षफलकः शान्तः पठितः।

२७.८) शान्तरसस्य महत्त्वम्

अलङ्कारशास्त्रे शान्तरसस्य परमोच्चं स्थानं वर्तते। शान्तरसविषये भरतमुनिः एवम् अवदत् - **अथ शान्तो नाम शमस्थायीभावात्मको मोक्षप्रवर्तकः। स तत्त्वज्ञान-वैराग्य-आशयशुद्ध्यादिभिः भावैः समुत्पद्यते** इति। अस्य अयम् अर्थः - शमस्थायिभावेन शान्तरसः परिपक्वो भवति। शमभावः आत्मानात्मविवेकरूपेण तत्त्वज्ञानेन वैराग्येण च सिद्ध्यति। शमो नाम शान्तिः उपशमः अर्थात् संसारे यत्किञ्चित् पदार्थद्वारा प्राप्तव्यात् सुखात् दुःखात् वा मनसि क्षोभो यदि न भवति स शमभावः। संसारस्य आत्मनश्च यथार्थबोधः तत्त्वज्ञानम् इत्युच्यते। तत्त्वज्ञानेन दुःखात्मके अनित्ये संसारे औदासिन्यम् भवति। तत्त्वज्ञानसिद्धेन वैराग्येण संसारे प्राप्तुम् इष्टं कर्तव्यं वा न तिष्ठति। ईदृशं वैराग्यम् अवलम्ब्य आत्मज्ञानरूपम् ब्रह्मानन्दम् आत्मनि प्राप्तुम् अर्हति। शमस्थायिभावात्मकः शान्तरसो नित्यानित्यविवेक-वैराग्य-ध्यान-ब्रह्मचिन्तनादि-भावैः सिद्धं मोक्षम् प्रति प्रेरणाम् जनयति। तस्मात् शुक-शङ्कराचार्यादीनां जीवनचरितम् मुमुक्षवः अपि आस्वादयन्ति। आत्मनि यथा सर्वे लोका लीयन्ते तथा सर्वे भावा अर्थात् रसाः शान्ते लीयन्ते। तदुक्तवान् भरतमुनिः-

स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते।।

सरलार्थः - रति-हास-शोकादि-निमित्तानि आश्रित्य शृङ्गार-हास्य-करुणादि-रसाः अभिव्यज्यन्ते। पुनः रतिहासादिनिमित्तानाम् अभावे ते शान्ते एव लीयन्त इति। तस्मात् स एव वदति -

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।

सरलार्थः - शृङ्गारादयः अष्टौ रसाः शान्ताद् उत्पद्यन्ते यथा आत्मनो जगद्भावा उत्पद्यन्ते। शान्तो न उत्पद्यते इत्यतः स प्रकृतिः इत्युच्यते यथा वेदान्तिनाम् परमात्मा।

रसतालिका

रसः	स्थायिभावः	व्यभिचारिभावाः	वर्णः	देवता
शृङ्गारः	रतिः	लज्जा-हास-चिन्ता-कुतूहलप्रभृतयः	श्यामः	विष्णुः
हास्यः	हासः	निद्रा-आलस्यादयः	श्वेतः	प्रमथगणः
करुणः	शोकः	मोह-विषाद-ग्लानि-स्मृतिप्रभृतयः	कपोतवर्णः	यमः
रौद्रः	क्रोधः	मद-अमर्ष-मोहप्रभृतयः	रक्तवर्णः	रुद्रः

वीरः	उत्साहः	धृति-मति-गर्व-स्मृतिप्रभृतयः	हेमवर्णः गौरो वा	इन्द्रः
भयानकः	भयम्	भ्रान्ति-शङ्का-अवस्मारप्रभृतयः	कृष्णवर्णः	कालः
बीभत्सः	जुगुप्सा	मोह-आवेग-अवस्मार-व्याधिप्रभृतयः	नीलवर्णः	महाकालः
अद्भुतः	विस्मयः	वितर्क-भ्रान्ति-आवेग-हर्षादयः	पीतवर्णः	ब्रह्मा
शान्तः	शमः	निर्वेद-धृति-मति-दयादयः	अतिधवलवर्णः	नारायणः

पाठगतप्रश्नाः-४

१९. हास्यः कम् अनुगच्छति।

२०. धर्मप्रधानः रसः कः।

२१. करुणात्परम् रौद्ररसः कुतः।

२२. मोक्षप्रवर्तकः रसः कः।

२३. शान्तस्य स्थायीभावः कः।

२४. विकृतिरसाः कति।

२५. शान्तः कुतः प्रकृतिरसः।

२६. भावाः कदा शान्ते विलीयन्ते।

किम् अवगतम्

काव्यस्य काव्यशास्त्रस्य च परमोच्चः विषयः भवति रसः। रसस्य अनुभवेन कवयः काव्यम् रचयन्ति। तेन काव्येन रसमेव अनुभवन्ति सहृदयाः। काव्यस्य शब्द-अर्थ-अलङ्कारादयः सर्वे अंशाः रसे परिसमाप्यन्ते। रसः स्वस्मिन् परिसमाप्तः। स काव्यात्मा। तस्य निष्पत्तिम् भरतमुनिः निरूपितवान्। विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः इति भरतकृतं रससूत्रम्। काव्येन नाट्येन वा समर्पिता विभावादयः सहृदयत्वबलात् साधारणा भवन्ति। साधारणीकरणात् ते काव्यपदार्था लोकोत्तरा भवन्ति। एवं साधारणा अलौकिकाः च सन्तो विभावादयः सहृदयानां रत्यादिस्थायिभावान् उद्बोधयन्ति। तदा रत्यादिस्थायिभावः अपि साधारणः सन् जागरितो भवति। साधारणीकरणबलात् लौकिकसम्बन्धाः तत्र न प्रतीयन्ते। ततःपरम् आत्मानन्दस्य प्रतिबन्धकम् अज्ञानम् तात्कालिकनिवृत्तिम् प्राप्नोति। तदा प्रतिबन्धकाभावात् स्वयंप्रकाशशीलेन आनन्दरूपिणा आत्मना विभावादिभिः अभिव्यक्तः स्थायी भावः प्रकाशितो भवति। साक्षाद् आत्मना प्रकाशो भवति, अतः स्थायी भाव आनन्दमयो भवति। एवं

विभावादिभिः अभिव्यक्तो रत्यादिस्थायिभावो रस इति अभिनवगुप्तमम्मटादीनाम् अभिप्रायः। जगन्नाथस्तु रत्यादिस्थायिभावयुक्त आवरणरहित आत्मा एव रस इति वदति। तत्र प्रमाणश्रुतिः भवति - रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दी भवति। इति।

रसव्याख्याने चत्वारो वादाः प्रसिद्धाः। ते च क्रमेण उत्पत्तिवादः, अनुमितिवादः, भुक्तिवादः, अभिव्यक्तिवादः चेति। तेषां वादानां वक्तारः क्रमेण भट्टलोल्लटः, श्रीशङ्कुकः, भट्टनायकः, अभिनवगुप्तपादः चेते भवन्ति। स्थायिभावाः नव सन्ति। तेन रसा अपि नव भवन्ति। तेषु शृङ्गारतः अद्भुतपर्यन्तम् अष्टौ रसा धर्मार्थकामानां प्रतिनिधिरूपा भवन्ति। शान्तो मोक्षप्रतिनिधिर्भवतीति शम्।

पाठान्तप्रश्नाः

१. रससूत्रम् व्याख्यात।

२. साधारणीकरणम् निरूपयत।

३. काव्यपदार्थस्य लोकोत्तरत्वम् कथम् सिद्ध्यति।

४. भट्टनायकमते गुणदोषयोः आलोचनम् कुरुत।

५. अभिव्यक्तिवादम् विषदयत।

६. करुणस्य आनन्दमयत्वम् उपपादयत।

७. शान्तरसस्य महत्वम् प्रतिपादयत।

८. उत्पत्तिवादे अनुमितिवादे च के दोषाः सन्ति।

पाठगतप्रश्नानामुत्तराणि

१. रसः

२. येन रत्यादिस्थयीभावः प्रबोध्यते सः विभावः

३. षष्ठाध्याये

४. रसस्य प्रकाशनाय

५. रस्यते आस्वाद्यते इति रसः

६. विभावादिभिः अभिव्यक्तः रत्यादिः स्थायीभावो रसः।

७. नव।

८. यत्किञ्चित्प्रयोजनवशात् विवेकपूर्विका अतस्मिन् तद्बुद्धिः।

९. अहम् कर्ता मम कर्तव्यानि सन्ति इत्यादि अन्यथाग्रहणम् अज्ञानम् इत्युच्यते।

१०. व्यभिचरणशीलः अर्थात् अस्थिरस्वभावः व्यभिचारिभावः।

११. भट्टलोल्लटः।

१२. श्रीशङ्कुकस्य।

१३. रसानुभवार्थम्।

१४. भट्टनायकेन।

१५. अभिनवगुप्तेन।

१६. रसः अभिव्यङ्ग्यः।

१७. रसः स्वप्रकाशः इति कारणात्।

१८. सहृदयत्वमहिम्ना।

१९. शृङ्गारम् अनुगच्छति।

२०. वीररसः।

२१. शोकनिमित्तः क्रोधः।

२२. शान्तः।

२३. शमः।

२४. अष्टौ।

२५. सर्वेरसाः शान्ते लीयन्ते।

२६. निमित्ते नष्टे शान्ते विलीयन्ते।

अवलोकनीयाः ग्रन्थाः

- साहित्यदर्पणम् - तृतीयाध्यायः
- काव्यप्रकाशः - तृतीयाध्यायः
- रसगङ्गाधरः - प्रथमाननम्
- अभिनवभारती - षष्ठ्याध्यायः

॥ इति सप्तविंशः पाठः ॥

राष्ट्रियमुक्तविद्यालयीशिक्षासंस्थानम्

उच्चतरमाध्यमिककक्षायाः पाठ्यक्रमः

संस्कृतसाहित्यम् (३४८)

औचित्यम्

संस्कृते काव्यसम्पत्तिः सागरवत् अपारा अमूल्या च वर्तते। तत्र अस्माकं सनातनज्ञानराशिः तदात्मकं जीवनं च प्रतिबिम्बितं वर्तते। कवीनां काव्यानाम् अलङ्कारशास्त्रस्य च अध्ययने छात्रस्य भूमिका अपेक्षिता। काव्यराशेः मूलं स्वरूपं वेदे एव दृश्यते। साहित्यस्य प्रवेशार्थं वेदादिवाङ्मयस्य परिचयः आवश्यकः अस्ति। अपि च वेदेन उपदिष्टं तत्त्वमेव काव्येन प्रकटीक्रियते। वेदस्तु षडङ्गसहितः अस्ति। अतः वेदस्य षडङ्गानाञ्च परिचयः अपि आवश्यकः। वेदकाव्ययोः मध्यवर्ति पुराणसाहित्यम्। तस्मात् पुराणस्यापि सामान्यपरिचयः आवश्यकः। स च अत्र अस्ति। एवं वेदस्य पुराणस्य च परिचयं प्राप्य काव्यस्य प्रवेशः भवति।

संस्कृतिर्नाम सुपरिष्कृता जीवनपद्धतिः यया क्रमशः आत्मोद्धारः सिद्ध्यति। भारतीयसनातनसंस्कृतिः चतुर्भिः पुरुषार्थैः परिकल्पिता वर्तते। धर्मः अर्थः कामः मोक्षः इति चत्वारः पुरुषार्थाः। कामो नाम लौकिकजीवनसन्तृप्तिः सुखं वा। अर्थो नाम तादृशसुखलाभार्थम् अपेक्षितानि वस्त्र-आहार-धन-क्षेत्रादीनि जीवनसाधनानि। धर्मो नाम अर्थानामर्जने तद्वारा सुखलाभे शास्त्रोक्तः नियमविशेषः। मोक्षः अनन्तः शाश्वतानन्दः। एतेषां विवेके वेदः परमं प्रमाणम्।

कवेः कर्म काव्यम् इति आलङ्कारिका वदन्ति। तच्च रमणीयं शब्दार्थयुगलम्, रसात्मकं वाक्यम् इत्यपि अन्यान्यविद्वांसः वदन्ति। अस्मत्परम्परायां जीवनविवेकाय शास्त्रमार्गः इव काव्यमार्गोऽपि अतीव आदृतो वर्तते।

वेदः प्रभुसम्मितः इत्युच्यते। पुराणं मित्रसम्मितम् उत्युच्यते। काव्यं हि कान्तासम्मितं भवति। कान्तासम्मितं नाम कान्तासदृशम् इत्यर्थः। कान्ता नाम प्रिया भार्या इत्यर्थः। (यदा) लोके साध्वीं कुशलां च कान्तां किमपि जिज्ञासमानः पृच्छति। तदा सा साक्षात् अभिप्रायवाचकं वाक्यं परित्यजति। ततः स्मित-कटाक्ष-मुखावनमनादिचेष्टाविशेषपुरःसरं परोक्षतः स्वाभिप्रायसूचकैः वचनैः अभिमतार्थं ज्ञापयन्ती तत्र कान्तं प्रवर्तयति। यथा किम् आम्रफलम् आस्वादयसि उत द्राक्षाफलम् इति कान्तः कान्तां पृच्छति। तदा आम्रफलमास्वादयामि इति साक्षात् न वदति। आम्रफलं मधुरं परिमलयुक्तं विविधवर्णरञ्जितं भवति इति वदति। तेन एतदेव उक्तं भवति यत् अहम् आम्रफलम् आस्वादयितुमिच्छामि इति। एवं कान्तानां यथा परोक्षतः स्वाभिप्रायाभिव्यञ्जनशैली वचने भवति तथा काव्यस्यापि भवति। अतः काव्यं कान्तासम्मितम् इति प्रसिद्धम्। कान्तावचनं यथा सरसं मनोहरं भवति तथा काव्यमपि सरसरमणीयं भवति येन सहृदयहृदयम् आकृष्टं भवति। एतस्मात् कारणात् वेदात् पुराणात् च विलक्षणं भवति।

ईदृशनां काव्यानाम्, कवीनाम्, काव्यशास्त्रस्य च परिचयः छात्राणाम् भवतु इति धिया संस्कृतसाहित्यम् नाम पत्रं पाठ्यत्वेन योज्यते। (Communications Skill) भावविनिमयकौशलम् पुरा अद्यापि च गुरुत्वम् आवहति। स्वाभिप्रायः कथं साक्षात् परोक्षतः वा प्रकटयितुं शक्यः इति काव्यात् ज्ञायते। इत्थं काव्याध्ययनस्य बहूनि प्रयोजनानि सन्तीति औचित्यम् आवहति यद् सर्वश्रेष्ठानां कवीनाम् काव्यानि पठनीयानि इति।

अधिकारी

अयं पाठ्यविषयः सम्पूर्णरूपेण संस्कृतभाषया लिखितः अस्ति। परीक्षा अपि संस्कृतमाध्यमेन एव भविष्यति। अतः अस्य पाठस्य कः अधिकारी इति नूनम् समुदेति प्रश्नः।

अत्र स छात्रः अधिकृतः यः -

- अधीतव्याकरणकोषः काव्यरसपिपासुः।
- सरलसंस्कृतं, संस्कृतसाहित्यास्य सरलगद्यांशान् पद्यांशान् च पठितुम् बोद्धुं च शक्नोति।
- सरलसंस्कृतं बोद्धुं शक्नोति।
- स्वभावं संस्कृतभाषया लिखित्वा प्रकटयितुं शक्नोति।

प्रयोजनम् (सामान्यम्)

उच्चतरमाध्यमिकस्तरे संस्कृतसाहित्यस्य पाठ्यत्वेन योजनस्य कानिचन उद्देशानि अत्राधो दीयन्ते।

- जीवनस्य चरमलक्ष्यं सुखलाभः। इह परत्र च। काव्याध्ययनेन तत् सिद्ध्यति। अतः अध्येतृणां सिध्यतु।
- बहूनि काव्यानि सुखप्रतिपादनाय प्रवृत्तानि सफलानि विफलानि च भवन्ति। तत्र वैफल्यस्य कारणानि कानि इति ज्ञात्वा छात्रः काव्यस्य सूक्ष्मं चिन्तनं कर्तुम् प्रभवेत्।
- कविः यथा स्वस्य विचित्राभिः उक्तिभिः जनान् रञ्जयति तथा काव्याध्ययनेन छात्रोऽपि सामर्थ्यम् अर्जयेत्। अन्यकृतस्य काव्यस्य च आदरं कुर्यात्।
- स्वस्य स्वपरिचितानां च जीवनं काव्यरसेन परिपूर्णं कर्तुं प्रवर्तते।
- संस्कृतकाव्यानां महिमानम् अवगम्य तत्प्रचारे बद्धादरः सश्रद्धं प्रवर्तताम्।
- अति प्राचीनाया भारतीयज्ञानसम्पदः वैज्ञानिकता सर्वजनोपकारिता महिमा च सगर्वं जगति प्रसारयेत् छात्रः।
- काव्यग्रन्थानाम् सरलान् अंशान् पठित्वा छात्राः तेषाम् अंशानाम् अर्थान् ज्ञास्यन्ति। ते स्वतः मौखिकीं लिखितां च अभिव्यक्तिं कर्तुं शक्ष्यन्ति।
- काव्याध्ययनेन छात्राः महाविद्यालयस्तरे विश्वविद्यालयस्तरे च प्रवर्तमानेषु पाठ्यक्रमेषु अध्ययनार्थम् अवसरं प्राप्तुं समर्थाः भविष्यन्ति।
- काव्येषु रुचिमान् भूत्वा शक्तः संलग्नः भविष्यति।

प्रयोजनम् (विशिष्टम्)

संस्कृतसाहित्ये प्रवेशस्य सामर्थ्यम्

- काव्येषु के विषया अन्तर्भवन्ति इति सामान्यज्ञानं भवेत्।
- कवीनां परिचयं प्राप्नुयात्।
- काव्यानां परिचयं प्राप्नुयात्।
- काव्यालङ्कारच्छन्दसाम् परिचयं प्राप्नुयात्।
- रससिद्धान्तं जानीयात्।
- पठितसामग्रीम् आश्रितानां प्रश्नानाम् उत्तराणि दातुं प्रभवेत्।।

संस्कृतसाहित्याध्ययने सामर्थ्यम्

- काव्यानाम् अध्ययनस्य कश्चित् विशिष्टः क्रमः वर्तते। तज्ज्ञानं प्राप्य काव्यस्य अग्रे अध्ययने समर्थो भवेत्।
- काव्ये विद्यामानां छन्दसाम् अलङ्काराणां व्याकरणांशान् च ज्ञास्यति।
- तेषां ज्ञानेन अन्यत्र विद्यमानानाम् अलङ्कारादीनां ज्ञानं भवेत्।
- कवीनाम् अलङ्कारिकाणां च परिचयं प्राप्नुयात्।

- छन्दः अलङ्कारः रसः इत्यादीन् विषयान् बुद्ध्वा स्वयं काव्यरचनायां सामर्थ्याशाली भवेत्।
- अस्य पाठ्यविषयस्य ज्ञानेन तस्मिन् दर्शने विद्यामानानाम् अन्येषाम् आकरग्रन्थानाम् अध्ययने समर्थो भवेत्।

संस्कृतसाहित्यप्रयोगस्य सामर्थ्यम्

- संस्कृतकाव्यानाम् अध्ययनेन स्वस्य वाचि काव्यात्मकता स्यात्।
- अपरकृतस्य काव्यप्रयोगस्य ज्ञानं भवेत्।
- भावविनिमयः प्रभावितया कर्तुम् प्रभवेत्।
- वाण्या भावविनिमये अलङ्कारादीनाम् शास्त्रसम्मतं प्रयोगं कर्तुं प्रवर्तेत
- वाचि विद्यमानं संयोगवियोगसामर्थ्यम् अवगच्छेत्।
- यथा वैद्यः जनं दृष्ट्वा तस्य रोगादिकं चिन्तयति। चौरः वित्तकोषादिकं चिन्तयति। वणिक् क्रेतारम् पश्यति। तथा जगतः कविरूपेण दर्शने समर्थो भवेत्।

पाठ्यसामग्री

पाठ्यक्रमेण सह निम्नलिखितसामग्री समायोजिता भविष्यति

- द्वे मुद्रिते पुस्तके।
- एकं शिक्षकाङ्कित-मूल्याङ्कनप्रपत्रम् प्रदास्यते। अनेन सह छात्रैः एकं परियोजनाकार्यमपि (Project) करणीयम्।
- काव्यस्य शिक्षणं प्रायोगिकरूपेण अपि भविष्यति। परन्तु प्रायोगिकपरीक्षा कापि नास्ति।
- पाठनिर्माणे संपर्ककक्षासु च अध्यापनकाले छात्रेषु जीवनकौशलानां सम्यक् विकासः भवेत् इति ध्यातव्यम् भविष्यति। अनेन तेषु स्वतः युक्तिसमन्वितचिन्तनशक्तेः विकासः भविष्यति।
- मुक्तविद्यालये प्रवेशोत्तरं पाठ्यक्रममिमं विद्यार्थी एकवर्षत: अधिकाधिकं पञ्चवर्षेषु पूरयितुं शक्नोति।

अङ्कमूल्यायनप्रविधिः परीक्षायोजना च

- पत्रस्य (१००) शतम् अङ्काः सन्ति। परीक्षाकालः होरात्रयात्मकः। अस्य पत्रस्य लिखितस्वरूपमेवास्ति (Theory)। प्रायोगिकरूपं (Practical) किमपि नास्ति। क्रमिकम् (Formative) समुच्चितं (Summative) चेति द्विविधं मूल्यायनं भविष्यति।
- **क्रमिकं मूल्यायनम्** - विंशतेः अङ्कानां (२०) शिक्षकाङ्कितस्य कार्यस्य (TMA) एकं पत्रं स्यात्। अस्य मूलायनम् अध्ययनकेन्द्रे (Study Centre) भवेत्। अस्य कार्यस्य अङ्काः अङ्कपत्रिकायां (Marks sheet) पृथक् उल्लिखिताः स्युः।
- **समुच्चितं मूल्यायनम्** - वर्षे वारद्वयं (मार्चमासि अक्टोबरमासि च) बाह्यपरीक्षा भविष्यति। तत्र परीक्षायां समुच्चितं मूल्यायनं भविष्यति।
- प्रश्नपत्रे ज्ञानम् (Knowledge), अवगमम् (Understanding) अभिव्यक्तिं (Application skill) चावलम्ब्य युक्तानुपातेन प्रश्नाः समाविष्टाः स्युः।
- परीक्षासु अतिलघूत्तरात्मक- लघूत्तरात्मक-निबन्धात्मक-प्रश्नानामपि समावेशः भविष्यति।
- सूत्रार्थः सूत्रव्याख्या रूपसाधनम् इति त्रयो मुख्याः विषयाः स्युः। अन्ये प्रसक्तानुप्रसक्ताः केचिद् विषयाः अपि स्युरिति अवधेयम्।
- उत्तीर्णतायै पणः (condition) - प्रतिशतं त्रयस्त्रिंशद् (३३%) अङ्काः उत्तीर्णतायै पणः (मानदण्डः) वर्तते।
- संस्थानस्य परीक्षायाम् उत्तरलेखनभाषा - संस्कृतम् (अनिवार्यम्)

अध्ययनयोजना

- निर्देशभाषा (Medium of instruction) - संस्कृतम्।
- स्वाध्यायाय कालावधिः (Self-study hours) २४० होराः
- न्यूनतः त्रिंशत् (३०) सम्पर्ककक्षाः (Personal Contact Programme - PCP) अध्ययनकेन्द्रेषु भविष्यन्ति।
- भारांशः - सैद्धान्तिकः (Theory) शतं प्रतिशतम्।
- प्रायोगिकम् (Practical) - नास्ति।

अङ्कविभाजनम्

अग्रे सारण्यां द्रष्टव्यम्

पाठ्यविषयस्य उद्देशः (पाठ्यविषयबिन्दवः)

उच्चतरमाध्यमिककक्षायाः संस्कृतसाहित्यस्य पुस्तके निम्नविषयाः अन्तर्भवन्ति। विवरणमधस्तादुपन्यस्यते।-

समग्रस्य पाठ्यविषयस्य भागाः प्रकल्पिताः सन्ति। प्रतिभागम् कति पाठाः, स्वाध्यायाय कति होराः, सैद्धान्तिकपरीक्षायाम् कियान् अंशः, प्रायोगिकपरीक्षायाम् कियान् अंशः, प्रत्यध्यायम् अङ्कविभाजनं चेति विषयाः अत्र प्रदीयन्ते।

परिच्छेदः - १ कविपरिचयः (पाठाः १-३)

अध्यायस्य औचित्यम्

यैः कविभिः संस्कृतं रम्यं कृतं, काव्यावदानेन पोषितं तेषां देशकालकृति-विषये रसिकानां जिज्ञासा स्वाभाविकी एव। तदेवात्र किञ्चित् उपन्यस्यन्ते।

परिच्छेदः - २ काव्याध्ययनम् - १ (पाठाः ४-११)

अध्यायस्य औचित्यम्

कविकुलगुरुः कालिदासः। तस्य श्रेष्ठा रचना रघुवंशम्। छात्राः कालिदासशैल्या रघुवंशं जानीयुः, तन्माध्यमेन काव्यरसास्वादं कुर्युः इति अत्र रघुवंशस्य प्रथमसंसर्गतः कश्चिदंशः अत्र उपादाय व्याख्यास्यते।

नैके काव्यस्य प्रकाराः। स्तोत्रं जनानां मनांसि रमयति। अतः बोधाय मोदाय च सुप्रसिद्धं स्तोत्रम् मोहमुद्गराख्यमत्र प्रदीयते। अम्बिकादास्य गद्यकाव्यं शिवराजविजयः अति प्रसिद्धम्। तस्य अंशविशेषाः अत्र उपस्थाप्यन्ते।

परिच्छेदः - ३ काव्याध्ययनम् - २ (पाठाः १२-१९)

अध्यायस्य औचित्यम्

उत्तररामचरितं नाम नाटकं भवभूतेः सर्वोत्कृष्टं दानं मन्यन्ते विद्वांसः। अत्र रामायणस्य उत्तरार्धं वर्णितम्। नाटकमिदं सप्ताङ्कात्मकं वर्तते। लङ्कायाः महारणे श्रीरामेण रावणं निहत्य सीता अशोकवनात् उद्धृता। ततः वनवासं समाप्य अयोध्यां प्रत्यागतः। ततः रामस्य राज्याभिषेकः सम्पन्नः। ततः आरभ्य सीतया सह विच्छेदः पुत्रयोः लवकुशयोः जन्म सीतया सह पुनर्मिलनपर्यन्तं नाटकमिदं परिव्याप्तम्। तस्य कश्चिदंशः अत्र उपस्थाप्यते।

बाणभट्टः गद्यकाव्यरचनायां पटुतमः। तस्य किमपि गद्यकाव्यं छात्रैरवश्यपठनीयमिति हेतोः कादम्बर्याः कथाभागस्य एकः अंशः शुकनासोपदेशः अत्र प्रतिपाद्यमानो विषयः। प्रभुत्वलाभे युकवस्य या विपत् सम्भवति तद्विषये शुकनासेन कृतः उपदेशोऽत्र मुख्योस्ति। केनापि युवकेन नूनमयं विषयोऽध्येतव्य इति प्रासङ्गिकता तस्य।

परिच्छेदः - ४ काव्यदर्पणः (पाठाः २०-२७)

अध्यायस्य औचित्यम्

काव्यरचनाया विज्ञानमस्ति। काव्यनिर्माणे ये नियमा अवलम्बनीयाः, काव्याध्ययनेऽपि ये नियमा अवश्यं ज्ञातव्या ते सर्वेऽपि नियमा रीतयः पद्धतयः काव्यशास्त्रे आलोच्यन्ते। तेषु केचिद् प्राथमिकतया ज्ञातव्या विषया अस्मिन् विभागे अन्तर्भवन्ति। अलंकारशास्त्रमपि तत् कथ्यते। अत्र अलंकारिकाणां परिचयोऽपि दीयते। अलंकारः वृत्तिः छन्दः रस इत्येते मुख्या विषया अत्र चिताः सन्ति।

पाठ्यविषयस्य उद्देशः (पाठ्यविषयबिन्दवः)

उच्चतरमाध्यमिककक्षायाः संस्कृतसाहित्यस्य पुस्तके निम्नविषयाः अन्तर्भवन्ति -

क्र.सं.		मुख्यबिन्दवः	स्वाध्यायाय होराः	भारांशः (अङ्काः)
१	प्रथमः परिच्छेदः	कविपरिचयः-	२४	८
	पाठः - १	कवीनां देशकालकृतिपरिचयः- वाल्मीकिः व्यासः भासः		
	पाठः - २	कवीनां देशकालकृतिपरिचयः- कालिदासः भारविः अश्वघोषः		
	पाठः - ३	कवीनां देशकालकृतिपरिचयः- श्रीहर्षः क्षेमेन्द्रः भवभूतिः कल्हणः शिवस्वामी		
२	द्वितीयः परिच्छेदः	काव्याध्ययनम् - १-	६०	३०
	पाठः - ४	रघुवंशम् (प्रथमसर्गः)- रघुवंशीयनृपाणां गुणवर्णनम् (१-१० श्लोकाः)		
	पाठः - ५	रघुवंशम् (प्रथमसर्गः)- राज्ञो दिलीपस्य गुणवर्णनम् - १ (११-२३ श्लोकाः)		
	पाठः - ६	रघुवंशम् (प्रथमसर्गः)- राज्ञो दिलीपस्य गुणवर्णनम् - २ (२४-३४ श्लोकाः)		
	पाठः - ७	रघुवंशम् (प्रथमसर्गः)- वशिष्ठाश्रमं प्रति गमनम् (३५-४८ श्लोकाः)		
		स्तोत्रादिसाहित्यम्-		
	पाठः - ८	स्तोत्रसाहित्यम् - - मोहमुद्गरः - अन्वयः व्याख्या, सरलार्थः, व्याकरणम्		
	पाठः - ९	ऐतिहासिकम् अर्वाचीनं काव्यम्- - शिवराजविजयः - बटुसंवादः		
	पाठः - १०	ऐतिहासिकम् अर्वाचीनं काव्यम्- - शिवराजविजयः - योगीराजसंवादः		
	पाठः - ११	ऐतिहासिकम् अर्वाचीनं काव्यम्- - शिवराजविजयः - यवनदुराचारः		

३	तृतीयः परिच्छेदः	काव्याध्ययनम् - २-	७०	३०
	पाठः - १२	उत्तररामचरितम् (प्रथमोङ्कः)- श्लोकस्य अन्वयः, अन्वयार्थः, गद्यवाक्यानां सरलार्थः, प्रयोजने सति व्याकरणटिप्पणी विशेषटिप्पणी च		
	पाठः - १३	उत्तररामचरितम् (प्रथमोङ्कः)- अष्टावक्रसंवादः		
	पाठः - १४	उत्तररामचरितम् (प्रथमोङ्कः)- चित्रदर्शनम् - १		
	पाठः - १५	उत्तररामचरितम् (प्रथमोङ्कः)- चित्रदर्शनम् - २		
	पाठः - १६	कादम्बरी - शुकनासोपदेशः- यौवनस्वभावः - गद्यवाक्यानाम् अन्वयार्थः, सरलार्थः, व्याकरणटिप्पणी विशेषटिप्पणी च		
	पाठः - १७	कादम्बरी - शुकनासोपदेशः लक्ष्माचापल्यम्-		
	पाठः - १८	कादम्बरी - शुकनासोपदेशःलक्ष्मीदुष्प्रभावः-१-		
	पाठः - १९	कादम्बरी - शुकनासोपदेशःलक्ष्मीदुष्प्रभावः-२-		
४	चतुर्थः परिच्छेदः	काव्यदर्पणः-	८६	३४
	पाठः - २०	अलंकारिकपरम्परापरिचयः- भरतः भामहः, दण्डी, वामनः, रुद्रटः, अभिनवगुप्तः , कुन्तकः - तेषां दशकालकृतयः		
	पाठः - २१	अलंकारिकपरम्परापरिचयः- आनन्दवर्धनः, अप्पय्यदीक्षितः, मम्मटः, भोजराजः, विश्वनाथः, जगन्नाथः - तेषां दशकालकृतयः		
	पाठः - २२	वाच्य-लक्ष्य-व्यङ्ग्यानां सामान्यपरिचयः		
	पाठः - २३	छन्दांसि- छन्दसां मात्रागणयतीनां परिचयः। छन्दोभेदाः।		
	पाठः - २४	छन्दांसि- मात्रिकच्छन्दांसि, वार्णिकच्छन्दांसि च चितानि। - अनुष्टुभ् इद्रवज्रा वसन्ततिलका मालिनी शार्दूलविक्रीडितम् इत्यादीनां केषांचित् छन्दसां लक्षणम्, लक्षणस्य व्याख्या, उदाहरणश्लोके समन्वयः		
	पाठः - २५	आलंकारपरियचः- अर्थालंकारः, शब्दालंकारः - सामान्यपरिचयः, अलंकारस्य प्रयोजनम्, लक्षणम्, लक्षणस्य बोधनम्, दृष्टान्तपुरःसरम् अन्वयः। केचित् मुख्यालंकाराः।		
	पाठः - २६	आलंकारपरियचः- उपमा, रूपकम्, दृष्टान्तः, उत्प्रेक्षा इत्यादयः केचित् मुख्यालंकाराः		
	पाठः - २७	रसपरिचयः- विभावादीनां परिचयः, सरस्वरूपपुरःसरं रसास्वादप्रकारः, रसभेदाः		

प्रश्नपत्रस्य प्रारूपम् (Question Paper Format)

विषयः - संस्कृतसाहित्यम् (३४८) (Sanskrit Sahitya)

स्तरः- उच्चतरमाध्यमिककक्षा

परीक्षाकालावधिः (Time)- होरात्रयम् (३ hrs)

पूर्णाङ्काः (Full Marks)- १००

लक्ष्यानुसारि अङ्कविभाजनम्

विषयाः	अङ्काः	प्रतिशतं योगः
ज्ञानम् (Knowledge)	२५	२५%
अवबोधः (Understanding)	४५	४५%
अनुप्रयोगकौशलम् (Application Skill)	३०	३०%
महायोगः->	**१००**	

प्रश्नप्रकारेण अङ्कभारविभाजनम्

प्रश्नप्रकारः	प्रश्नसंख्या	अङ्काः	योगः
दीर्घोत्तरीयप्रश्नाः (LA)	५	६	३०
लघूत्तरात्मकप्रश्नाः (SA)	१०	४	४०
सुलघूत्तरीयप्रश्नाः (VSA)	१०	२	२०
बहुविकल्पीयप्रश्नाः एकाङ्कप्रश्नाः स्तम्भमेलनं रिक्तस्थानपूर्तिः च	१०	१	१०
महायोगः->	**३५**		**१००**

पाठ्यविषयविभागानुसारि भारांशः

विषयघटकाः	अङ्काः	स्वाध्यायाय होराः
१. कविपरिचयः	८	२४
२. काव्याध्ययनम् - १	२८	६०
३. काव्याध्ययनम् - २	३०	७०
४. काव्यदर्पणः	३४	८६
महायोगः ->	**१००**	**२४०**

प्रश्नपत्रस्य काठिन्यस्तरः

प्रश्नस्तरः	अङ्काः
कठिनः (Difficult) (मेधावी एव उत्तरदाने समर्थः)	२५
मध्यमः (Medium) (नित्यं पठन् अध्यवसायी छात्रः उत्तरदाने समर्थः)	५०
सरलः (Easy) (समग्रां पाठसामग्रीम् अल्पशः पठन् छात्रः उत्तरदाने समर्थः)	२५

प्रश्नपत्रप्रतिमा

अस्मिन् प्रश्नपत्रे ... प्रश्नाः सन्ति। .... मुद्रितपुटानि च सन्ति।

Roll No. अनुक्रमाङ्कः	४	५	०	१	५	९	१	८	३	०	०	१

Code No. गूढसंख्या **५५/SS/A/S**

SET स्तबकः **A**

संस्कृतसाहित्यम्

Sanskrit Sahitya

(३४८)

Day and Date of Examination
परीक्षादिनं दिनाङ्कश्च ..... _____

Signature of two Invigilators
निरीक्षकयोः हस्ताक्षरम्

१) _____

२) _____

सामान्या निर्देशाः

१) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

२) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

३) वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।

४) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

५) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

६) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।

७) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

संस्कृतसाहित्यम् (Sanskrit Sahitya)

(३४८)

परीक्षासमयावधिः (Time) होरात्रयम् (३ Hrs) **पूर्णाङ्काः (Full Marks) - १००**

निर्देशाः -

१) अस्मिन् प्रश्नपत्रे [A] भागे १०, [B] भागे १०, [C] भागे १०, [D] ५ इति आहत्य ३५ प्रश्नाः सन्ति।

२) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःx प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

३) समे प्रश्ना अनिवार्याः।

[A] दशानां युक्तं विकल्पं चिनुत। १ x १०=१०

१) मायणे कति काण्डानि सन्ति।
(क) सप्त (ख) अष्टौ (ग) नव (घ) दश।

२) द्वादशपञ्जरिकास्तोत्रानुसारं मरणे सन्निहिते कः रक्षति।
(क) गोविन्दः (ख) शिवः (ग) ब्रह्मा (घ) कार्तिकः

३) अरुण एष प्रकाशः इति कस्मिन् काव्ये अस्ति।
(क) शिवराजविजयः (ख) किरातार्जुनीयम् (ग) मेघदूतम् (घ) अभिज्ञानशाकुन्तलम्

४) दाक्षिणात्यकेशरी कः।
(क) शिवराजः (ख) गौरसिंहः (ग) अफजलखानः (घ) श्यामवटुः

५) लक्ष्मीः कं दुःस्वप्नमिव न स्मरति।
(क) दातारम् (ख) सूजनम् (ग) शूरम् (घ) सरस्वतीपरिगृहीतम्

६) लौकिकं छन्दः कतिविधम् अस्ति।
(क) द्विविधम् (ख) त्रिविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्।

७) स च नित्यं प्रशान्तात्मा इत्यादिश्लोकः कस्मिन् स्तोत्रे अस्ति।
(क) द्वादशपञ्जरिका (ख) श्रीरामगुणवर्णना (ग) शिवताण्डवस्तोत्रम् (घ) अच्युताष्टकम्

८) वृत्तं कतिविधं वर्तते।
(क) द्विविधम् (ख) त्रिविधम् (ग) चतुर्विधम् (घ) पञ्चविधम्।

९) भासस्य का कृतिः वर्तते।
(क) रामायणम् (ख) महाभारतम् (ग) स्वप्नवासवदत्तम् (घ) उत्तररामचरितम्।

१०) रामलक्ष्मणयोः जटाबन्धं कुत्र जातम्।
(क) अयोध्यायाम् (ख) किष्किन्धायाम् (ग) जनस्थाननामकारण्ये (घ) शृङ्गवेरपुरे

[B] दशानां यथानिर्देशम् उत्तराणि लिखत। २ x १०=२०

१) अलङ्कारशब्दस्य करणपक्षे व्युत्पत्तिः का। अलङ्कारशब्दस्य भावपक्षे व्युत्पत्तिः का। १+१=२

२) कादम्बरीं कः रचितवान्। कादम्बरी कथा उत आख्यायिका। १+१=२

३) भामहः कं ग्रन्थं लिखितवान्। कस्य सम्प्रदायस्य प्रवर्त्तकः अस्ति। १+१=२

४) वामनः कुत्रत्यः। वामनस्य कालः कः। १+१=२

५) अलङ्कारः कतिविधः भवति। ते च के। १+१=२

६) भरतः कं ग्रन्थं लिखितवान्। कस्य सम्प्रदायस्य प्रवर्त्तकः अस्ति। १+१=२

७) अलङ्कारसम्प्रदायस्य प्रवर्त्तकः कः। तस्य मते काव्यस्य आत्मा कः। १+१=२

८) सन्निहिते मरणे किन्न रक्षति। केन चित्तं विनोदनीयम्। १+१=२

९) सूर्यः किम् समुद्भूय कस्मै निवेदयितुं च अस्तं गतः। १+१=२

१०) अलङ्कारः काव्यस्य स्थिरधर्मः अस्ति न वा। अलङ्कारः काव्यस्य किं वर्धयति। १+१=२

[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) किं महत् अवधानम्। जीवनं कीदृशम् इति साकल्येन वर्णयत।

२) श्रीरामस्य गुणान् स्वभाषया प्रकटय्य तस्य राज्यकौशलं वर्णयत।

३) महमदस्य अधमताम् वर्णयित्वा दक्षिणदेशं वर्णयत।

४) रामः कथं लोकनिन्दां कृतवान् अथवा प्रस्रवणगिरेः यथाग्रन्थं वर्णनं कुरुत।

५) धनातिशयः कुतो न शोभते। अथवा मुनयः विन्ध्यारण्ये जीवनं कथं यापयन्ति स्म।

६) अलसलुलित... इति प्रतीकोद्धृतं श्लोकम् सम्पूर्णम् उद्धृत्य व्याख्यात। अथवा सीताया आजीवनपवित्रताविषये श्रीरामेण किमुक्तम्।

७) श्रियो दुश्चरितं वर्ण्यताम्। अथवा कुतः अयं गुरूपदेशः अनन्यः।

८) समवृत्तम् अथवा विषमवृत्तम् अवलम्ब्य एकं लघुप्रबन्धं लिखत।

९) मात्रिकच्छन्दः अथवा वार्णिकच्छन्दः अवलम्ब्य लघुप्रबन्धं लिखत।

१०) वंशस्थतोटकयोः एकस्य च्छन्दसः लक्षणम् उक्त्वा उदाहरणे लक्षणसमन्वयः कार्यः।

[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) शिववीरगौरसिंहयोः आलापं वर्णयत। तौ महान्तौ धर्मस्य कृते किं किं कष्टं सहेते स्म। अथवा श्रीरामस्य गुणान् वर्णयित्वा राज्यचालनकौशलं वर्णयत।

२) आज्ञा गुरूणां ह्यविचारणीया इति सूक्तिं समर्थयत। अथवा भवभूतिं परिचाययत।

३) सीतया कृतं रामवर्णनं यथामति उपस्थापयत। अथवा उत्तररमाचरितस्य मङ्गलश्लोकं व्याख्यात।

४) उपमाम् अथवा अतिशयोक्तिम् अलङ्कारं वर्णयत।

५) रूपकम् अथवा समासोक्तिम् अलङ्कारं वर्णयत।

--)(O)(--

प्रश्नपत्रप्रतिमाया उत्तरमाला

[A] दशानां युक्तः विकल्पः। १ x १०=१०

१-(क), २-(क), ३-(क), ४-(क), ५-(क), ६-(क), ७-(ख), ८-(ख), ९-(ग), १०-(घ)

[B] दशानां यथानिर्देशम् उत्तराणि। २ x १०=२०

१) अलङ्क्रियते अनेन इति अलङ्कारः इति करणपक्षे व्युत्पत्तिः। अलङ्कृतिः अलङ्कारः इति भावपक्षे व्युत्पत्तिः।१+१=२

२) कादम्बरीं बाणभट्टः रचितवान्। कादम्बरी कथा अस्ति। १+१=२

३) काव्यालङ्कारः, अलङ्कारसम्प्रदायस्य। १+१=२

४) काश्मीरीयः, अष्टमशतकोत्पन्नः। १+१=२

५) त्रिविधः। शब्दालङ्कारः, अर्थालङ्कारः, शब्दार्थालङ्कारः। १+१=२

६) नाट्यशास्त्रम्, रससम्प्रदायस्य। १+१=२

७) भामहः। अलङ्कारः। १+१=२

८) सन्निहिते मरणे डुकृञ् करणे इत्यादिव्याकरणशास्त्रादिकं न रक्षति।
स्वकर्मणा उपार्जितेन धनेन चित्तं विनोदनीयम्। १+१=२

९) सूर्यः पूर्वदिशं समुद्भूय विष्णवे निवेदयितुं च अस्तं गतः। १+१=२

१०) स्थिरधर्मः न भवति। शोभाम् वर्धयति। १+१=२

[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) पाठः- ८ द्रष्टव्यः

२) पाठः- ८ द्रष्टव्यः

३) पाठः- ९ द्रष्टव्यः

४) पाठः- ११ / १२ द्रष्टव्यः

५) पाठः- १३ / १२ द्रष्टव्यः

६) पाठः- १२ / १० द्रष्टव्यः

७) पाठः- १४ / १३ द्रष्टव्यः

८) पाठः- २२.४.१ / २२.४.३ द्रष्टव्यः

९) पाठः- २३.१ / २२ द्रष्टव्यः

१०) बिन्दुः- २३.२.५ / २३.२.६ द्रष्टव्यः

[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) पाठः- ९ / ८ द्रष्टव्यः

२) पाठः- १३ / १० द्रष्टव्यः

३) पाठः- ११ / १० द्रष्टव्यः

४) बिन्दुः- २५.२ / २५.९ द्रष्टव्यः

५) बिन्दुः- २५.४ / २५.८ द्रष्टव्यः

--)(O)(--